"सिद्धो लोकोत्तराभिख्यां केवलाख्यामकेवलाम्। अनूपमामनन्तां तामनुबोभूयते श्रियम्॥" इति वादीभसिंहेनोक्तत्वात्।

तथा च प्रतिज्ञाहानिः जीवन्मुक्तस्यात्राधिकृतत्वात् इत्यत्राह—धर्मचक्रेति। द्वितीयदिवसकरप्रतिबिम्ब-बिम्बशङ्काकरजाज्वलद्धर्मचक्रायुधं बिभर्ति धर्मचक्रभृत् "स्फुरदरसहस्ररुचिर" इत्यादि प्रवचनात् "धर्मचक्रायुधो देवः" इति वचनाच्च, तस्मै। जीवन्मुक्तस्यैव धर्मचक्रायुधेन योग इति प्रकृतार्थस्यैव स्वीकरणात्। अनेन तदविनाभूतं समवसरणादिकमप्युपलक्षितम्। अथवा विशेष्यस्य उभयलक्ष्मीरमणत्वस्य व्यावर्णनया एतद्द्वयं संभवद्विशेषणं "सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्" इति न्यायात्।

किं च सकलज्ञानसाम्राज्यपदप्राप्तिः कस्यायुधस्य धारणयेत्यत्र धर्मेति। धर्मः चरित्रम् "चारित्तं खलु धम्मो" इति कुन्दकुन्दस्वामिभिर्निरूपितत्वात्। तदत्र प्रकरणबलात् यथाख्यातचारित्रं तदेव चक्रमिव चक्रं दुर्जयघातिकर्मारिनिर्जयेन सकलसाम्राज्यपदप्राप्तिहेतुत्वात्। तत्सदा बिभर्ति इति धर्मचक्रभृत् तस्मै, अनेन यथाख्यातचारित्रस्य घातिकर्मारिनिर्जयेन सकलज्ञानसाम्राज्यपदप्राप्तेः साध्यसाधनभावः कथञ्चिन्निरतिशयं सानुग्राहकत्वं चोपढौकितम्।

ननु निरतिशयं परानुग्राहकेणापि भवितव्यम्। यतः तन्नमस्कारः फलतीतीत्यत्राह—भर्त्रे इति, विश्वं जगत् बिभर्ति पुष्णात्येवंशीलो भर्ता तस्मै भर्त्रे विश्वस्य जगतः स्वामिने पोषणनिरताय, अनेन अपारानुग्रहशीलत्वमुक्तम्। कुतोऽयं निरतिशयं परानुगृह्णातीति निश्चयः? इत्यत्रोत्तरयति "संसारेति"। अत्र 'गुरवो राजमाषा न भक्षणीयाः" इत्यादिवत् संसारिणां संसारभीमुट्त्वादिहेतुगर्भविशेषणेन उत्तरमिति निर्णयः। स्वभर्तृत्वस्य स्वसंसारभीमुट्त्वस्य च प्रागुक्तविशेषणद्वयेनैव व्यज्यमानत्वात्। क्षुधातृषाजननमरणादिनानाघोरदुःखानामाकरः संसारः भव इति यावत्। "क्षुत्तृष्णाश्वासकासज्वरमरणजरारिष्टयोगप्रमोहव्यापत्त्याद्युग्रदुःखप्रभवभवहृते"रिति पूज्यपादैर्निगदितत्वात्, तस्माद्भीः तां मुष्णाति लुण्टयतीति संसारभीमुट्, तस्मै। अत्र संसारिणां संसारभयलुण्टाकत्वव्यावर्णनया निरायासेन संसारभयापहरणदक्षचातुर्यातिशयः प्रकाशितः तीर्थंकरसत्कर्मणः तस्य तादृग्विधातिशयस्य दुर्वारसंसारविच्छेदोपायनियुक्तदिव्यध्वनिप्रवर्तनामात्रेणैव संसिद्धेः। तदेवं विश्वविद्यापरमेश्वरस्य विश्वस्य

पदको प्राप्त है, (सकलाश्च ये ज्ञाश्च सकलज्ञाः, सकलज्ञानाम् असं जीवनं यस्मिंस्तत् तथाभूतं यत्साम्राज्यपदं तत् ईयुषे) जो पूर्व जन्ममें किए हुए धर्मके फलस्वरूप चक्ररत्नको धारण करता है, (धर्मेण पुराकृतसुकृतेन प्राप्तं यच्चक्रं तद् बिभर्तीति तस्मै) जो, षट्खण्ड भरतक्षेत्रकी रक्षा करनेवाला है और जिसने संसारके जीवोंका भय नष्ट किया है अथवा षट्खण्ड भरत-क्षेत्रमें सब ओर भ्रमण करनेमें जिसे किसी प्रकारका भय नहीं हुआ है (समन्तात् सरणं भ्रमणं संसारस्तस्मिन् भियं मुष्णातीति तस्मै) अथवा जो समीचीन चक्रके द्वारा सबका भय नष्ट करनेवाला है (अरैः सहितं सारं चक्ररत्नमित्यर्थः, सम्यक् च तत् सारञ्च संसारं तेन भियं मुष्णातीति तस्मै) ऐसे तद्भवमोक्षगामी चक्रधर भरतको नमस्कार है।

बाहुबलीके पक्षमें निम्न प्रकार व्याख्यान है–जो भरत चक्रधरको त्रिविध युद्धमें परास्त कर अद्भुत शौर्यलक्ष्मीसे युक्त हुए हैं जो धर्मके द्वारा अथवा धर्मके लिए चक्ररत्नको

जगतः सम्यक् समुद्धरणपाण्डित्यपराकाष्ठामधिष्ठितस्य परमात्मस्यादिब्रह्मणः पारमेश्वर्यं चतुरलौकिकजनेऽपि प्रथयितुं श्रीमत्साम्राज्यपदचक्रभृत् भर्तृभीमुट्पदप्रयोगसामर्थ्यात्भरतचक्रधरवदितीव श्रुतेरभावाच्च व्यङ्ग्यतया भरतचक्रधरेणोपमालङ्कारः प्रथते। तथा हि–यथाभूतसंरक्षणादिक्षात्रधर्मस्य रक्षितयक्षसहस्रचक्ररत्नस्य च धारणया धर्मचक्रभृत् भरतचक्रवर्ती।

अथवा कैवल्याद्युदयत्रये निवेदिते धर्ममेव बहु मन्वाना कैवल्यपूजां विधाय 'संचितधर्मा तदनुचक्रं पूजयामासेति' स्मृतेर्धर्मादनन्तरं चक्ररत्नं बिभर्ति–पुष्णाति–पूजयति–धरतीति वा धर्मचक्रभृदिति भरत एव प्रोच्यते। स च सम्यग्दर्शनादिरूपधर्मसम्पत्त्या नवनिध्यादिजनितार्थसम्पत्त्या सुभद्रमहादेव्यादिवस्तु कृतकाम-सम्पत्त्या "श्रीमान्" आदिब्रह्मोपदिष्टकलासहितज्ञानपदप्राप्त्या साम्राज्यपदप्राप्त्या च सकलज्ञानसाम्राज्यपद-मासवान् षट्खण्डभूमण्डलस्वामित्वेन भर्ता संक्षोभेण सारयन्ति इतस्ततो गमयन्ति जनान् इति णिजन्तात्कर्तरि यचि, संसाराश्चोरचरटमन्त्रयादयो (?) राष्ट्रकण्टकाः तेभ्यो जनतानां भियं स्वप्रतापेन मुष्णातीति संसारभीमुट जनतायाः नमस्याश्रयो भवति। तथा सद्धर्मचक्रवर्तित्वेन चक्रभृदयं आदितीर्थेश्वरः, बहिरङ्गलक्ष्म्या संयुक्तत्वेन अन्तरङ्गलक्ष्मीभिर्नित्ययुक्तत्वेन श्रीमान् गणधराहमिन्द्रदेवेन्द्रचक्रवर्त्यादिप्रार्थनीयं सकलज्ञानसाम्राज्यपदमधि-तिष्ठन् त्रिजगतो भर्ता जनताया आजवंजवदस्युभयलुण्टाकत्वेन संसारभीमुट्–अनन्तानन्तसुखदायकस्य महा-पुरुषस्य नमस्याश्रयो न स्यात् इति।

अथवा षट्खण्डभर्तृचक्रधरात्त्रिजगत्स्वामिनः श्रीमत इत्यादिपु सर्वत्राधिक्यात् व्यतिरेकालङ्कारो वा ध्वन्यते सादृश्यमात्रापेक्षया प्रागुपमालङ्कारस्य प्रकाशितत्वात्। नन्वेवंविधप्रथमानुयोगमहाशास्त्रस्यादौ पञ्चपर-मेष्ठिनां नमस्कारं भगवानाचार्यः कुतो नाङ्गीचकार भूतबलिभट्टारकैर्महाकर्मप्रकृतिप्राभृतद्रव्यानुयोग-महाशास्त्रस्यादावनादिसिद्धपञ्चमहाशब्दैः पञ्चपरमेष्ठिनां नमस्कारकरणादित्याकाङ्क्षायां श्रीमदित्यादि पञ्चपदरत्न-प्रदीपाः पञ्चपरमेष्ठिनां प्रकाशकत्वेन नमः शिखया प्रज्वलन्तीत्याह श्रीमत इत्यादि "श्रीमते नमः"। एवं सर्वत्र सम्बद्धव्यम्। 'श्रीरार्हन्त्यमहिमावातिकर्मारिनिर्जयप्रादुर्भूतनवकेवललब्ध्याद्यात्मा 'श्रीरार्हन्त्यमहिमेति' न्यासकार-वचनात्। सोऽस्यास्तीति श्रीमान् तस्मै श्रीमते नमः, अर्हते नमः, 'णमो अरहंताणं' इति यावत्–

"केवलणाणदिवायरकिरणकलावप्पणासि अण्णाणो। णवकेवललद्धुग्गमसुजणिय परमप्पववएसो।"

इत्यर्हल्लक्षणप्रतिपादकप्रवचनसद्भावात्। अनन्तानन्तस्वविभागैः सम्पूर्णत्वात् सकलं तत्त्व तज्ज्ञानं च सकलज्ञानम् उपलक्षणात् सम्यग्दर्शनादिसप्तगुणानां ग्रहणं ततस्तत्सहितं तदेव साम्राज्यपदं गुणाष्टक-साम्राज्यपदमिति यावत्। अथवा सकलैर्देशोपदेशैरेकार्थसमवायिभिः क्षायिकसम्यग्दर्शनादिसप्तगुणैः

धारण करनेवाले भरतके स्तवन आदिसे केवलज्ञानरूप साम्राज्यके पदको प्राप्त हुए हैं। एक वर्षके कठिन कायोत्सर्गके बाद भरत द्वारा स्तवन आदि किए जानेपर ही बाहुबली

सहितं च तज्ज्ञानं च सकलज्ञानं तदेव साम्राज्यपदम्। अथवा सकलज्ञानामनन्तानन्तानां सर्वज्ञानाम् आनः प्राणनं विशुद्धचैतन्यमयभावप्राणैर्जीवनमत्रेति। सकलज्ञानः तनुवातस्त्वेवमुच्यते तदेव साम्राज्यपदं सकलज्ञान-साम्राज्यपदं तदीयविषये प्राप्तवते नमः सिद्धपरमेष्ठिने नमः 'णमो सिद्धाणमिति' यावत् "अट्टगुणा किदकिचा लोयग्गणिवासिणो सिद्धा" इति प्रवचनात्। स्वयमाचरन् धर्मः सम्यग्दर्शनाचारादिपञ्चाचारैर्यथायथं चक्रं द्वादशगणं बिभर्तीति धर्मचक्रभृत् गणधर आचार्यवृषभः तस्मै धर्मचक्रभृते नमः आचार्यपरमेष्ठिने नमः 'णमो आइरियाणमिति' यावत्।" पञ्चमुक्त्यै स्वयं ये आचारानाचरन्तः परमकरुणयाचारयन्ते मुमुक्षून् लोकाग्रगण्यशरण्यान् गणधरवृषभान्" इत्याशाधरैर्निरूपणात्। षड्द्रव्यसप्ततत्त्वादीनां सदोपदेशेनैव मुमुक्षून् बिभर्त्ति पुष्णातीत्येवंशीलो भर्ता तस्मै भर्त्रे नमः उपाध्यायपरमेष्ठिने नमः 'णमो उवज्झायाणमिति' यावत् "जो रयण-त्तयजुत्तो णिच्चं धम्मोवदेसणे णिरदो। सो उवज्झाओ अप्पा जदिवरउसहो णमो तस्स" इत्यागमात्। सद्ध्याननिलीनः सन् दर्शनज्ञानसमग्रभावमोक्षस्य साधकतमं विशुद्धचारित्रं नित्यं साधयन् यतीन्द्रो भावसंसार-भियं मुष्णातीति संसारभीमुट् तस्मै संसारभीमुषे नमः साधुपरमेष्ठिने नमः 'णमो लोए सव्वसाहूणमिति' यावत्। "दंसणणाणसमग्गं मग्गं मोक्खस्स जोहु चारित्तं। साधयदि सुद्धणिच्चं साहू स मुणी णमो तस्स॥" इति प्रवचनात्। अत्र-इतरपदवत् चतुर्थीविभक्त्यन्तत्वेन पदत्वं हित्वा सकलज्ञानसाम्राज्यपदमिति व्यासवचनन्तु मतमहातिशयज्ञापनार्थं प्रतिज्ञावचनमाचार्यस्येति क्रमः। तथाहि सकलतत्त्वव्यवस्थाजीवातुस्याद्वादामोघलाञ्छन-लाञ्छितत्वेन सर्वबाधाविधुरसाधनसाधितत्वेन सर्वोदयपरत्वेन च श्रीमदर्हन्मतं तीर्थं श्रीमतं "सर्वोदयं तीर्थमि-दन्तवैव" इति युक्त्यनुशासनात्। तस्मिन् श्रीमत एव सकलज्ञानसाम्राज्यपदं श्रीमत्त्वान्यथानुपपत्तेरिति। तदीयुषे इति सम्बन्धः। अत्र पुराणे न केवलमादितीर्थंकरः भरतधर्मचक्रभृच्छलाकापुरुषश्च प्रतिपाद्यत इति प्रकाशितः। अपरदानश्रेयोनृपतिप्रभृतिधार्मिकोत्तंसो जनोऽपीति प्रतिपाद्यार्थं प्रकाशयन्ति श्रीमत इति। श्रीमतिपर्यायोऽस्या-स्तीति श्रीमतः 'अभ्रादिभ्यः' इत्यद्विधानात् दानश्रेयो नृपतिरित्यर्थः तस्य श्रीमतिचरत्वात् तस्मिन् सति सकलज्ञानसाम्राज्यपदमीयुषे इति सम्बन्धः इत्यनेन नानाकथासम्बन्धो दानतीर्थंकरश्च प्रतिपाद्य इति प्रकाशितः।

'जीयाज्जिनो जगति नाभिनरेन्द्रसूनुः श्रेयान् नृपश्च कुरुगोत्रगृहप्रदीपः।
याभ्यां बभूवतुरिह व्रतदानतीर्थे सारक्रमे परमधर्मरथस्य चक्रे॥'

इति दानतीर्थंकरत्वप्रसिद्धेः। किञ्च सर्वपादाद्यक्षराणां पठनेन श्रीसाधनमिति प्रयोजनप्रतिपादनातिशयः सद्धर्मलक्ष्म्यां प्रेक्षावद्भिरवगन्तव्य इत्युपरम्यते। अत्रैव पुनः प्रेक्षावतामानन्दकन्दल्यां नाम्न्यां श्रीमद्वेणुपुरभव्यजनं सम्बोधयन्नाचार्यः प्रश्नोत्तरेण सद्धर्मसर्वस्वरहस्यमत्रैवेत्यन्तर्लापित्वेन हृदयमाशिषमाह—श्रीमत इति। लक्ष्म्यां वा मतिर्यस्य असौ श्रीमतिः तस्य सम्बुद्धिः श्रीमते! भो भो भरतसौधर्माधिपतिदुर्लभकलियुगजैनमार्गप्रभाव-भासन्तोषितसौधर्मेन्द्रलौकान्तिकेन्द्रविदेहचक्रीन्द्रसालुविम्मणिदेवेन्द्र! अभ्युदयनिःश्रेयसलक्ष्मीस्वहस्तात्करण-लोलुपबुद्धे! सकलज्ञानसाम्राज्यपदं क्वेति जिज्ञासायां श्रीमत एव अर्हच्छासन एव तस्मिन् सति सकलज्ञान-साम्राज्यपदमीयुषे धर्मचक्रभृते भर्त्रे संसारभीमुषे श्रीमते आदीश्वराय अथवा पार्श्वतीर्थंकृत्सम्मुखीनत्वादि प्रकरणबलात् भुवं धरतीति धर्मो धरणीन्द्रस्तं चक्राकारेण वलयाकारेण समीपे बिभर्तीति धर्मचक्रभृत् पार्श्वतीर्थंकरः तस्मै शेषविशेषणविशिष्टाय श्रीमत्पार्श्वतीर्थंकृते नमस्कुरु यतस्ते सुरासुरेन्द्रमकुटतटगत-दिव्यमणिकिरणजालबालातपकवचितचारुचरणारविन्दतीर्थंकरपरमदेवमिरतिशयकल्याणपरम्परा स्यादिति सर्वे समन्ततो भद्रम्।

नमस्तमःपटच्छन्नजगदुद्योतहेतवे । जिनेन्द्रांशुमते तन्वत्प्रमा[1]भाभारभासिने ॥ २ ॥
जयत्यजय्यमा[3]हात्म्यं विशा[4]सितकुशासनम् । शासनं जैनमुद्भासि मु[5]क्तिलक्ष्म्येकशासनम् ॥ ३ ॥
रत्नत्रयमयं जैनं[6] जैत्रमस्त्रं जयत्यदः । येनाव्याजं व्य[7]जेष्टार्हन् दुरितारातिवाहिनीम् ॥ ४ ॥
यः साम्राज्यमधःस्थायि गीर्वाणाधिपवैभवम् । तृ[8]णाय मन्यमानः सन् प्राव्राजीदग्रिमः पुमान् ॥ ५ ॥

स्वामीने निःशल्य हो शुक्लध्यान धारणकर केवलज्ञान प्राप्त किया था । जो इभर्त्रे–(इश्चासौ भर्ता च तस्मै) कामदेव और राजा दोनों हैं अथवा ईभर्त्रे (या भर्ता तस्मै)–लक्ष्मीके अधिपति हैं और कर्मबन्धनको नष्ट कर संसारका भय अपहरण करनेवाले हैं ऐसे श्री बाहुबली स्वामीको नमस्कार हो ।

इस पक्षमें श्लोकका अन्वय इस प्रकार करना चाहिए--श्रीमते, धर्मचक्रभृता सकलज्ञानसाम्राज्यपदमीयुषे, संसारभीमुषे इभर्त्रे नमः ।

वृषभसेन गणधर पक्षमें व्याख्यान इस प्रकार है । श्रीमते यह पद चतुर्थ्यन्त न होकर सप्तम्यन्त है–(श्रिया–स्याद्वादलक्ष्म्या उपलक्षितं मतं जिनशासनं तस्मिन्) अतएव जो स्याद्वादलक्ष्मीसे उपलक्षित जिनशासन–अर्थात् श्रुतज्ञानके विषयमें परोक्ष रूपसे समस्त पदार्थोंको जाननेवाले ज्ञानके साम्राज्यको प्राप्त हैं, जो धर्मचक्र अर्थात् धर्मोंके समूहको धारण करनेवाले हैं-पदार्थोंके अनन्त स्वभावोंको जाननेवाले हैं, मुनिसंघके अधिपति हैं और अपने सदुपदेशोंके द्वारा संसारका भय नष्ट करनेवाले हैं ऐसे वृषभसेन गणधरको नमस्कार हो ।

"भुवं धरतीति धर्मो धरणीन्द्रस्तं चक्राकारेण वलयाकारेण समीपे बिभर्तीति धर्मचक्रभृत् पार्श्वतीर्थंकरः तस्मै" । उक्त व्युत्पत्तिके अनुसार 'धर्मचक्रभृते' शब्दका अर्थ पार्श्वनाथ भी होता है अतः इस श्लोकमें भगवान् पार्श्वनाथको भी नमस्कार किया गया है । इसी प्रकार जयकुमार, नारायण, बलभद्र आदि अन्य कथानायकोंको भी नमस्कार किया गया है । विशेष व्याख्यान संस्कृत टिप्पणसे जानना चाहिए । इस श्लोकके चारों चरणोंके प्रथम अक्षरोंसे इस ग्रन्थका प्रयोजन भी ग्रन्थकर्ताने व्यक्त किया है—'श्रीसाधन' अर्थात् कैवल्यलक्ष्मीको प्राप्त करना ही इस ग्रन्थके निर्माणका प्रयोजन है ॥१॥

जो अज्ञानान्धकार रूप वस्त्रसे आच्छादित जगत्को प्रकाशित करनेवाले हैं तथा सब ओर फैलनेवाली ज्ञानरूपी प्रभाके भारसे अत्यन्त उद्भासित–शोभायमान हैं ऐसे श्रीजिनेन्द्र रूपी सूर्यको हमारा नमस्कार है ॥२॥ जिसकी महिमा अजेय है, जो मिथ्यादृष्टियोंके शासनका खण्डन करनेवाला है, जो नय प्रमाणके प्रकाशसे सदा प्रकाशित रहता है और मोक्षलक्ष्मी का प्रधान कारण है ऐसा जिनशासन निरन्तर जयवन्त हो ॥३॥ श्री अरहन्त भगवान्ने जिसके द्वारा पापरूपी शत्रुओंकी सेनाको सहजही जीत लिया था ऐसा जयनशील जिनेन्द्र-प्रणीत रत्नत्रयरूपी अस्त्र हमेशा जयवन्त रहे ॥४॥ जिन अग्रपुरुष–पुरुषोत्तमने इन्द्रके वैभवको तिरस्कृत करनेवाले अपने साम्राज्यको तृणके समान तुच्छ समझते हुए मुनिदीक्षा धारण की

---

१ तत्त्वप्रमाभा–अ०, प०, स०, द०, ल० । २ प्रकृष्टज्ञानम् । ३ -त्म्यविशा–स० । ४ विनाशित । ५ मुक्तिलक्ष्म्या एकमेव शासनं यस्मात् तत् । ६ जिनस्येदम् । ७ पराव्येर्जेरिति सूत्रादात्मनेपदी । ८ तृणं मन्यमानः 'मन्यस्योकाकादिषु यतोऽवज्ञा' इति चतुर्थी ।

[1]यमनुप्राव्रजन् भूरि सहस्राणि महीक्षिताम् । इक्ष्वाकुभोजमुख्यानां[2] स्वामिभक्त्यैव केवलम् ॥ ६ ॥
कच्छाद्या यस्य सद्वृत्तं निर्वोढुमसहिष्णवः । [3]वसानाः पर्णवल्काद्यान् वन्यां [4]वृत्तिं प्रपेदिरे ॥ ७ ॥
[5]अनाश्वान्यस्तपस्तेपे[6] चिरं सोढ्वा परीषहान् । सर्वंसहत्वमाध्याय[7] निर्जरासाधनं परम् ॥ ८ ॥
चिरं तपस्यतो यस्य जटा मूर्ध्नि बभुस्तराम् । ध्यानाग्निदग्ध[8]कर्मेन्धननिर्यद्धूमशिखा इव ॥ ९ ॥
मर्यादाविष्क्रिया[9]हेतोर्विहरन्तं यदृच्छया । चलन्तमिव हेमाद्रिं ददृशुर्यं सुरासुराः ॥१०॥
श्रेयसि [10]प्रयते दानं यस्मै दत्वा प्रसेदुषि[11] । पञ्चरत्नमयीं वृष्टिं ववृषुः सुरवारिदाः ॥११॥
[12]उदपादि विभोर्यस्य घातिकर्मारिनिर्जयात् । केवलाख्यं परं ज्योतिर्लोकालोकावभासकम् ॥१२॥
येनाभ्यधायि सद्धर्मः कर्मारातिनिबर्हणः । सदःसरोमुखाम्भोजवनदीधितिमालिना ॥१३॥
यस्मात् स्वान्वयमाहात्म्यं शुश्रुवान् [13]भरतात्मजः । सलीलमनटत्प्रा[14]चञ्चच्चीवरवल्कलः[15] ॥१४॥
तमादिदेवं नाभेयं वृषभं वृषभध्वजम् । [16]प्रणौमि [17]प्रणिपत्याहं [18]प्रणिधाय मुहुर्मुहुः ॥१५॥
अजितादीन् महावीरपर्यन्तान् परमेश्वरान् । जिनेन्द्रान् [19]पर्युपासेऽहं धर्मसाम्राज्यनायकान् ॥१६॥
सकलज्ञानसाम्राज्ययौवराज्यपदे स्थितान् । [20]तोष्टवीमि गणाधीशानाप्तसंज्ञानकण्ठिकान् ॥१७॥

थी जिनके साथ ही केवल स्वामिभक्तिसे प्रेरित होकर इक्ष्वाकु और भोजवंशके बड़े बड़े हजारों राजाओंने दीक्षा ली थी। जिनके निर्दोष चरित्रको धारण करनेके लिए असमर्थ हुए कच्छ महाकच्छ आदि अनेक राजाओंने वृक्षोंके पत्ते तथा छालको पहिनना और वनमें पैदा हुए कंद-मूल आदिका भक्षण करना प्रारम्भ कर दिया था। जिन्होंने आहार पानीका त्यागकर सर्वसहा पृथिवीकी तरह सब प्रकारके उपसर्गोंके सहन करनेका दृढ़ विचारकर अनेक परीषह सहे थे तथा कर्मनिर्जराके मुख्य कारण तपको चिरकाल तक तपा था। चिरकाल तक तपस्या करने वाले जिन जिनेन्द्रके मस्तकपर बढ़ी हुई जटाएँ ध्यानरूपी अग्निसे जलाए गए कर्मरूप ईंधनसे निकलती हुई धूमकी शिखाओंके समान शोभायमान होती थीं। मर्यादा प्रकट करनेके अभिप्रायसे स्वेच्छापूर्वक चलते हुए जिन भगवान्‌को देखकर सुर और असुर ऐसा समझते थे मानो सुवर्णमय मेरु पर्वत ही चल रहा है। जिन भगवान्‌की हस्तिनापुरके राजा श्रेयांसके दान देनेपर देवरूप मेघोंने पाँच प्रकारके रत्नोंकी वर्षा की थी। कुछ समय बाद घातियाकर्मरूपी शत्रुओंको पराजित कर देनेपर जिन्हें लोकालोकको प्रकाशित करनेवाली केवलज्ञानरूपी उत्कृष्ट ज्योति प्राप्त हुई थी। जो सभारूपी सरोवरमें बैठे हुए भव्य जीवोंके मुखरूपी कमलोंको प्रकाशित करनेके लिए सूर्यके समान थे, जिन्होंने कर्मरूपी शत्रुओंको नष्ट करनेवाले समीचीन धर्मका उपदेश दिया था। और जिनसे अपने वंशका माहात्म्य सुनकर वल्कलोंको पहिने हुए भरतपुत्र मरीचिने लीलापूर्वक नृत्य किया था। ऐसे उन नाभिराजाके पुत्र वृषभचिह्नसे सहित आदिदेव (प्रथम तीर्थंकर) भगवान् वृषभदेवको मैं नमस्कार कर एकाग्र चित्तसे बार बार उनकी स्तुति करता हूँ ॥५–१५॥ इनके पश्चात्, जो धर्मसाम्राज्यके अधिपति हैं ऐसे अजितनाथको आदि लेकर महावीर पर्यन्त तेईस तीर्थंकरोंको भी नमस्कार करता हूँ ॥१६॥ इसके बाद, केवलज्ञान-

---

१ येन सह । २ भोजवंश्याः । ३ परिदधानाः । ४ जीवनम् । ५ अनशनवान् । ६ अत्र तपस्तपसि, तपेर्धातोः कर्मवत् कार्यं भवति । तपसि कर्मणीत्यात्मनेपदी । ७ आलम्ब्य विमृश्य वा । आधाय द०, स० । ८ कर्मेध–द० । एध इन्धनम् । ९ प्रकटता । १० पवित्रे । ११ प्रसन्ने सति । १२ उत्पन्नम् । पदः 'पदः कर्तरि लुङि तेर्ङिर्नित्यं भवति जिः । १३ मरीचिः । १४ कन्थारूपवल्कलः । १५–वल्कलम् अ० । १६ 'णु स्तुतौ' । १७ प्रह्वो भूत्वा । १८ ध्यात्वा । १९ आराधये । २० भृशं पुनः पुनः स्तौमि ।

अनादिनिधनं तुङ्गमनल्पफलदायिनम् । [1]उपाध्वं विपुलच्छायं[2] श्रुतस्कन्धमहाद्रुतम् ॥१८॥
इत्याप्तवचः[3]स्तोत्रैः कृतमङ्गलसत्क्रियः । पुराणं [4]संगृहीष्यामि त्रिषष्टिपुरुषाश्रितम् ॥१९॥
तीर्थेशामपि चक्रेशां हलिनामर्धचक्रिणाम् । त्रिषष्टिलक्षणं वक्ष्ये पुराणं तद्द्विषामपि ॥२०॥
पुरातनं पुराणं स्यात् तन्महन्महदाश्रयात् । महद्भिरुपदिष्टत्वात् महाश्रेयोऽनुशासनात् ॥२१॥
[5]कविं पुराणमाश्रित्य प्रसृतत्वात् पुराणता । महत्त्वं स्वमहिम्नैव [6]तस्येत्यन्यैर्निरुच्यते[7] ॥२२॥
महापुरुषसम्बन्धि महाभ्युदयशासनम् । महापुराणमाम्ना[8]तमत एतन्महर्षिभिः ॥२३॥
ऋषिप्रणीतमार्षं स्यात् सूक्तं सूनृतशासनात् । धर्मानुशासनाच्चेदं धर्मशास्त्रमिति [9]स्मृतम् ॥२४॥
[10]इतिहास इतीष्टं तद् इति हासीदिति श्रुतेः । [11]इतिवृत्तमथैतिह्य[12]माम्नायञ्चामनन्ति[13] तत् ॥२५॥
पुराणमितिहासाख्यं यत्प्रोवाच गणाधिपः । तत्किलाहमधीर्वक्ष्ये केवलं भक्तिचोदितः[14] ॥२६॥
पुराणं गणभृत्प्रोक्तं [15]विवक्षोर्मे महान्भरः । [16]विवक्षोरिव दम्यस्य[17] पुङ्गवैर्भारमुद्धृतम् ॥२७॥

रूपी साम्राज्यके युवराज पदमें स्थित रहनेवाले तथा सम्यग्ज्ञानरूपी कण्ठाभरणको प्राप्त हुए गणधरोंकी मैं बार बार स्तुति करता हूँ ॥१७॥ हे भव्य पुरुषो ! जो द्रव्यार्थिक नयकी अपेक्षा आदि और अन्तसे रहित है, उन्नत है, अनेक फलोंका देनेवाला है, और विस्तृत तथा सघन छायासे युक्त है ऐसे श्रुतस्कन्धरूपी वृक्षकी उपासना करो ॥१८॥ इस प्रकार देव गुरुशास्त्रके स्तवनों द्वारा मङ्गलरूप सत्क्रियाको करके मैं त्रेशठ शलाका (चौबीस तीर्थंकर, बारह चक्रवर्ती, नव नारायण, नव प्रतिनारायण और नव बलभद्र) पुरुषोंसे आश्रित पुराणका संग्रह करूँगा ॥१९॥ तीर्थंकरों, चक्रवर्तियों, बलभद्रों, नारायणों और उनके शत्रुओं – प्रतिनारायणोंका भी पुराण कहूँगा ॥२०॥ यह ग्रन्थ अत्यन्त प्राचीन कालसे प्रचलित है इसलिये पुराण कहलाता है । इसमें महापुरुषोंका वर्णन किया गया है अथवा तीर्थंकर आदि महापुरुषोंने इसका उपदेश दिया है अथवा इसके पढ़नेसे महान् कल्याणकी प्राप्ति होती है इसलिये इसे महापुराण कहते हैं ॥२१॥ 'प्राचीन कवियोंके आश्रयसे इसका प्रसार हुआ है इसलिये इसकी पुराणता–प्राचीनता प्रसिद्ध ही है तथा इसकी महत्ता इसके माहात्म्यसे ही प्रसिद्ध है इसलिये इसे महापुराण कहते हैं' ऐसा भी कितने ही विद्वान् महापुराणकी निरुक्ति–अर्थ करते हैं ॥२२॥ यह पुराण महापुरुषोंसे सम्बन्ध रखनेवाला है तथा महान्-अभ्युदय – स्वर्ग मोक्षादिकल्याणोंका कारण है इसलिये महर्षि लोग इसे महापुराण मानते हैं । ॥२३॥ यह ग्रन्थ ऋषिप्रणीत होनेके कारण आर्ष, सत्यार्थका निरूपक होने से सूक्त तथा धर्मका प्ररूपक होनेके कारण धर्मशास्त्र माना जाता है । 'इति इह आसीत्' यहाँ ऐसा हुआ ऐसी अनेक कथाओंका इसमें निरूपण होनेसे ऋषि गण इसे 'इतिहास', 'इतिवृत्त' और 'ऐतिह्य' भी मानते हैं ॥२४-२५॥ जिस इतिहास नामक महापुराणका कथन स्वयं गणधरदेवने किया है उसे मैं मात्र भक्ति से प्रेरित हो कर कहूँगा क्योंकि मैं अल्पज्ञानी हूँ ॥२६॥ बड़े बड़े बैलों द्वारा उठाने योग्य भारको उठानेकी इच्छा करने वाले बछड़ेको जैसे बड़ी कठिनता पड़ती है वैसे ही गणधरदेवके द्वारा कहे हुए

---

१ आराधयध्वम् । २ पक्षे विपुलद्वयम् । ३ परापरगुरु-तद्वचनम् । ४ संक्षेपं करिष्ये । ५ पुराणं कवि– द० । पूर्वकविम् । ६ पुराणस्य । ७ निरूप्यते अ०, स०, द० । ८ कथितम् । ९ उक्तम् । १० इतिहासमिती– म०, ल० । ११ 'पारम्पर्योपदेशे स्यादैतिह्यमिति ह्यव्ययम्' इति वचनात् , अथवा इतिवृत्तम् ऐतिह्यम् आम्नायश्चेति नामत्रयम् । १२–मृषयो वामनन्ति स०, ल० । १३ कथयन्ति । १४–नोदितः द०, अ० । १५ वक्तुमिच्छोः । १६ बोद्धुमिच्छोः । १७ बालवत्सस्य ।

क्व गम्भीरः पुराणाब्धिः क्व माद्दग्बोधदुर्विधः[1] । सोऽहं महोदधिं दोर्भ्यां तितीर्षुर्यामि हास्यताम् ॥२८॥
अथवास्त्वेतदल्पोऽपि यद्घटेऽहं स्वशक्तितः । लूनबालधिरप्युक्षा किं नोत्पुच्छयते तराम् ॥२९॥
गणाधीशैः प्रणीतेऽपि पुराणेऽस्मिन्नहं यते[2] । सिंहैरासेविते मार्गे मृगोऽन्यः[3] केन वार्यते ॥३०॥
पुराणकविभिः क्षुण्णे[4] कथामार्गेऽस्ति मे गतिः[5] । [6]पौरस्त्यैः शोधितं मार्गं को वा नानुव्रजेज्जनः ॥३१॥
महाकरीन्द्रसंमर्दविरलीकृतपादपे । वने वन्येभकलभाः सुलभाः स्वैरचारिणः ॥३२॥
महातिमिपृथु[7]प्रोथपथी[8]कृतजलेऽर्णवे[9] । यथेष्टं पर्यटन्त्येव ननु पाठीनशावकाः ॥३३॥
महाभटास्त्रसम्पातनिरुद्धप्रतियोद्धृके[10] । [11]भटब्रुवोऽपि निश्शङ्कं वल्गत्येव रणाङ्गणे ॥३४॥
[12]तत्पुराणकवीनेव मत्वा हस्तावलम्बनम् । महतोऽस्य पुराणाब्धेस्तरणायोद्यतोऽस्म्यहम् ॥३५॥
महत्यस्मिन् पुराणाब्धौ [13]शाखाशततरङ्गके । स्खलितं यत्प्रमादान्मे तद् बुधाः क्षन्तुमर्हथ ॥३६॥
कविप्रमादजान् दोषानपास्यास्मात् कथामृतात् । सन्तो गुणान् जिघृक्षन्तु[14] [15]गुणगृह्यो हि सज्जनः ॥३७॥

महापुराणको कहनेकी इच्छा रखनेवाले मुझ अल्पज्ञको पड़ रही है ॥२७॥ कहाँ तो यह अत्यन्त गम्भीर पुराणरूपी समुद्र और कहाँ मुझ जैसा अल्पज्ञ ? मैं अपनी भुजाओंसे यहाँ समुद्रको तैरना चाहता हूँ इसलिये अवश्य ही हँसीको प्राप्त होऊँगा ॥२८॥ अथवा ऐसा समझिये कि मैं अल्पज्ञानी होकर भी अपनी शक्तिके अनुसार इस पुराणको कहनेके लिये प्रयत्न कर रहा हूँ जैसे कि कटी पूँछवाला भी बैल क्या अपनी कटी पूँछको नहीं उठाता ? अर्थात् अवश्य उठाता है ॥२९॥ यद्यपि यह पुराण गणधरदेवके द्वारा कहा गया है तथापि मैं भी यथा शक्ति इसके कहनेका प्रयत्न करता हूँ । जिस रास्तेसे सिंह चले हैं उस रास्तेसे हिरण भी अपनी शक्त्यनुसार यदि गमन करना चाहता है तो उसे कौन रोक सकता है ॥३०॥ प्राचीन कवियों द्वारा क्षुण्ण किये गये—निरूपण कर सुगम बनाये गये कथामार्गमें मेरी भी गति है क्योंकि आगे चलनेवाले पुरुषोंके द्वारा जो मार्ग साफ कर दिया जाता है फिर उस मार्गमें कौन पुरुष सरलतापूर्वक नहीं जा सकता है ? अर्थात् सभी जा सकते हैं ॥३१॥ अथवा बड़े बड़े हाथियोंके मर्दन करनेसे जहाँ वृक्ष बहुत ही विरले कर दिये गये हैं ऐसे वनमें जङ्गली हस्तियोंके बच्चे सुलभतासे जहाँ तहाँ घूमते ही हैं ॥३२॥ अथवा जिस समुद्रमें बड़े बड़े मच्छोंने अपने विशाल मुखोंके आघातसे मार्ग साफ कर दिया है उसमें उन मच्छोंके छोटे छोटे बच्चे भी अपनी इच्छासे घूमते हैं ॥३३॥ अथवा जिस रणभूमिमें बड़े बड़े शूरवीर योद्धाओंने अपने शस्त्र-प्रहारोंसे शत्रुओंको रोक दिया है उसमें कायर पुरुष भी अपनेको योद्धा मानकर निःशङ्क हो उछलता है ॥३४॥ इसलिये मैं प्राचीन कवियोंको ही हाथका सहारा मानकर इस पुराणरूपी समुद्रको तैरनेके लिये तत्पर हुआ हूँ ॥३५॥ सैकड़ों शाखारूप तरङ्गोंसे व्याप्त इस पुराणरूपी महासमुद्रमें यदि मैं कदाचित् प्रमादसे स्खलित हो जाऊँ—अज्ञानसे कोई भूलकर बैठूँ तो विद्वज्जन मुझे क्षमा ही करेंगे ॥३६॥ सज्जन पुरुष कविके प्रमादसे उत्पन्न हुए दोषोंको छोड़ कर इस कथारूपी अमृतसे मात्र गुणोंकेही ग्रहण करनेकी इच्छा करें क्योंकि सज्जन पुरुष गुण ही ग्रहण करते हैं । ॥३७॥

---

१ दरिद्रः । २ प्रयत्नं करोमि । ३ यान् अ०, प०, स०, ल०, म० । ४ सम्मर्दिते । ५ उपायः । ६ पुरोगमैः । ७ नासिका । ८ अपन्थाः पन्थाः कृतं पथीकृतं जलं यत्र । ९ जलार्णवे म०, अ०, प०, ल० । १० भटे । ११ भटजातिमात्रोपजीवी, तुच्छभट इत्यर्थः । १२ तत् कारणात् । सत्पु०—अ०, स०, द० । १३ अवान्तरकथा । १४ गृहीतुमिच्छन्तु । १५ गुणगृह्या हि सज्जनाः प० म० ल० । गुणा एव गृह्या यस्यासौ ।

सुभाषितमहारत्नसंभृतेऽस्मिन् कथाम्बुधौ । [1]दोषग्राहाननादृत्य यतध्वं सारसंग्रहे ॥३८॥
कवयः सिद्धसेनाद्या वयं च कवयो मताः । मणयः पद्मरागाद्या ननु काचोऽपि मेचकः ॥३९॥
यद्वचोदर्पणे कृत्स्नं [2]वाङ्मयं प्रतिबिम्बितम् । तान्कवीन्बहुमन्येऽहं किमन्यैः कविमानिभिः ॥४०॥
नमः पुराणकारेभ्यो यद्वक्त्राब्जे सरस्वती । येषामद्धा[3] कवित्वस्य [4]सूत्रपातायितं वचः ॥४१॥
[5]प्रवादिकरियूथानां केसरी [6]नयकेसरः । सिद्धसेनकविर्जीयाद्विकल्पनखराङ्कुरः ॥४२॥
नमः समन्तभद्राय महते कविवेधसे । यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥४३॥
[7]कवीनां गमकानाञ्च वादिनां वाग्मिनामपि । यशः [8]सामन्तभद्रीयं मूर्ध्नि [9]चूडामणीयते ॥४४॥
श्रीदत्ताय नमस्तस्मै तपःश्रीदीप्तमूर्तये । कण्ठीरवायितं येन प्रवादीभप्रभेदने ॥४५॥
[10]विदुष्विणीषु संसत्सु[11] यस्य नामापि कीर्तितम् । [12]निखर्वयति तद्गर्वं यशोभद्रः स पातु नः ॥४६॥
चन्द्रांशुशुभ्रयशसं प्रभाचन्द्रकविं स्तुवे । कृत्वा चन्द्रोदयं[13] येन शश्वदाह्लादितं जगत् ॥४७॥

उत्तम उत्तम उपदेशरूपी रत्नोंसे भरे हुए इस कथारूप समुद्रमें मगरमच्छोंको छोड़कर सार वस्तुओंके ग्रहण करनेमें ही प्रयत्न करना चाहिये ॥३८॥ पूर्वकालमें सिद्धसेन आदि अनेक कवि हो गये हैं और मैं भी कवि हूँ सो दोनोंमें कवि नामकी तो समानता है परन्तु अर्थमें उतना ही अन्तर है जितना कि पद्मराग मणि और काच में होता है ॥३९॥ इसलिये जिनके वचनरूपी दर्पणमें समस्त शास्त्र प्रतिबिम्बित थे मैं उन कवियोंको बहुत मानता हूँ—उनका आदर करता हूँ । मुझे उन अन्य कवियोंसे क्या प्रयोजन है जो व्यर्थ ही अपनेको कवि माने हुए हैं ॥४०॥ मैं उन पुराणके रचने वाले कवियोंको नमस्कार करता हूँ जिनके मुखकमलमें सरस्वती साक्षात् निवास करती है तथा जिनके वचन अन्य कवियोंकी कवितामें सूत्रपातका कार्य करते हैं—मूलभूत होते हैं ॥४१॥ वे सिद्धसेन कवि जयवन्त हों जो कि प्रवादीरूप हाथियोंके झुण्डके लिये सिंहके समान हैं, नैगमादि नय ही जिनकी केसर (अयाल—गर्दन परके बाल) तथा अस्ति नास्ति आदि विकल्प ही जिनके पैने नाखून थे ॥४२॥ मैं उन महाकवि समन्तभद्रको नमस्कार करता हूँ जो कि कवियोंमें ब्रह्माके समान हैं और जिनके वचनरूप वज्रके पातसे मिथ्यामत-रूपी पर्वत चूर चूर होजाते थे । ॥४३॥ स्वतन्त्र कविता करने वाले कवि, शिष्योंको ग्रन्थके मर्मतक पहुँचाने वाले गमक—टीकाकार, शास्त्रार्थ करने वाले वादी और मनोहर व्याख्यान देने वाले वाग्मी इन सभीके मस्तक पर समन्तभद्र स्वामीका यश चूड़ामणिके समान आचरण करने वाला है । अर्थात् वे सबमें श्रेष्ठ थे ॥४४॥ मैं उन श्रीदत्तके लिये नमस्कार करता हूँ जिनका शरीर तपोलक्ष्मीसे अत्यन्त सुन्दर है और जो प्रवादीरूपी हस्तियोंके भेदनमें सिंहके समान थे ॥४५॥ विद्वानोंकी सभामें जिनका नाम कह देने मात्रसे सबका गर्व दूर हो जाता है वे यशोभद्र स्वामी हमारी रक्षा करें ॥४६॥ मैं उन प्रभाचन्द्र कविकी स्तुति करता हूँ जिनका यश चन्द्रमा-की किरणों के समान अत्यन्त शुक्ल है और जिन्होंने चन्द्रोदयकी रचना करके जगत् को हमेशा

१ दोषग्रहान् ल० । २ तर्कागमव्याकरणछन्दोऽलङ्कारादिवाक्प्रपञ्चः । ३ -मन्यः कवित्वस्य अ०, प०, स०, द०, म०, ल० । ४ सूत्रपतनायितम् । ५ परवादि । ६ नैगमादिः । ७ "कविर्नूतन-सन्दर्भो गमकः कृतिभेदगः । वादी विजयवाग्वृत्तिर्वाग्मी तु जनरञ्जकः ॥" ८ समन्तभ- अ०, स० । ९ चूडामणिरिवाचरति । १० विद्वांसः अत्र सन्तीति विदुष्विण्यस्तासु । ११ सभासु । १२ नितरां ह्रस्वं करोति । १३ ग्रन्थविशेषम् ।

चन्द्रोदयकृतस्तस्य यशः केन न शस्यते । यदाकल्पमनाम्लानि[1] सतां शेखरतां गतम् ॥४८॥
[2]शीतीभूतं जगद्यस्य वाचाराध्य[3]चतुष्टयम् । मोक्षमार्गं स पायान्नः शिवकोटिर्मुनीश्वरः ॥४९॥
काव्यानुचिन्तने यस्य जटाः प्रबलवृत्तयः । अर्थान् [4]स्मानुवदन्तीव[5] जटाचार्यः स नोऽवतात् ॥५०॥
धर्मसूत्रानुगा हृद्या यस्य वाङ्मणयोऽमलाः । कथालङ्कारतां भेजुः [6]काणभिक्षुर्जयत्यसौ ॥५१॥
कवीनां तीर्थकृद्देवः [7]किं तरां तत्र वर्ण्यते । विदुषां वाङ्मलध्वंसि [8]तीर्थं यस्य [9]वचोमयम् ॥५२॥
भट्टाकलङ्कश्रीपालपात्रकेसरिणां गुणाः । विदुषां हृदयारूढा हारायन्तेऽतिनिर्मलाः ॥५३॥
कवित्वस्य परा सीमा वाग्मित्वस्य परं पदम् । गमकत्वस्य पर्यन्तो वादिसिंहोऽर्च्यते न कैः ॥५४॥
श्रीवीरसेन इत्यात्तभट्टारकपृथुप्रथः । स नः पुनातु पूतात्मा [10]कविवृन्दारको[11] मुनिः ॥५५॥
लोकवित्वं कवित्वञ्च स्थितं भट्टारके द्वयम् । वाङ्मिता[12]ऽवाङ्मिता[13] यस्य वाचा वाचस्पतेरपि ॥५६॥
सिद्धान्तोपनिबन्धानां[14] विधातुर्मद्गुरोश्चिरम् । मन्मनःसरसि स्थेयान् मृदुपादकुशेशयम् ॥५७॥

के लिये आह्लादित किया है ॥४७॥ वास्तवमें चन्द्रोदयकी रचना करनेवाले उन प्रभाचन्द्र आचार्यके कल्पान्त काल तक स्थिर रहने वाले तथा सज्जनोंके मुकुटभूत यशकी प्रशंसा कौन नहीं करता ? अर्थात् सभी करते हैं ॥४८॥ जिनके वचनोंसे प्रकट हुए चारों आराधनारूप मोक्षमार्ग (भगवती आराधना) की आराधना कर जगत्के जीव सुखी होते हैं वे शिवकोटि मुनीश्वर भी हमारी रक्षा करें ॥४९॥ जिनकी जटारूप प्रबल-युक्तिपूर्ण वृत्तियाँ-टीकाएं काव्योंके अनुचिन्तनमें ऐसी शोभायमान होती थीं मानो हमें उन काव्योंका अर्थ ही बतला रही हों ऐसे वे जटासिंहनन्दि आचार्य (वराङ्गचरितके कर्ता) हम लोगोंकी रक्षा करें ॥५०॥ वे काणभिक्षु जयवान् हों जिनके धर्मरूप सूत्रमें पिरोये हुए मनोहर वचनरूप निर्मल मणि कथा-शास्त्रके अलंकारपनेको प्राप्त हुए थे अर्थात् जिनके द्वारा रचे गये कथाग्रन्थ सब ग्रन्थोंमें अत्यन्त श्रेष्ठ हैं ॥५१॥ जो कवियोंमें तीर्थंकरके समान थे अथवा जिन्होंने कवियोंको पथ प्रदर्शन करनेके लिये किसी लक्षणग्रन्थकी रचना की थी और जिनका वचनरूपी तीर्थ विद्वानों के शब्दसम्बन्धी दोषोंको नष्ट करने वाला है ऐसे उन देवाचार्य-देवनन्दीका कौन वर्णन कर सकता है ? ॥५२॥ भट्टाकलङ्क, श्रीपाल और पात्रकेशरी आदि आचार्योंके अत्यन्त निर्मल गुण विद्वानोंके हृदयमें मणिमालाके समान सुशोभित होते हैं ॥५३॥ वे वादिसिंह कवि किसके द्वारा पूज्य नहीं हैं जो कि कवि, प्रशस्त व्याख्यान देनेवाले और गमकों-टीकाकारोंमें सबसे उत्तम थे ॥५४॥ वे अत्यन्त प्रसिद्ध वीरसेन भट्टारक हमें पवित्र करें जिनकी आत्मा स्वयं पवित्र है जो कवियोंमें श्रेष्ठ हैं जो लोकव्यवहार तथा काव्यस्वरूपके महान् ज्ञाता हैं तथा जिनकी वाणीके सामने औरोंकी तो बात ही क्या, स्वयं सुरगुरु बृहस्पतिकी वाणी भी सीमित-अल्प जान पड़ती है ॥५५-५६॥ धवलादि सिद्धान्तोंके ऊपर अनेक उपनिबन्ध-प्रकरणोंके रचनेवाले हमारे गुरु श्रीवीरसेन भट्टारकके कोमल चरणकमल हमेशा

१ ईषद्म्लानि । न आम्लानि अनाम्लानि । -मनाम्लायि द०, स०, अ०, प०, ल० । २ सुखी-भूतम् । ३ आराधनाचतुष्टयम् । ४ तु हि च स्माह वै पादपूरणे । ५ सार्थकं पुनर्वचनम् अनुवादः । ६ काणभिक्षु अ०, स० । ७ कवीनां तीर्थकृदित्यनेनैव वर्णनेनालम् । तत्र देवे अन्यत् किमपि अतिशयेन न वर्णनीयमिति भावः । तदेव तीर्थकृत्त्वं समर्थम् । इतरमपरार्द्धमाह । ८ जलम् । ९ वाग्रूपम् । १० वादिवृन्दा-अ०,द० । ११ श्रेष्ठः । १२ वाग्मिनो स०,द० । १३ अवाङ्मिता अल्पीकृता । १४ व्याख्यानानाम् ।

धवलां भारतीं तस्य कीर्तिञ्च विधुनिर्मलाम्। धवलीकृतनिश्शेषभुवनां [1]नन्नमीम्यहम् ॥५८॥
जन्मभूमिस्तपोलक्ष्म्याः श्रुतप्रशमयोर्निधिः। जयसेनगुरुः पातु बुधवृन्दाग्रणीः स नः ॥५९॥
स पूज्यः कविभिर्लोके कवीनां परमेश्वरः। [2]वागर्थसंग्रहं कृत्स्नं पुराणं यः [3]समग्रहीत् ॥६०॥
कवयोऽन्येपि सन्त्येव कस्तानुद्[4]वर्तुमप्यलम्[5]। सत्कृता ये जगत्पूज्यास्ते मया मङ्गलार्थिना ॥६१॥
त एव कवयो लोके त एव च विचक्षणाः। येषां धर्मकथाङ्गत्वं भारती प्रतिपद्यते ॥६२॥
धर्मानुबन्धिनी या स्यात् कविता सैव शस्यते। शेषा पापास्रवायैव सुप्रयुक्तापि जायते ॥६३॥
केचिन्मिथ्यादृशः काव्यं ग्रथ्नन्ति श्रुतिपेशलम्। [7]तत्त्वधर्मानुबन्धित्वान्न सतां प्रीणनक्षमम् ॥६४॥
अव्युत्पन्नतराः केचित् कवित्वाय कृतोद्यमाः। प्रयान्ति हास्यतां लोके मूका इव विवक्षवः ॥६५॥
केचिदन्यवचोलेशानादाय कविमानिनः। छायामारोपयन्त्यन्यां वस्त्रेष्विव वणिग्ब्रुवाः ॥६६॥
संभोक्तुमक्षमाः केचित्सरसां[7] कृतिकामिनीम्। सहायान् कामयन्तेऽन्यानक[8]ल्या इव कामुकाः ॥६७॥
केचिदन्यकृतैरर्थैः शब्दैश्च [9]परिवर्तितैः। प्रसारयन्ति काव्यार्थान् [10]प्रतिशिष्ट्येव वाणिजाः ॥६८॥

हमारे मनरूपसरोवरमें विद्यमान रहें ॥५७॥ श्रीवीरसेन गुरुकी धवल, चन्द्रमाके समान निर्मल और समस्त लोकको धवल करनेवाली वाणी (धवलाटीका) तथा कीर्तिको मैं बार बार नमस्कार करता हूँ ॥५८॥ वे जयसेन गुरु हमारी रक्षा करें जो कि तपोलक्ष्मीके जन्मदाता थे, शास्त्र और शान्तिके भाण्डार थे, विद्वानोंके समूहके अग्रणी–प्रधान थे, वे कवि परमेश्वर लोक में कवियों द्वारा पूज्य थे ॥५९॥ जिन्होंने शब्द और अर्थके संग्रह रूप समस्त पुराणका संग्रह किया था ॥६०॥ इन ऊपर कहे हुए कवियोंके सिवाय और भी अनेक कवि हैं उनका गुणगान तो दूर रहा नाममात्र भी कहनेमें कौन समर्थ हो सकता है ? अर्थात् कोई नहीं। मङ्गल प्राप्तिकी अभिलाषासे मैं उन जगत्पूज्य सभी कवियोंका सत्कार करता हूँ ॥६१॥ संसारमें वे ही पुरुष कवि हैं और वे ही चतुर हैं जिनकी कि वाणी धर्मकथाके अङ्गपनेको प्राप्त होती है अर्थात् जो अपनी वाणी द्वारा धर्मकथाकी रचना करते हैं ॥६२॥ कविता भी वही प्रशंसनीय समझी जाती है जो धर्मशास्त्रसे सम्बन्ध रखती है। धर्मशास्त्रके सम्बन्धसे रहित कविता मनोहर होनेपर भी मात्र पापास्रवके लिये होती है ॥६३॥ कितने ही मिथ्यादृष्टि कानों को प्रिय लगनेवाले–मनोहर काव्यग्रन्थोंकी रचना करते हैं परन्तु उनके वे काव्य अधर्मानुबन्धी होनेसे–धर्मशास्त्रके निरूपक न होनेसे सज्जनोंको सन्तुष्ट नहीं कर सकते ॥६४॥ लोकमें कितने ही कवि ऐसे भी हैं जो काव्यनिर्माणके लिये उद्यम करते हैं परन्तु वे बोलनेकी इच्छा रखनेवाले गूँगे पुरुषकी तरह केवल हँसीको ही प्राप्त होते हैं ॥६५॥ योग्यता न होनेपर भी अपनेको कवि माननेवाले कितने ही लोग दूसरे कवियोंके कुछ वचनोंको लेकर उसकी छाया मात्र कर देते हैं अर्थात् अन्य कवियोंकी रचनामें थोड़ा सा परिवर्तन कर उसे अपनी मान लेते हैं जैसे कि नकली व्यापारी दूसरोंके थोड़ेसे कपड़े लेकर उनमें कुछ परिवर्तन कर व्यापारी बन जाते हैं ॥६६॥ शृङ्गारादि रसोंसे भरी हुई–रसीली कवितारूपी कामिनीके भोगनेमें–उसकी रचना करनेमें असमर्थ हुए कितनेही कवि उस प्रकार सहायकोंकी वांछा करते हैं जिस प्रकार कि स्त्रीसंभोगमें असमर्थ कामीजन औषधादि सहायकोंकी वांछा करते हैं ॥६७ कितनेही कवि अन्य कवियों

---

१ तां नमाम्य-द०। २ शब्दः। ३ संग्रहमकरोत्। ४ नाममात्रेण कथयितुम्। ५ समर्थः। ६ तुरित्यव्ययमवधारणार्थे वर्तते। ७ स्वरसात् द०। सामर्थ्यात्। ८ नकल्पा–प०, म०, ल०। कल्याः दक्षाः अकल्याः अदक्षाः स्त्रीसम्भोगे असमर्था इत्यर्थः। 'कल्यं सज्जे प्रभाते च कल्यो नीरोगदक्षयोः' इति विश्वप्रकाशः। अकल्याः पुंस्त्वरहिताः। ९ पर्यायान्तरं नीतैः। १० प्रतिनिधिव्यवहारेण।

केचिद्वर्णोज्ज्वलां वाणीं रचयन्त्यर्थदुर्बलाम्। जातुषी कण्ठिकेवासौ छायामृच्छति नोच्छिखाम् ॥६९॥
केचिदर्थमपि प्राप्य तद्योगपदयोजनैः[1]। न सतां प्रीणनायालं लुब्धा लब्धश्रियो यथा ॥७०॥
यथेष्टं प्रकृतारम्भाः केचिन्निर्वहणाकुलाः। कवयो बत सीदन्ति कराक्रान्तकुटुम्बिवत् ॥७१॥
आप्तपाशमतान्यन्ये कवयः पोषयन्त्यलम्। कुकवित्वाद्वरं तेषामकवित्वमुपासितम् ॥७२॥
अनभ्यस्तमहाविद्याः कलाशास्त्रबहिष्कृताः। काव्यानि कर्तुमीहन्ते केचित्पश्यत साहसम् ॥७३॥
तस्मादभ्यस्य शास्त्रार्थानुपास्य च महाकवीन्। धर्म्यं शस्यं यशस्यञ्च काव्यं कुर्वन्तु धीधनाः ॥७४॥
परेषां दूषणाज्जातु न बिभेति कवीश्वरः। किमुलूकभयाद् धुन्वन् ध्वान्तं नोदेति [2]भानुमान् ॥७५॥
परे तुष्यन्तु वा मा वा कविः स्वार्थं प्रतीहताम्। न पराराधनाच्छ्रेयः श्रेयः सन्मार्गदेशनात्[3] ॥७६॥
पुराणकवयः केचित् केचिन्नवकवीश्वराः। तेषां मतानि[4] भिन्नानि कस्तदाराधने क्षमः ॥७७॥
केचित्सौशब्द्यमिच्छन्ति केचिदर्थस्य सम्पदम्[5]। केचित्समासभूयस्त्वं परे व्यस्तां[6] पदावलीम् ॥७८॥

द्वारा रचे गये शब्द तथा अर्थमें कुछ परिवर्तन कर उनसे अपने काव्यग्रन्थोंका प्रसार करते हैं जैसे कि व्यापारी अन्य पुरुषों द्वारा बनाये हुए मालमें कुछ परिवर्तन कर अपनी छाप लगा कर उसे वेचा करते हैं ॥६८॥ कितनेही कवि ऐसी कविता करते हैं जो शब्दोंसे तो सुन्दर होती है परन्तु अर्थसे शून्य होती है। उनकी यह कविता लाखकी बनी हुई कंठीके समान उत्कृष्ट शोभाको प्राप्त नहीं होती ॥६९॥ कितनेही कवि सुन्दर अर्थको पाकर भी उसके योग्य सुन्दर पदयोजनाके बिना सज्जन पुरुषोंको आनन्दित करनेके लिये समर्थ नहीं हो पाते जैसे कि भाग्यसे प्राप्त हुई कृपण मनुष्यकी लक्ष्मी योग्य पद–स्थान योजनाके बिना सत्पुरुषोंको आनन्दित नहीं कर पाती ॥७०॥ कितनेही कवि अपनी इच्छानुसार काव्य बनानेका प्रारम्भ तो कर देते हैं परन्तु शक्ति न होने से उसकी पूर्ति नहीं कर सकते अतः वे टैक्सके भारसे दबे हुए बहुकुटुम्बी व्यक्तिके समान दुखी होते है ॥७१॥ कितनेही कवि अपनी कविता द्वारा कपिल आदि आप्ताभासोंके उपदिष्ट मतका पोषण करते हैं–मिथ्यामार्गका प्रचार करते हैं। ऐसे कवियोंका कविता करना व्यर्थ है क्योंकि कुकवि कहलानेकी अपेक्षा अकवि कहलाना ही अच्छा है ॥७२॥ कितनेही कवि ऐसे भी है जिन्होंने न्याय व्याकरण आदि महाविद्याओंका अभ्यास नहीं किया है तथा जो संगीत आदि कलाशास्त्रोंके ज्ञानसे दूर हैं फिर भी वे काव्य करनेकी चेष्टा करते हैं, अहो ! इनके साहसको देखो ॥७३॥ इसलिये बुद्धिमानोंको शास्त्र और अर्थका अच्छी तरह अभ्यास कर तथा महाकवियोंकी उपासना करके ऐसे काव्यकी रचना करनी चाहिये जो धर्मोपदेशसे सहित हो, प्रशंसनीय हो और यशको बढ़ाने वाला हो ॥७४॥ उत्तम कवि दूसरोंके द्वारा निकाले हुए दोषोंसे कभी नहीं डरता। क्या अन्धकारको नष्ट करने वाला सूर्य उलूकके भयसे उदित नहीं होता ? ॥७५॥ अन्यजन संतुष्ट हो अथवा नहीं कविको अपना प्रयोजन पूर्ण करनेके प्रति ही उद्यम करना चाहिये। क्योंकि कल्याणकी प्राप्ति अन्य पुरुषोंकी आराधनासे नहीं होती किन्तु श्रेष्ठ मार्गके उपदेशसे होती है ॥७६॥ कितनेही कवि प्राचीन हैं और कितने ही नवीन हैं तथा उन सबके मत जुदे जुदे हैं अतः उन सबको प्रसन्न करनेके लिये कौन समर्थ हो सकता है ? ॥७७॥ क्योंकि कोई शब्दोंकी सुन्दरताको पसंद करते हैं, कोई मनोहर अर्थसम्पत्तिको चाहते हैं, कोई समासकी अधिकताको

---

[1] वर्णसमुदाययोजनैश्च। [2] भास्करः। [3] दर्शनात् स०। [4] अभिप्रायाः। [5] सौष्ठवम् म०। [6] व्यस्तपदावलीम् अ०, व्यस्तपदावलिम् म०।

मृदुबन्धार्थिनः केचित्स्फुटबन्धैषिणः[1] परे । मध्यमाः केचिदन्येषां रुचिरन्यैव लक्ष्यते ॥७९॥
इति भिन्ना[2]भिसन्धित्वा[3]द् राराधा [4]मनीषिणः । [5]पृथक्जनोऽपि सूक्तानामनभिज्ञः सुदुर्ग्रहः[6] ॥८०॥
सतीमपि कथां रम्यां दूषयन्त्येव दुर्जनाः । भुजङ्गा इव सच्छायां [7]चन्दनद्रुमवल्लरीम् ॥८१॥
सदोषामपि निर्दोषां करोति सुजनः कृतिम् । [8]घनात्यय इवापङ्कां सरसीं पङ्कदूषिताम् ॥८२॥
दुर्जना दोषमिच्छन्ति गुणमिच्छन्ति सज्जनाः । स तेषां [9]क्षेत्रजो भावो दुश्चिकित्स्यश्चिरादपि ॥८३॥
यतो गुणधनाः सन्तो दुर्जना दोषवित्तकाः । स्वंधनं गृह्णतां तेषां कः प्रत्यर्थी बुधो जनः ॥८४॥
दोषान् गृह्णन्तु वा कामं गुणास्तिष्ठन्तु नः स्फुटम् । गृहीतदोषं यत्काव्यं जायते तद्धि [10]पुष्कलम् ॥८५॥
असतां [11]दूयते चित्तं श्रुत्वा धर्मकथां सतीम् । मन्त्रविद्यामिवाकर्ण्य महाग्रहविकारिणाम् ॥८६॥
मिथ्यात्वदूषितधियामरुच्यं धर्मभेषजम् । सदप्यसदिवाभाति तेषां पित्तजुषामिव ॥८७॥
सुभाषितमहामन्त्रान् प्रयुक्तान्कविमन्त्रिभिः । श्रुत्वा प्रकोपमायान्ति दुर्ग्रहा इव दुर्जनाः ॥८८॥
चिरप्ररूढदुर्ग्रन्थिवेणुमूलसमोऽनृजुः । नर्जूकर्त्तुं खलः शक्यः श्वपुच्छसदृशोऽथवा ॥८९॥

अच्छा मानते हैं और कोई पृथक् पृथक् रहने वाली—असमस्त पदावलीको ही चाहते हैं ॥७८॥ कोई मृदुल-सरल रचनाको चाहते हैं, कोई कठिन रचनाको चाहते हैं, कोई मध्यम दर्जेकी रचना पसन्द करते हैं और कोई ऐसे भी हैं जिनकी रुचि सबसे विलक्षण—अनोखी है ॥७९॥ इस प्रकार भिन्न-भिन्न विचार होनेके कारण बुद्धिमान् पुरुषोंको प्रसन्न करना कठिन कार्य है । तथा सुभाषितोंसे सर्वथा अपरिचित रहने वाले मूर्ख मनुष्यको वशमें करना उनकी अपेक्षा भी कठिन कार्य है ॥८०॥ दुष्ट पुरुष निर्दोष और मनोहर कथाको भी दूषित कर देते हैं जैसे चन्दनवृक्ष की मनोहर कान्तिसे युक्त नयी कोपलों को सर्प दूषित कर देते हैं ॥ ८१ ॥ परन्तु सज्जन पुरुष सदोष रचनाको भी निर्दोष बना देते हैं जैसे कि शरद ऋतु पंक सहित सरोवरोंको पंक रहित—निर्मल बना देती है ॥८२॥ दुर्जन पुरुष दोषोंको चाहते हैं और सज्जन पुरुष गुणों को । उनका यह सहज स्वभाव है जिसकी चिकित्सा बहुत समयमें भी नहीं हो सकती अर्थात् उनका यह स्वभाव किसी प्रकार भी नहीं छूट सकता ॥८३॥ जब कि सज्जनोंका धन गुण है और दुर्जनोंका धन दोष, तब उन्हें अपना-अपना धन ग्रहण कर लेनेमें भला कौन बुद्धिमान् पुरुष बाधक होगा ? ॥८४॥ अथवा दुर्जन पुरुष हमारे काव्यसे दोषोंको ग्रहण कर लेवें जिससे गुण ही गुण रह जावें यह बात हमको अत्यन्त इष्ट है क्योंकि जिस काव्यसे समस्त दोष निकाल लिये गये हों वह काव्य निर्दोष होकर उत्तम हो जावेगा ॥८५॥ जिस प्रकार मन्त्रविद्याको सुन कर भूत पिशाचादि महाग्रहोंसे पीड़ित मनुष्योंका मन दुःखी होता है उसी प्रकार निर्दोष धर्मकथा को सुन कर दुर्जनोंका मन दुखी होता है ॥८६॥ जिन पुरुषोंकी बुद्धि मिथ्यात्वसे दूषित होती है उन्हें धर्मरूपी औषधि तो अरुचिकर मालूम होती ही है साथमें उत्तमोत्तम अन्य पदार्थ भी बुरे मालूम होते हैं जैसे कि पित्तज्वर वालेको औषधि या अन्य दुग्ध आदि उत्तम पदार्थ भी बुरे-कडुवें मालूम होते हैं ॥८७॥ कवि रूप मन्त्रवादियोंके द्वारा प्रयोगमें लाये हुए सुभाषित रूप मंत्रोंको सुनकर दुर्जन पुरुष भूतादि ग्रहोंके समान प्रकोपको प्राप्त होते हैं ॥८८॥ जिस प्रकार बहुत दिनसे जमे हुए बांसकी गाँठ-दार जड़ स्वभावसे टेढ़ी होती है उसे कोई सीधा नहीं कर सकता उसी प्रकार चिरसंचित

---

१ श्लिष्टबन्धः । गाढबन्ध इत्यर्थः । २ अभिप्रायः । ३ दुराराध्या अ०, प०, स०, द०, म०, ल०, । ४ विपश्चितः अ०, स० । ५ पामरः । ६ सुष्ठु दुःखेन महता कष्टेन ग्रहीतुं शक्यः । ७ मञ्जरीम् ल० । ८ शरत्-कालः । ९ शरीरजः 'क्षेत्रं पत्नीशरीरयोः' इत्यभिधानात् । १० मनोज्ञम् । ११ दूङ् परितापे ।

सुजनः सुजनीकर्तुमशक्तो यच्चिरादपि । खलः खलीकरोत्येव जगदाशु तदद्भुतम् ॥९०॥
सौजन्यस्य परा कोटिरनसूया दयालुता । गुणपक्षानुरागश्च दौर्जन्यस्य विपर्ययः ॥९१॥
स्वभावमिति निश्चित्य सुजनस्येतरस्य च । सुजनेष्वनुरागो नो दुर्जनेष्ववधीरणाः ॥९२॥
कवीनां कृतिनिर्वाहे सतो मत्वावलम्बनम् । कविताम्भोधिमुद्वेलं[1] लिलङ्घयिषुरस्म्यहम् ॥९३॥
कवेर्भावोऽथवा कर्म काव्यं तज्ज्ञैर्निरुच्यते । तत्प्रतीतार्थमग्राम्यं[2] सालङ्कारमनाकुलम्[3] ॥९४॥
केचिदर्थस्य सौन्दर्यमपरे पदसौष्ठवम्[4] । वाचामलंक्रियां प्राहुस्तद्द्वयं नो मतं मतम् ॥९५॥
सालङ्कार[5]मुपारूढरससमुद्भूतसौष्ठवम् । अनुच्छिष्टं[6] सतां काव्यं सरस्वत्या मुखायते ॥९६॥
अस्पृष्टबन्धलालित्यमपेत रसवत्तया । न तत्काव्य[7]मिति ग्राम्यं केवलं कटु कर्णयोः ॥९७॥
सुश्लिष्टपदविन्यासं 'प्रबन्धं रचयन्ति ये । 'श्राव्यबन्धं प्रसन्नार्थं ते महाकवयो मताः ॥९८॥

मायाचारसे पूर्ण दुर्जन मनुष्य भी स्वभावसे टेढ़ा होता है उसे कोई सीधा-सरल परिणामी नहीं कर सकता अथवा जिस तरह कोई कुत्तेकी पूँछको सीधा नहीं कर सकता उसी तरह दुर्जनको भी कोई सीधा नहीं कर सकता ॥८९॥ यह एक आश्चर्यकी बात है कि सज्जन पुरुष चिरकालके सतत प्रयत्नसे भी जगत्को अपने समान सज्जन बनानेके लिए समर्थ नहीं हो पाते परन्तु दुर्जन पुरुष उसे शीघ्र ही दुष्ट बना लेते हैं ॥९०॥ ईर्ष्या नहीं करना, दया करना तथा गुणी जीवोंसे प्रेम करना यह सज्जनता की अन्तिम अवधि है और इसके विपरीत अर्थात् ईर्ष्या करना, निर्दयी होना तथा गुणी जीवोंसे प्रेम नहीं करना यह दुर्जनताकी अन्तिम अवधि है। यह सज्जन और दुर्जनोंका स्वभाव ही है ऐसा निश्चय कर सज्जनोंमें न तो विशेष राग ही करना चाहिये और न दुर्जनोंका अनादर ही करना चाहिये ॥९१-९२॥ कवियोंके अपने कर्तव्यकी पूर्तिमें सज्जन पुरुष ही अवलम्बन होते हैं ऐसा मानकर मैं अलंकार, गुण, रीति आदि लहरों से भरे हुए कवितारूपी समुद्रको लांघना चाहता हूँ अर्थात् सत्पुरुषोंके आश्रयसे ही मैं इस महान् काव्य ग्रन्थको पूर्ण करना चाहता हूँ ॥९३॥ काव्य स्वरूपके जाननेवाले विद्वान्, कविके भाव अथवा कार्यको काव्य कहते हैं। कविका वह काव्य सर्वसंमत अर्थसे सहित, ग्राम्यदोषसे रहित, अलंकारसे युक्त और प्रसाद आदि गुणोंसे शोभित होना चाहिये ॥९४॥ कितने ही विद्वान् अर्थकी सुन्दरताको वाणीका अलंकार कहते हैं और कितने ही पदोंकी सुन्दरताको, किन्तु हमारा मत है कि अर्थ और पद दोनोंकी सुन्दरता ही वाणीका अलंकार है ॥९५॥ सज्जन पुरुषोंका बनाया हुआ जो काव्य अलंकार सहित, शृङ्गारादि रसोंसे युक्त, सौन्दर्यसे ओतप्रोत और उच्छिष्टता रहित अर्थात् मौलिक होता है वह काव्य सरस्वतीदेवीके मुखके समान शोभायमान होता है अर्थात् जिस प्रकार शरीरमें मुख सबसे प्रधान अङ्ग है उसके बिना शरीरकी शोभा और स्थिरता नहीं होती उसी प्रकार सर्व लक्षण पूर्ण काव्य ही सब शास्त्रोंमें प्रधान है तथा उसके बिना अन्य शास्त्रोंकी शोभा और स्थिरता नहीं हो पाती ॥९६॥ जिस काव्यमें न तो रीतिकी रमणीयता है, न पदोंका लालित्य है और न रसका ही प्रवाह है उसे काव्य नहीं कहना चाहिए वह तो केवल कानोंको दुःख देनेवाली ग्रामीण भाषा ही है ॥९७॥ जो अनेक अर्थोंको सूचित करनेवाले पदविन्याससे सहित, मनोहर रीतियोंसे

---

१ वेलामतिक्रान्तम् । २ ग्राम्यं 'दुःप्रतीतिकरं ग्राम्यम्, यथा—'या भवतः प्रिया'। ३ रसालङ्कारैरसङ्कीर्णम् । ४ सहृदयहृदयाह्लादकत्वम् । ५ प्रादुर्भूत । ६ उच्छिष्टं परप्ररूपितम् । ७ मतिग्राम्यं स०, प०, द०, म० । ८ काव्यम् । ९ श्रव्यबन्ध स०, प०, ल० ।

महापुराणसम्बन्धि महानायकगोचरम् । त्रिवर्गफलसन्दर्भं महाकाव्यं तदिष्यते ॥९९॥
[1]निस्तनन् कतिचिच्छ्लोकान् सर्वोऽपि कुरुते कविः । पूर्वापरार्थघटनैः प्रबन्धो दुष्करो मतः ॥१००॥
शब्दराशिरपर्यन्तः स्वाधीनोऽर्थः स्फुटा[2] रसाः । सुलभाश्च [3]प्रतिच्छन्दाः कवित्वे का दरिद्रता ॥१०१॥
[4]प्रयान्महति वाङ्मार्गे खिन्नोऽर्थग[5]हनाटनैः । महाकवितरुच्छायां [6]विश्रमायाश्रयेत्कविः ॥१०२॥
प्रज्ञामूलो गुणोदग्रस्कन्धो वाक्पल्लवोज्ज्वलः । महाकवितरुर्धत्ते यशःकुसुममञ्जरीम् ॥१०३॥
प्रज्ञावेलः प्रसादोर्मिर्गुणरत्नपरिग्रहः । महाध्वानः [7]पृथुस्रोताः कविरम्भोनिधीयते ॥१०४॥
यथोक्तमुपयुञ्जीध्वं बुधाः काव्यरसायनम् । येन कल्पान्तरस्थायि वपुर्वः स्याद्यशोमयम् ॥१०५॥
यशोधनं [8]चिचीर्षूणां पुण्यपुण्यपणायिनाम्[9] । परं मूल्यमिहाम्नातं[10] काव्यं धर्मकथामयम् ॥१०६॥

युक्त एवं स्पष्ट अर्थसे उद्भासित प्रबन्धों-काव्योंकी रचना करते हैं वे महाकवि कहलाते हैं ।।९८।। जो प्राचीनकालके इतिहाससे सम्बन्ध रखने वाला हो, जिसमें तीर्थंकर चक्रवर्ती आदि महापुरुषोंके चरित्रका चित्रण किया गया हो तथा जो धर्म अर्थ और कामके फलको दिखाने वाला हो उसे महाकाव्य कहते हैं ।।९९। किसी एक प्रकीर्णक विषयको लेकर कुछ श्लोकोंकी रचना तो सभी कवि कर सकते हैं परन्तु पूर्वापरका सम्बन्ध मिलाते हुए किसी प्रबन्धकी रचना करना कठिन कार्य है ।।१००।। जब कि इस संसारमें शब्दोंका समूह अनन्त है, वर्णनीय विषय अपनी इच्छाके आधीन है, रस स्पष्ट हैं और उत्तमोत्तम छन्द सुलभ है तब कविता करनेमें दरिद्रता क्या है ? अर्थात् इच्छानुसार सामग्रीके मिलनेपर उत्तम कविता ही करना चाहिये ।।१०१।। विशाल शब्दमार्गमें भ्रमण करता हुआ जो कवि अर्थरूपी सघन वनोंमें घूमनेसे खेद–खिन्नताको प्राप्त हुआ है उसे विश्रामके लिए महाकवि रूप वृक्षोंकी छायाका आश्रय लेना चाहिये । अर्थात् जिस प्रकार महावृक्षोंकी छायासे मार्गकी थकावट दूर हो जाती है और चित्त हलका हो जाता है उसी प्रकार महाकवियोंके काव्यग्रन्थोंके परिशीलनसे अर्थाभावसे होनेवाली सब खिन्नता दूर हो जाती है और चित्त प्रसन्न हो जाता है ।।१०२। प्रतिभा जिसकी जड़ है, माधुर्य ओज प्रसाद आदि गुण जिसकी उन्नत शाखाएँ हैं, और उत्तम शब्द ही जिसके उज्ज्वल पत्ते हैं ऐसा यह महाकविरूपी वृक्ष यशरूपी पुष्पमञ्जरीको धारण करता है ।।१०३।। अथवा बुद्धि ही जिसके किनारे हैं, प्रसाद आदि गुण ही जिसमें लहरे हैं, जो गुणरूपी रत्नोंसे भरा हुआ है, उच्च और मनोहर शब्दोंसे युक्त है, तथा जिसमें गुरुशिष्य-परम्परा रूप विशाल प्रवाह चला आ रहा है ऐसा यह महाकवि समुद्रके समान आचरण करता है ।।१०४।। हे विद्वान् पुरुषों ! तुम लोग ऊपर कहे हुए काव्यरूपी रसायनका भरपूर उपयोग करो जिससे कि तुम्हारा यशरूपी शरीर कल्पान्त कालतक स्थिर रह सके । भावार्थ—जिस प्रकार रसायन सेवन करनेसे शरीर पुष्ट हो जाता है उसी प्रकार ऊपर कहे हुए काव्य, महाकवि आदि के स्वरूपको समझकर कविता करनेवालेका यश चिरस्थायी हो जाता है ।।१०५।। जो पुरुष यशरूपी धनका संचय और पुण्य रूपी पण्यका व्यवहार-लेनदेन करना चाहते हैं उनके लिए धर्मकथाको निरूपण करनेवाला यह काव्य मूलधन (पूँजी) के समान माना गया है ।।१०६।

१ निस्तन्वन् म०। निस्तनन् ल०, द०, प०, स० । क्लिश्यन् । २ स्फुटो रसः द०, प० । ३ प्रविच्छन्दाः ल० । प्रतिनिधयः । ४ गच्छन् । ५ गहनं काननम् । ६ विश्रमाया–द०, स०, प०, म०, ल० । ७ अविच्छिन्न-शब्दप्रवाहः । ८ चिचीषूणां स०, द० । पोषितुमिच्छूनाम् । 'चृ भरणे' इति क्रयादिधातोः सन् तत उप्रत्ययः । ९ पणायिताम् स० । क्रेतृणाम् । १० कथितम् ।

इदमध्यवसाया[1]हं कथां धर्मानुबन्धिनीम्[2] । प्रस्तुवे[3] प्रस्तुतां सद्भिर्महापुरुषगोचराम् ॥१०७॥
विस्तीर्णानेकशाखाढ्यां[4] [5]सच्छायां फलशालिनीम् । [6]आर्यैर्निषेवितां रम्यां सतीं कल्पलतामिव ॥१०८॥
प्रसन्नामतिगम्भीरां निर्मलां [7]सुखशीतलाम् । [8]निर्वापितजगत्तापां महतीं सरसीमिव ॥१०९॥
गुरुप्रवाहसंभूतिमपङ्कां तापविच्छिदम्[9] । कृतावतारां[10] कृतिभिः पुण्यां व्योमापगामिव ॥११०॥
चेतःप्रसादजननीं कृतमङ्गलसंग्रहाम् । [11]क्रोडीकृतजगद्बिम्बां हसन्तीं दर्पणश्रियम् ॥१११॥
कल्पाङ्घ्रिपादिवोत्तुङ्गादभीष्टफलदायिनः । महाशाखामिवोदग्रां श्रुतस्कन्धादुपाहृताम् ॥११२॥
प्रथमस्यानुयोगस्य गम्भीरस्योदधेरपि । वेलामिव बृहद्ध्वानां[12] प्रसृतार्थमहाजलाम् ॥११३॥
[13]आक्षिप्ताशेषतन्त्रार्थां[14] [15]विक्षिप्तपरशासनाम् । सतां संवेगजननीं निर्वेदरसबृंहिणीम् ॥११४॥
अद्भुतार्थामिमां दिव्यां [16]परमार्थबृहत्कथाम् । लम्भैरनेकैः संदब्धां गुणाढ्यैः पूर्वसूरिभिः ॥११५॥

यह निश्चयकर मैं ऐसी कथाको आरम्भ करता हूँ जो धर्मशास्त्रसे सम्बन्ध रखनेवाली है, जिसका प्रारम्भ अनेक सज्जन पुरुषोंके द्वारा किया गया है तथा जिसमें ऋषभनाथ आदि महापुरुषोंके जीवनचरित्रका वर्णन किया गया है ॥१०७॥ जो धर्मकथा कल्पलताके समान, फैली हुई अनेक शाखाओं (डालियों, कथा उपकथाओं) से सहित है, छाया (अनातप, कान्ति नामक गुण) से युक्त है, फलों (मधुर फल, स्वर्ग मोक्षादिकी प्राप्ति) से शोभायमान है, आर्यों (भोगभूमिज मनुष्य, श्रेष्ठ पुरुषों) द्वारा सेवित है, मनोहर है और उत्तम है । अथवा जो धर्मकथा बड़े सरोवरके समान प्रसन्न (स्वच्छ, प्रसाद गुणसे सहित) है, अत्यन्त गम्भीर (अगाध, गूढ़ अर्थसे युक्त) है, निर्मल (कीचड़ आदिसे रहित, दुःश्रवत्व आदि दोषोंसे रहित) है, सुखकारी है, शीतल है, और जगत्त्रयके सन्तापको दूर करनेवाली है । अथवा जो धर्मकथा आकाशगंगाके समान गुरुप्रवाह (बड़े भारी प्रवाह, गुरु परम्परा) से युक्त है, पङ्क (कीचड़, दोष) से रहित है, ताप (गरमी, संसारभ्रमणजन्य खेद) को नष्ट करनेवाली है, कुशल पुरुषों (देवों, गणधरादि चतुर पुरुषों) द्वारा किये गये अवतार (प्रवेश, अवगाहन) से सहित है और पुण्य (पवित्र, पुण्यवर्धक) रूप है । अथवा जो धर्मकथा चित्तको प्रसन्न करने, सब प्रकारके मंगलोंका संग्रह करने तथा अपने आपमें जगत्त्रयके प्रतिबिम्बित करनेके कारण दर्पणकी शोभाको हँसती हुईसी जान पड़ती है ॥ अथवा जो धर्मकथा अत्यन्त उन्नत और अभीष्ट फलको देनेवाले श्रुतस्कन्धरूपी कल्पवृक्षसे प्राप्त हुई श्रेष्ठ बड़ी शाखाके समान शोभायमान हो रही है ॥ अथवा जो धर्मकथा, प्रथमानुयोगरूपी गहरे समुद्रकी वेला (किनारे) के समान महागम्भीर शब्दोंसे सहित है और फैले हुए महान् अर्थ रूप जलसे युक्त है ॥ जो धर्मकथा स्वर्ग मोक्षादिके साधक समस्त तन्त्रोंका निरूपण करनेवाली है, मिथ्यामतको नष्ट करनेवाली है, सज्जनोंके संवेगको पैदा करनेवाली और वैराग्य रसको बढ़ानेवाली है ॥ जो धर्मकथा आश्चर्यकारी अर्थोंसे भरी हुई है, अत्यन्त मनोहर है, सत्य अथवा परम

१ निश्चित्य । २ धर्मानुवर्तिनीम् स०,द० । ३ प्रारेभे । ४ शाखा–कथा । ५ समीचीनपुरातनकाव्यच्छायाम् । उक्तं चालङ्कारचूडामणिदर्पणे–'मुखच्छायेन यस्य काव्येषु पुरातनकाव्यच्छाया संक्रामति स महाकविः' इति । ६ भोगभूमिजैः । ७ सुखाय शीतलाम् । ८ निर्वासित-म० । ९ तापविच्छिदाम् अ०, प० । १० अवतारः अवगाहः । ११ क्रोडीकृतं स्वीकृतम् । १२ महाध्वानां ल०, द०, प०, स० । ध्वानः शब्दपरिपाटी । १३ आक्षिप्तः स्वीकृतः । १४ तन्त्रं सिद्धान्तः । १५ विक्षिप्तं तिरस्कृतम् । १६ परमार्थां बृहत्कथाम् स०, द०, ल०, अ० ।

यशःश्रेयस्करीं[1] पुण्यां भुक्तिमुक्तिफलप्रदाम् । पूर्वानुपूर्वीमाश्रित्य वक्ष्ये शृणुत सज्जनाः ॥११६॥

'नवभिः कुलकम्'

कथाकथकयोरत्र श्रोतॄणामपि लक्षणम् । व्यावर्णनीयं प्रागेव कथारम्भे मनीषिभिः ॥११७॥

पुरुषार्थोपयोगित्वात्त्रिवर्गकथनं कथा । तत्रापि सत्कथां धर्म्यामामनन्ति[2] मनीषिणः ॥११८॥

[3]तत्फलाभ्युदयाङ्गत्वादर्थकामकथा[4] कथा । अन्यथा विकथैवासावपुण्यास्रवकारणम्[5] ॥११९॥

यतोऽभ्युदयनिःश्रेयसार्थसंसिद्धिरञ्जसा । सद्धर्मस्तन्निबद्धा या सा सद्धर्मकथा स्मृता ॥१२०॥

प्राहुर्धर्मकथाङ्गानि सप्त सप्तर्धिभूषणाः । यैर्भूषिता कथाऽऽहार्यै[6]र्नटीव रसिका भवेत् ॥१२१॥

द्रव्यं क्षेत्रं तथा तीर्थं कालो भावः फलं महत् । प्रकृतं चेत्यमून्याहुः सप्ताङ्गानि कथामुखे ॥१२२॥

द्रव्यं जीवादि षोढा स्यात्क्षेत्रं त्रिभुवनस्थितिः । जिनेन्द्रचरितं तीर्थं कालस्त्रेधा प्रकीर्तितः ॥१२३॥

प्रकृतं स्यात् कथावस्तु फलं तत्त्वावबोधनम् । भावः क्षयोपशमजस्तस्य स्यात्क्षायिकोऽथवा ॥१२४॥

इत्यमूनि कथाङ्गानि यत्र सा सत्कथा मता । यथावसरमेवैषां[7] प्रपञ्चो दर्शयिष्यते ॥१२५॥

प्रयोजनको सिद्ध करनेवाली है, अनेक बड़ी बड़ी कथाओंसे युक्त है, गुणवान् पूर्वाचार्यों द्वारा जिसकी रचना की गयी है ॥ जो यश तथा कल्याणको करनेवाली है पुण्यरूप है, और स्वर्ग मोक्षादि फलोंको देनेवाली है ऐसी उस धर्मकथाको मैं पूर्व आचार्योंकी आम्नायके अनुसार कहूँगा । हे सज्जन पुरुषों, उसे तुम सब ध्यानसे सुनो ॥१०८–११६॥ बुद्धिमानोंको इस कथा-रम्भके पहिले ही कथा, वक्ता और श्रोताओंके लक्षण अवश्य ही कहना चाहिए ॥११७॥ मोक्ष पुरुषार्थके उपयोगी होनेसे धर्म, अर्थ तथा कामका कथन करना कथा कहलाती है। जिसमें धर्मका विशेष निरूपण होता है उसे बुद्धिमान् पुरुष सत्कथा कहते हैं ॥११८॥ धर्मके फलस्वरूप जिन अभ्युदयोंकी प्राप्ति होती है उनमें अर्थ और काम भी मुख्य हैं अतः धर्मका फल दिखानेके लिए अर्थ और कामका वर्णन करना भी कथा कहलाती है यदि यह अर्थ और कामकी कथा धर्मकथासे रहित हो तो विकथा ही कहलावेगी और मात्र पापास्रवका ही कारण होगी ॥११९॥ जिससे जीवोंको स्वर्ग आदि अभ्युदय तथा मोक्षकी प्राप्ति हो जाती है वास्तवमें वही धर्म कहलाता है उससे सम्बन्ध रखनेवाली जो कथा है उसे सद्धर्मकथा कहते हैं ॥१२०॥ सप्त ऋद्धियोंसे शोभायमान गणधरादि देवोंने इस सद्धर्मकथाके सात अङ्ग कहे हैं। इन सात अङ्गोंसे भूषित कथा अलङ्कारोंसे सजी हुई नटीके समान अत्यन्त सरस हो जाती है ॥१२१॥ द्रव्य, क्षेत्र, तीर्थ, काल, भाव, महाफल और प्रकृत ये सात अंग कहलाते हैं। ग्रंथके आदिमें इनका निरूपण अवश्य होना चाहिये ॥१२२॥ जीव पुद्गल धर्म अधर्म आकाश और काल यह छह द्रव्य हैं, ऊर्ध्व मध्य और पाताल ये तीन लोक क्षेत्र हैं, जिनेन्द्रदेव का चरित्र ही तीर्थ है, भूत भविष्यत् और वर्तमान यह तीन प्रकारका काल है, क्षायोपशमिक अथवा क्षायिक ये दो भाव हैं, तत्त्वज्ञानका होना फल कहलाता है, और वर्णनीय कथावस्तु को प्रकृत कहते हैं ॥१२३–१२४॥ इस प्रकार ऊपर कहे हुए सात अङ्ग जिस कथामें पाए जायँ उसे सत्कथा कहते हैं। इस ग्रन्थमें भी अवसरके अनुसार इन अङ्गोंका विस्तार दिखाया जायेगा। ॥१२५॥

१ श्रेयस्करां स० । २ म्ना अभ्यासे । ३ धर्मफलरूपाभ्युदयाङ्गत्वात् । ४ कथनम् । ५–कारिणी म०, ल० । ६ भूषणैः । ७–मेतेषां स०, द० ।

तस्यास्तु कथकः सूरिः सद्वृत्तः स्थिरधीर्वशी । [1]कल्येन्द्रियः प्रशस्ताङ्गः [2]स्पष्टमृष्टेष्टगीर्गुणः ॥१२६॥
यःसर्वज्ञमताम्भोधिवार्धौतविमलाशयः । अशेषवाङ्मलापायादुज्ज्वला यस्य भारती ॥१२७॥
श्रीमाञ्जितसभो वाग्मी [3]प्रगल्भः [4]प्रतिभानवान् । यः सतां संमतव्याख्यो [5]वाग्विमर्दभरक्षमः ॥१२८॥
दयालुर्वत्सलो धीमान् परेङ्गितविशारदः[6] । योऽधीती विश्वविद्यासु स धीरः कथयेत्कथाम् ॥१२९॥
[7]नानोपाख्यानकुशलो नानाभाषाविशारदः । नानाशास्त्रकलाभिज्ञः स भवेत्कथकाग्रणीः ॥१३०॥
नाङ्गुलीभञ्जनं कुर्यान्न भ्रुवौ नर्तयेद्ब्रुवन् । नाधिक्षिपेन्न[8] च हसेन्नात्युच्चैर्न शनैर्वदेत् ॥१३१॥
उच्चैः प्रभाषितव्यं स्यात् सभामध्ये कदाचन । तत्राप्यनुद्धतं ब्रूयाद्वचः [9]सभ्यमनाकुलम् ॥१३२॥
हितं ब्रूयान्मितं ब्रूयाद् ब्रूयाद्धर्म्यं यशस्करम् । प्रसङ्गादपि न ब्रूयादधर्म्यमयशस्करम् ॥१३३॥
इत्यालोच्य कथायुक्तिमयुक्तिपरिहारिणीम् । [10]प्रस्तूयाद्यः कथावस्तु स शस्तो[11] वदतां वरः ॥१३४॥
आक्षेपिणीं कथां कुर्यात्प्राज्ञः स्वमतसंग्रहे । विक्षेपिणीं कथां तज्ज्ञः कुर्याद्दुर्मतनिग्रहे ॥१३५॥
[12]संवेदिनीं कथां [13]पुण्यफलसम्पत्प्रपञ्चने । [14]निर्वेदिनीं कथां कुर्याद्वैराग्यजननं प्रति ॥१३६॥

वक्ताका लक्षण

सुभाषितमहारत्नप्रसारमिव[8] दर्शयन् । यथाकामं जिघृक्षूणां भक्तिमूल्येन योगिनाम् ॥८७॥
लसद्दशनदीप्तांशुप्रसूनैराकिरन्सदः । सरस्वतीप्रवेशाय पूर्वरङ्गमिवाचरन् ॥८८॥
मनःप्रसादमभितो विभजद्भिरिवायतैः । प्रसन्नैर्वीक्षितैः कृत्स्नां सभां प्रक्षालयन्निव ॥८९॥
तपोऽनुभावसञ्जातमध्यासीनोऽपि विष्टरम् । जगतामुपरीवोच्चैर्महिम्ना घटितस्थितिः ॥९०॥

हे नाथ, आपके चरणोंकी अराधना करनेसे हमारे जो कुछ पुण्यका संचय हुआ है उससे हमें भी आपकी इस उत्कृष्ट महासम्पत्तिकी प्राप्ति हो ॥८०॥ हे देव, आपके प्रसादसे हमारी यह प्रार्थना सफल हो। आज राजर्षि श्रेणिकके साथ साथ हम सब श्रोताओंपर कृपा कीजिये ॥८१॥

इस प्रकार मुनियोंने जब उच्च स्वरसे स्तोत्रोंसे जो गणधर गौतम स्वामीकी स्तुति की थी उससे उस समय मुनिसमाजमें पुण्यवर्द्धक बड़ा भारी कोलाहल होने लगा था ॥८२॥ इस प्रकार समुदाय रूपसे बड़े बड़े मुनियोंने जब गणधर देवकी स्तुति की तब वे प्रसन्न हुए। सो ठीक ही है क्योंकि योगीजन भक्तिके द्वारा वशीभूत होते ही हैं ॥८३॥ इस प्रकार मुनियोंने जब बड़ी शान्ति और गम्भीरताके साथ स्तुति कर गणधर महाराजसे प्रार्थना की तब उन्होंने उनके अनुग्रहमें अपना चित्त लगाया—उस ओर ध्यान दिया ॥८४॥ इसके अनन्तर जब स्तुतिसे उत्पन्न होनेवाला कोलाहल शान्त हो गया और सब लोग हाथ जोड़कर पुराण सुननेकी इच्छासे सावधान हो चुपचाप बैठ गये तब वे भगवान् गौतम स्वामी श्रोताओंको संबोधते हुए गम्भीर मनोहर और उत्कृष्ट अर्थसे भरी हुई वाणी द्वारा कहने लगे। उस समय जो दांतोंकी उज्ज्वल किरणें निकल रही थीं उनसे ऐसा मालूम होता था मानों वे शब्द सम्बन्धी समस्त दोषोंके अभावसे अत्यन्त निर्मल हुई सरस्वती देवीको ही साक्षात् प्रकट कर रहे हों ॥ उस समय वे गणधर स्वामी ऐसे शोभायमान हो रहे थे जैसे भक्तिरूपी मूल्यके द्वारा अपनी इच्छानुसार खरीदनेके अभिलाषी मुनिजनोंको सुभाषित रूपी महारत्नोंका समूह ही दिखला रहे हों ॥ उस समय वे अपने दांतोंके किरणरूपी फूलोंको सारी सभामें बिखेर रहे थे जिससे ऐसा मालूम होता था मानो सरस्वती देवीके प्रवेशके लिए रङ्गभूमिको ही सजा रहे हों ॥ मनकी प्रसन्नताको विभक्त करनेके लिए ही मानो सब ओर फैली हुई अपनी स्वच्छ और प्रसन्न दृष्टिके द्वारा वे गौतम स्वामी समस्त सभाका प्रक्षालन करते हुएसे मालूम होते थे ॥ यद्यपि वे ऋषिराज तपश्चरणके माहात्म्यसे प्राप्त हुए आसनपर बैठे हुए थे तथापि अपने उत्कृष्ट माहात्म्यसे ऐसे मालूम होते थे मानो समस्त लोकके ऊपर ही बैठे हों ॥ उस समय वे न तो सरस्वतीको ही अधिक कष्ट देना चाहते थे और न इन्द्रियोंको ही अधिक चलायमान करना चाहते थे।

१ तदेव म० । २ समुदायेन । ३ मुख्यैः । ४ इति प्रशान्तगम्भीरः स्तुत्वा स्तुतिभिरर्थितः । म० । तथा प० स० । ५ प्रार्थितः । ६ सावधाने । ७ निश्चलं यथा भवति तथा । ८ प्रसारः [समूहः] ।

सरस्वतीपरिक्लेशमनिच्छन्निव नाधिकम् । तीव्रयन्क[1]रणस्पन्दमभिन्नमुखसौष्ठवः ॥९१॥
न [2]स्विद्यन्न परिश्राम्यन्नो त्रस्यन्न परिस्खलन् । सरस्वतीमतिप्रौढामनायासेन योजयन् ॥९२॥
[3]समामृज्वायतस्थानमास्थाय रचितासनः । पल्यङ्केन परां कोटीं वैराग्यस्येव [4]रूपयन् ॥९३॥
करं वामं स्वपर्यङ्के निधायोत्तानितं शनैः । देशनाहस्तमुत्क्षिप्य मार्दवं नाटयन्निव ॥९४॥
व्याजहारातिगम्भीरमधुरोदारया गिरा । भगवान् गौतमस्वामी श्रोतॄन्संबोधयन्निति ॥९५॥
श्रुतं मया श्रुतस्कन्धादायुष्मन्तो महाधियः । [5]निबोधत [6]पुराणं मे[7] यथावत्कथयामि वः ॥९६॥
यत्प्रजापतये ब्रह्मा भरतायादितीर्थकृत् । प्रोवाच तदहं तेऽद्य वक्ष्ये श्रेणिक भोः शृणु ॥९७॥
महाधिकाराश्चत्वारः श्रुतस्कन्धस्य वर्णिताः । तेषामाद्योऽनुयोगोऽयं सतां सच्चरिताश्रयः ॥९८॥
द्वितीयः करणादिः स्यादनुयोगः स यत्र वै । त्रैलोक्यक्षेत्रसंख्यानं [8]कुलपत्रेऽधिरोपितम् ॥९९॥
चरणादिस्तृतीयः स्यादनुयोगो जिनोदितः । यत्र [9]चर्याविधानस्य परा शुद्धिरुदाहृता ॥१००॥
तुर्यो द्रव्यानुयोगस्तु द्रव्याणां यत्र निर्णयः । प्रमाणनयनिक्षेपैः[10] सदाद्यैश्च[11] किमादिभिः[12] ॥१०१॥
आनुपूर्व्यादिभेदेन पञ्चधोपक्रमो मतः । स पुराणावतारेऽस्मिन्योजनीयो यथागमम् ॥१०२॥

बोलते समय उनके मुखका सौन्दर्य भी नष्ट नहीं हुआ था ॥ उस समय उन्हें न तो पसीना आता था, न परिश्रम ही होता था, न किसी बातका भय ही लगता था और न वे बोलते बोलते स्खलित ही होते थे–चूकते थे । वे बिना किसी परिश्रमके ही अतिशय प्रौढ़–गम्भीर सरस्वतीको प्रकट कर रहे थे ॥ वे उस समय सम, सीधे और विस्तृत स्थानपर पर्यङ्कासनसे बैठे हुए थे जिससे ऐसे मालूम होते थे मानो शरीर द्वारा वैराग्यकी अन्तिम सीमाको ही प्रकट कर रहे हों । उस समय उनका बाँया हाथ पर्यङ्क पर था और दाहिना हाथ उपदेश देनेके लिए कुछ ऊपरको उठा हुआ था जिससे ऐसे मालूम होते थे मानो वे मार्दव (विनय) धर्मको नृत्य ही करा रहे हों अर्थात् उच्चतम विनय गुणको प्रकट कर रहे हों ॥८५–९५॥ वे कहने लगे–हे आयुष्मान् बुद्धिमान् भव्यजनो , मैंने श्रुतस्कन्धसे जैसा कुछ इस पुराणको सुना है सो ज्योंका त्यों आपलोगोंके लिए कहता हूँ, आपलोग ध्यानसे सुनें ॥९६॥ हे श्रेणिक , आदि ब्रह्मा प्रथम तीर्थंकर भगवान् वृषभदेवने भरत चक्रवर्ती के लिए जो पुराण कहा था उसे ही मैं आज तुम्हारे लिए कहता हूँ तुम ध्यान देकर सुनो ॥९७॥

श्रुतस्कन्धके चार महा अधिकार वर्णित किये गये हैं उनमें पहले अनुयोगका नाम प्रथमानुयोग है । प्रथमानुयोगमें तीर्थंकर आदि सत्पुरुषोंके चरित्रका वर्णन होता है ॥९८॥ दूसरे महाधिकार-का नाम करणानुयोग है इसमें तीनों लोकोंका वर्णन उस प्रकार लिखा होता है जिस प्रकार किसी ताम्रपत्रपर किसी की वंशावली लिखी होती है ॥९९॥ जिनेन्द्रदेवने तीसरे महाधिकारको चरणा-नुयोग बतलाया है । इसमें मुनि और श्रावकोंके चारित्रकी शुद्धिका निरूपण होता है ॥१००॥ चौथा महाधिकार द्रव्यानुयोग है इसमें प्रमाण नय निक्षेप तथा सत्संख्या क्षेत्र, स्पर्शन, काल, अन्तर, भाव, अल्पबहुत्व, निर्देश, स्वामित्व, साधन, अधिकरण, स्थिति, विधान आदिके द्वारा द्रव्यों-का निर्णय किया जाता है ॥१०१॥ आनुपूर्वी आदिके भेदसे उपक्रमके पाँच भेद माने गये हैं ।

---

१ [इन्द्रियं शरीरं वा] । २ खिद्यन् अ० । ३–मृज्वासनस्थान–द०, प० । मृज्वागतः स्थान–स० । ४ दर्शयन् । ५ आनीत । ६ पुराणार्थं स०, ल० । ७ मे इत्यव्ययम् 'अहमित्यर्थः' । ८ सन्तानक्रमादागतताम्र-मयादिपत्रं कुलपत्रमिति वदन्ति । ९ चर्या चरित्रम् । १० निक्षेपः न्यासः । ११ सत् अस्ति किं स्यात् । अथवा सदाद्यैः सत्संख्याक्षेत्रादिभिः । १२ निर्देशस्वामित्वादिभिः ।

प्रकृतस्यार्थतत्त्वस्य श्रोतृबुद्धौ समर्पणम् । उपक्रमोऽसौ विज्ञेयस्तथोपोद्धात इत्यपि ॥१०३॥
आनुपूर्वी तथा नाम प्रमाणं साभिधेयकम् । अर्थाधिकारश्चेत्येवं पञ्चैते स्युरुपक्रमाः ॥१०४॥
[1]पूर्वानुपूर्व्या प्रथमश्चरमोऽयं विलोमतः[2] । यथातथानुपूर्व्या च यां काञ्चिद्गणनां[3] श्रितः ॥१०५॥
श्रुतस्कन्धानुयोगानां चतुर्णां प्रथमो मतः । ततोऽनुयोगं प्रथमं प्राहुरन्वर्थसंज्ञया ॥१०६॥
प्रमाणमधुना तस्य[4] वक्ष्यते ग्रन्थतोऽर्थतः । ग्रन्थगौरवभीरूणां श्रोतृणामनुरोधतः ॥१०७॥
सोऽर्थतोऽपरिमेयोऽपि संख्येयः शब्दतो मतः । कृत्स्नस्य वाङ्मयस्यास्य संख्येयत्वानतिक्रमात् ॥१०८॥
[5]द्वे लक्षे पञ्चपञ्चाशत्सहस्राणि चतुःशतम् । चत्वारिंशत्तथा द्वे च कोट्योऽस्मिन्ग्रन्थसंख्यया ॥१०९॥
एकत्रिंशच्च लक्षाः स्युः शतानां पञ्चसप्ततिः । ग्रन्थसंख्या च विज्ञेया श्लोकेनानुष्टुभेन हि ॥११०॥
ग्रन्थप्रमाणनिश्चित्यै[6] पदसंख्योपवर्ण्यते । पञ्चैवेह सहस्राणि पदानां [7]गणना मता ॥१११॥
शतानि षोडशैव स्युश्चतुस्त्रिंशच्च कोटयः । त्र्यशीतिलक्षाः सप्तैव सहस्राणि शताष्टकम् ॥११२॥
अष्टाशीतिश्च वर्णाः स्युः संहिता[8] मध्यमं पदम् । पदेनैतेन मीयन्ते पूर्वाङ्गग्रन्थविस्तराः ॥११३॥

इस पुराणके प्रारम्भमें उन उपक्रमोंका शास्त्रानुसार सम्बन्ध लगा लेना चाहिए ॥१०२॥ प्रकृत अर्थात् जिसका वर्णन करनेकी इच्छा है ऐसे पदार्थको श्रोताओंकी बुद्धिमें बैठा देना—उन्हें अच्छी तरह समझा देना सो उपक्रम है इसका दूसरा नाम उपोद्धात भी है ॥१०३॥ १ आनुपूर्वी २ नाम ३ प्रमाण ४ अभिधेय और ५ अर्थाधिकार ये उपक्रमके पाँच भेद हैं ॥१०४॥ यदि चारों महाधिकारोंको पूर्व क्रमसे गिना जावे तो प्रथमानुयोग पहला अनुयोग होता है और यदि उल्टे क्रमसे गिना जावे तो यही प्रथमानुयोग अन्तका अनुयोग होता है। अपनी इच्छानुसार जहाँ कहींसे भी गणना करनेपर यह दूसरा तीसरा आदि किसी भी संख्याका हो सकता है ॥१०५॥ ग्रन्थके नाम कहनेको नाम उपक्रम कहते हैं यह प्रथमानुयोग श्रुतस्कन्धके चारों अनुयोगोंमें सबसे पहला है इसलिए इसका प्रथमानुयोग यह नाम सार्थक गिना जाता है ॥१०६॥ ग्रन्थ विस्तारके भयसे डरनेवाले श्रोताओंके अनुरोधसे अब इस ग्रन्थका प्रमाण बतलाता हूँ। वह प्रमाण अक्षरोंकी संख्या तथा अर्थ इन दोनोंकी अपेक्षा बतलाया जायगा ॥१०७॥ यद्यपि यह प्रथमानुयोग रूप ग्रन्थ अर्थकी अपेक्षा अपरिमेय है—संख्यासे रहित है तथापि शब्दोंकी अपेक्षा परिमेय है—संख्येय है तब उसका एक अंश प्रथमानुयोग असंख्येय कैसे हो सकता है ? ॥१०८॥ ३२ अक्षरोंके अनुष्टुप् श्लोकोंके द्वारा गणना करनेपर प्रथमानुयोगमें दो लाख करोड़, पचपन हजार करोड़, चार सौ ब्यालीस करोड़ और इकतीस लाख सात हजार पाँच सौ (२५५४४२३१०७५००) श्लोक होते हैं ॥१०९–११०॥ इस प्रकार ग्रन्थप्रमाणका निश्चय कर अब उसके पदोंकी संख्याका वर्णन करते हैं। प्रथमानुयोग ग्रन्थके पदोंकी गणना पाँच हजार मानी गई है और सोलह सौ चौंतीस करोड़ तेरासी लाख सात हजार आठ सौ अठासी (१६३४८३०७८८८) अक्षरोंका एक मध्यम पद होता है। इस मध्यमपदके द्वारा ही ग्यारह अङ्ग तथा चौदह पूर्वोंकी ग्रन्थसंख्याका वर्णन किया जाता

१ पूर्वपरिपाट्या। २ अपरतः, अपरानुपूर्व्येत्यर्थः। ३–च्छिद्गुणनां स०। ४ प्रथमानुयोगस्य। ५ परिकर्मादिभेदेन पञ्चविधस्य द्वादशतमाङ्गस्य दृष्टिवादाख्यस्य तृतीयो भेदः प्रथमानुयोगः। तत्र पञ्चसहस्रमध्यमपदानि भवन्ति तानि मध्यमपदवर्णैः १६३४८३०७८८८ गुणयित्वा द्वात्रिंशत्संख्यया भक्ते द्वे लक्षे पञ्चपञ्चाशदित्यादिसंख्या स्यात्। ६ –प्रमाणं निश्चित्य द०, प०, ल०। ७ गणिमानतः ट०। गणधरतः। ८ संहताः ट। संयुक्ताः।

द्रव्यप्रमाणमित्युक्तं भावतस्तु [1]श्रुतात्मकम् । प्रमाणमविसंवादि परमर्षिप्रणेतृकम् ॥११४॥
पुराणस्यास्य [2]वक्तव्यं कृत्स्नं वाङ्मयमिष्यते । यतो नास्माद्बहिर्भूतमस्ति [3]वस्तु वचोऽपि वा ॥११५॥
यथा महार्घ्यरत्नानां प्रसूतिर्मकराकरात् । तथैव सूक्तरत्नानां प्रभवोऽस्मात्पुराणतः ॥११६॥
तीर्थकृच्चक्रवर्तीन्द्रबलकेशवसम्पदः । मुनीनामृद्धयश्चास्य वक्तव्याः सह कारणैः ॥११७॥
बद्धो मुक्तस्तथा बन्धो मोक्षस्तद्द्वयकारणम् । षड्द्रव्याणि पदार्थाश्च नवेत्यस्यार्थसंग्रहः ॥११८॥
जगत्त्रयनिवेशश्च त्रैकाल्यस्य च संग्रहः । जगतः सृष्टिसंहारौ चेति कृत्स्नमिहोच्यते[4] ॥११९॥
[5]मार्गो मार्गफलं चेति पुरुषार्थसमुच्चयः । यावान्प्रविस्तरस्तस्य धत्ते सोऽस्याभिधेयताम् ॥१२०॥
किमत्र बहुनोक्तेन धर्मसृष्टिरविप्लुता[6] । यावती सास्य वक्तव्यपदवीमवगाहते ॥१२१॥
सुदुर्लभं यदन्यत्र चिरादपि सुभाषितम् । सुलभं स्वैरसंग्राह्यं तदिहास्ति पदे पदे ॥१२२॥
यदत्र सुस्थितं वस्तु तदेव निकषक्षमम्[7] । यदत्र दुःस्थितं नाम तत्सर्वत्रैव दुःस्थितम् ॥१२३॥
एवं महाभिधेयस्य पुराणस्यास्य भूयसः । क्रियतेऽर्थाधिकाराणामियत्तानुगमोऽधुना ॥१२४॥
त्रयःषष्टिरिहार्थाधिकाराः प्रोक्ता महर्षिभिः । कथापुरुषसंख्यायास्तत्प्रमाणानतिक्रमात् ॥१२५॥
त्रिषष्ट्यवयवः सोऽयं पुराणस्कन्ध इष्यते । अवान्तराधिकाराणामपर्यन्तोऽत्र विस्तरः ॥१२६॥

है ॥१११-११३॥ यह जो ऊपर प्रमाण बतलाया है सो द्रव्यश्रुतका ही है, भावश्रुतका नहीं है। वह भावकी अपेक्षा श्रुतज्ञान रूप है जो कि सत्यार्थ, विरोधरहित और केवलिप्रणीत है ॥११४॥ सम्पूर्ण द्वादशाङ्ग ही इस पुराणका अभिधेय विषय है क्योंकि इसके बाहर न तो कोई विषय ही है और न शब्द ही है ॥११५॥ जिस प्रकार महामूल्य रत्नोंकी उत्पत्ति समुद्रसे होती है उसी प्रकार सुभाषितरूपी रत्नोंकी उत्पत्ति इस पुराणसे होती है ॥ ११६ ॥ इस पुराणमें तीर्थंकर चक्रवर्ती इन्द्र बलभद्र और नारायणोंकी संपदाओं तथा मुनियोंकी ऋद्धियोंका उनकी प्राप्तिके कारणोंके साथ साथ वर्णन किया जावेगा। ११७॥ इसी प्रकार संसारी जीव, मुक्त जीव, बन्ध, मोक्ष, इन दोनोंके कारण, छह द्रव्य और नव पदार्थ ये सब इस ग्रन्थके अर्थसंग्रह हैं अर्थात् इस सबका इसमें वर्णन किया जावेगा ॥११८॥ इस पुराणमें तीनों लोकोंकी रचना, तीनों कालोंका संग्रह, संसारकी उत्पत्ति और विनाश इन सबका वर्णन किया जावेगा ॥११९॥ सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चरित्र रूप मार्ग, मोक्ष रूप इसका फल तथा धर्म अर्थ और काम ये पुरुषार्थ इन सबका जो कुछ विस्तार है वह सब इस ग्रन्थकी अभिधेयताको धारण करता है अर्थात् उसका इसमें कथन किया जावेगा ॥१२०॥ अधिक कहनेसे क्या, जो कुछ जितनी निर्बाध धर्मकी सृष्टि है वह सब इस ग्रन्थ की वर्णनीय वस्तु है ॥१२१॥ जो सुभाषित दूसरी जगह बहुत समय तक खोजनेपर भी नहीं मिल सकते उनका संग्रह इस पुराणमें अपनी इच्छानुसार पद पद पर किया जा सकता है ॥१२२॥ इस ग्रन्थमें जो पदार्थ उत्तम ठहराया गया है वह दूसरी जगह भी उत्तम होगा तथा जो इस ग्रन्थमें बुरा ठहराया गया है वह सभी जगह बुरा ही ठहराया जावेगा। भावार्थ—यह ग्रन्थ पदार्थोंकी अच्छाई तथा बुराईकी परीक्षा करनेके लिए कसौटीके समान है ॥१२३॥ इस प्रकार यह महापुराण बहुत भारी विषयोंका निरूपण करने वाला है अब इसके अर्थाधिकारोंकी संख्याका नियम कहते हैं ॥१२४॥

इस ग्रन्थमें त्रेसठ महापुरुषों का वर्णन किया जावेगा इसलिए उसी संख्याके अनुसार ऋषियोंने इसके त्रेसठ ही अधिकार कहे हैं ॥१२५॥ इस पुराण स्कन्धके

---

१ श्रुतज्ञानं (नामा)। २ अभिधेयम्। ३ अर्थः। ४-मिहोच्यते द०, प०, स०, म०, ल०,। ५ रत्नत्रयात्मकः। ६ अबाधिता। ७ विचारक्षमम्। ८-त्ताधिगमो-अ०, द०।

तीर्थकृत्पुराणेषु शेषाणामपि संग्रहात् । चतुर्विंशतिरेवात्र पुराणानीति केचन ॥१२७॥
पुराणं वृषभस्याद्यं द्वितीयमजितेशिनः । तृतीयं संभवस्येष्टं चतुर्थमभिनन्दने ॥१२८॥
पञ्चमं सुमतेः प्रोक्तं षष्ठं पद्मप्रभस्य च । सप्तमं स्यात्सुपार्श्वस्य [1]चन्द्रभासोऽष्टमं स्मृतम् ॥१२९॥
नवमं पुष्पदन्तस्य दशमं शीतलेशिनः । [2]श्रायसं च परं तस्माद् द्वादशं वासुपूज्यगम् ॥१३०॥
त्रयोदशं च विमले ततोऽनन्तजितः परम् । जिने पञ्चदशं धर्मे शान्तेः षोडशमीशितुः ॥१३१॥
कुन्थोः सप्तदशं ज्ञेयमरस्याष्टादशं मतम् । मल्लेरेकोनविंशं स्याद्विंशं च मुनिसुव्रते ॥१३२॥
एकविंशं नमेर्भर्तुर्नेमेर्द्वाविंशमर्हतः । पार्श्वेशस्य त्रयोविंशं चतुर्विंशं च सन्मतेः ॥१३३॥
पुराणान्येवमेतानि चतुर्विंशतिरर्हताम् । महापुराणमेतेषां समूहः परिभाष्यते ॥१३४॥
पुराणं [3]महदद्यत्वे यदस्माभिरनुस्मृतम्[4] । [5]पुरा युगान्ते तन्नूनं कियदप्यवशिष्यते ॥१३५॥
दोषाद् दुःषमकालस्य प्रहास्यन्ते धियो नृणाम् । तासां हानेः पुराणस्य हीयते ग्रन्थविस्तरः ॥१३६॥
तथाहीदं पुराणं नः [6]सधर्मा श्रुतकेवली । [7]सुधर्मः प्रचयं नेष्यत्यखिलं मदनन्तरम् ॥१३७॥
जम्बूनामा ततः कृत्स्नं पुराणमपि शुश्रुवान् । प्रथयिष्यति लोकेऽस्मिन् सोऽन्त्यः केवलिनामिह ॥१३८॥
अहं सुधर्मो जम्ब्वाख्यो निखिलश्रुतधारिणः । क्रमात्कैवल्यमुत्पाद्य [8]निर्वास्यामस्ततो वयम् ॥१३९॥
त्रयाणामस्मदादीनां कालः केवलिनामिह । द्वाषष्टिवर्षपिण्डः स्याद् भगवन्निर्वृतेः[9] परम् ॥१४०॥

त्रेसठ अधिकार व अवयव अवश्य हैं परन्तु इसके अवान्तर अधिकारोंका विस्तार अमर्यादित है ॥१२६॥ कोई कोई आचार्य ऐसा भी कहते हैं कि तीर्थंकरोंके पुराणोंमें चक्रवर्ती आदिके पुराणोंका भी संग्रह हो जाता है इसलिए चौबीस ही पुराण समझना चाहिये। जो कि इस प्रकार हैं—पहला पुराण वृषभनाथका, दूसरा अजितनाथका, तीसरा शंभवनाथका, चौथा अभिनन्दननाथका, पाँचवा सुमतिनाथका, छठवाँ पद्मप्रभका, सातवाँ सुपार्श्वनाथका आठवाँ चन्द्रप्रभका, नौवाँ पुष्पदन्तका, दशवाँ शीतलनाथका, ग्यारहवाँ श्रेयान्सनाथका, बारहवाँ वासुपूज्यका, तेरहवाँ विमलनाथका, चौदहवाँ अनन्तनाथका, पन्द्रहवाँ धर्मनाथका, सोलहवाँ शान्तिनाथका, सत्रहवाँ कुन्थुनाथका, अठारहवाँ अरनाथका, उन्नीसवाँ मल्लिनाथका, बीसवाँ मुनिसुव्रतनाथका, इक्कीसवाँ नमिनाथका, बाईसवाँ नेमिनाथका, तेइसवाँ पार्श्वनाथका और चौबीसवाँ सन्मति-महावीर स्वामीका ॥१२७-१३३॥ इस प्रकार चौबीस तीर्थंकरोंके ये चौबीस पुराण हैं इनका जो समूह है वही महापुराण कहलाता है ॥१३४॥ आज मैंने जिस महापुराणका वर्णन किया है वह इस अवसर्पिणी युगके अन्तमें निश्चयसे बहुत ही अल्प रह जावेगा ॥१३५॥ क्योंकि दुःषम नामक पाँचवें कालके दोषसे मनुष्योंकी बुद्धियाँ उत्तरोत्तर घटती जावेंगी और बुद्धियोंके घटनेसे पुराणके ग्रन्थका विस्तार भी घट जावेगा ॥१३६॥

उसका स्पष्ट निरूपण इस प्रकार समझना चाहिए—हमारे पीछे श्रुतकेवली सुधर्माचार्य जो कि हमारे ही समान हैं, इस महापुराणको पूर्णरूपसे प्रकाशित करेंगे ॥१३७॥ उनसे यह सम्पूर्ण पुराण श्री जम्बूस्वामी सुनेंगे और वे अन्तिम केवली होकर इस लोकमें उसका पूर्ण प्रकाश करेंगे ॥१३८॥ इस समय मैं सुधर्माचार्य और जम्बूस्वामी तीनों ही पूर्ण श्रुतज्ञानको धारण करनेवाले हैं—श्रुतकेवली हैं। हम तीनों क्रम-क्रमसे केवलज्ञान प्राप्तकर मुक्त हो जावेंगे ॥१३९॥ हम तीनों केवलियोंका काल भगवान् वर्धमान स्वामीकी मुक्तिके बाद बासठ ६२ वर्षका

१ चन्द्रप्रभस्य। २ श्रेयस इदम्॥ श्रेयांसं अ०, प०, ल०, । ३ महादायत्वे अ०, प०, स०, ल०। ४ कथितम्। ५ अग्रे। ६ सुधर्मो अ०, प०। ७ सुधर्मप्र—अ०। ८ निर्वृतिं गमिष्यामः। ९ भगवन्निर्वृतेः ल०।

ततो यथाक्रमं विष्णुर्नन्दिमित्रोऽपराजितः । गोवर्धनो भद्रबाहुरित्याचार्या महाधियः ॥१४१॥
चतुर्दशमहाविद्यास्थानानां पारगा इमे । पुराणं द्योतयिष्यन्ति कार्त्स्न्येन [1]शरदः शतम् ॥१४२॥
विसाखप्रोष्ठिलाचार्यौ क्षत्रियो जयसाह्वयः । नागसेनश्च सिद्धार्थो धृतिषेणस्तथैव च ॥१४३॥
विजयो बुद्धिमान् गङ्गदेवो धर्मादिशब्दनः[2] । सेनश्च दशपूर्वाणां धारकाः स्युर्यथाक्रमम् ॥१४४॥
त्र्यशीति[3]शतमब्दानामेतेषां कालसंग्रहः । तदा च कृत्स्नमेवेदं पुराणं विस्तरिष्यते ॥१४५॥
ततो नक्षत्रनामा च जयपालो महातपाः । पाण्डुश्च ध्रुवसेनश्च कंसाचार्य इति क्रमात् ॥१४६॥
एकादशाङ्गविद्यानां पारगाः स्युर्मुनीश्वराः । विंशं द्विशतमब्दानामेतेषां काल इष्यते ॥१४७॥
तदा पुराणमेतत्तु[4] पादोनं प्रथयिष्यते । भाजनाभावतो भूयो[5] जायेत[6]ज्ञाकनिष्ठता ॥१४८॥
सुभद्रश्च यशोभद्रो भद्रबाहुर्महायशाः । लोहार्यश्चेत्यमी ज्ञेयाः प्रथमाङ्गाब्धिपारगाः ॥१४९॥
[7]शरदां शतमेषां स्यात् कालोऽष्टादशभिर्युतम्[8] । तुर्यो भागः पुराणस्य तदास्य प्रतनिष्यते ॥१५०॥
ततः क्रमात्प्रहायेदं[9] पुराणं स्वल्पमात्रया । धीप्रमोषादिदोषेण विरलैर्धारयिष्यते ॥१५१॥
[10]ज्ञानविज्ञानसंपन्नगुरुपर्वान्वयादिदम् । प्रमाणं [11]यच्च यावच्च यदा यच्च प्रकाशते ॥१५२॥
तदापीदमनुस्मर्तुं [12]प्रभविष्यन्ति धीधनाः । जिनसेनाग्रगाः पूज्याः कवीनां परमेश्वराः ॥१५३॥
[13]पुराणमिदमेवाद्यं यदाम्नातं स्वयम्भुवा । पुराणाभासमन्यत्तु केवलं वाङ्मलं विदुः ॥१५४॥

है ॥१४०॥ तदनन्तर सौ वर्षमें क्रम-क्रमसे विष्णु, नन्दिमित्र, अपराजित, गोवर्धन और भद्रबाहु व बुद्धिमान् आचार्य होंगे । ये आचार्य ग्यारह अङ्ग और चौदह पूर्वरूप महाविद्याओंके पारंगत अर्थात् श्रुतकेवली होंगे और पुराणको सम्पूर्ण रूपसे प्रकाशित करते रहेंगे ॥१४१–१४२॥ इनके अनन्तर क्रमसे विशाखाचार्य, प्रोष्ठिलाचार्य, क्षत्रियाचार्य, जयाचार्य, नागसेन, सिद्धार्थ, धृतिषेण, विजय, बुद्धिमान्, गङ्गदेव और धर्मसेन ये ग्यारह आचार्य ग्यारह अङ्ग और दश पूर्वके धारक होंगे । उनका काल १८३ वर्ष होगा । उस समयतक इस पुराणका पूर्ण प्रकाश होता रहेगा ॥१४३–१४५॥ इनके बाद क्रमसे नक्षत्र, जयपाल, पाण्डु, ध्रुवसेन और कंसाचार्य ये पाँच महा तपस्वी मुनि होंगे । ये सब ग्यारह अङ्गके धारक होंगे इनका समय २२० दो सौ बीस वर्ष माना जाता है । उस समय यह पुराण एक भाग कम अर्थात् तीन चतुर्थांश रूपमें प्रकाशित रहेगा फिर योग्य पात्रका अभाव होनेसे भगवान्‌का कहा हुआ यह पुराण अवश्य ही कम होता जावेगा ॥१४६–१४८॥ इनके बाद सुभद्र, यशोभद्र, भद्रबाहु और लोहाचार्य ये चार आचार्य होंगे जो कि विशाल कीर्तिके धारक और प्रथम अङ्ग (आचारांग) रूपी समुद्रके पारगामी होंगे । इन सबका समय अठारह वर्ष होगा । उस समय इस पुराणका एक चौथाई भाग ही प्रचलित रह जावेगा ॥१४९–१५०॥ इसके अनन्तर अर्थात् वर्धमान स्वामीके मोक्ष जानेसे ६८३ छः सौ तेरासी वर्ष बाद यह पुराण क्रम-क्रमसे थोड़ा थोड़ा घटता जावेगा । उस समय लोगोंकी बुद्धि भी कम होती जावेगी इसलिए विरले आचार्य ही इसे अल्परूपमें धारण कर सकेंगे ॥१५१॥ इस प्रकार ज्ञानविज्ञानसे सम्पन्न गुरुपरिपाटी द्वारा यह पुराण जब और जिस मात्रामें प्रकाशित होता रहेगा उसका स्मरण करनेके लिए जिनसेन आदि महाबुद्धिमान् पूज्य और श्रेष्ठ कवि उत्पन्न होंगे ॥१५२-१५३॥ श्री वर्धमान स्वामीने जिसका

१ संवत्सरस्य । २ शब्दतः अ०,प०,म०,द०,ल० । शब्दितः स० । ३ त्र्यशीतं शत–अ०,स०,प०,म०,द०,ल० । ४–मेतच्च अ० । ५ पश्चात् । ६ जायेताज्ञा–ल० । ७ समानां अ०,ब०,प०,म०,ल०,द०,स० । ८–र्युतः अ०, द०, म०, प०, स० । ९ प्रहीणं भूत्वा । १० ज्ञानं [मति ज्ञानं] विज्ञानं [लिखितपठितादिकं श्रुतज्ञानम्]। ११ यत्र द०, प० । १२ समर्था भविष्यन्ति । १३ प्रमाणमिद–अ०, स०, प०, द०, म०, ल० ।

नामग्रहणमात्रञ्च पुनाति परमेष्ठिनाम्। किं पुनर्मुहुरापीतं तत्कथाश्रवणामृतम् ॥१५५॥
ततो भव्यजनैः [1]श्राद्धैरवगाह्यमिदं मुहुः । पुराणं [2]पुण्यपुंरत्नैर्भृतमब्धीयितं महत् ॥१५६॥
तच्च पूर्वानुपूर्व्येदं पुराणमनुवर्ण्यते । तत्राद्यास्य पुराणस्य संग्रहे कारिका[3] विदुः ॥१५७॥
स्थितिः कुलधरोत्पत्तिर्वंशानामथ निर्गमः[4] । पुरोः साम्राज्यमार्हन्त्यं निर्वाणं युगविच्छिदा[5] ॥१५८॥
एते महाधिकाराः स्युः पुराणे वृषभेशिनः । यथावसरमन्येषु पुराणेष्वपि लक्षयेत् ॥१५९॥
कथोपोद्धात [6]एष स्यात् कथायाः पीठिकामितः । वक्ष्ये कालावतारञ्च स्थितीः[7] कुलभृतामपि ॥१६०॥

मालिनीच्छन्दः

प्रणिगदति सतीत्थं गौतमे भक्तिनम्रा मुनिपरिषदशेषा श्रोतुकामा पुराणम् ।
मगधनृपतिनामा[8] सावधाना तदाभूद्धितमवगण[9]येद्वा[10] कः सुधीराप्तवाक्यम् ॥१६१॥

शार्दूलविक्रीडितम्

इत्याचार्यपर[11]म्परीणममलं पुण्यं पुराणं पुरा कल्पे यद्भगवानुवाच वृषभश्चक्रादिभर्त्रे जिनः ।
तद्वः पापकलङ्कपङ्कमखिलं प्रक्षाल्य शुद्धिं परां देयात्पुण्यवचोजलं परमिदं तीर्थं जगत्पावनम् ॥१६२॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे कथोपोद्घातवर्णनं नाम द्वितीयं पर्व ॥

निरूपण किया है वह पुराण ही श्रेष्ठ और प्रामाणिक है इसके सिवाय और सब पुराण पुराणाभास हैं उन्हें केवल वाणीके दोषमात्र जानना चाहिए ॥१५४॥ जब कि पञ्च परमेष्ठियोंका नाम लेना ही जीवोंको पवित्र कर देता है तब बार बार उनकी कथारूप अमृतका पान करना तो कहना ही क्या है ? वह तो अवश्य ही जीवोंको पवित्र कर देता है–कर्ममलसे रहित कर देता है ॥१५५॥ जब यह बात है तो श्रद्धालु भव्य जीवोंको पुण्यरूपी रत्नोंसे भरे हुए इस पुराण रूपी समुद्रमें अवश्य ही अवगाहन करना चाहिये । ॥१५६॥ ऊपर जिस पुराणका लक्षण कहा है अब यहाँ क्रमसे उसीको कहेंगे और उसमें भी सबसे पहले भगवान् वृषभनाथके पुराणकी कारिका कहेंगे ॥१५७॥ श्री वृषभनाथके पुराणमें कालका वर्णन, कुलकरोंकी उत्पत्ति, वंशोंका निकलना, भगवान्का साम्राज्य, अरहन्त अवस्था, निर्वाण और युगका विच्छेद होना ये महाधिकार हैं । अन्य पुराणोंमें जो अधिकार होंगे वे समयानुसार बताये जावेंगे ॥१५८-१५९॥

यह इस कथाका उपोद्घात है , अब आगे इस कथाकी पीठिका, कालावतार और कुलकरोंकी स्थिति कहेंगे ॥१६०॥ इस प्रकार गौतम स्वामीके कहनेपर भक्तिसे नम्र हुई वह मुनियोंकी समस्त सभा पुराण सुननेकी इच्छासे श्रेणिक महाराजके साथ सावधान हो गई, सो ठीक ही है क्योंकि ऐसा कौन बुद्धिमान् होगा जो कि आप्त पुरुषोंके हितकारी वचनोंका अनादर करे ॥१६१॥ इस प्रकार जो आचार्य परम्परासे प्राप्त हुआ है, निर्दोष है, पुण्यरूप है और युगके आदिमें भरत चक्रवर्तीके लिए भगवान् वृषभदेवके द्वारा कहा गया था, ऐसा यह जगत्को पवित्र करनेवाला उत्कृष्ट तीर्थ स्वरूप पुराणरूपी पवित्र जल तुम लोगोंके समस्त पाप कलंकरूपी कीचड़को धोकर तुम्हें परम शुद्धि प्रदान करे ॥१६२॥

इस प्रकार आर्ष नामसे प्रसिद्ध, श्री भगवज्जिनसेनाचार्य रचित त्रिषष्टिलक्षणमहापुराण संग्रहमें 'कथोपोद्घात वर्णन' नामका द्वितीय पर्व पूर्ण हुआ ।

---

१ श्रद्धानयुक्तैः । २ पुण्यसंरत्नै–अ० । ३ कारिकां ब०, अ०, ल० । ४ उत्पत्तिः । ५ विच्छिदा भेदः । ६ एषोऽस्याः प०, म०, द०, ल० । ७ स्थितिं स०, प०, द०, म०, ल० । ८ अमा सह । ९ अवज्ञां कुर्यात् । १० तथाहि । ११ परम्परागतम् ।

अथ तृतीयं पर्व

पुराणं मुनिमानम्य जिनं वृषभमच्युतम् । महतस्तत्पुराणस्य पीठिका व्याकरिष्यते ॥१॥
अनादिनिधनः कालो वर्त्तनालक्षणो मतः । लोकमात्रः सुसूक्ष्माणुपरिच्छिन्न[1]प्रमाणकः ॥२॥
सोऽसंख्येयोऽप्यनन्तस्य वस्तुराशेरुपग्रहे[2] । वर्त्तते स्वगतानन्तसामर्थ्यपरिबृंहितः ॥३॥
यथा कुलालचक्रस्य भ्रान्तेर्हेतुरधश्शिला । तथा कालः पदार्थानां वर्त्तनोपग्रहे[3] मतः ॥४॥
[4]स्वतोपि[5] वर्त्तमानानां सोऽर्थानां परिवर्त्तकः । [6]यथास्वं [7]गुणपर्यायैरतो नान्योऽन्यसंप्लवः[8] ॥५॥
सोऽस्ति कायेष्वसंपाठान्नास्तीत्येके[9] विमन्वते । षड्द्रव्येषूपदिष्टत्वाद्युक्तियोगाच्च तद्गतिः[10] ॥६॥

मैं उन वृषभनाथ स्वामीको नमस्कार करके इस महापुराणकी पीठिकाका व्याख्यान करता हूँ जो कि इस अवसर्पिणी युगके सबसे प्राचीन मुनि हैं, जिन्होंने कर्मरूपी शत्रुओंको जीत लिया है और विनाशसे रहित हैं ॥१॥

कालद्रव्य अनादिनिधन है, वर्तना उसका लक्षण माना गया है (जो द्रव्योंकी पर्यायोंके बदलनेमें सहायक हो उसे वर्तना कहते हैं) यह कालद्रव्य अत्यन्त सूक्ष्म परमाणु बराबर है और असंख्यात होनेके कारण समस्त लोकाकाशमें भरा हुआ है । भावार्थ-कालद्रव्यका एक एक परमाणु लोकाकाशके एक एक प्रदेशपर स्थित है ॥२॥ उस कालद्रव्यमें अनन्त पदार्थोंके परिणमन करानेकी सामर्थ्य है अतः वह स्वयं असंख्यात होकर भी अनन्त पदार्थोंके परिणमन-में सहकारी होता है ॥३॥ जिस प्रकार कुम्हारके चाकके घूमनेमें उसके नीचे लगी हुई कील कारण है उसी प्रकार पदार्थोंके परिणमन होनेमें काल द्रव्य सहकारी कारण है । संसारके समस्त पदार्थ अपने अपने गुणपर्यायों द्वारा स्वयमेव ही परिणमनको प्राप्त होते रहते हैं और काल द्रव्य उनके उस परिणमनमें मात्र सहकारी कारण होता है । जब कि पदार्थोंका परिणमन अपने अपने गुणपर्याय रूप होता है तब अनायास ही सिद्ध हो जाता है कि वे सब पदार्थ सर्वदा पृथक् पृथक् रहते हैं अर्थात् अपना स्वरूप छोड़कर परस्परमें मिलते नहीं हैं ॥४॥ जीव, पुद्गल, धर्म, अधर्म, आकाश ये पाँच अस्तिकाय हैं अर्थात् सत्स्वरूप होकर बहुप्रदेशी हैं । इनमें काल द्रव्यका पाठ नहीं है, इसलिए वह है ही नहीं इस प्रकार कितने ही लोग मानते हैं परन्तु उनका वह मानना ठीक नहीं है क्योंकि यद्यपि एक प्रदेशी होनेके कारण काल द्रव्यका पंचास्तिकायोंमें पाठ नहीं है तथापि छह द्रव्योंमें तो उसका पाठ किया गया है । इसके सिवाय युक्तिसे भी काल द्रव्यका सद्भाव सिद्ध होता है । वह युक्ति इस प्रकार है कि संसारमें जो घड़ी घण्टा आदि व्यवहार कालप्रसिद्ध है वह पर्याय है । पर्यायका मूलभूत कोई न कोई पर्यायी अवश्य होता है क्योंकि बिना पर्यायीके पर्याय नहीं हो सकती इसलिए व्यवहार कालका मूल-

---

१ परिच्छिन्नः निश्चितः । २ उपकारे । -रुपग्रहः म० । ३-ग्रहो मतः प० । ४ स्वसामर्थ्यात् । ५ विवर्त- द०,स०,प०,म०,ल० । ६ यथायोग्यम् । ७-स्वगुण-स०, ल०, । ८ परस्परसंकरः । ९ द्राविडाः । १० उपायः ।

[1]मुख्यकल्पेन कालोऽस्ति व्यवहारप्रतीतितः । मुख्यादृते न गौणोऽस्ति सिंहो माणवको यथा ॥७॥
प्रदेशप्रचयापायात्कालस्यानस्तिकायता । [2]गुणप्रचययोगोऽस्य द्रव्यत्वादस्ति सोऽस्त्यतः ॥८॥
अस्तिकायश्रुतिर्वक्ति कालस्यानस्तिकायताम् । सर्वस्य सविपक्षत्वा[3]ज्जीवकायश्रुतिर्यथा ॥९॥
कालोऽन्यो व्यवहारात्मा मुख्यकालव्यपाश्रयः[4] । परापरत्वसंसूच्यो वर्णितः सर्वदर्शिभिः ॥१०॥
वर्त्तितो [5]द्रव्यकालेन वर्त्तनालक्षणेन यः । कालः पूर्वापरीभूतो व्यवहाराय [6]कल्प्यते ॥११॥
समयावलिकोच्छ्वास-नालिकादिप्रभेदतः । ज्योतिश्चक्रभ्रमायत्तं कालचक्रं विदुर्बुधाः ॥१२॥
[7]भवायुष्कायकर्मादिस्थितिसङ्कलनात्मकः[8] । सोऽनन्तसमयस्तस्य परिवर्त्तोऽप्यनन्तधा[9] ॥१३॥
उत्सर्पिण्यवसर्पिण्यौ द्वौ भेदौ तस्य कीर्तितौ । उत्सर्पादवसर्पाच्च बलायुर्देहवर्ष्मणाम्[10] ॥१४॥

भूत मुख्य काल द्रव्य है। मुख्य पदार्थके बिना व्यवहार-गौण पदार्थ की सत्ता सिद्ध नहीं होती। जैसे कि वास्तविक सिंहके बिना किसी प्रतापी बालकमें सिंहका व्यवहार नहीं किया जा सकता वैसे ही मुख्य कालके बिना घड़ी, घण्टा आदिमें काल द्रव्यका व्यवहार नहीं किया जा सकता। परन्तु होता अवश्य है इससे काल द्रव्यका अस्तित्व अवश्य मानना पड़ता है ॥६-७॥ यद्यपि इनमें एकसे अधिक बहुप्रदेशोंका अभाव है इसलिए इसे अस्तिकायोंमें नहीं गिना जाता है तथापि इसमें अगुरुलघु आदि अनेक गुण तथा उनके विकारस्वरूप अनेक पर्याय अवश्य हैं क्योंकि यह द्रव्य है, जो जो द्रव्य होता है उसमें गुणपर्यायोंका समूह अवश्य रहता है। द्रव्यत्वका गुण पर्यायोंके साथ जैसा सम्बन्ध है वैसा बहुप्रदेशोंके साथ नहीं है। अतः बहुप्रदेशोंका अभाव होनेपर भी काल पदार्थ द्रव्य माना जा सकता है और इस तरह काल नामक पृथक् पदार्थकी सत्ता सिद्ध हो जाती है ॥८॥ जीव, पुद्गल, धर्म, अधर्म और आकाशको अस्तिकाय कहनेसे ही यह सिद्ध होता है कि काल द्रव्य अस्तिकाय नहीं है क्योंकि विपक्षीके रहते हुए ही विशेषणकी सार्थकता सिद्ध हो सकती है। जिस प्रकार छह द्रव्योंमें चेतन रूप आत्म-द्रव्यको जीव कहना ही पुद्गलादि पाँच द्रव्योंको अजीव सिद्ध कर देता है उसी प्रकार जीवादिको अस्तिकाय कहना ही कालको अनस्तिकाय सिद्ध कर देता है ॥९॥ इस मुख्य कालके अतिरिक्त जो घड़ी घण्टा आदि है वह व्यवहारकाल कहलाता है। यहाँ यह याद रखना आवश्यक होगा कि व्यवहारकाल मुख्य कालसे सर्वथा स्वतन्त्र नहीं है वह उसीके आश्रयसे उत्पन्न हुआ उसकी पर्याय ही है। यह छोटा है, यह बड़ा है आदि बातोंसे व्यवहारकाल स्पष्ट जाना जाता है ऐसा सर्वज्ञदेवने वर्णन किया है ॥१०॥ यह व्यवहारकाल वर्तना लक्षणरूप निश्चय काल द्रव्यके द्वारा ही प्रवर्तित होता है और वह भूत, भविष्यत् तथा वर्तमान रूप होकर संसारका व्यवहार चलानेके लिए समर्थ होता है अथवा कल्पित किया जाता है ॥११॥ वह व्यवहारकाल समय आवलि उच्छ्वास नाड़ी आदिके भेदसे अनेक प्रकारका होता है। यह व्यवहारकाल सूर्यादि ज्योतिश्चक्रके घूमनेसे ही प्रकट होता है ऐसा विद्वान् लोग जानते हैं ॥१२॥ यदि भव आयु काय और शरीर आदिकी स्थितिका समय जोड़ा जावे तो वह अनन्त समयरूप होता है और उसका परिवर्तन भी अनन्त प्रकारसे होता है ॥१३॥

१ स्वरूपेण । २ अगुरुलघुगुणः । ३ जीवास्तिकायः । ४ संश्रयः । ५ मुख्यकालेन । ६ कल्पितः म० । ७-युः काय-ल०, अ०, म०, स०, प०, द० । ८ सङ्कल्पनात्मकः प० । ९-नन्तकः स० । १० वर्ष्म प्रमाणम् । "वर्ष्म देहप्रमाणयोः" इत्यमरः ।

कोटीकोट्यो दशैकस्य [1]प्रमा सागरसंख्यया । शेषस्याप्येवमेवेष्टा तावुभौ कल्प इष्यते ॥१५॥
षोढा स पुनरेकैको भिद्यते स्वभिदात्मभिः । तन्नामान्यनुकीर्त्यन्ते शृणु राजन् यथाक्रमम् ॥१६॥
द्विरुक्तसुषमाद्यासीत् द्वितीया सुषमा मता । सुषमा दुःषमान्तान्या सुषमान्ता च दुःषमा ॥१७॥
पञ्चमी दुःषमा ज्ञेया [2]समा षष्ठ्यतिदुःषमा । भेदा इमेऽवसर्पिण्या उत्सर्पिण्या विपर्ययाः ॥१८॥
समा कालविभागःस्यात् सुदुसावर्हगर्हयोः । सुषमा दुःषमेत्येवमतोऽन्वर्थत्वमेतयोः ॥१९॥
उत्सर्पिण्यवसर्पिण्यौ कालौ सान्तर्भिदाविमौ । स्थित्युत्सर्पावसर्पाभ्यां लब्धान्वर्थाभिधानकौ ॥२०॥
कालचक्रपरिभ्रान्त्या षट्समापरिवर्तनैः । तावुभौ परिवर्तेते [3]तामिस्रेतरपक्षवत् ॥२१॥
पुराऽस्यामवसर्पिण्यां क्षेत्रेऽस्मिन्भरताह्वये । मध्यमं खण्डमाश्रित्य [4]ववृधे प्रथमा समा ॥२२॥
सागरोपमकोटीनां कोटी स्याच्चतुराहता । तस्य कालस्य परिमा तदा स्थितिरियं मता ॥२३॥
देवोत्तरकुरुक्ष्मासु या स्थितिः समवस्थिता । सा स्थितिर्भारते वर्षे युगारम्भे स्म जायते ॥२४॥

उस व्यवहारकालके दो भेद कहे जाते हैं—१ उत्सर्पिणी और २ अवसर्पिणी । जिसमें मनुष्योंके बल, आयु और शरीरका प्रमाण क्रम क्रमसे बढ़ता जावे उसे उत्सर्पिणी कहते हैं और जिसमें वे क्रम क्रमसे घटते जावें उसे अवसर्पिणी कहते हैं ॥१४॥ उत्सर्पिणी कालका प्रमाण दश कोड़ाकोड़ी सागर है तथा अवसर्पिणी कालका प्रमाण भी इतना ही है । इन दोनोंको मिलाकर बीस कोड़ाकोड़ी सागरका एक कल्प काल होता है ॥१५॥ हे राजन्, इन उत्सर्पिणी और अवसर्पिणी कालके प्रत्येकके छह छह भेद होते हैं। अब क्रमपूर्वक उनके नाम कहे जाते हैं सो सुनो ॥१६॥ अवसर्पिणी कालके छह भेद ये हैं—पहला सुषमासुषमा, दूसरा सुषमा, तीसरा सुषमा-दुःषमा, चौथा-दुःषमासुषमा, पाँचवाँ दुःषमा और छठवाँ अतिदुःषमा अथवा दुःषम दुःषमा ये अवसर्पिणीके भेद जानना चाहिये। उत्सर्पिणी कालके भी छह भेद होते हैं जो कि उक्त भेदोंसे विपरीत रूप हैं, जैसे १ दुःषमादुःषमा, २ दुःषमा, ३ दुःषमासुषमा, ४ सुषमादुःषमा, ५ सुषमा और ६ सुषमासुषमा ॥१७–१८॥ समा कालके विभागको कहते हैं तथा सु और दुर् उपसर्ग क्रमसे अच्छे और बुरे अर्थमें आते हैं । सु और दुर् उपसर्गोंको पृथक् पृथक् समाके साथ जोड़ देने तथा व्याकरणके नियमानुसार स को ष कर देनेसे सुषमा तथा दुःषमा शब्दोंकी सिद्धि होती है । जिनका अर्थ क्रमसे अच्छा काल और बुरा काल होता है, इस तरह उत्सर्पिणी और अवसर्पिणी कालके छहों भेद सार्थक नामवाले हैं ॥१९॥ इसी प्रकार अपने अवान्तर भेदोंसे सहित उत्सर्पिणी और अवसर्पिणी काल भी सार्थक नामसे युक्त हैं क्योंकि जिसमें स्थिति आदिकी वृद्धि होती रहे उसे उत्सर्पिणी और जिसमें घटती होती रहे उसे अवसर्पिणी कहते हैं ॥२०॥ ये उत्सर्पिणी और अवसर्पिणी नामक दोनों ही भेद कालचक्रके परिभ्रमणसे अपने छहों कालोंके साथ साथ कृष्णपक्ष और शुक्लपक्षकी तरह घूमते रहते हैं अर्थात् जिसतरह कृष्णपक्षके बाद शुक्लपक्ष और शुक्लपक्षके बाद कृष्णपक्ष बदलता रहता है उसीतरह अवसर्पिणीके बाद उत्सर्पिणी और उत्सर्पिणीके बाद अवसर्पिणी बदलती रहती है ॥२१॥

पहले इस भरतक्षेत्रके मध्यवर्ती आर्यखण्डमें अवसर्पिणीका पहला भेद सुषमा-सुषमा नामका काल वर्त रहा था उसकालका परिमाण चार कोड़ाकोड़ी सागर था उस समय यहाँ नीचे लिखे अनुसार व्यवस्था थी ॥२२–२३॥ देवकुरु और उत्तरकुरु नामक उत्तर भोगभूमियोंमें जैसी स्थिति रहती है ठीक वैसी ही स्थिति इस भरतक्षेत्रमें युगके

---

१ प्रमितिः । २ कालः । ३ तामिस्रेतरौ कृष्णशुक्लौ । ४ प्रथते स०, प० । ववृते द०, ट० । ववृते वर्तते स्म ।

तदा स्थितिर्मनुष्याणां [1]त्रिपल्योपमसम्मिता। षट्सहस्राणि चापानामुत्सेधो वपुषः स्मृतः ॥२५॥
[2]वज्रास्थिबन्धनाः सौम्याः सुन्दराकारचारवः। निष्टप्तकनकच्छाया दीप्यन्ते ते नरोत्तमाः ॥२६॥
मुकुटं कुण्डलं हारो मेखला कटकाङ्गदौ। केयूरं ब्रह्मसूत्रञ्च तेषां शश्वद्विभूषणम् ॥२७॥
[3]ते स्वपुण्योदयोद्भूतरूपलावण्यसम्पदः। रंरम्यन्ते चिरं स्त्रीभिः सुरा इव सुरालये ॥२८॥
[4]महासत्त्वा महाधैर्या महोरस्का महौजसः। महानुभावास्ते सर्वे [5]महीयन्ते महोदयाः ॥२९॥
तेषामाहारसम्प्रीतिर्जायते दिवसैस्त्रिभिः। [6]कुवलीफलमात्रञ्च दिव्यान्नं [7]विस्वणन्ति ते ॥३०॥
[8]निर्व्यायामा निरातङ्का निर्णीहारा [9]निराधयः। निस्स्वेदास्ते [10]निराबाधा जीवन्ति [11]पुरुषायुषाः ॥३१॥
स्त्रियोऽपि तावदायुष्कास्तावदुत्सेधवृत्तयः। कल्पद्रुमेषु संसक्ता कल्पवल्ल्य इवोज्ज्वलाः ॥३२॥
पुरुषेष्वनुरक्तास्तास्ते च तास्वनुरागिणः। यावज्जीवमसंक्लिष्टा भुञ्जते भोगसम्पदः ॥३३॥
स्वभावसुन्दरं रूपं स्वभावमधुरं वचः। स्वभावचतुरा चेष्टा तेषां स्वर्गजुषामिव ॥३४॥
रुच्याहारगृहातोद्य-माल्यभूषाम्बरादिकम्। भोगसाधनमेतेषां सर्वं कल्पतरूद्भवम् ॥३५॥

प्रारम्भ–अर्थात् अवसर्पिणीके पहले कालमें थी ॥२४॥ उस समय मनुष्योंकी आयु तीन पल्यकी होती थी और शरीरकी ऊँचाई छह हजार धनुषकी थी ॥२५॥ उस समय यहाँ जो मनुष्य थे उनके शरीरके अस्थिबन्धन वज्रके समान सुदृढ़ थे, वे अत्यन्त सौम्य और सुन्दर आकारके धारक थे। उनका शरीर तपाये हुए सुवर्णके समान देदीप्यमान था ॥२६॥ मुकुट, कुण्डल, हार, करधनी, कड़ा, बाजूबन्द और यज्ञोपवीत इन आभूषणों को वे सर्वदा धारण किये रहते थे ॥२७॥ वहाँके मनुष्योंको पुण्यके उदयसे अनुपम रूप सौन्दर्य तथा अन्य सम्पदाओंकी प्राप्ति होती रहती है इसलिये वे स्वर्गमें देवोंके समान अपनी अपनी स्त्रियोंके साथ चिरकालतक क्रीड़ा करते रहते हैं ॥२८॥ वे पुरुष सबके सब बड़े बलवान्, बड़े धीरवीर, बड़े तेजस्वी, बड़े प्रतापी, बड़े सामर्थ्यवान् और बड़े पुण्यशाली होते हैं। उनके वक्षःस्थल बहुत ही विस्तृत होते हैं तथा वे सब पूज्य समझे जाते हैं ॥२९॥ उन्हें तीन दिन बाद भोजनकी इच्छा होती है सो कल्पवृक्षोंसे प्राप्त हुए बदरीफल बराबर उत्तम भोजन ग्रहण करते हैं ॥३०॥ उन्हें न तो कोई परिश्रम करना पड़ता है, न कोई रोग होता है, न मलमूत्रादिकी बाधा होती है, न मानसिक पीड़ा होती है, न पसीना ही आता है और न अकालमें उनकी मृत्यु ही होती है। वे बिना किसी बाधाके सुखपूर्वक जीवन बिताते हैं ॥३१॥ वहाँकी स्त्रियाँ भी उतनी ही आयुकी धारक होती हैं, उनका शरीर भी उतना ही ऊँचा होता है और वे अपने पुरुषोंके साथ ऐसी शोभायमान होती हैं जैसी कल्पवृक्षोंपर लगी हुई कल्पलताएँ ॥३२॥ वे स्त्रियाँ अपने पुरुषोंमें अनुरक्त रहती हैं और पुरुष अपनी स्त्रियोंमें अनुरक्त रहते हैं। वे दोनों ही अपने जीवन पर्यन्त बिना किसी क्लेशके भोग सम्पदाओंका उपभोग करते रहते हैं ॥३३॥ देवोंके समान उनका रूप स्वभावसे सुन्दर होता है, उनके वचन स्वभावसे मीठे होते हैं और उनकी चेष्टाएँ भी स्वभावसे चतुर होती हैं ॥३४॥ इच्छानुसार मनोहर आहार, घर, बाजे, माला, आभूषण और वस्त्र आदिक समस्त भोगोपभोगकी सामग्री

१ त्रिभिः पल्यैरुपमा यस्यासौ त्रिपल्योपमस्तेन सम्मिता। २ अस्थीनि च बन्धनानि च अस्थिबन्धनानि, वज्रवत् अस्थिबन्धनानि येषां ते। ३ एते पुण्ये–अ०,प०,स०,द०,ल०। ४ महौजसः। ५ महीङ वृद्धौ पूजायाम, कण्ड्वादित्वाद् यक्। ६ बदरफलम्। ७ स्वन शब्दे। अश्नन्ति। 'वेश्च स्वनोऽशने' इत्यशनार्थे षत्वम्। ८ श्रमजनकगमनागमनादिव्यापाररहिताः। ९ निरामयाः स०। १० परकृतबाधारहिताः। निराबाधं अ०, ल०। ११ पुरुषायुषम् द०, प०, म०।

मन्दगन्धवहाधूतचलदंशुकपल्लवाः[1] । नित्यालोका[2] विराजन्ते कल्पोपपदपादपाः ॥३६॥
कालानुभवसम्भूतक्षेत्रसामर्थ्यबृंहिताः । कल्पद्रुमास्तथा तेषां [3]कल्पन्तेऽभीष्टसिद्धये ॥३७॥
मनोभिरुचितान्[4] भोगान् यस्मात्पुण्यकृतां नृणाम् । कल्पयन्ति ततस्तज्ज्ञैर्निरुक्ताः कल्पपादपाः ॥३८॥
मद्यतूर्यविभूषास्रग्ज्योतिर्दीपगृहाङ्गकाः । भोजनाम[5]त्रवस्त्राङ्गा दशधा कल्पशाखिनः ॥३९॥
इति स्वनामनिर्दिष्टां कुर्वन्तोऽर्थक्रियाममी । संज्ञाभिरेव विस्पष्टा ततो नातिप्रतन्यते[6] ॥४०॥
तथा भुक्त्वा चिरं भोगान् स्वपुण्यपरिपाकजान् । स्वायुरन्ते विलीयन्ते ते घना इव शारदाः ॥४१॥
जृम्भिकारम्भमात्रेण तत्कालोत्थक्षुतेन वा । जीवितान्ते तनुं त्यक्त्वा ते दिवं यान्त्यनेनसः ॥४२॥
स्वभावमार्दवायोगवक्रतादिगुणैर्युताः । भद्रकाश्चिदिवं यान्ति तेषां नान्या गतिस्ततः ॥४३॥
इत्याद्यः[7] कालभेदोऽवसर्पिण्यां वर्णितो मनाक् । उदक्कुरुसमः शेषो विधिरत्रावधार्यताम्[8] ॥४४॥
ततो यथाक्रमं तस्मिन् काले गलति मन्दताम् । यातासु वृक्षवीर्यायुःशरीरोत्सेधवृत्तिषु ॥४५॥
सुषमालक्षणः कालो द्वितीयः समवर्त्तत । सागरोपमकोटीनां तिस्रः कोट्योऽस्य संमितिः ॥४६॥
तदास्मिन्भारते वर्षे मध्यभोगभुवां[9] स्थितिः । जायते स्म परा भूतिं तन्वाना कल्पपादपैः ॥४७॥
तदा मर्त्या ह्यमर्त्याभा द्विपल्योपमजीविताः[10] । चतुःसहस्रचापोच्चविग्रहाः शुभचेष्टिताः ॥४८॥

इन्हें इच्छा करते ही कल्पवृक्षोंसे प्राप्त हो जाती है ॥३५॥ जिनके पल्लवरूपी वस्त्र मन्द सुगन्धित वायुके द्वारा हमेशा हिलते रहते हैं ऐसे सदा प्रकाशमान रहनेवाले वहाँके कल्पवृक्ष अत्यन्त शोभायमान रहते हैं ॥३६॥ सुषमासुषमा नामक कालके प्रभावसे उत्पन्न हुई क्षेत्रकी सामर्थ्यसे वृद्धिको प्राप्त हुए वे कल्पवृक्ष वहाँके जीवोंको मनोवांछित पदार्थ देनेके लिए सदा समर्थ रहते हैं ॥३७॥ वे कल्पवृक्ष पुण्यात्मा पुरुषोंको मनचाहे भोग देते रहते हैं इसलिए जानकार पुरुषोंने उनका 'कल्पवृक्ष' यह नाम सार्थक ही कहा है ॥३८॥ वे कल्पवृक्ष दश प्रकारके हैं–१ मद्याङ्ग, २ तूर्याङ्ग, ३ विभूषाङ्ग, ४ स्रगङ्ग (माल्याङ्ग), ५ ज्योतिरङ्ग, ६ दीपाङ्ग, ७ गृहाङ्ग, ८ भोजनाङ्ग, ९ पात्राङ्ग और १० वस्त्राङ्ग। ये सब अपने अपने नामके अनुसार ही कार्य करते हैं इसलिए इनके नाम मात्र कह दिए हैं अधिक विस्तारके साथ उनका कथन नहीं किया है ॥३९–४०॥ इस प्रकार वहाँके मनुष्य अपने पूर्व पुण्यके उदयसे चिरकालतक भोगोंको भोगकर आयु समाप्त होते ही शरद्‌ऋतुके मेघोंके समान विलीन हो जाते हैं ॥४१॥ आयुके अन्तमें पुरुषको जिम्हाई आती है और स्त्रीको छींक। उसीसे पुण्यात्मा पुरुष अपना अपना शरीर छोड़कर स्वर्ग चले जाते हैं ॥४२॥ उस समयके मनुष्य स्वभावसे ही कोमलपरिणामी होते हैं, इसलिए वे भद्रपुरुष मरकर स्वर्ग ही जाते हैं। स्वर्गके सिवाय उनकी और कोई गति नहीं होती ॥४३॥ इस प्रकार अवसर्पिणी कालके प्रथम सुषमासुषमा नामक कालका कुछ वर्णन किया है। यहाँकी और समस्त विधि उत्तरकुरुके समान समझना चाहिये ॥४४॥ इसके अनन्तर जब क्रम क्रमसे प्रथम काल पूर्ण हुआ और कल्पवृक्ष, मनुष्योंका बल, आयु तथा शरीरकी ऊँचाई आदि सब घटतीको प्राप्त हो चले तब सुषमा नामक दूसरा काल प्रवृत्त हुआ। इसका प्रमाण तीन कोड़ाकोड़ी सागर था ॥४५–४६॥ उस समय इस भारतवर्षमें कल्पवृक्षोंके द्वारा उत्कृष्ट विभूतिको विस्तृत करती हुई मध्यम भोगभूमिकी अवस्था प्रचलित हुई ॥४७॥ उस वक्त यहाँके मनुष्य देवोंके समान कान्तिके धारक

---

१ अंशुकं वस्त्रम्। २ नित्यप्रकाशाः। ३ समर्था भवन्ति। ४–भिलषितान् प०, म०, ल०। ५ अमत्रं भाजनम्। ६ प्रतन्वते अ०, प०, म०, द०। ७–द्यकाल–अ०, स०। ८–वधार्यते प०, म०। ९ भुवः म०, ल०। १० जीवितः अ०, स०।

कलाधरकलास्पर्द्धिदेहज्योत्स्नास्मितोज्ज्वलाः । दिनद्वयेन तेऽश्नन्ति [1]वार्क्षमन्धोऽक्षमात्रकम् ॥४९॥
शेषो विधिस्तु निश्शेषो हरिवर्षसमो मतः । ततः क्रमेण कालेऽस्मिन्नवसर्पत्यनुक्रमात् ॥५०॥
प्रहीणा वृक्षवीर्यादिविशेषाः प्राक्तना यदा । जघन्यभोगभूमीनां मर्यादाविरभूत्तदा ॥५१॥
यथावसरसम्प्राप्तस्तृतीयः कालपर्ययः । प्रावर्त्तत सुराजेव स्वां मर्यादामलङ्घयन् ॥५२॥
सागरोपमकोटीनां [2]कोट्यौ द्वे [3]लब्धसंस्थितौ । कालेऽस्मिन्भारते वर्षे मर्त्याः पल्योपमायुषः ॥५३॥
[4]गव्यूतिप्रमितोच्छ्रायाः [5]प्रियङ्गुश्यामविग्रहाः । दिनान्तरेण संप्राप्त[6]धात्रीफलमिताशनाः ॥५४॥
ततस्तृतीयकालेऽस्मिन् व्यतिक्रामत्यनुक्रमात् । पल्योपमाष्टभागस्तु यदास्मिन्परिशिष्यते ॥५५॥
कल्पानोकहवीर्याणां क्रमादेव परिच्युतौ । ज्योतिरङ्गास्तदा वृक्षा गता मन्दप्रकाशताम् ॥५६॥
[7]पुष्पदन्ता[8]वथाषाढ्यां पौर्णमास्यां स्फुरत्प्रभौ । [9]सायाह्ने प्रादुरास्तां तौ गगनोभयभागयोः ॥५७॥
चामीकरमयौ पोताविव तौ गगनार्णवे । वियद्गजस्य [10]निर्याण[11]लिखितौ तिलकाविव ॥५८॥
पौर्णमासीविलासिन्याः क्रीड्यमानौ समुज्ज्वलौ । परस्परकराश्लिष्टौ[12] [13]जातुषाविव गोलकौ ॥५९॥
जगद्गृहमहाद्वारि विन्यस्तौ कालभूभृतः । [14]प्रत्यग्रस्य प्रवेशाय कुम्भाविव हिरण्मयौ ॥६०॥

थे, उनकी आयु दो पल्यकी थी उनका शरीर चार हजार धनुष ऊँचा था तथा उनकी सभी चेष्टाएँ शुभ थीं ॥४८॥ उनके शरीरकी कान्ति चन्द्रमाकी कलाओंके साथ स्पर्धा करती थी अर्थात् उनसे भी कहीं अधिक सुन्दर थी, उनकी मुस्कान बड़ी ही उज्ज्वल थी। वे दो दिन बाद कल्पवृक्ष से प्राप्त हुए बहेड़ेके बराबर उत्तम अन्न खाते थे ॥४९॥ उस समय यहाँकी शेष सब व्यवस्था हरिक्षेत्र के समान थी फिर क्रमसे जब द्वितीय काल पूर्ण हो गया और कल्पवृक्ष तथा मनुष्योंके बल विक्रम आदि घट गये तब जघन्य भोगभूमि की व्यवस्था प्रकट हुई ॥५०–५१॥ उस समय न्यायवान् राजाके सदृश मर्यादाका उल्लंघन नहीं करता हुआ तीसरा सुषमादुःषमा नामका काल यथाक्रमसे प्रवृत्त हुआ ॥५२॥ उसकी स्थिति दो कोड़ाकोड़ी सागरकी थी। उस समय इस भारतवर्षमें मनुष्योंकी स्थिति एक पल्य-की थी। उनके शरीर एक कोश ऊँचे थे, वे प्रियङ्गुके समान श्यामवर्ण थे और एक दिनके अन्तरसे आँवलेके बराबर भोजन ग्रहण करते थे ॥५३–५४॥ इस प्रकार क्रम क्रमसे तीसरा काल व्यतीत होने पर जब इसमें पल्यका आठवाँ भाग शेष रह गया तब कल्पवृक्षोंकी सामर्थ्य घट गई और ज्योतिरङ्ग जातिके कल्पवृक्षोंका प्रकाश अत्यन्त मन्द हो गया ॥५५–५६॥ तदनन्तर किसी समय आषाढ़ सुदी पूर्णिमाके दिन सायंकालके समय आकाशके दोनों भागोंमें अर्थात् पूर्व दिशामें उदित होता हुआ चमकीला चन्द्रमा और पश्चिममें अस्त होता हुआ सूर्य दिखलाई पड़ा ॥५७॥ उस समय वे सूर्य और चन्द्रमा ऐसे शोभायमान हो रहे थे मानो आकाश रूपी समुद्रमें सोनेके बने हुए दो जहाज ही हों अथवा आकाश रूपी हस्तीके गण्डस्थलके समीप सिन्दूर से बने हुए दो चन्द्रक (गोलाकार चिह्न) ही हों। अथवा पूर्णिमा रूपी स्त्रीके दोनों हाथोंपर रखे हुए खेलनेके मनोहर लाखनिर्मित दो गोले ही हों। अथवा आगे होनेवाले दुःषम-सुषमा नामक काल रूपी नवीन राजाके प्रवेशके लिये जगत्-रूपी घरके विशाल दरवाजे पर रखे हुए मानो दो सुवर्ण कलश ही हों। अथवा तारारूपी फेन

---

१ वृक्षस्येदम्। २–नां द्वे कोट्यौ लब्ध–द०। कोट्यौ द्वौ लब्ध–अ०, म०, स०, ल०। ३ लब्धा सम्प्राप्ता। ४ क्रोशः। ५ कलिनी। ६ आमलकी। ७ सूर्याचन्द्रमसौ। पुष्पवन्ता–द०, स०, म०, ल०,। ८ आषाढमासे। ९ अपराह्णे। १० अपाङ्गदेशो निर्याणम्। ११–ण लक्षितौ अ०। –ण चन्द्रकाविव लक्षितौ द०, प०, म०, ल०। १२ आहवौ। १३ जतोर्विकारौ। १४ नूतनस्य।

तारफेनग्रहग्राहविषरत्सागरमध्यगौ। चामीकरमयौ दिव्यावम्भःक्रीडागृहाविव ॥६१॥
सद्वृत्तत्वादसङ्गत्वात् साधुवर्गानुकारिणौ। शीततीव्रकरत्वाच्च सदसद्भूमिपाविव ॥६२॥
प्रतिश्रुतिरिति ख्यातस्तदा कुलधरोऽग्रिमः। विभ्रल्लोकातिगं तेजः प्रजानां नेत्रवद्बभौ ॥६३॥
पल्यस्य दशमो भागस्तस्यायुर्जिनदेशितम्। धनुःसहस्रमुत्सेधः शतैरधिकमष्टभिः ॥६४॥
जाज्वल्यमानमकुटो [1]लसन्मकरकुण्डलः। कनकाद्रिरिवोत्तुङ्गो बिभ्राणो हारनिर्झरम् ॥६५॥
नानाभरणभाभारभासुरोदारविग्रहः। प्रोत्सर्पत्तेजसा स्वेन निर्भर्त्सितविग्रहः ॥६६॥
महान् जगद्गृहोन्मानमानदण्ड इवोच्छ्रितः। दधज्जन्मान्तराभ्यासजनितं बोधमिद्धधीः ॥६७॥
स्फुरद्दन्तांशुसलिलैर्मुहुः प्रक्षालयन्दिशः। प्रजानां प्रीणनं वाक्यं [2]सौधं रसमिवोद्गिरन् ॥६८॥
अदृष्टपूर्वौ तौ दृष्ट्वा सभीतान् भोगभूमिजान्। भीतेर्निवर्त्तयामास तत्स्वरूपमिति ब्रुवन् ॥६९॥
एतौ तौ प्रतिदृश्येते सूर्याचन्द्रमसौ ग्रहौ। ज्योतिरङ्गप्रभापायात् कालह्रासवशोद्भवात् ॥७०॥
सदाप्यधिनभोभागं [3]भ्राम्यतोऽमू महाद्युति। न वस्ताभ्यां भयं किञ्चिदतो मा भैष्ट भद्रकाः ॥७१॥

और बुध मंगल आदि ग्रह रूपी मगरमच्छोंसे भरे हुए आकाश रूपी समुद्रके मध्यमें सुवर्णके दो मनोहर जलक्रीड़ागृह ही बने हों। अथवा सद्वृत्त–गोलाकार (पक्षमें सदाचारी) और असंग-अकेले (पक्षमें परिग्रहरहित) होनेके कारण साधुसमूहका अनुकरण कर रहे हों अथवा शीतकर–शीतल किरणों से युक्त (पक्षमें अल्प टेक्स लेने वाला) और तीव्रकर—उष्ण किरणोंसे युक्त (पक्षमें अधिक टेक्स लेने वाला) होनेके कारण क्रमसे न्यायी और अन्यायी राजा का ही अनुकरण कर रहे हों ॥५८-६२॥ उस समय वहाँ प्रतिश्रुति नामसे प्रसिद्ध पहले कुलकर विद्यमान थे जो कि सबसे अधिक तेजस्वी थे और प्रजाजनोंके नेत्रके समान शोभायमान थे अर्थात् नेत्रके समान प्रजाजनोंको हितकारी मार्ग बतलाते थे ॥६३॥ जिनेन्द्र देवने उनकी आयु पल्यके दशवें भाग और ऊँचाई एक हजार आठ सौ धनुष बतलाई है ॥६४॥ उनके मस्तक पर प्रकाशमान मुकुट शोभायमान हो रहा था, कानोंमें सुवर्णमय कुण्डल चमक रहे थे और वे स्वयं मेरु पर्वतके समान ऊँचे थे इसलिये उनके वक्षःस्थलपर पड़ा हुआ रत्नोंका हार झरनेके समान मालूम होता था। उनका उन्नत और श्रेष्ठ शरीर नाना प्रकारके आभूषणोंकी कान्तिके भारसे अतिशय प्रकाशमान हो रहा था, उन्होंने अपने बढ़ते हुए तेजसे सूर्यको भी तिरस्कृत कर दिया था। वे बहुत ही ऊँचे थे इसलिये ऐसे मालूम होते थे मानो जगत् रूपी घरकी ऊँचाईको नापनेके लिये खड़े किये गये मापदण्ड ही हों। इसके सिवाय वे जन्मान्तरके संस्कारसे प्राप्त हुए अवधिज्ञानको भी धारण किये हुए थे इसलिये वही सबमें उत्कृष्ट बुद्धिमान् गिने जाते थे ॥६५-६७॥ वे देदीप्यमान दांतोंकी किरणों रूपी जलसे दिशाओंका बार बार प्रक्षालन करते हुए जब प्रजाको संतुष्ट करने वाले वचन बोलते थे तब ऐसे मालूम होते थे मानो अमृतका रस ही प्रकट कर रहे हों। पहले कभी नहीं दिखने-वाले सूर्य और चन्द्रमाको देख कर भयभीत हुए भोगभूमिज मनुष्योंको उन्होंने उनका निम्न-लिखित स्वरूप बतला कर भयरहित किया था ॥६८–६९॥ उन्होंने कहा—हे भद्र पुरुषो, तुम्हें जो ये दिख रहे हैं वे सूर्य चन्द्रमा नामके ग्रह हैं, ये महाकान्तिके धारक हैं तथा आकाशमें सर्वदा घूमते रहते हैं। अभी तक इनका प्रकाश ज्योतिरङ्ग जाति के कल्प-

१ लसत्कनककुण्डलः द०, प०, म०, ल०। २ सुधाया अयम्। ३ भ्रमतो म०, ल०। ४ तत्संज्ञिते ताडपत्रपुस्तके कोष्ठकान्तर्गतः पाठो लेखकप्रमादात्प्रभ्रष्टोऽतः ब०, अ०, प०, ल०, म०, द०, द०, स० संज्ञित-पुस्तकेभ्यस्तत्पाठो गृहीतः।

इति तद्वचनात्तेषां प्रत्याश्वासो महानभूत् । ['क्षेत्रे सोऽतः परं चास्मिन्नियोगान्भाविनोऽन्वशात्] ॥७२॥
प्रतिश्रुतिरयं धीरो यन्नः प्रत्यशृणोद्वचः । इतीडां चक्रिरे नाम्ना ते तं सम्प्रीतमानसाः ॥७३॥
अहो धीमन् महाभाग चिरंजीव प्रसीद नः । यानपात्रायितं येन[१] त्वयास्मद्व्यसनार्णवे ॥७४॥
इति स्तुत्वार्यकास्ते तं सत्कृत्य च पुनः पुनः । लब्धानुज्ञास्ततः स्वं स्वमोको जग्मुः [२]सजानयः ॥७५॥
मनौ याति दिवं तस्मिन् काले गलति च क्रमात् । मन्वन्तरमसंख्येया वर्षकोटीर्व्यतीत्य च ॥७६॥
सन्मतिः सन्मतिर्नाम्ना द्वितीयोऽभून्मनुस्तदा । प्रोत्सर्पदंशुकः [३]प्रांशुश्चलत्कल्पतरूपमः ॥७७॥
स कुन्तली किरीटी च कुण्डली हारभूषितः । स्रग्वी मलयजालिप्तवपुरत्यन्तमाबभौ ॥७८॥
तस्यायुरम[४]मप्रख्यमासीत्संख्येयहायनम् । सहस्रं त्रिशतीयुक्तमुत्सेधो धनुषां मतः ॥७९॥
ज्योतिर्विटपिनां भूयोऽप्यासीत्कालेन मन्दिमा । [५]प्रहाणाभिमुखं तेजो निर्वास्यति हि दीपवत् ॥८०॥
नभोऽङ्गणमथापूर्य तारकाः प्रचकाशिरे । [६]नात्यन्धकारकलुषां वेलां प्राप्य तमीमुखे ॥८१॥
अकस्मात्तारका दृष्ट्वा सम्भ्रान्तान्भोगभूभुवः । भीतिर्विचलयामास [७]प्राणिहत्येव योगिनः ॥८२॥

वृक्षोंके प्रकाशसे तिरोहित रहता था इसलिए नहीं दिखते थे परन्तु अब चूँकि कालदोषके वशसे ज्योतिरङ्ग वृक्षोंका प्रभाव कम हो गया है अतः दिखने लगे हैं। इनसे तुम लोगोंको कोई भय नहीं है अतः भयभीत नहीं होओ ॥७०–७१॥ प्रतिश्रुतिके इन वचनोंसे उन लोगोंको बहुत ही आश्वासन हुआ। इसके बाद प्रतिश्रुतिने इस भरतक्षेत्र में होनेवाली व्यवस्थाओंका निरूपण किया ॥७२॥ इन धीर वीर प्रतिश्रुतिने हमारे वचन सुने हैं इसलिए प्रसन्न होकर उन भोगभूमिजोंने प्रतिश्रुति इसी नामसे स्तुति की और कहा कि–अहो महाभाग, अहो बुद्धिमान्, आप चिरंजीव रहें तथा हम पर प्रसन्न हों क्योंकि आपने हमारे दुःख रूपी समुद्र में नौकाका काम दिया है अर्थात् हित का उपदेश देकर हमें दुःख रूपी समुद्रसे उद्धृत किया है ॥७३–७४॥ इस प्रकार प्रतिश्रुतिका स्तवन तथा बार बार सत्कार कर वे सब आर्य उनकी आज्ञानुसार अपनी अपनी स्त्रियोंके साथ अपने अपने घर चले गए ॥७५॥ इसके बाद क्रम क्रमसे समयके व्यतीत होने तथा प्रतिश्रुति कुलकरके स्वर्गवास हो जानेपर जब असंख्यात करोड़ वर्षोंका मन्वन्तर (एक कुलकर के बाद दूसरे कुलकरके उत्पन्न होनेतक बीचका काल) व्यतीत हो गया तब समीचीन बुद्धिके धारक सन्मति नामके द्वितीय कुलकरका जन्म हुआ। इनके वस्त्र बहुत ही शोभायमान थे तथा वे स्वयं अत्यन्त ऊँचे थे इसलिए चलते फिरते कल्पवृक्षके समान मालूम होते थे ॥७६-७७॥ उनके केश बड़े ही सुन्दर थे, वे अपने मस्तकपर मुकुट बाँधे हुए थे, कानोंमें कुण्डल पहिने थे, उनका वक्षःस्थल हारसे सुशोभित था, इन सब कारणोंसे वे अत्यन्त शोभायमान हो रहे थे ॥७८॥ उनकी आयु अममके बराबर संख्यात वर्षोंकी थी और शरीरकी ऊँचाई एक हजार तीन सौ धनुष थी ॥७९॥ इनके समयमें ज्योतिरङ्ग जातिके कल्पवृक्षोंकी प्रभा बहुत ही मन्द पड़ गई थी तथा उनका तेज बुझते हुए दीपकके समान नष्ट होनेके सम्मुख ही था ॥८०॥ एक दिन रात्रिके प्रारम्भमें जब थोड़ा थोड़ा अन्धकार था तब तारागण आकाश रूपी अङ्गणको व्याप्तकर–सब ओर प्रकाशमान होने लगे ॥८१॥ उस समय अकस्मात् तारोंको देखकर भोगभूमिज मनुष्य अत्यन्त भ्रम में पड़ गये अथवा अत्यन्त व्याकुल हो गये। उन्हें भयने इतना कम्पायमान कर दिया था

---

१ कारणेन । २ सभार्याः । ३ उन्नतः । ४ चतुरशीतिलक्षपूर्वाणां ... — चतुःपञ्चाशत् शून्याग्रं विंशतिप्रमाणचतुरशीतीनां परस्परगुणनम् अममवर्षप्रमाणम् । ५ प्रहीणाभिमुखं अ०, प०, म०, ल० । ६ अत्यन्धकारकलुषा न भवतीति नात्यन्धकारकलुषा ताम् । ७ प्राणिहतिः ।

स सन्मतिरनुध्याय क्षणं प्रावोचतार्यकान् । नोत्पातः कोऽप्ययं भद्रास्तन्मागात भियो वशम् ॥८३॥
एतास्तास्तारका नामैतच्च नक्षत्रमण्डलम् । ग्रहा इमे [1]सदोद्योता इदं तारकितं नभः ॥८४॥
ज्योतिश्चक्रमिदं शश्वद् व्योममार्गे कृतस्थिति । स्पष्टतामधुनायातं ज्योतिरङ्गप्रभाक्षयात् ॥८५॥
इतः प्रभृत्यहोरात्रविभागश्च प्रवर्तते । उदयास्तमयैः सूर्याचन्द्रयोः सहतारयोः ॥८६॥
ग्रहणग्रहविक्षेपदिनान्ययनसंक्रमात् । ज्योतिर्ज्ञानस्य [2]बीजानि सोऽन्ववोचद्धिदांवरः ॥८७॥
अथ तद्वचनादार्या जाताः सपदि निर्भयाः । स हि लोकोत्तरं ज्योतिः प्रजानामुपकारकम् ॥८८॥
अयं सन्मतिरेवास्तु प्रभुर्नः सन्मतिप्रदः । इति प्रशस्य संपूज्य ययुस्ते तं स्वमास्पदम् ॥८९॥
ततोऽन्तरमसंख्येयाः[3] कोटीरुल्लङ्घ्य वत्सरान् । तृतीयो मनुरत्रासीत् क्षेमङ्करसमाह्वयः ॥९०॥
युगबाहुर्महाकायः पृथुवक्षाः स्फुरत्प्रभः । सोऽत्यशेत[4] गिरिं मेरुं [5]ज्वलन्मुकुटचूलिकः ॥९१॥
[6]अटटप्रमितं तस्य बभूवायुर्महौजसः । देहोत्सेधश्च चापानाममुष्यासीच्छताष्टकम् ॥९२॥
पुरा किल मृगा भद्राः प्रजानां हस्तलालिताः । तदा तु विकृतिं भेजुर्व्यात्तास्याः[7] भीषणस्वनाः ॥९३॥
तेषां विक्रियया सान्तर्गर्ज्जया तत्रसुः प्रजाः । पप्रच्छुस्ते[8] तमभ्येत्य मनुं स्थितमविस्मितम् ॥९४॥

जितना कि प्राणियोंकी हिंसा मुनिजनोंको कम्पायमान कर देती है ॥८२॥ सन्मति कुलकरने क्षण भर विचार कर इन आर्य पुरुषोंसे कहा कि हे भद्र पुरुषो, यह कोई उत्पात नहीं है इसलिए आप व्यर्थ ही भयके वशीभूत न हों ॥८३॥ ये तारे हैं, यह नक्षत्रोंका समूह है, ये सदा प्रकाशमान रहनेवाले सूर्य, चन्द्र आदि ग्रह हैं और यह तारोंसे भरा हुआ आकाश है ॥८४॥ यह ज्योतिश्चक्र सर्वदा आकाशमें विद्यमान रहता है, अबसे पहले भी विद्यमान था, परन्तु ज्योतिरङ्ग जातिके वृक्षोंके प्रकाशसे तिरोभूत था। अब उन वृक्षोंकी प्रभा क्षीण हो गई है इसलिये स्पष्ट दिखाई देने लगा है ॥८५॥ आजसे लेकर सूर्य चन्द्रमा तारे आदि का उदय और अस्त होता रहेगा और उससे रात दिनका विभाग होता रहेगा ॥८६॥ उन बुद्धिमान् सन्मतिने सूर्यग्रहण, चन्द्र ग्रहण, ग्रहोंका एक राशिसे दूसरी राशिपर जाना, दिन और अयन आदिका संक्रमण बतलाते हुए ज्योतिष विद्याके मूल कारणोंका भी उल्लेख किया था ॥८७॥ वे आर्य लोग भी उनके वचन सुनकर शीघ्र ही भयरहित हो गए। वास्तवमें वे सन्मति प्रजाका उपकार करनेवाली कोई सर्वश्रेष्ठ ज्योति ही थे ॥८८॥ समीचीन बुद्धिके देने वाले यह सन्मति ही हमारे स्वामी हों इस प्रकार उनकी प्रशंसा और पूजाकर वे आर्य पुरुष अपने अपने स्थानोंपर चले गए ॥८९॥ इनके बाद असंख्यात करोड़ वर्षोंका अन्तराल काल बीत जानेपर इस भरतक्षेत्रमें क्षेमंकर नामके तीसरे मनु हुए। ॥९०॥ उनकी भुजाएँ युगके समान लम्बी थीं, शरीर ऊँचा था, वक्षस्थल विशाल था, आभा चमक रही थी तथा मस्तक मुकुटसे शोभायमान था इन सब बातोंसे वे मेरु पर्वतसे भी अधिक शोभायमान हो रहे थे ॥९१॥ इस महाप्रतापी मनुकी आयु अटट बराबर थी और शरीरकी ऊँचाई आठ सौ धनुषकी थी ॥९२॥ पहले जो पशु सिंह व्याघ्र आदि अत्यन्त भद्रपरिणामी थे जिनका लालन पालन प्रजा अपने हाथसे ही किया करती थी वे अब इनके समय विकारको प्राप्त होने लगे—मुँह फाड़ने लगे और भयङ्कर शब्द करने लगे ॥९३॥ उनकी इस भयंकर गर्जनासे मिले हुए विकार भावको देखकर प्रजाजन डरने लगे तथा

---

१ सदाद्योता प० । २ कारणानि । ३ संख्येयकोटी–म० । ४ अतिशयितवान् । ५ स्फुरन्मुकुट–द०, प०, ब० । ६ पञ्चपञ्चाशच्छून्याग्रमष्टादशप्रमाणचतुरशीतिसंगुणनमटटवर्षप्रमाणम् । ७ व्यात्तं विवृतम् । ८ पप्रच्छुश्च अ०, ल०, द०, स० ।

इमे भद्रमृगाः पूर्वं [1]स्वादीयोभिस्तृणाङ्कुरैः । [2]रसायनरसैः पुष्टाः सरसां सलिलैरपि ॥९५॥
[3]अङ्काधिरोपणैर्हस्तलालनैरपि [4]सान्विताः । अस्माभिरति[5]विश्रब्धाः[6] संवसन्तोऽनुपद्रवाः ॥९६॥
इदानीं तु विना हेतोः शृङ्गैरभिभवन्ति नः । दंष्ट्राभिर्नखराग्रैश्च [7]बिभित्सन्ति च दारुणाः ॥९७॥
कोऽभ्युपायो महाभाग ब्रूहि नः क्षेमसाधनम्[8] । क्षेमङ्करो हि स भवान् जगतः क्षेमचिन्तनैः ॥९८॥
इति तद्वचनाज्जातसौहार्दो मनुरब्रवीत् । सत्यमेतत्तथापूर्वमिदानीं तु [9]भयावहाः ॥९९॥
तदिमे परिहर्तव्याः कालाद्विकृतिमागताः । कर्तव्यो नैषु विश्वासो [10]बाधाः कुर्वन्त्युपेक्षिताः ॥१००॥
इत्याकर्ण्य वचस्तस्य परिजहुस्तदा मृगान् । शृङ्गिणो दंष्ट्रिणः क्रूरान् शेषैः [11]संवासमाययुः ॥१०१॥
व्यतीयुषि ततः काले मनोरस्य व्यतिक्रमे । मन्वन्तरमसंख्येयाः समाकोटीर्विलङ्घ्य च ॥१०२॥
[12]अत्रान्तरे महोदग्रविग्रहो दोषविग्रहः । अग्रेसरः सतामासीन्मनुः क्षेमंधराह्वय ॥१०३॥
[13]तुटिकाब्दमितं तस्य बभूवायुर्महात्मनः । शतानि सप्त चापानां सप्ततिः पञ्च चोच्छ्रितिः ॥१०४॥
यदा प्रबलतां याताः [14]पाकसत्त्वा महाक्रुधः । तदा [15]लकुटयष्ट्याद्यैः स रक्षाविधिमन्वशात् ॥१०५॥
क्षेमंधरं इति ख्यातिं प्रजानां क्षेमधारणात् । स दधे[16] पाकसत्त्वेभ्यो रक्षोपायानुशासनैः[17] ॥१०६॥

बिना किसी आश्चर्यके निश्चल बैठे हुए क्षेमंकर मनुके पास जाकर उनसे पूछने लगे ।।९४।। हे देव, सिंह व्याघ्र आदि जो पशु पहले बड़े शान्त थे जो अत्यन्त स्वादिष्ट घास खाकर और तालाबोंका रसायनके समान रसीला पानी पीकर पुष्ट हुए थे जिन्हें हम लोग अपनी गोदीमें बैठाकर अपने हाथोंसे खिलाते थे हम, जिनपर अत्यन्त विश्वास करते थे और जो बिना किसी उपद्रवके हम लोगोंके साथ साथ रहा करते थे आज वे ही पशु बिना किसी कारण के हम लोगोंको सींगोंसे मारते हैं, दाढ़ों और नखोंसे हमें विदारण किया चाहते हैं और अत्यन्त भयङ्कर दीख पड़ते हैं । हे महाभाग, आप हमारा कल्याण करने वाला कोई उपाय बतलाइए । चूँकि आप सकल संसारका क्षेम-कल्याण सोचते रहते हैं इसलिए सच्चे क्षेमंकर हैं ।।९५-९८।। इस प्रकार उन आर्योंके वचन सुनकर क्षेमंकर मनुको भी उनसे मित्रभाव उत्पन्न हो गया और वे कहने लगे कि आपका कहना ठीक है । ये पशु पहले वास्तवमें शान्त थे परन्तु अब भयंकर हो गए हैं इसलिए इन्हें छोड़ देना चाहिये । ये कालके दोषसे विकारको प्राप्त हुए हैं अब इनका विश्वास नहीं करना चाहिये । यदि तुम इनकी उपेक्षा करोगे तो ये अवश्य ही बाधा करेंगे ।।९९-१००।। क्षेमंकरके उक्त वचन सुनकर उन लोगोंने सींगवाले और दाढ़वाले दुष्ट पशुओंका साथ छोड़ दिया, केवल निरुपद्रवी गाय भैंस आदि पशुओंके साथ रहने लगे ।।१०१।। क्रम क्रमसे समय बीतनेपर क्षेमङ्कर मनुकी आयु पूर्ण हो गई । उसके बाद जब असंख्यात करोड़ वर्षोंका मन्वन्तर व्यतीत हो गया तब अत्यन्त ऊँचे शरीरके धारक, दोषोंका निग्रह करनेवाले और सज्जनोंमें अग्रसर क्षेमंकर नामक चौथे मनु हुए । उन महात्माकी आयु तुटिक प्रमाण वर्षोंकी थी और शरीरकी ऊँचाई सात सौ पचहत्तर धनुष थी । इनके समयमें जब सिंह व्याघ्र आदि दुष्ट पशु अतिशय प्रबल और क्रोधी हो गए तब इन्होंने लकड़ी लाठी आदि उपायोंसे इनसे बचनेका उपदेश दिया । चूँकि इन्होंने दुष्ट जीवोंसे रक्षा करनेके उपायोंका उपदेश

---

को जीतनेकी इच्छा करनेवाले कामदेवके बाण चलानेके दो यन्त्र ही हों ।।१७६।। रत्नजड़ित कुण्डलोंसे शोभायमान उसके दोनों मनोहर कान ऐसे मालूम होते थे मानो सरस्वती देवीके झूलनेके लिए दो झूले ही पड़े हों ।।१७७।। दोनों नेत्रोंके बीचमें उसकी ऊँची नाक ऐसी जान पड़ती थी मानो नेत्रोंकी वृद्धि विषयक स्पर्धाको रोकनेके लिए बीचमें एक लम्बा पुल ही बाँध दिया हो ।।१७८।। उस राजा का मुख सुगन्धित कमलके समान शोभायमान था। जिसमें दाँतोंकी सुन्दर किरणें ही केशर थीं और ओठ ही जिसके पत्ते थे ।।१७९।। हारकी किरणोंसे शोभायमान उसका विस्तीर्ण वक्षःस्थल ऐसा मालूम होता था मानो जलसे भरा हुआ विस्तृत, उत्कृष्ट और सन्तोषको देनेवाला लक्ष्मीका स्नानगृह ही हो ।।१८०।। केयूर (बाहुबन्ध) की कान्तिसे सहित उसके दोनों कंधे ऐसे शोभायमान होते थे मानो लक्ष्मीके विहारके लिए बनाये गये दो मनोहर क्रीड़ाचल ही हों ।।१८१।। वह युग (जुआँरी) के समान लम्बी और मनोहर हथेलियोंसे अंकित भुजाओंको धारण कर रहा था जिससे ऐसा मालूम हो रहा था मानो कोपलोंसे शोभायमान दो बड़ी-बड़ी शाखाओंको धारण करनेवाला कल्पवृक्ष ही हो ।।१८२।। वह राजा गम्भीर नाभिसे युक्त और त्रिवलिसे शोभायमान मध्य भागको धारण किये हुए था जिससे ऐसा मालूम होता मानो भँवर और तरंगोंसे सहित बालूके टीलेको धारण करनेवाला समुद्र ही हो ।।१८३।। करधनीसे घिरा हुआ उसका स्थूल नितम्ब ऐसा शोभायमान होता था मानो वेदिकासे घिरा हुआ जम्बूद्वीप ही हो ।।१८४।। देदीप्यमान कान्तिको धारण करने और कदली स्तम्भकी समानता रखनेवाली उसकी दोनों जंघाएँ ऐसी शोभायमान होती थीं मानो स्त्रियोंके दृष्टि रूपी बाण चलानेके लिये खड़े किये गये दो निशानें ही हों ।।१८५।। वह महाबल वज्रके समान स्थिर तथा सुन्दर आकृति वाली जंघाओं (पिंडरियों) को धारण किये हुए था जिससे ऐसा मालूम होता था मानो कामदेवके विजयी बाणोंको तीक्ष्ण करनेके लिये दो शाण ही धारण किये हो ।।१८६।। वह अङ्गुलीरूपी पत्तोंसे युक्त शोभायमान तथा नखोंकी किरणों रूपी केशरसे युक्त जिन दो चरणकमलोंको लक्ष्मीके रहनेके लिये कुलपरम्परासे

१ आक्रीडः उद्यानम् । २ लीलां दो- ब०, ल० । ३ विलोचनयोर्मध्ये । ४ स्पर्द्धि- म० । ५ छदं पत्रम् । ६ सुखहेतुम् । ७ सकेयूररुचावंसौ अ०, प०, द०, स०, ल० । ८ भुजशिखरौ । ९ कल्पवृक्षः । १० गम्भीर- प०, द०, ल० । ११ स वली अ०, प०, द०, म०, स० । १२ पुलिनम् । १३ काञ्चीदाम । १४ निशातनाय [तीक्ष्णीकरणाय] । १५ लसदङ्गुलि- म०, द० ।

इत्यस्य रूपमुद्भूतनवयौवनविभ्रमम् । कामनीयकमैकध्यमुपनीतमिवाबभौ ॥१८८॥
न केवलमसौ रूपशोभयैवाजयज्जगत् । व्यजेष्ट मन्त्रशक्त्यापि वृद्धसंयोगलब्धया ॥१८९॥
तस्याभूवन्महाप्रज्ञाश्चत्वारो मन्त्रिपुङ्गवाः । बहिश्चरा इव प्राणाः सुस्निग्धा दीर्घदर्शिनः[2] ॥१९०॥
महामतिश्च सम्भिन्नमतिः शतमतिस्तथा । स्वयम्बुद्धश्च राज्यस्य मूलस्तम्भा इव स्थिराः ॥१९१॥
स्वयम्बुद्धोऽभवत्तेषु सम्यग्दर्शनशुद्धधीः । शेषा मिथ्यादृशस्तेऽमी सर्वे स्वामिहितोद्यताः ॥१९२॥
चतुर्भिः स्वैरमात्यैस्तैः पादैरिव सुयोजितैः । महाबलस्य तद्राज्यं पप्रथे समवृत्तवत् ॥१९३॥
स मन्त्रिभिश्चतुर्भिस्तैः कदाचिच्च समं त्रिभिः । द्वाभ्यामेकेन वा मन्त्रमविसंवादिनाऽभजत् ॥१९४॥
स्वयं निश्चितकार्यस्य मन्त्रिणोऽस्यानुशासनम्[3] । चक्रुः स्वयं प्रबुद्धस्य जिनस्येवामरोत्तमाः[4] ॥१९५॥
न्यस्तराज्यभरस्तेषु स स्त्रीभिः खचरोचितान् । बुभुजे सुचिरं भोगान् नभोगानामधीशिता[5] ॥१९६॥

चले आये दो घर ही हों ॥१८७॥ इस प्रकार महाबलका रूप बहुत ही सुन्दर था उसमें नव-यौवनके कारण अनेक हाव भाव विलास उत्पन्न होते रहते थे जिससे ऐसा मालूम होता था मानो सब जगहका सौन्दर्य यहाँ पर ही इकट्ठा हुआ हो ॥१८८॥ उस राजाने केवल अपने रूपकी शोभासे ही जगत्को नहीं जीता था किन्तु वृद्ध जनोंकी संगतिसे प्राप्त हुई मन्त्र-शक्तिके द्वारा भी जीता था ॥१८९॥ उस राजा के चार मन्त्री थे जो महाबुद्धिमान्, स्नेही और दीर्घ-दर्शी थे। वे चारों ही मन्त्री राजाके बाह्य प्राणोंके समान मालूम होते थे ॥१९०॥ उनके नाम क्रमसे महामति, संभिन्नमति, शतमति और स्वयंबुद्ध थे। ये चारों ही मन्त्री राज्यके स्थिर मूलस्तम्भके समान थे ॥१९१॥ उन चारों मंत्रियोंमें स्वयंबुद्धनामक मंत्री शुद्ध सम्यग्दृष्टि था और बाकी तीन मन्त्री मिथ्यादृष्टि थे। यद्यपि उनमें इस प्रकारका मतभेद था परन्तु स्वामीके हित साधन करनेमें वे चारों ही तत्पर रहा करते थे ॥१९२॥ वे चारों ही मन्त्री उस राज्यके चरणके समान थे। उनकी उत्तम योजना करनेसे महाबलका राज्य समवृत्तके समान अतिशय विस्तारको प्राप्त हुआ था। भावार्थ—वृत्त छन्दको कहते हैं—उसके तीन भेद हैं समवृत्त, अर्धसमवृत्त और विषमवृत्त। जिसके चारों पाद-चरण एक समान लक्षणके धारक होते हैं उसे समवृत्त कहते हैं। जिसके प्रथम और तृतीय तथा द्वितीय और चतुर्थ पाद एकसमान लक्षणके धारक हों उसे अर्धसमवृत्त कहते हैं और जिसके चारों पाद भिन्न-भिन्न लक्षणों के धारक होते हैं उन्हें विषमवृत्त कहते हैं। जिस प्रकार एक समान लक्षणके धारक चारों पादों—चरणोंकी योजनासे—रचनासे समवृत्त नामक छन्दका भेद प्रसिद्ध होता है तथा प्रस्तार, आदिकी अपेक्षासे विस्तारको प्राप्त होता है उसी प्रकार उन चारों मन्त्रियोंकी योजनासे—सम्यक् कार्य विभागसे राजा महाबलका राज्य प्रसिद्ध हुआ था तथा अपने अवान्तर विभागोंसे विस्तार को प्राप्त हुआ था ॥१९३॥ राजा महाबल कभी पूर्वोक्त चारों मन्त्रियोंके साथ, कभी तीनके साथ, कभी दोके साथ और कभी यथार्थवादी एक स्वयंबुद्ध मन्त्रीके साथ अपने राज्यका विचार किया करता था ॥१९४॥ वह राजा स्वयं ही कार्यका निश्चय कर लेता था। मन्त्री उसके निश्चित किये हुए कार्यकी प्रशंसा मात्र किया करते थे जिस प्रकार कि तीर्थंकर भगवान् दीक्षा लेते समय स्वयं विरक्त होते हैं, लौकान्तिक देव मात्र उनके वैराग्यकी प्रशंसा ही किया करते हैं ॥१९५॥ भावार्थ—राजा महाबल इतने अधिक बुद्धिमान् और दीर्घ दर्शी विचारक थे कि उनके निश्चित

---

१ एकधा भावः ऐकध्यम्। २ विद्वान्सः। 'निरीक्ष्य एव वक्तव्यं वक्तव्यं पुनरञ्जसा। इति यो वक्ति लोकेऽस्मिन् दीर्घदर्शी स उच्यते ॥' ३–नुशंसनम् म०, द०, स०। ४ लौकान्तिकाः। ५ अधीशः।

मालिनीच्छन्दः

मृदुसुरभिसमीरैः सान्द्रमन्दारवीथी
परिचयसुखशीतैर्धूतसंभोगखेदः ।
मुहुरुपवनदेशान्नन्दनोद्देशदेश्यान्[1]
जितमदननिवेशान्स्त्रीसहायः स भेजे ॥१९७॥
इति [2]सुकृतविपाकादानमत्खेचरोद्यन्
मकुटमकरिकाभिः[3] स्पृष्टपादारविन्दः ।
चिरमरमत तस्मिन् खेचराद्रौ सुराद्रौ
सुरपतिरिव सोऽयं भाविभास्वज्जिनश्रीः ॥१९८॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणश्रीमहापुराणसंग्रहे श्रीमहाबलाभ्युदय-
वर्णनं नाम चतुर्थं पर्व ॥४॥

विचारोंको कोई मन्त्री सदोष नहीं कर सकता था ॥१९६॥ अनेक विद्याधरोंका स्वामी राजा महाबल उपर्युक्त चारों मंत्रियोंपर राज्यभार रखकर अनेक स्त्रियोंके साथ चिरकाल तक कामदेवके निवासस्थानको जीतने और नन्दनवनके प्रदेशोंकी समानता रखनेवाले उपवनोंमें वह बार-बार विहार करता था। विहार करते समय घनीभूत मन्दार वृक्षोंके मध्यमें भ्रमण करनेके कारण सुखप्रद शीतल, मन्द तथा सुगन्धित वायुके द्वारा उसका संभोग-जन्य समस्त खेद दूर हो जाता था ॥१९७॥ इस प्रकार पुण्यके उदयसे नमस्कार करनेवाले विद्याधरोंके देदीप्यमान मुकुटोंमें लगे हुए मकर आदिके चिह्नोंसे जिसके चरणकमल बार-बार स्पृष्ट हो रहे थे–छुए जा रहे थे और जिसे आगे चलकर तीर्थंकरकी महनीय विभूति प्राप्त होने वाली थी ऐसा वह महाबल राजा, मेरुपर्वत पर इन्द्रके समान, विजयार्ध पर्वतपर चिरकाल तक क्रीड़ा करता रहा ॥१९८॥

इस प्रकार आर्ष नामसे प्रसिद्ध, भगवज्जिनसेनाचार्य रचित, त्रिषष्टिलक्षण-
महापुराण संग्रहमें 'श्रीमहाबलाभ्युदयवर्णन' नामका
चतुर्थ पर्व पूर्ण हुआ।

---

१ सदृशान्। २ पुण्यपोदयात्। ३ -मकरिकाप्रस्पष्ट।

अथ पञ्चमं पर्व

कदाचिदथ तस्याऽऽसीद्वर्षवृद्धिदिनोत्सवः[1] । मङ्गलैर्गीतवादित्रनृत्यारम्भैश्च संभृतः ॥१॥
सिंहासने तमासीनं तदानीं खचराधिपम् । [2]दुधुवुश्चामरैर्वारनार्यः क्षीरोदपाण्डुरैः ॥२॥
मदनद्रुममञ्जर्यो लावण्याम्भोधिवीचयः । सौन्दर्यकलिका रेजुस्तरुण्यस्तत्समीपगाः ॥३॥
पृथुवक्षःस्थलच्छन्न[3]पर्यन्तै[4]र्मकुटोज्ज्वलैः । खगेन्द्रैः परिवव्रेऽसौ गिरिराज इवाद्रिभिः ॥४॥
तस्य वक्षःस्थले हारो [5]नीहारांशुसमद्युतिः । बभासे हिमवत्सानौ प्रपतन्निव निर्झरः ॥५॥
तद्वक्षसि पृथाविन्द्रनीलमध्यमणिर्बभौ । कण्ठिका हंसमालेव व्योम्नि [6]दात्यूहमध्यगा ॥६॥
मन्त्रिणश्च तदामात्यसेनापतिपुरोहिताः । श्रेष्ठिनोऽधिकृताश्चान्ये तं परीत्यावतस्थिरे ॥७॥
स्मितैः संभाषितैः स्थानैर्दानैः संमाननैरपि । तानसौ तर्पयामास [7]वीक्षितैरपि सादरैः ॥८॥
स गोष्ठीर्भावयन् भूयो गन्धर्वादिकलाविदाम् । स्पर्द्धमानांश्च तान् पश्यन्नुप[8]श्रोतृसमक्षतः ॥९॥
सामन्तप्रहितान् दूतान् द्वाःस्थैरानीयमानकान् । संभावयन् यथोक्तेन संमानेन पुनः पुनः ॥१०॥

तदनन्तर, किसी दिन राजा महाबलकी जन्मगाँठका उत्सव हो रहा था । वह उत्सव मङ्गल-गीत, वादित्र तथा नृत्य आदिके आरम्भसे भरा हुआ था ॥१॥ उस समय विद्याधरोंके अधिपति राजा महाबल सिंहासनपर बैठे हुए थे । अनेक वाराङ्गनाएँ उनपर क्षीरसमुद्रके समान श्वेतवर्ण चामर ढोर रही थीं ॥२॥ उनके समीप खड़ी हुई वे तरुण स्त्रियाँ ऐसी मालूम होती थीं मानो कामदेव रूपी वृक्षकी मंजरियाँ ही हों, अथवा सौन्दर्यरूपी सागरकी तरंगें ही हों अथवा सुन्दरताकी कलिकाएँ ही हों ॥३॥ अपने-अपने विशाल वक्षःस्थलोंसे समीपके प्रदेशको आच्छादित करनेवाले तथा मुकुटोंसे शोभायमान अनेक विद्याधर राजा महाबलको घेरकर बैठे हुए थे उनके बीचमें बैठे हुए महाबल ऐसे शोभायमान हो रहे थे मानो अनेक पर्वतोंसे घिरा हुआ या उनके बीचमें स्थित सुमेरु पर्वत ही हो । उनके वक्षःस्थलपर चन्द्रमाके समान उज्ज्वल कान्तिका धारक—श्वेत हार पड़ा हुआ था जो कि हिमवत् पर्वतकी शिखरपर पड़ते हुए झरनेके समान शोभायमान हो रहा था ॥५॥ जिस प्रकार विस्तृत आकाशमें जल काकके इधर-उधर चलती हुई हंसोंकी पंक्ति शोभायमान होती है उसी प्रकार राजा महाबलके विस्तीर्ण वक्षःस्थलपर इन्द्रनीलमणिसे सहित मोतियोंकी कंठी शोभायमान हो रही थी ॥६॥ उस समय मन्त्री, सेनापति, पुरोहित, सेठ तथा अन्य अधिकारी लोग राजा महाबलको घेरकर बैठे हुए थे ॥७॥ वे राजा किसीके साथ हँसकर, किसीके साथ संभाषण कर, किसीको स्थान देकर, किसीको दान देकर , किसीका सम्मान कर और किसीकी ओर आदर सहित देखकर उन समस्त सभासदोंको संतुष्ट कर रहे थे ॥८॥ वे महाबल संगीत आदि अनेक कलाओंके जानकार विद्वान् पुरुषोंकी गोष्ठीका बार-बार अनुभव करते जाते थे । तथा श्रोताओंके समक्ष कलाविद् पुरुष परस्परमें जो स्पर्धा करते थे उसे भी देखते जाते थे इसी बीचमें सामन्तों द्वारा भेजे हुए दूतोंको द्वारपालोंके हाथ बुलवाकर उनका

१ जननदिवसक्रियमाणोत्सवः । २ धुनन्ति स्म । धूञ् कम्पने । ३ आच्छादितः । ४–र्मुकुटो अ० । ५ चन्द्रः । ६ कृष्णपक्षिविशेषः । ७ वीक्षणैः । ८ सभ्यादि ।

परचक्रनरेन्द्राणामानीतानि [1]महत्तरैः। उपायनानि संपश्यन् यथास्वं तांश्च पूजयन् ॥११॥
इत्यसौ परमानन्दमातन्वन्नद्भुतोदयः। यथेष्टं मन्त्रिवर्गेण सहास्तानन्दमण्डपे ॥१२॥
तं तदा प्रीतमालोक्य स्वयंबुद्धः समिद्धधीः। स्वामिने हितमित्युच्चैरभाषिष्टेष्ट[2]मृष्टवाक् ॥१३॥
इतः शृणु खगाधीश वक्ष्ये श्रेयोऽनुबन्धि ते। वैद्याधरीमिमां लक्ष्मीं विद्धि पुण्यफलं विभो ॥१४॥
धर्मादिष्टार्थसम्पत्तिस्ततः कामसुखोदयः। स च संप्रीतये पुंसां धर्मात्सैषा परम्परा ॥१५॥
राज्यञ्च सम्पदो भोगाः कुले जन्म सुरूपता। पाण्डित्यमायुरारोग्यं धर्मस्यैतत्फलं विदुः ॥१६॥
न कारणाद्विना कार्यनिष्पत्तिरिह जातुचित्। प्रदीपेन विना दीप्तिर्दृष्ट[3]पूर्वा किमु क्वचित् ॥१७॥
नाङ्कुरः स्याद्विना बीजाद्विना वृष्टिर्न वारिदात्। छत्राद्विनापि नच्छाया विना धर्मान्न सम्पदः ॥१८॥
नाधर्मात्सुखसम्प्राप्तिर्न विषादस्ति जीवितम्। नोषरात्सस्यनिष्पत्तिर्नाग्नेराह्लादनं भवेत् ॥१९॥
यतोऽभ्युदयनिःश्रेय[4]सार्थसिद्धिः सुनिश्चिता। स धर्मस्तस्य धर्मस्य विस्तरं शृणु साम्प्रतम् ॥२०॥
दयामूलो भवेद्धर्मो दया[5]प्राण्यनुकम्पनम्। दयायाः परिरक्षार्थं गुणाः शेषाः प्रकीर्तिताः ॥२१॥
धर्मस्य तस्य लिङ्गानि दमः क्षान्तिरहिंस्रता[6]। तपो दानं च शीलं च [7]योगो वैराग्यमेव च ॥२२॥
अहिंसा सत्यवादित्वमचौर्यं त्यक्तकामता। निष्परिग्रहता चेति प्रोक्तो धर्मः सनातनः ॥२३॥

बार-बार यथायोग्य सत्कार कर लेते थे। तथा अन्य देशोंके राजाओंके प्रतिष्ठित पुरुषों द्वारा लाई हुई भेंटका अवलोकन कर उनका सम्मान भी करते जाते थे। इस प्रकार परम आनन्द को विस्तृत करते हुए, आश्चर्यकारी विभवसे सहित वे महाराज महाबल मन्त्रिमण्डलके साथ साथ स्वेच्छानुसार सभामण्डपमें बैठे हुए थे ॥९-१२॥ उस समय तीक्ष्णबुद्धिके धारक तथा इष्ट और मनोहर वचन बोलनेवाले स्वयंबुद्ध मंत्रीने राजाको अतिशय प्रसन्न देखकर स्वामीका हित करनेवाले नीचे लिखे वचन कहे–॥१३॥ हे विद्याधरोंके स्वामी, जरा इधर सुनिये, मैं आपके कल्याण करनेवाले कुछ वचन कहूँगा। हे प्रभो, आपको जो यह विद्याधरोंकी लक्ष्मी प्राप्त हुई है उसे आप केवल पुण्यका ही फल समझिये ॥१४॥ हे राजन्, धर्मसे इच्छानुसार सम्पत्ति मिलती है उससे इच्छानुसार सुखकी प्राप्ति होती है और उससे मनुष्य प्रसन्न रहते हैं इसलिए यह परम्परा केवल धर्मसे ही प्राप्त होती है ॥१५॥ राज्य, सम्पदाएँ, भोग, योग्य कुलमें जन्म, सुन्दरता, पाण्डित्य, दीर्घ आयु और आरोग्य, यह सब पुण्यका ही फल समझिये ॥१६॥ हे विभो, जिस प्रकार कारणके बिना कभी कार्यकी उत्पत्ति नहीं होती, दीपकके बिना कभी किसीने कहीं प्रकाश नहीं देखा, बीजके बिना अंकुर नहीं होता, मेघके बिना वृष्टि नहीं होती और छत्रके बिना छाया नहीं होती उसी प्रकार धर्मके बिना सम्पदाएँ प्राप्त नहीं होतीं ॥१७-१८॥ जिस प्रकार विष खानेसे जीवन नहीं होता, ऊषर जमीनसे धान्य उत्पन्न नहीं होते और अग्निसे आह्लाद उत्पन्न नहीं होता उसी प्रकार अधर्मसे सुखकी प्राप्ति नहीं होती ॥१९॥ जिससे स्वर्ग आदि अभ्युदय तथा मोक्षपुरुषार्थकी निश्चित रूपसे सिद्धि होती है उसे धर्म कहते हैं। हे राजन्, मैं इस समय उसी धर्मका विस्तारके साथ वर्णन करता हूँ उसे सुनिए ॥२०॥ धर्म वही है जिसका मूल दया हो और सम्पूर्ण प्राणियोंपर अनुकम्पा करना दया है इस दया की रक्षाके लिए ही उत्तम क्षमा आदि शेष गुण कहे गये हैं ॥२१॥ इन्द्रियों-का दमन करना, क्षमा धारण करना, हिंसा नहीं करना, तप, दान, शील, ध्यान और वैराग्य ये उस दयारूप धर्मके चिह्न हैं ॥२२॥ अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य और परिग्रहका त्याग

१ महत्तमैः ब०, अ०, स०, द०, प०, ल०, ट०। २ शुद्धवाक्। ३ पूर्वस्मिन् दृष्टा। ४ अर्थः प्रयोजनम्। ५ प्राणानु –अ०, ब०, स०, प०, द०, ल०। ६–रहिंसता अ०, प०, स०, द०,। ७ ध्यानम्।

तस्माद्धर्मफलं ज्ञात्वा सर्वं राज्यादिलक्षणम् । तदर्थिना महाभाग धर्मे कार्या मतिः स्थिरा ॥२४॥
धीमन्निमां चलां लक्ष्मीं शाश्वतीं कर्तुमिच्छता । त्वया धर्मोऽनुमन्तव्यः सोऽनुष्ठेयश्च शक्तितः ॥२५॥
इत्युक्त्वाथ स्वयंबुद्धे स्वामिश्रेयोऽनुबन्धिनि । धर्म्यमर्थ्यं यशस्यञ्च वचो [1]विरतिमीयुषि ॥२६॥
ततस्तद्वचनं सोढुमशक्तो दुर्मतोद्धतः । द्वितीयः सचिवो वाचमित्युवाच महामतिः ॥२७॥
[2]भूतवादमथालम्ब्य स लौकायतिकीं[3] श्रुतिम् । [4]प्रस्तुवञ्जीवतत्त्वस्य दूषणे मतिमातनोत् ॥२८॥
सति धर्मिणि धर्मस्य घटते देव चिन्तनम् । स एव तावन्नास्त्यात्मा कुतो धर्मफलं भजेत्[5] ॥२९॥
पृथिव्यप्पवनाग्नीनां सङ्घातादिह चेतना । प्रादुर्भवति मद्याङ्ग[6]सङ्गमान्मदशक्तिवत् ॥३०॥
ततो न चेतना कायतत्त्वात्पृथगिहास्ति नः । [7]तस्यास्तद्व्यतिरेकेणानुपलब्धेः खपुष्पवत् ॥३१॥
[8]ततो न धर्मः पापं[10] वा परलोकश्च कस्यचित् । जलबुद्बुदवज्जीवा विलीयन्ते तनुक्षयात् ॥३२॥
तस्माद् दृष्टसुखं त्यक्त्वा परलोकसुखार्थिनः । व्यर्थक्लेशा भवन्त्येते लोकद्वयसुखाच्च्युताः[11] ॥३३॥
तदेषां परलोकार्था[12] समीहा[13] क्रोष्टु[14]रामिषम् । त्यक्त्वा मुखागतं मोहान्[15]मीनाशोत्पतनायते ॥३४॥

करना ये सब सनातन (अनादि कालसे चले आये) धर्म कहलाते हैं ॥२३॥ इसलिए हे महाभाग, राज्य आदि समस्त विभूतिको धर्मका फल जानकर उसके अभिलाषी पुरुषोको अपनी बुद्धि हमेशा धर्ममें स्थिर रखना चाहिये ॥२४॥ हे बुद्धिमन्, यदि आप इस चंचल लक्ष्मीको स्थिर करना चाहते हैं तो आपको यह अहिंसादि रूप धर्म मानना चाहिये तथा शक्तिके अनुसार उसका पालन भी करना चाहिये ॥२५॥ इस प्रकार स्वामी का कल्याण चाहनेवाला स्वयंबुद्ध मन्त्री जब धर्मसे सहित, अर्थसे भरे हुए और यशको बढ़ानेवाले वचन कहकर चुप हो रहा तब उसके वचनोंको सुननेके लिए असमर्थ महामति नामका दूसरा मिथ्यादृष्टि मन्त्री नीचे लिखे अनुसार बोला ॥२६–२७॥ महामति मंत्री, भूतवादका आलम्बन कर–चार्वाक मतका पोषण करता हुआ जीवतत्त्वके विषयमें दूषण देने लगा ॥२८॥ वह बोला–हे देव, धर्मीके रहते हुए ही उसके धर्मका विचार करना संगत (ठीक) होता है परन्तु आत्मा नामक धर्मीका अस्तित्व सिद्ध नहीं है इसलिए धर्मका फल कैसे हो सकता है ? ॥२९॥ जिस प्रकार महुआ, गुड़, जल आदि पदार्थोंके मिला देनेसे उसमें मादक शक्ति उत्पन्न हो जाती है उसी प्रकार पृथिवी, जल, वायु और अग्निके संयोगसे उनमें चेतना उत्पन्न हो जाती है ॥३०॥ इसलिए इस लोकमें पृथिवी आदि तत्त्वोंसे बने हुए हमारे शरीरसे पृथक् रहनेवाला चेतना नामका कोई पदार्थ नहीं है क्योंकि शरीरसे पृथक् उसकी उपलब्धि नहीं देखी जाती । संसारमें जो पदार्थ प्रत्यक्ष रूपसे पृथक् सिद्ध नहीं होते उनका अस्तित्व नहीं माना जाता जैसे कि आकाशके फूलका ॥३१॥ जबकि चेतना शक्ति नामका जीव पृथक् पदार्थ सिद्ध नहीं होता तब किसीके पुण्य पाप और परलोक आदि कैसे सिद्ध हो सकते हैं ? शरीरका नाश हो जानेसे ये जीव जलके बबूलेके समान एक क्षणमें विलीन हो जाते हैं ॥३२॥ इसलिए जो मनुष्य प्रत्यक्षका सुख छोड़कर परलोक सम्बन्धी सुख चाहते हैं वे दोनों लोकोंके सुखसे च्युत होकर व्यर्थ ही क्लेश उठाते हैं ॥३३॥ अत एव वर्त्तमानके सुख छोड़कर परलोकके सुखोंकी इच्छा करना ऐसा है जैसे कि मुखमें आये हुए मांसको छोड़कर मोहवश किसी शृगालका मछलीके लिए

१ विरामम् । तूष्णीम्भावमित्यर्थः । २ भूतचतुष्टयवादम् । ३ लौकायतिकसम्बन्धिशास्त्रम् । ४ प्रकृतं कुर्वन् । ५ भवेत् अ०, म०, स०, द०, प०, ल०, । ६ गुडधातकीपिष्ट्यादयः । ७ चेतनायाः । ८ कायतत्त्वव्यतिरेकेण । ९ तस्मात् कारणात् । १० अधर्मः । ११ सुखच्युताः म०, ल० । –च्युतः अ० । १२ परलोकप्रयोजना । १३ [वाञ्छा] । १४ जम्बुकस्य । १५ मत्स्यवाञ्छया उत्पतनम् ।

पिण्डत्यागाल्लिहन्तीमे हस्तं प्रेत्य[1]सुखेप्सया । विप्रलब्धाः समुत्सृष्टदृष्टभोगा विचेतसः ॥३५॥
स्वमते युक्तिमित्युक्त्वा[2] विरते भूतवादिनि । विज्ञानमात्रमाश्रित्य प्रस्तुवञ्जीवनास्तिताम् ॥३६॥
[3]संभिन्नो वादकण्डूयाविजृम्भितमथोद्वहन् । स्मितं स्वमतसंसिद्धिमित्युपन्यस्यति[4] स्म सः ॥३७॥
जीववादिन्न ते कश्चिज्जीवोऽस्त्यनुपलब्धितः[5] । विज्ञप्तिमात्रमेवेदं क्षणभङ्गि यतो जगत् ॥३८॥
[6]निरंशं तच्च विज्ञानं [7]निरन्वयविनश्वरम् । [8]वेद्यवेदकसंवित्तिभागैर्भिन्नं प्रकाशते ॥३९॥
सन्तानावस्थितेस्तस्य स्मृत्याद्यपि [9]घटामटेत्[10] । [11]संवृत्या स च सन्तानः सन्तानिभ्यो न भिद्यते ॥४०॥
[12]प्रत्यभिज्ञादिकं भ्रान्तं[13] वस्तुनि क्षणनश्वरे । यथा लूनपुनर्जातनखकेशादिषु क्वचित्[14] ॥४१॥

इच्छा करना है । अर्थात् जिस प्रकार शृंगाल मछलीकी आशासे मुखमें आये हुए मांसको छोड़कर पछताता है उसी प्रकार परलोकके सुखोंकी आशासे वर्तमानके सुखोंको छोड़नेवाला पुरुष भी पछताता है 'आधी छोड़ एकको धावै' ऐसा डूबा थाह न पावै' ॥३४॥ परलोकके सुखोंकी चाहसे ठगाये हुए जो मूर्ख मानव प्रत्यक्षके भागोंको छोड़ देते हैं वे मानों सामने परोसा हुआ भोजन छोड़कर हाथ ही चाटते हैं अर्थात् परोक्ष सुखकी आशासे वर्तमानके सुख छोड़ना भोजन छोड़कर हाथ चाटनेके तुल्य है ॥३५॥

इस प्रकार भूतवादी महामति मन्त्री अपने पक्षकी युक्तियाँ देकर जब चुप हो रहा तब वाद करनेकी खुजलीसे उत्पन्न हुए कुछ हास्यको धारण करनेवाला संभिन्नमति नामका तीसरा मन्त्री केवल विज्ञानवादका आश्रय लेकर जीवका अभाव सिद्ध करता हुआ नीचे लिखे अनुसार अपने मतकी सिद्धि करने लगा ॥३६-३७॥ वह बोला हे जीववादिन् स्वयंबुद्ध, आपका कहा हुआ जीव नामका कोई पृथक् पदार्थ नहीं है क्योंकि उसकी पृथक् उपलब्धि नहीं होती । यह समस्त जगत् विज्ञानमात्र है क्योंकि क्षणभंगुर है । जो जो क्षणभंगुर होते हैं वे सब ज्ञान के विकार होते हैं । यदि ज्ञान के विकार न होकर स्वतन्त्र पृथक् पदार्थ होते तो वे नित्य होते, परन्तु संसारमें कोई नित्य पदार्थ नहीं है इसलिए वे सब ज्ञानके विकारमात्र हैं ॥३८॥ वह विज्ञान निरंश है-अवान्तर भागोंसे रहित है, विना परम्परा उत्पन्न किये ही उसका नाश हो जाता है और वेद्य वेदक और संवित्ति रूपसे भिन्न प्रकाशित होता है । अर्थात् वह स्वभावतः न तो किसी अन्य ज्ञानके द्वारा जाना जाता है और न किसीको जानता ही है, एक क्षण रहकर समूल नष्ट हो जाता है ॥३९॥ वह ज्ञान नष्ट होनेके पहले ही अपनी सांवृतिक सन्तान छोड़ जाता है जिससे पदार्थोंका स्मरण होता रहता है । वह सन्तान अपने सन्तानी ज्ञानसे भिन्न नहीं है ॥४०॥ यहाँ प्रश्न हो सकता है कि विज्ञानकी सन्तान प्रतिसन्तान मान लेनेसे पदार्थ का स्मरण तो सिद्ध हो जावेगा परन्तु प्रत्यभिज्ञान सिद्ध नहीं हो सकेगा । क्योंकि प्रत्यभिज्ञानकी सिद्धिके लिए पदार्थको

---

१ भवान्तरे । २ विरामे सति । तूष्णीस्थिते । ३ सम्भिन्नमतिः । ४ उपन्यासं करोति स्म । ५ अदर्शनात् । ६ वेद्यवेदकाद्यंशरहितम् । ७ अन्वयान्निष्क्रान्तं निरन्वयं निरन्वयं विनश्यतीत्येवं शीलं निरन्वयविनश्वरम् । ८ संवित्तेर्भागाः संवित्तिभागाः वेद्याश्च वेदकाश्च वेद्यवेदका वेद्यवेदका एव संवित्तिभागास्तैः भिन्नं पृथक् । ९ घटनाम् । १० गच्छतु । ११ भ्रान्त्या । १२ दर्शनस्मरणकारकं संकलनं प्रत्यभिज्ञानं यथा स एवाऽयं देवदत्तः । आदि शब्देन स्मृतिर्ग्राह्या । तद्यथा संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृतिः स देवदत्तो यथा ज्ञानम् । १३ भ्रान्तिः । १४ एकचत्वारिंशत्तमाच्छ्लोकादग्रे दपुस्तके निम्नाङ्कितः पाठोऽधिको वर्तते-"दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः । विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥१॥ पञ्चेन्द्रियाणि शब्दाद्या विषया पञ्च मानसम् । धर्मायतनमेतानि द्वादशायतानि च ॥२॥ समुदेति यतो लोके रागादीनां गणोऽखिलः । स चात्मात्मीयभावाख्यः समुदायसमाहृतः ॥३॥ क्षणिकाः सर्वसंस्कारा इत्येवं वासना मता । समार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते ॥४॥' 'ल' पुस्तकेऽपि प्रथमश्लोकस्य पूर्वार्द्धं त्यवत्वाऽर्धचतुर्थाः श्लोका उद्धृताः । अन्यत्र त०, ब०, प०, म०, स० अ०, ट० पुस्तकेषु नास्त्येवासौ पाठः ।

ततो विज्ञानसन्तान[1]व्यतिरिक्तो न कश्चन । जीवसंज्ञः पदार्थोऽस्ति प्रेत्य[2]भावफलोपभुक् ॥४२॥
तद[3]मुत्रात्मनो दुःखजिहा[4]सार्थं प्रयस्यतः[5] । टिट्टिभस्येव[6]भीतिस्ते गगनादापतिष्यतः ॥४३॥
इत्युदीर्य स्थिते तस्मिन् मन्त्री शतमतिस्ततः । नैरात्म्यवादमालम्ब्य प्रोवाचेत्थं विकत्थनः[7] ॥४४॥
शून्यमेव जगद्विश्वमिदं मिथ्यावभासते । भ्रान्तेः स्वप्नेन्द्रजालादौ हस्त्यादिप्रतिभासवत् ॥४५॥
ततः कुतोऽस्ति वो[8]जीवः परलोकः कुतोऽस्ति वा । असत्सर्वमिदं यस्माद् [9]गन्धर्वनगरादिवत् ॥४६॥
अतोऽमी परलोकार्थं तपोऽनुष्ठानतत्पराः । वृथैव क्लेशमायान्ति परमार्थानभिज्ञकाः ॥४७॥
घर्मारम्भे यथा यद्वद् दृष्ट्वा मरुमरीचिकाः । जलाशयानुधावन्ति तद्वद्भोगार्थिनोऽप्यमी ॥४८॥

अनेक क्षणस्थायी मानना चाहिये जो कि आपने माना नहीं है। पूर्व क्षणमें अनुभूत पदार्थका द्वितीयादि क्षणमें प्रत्यक्ष होनेपर जो जोड़रूप ज्ञान होता है उसे प्रत्यभिज्ञान कहते हैं। उक्त प्रश्नका समाधान इस प्रकार है–क्षणभंगुर पदार्थमें जो प्रत्यभिज्ञान आदि होता है वह वास्तविक नहीं है किन्तु भ्रान्त है। जिस प्रकारकी काटे जानेपर फिरसे बढ़े हुए नखों और केशों में 'ये वे ही नख केशहैं' इस प्रकारका प्रत्यभिज्ञान भ्रान्त होता है ॥४१॥ *[संसारी स्कन्ध दुःख कहे जाते है। वे स्कन्ध विज्ञान, वेदना, संज्ञा, संस्कार और रूपके भेदसे पाँच प्रकारके कहे गये हैं। पाँचों इन्द्रियाँ, शब्द आदि उनके विषय, मन और धर्मायतन (शरीर) ये बारह आयतन हैं। जिस आत्मा और आत्मीय भावसे संसारमें रुलानेवाले रागादि उत्पन्न होते हैं उसे समुदय सत्य कहते हैं। 'सब पदार्थ क्षणिक हैं' इस प्रकारकी क्षणिक नैरात्म्य भावना मार्ग सत्य है तथा इन स्कन्धोंके नाश होनेको निरोध अर्थात् मोक्ष कहते हैं ॥४१॥] इसलिये विज्ञानकी सन्तानसे अतिरिक्त जीव नामका कोई पदार्थ नहीं है जो कि परलोक रूप फलको भोगनेवाला हो ॥४२॥ अतएव परलोक सम्बन्धी दुःख दूर करनेके लिये प्रयत्न करनेवाले पुरुषोंका परलोक भय वैसा ही है जैसा कि टिटहिरीको अपने ऊपर आकाशके पड़नेका भय होता है ॥४३॥

इस प्रकार विज्ञानवादी संभिन्नमति मन्त्री जब अपना अभिप्राय प्रकट कर चुप हो गया तब अपनी प्रशंसा करता हुआ शतमति नामका चौथा मन्त्री नैरात्म्यवाद (शून्यवाद) का आलम्बन कर नीचे लिखे अनुसार कहने लगा ॥४४॥ यह समस्त जगत् शून्य रूप हैं। इसमें नर पशु पक्षी घट पट आदि पदार्थोंका जो प्रतिभास होता है वह सब मिथ्या है। भ्रान्तिसे ही वैसा प्रतिभास होता है जिस प्रकार स्वप्न अथवा इन्द्रजाल आदिमें हाथी आदिका मिथ्या प्रतिभास होता है ॥४५॥ इसलिए जब कि सारा जगत् मिथ्या है तब तुम्हारा माना हुआ जीव कैसे सिद्ध हो सकता है और उसके अभावमें परलोक भी कैसे सिद्ध हो सकता है? क्योंकि यह सब गन्धर्वनगरकी तरह असत्स्वरूप है ॥४६॥ अतः जो पुरुष परलोकके लिए तपश्चरण तथा अनेक अनुष्ठान आदि करते हैं वे व्यर्थ ही क्लेशको प्राप्त होते हैं। ऐसे जीव यथार्थज्ञानसे रहित हैं ॥४७॥ जिस प्रकार ग्रीष्मऋतुमें मरुभूमिपर पड़ती हुई सूर्यकी चमकीली किरणोंको जल समझकर मृग व्यर्थ ही दौड़ा करते हैं उसी प्रकार ये भोगाभिलाषी मनुष्य परलोकके सुखोंको सच्चा सुख समझकर व्यर्थ ही दौड़ा करते हैं–

---

१ भिन्नः। २ मृतोत्पत्तिः। ३ उत्तरभवे। ४ हातुमिच्छायै। ५ प्रयत्नं कुर्वतः। ६ कोयष्टिकस्य। ७ आत्मश्लाघावान्। ८ वा म०, ल०। ९ यथा गन्धर्वनगरादयः शून्या भवन्ति तथैवेत्यर्थः। *कोष्ठकके अन्तर्गत भाग केवल 'ब और क' के प्रतिके आधार पर है।

इत्युद्ग्राह्य[1] [2]कुदृष्टान्तकुहेतुभिरपार्थकम् । व्यरमत्सोऽप्यतो वक्तुं स्वयंबुद्धः [3]प्रचक्रमे ॥४९॥
भूतवादिन् मृषा वक्ति स भवानात्मशून्यताम् । भूतेभ्यो व्यतिरिक्तस्य चैतन्यस्य प्रतीतितः ॥५०॥
कायात्मकं न चैतन्यं न कायश्चेतनात्मकः । मिथो विरुद्धधर्मत्वात्तयोश्चिदचिदात्मनोः ॥५१॥
कायचैतन्ययोर्नैक्यं विरोधिगुणयोगतः । तयोरन्तर्बहीरूपनिर्भासा[4]च्चासि[5]कोशवत् ॥५२॥
न भूतकार्यं चैतन्यं घटते तद्गुणोऽपि वा । ततो [6]जात्यन्तरीभावात्तद्विभागेन [7]तद्ग्रहात् ॥५३॥
न विकारोऽपि देहस्य संविद्भवितुमर्हति । भस्मादितद्विकारेभ्यो [8]वैधर्म्यान्मूर्त्यनन्वयात् ॥५४॥
गृहप्रदीपयोर्यद्वत् सम्बन्धो [9]युतसिद्धयोः । [10]आधाराधेयरूपत्वा द्देहोपयोगयोः ॥५५॥

उनकी प्राप्तिके लिए प्रयत्न करते हैं ॥४८॥ इस प्रकार खोटे दृष्टान्त और खोटे हेतुओं द्वारा सारहीन वस्तुका प्रतिपादन कर जब शतमति भी चुप हो रहा तब स्वयंबुद्ध मन्त्री कहनेके लिए उद्यत हुए ॥४९॥

हे भूतवादिन्, 'आत्मा नहीं है' यह आप मिथ्या कह रहे हैं क्योंकि पृथिवी आदि भूतचतुष्टयके अतिरिक्त ज्ञानदर्शनरूप चैतन्यकी भी प्रतीति होती है ॥५०॥ वह चैतन्य शरीर रूप नहीं है और न शरीर चैतन्य रूप ही है क्योंकि दोनोंका परस्पर विरुद्ध स्वभाव है। चैतन्य चित्स्वरूप है–ज्ञान दर्शनरूप है और शरीर अचित्स्वरूप है–जड़ है ॥५१॥ शरीर और चैतन्य दोनों मिलकर एक नहीं हो सकते क्योंकि दोनोंमें परस्पर विरोधी गुणोंका योग पाया जाता है। चैतन्यका प्रतिभास तलवारके समान अन्तरङ्ग रूप होता है और शरीरका प्रतिभास म्यानके समान बहिरङ्ग रूप होता है। भावार्थ–जिस प्रकार म्यानमें तलवार रहती है–यहाँ म्यान और तलवार दोनोंमें अभेद नहीं होता उसी प्रकार 'शरीरमें चैतन्य है' यहाँ शरीर और आत्मामें अभेद नहीं होता। प्रतिभासभेद होनेसे दोनों ही पृथक् पृथक् पदार्थ सिद्ध होते हैं ॥५२॥ यह चैतन्य न तो पृथिवी आदि भूत चतुष्टयका कार्य है और न उनका कोई गुण ही है। क्योंकि दोनोंकी जातियाँ पृथक् पृथक् हैं। एक चैतन्यरूप है तो दूसरा जड़रूप है। यथार्थमें कार्यकारण भाव और गुणगुणीभाव सजातीय पदार्थोंमें ही होता है विजातीय पदार्थोंमें नहीं होता। इसके सिवाय एक कारण यह भी है कि पृथिवी आदिसे बने हुए शरीरका ग्रहण उसके एक अंश रूप इन्द्रियोंके द्वारा ही होता है जब कि ज्ञानरूप चैतन्यका स्वरूप अतीन्द्रिय है–ज्ञानमात्रसे ही जाना जाता है। यदि चैतन्य, पृथिवी आदिका कार्य अथवा स्वभाव होता तो पृथिवी आदिसे निर्मित शरीरके साथ ही साथ इन्द्रियों द्वारा उसका भी ग्रहण अवश्य होता, परन्तु ऐसा होता नहीं है। इससे स्पष्ट सिद्ध है कि शरीर और चैतन्य पृथक् पृथक् पदार्थ हैं ॥५३॥ वह चैतन्य शरीरका भी विकार नहीं हो सकता क्योंकि भस्म आदि जो शरीरके विकार हैं उनसे वह विसदृश होता है। यदि चैतन्य शरीरका विकार होता तो उसके भस्म आदि विकार रूप ही चैतन्य होना चाहिये था परन्तु ऐसा नहीं होता इससे सिद्ध है कि चैतन्य शरीरका विकार नहीं है। दूसरी बात यह भी है कि शरीरका विकार मूर्तिक होगा परन्तु यह चैतन्य अमूर्तिक है–रूप रस गन्ध स्पर्शसे रहित है–इन्द्रियों द्वारा उसका ग्रहण नहीं होता ॥५४॥ शरीर और आत्माका सम्बन्ध ऐसा है जैसा कि घर और दीपकका होता

---

१ उक्त्वा । २ अनर्थकवचनम् । ३ उपक्रमं चकार । ४ दर्शनात् । ५ असिश्च कोशश्च असिकोशा-विव । ६ तद्भूतविभागेन । ७ तच्चैतन्यस्वीकारात् । ८ असम्बन्धात् । ९ पृथगाश्रयाश्रयित्वं युतसिद्धत्वम् । 'तावेवायुतसिद्धौ तौ विज्ञातव्यौ ययोर्द्वयोः । अवश्यमेकमपराश्रितमेवावतिष्ठते ॥' १० आत्मा ।

[1]सर्वाङ्गीणैकचैतन्यप्रतिभासादबाधितात् । प्रत्यङ्गमविभक्तेभ्यो भूतेभ्यः संविदो भिदा[2] ॥५६॥
कथं मूर्तिमतो देहाच्चैतन्यमतदात्मकम्[3] । स्याद्धेतुफलभावो[4] हि न मूर्त्तामूर्त्तयोः क्वचित् ॥५७॥
अमूर्त[5]मक्षविज्ञानं मूर्त्तादक्षकदम्बकात् । दृष्टमुत्पद्यमानञ्चेन्नास्य मूर्त्तत्वसङ्गरात्[5] ॥५८॥
बन्धं प्रत्येकतां बिभ्रदात्मा मूर्त्तेन कर्मणा । मूर्त[6]: कथञ्चिदाक्षोऽपि[6] बोधः स्यान्मूर्त्तिमानतः ॥५९॥
कायाकारेण भूतानां परिणामोऽन्यहेतुकः । कर्मसारथिमात्मानं [7]व्यतिरिच्य स कोऽपरः ॥६०॥
अभूत्वा भवनाद्देहे भूत्वा [8]च भवनात्पुनः । जलबुद्बुदवज्जीवं मा मंस्थास्तद्विलक्षणम् ॥६१॥

है। आधार और आधेय रूप होनेसे घर और दीपक जिस प्रकार पृथक् सिद्ध पदार्थ हैं उसी प्रकार शरीर और आत्मा भी पृथक् सिद्ध पदार्थ हैं ॥५५॥ आपका सिद्धान्त है कि शरीरके प्रत्येक अंगोपाङ्गकी रचना पृथक् पृथक् भूत चतुष्टयसे होती है सो इस सिद्धान्तके अनुसार शरीरके प्रत्येक अंगोपांगमें पृथक् पृथक् चैतन्य होना चाहिये क्योंकि आपका मत है कि चैतन्य भूत चतुष्टयका ही कार्य है। परन्तु देखा इससे विपरीत जाता है। शरीरके सब अङ्गोपाङ्गों में एक ही चैतन्यका प्रतिभास होता है उसका कारण भी यह है कि जब शरीरके किसी एक अंगमें कण्टकादि चुभ जाता है तब सारे शरीरमें दुःखका अनुभव होता है इससे मालूम होता है कि सब अङ्गोपाङ्गोंमें व्याप्त होकर रहनेवाला चैतन्य भूतचतुष्टयका कार्य होता तो वह भी प्रत्येक अंगोंमें पृथक् पृथक् ही होता ॥५६॥ इसके सिवाय इस बातका भी विचार करना चाहिये कि मूर्तिमान् शरीरसे मूर्तिरहित चैतन्यकी उत्पत्ति कैसे होगी ? क्योंकि मूर्तिमान् और अमूर्तिमान् पदार्थोंमें कार्यकारण भाव नहीं होता ॥५७॥ कदाचित् आप यह कहें कि मूर्तिमान् पदार्थसे भी अमूर्तिमान् पदार्थकी उत्पत्ति हो सकती है जैसे कि मूर्तिमान् इन्द्रियोंसे अमूर्तिमत् ज्ञान उत्पन्न हुआ देखा जाता है, सो भी ठीक नहीं है क्योंकि इन्द्रियोंसे उत्पन्न हुए ज्ञानको हम अमूर्तिक ही मानते हैं ॥५८॥ उसका कारण भी यह है कि यह आत्मा मूर्तिक कर्मोंके साथ बंधको प्राप्तकर एक रूप हो गया है इसलिए कथंचित् मूर्तिक माना जाता है। जब कि आत्मा भी कथंचित् मूर्तिक माना जाता है तब इन्द्रियोंसे उत्पन्न हुए ज्ञानको भी मूर्तिक मानना उचित है। इससे सिद्ध हुआ कि मूर्तिक पदार्थोंसे अमूर्तिक पदार्थों की उत्पत्ति नहीं होती ॥५९॥ इसके सिवाय एक बात यह भी ध्यान देने योग्य है—कि पृथिवी आदि भूतचतुष्टयमें जो शरीरके आकार परिणमन हुआ है वह भी किसी अन्य निमित्तसे हुआ है। यदि उस निमित्तपर विचार किया जावे तो कर्मसहित संसारी आत्माको छोड़कर और दूसरा क्या निमित्त हो सकता है ? अर्थात् कुछ नहीं। भावार्थ—कर्मसहित संसारी आत्मा ही पृथिवी आदिको शरीररूप परिणमन करता है इससे शरीर और आत्मा की सत्ता पृथक् सिद्ध होती है ॥६०॥ यदि कहो कि जीव पहले नहीं था, शरीरके साथ ही उत्पन्न होता है और शरीर के साथ ही नष्ट हो जाता है इसलिए जलके बबूलेके समान है जैसे जलका बबूला जलमें ही उत्पन्न होकर उसीमें नष्ट हो जाता है वैसे ही यह जीव भी शरीरके साथ उत्पन्न होकर उसी के साथ नष्ट हो जाता है' सो आपका यह मानना ठीक नहीं है क्योंकि शरीर और जीव दोनों ही विलक्षण—विसदृश पदार्थ हैं। विसदृश पदार्थसे विसदृश पदार्थकी उत्पत्ति किसी भी तरह नहीं हो सकती ॥६१॥

१ सर्वाङ्गभवम् । २ भिदा भेदः । ३ अमूर्तात्मकम् । ४ कारणकार्यभावः । ५ प्रतिज्ञायाः । ६ अक्षेभ्यो भवः । ७ त्यक्त्वा । ८ वा अ०, प०, द०, ल० ।

शरीरं किमुपादानं संविदः सहकारि वा । नोपादानमुपादेयाद्विजातीयत्वदर्शनात् ॥६२॥
[1]सहकारीति चेदिष्टमुपादानं तु मृग्यताम् । [2]सूक्ष्मभूतसमाहारस्तदुपादानमित्यसत् ॥६३॥
ततो भूतमयाद्देहाद् व्यतिभिन्नं स्वलक्षणम्[3] । जीवद्रव्यमुपादानं चैतन्यस्येति गृह्यताम् ॥६४॥
एतेनैव प्रतिक्षिप्त[4] मदिराङ्गनिदर्शनम् । मदिराङ्गेष्वविरोधिन्या मदशक्तेर्विभावनात्[5] ॥६५॥
सत्यं [6]भूतोपसृष्टोऽयं भूतवादी कुतोऽन्यथा । भूतमात्रमिदं विश्वमभूतं प्रतिपादयेत् ॥६६॥
पृथिव्यादिष्वनुद्भूतं चैतन्यं पूर्वमस्ति चेत् । नाचेतनेषु चैतन्यशक्तेर्व्यक्तमनन्वयात्[7] ॥६७॥
[8]आद्यन्तौ देहिनां देहौ न विना भवतस्तनू । पूर्वोत्तरे संविदधिष्ठानत्वान्मध्यदेहवत् ॥६८॥

आपका कहना है कि शरीरसे चैतन्यकी उत्पत्ति होती है—यहाँ हम पूछते हैं कि शरीर चैतन्यकी उत्पत्तिमें उपादान कारण है अथवा सहकारी कारण ? उपादान कारण तो नहीं हो सकता क्योंकि उपादेय—चैतन्यसे शरीर विजातीय पदार्थ है । यदि सहकारी कारण मानो तो यह हमें भी इष्ट है परन्तु उपादान कारणकी खोज फिर भी करनी चाहिए । कदाचित् यह कहो कि सूक्ष्म रूपसे परिणत भूतचतुष्टयका समुदाय ही उपादान कारण है तो आपका यह कहना असत् है क्योंकि सूक्ष्म भूतचतुष्टयके संयोग द्वारा उत्पन्न हुए शरीरसे वह चैतन्य पृथक् ही प्रतिभासित होता है । इसलिए जीव द्रव्यको ही चैतन्यका उपादान कारण मानना ठीक है चूँकि वही उसका सजातीय और सलक्षण है ।।६२-६४।। भूतवादीने जो पुष्प गुड़ पानी आदिके मिलनेसे मदशक्तिके उत्पन्न होनेका दृष्टान्त दिया है उपर्युक्त कथनसे उसका भी निराकरण हो जाता है क्योंकि मदिराके कारण जो गुड़ आदि हैं वे जड़ और मूर्तिक हैं तथा उनसे जो मादक शक्ति उत्पन्न होती है वह भी जड़ और मूर्तिक है । भावार्थ—मादक शक्तिका उदाहरण विषम है । क्योंकि प्रकृतमें आप सिद्ध करना चाहते हैं विजातीय द्रव्यसे विजातीयकी उत्पत्ति और उदाहरण दे रहे हैं सजातीय द्रव्यसे सजातीयकी उत्पत्तिका ।।६५।। वास्तवमें भूतवादी चार्वाक भूत-पिशाचोंसे ग्रसित हुआ जान पड़ता है यदि ऐसा नहीं होता तो इस संसारको जीवरहित केवल पृथिवी जल तेज वायु रूप ही कैसे कहता ? ।।६६।। कदाचित् भूतवादी यह कहे कि पृथिवी आदि भूतचतुष्टयमें चैतन्य शक्ति अव्यक्तरूपसे पहलेसे ही रहती है सो वह भी ठीक नहीं है क्योंकि अचेतन पदार्थमें चेतन शक्ति नहीं पाई जाती यह बात अत्यन्त प्रसिद्ध है ।।६७।। इस उपर्युक्त कथनसे सिद्ध हुआ कि जीव कोई भिन्न पदार्थ है और ज्ञान उसका लक्षण है । जैसे इस वर्तमान शरीरमें जीवका अस्तित्व है उसी प्रकार पिछले और आगेके शरीरोंमें भी उसका अस्तित्व सिद्ध होता है क्योंकि जीवोंका वर्तमान शरीर पिछले शरीरके बिना नहीं हो सकता । उसका कारण यह है कि वर्तमान शरीरमें स्थित आत्मामें जो दुग्धपानादि क्रियाएँ देखी जाती हैं वे पूर्वभव का संस्कार ही हैं । यदि वर्तमान शरीर के पहले इस जीवका कोई शरीर नहीं होता और यह नवीन ही उत्पन्न हुआ होता तो जीवकी सहसा दुग्धपानादिमें प्रवृत्ति नहीं हो सकती । इसी प्रकार वर्तमान शरीरके बाद भी यह जीव कोई न कोई शरीर धारण करेगा क्योंकि ऐन्द्रियिक ज्ञान सहित आत्मा बिना शरीरके रह नहीं सकता ।।६८।।

१ शरीरम् । २ सूक्ष्मभूतचतुष्टयसंयोगः । ३ चैतन्यम् । ४ निराकृतम् । ५ सद्भावात् , वा सम्भवात् । ६ ग्रहाविष्टः । ७ असम्बन्धात् । ८ "आद्यन्तौ देहिनां देहौ" इत्यत्र देहिनामाद्यन्तदेहौ पूर्वोत्तरे तनू बिना न भवतः । संविदधिष्ठानत्वात् मध्यदेहवत् इत्यस्मिन् अनुमाने आदिभूतो देहः उत्तरतनुं बिना न भवति अन्त्यदेहस्तु पूर्वतनुं बिना न भवति" इत्यर्थः ।

[1]तौ देहौ यत्र तं विद्धि परलोकमसंशयम् । तद्वांश्च परलोकी स्यात् प्रेत्यभावफलोपभुक् ॥६९॥
जात्यनुस्मरणाज्जीवगतागतविनिश्चयात् । आप्तोक्तिसंभवाच्चैव जीवास्तित्वविनिश्चयः ॥७०॥
अन्यप्रेरितमेतस्य शरीरस्य विचेष्टितम् । हिताहिताभिसन्धा[2]नाद्यन्त्रस्येव विचेष्टितम् ॥७१॥
चैतन्यं भूतसंयोगाद्यदि चेत्थं प्रजायते । [3]पिठरे [4]रन्धनायाधिश्रिते स्यात्तत्समुद्भवः ॥७२॥
इत्यादिभूतवादीष्टमतदूषणसंभवात् । मूर्खप्रलपितं [5]तस्य मतमित्यवधीर्यताम्[6] ॥७३॥
[7]विज्ञप्तिमात्रससिद्धिर्न विज्ञानादिहास्ति[8] ते । साध्यसाधनयोरैक्यात्कुतस्तत्त्वविनिश्चितिः ॥७४॥
विज्ञानव्यतिरिक्तस्य [9]वाक्यस्येह प्रयोगतः । बहिरर्थस्य संसिद्धिर्विज्ञानं तद्वचोऽपि चेत् ॥७५॥
[10]किं केन साधितं [11]तत्स्यान्मूर्ख विज्ञप्तिमात्रकम् । कुतो ग्राह्यादिभेदोऽपि [12]विज्ञानैक्ये निरंशके ॥७६॥

जहाँ यह जीव अपने अगले पिछले शरीरोंसे युक्त होता है वही उसका परलोक कहलाता है और उन शरीरोंमें रहनेवाला आत्मा परलोकी कहा जाता है तथा वही परलोकी आत्मा परलोक सम्बन्धी पुण्य पापोंके फलको भोगता है ॥६९॥ इसके सिवाय, जातिस्मरणसे जीवन मरण रूप आवागमनसे और आप्तप्रणीत आगमसे भी जीवका पृथक् अस्तित्व सिद्ध होता है ॥७०॥ जिस प्रकार किसी यन्त्रमें जो हलन चलन होता है वह किसी अन्य चालककी प्रेरणासे होता है इसी प्रकार इस शरीरमें भी जो यातायात रूपी हलन चलन हो रहा है वह भी किसी अन्य चालककी प्रेरणासे ही हो रहा है वह चालक आत्मा ही है । इसके सिवाय शरीरकी जो चेष्टाएँ होती हैं सो हित अहित के विचारपूर्वक होती हैं इससे भी जीवका अस्तित्व पृथक् जाना जाता है ॥७१॥ यदि आपके कहे अनुसार पृथिवी आदि भूतचतुष्टयके संयोगसे जीव उत्पन्न होता है तो भोजन पकानेके लिए आगपर रखी हुई बटलोईमें भी जीवकी उत्पत्ति हो जानी चाहिये क्योंकि वहाँ भी तो अग्नि पानी वायु और पृथिवी रूप भूतचतुष्टयका संयोग होता है ॥७२॥ इस प्रकार यह सिद्ध होता है कि भूतवादियोंके मतमें अनेक दूषण हैं इसलिये यह निश्चय समझिये कि भूतवादियोंका मत निरे मूर्खोंका प्रलाप है उसमें कुछ भी सार नहीं है ॥७३॥

इसके अनन्तर स्वयंबुद्धने विज्ञानवादीसे कहा कि आप इस जगत्को विज्ञान मात्र मानते हैं–विज्ञानसे अतिरिक्त किसी पदार्थका सद्भाव नहीं मानते परन्तु विज्ञानसे ही विज्ञानकी सिद्धि नहीं हो सकती क्योंकि आपके मतानुसार साध्य साधन दोनों एक हो जाते हैं–विज्ञान ही साध्य होता है और विज्ञान ही साधन होता है ऐसी हालतमें तत्त्वका निश्चय कैसे हो सकता है ? ॥७४॥ एक बात यह भी है कि संसारमें बाह्य पदार्थोंकी सिद्धि वाक्योंके प्रयोगसे ही होती है यदि वाक्योंका प्रयोग न किया जावे तो किसी भी पदार्थकी सिद्धि नहीं होगी और उस अवस्थामें संसारका व्यवहार बन्द हो जायगा । यदि वह वाक्य विज्ञानसे भिन्न है इसलिए वाक्योंका प्रयोग रहते हुए विज्ञानाद्वैत सिद्ध नहीं हो सकता । यदि यह कहो कि वे वाक्य भी विज्ञान ही हैं तो हे मूर्ख, बता कि तूने 'यह संसार विज्ञान मात्र है' इस विज्ञानाद्वैतकी सिद्धि किसके द्वारा की है ? इसके सिवाय एक बात यह भी विचारणीय है कि जब तू निरंश (निर्विभाग) विज्ञानको ही मानता है तब ग्राह्य आदिका भेद व्यवहार किस प्रकार सिद्ध हो सकेगा ? भावार्थ–विज्ञान पदार्थोंको जानता है इसलिए

---

१ देहौ नौ अ०, द०, स०, प० । तौ पूर्वोत्तरौ । २ अभिप्रायात् । ३ स्थाल्याम् । ४ पचनाय । ५ चार्वाकस्य । ६ अवज्ञीक्रियताम् ।–धार्यताम् म०, ल० । ७ विज्ञानाद्वैतवादिनं प्रति वक्ति । ८ विज्ञानम् । ९ विज्ञप्तिप्रतिपादकस्य । १० किं किं न प० । ११ विज्ञानम् । १२ विज्ञानाद्वैते ।

विज्ञप्तिर्विषयाकारशून्या न प्रतिभासते । प्रकाश्येन विना सिद्ध्येत् क्वचित्किन्नु प्रकाशकम् ॥७७॥
विज्ञप्त्या [1]परसंवित्तेर्ग्रहः स्याद्वा न वा तव । तद्ग्रहे सर्वविज्ञाननिरालम्बनताक्षतिः ॥७८॥
तदग्रहेऽन्यसन्तानसाधने का [2]गतिस्तव । अनुमानेन तत्सिद्धौ ननु बाह्यार्थसंस्थितिः ॥७९॥
विश्वं विज्ञप्तिमात्रं चेद् वाग्विज्ञानं मृषाखिलम् । भवेद्बाह्यार्थशून्यत्वात्कुतः सत्येतरस्थितिः ॥८०॥
ततोऽस्ति बहिरर्थोऽपि साधनादिप्रयोगतः । तस्माद्विज्ञप्तिवादोऽयं बालालपितपेलवः[3] ॥८१॥
शून्यवादेऽपि शून्यत्वप्रतिपादि वचस्तव । विज्ञानं चास्ति वा नेति विकल्पद्वयकल्पना ॥८२॥
[4]वाग्विज्ञानं समस्तीदमिति हन्त हतो भवान् । तद्वत्कृत्स्नस्य संसिद्धेरन्यथा[5] शून्यता कुतः ॥८३॥

ग्राहक कहलाता है और पदार्थ ग्राह्य कहलाते हैं जब तू ग्राह्य-पदार्थोंकी सत्ता ही स्वीकृत नहीं करता तो ज्ञान ग्राहक-किस प्रकार सिद्ध हो सकेगा ? यदि ग्राह्यको स्वीकार करता है तो विज्ञानका अद्वैत नष्ट हुआ जाता है ॥७५-७६॥ ज्ञानका प्रतिभास घट पटादि विषयोंके आकारसे शून्य नहीं होता अर्थात् घटपटादि विषयोंके रहते हुए ही ज्ञान उन्हें जान सकता है, यदि घटपटादि विषय न हों तो उन्हें जाननेवाला ज्ञान भी नहीं हो सकता । क्या कभी प्रकाश करने योग्य पदार्थोंके बिना भी कहीं कोई प्रकाशक-प्रकाश करनेवाला होता है ? अर्थात् नहीं होता । इस प्रकार यदि ज्ञानको मानते हो तो उसके विषयभूत पदार्थोंको भी मानना चाहिए ॥७७॥ हम पूछते हैं कि आपके मतमें एक विज्ञानसे दूसरे विज्ञानका ग्रहण होता है अथवा नहीं ? यदि होता है तो आपके माने हुए विज्ञानमें निरालम्बनताका अभाव हुआ अर्थात् वह विज्ञान निरालम्ब नहीं रहा, उसने द्वितीय विज्ञानको जाना इसलिए उन दोनोंमें ग्राह्य ग्राहक भाव सिद्ध हो गया जो कि विज्ञानाद्वैतका बाधक है । यदि यह कहो कि एक विज्ञान दूसरे विज्ञानको ग्रहण नहीं करता तो फिर आप उस द्वितीय विज्ञानको जो कि अन्य संतान रूप है, सिद्ध करनेके लिए क्या हेतु देंगे ? कदाचित् अनुमानसे उसे सिद्ध करोगे तो घटपट आदि बाह्य पदार्थोंकी स्थिति भी अवश्य सिद्ध हो जावेगी क्योंकि जब साध्य साधन रूप अनुमान मान लिया तब विज्ञानाद्वैत कहाँ रहा ? उसके अभावमें अनुमानके विषयभूत घट-पटादि पदार्थ भी अवश्य मानने पड़ेंगे ॥७८-७९॥ यदि यह संसार केवल विज्ञानमय ही है तो फिर समस्त वाक्य और ज्ञान मिथ्या हो जाएँगे, क्योंकि जब बाह्य घटपटादि पदार्थ ही नहीं है तो 'ये वाक्य और ज्ञान सत्य हैं तथा ये असत्य' यह सत्यासत्य व्यवस्था कैसे हो सकेगी ? ॥८०॥ जब आप साधन आदिका प्रयोग करते हैं तब साधनसे भिन्न साध्य भी मानना पड़ेगा और वह साध्य घटपट आदि बाह्य पदार्थ ही होगा । इस तरह विज्ञानसे अतिरिक्त बाह्य पदार्थोंका भी सद्भाव सिद्ध हो जाता है । इसलिए आपका यह विज्ञानाद्वैतवाद केवल बालकोंकी बोलीके समान सुननेमें ही मनोहर लगता है ॥८१॥

इस प्रकार विज्ञानवादका खण्डनकर स्वयंबुद्ध शून्यवादका खण्डन करनेके लिए तत्पर हुए । वे बोले कि-आपके शून्यवादमें भी, शून्यत्वको प्रतिपादन करनेवाले वचन और उनसे उत्पन्न होनेवाला ज्ञान है, या नहीं ? इस प्रकार दो विकल्प उत्पन्न होते हैं ॥८२॥ यदि आप इन विकल्पोंके उत्तरमें यह कहें कि हाँ, शून्यत्वको प्रतिपादन करनेवाले वचन और ज्ञान दोनों ही हैं; तब खेदके साथ कहना पड़ता है कि आप जीत लिए गए क्योंकि वाक्य और

---

१ परा चासौ संवित्तिश्च । २ उपायः । ३ अविशेषः, अथवा क्षीणः । -पेशलः ल० । ४ वाक् च विज्ञानं च वाग्विज्ञानम् । ५ वाग्विज्ञानाभावे सति ।

[1]तदस्या[2]लपितं शून्यमुन्मत्त[3]विरुतोपमम् । ततोऽस्ति जीवो धर्मश्च दयासंयमलक्षणः ॥८४॥
[4]सर्वज्ञोपज्ञमेवैतत् तत्त्वं तत्त्वविदां मतम् । [5]आप्तम्मन्यमतान्यन्यान्यवहेयान्यतो बुधैः ॥८५॥
इति तद्वचनाज्जाता परिषत्सकलैव सा । [6]निरारेकात्मसद्भावे[7] सम्प्रीतश्च सभापतिः ॥८६॥
परवादिनगास्तेऽपि स्वयम्बुद्धवचोऽशनेः । निष्ठुरापातमासाद्य सद्यः प्रम्लानिमागताः ॥८७॥
पुनः प्रशान्तगम्भीरे स्थिते तस्मिन् सदस्यसौ । दृष्टश्रुतानुभूतार्थसम्बन्धीदमभाषत ॥८८॥
शृणु भोस्त्वं महाराज [8]वृत्तमाख्यानकं पुरा । खेन्द्रोऽभूदरविन्दाख्यो भवद्वंशशिखामणिः ॥८९॥
स इमां पुण्यपाकेन शास्ति स्म परमां पुरीम् । उद्दृप्तप्रतिसामन्तदोर्दर्पानवसर्पयन्[9] ॥९०॥
विषयानन्वभूद्दिव्यानसौ खेचरगोचरान् । अभूतां हरिचन्द्रश्च कुरुविन्दश्च तत्सुतौ ॥९१॥
स बह्वारम्भसं[10]रम्भरौद्रध्यानाभिसन्धिना । बबन्ध नरकायुष्यं तीव्रासातफलोदयम् ॥९२॥
प्रत्यासन्नमृतेस्तस्य दाहज्वरविजृम्भितः । ववृधे तनुसन्तापः कदाचिदतिदुःसहः ॥९३॥

विज्ञानकी तरह आपको सब पदार्थ मानने पड़ेंगे। यदि यह कहो कि हम वाक्य और विज्ञानको नहीं मानते तो फिर शून्यताकी सिद्धि किस प्रकार होगी? भावार्थ-यदि आप शून्यता प्रतिपादक वचन और विज्ञानको स्वीकार करते हैं तो वचन और विज्ञानके विषयभूत जीवादि समस्त पदार्थ भी स्वीकृत करने पड़ेंगे इसलिए शून्यवाद नष्ट हो जावेगा और यदि वचन तथा विज्ञानको स्वीकृत नहीं करते हैं तब शून्यवादका समर्थन व मनन किसके द्वारा करेंगे? ॥८३॥ ऐसी अवस्थामें आपका यह शून्यवादका प्रतिपादन करना उन्मत्त पुरुषके रोनेके समान व्यर्थ है। इसलिए यह सिद्ध हो जाता है कि जीव शरीरादिसे पृथक् पदार्थ है तथा दया संयम आदि लक्षणवाला धर्म भी अवश्य है ॥८४॥

तत्त्वज्ञ मनुष्य उन्हीं तत्त्वोंको मानते हैं जो सर्वज्ञ देवके द्वारा कहे हुए हों। इसलिए विद्वानोंको चाहिये कि वे आप्ताभास पुरुषों द्वारा कहे हुए तत्त्वोंको हेय समझें ॥८५॥ इस प्रकार स्वयंबुद्ध मन्त्रीके वचनोंसे वह सम्पूर्ण सभा आत्माके सद्भावके विषयमें संशयरहित हो गई अर्थात् सभीने आत्माका पृथक् अस्तित्व स्वीकार कर लिया और सभाके अधिपति राजा महाबल भी अतिशय प्रसन्न हुए ॥८६॥ वे परवादीरूपी वृक्ष भी स्वयंबुद्ध मन्त्रीके वचनरूपी वज्रके कठोर प्रहारसे शीघ्र ही म्लान हो गए ॥८७॥ इसके अनन्तर जब सब सभा शान्त भावसे चुपचाप बैठ गई तब स्वयंबुद्ध मन्त्री दृष्ट श्रुत और अनुभूत पदार्थसे सम्बन्ध रखनेवाली कथा कहने लगे ॥८८॥

हे महाराज, मैं एक कथा कहता हूँ उसे सुनिये। कुछ समय पहले आपके वंशमें चूड़ामणिके समान एक अरविन्द नामका विद्याधर हुआ था ॥८९॥ वह अपने पुण्योदयसे अहंकारी शत्रुओंके भुजाओंका गर्व दूर करता हुआ इस उत्कृष्ट अलका नगरीका शासन करता था ॥९०॥ वह राजा विद्याधरोंके योग्य अनेक उत्तमोत्तम भोगोंका अनुभव करता रहता था। उसके दो पुत्र हुए, एकका नाम हरिचन्द्र और दूसरेका नाम कुरुविन्द था ॥९१॥ उस अरविन्द राजाने बहुत आरम्भको बढ़ानेवाले रौद्रध्यानके चिन्तवनसे तीव्र दुःख देनेवाली नरक आयुका बन्ध कर लिया था ॥९२॥ जब उसके मरनेके दिन निकट आये तब

---

१ तत् कारणात्। २ शून्यवादिनः। ३ वचः। ४ सर्वज्ञेन प्रथमोपदिष्टम्। ५ आत्मानमाप्तं मन्यन्ते इत्याप्तम्मन्याः तेषां मतानि। ६ निस्सन्देहा। ७ आत्मास्तित्वे। ८ कथाम्। ९ अपसारयन्। १० प्राणव्यपरोपणादिषु प्रमादतः प्रयत्नावेशः संरम्भ इत्युच्यते।

[1]कह्लारवारिभिर्धूतशीतशीतलि[2]कानिलैः। न [3]निर्वृतिमसौ लेभे हारैश्च हरिचन्दनैः ॥९४॥
विद्यासु विमुखीभावं स्वासु यातासु दुर्मदी। पुण्यक्षयात्परिक्षीणमदशक्तिरिवेभराट् ॥९५॥
दाहज्वरपरीताङ्गः[4] संतापं सोढुमक्षमः। हरिचन्द्रमथाहूय सुतमित्यादिशद्वचः ॥९६॥
अङ्ग पुत्र ममाङ्गेषु संतापो वर्द्धते तराम्। पश्य कह्लारहाराणां परिम्लानिं [5]तदर्पणात् ॥९७॥
तन्मामुदक्कुरून्[6]पुत्र प्रापयाशु स्वविद्यया। तांश्च शीताम्बनोद्देशान् सीतानद्यास्तटाश्रितान् ॥९८॥
तत्र कल्पतरून्धुन्वन् सीतावीचिचयोत्थितः। दाहान्मां मातरिश्वास्मादुपशान्तिं स नेष्यति ॥९९॥
इति तद्वचनाद्विद्यां [7]प्रैषिषद्व्योमगामिनीम्। ससूनुः साप्यपुण्यस्य नाभूत्तस्योपकारिणी ॥१००॥
विद्यावैमुख्यतो ज्ञात्वा पितुर्व्याधेरसाध्यताम्। सुतः कर्तव्यतामूढः सोऽभूदुद्विग्नमानसः[8] ॥१०१॥
अथान्येद्युरमुष्याङ्गे पेतुः शोणितबिन्दवः। मिथःकलहविश्लिष्ट[9]गृहकोकिल[10]वालधेः ॥१०२॥
तैश्च तस्य किलाङ्गानि [11]निर्ववुः पापदोषतः। [12]सोऽतुषच्चेति [13]दिष्ट्याद्य परं लब्धं मयौषधम् ॥१०३॥
ततोऽन्यं कुरुविन्दाख्यं सूनुमाहूय सोऽवदत्। पुत्र मे रुधिरापूर्णा वाप्येका [14]क्रियतामिति ॥१०४॥

उसके दाहज्वर उत्पन्न हो गया जिससे दिनों दिन शरीरका अत्यन्त दुःसह सन्ताप बढ़ने लगा ॥९३॥ वह राजा न तो लाल कमलोंसे सुवासित जलके द्वारा, न पङ्खोंकी शीतल हवाके द्वारा, न मणियोंके हारके द्वारा और न चन्दनके लेपके द्वारा ही सुख-शान्तिको पा सका था ॥९४॥ उस समय पुण्यक्षय होनेसे उसकी समस्त विद्याएँ उसे छोड़कर चली गई थीं इसलिए वह उस गजराजके समान अशक्त हो गया था जिसकी कि मदशक्ति सर्वथा क्षीण हो गई हो ॥९५॥ जब वह दाहज्वरसे समस्त शरीरमें बेचैनी पैदा करनेवाले सन्तापको नहीं सह सका तब उसने एक दिन अपने हरिचन्द्र पुत्रको बुलाकर कहा ॥९६॥ हे पुत्र, मेरे शरीरमें यह सन्ताप बढ़ता ही जाता है देखो तो, लाल कमलोंकी जो मालाएँ सन्ताप दूर करनेके लिए शरीरपर रखी गई थीं वे कैसी मुरझा गई हैं ॥९७॥ इसलिए हे पुत्र, तुम मुझे अपनी विद्याके द्वारा शीघ्र ही उत्तरकुरु देशमें भेज दो और उत्तरकुरुमें भी उन वनोंमें भेजना जो कि सीतोदा नदीके तटपर स्थित हैं तथा अत्यन्त शीतल हैं ॥९८॥ कल्पवृक्षोंको हिलानेवाली तथा सीता नदीकी तरङ्गोंसे उठी हुई वहाँकी शीतल वायु मेरे इस सन्तापको अवश्य ही शान्त कर देगी ॥९९॥ पिताके ऐसे वचन सुनकर राजपुत्र हरिचन्द्रने अपनी आकाशगामिनी विद्या भेजी परन्तु राजा अरविन्दका पुण्य क्षीण हो चुका था इसलिए वह विद्या भी उसका उपकार नहीं कर सकी अर्थात् उसे उत्तरकुरु देश नहीं भेज सकी ॥१००॥ जब आकाशगामिनी विद्या भी अपने कार्यसे विमुख हो गई तब पुत्रने समझ लिया कि पिताकी बीमारी असाध्य है। इससे वह बहुत उदास हुआ और किंकर्त्तव्यविमूढ़ सा हो गया ॥१०१॥ अनन्तर किसी एक दिन दो छिपकली परस्परमें लड़ रही थीं। लड़ते-लड़ते एककी पूँछ टूट गई, पूँछसे निकली हुई खूनकी कुछ बूँदें राजा अरविन्दके शरीरपर आकर पड़ीं ॥१०२॥ उन खूनकी बूँदोंसे उसका शरीर ठण्डा हो गया—दाहज्वरकी व्यथा शान्त हो गई। पापके उदयसे वह बहुत ही सन्तुष्ट हुआ और विचारने लगा कि आज मैंने दैवयोगसे बड़ी अच्छी औषधि पा ली है ॥१०३॥ उसने कुरुविन्द नामके दूसरे पुत्रको बुलाकर कहा कि हे पुत्र, मेरे

१ कह्लारं [सौगन्धिकं कमलम्]। २ तालवृन्तकम्। ३ सुखम्। ४ परीताङ्गः ल०। ५ शरीरार्पणात्। ६ उत्तरकुरून्। ७ प्रेषयति स्म। इष गत्यामिति धातुः। ८ उद्वेगयुक्तमनाः। ९ गृह-गोधिक- म०, ल०। १० गृहगोधिका। ११ शैत्यं ययुरित्यर्थः। १२ सोऽतुष्यच्चेति ल०। १३ दैवेन। १४ कार्यतामिति।

पुनरप्यवदल्लब्धविभङ्गोऽस्मिन्वनान्तरे । मृगा बहुविधाः सन्ति तैस्त्वं प्रकृतमाचरः ॥१०५॥
स तद्वचनमाकर्ण्य पापभीरुर्विचिन्त्य च । तत्कर्मापार[1]यन्कर्तुं मूकीभूतः क्षणं स्थितः ॥१०६॥
प्रत्यासन्नमृतिं बुद्ध्वा तं बद्धनरकायुषम् । दिव्यज्ञानदृशः साधोस्तत्कार्येऽभूत्स [2]शीतकः ॥१०७॥
अनुल्लङ्घ्यं पितुर्वाक्यं मन्यमानस्तथाप्यसौ । कृत्रिमैः [3]क्षतजैः पूर्णां वापीमेकामकारयत् ॥१०८॥
स तदाकर्णनात्प्रीतिमगमत्पापपण्डितः । अलब्धपूर्वमासाद्य निधानमिव दुर्गतः[4] ॥१०९॥
[5]कारिमारुणरागेण वारिणा [6]विप्रतारितः । [7]बहु मेने [8]स तां पापी वापीं [9]वैतरणीमिव ॥११०॥
तत्रानीतश्च तन्मध्ये यथेष्टं शयितोऽमुतः । चिक्रीड कृतगण्डूषः कृतकं तदबुद्ध च ॥१११॥
[10]नरकायुरपर्याप्तं [11]पर्याप्तिपयिषन्निव । दधे स [12]तुग्वधे चित्तमधीः पापोदधेर्विधुः ॥११२॥
स रुष्टः पुत्रमाहन्तुमाधावन्पतितोऽन्तरे । [13]स्वासिधेनुकया [14]दीर्णहृदयो मृतिमासदत् ॥११३॥
स तथा[15] दुर्मृतिं प्राप्य गतः [16]श्वाभ्रीमधर्मतः । कथेयमधुनाप्यस्यां नगर्यां स्मर्यते जनैः ॥११४॥
ततो भग्नैकरदनो दन्तीवानमिताननः । उत्खातफणमाणिक्यो महाहिरिव निष्प्रभः ॥११५॥

लिए खूनसे भरी हुई एक बावड़ी बनवा दो ॥१०४॥ राजा अरविन्दको विभंगावधि ज्ञान था इसलिए विचार कर फिर बोला—इसी समीपवर्ती वनमें अनेक प्रकारके मृग रहते हैं उन्हींसे तू अपना काम कर अर्थात् उन्हें मारकर उनके खूनसे बावड़ी भर दे ॥१०५॥ वह कुरुविन्द पापसे डरता रहता था इसलिए पिताके ऐसे वचन सुनकर तथा कुछ विचारकर पापमय कार्य करनेके लिए असमर्थ होता हुआ क्षणभर चुप चाप खड़ा रहा ॥१०६॥ तत्पश्चात् वन में गया वहाँ किन्हीं अवधि ज्ञानी मुनिसे जब उसे मालूम हुआ कि हमारे पिताकी मृत्यु अत्यन्त निकट है तथा उन्होंने नरकायुका बन्ध कर लिया है तब वह उस पापकर्मके करनेसे रुक गया ॥१०७॥ परन्तु पिताके वचन भी उल्लंघन करने योग्य नहीं हैं ऐसा मानकर उसने कृत्रिम रुधिर अर्थात् लाखके रंगसे भरी हुई एक बावड़ी बनवाई ॥१०८॥ पापकार्य करनेमें अतिशय चतुर राजा अरविन्दने जब बावड़ी तैयार होनेका समाचार सुना तब वह बहुत ही हर्षित हुआ। जैसे कोई दरिद्र पुरुष पहले कभी प्राप्त नहीं हुए निधानको देखकर हर्षित होता है ॥१०९॥ जिस प्रकार पापी—नारकी जीव वैतरणी नदी को बहुत अच्छी मानता है उसी प्रकार वह पापी अरविन्द राजा भी लाखके लाल रंगसे धोखा खाकर अर्थात् सचमुचका रुधिर समझकर उस बावड़ीको बहुत अच्छी मान रहा था ॥११०॥ जब वह उस बावड़ीके पास लाया गया तो आते ही उसके बीचमें सो गया और इच्छानुसार क्रीड़ा करने लगा। परन्तु कुल्ला करते ही उसे मालूम हो गया कि यह कृत्रिम रुधिर है ॥१११॥ यह जानकर पापरूपी समुद्रको बढ़ानेके लिये चन्द्रमाके समान वह बुद्धिरहित राजा अरविन्द, मानो नरककी पूर्ण आयु प्राप्त करनेकी इच्छासे ही रुष्ट होकर पुत्रको मारनेके लिए दौड़ा परन्तु बीचमें इस तरह गिरा कि अपनी ही तलवारसे उसका हृदय विदीर्ण हो गया तथा मर गया ॥११२-११३॥ वह कुमरणको पाकर पापके योगसे नरकगतिको प्राप्त हुआ। हे राजन्! यह कथा इस अलका नगरीमें लोगोंको आजतक याद है ॥११४॥ जिस प्रकार दाँत टूट जानेसे हाथी अपना मुँह नीचा कर लेता है, अथवा जिस प्रकार फणका मणि उखाड़ लेनेसे सर्प तेज

१ अतीरयन् असमर्थो भवन्नित्यर्थः। २ मन्दः। 'शीतकोऽलसोऽनुष्णः' इत्यमरः। ३ रक्तैः। ४ दरिद्रः। ५ कृत्रिम। ६ वञ्चितः। ७ बहुमन्यते स्म। ८ तां वर्या वापीं वै– अ०। ९ नरकनदीम्। १० नरकायुरपर्यन्तं प०, द०, ल०। ११ पर्याप्तं कर्तुमिच्छन्। १२ पुत्रहिंसायाम्। १३ स्वच्छुरिकया। १४ दीर्णं विदारितम्। १५ तदा द०, प०, ल०। १६ नरकगतिम्।

पितुर्भानोरिवापायात् कुरुविन्दोऽरविन्दवत् । परिम्लानतनुच्छायः स शोच्यामगमद्दशाम्[1] ॥११६॥
तथात्रैव भवद्वंशे विस्तीर्णे जलधाविव । दण्डो नाम्नाभवत्खेन्द्रो दण्डितारातिमण्डलः ॥११७॥
मणिमालीत्यभूत्तस्मात्सूनुर्मणिरिवाम्बुधेः । नियोज्य यौवराज्ये तं स्वेष्टान्भोगानभुङ्क्त सः ॥११८॥
भुक्त्वापि सुचिरं भोगान्नातृप्यद्विषयोत्सुकः । [2]प्रत्युतासक्तिमभजत् स्त्रीवस्त्राभरणादिषु ॥११९॥
सोऽत्यन्तविषयासक्तिकृतकौटिल्य[3]चेष्टितः । बबन्ध तीव्रसंक्लेशात्तिरश्चामायुरार्त्तधीः ॥१२०॥
जीवितान्ते स दुर्ध्यानमार्त्तमापूर्य दुर्मृतेः । भाण्डागारे निजे मोहान् महानजगरोऽजनि ॥१२१॥
स जातिस्मरतां गत्वा भाण्डागारिकवद्भृशम् । तत्प्रवेशे निजं सूनुमन्वमंस्त न चापरम् ॥१२२॥
अन्येद्युरवधिज्ञानलोचनान्मुनिपुङ्गवात् । मणिमाली पितुर्ज्ञात्वा तं वृत्तान्तमशेषतः ॥१२३॥
पितृभक्त्या [4]तत्तन्मूर्च्छामपहर्तुमनाः सुधीः । [5]शयोरग्ने शनैःस्थित्वा स्नेहार्द्रां गिरमभ्यधात् ॥१२४॥
पितः पतितवानस्यां कुयोनावधुना त्वकम् । विषयास[6]ङ्गदोषेण [7]धृतमूर्छो धनर्द्धिषु ॥१२५॥
ततो धिगिदमत्यन्तकटुकं विषयामिषम्[8] । [9]वमैतद् दुर्जरं तात किम्पाकफलसन्निभम् ॥१२६॥

रहित हो जाता है अथवा सूर्य अस्त हो जानेसे जिस प्रकार कमल मुरझा जाता है उसी प्रकार पिताकी मृत्युसे कुरुविन्दने अपना मुँह नीचा कर लिया, उसका सब तेज जाता रहा तथा सारा शरीर मुरझा गया—शिथिल हो गया। इस प्रकार वह सोचनीय अवस्थाको प्राप्त हुआ था ॥११५-११६॥

हे राजन्, अब दूसरी कथा सुनिये—समुद्रके समान विस्तीर्ण आपके इस वंशमें एक दण्ड नामका विद्याधर हो गया है वह बड़ा प्रतापी था उसने अपने समस्त शत्रुओंको दण्डित किया था ॥११७॥ जिस प्रकार समुद्रसे मणि उत्पन्न होता है उसी प्रकार उस दण्ड विद्याधरसे भी मणिमाली नामका पुत्र उत्पन्न हुआ। जब वह बड़ा हुआ तब राजा दण्डने उसे युवराज पदपर नियुक्त कर दिया और आप इच्छानुसार भोग भोगने लगा ॥११८॥ वह विषयोंमें इतना अधिक उत्सुक हो रहा था कि चिरकालतक भोगोंको भोग कर भी तृप्त नहीं होता था बल्कि स्त्री वस्त्र तथा आभूषण आदिमें पहलेकी अपेक्षा अधिक आसक्त होता जाता था ॥११९॥ अत्यन्त विषयासक्तिके कारण मायाचारी चेष्टाओंको करनेवाले उस आर्तध्यानी राजाने तीव्र संक्लेश भावोंसे तिर्यञ्च आयुका बन्ध किया ॥१२०॥ चूँकि मरते समय उसका आर्तध्यान नामका कुध्यान पूर्णताको प्राप्त हो रहा था इसलिए कुमरणसे मरकर वह मोहके उदयसे अपने भण्डारमें बड़ा भारी अजगर हुआ ॥१२१॥ उसे जातिस्मरण भी हो गया था इसलिए वह भण्डारीकी तरह भण्डारमें केवल अपने पुत्रको ही प्रवेश करने देता था अन्य को नहीं ॥१२२॥ एक दिन अतिशय बुद्धिमान् राजा मणिमाली किन्हीं अवधिज्ञानी मुनिराजसे पिताके अजगर होने आदिका समस्त वृत्तान्त मालूम कर पितृ भक्तिसे उनका मोह दूर करनेके लिए भण्डारमें गया और धीरेसे अजगरके आगे खड़ा हो कर स्नेहयुक्त वचन कहने लगा। ॥१२३-१२४॥ हे पिता, तुमने धन ऋद्धि आदिमें अत्यन्त ममत्व और विषयोंमें अत्यन्त आसक्ति की थी इसी दोषसे तुम इस समय इस कुयोनिमें—सर्प पर्यायमें आकर पड़े हो ॥१२५॥ यह विषय रूपी आमिष अत्यन्त कटुक है, दुर्जर है और किंपाक (विषफल) फलके समान है इसलिए धिक्कारके योग्य है। हे पिता जी, इस विषयरूपी आमिषको अब भी छोड़ दो ॥१२६॥

---

१ अवस्थाम् । २ पुनः किमिति चेत् । ३ कौटिल्यं माया । ४ अज्ञानम् । ५ अजगरस्य । ६ आसङ्गः आसक्तिः । ७ धृतमोहः । ८ सम्भोगः । "आमिषं पलले लोभे सम्भोगोत्कोचयोरपि" इत्यभिधानात् । ९ उद्गारं कुरु ।

[1]रथाङ्गमिव संसारमनुबध्नाति सन्ततम् । दुस्त्यजं त्यजदप्येतत् कण्ठस्थमिव जीवितम् ॥१२७॥
प्रकटीकृतविश्वासं प्राणहारि भयावहम् । [2]मृगयोरिव दुर्गीतं नृगणैणप्रलम्भकम् ॥१२८॥
ताम्बूलमिव संयोगादिदं रागविवर्द्धनम् । अन्धकारमिवोत्सर्पत् सन्मार्गस्य निरोधनम् ॥१२९॥
जैनं मतमिव प्रायः परिभूतमतान्तरम् । तडिल्लसितवल्लोलं वैचित्र्यात् सुरचापवत् ॥१३०॥
किं वात्र बहुनोक्तेन पश्येदं विषयोद्भवम् । सुखं संसारकान्तारे परिभ्रमयतीप्सितम् ॥१३१॥
नमोऽस्तु [3]तद्रसासङ्गविमुखाय स्थिरात्मने[4] । तपोधनगणायेति निनिन्द विषयानसौ ॥१३२॥
अथासौ पुत्रनिर्दिष्टधर्मवाक्यांशुमालिना । गलिताशेषमोहान्धतमसः[5] समजायत ॥१३३॥
ततो धर्मौषधं प्राप्य स कृतानुशयः[6] शयुः । ववाम विषयौत्सुक्यं महाविषमिवोल्बणम्[7] ॥१३४॥
स परित्यज्य संवेगादाहारं सशरीरकम् । जीवितान्ते तनुं हित्वा दिविजोऽभून्महर्द्धिकः ॥१३५॥
ज्ञात्वा च भवमागत्य संपूज्य मणिमालिने । मणिहारमदत्तासावुन्मि[8]षन्मणिदीधितिम् ॥१३६॥
स एष भवतः कण्ठे हारो रत्नांशुभासुरः । लक्ष्यतेऽद्यापि यो लक्ष्म्याः प्रहास इव निर्मलः ॥१३७॥
तथैवमपरं[9] राजन् यथावृत्तं[10] निगद्यते । सन्ति यद्दर्शिनोऽद्यापि वृद्धाः केचन खेचराः ॥१३८॥
आसीच्छतबलो नाम्ना भवदीयः [11]पितामहः । प्रजा राजन्वतीः कुर्वन् स्वगुणै[12]राभिगामिकैः[13] ॥१३९॥

इसके अनन्तर किसी समय* उस ललिताङ्गदेवके आभूषण सम्बन्धी निर्मलमणि अकस्मात् प्रातःकालके दीपकके समान निस्तेज हो गये ॥१॥ जन्मसे ही उसके विशाल वक्षःस्थलपर पड़ी हुई माला ऐसी म्लान हो गई मानो उसके वियोगसे भयभीत हो उसकी लक्ष्मी ही म्लान हो गई हो ॥२॥ उसके विमान सम्बन्धी कल्पवृक्ष भी ऐसे कांपने लगे मानो उसके वियोगरूपी महावायुसे कम्पित होकर भयको ही धारण कर रहे हों ॥३॥ उस समय उसके शरीरकी कान्ति भी शीघ्र ही मन्द पड़ गई थी सो ठीक ही है क्योंकि पुण्यरूपी छत्रका अभाव होनेपर उसकी छाया कहाँ रह सकती है ? अर्थात् कहीं नहीं ॥४॥ उस समय कान्तिसे रहित तथा निष्प्रभताको प्राप्त हुए ललिताङ्गदेवको देखकर ऐशानस्वर्गमें उत्पन्न हुए देव शोकके कारण उसे पुनः देखनेके लिये समर्थ न हो सके ॥५॥ ललिताङ्गदेवकी दीनता देखकर उसके सेवक लोग भी दीनताको प्राप्त हो गये सो ठीक है वृक्षके चलनेपर उसकी शाखा उपशाखा आदि क्या विशेष रूपसे नहीं चलने लगते ? अर्थात् अवश्य चलने लगते हैं ॥६॥ उस समय ऐसा मालूम होता था कि इस देवने जन्मसे लेकर आज तक जो देवों सम्बन्धी सुख भोगे हैं वे सबके सब दुःख बनकर ही आये हों ॥७॥ जिस प्रकार शीघ्र गतिवाला परमाणु एक ही समयमें लोकके अन्त तक पहुँच जाता है उसी प्रकार ललिताङ्गदेवकी कण्ठमालाकी म्लानताका समाचार भी उस स्वर्गके अन्त तक व्याप्त हो गया था ॥८॥ अथानन्तर सामाजिक जातिके देवोंने उसके समीप आकर उस समयके योग्य तथा उसका विषाद दूर करनेवाले नीचे लिखे अनेक वचन कहे ॥९॥ हे धीर, आज अपनी धीरताका स्मरण कीजिये और शोकको छोड़ दीजिये । क्योंकि जन्म, मरण, बुढ़ापा, रोग और भय किसे प्राप्त नहीं होते ॥१०॥ स्वर्गसे च्युत होना सबके लिए साधारण बात है क्योंकि आयु क्षीण होनेपर यह स्वर्ग क्षणभर भी धारण करनेके लिए

---

१ निजायुषि षण्मासावशिष्टकाले । २ –मगाद–अ०, प० । ३ भयम् । ४ क्वावतिष्ठते । ५ तदालोक्य म०, ल० । ६ तमाध्वस्त म०, ल० । ७ विवर्णत्वम् । ८ अनुभुक्तम् । ९ देवसम्बन्धि । १० दुःखत्वम् । ११–मिवागतम् म०, ल० । १२ कण्ठस्थितस्रक् । १३ ईशानकल्पान्तम् । १४ मनोहरम् । १५ समानाम् । १६ स्वर्गः । * आयुके छह माह बाकी रहनेपर ।

[1]नित्यालोकोऽप्यनालोको[2] द्युलोकः प्रतिभासते । [3]विगमात् पुण्यदीपस्य समन्तादन्धकारितः ॥१२॥
यथा रतिरभूत् स्वर्गे पुण्यपाकादनारतम् । तथैवात्रारतिर्भूयः क्षीणपुण्यस्य जायते ॥१३॥
न केवलं परिम्लानिः मालायाः सहजन्मनः । पापातपे तपत्यन्ते जन्तोर्म्लानिस्तनोरपि ॥१४॥
कम्पते हृदयं [4]पूर्वं [5]चरमं कल्पपादपः । गलति श्रीः [6]पुरा पश्चात् तनुच्छाया समं ह्रिया ॥१५॥
[7]जनापराग एवादौ जृम्भते जृम्भिका परम्[8] । वाससोरपरागश्च[9] पश्चात् [10]पापोपरागतः ॥१६॥
कामरागावभङ्गश्च[11] मानभङ्गादनन्तरम् । मनः पूर्वं तमो [12]रुन्द्धे दृशौ पश्चाददीदृशम् ॥१७॥
प्रत्यासन्नच्युतेरेवं यद्दौःस्थित्यं [13]दिवौकसः । न तत् स्यान्नारकस्यापि प्रत्यक्षं तच्च वोऽधुना ॥१८॥
यथोदितस्य सूर्यस्य निश्चितोऽस्तमयः [14]पुरा । तथा पातोन्मुखः स्वर्गे जन्तोरभ्युदयोऽप्ययम् ॥१९॥
तस्मात् मा स्म गमः शोकं कुयोन्यावर्त्तपातिनम् । धर्मे मतिं निधत्स्वार्य धर्मो हि शरणं परम् ॥२०॥
कारणान्न विना कार्यम् आर्य जातुचिदीक्ष्यते । पुण्यञ्च कारणं प्राहुः बुधाः स्वर्गापवर्गयोः ॥२१॥
तत्पुण्यसाधने जैने शासने मतिमादधत्[15] । विषादमुत्सृजानूनं[16] [17]येनानेना[18] भविष्यसि ॥२२॥
इति तद्वचनाद् धैर्यम् अवलम्ब्य स धर्मधीः । मासार्द्धं भुवने कृत्स्ने जिनवेश्मान्यपूजयत् ॥२३॥
ततोऽच्युतस्य कल्पस्य [19]जिनबिम्बानि पूजयन् । तच्चैत्यद्रुमसमूलस्थः स्वायुरन्ते [20]समाहितः ॥२४॥

समर्थ नहीं है ॥११॥ सदा प्रकाशमान रहनेवाला यह स्वर्ग भी कदाचित् अन्धकार रूप प्रतिभासित होने लगता है क्योंकि जब पुण्यरूपी दीपक बुझ जाता है तब यह सब ओरसे अन्धकारमय हो जाता है ॥१२॥ जिसप्रकार पुण्यके उदयसे स्वर्गमें निरन्तर प्रीति रहा करती है उसी प्रकार पुण्य क्षीण हो जाने पर उसमें अप्रीति होने लगती है ॥ १३ ॥ आयुके अन्त में देवोंके साथ उत्पन्न होनेवाली माला ही म्लान नहीं होती है किंतु पापरूपी आतपके तपते रहने पर जीवोंका शरीर भी म्लान हो जाता है ॥ १४ ॥ देवोंके अन्त समयमें पहले हृदय कम्पायमान होता है, पीछे कल्पवृक्ष कम्पायमान होते हैं । पहले लक्ष्मी नष्ट होती है फिर लज्जाके साथ शरीरकी प्रभा नष्ट होती है ॥ १५ ॥ पापके उदयसे पहले लोगोंमें अस्नेह बढ़ता है फिर जँभाई की वृद्धि होती है, फिर शरीरके वस्त्रोंमें भी अप्रीति उत्पन्न हो जाती है ॥१६ ॥ पहले मान भंग होता है पश्चात् विषयोंकी इच्छा नष्ट होती है । अज्ञानान्धकार पहले मनको रोकता है पश्चात् नेत्रों को रोकता है ॥ १७ ॥ अधिक कहाँ तक कहा जावे, स्वर्गसे च्युत होनेके सन्मुख देवको जो तीव्र दुःख होता है वह नारकीको भी नहीं हो सकता । इस समय उस भारी दुःखका आप प्रत्यक्ष अनुभव कर रहे हैं ॥१८॥ जिस प्रकार उदित हुए सूर्यका अस्त होना निश्चित है उसी प्रकार स्वर्गमें प्राप्त हुए जीवोंके अभ्युदयोंका पतन होना भी निश्चित है ॥१९॥ इसलिए हे आर्य, कुयोनिरूपी आवर्तमें गिरानेवाले शोकको प्राप्त न होइये तथा धर्ममें मन लगाइये, क्योंकि धर्म ही परम शरण है ॥२०॥ हे आर्य, कारणके बिना कभी कोई कार्य नहीं होता है और चूंकि पण्डितजन पुण्यको ही स्वर्ग तथा मोक्षका कारण कहते हैं ॥२१॥ इसलिए पुण्यके साधनभूत जैनधर्ममें ही अपनी बुद्धि लगाकर खेदको छोड़िये, ऐसा करनेसे तुम निश्चय ही पापरहित हो जाओगे ॥२२॥ इस प्रकार सामानिक देवोंके कहनेसे ललिताङ्गदेवने धैर्यका अवलम्बन किया, धर्ममें बुद्धि लगाई और पन्द्रह दिन तक समस्त लोकके जिन चैत्यालयोंकी पूजा की ॥२३॥ तत्पश्चात् अच्युत स्वर्गकी जिन प्रतिमाओंकी पूजा करता हुआ वह आयुके अन्तमें वहीं सावधान

---

१ सन्ततप्रकाशः । २ प्रकाशरहितः । ३ विरामात् अ०, प०, ल० । ४ आदौ । ५ पश्चात् । ६ प्रगे म०, द० । पूर्वम् । ७ जनानां विरागः । ८ पश्चात् । ९ अपगतरागः । १० पापग्रहणात् । ११ अ० समन्ताद् भङ्गः । १२ रुणद्धि । १३ -स्थं त्रिदिवौ-स०, द०, अ०, प०, ल० । १४ पुरः अ०, स०, द०, प० । पुराः ल० । १५-मादधे ल० । १६-मुत्सृजेनूनं ल० । १७ विषादत्यजनेन । १८ पापरहितः । १९-बिम्बानपूजयत ल० । २० समाधानचित्तः ।

नमस्कारपदान्युच्चैःअनुध्यायन्नसाध्वसः । साध्वसौ मुकुलीकृत्य करौ प्रायाददृश्यताम् ॥२५॥
जम्बूद्वीपे महामेरोः विदेहे पूर्वदिग्गते । या पुष्कलावतीत्यासीत् [1]जानभूमिर्मनोरमा ॥२६॥
स्वर्गभूनिर्विशेषां[2] तां पुरमुत्पलखेटकम् । भूषयत्युत्पलच्छन्नशालिवप्रादिसम्पदा ॥२७॥
वज्रबाहुः पतिस्तस्य वज्रीवाज्ञापरोऽभवत् । कान्ता वसुन्धरास्यासीद् द्वितीयेव वसुन्धरा ॥२८॥
तयोः सूनुरभूद्देवो ललिताङ्गस्ततश्च्युतः । वज्रजङ्घ इति ख्यातिं दधदन्वर्थतां गताम् ॥२९॥
स बन्धुकुमुदानन्दी प्रत्यहं वर्द्धयन् कलाः । सङ्कोचयन् द्विषत्पद्मान् ववृधे बालचन्द्रमाः ॥३०॥
आरूढयौवनस्यास्य रूपसम्पदनीदृशी । जाता कान्तिरिवापूर्णमण्डलस्य निशाकृतः ॥३१॥
शिरस्यस्य बभुर्नीला मूर्द्धजाः [4]कुञ्चितायताः । कामकृष्णभुजङ्गस्य शिशवो नु[5] विजृम्भिताः ॥३२॥
नेत्रभृङ्गे मुखाब्जे [6]स स्मितांशूत्करकेसरे । धत्ते स्म मधुरां वाणीं मकरन्दरसोपमाम् ॥३३॥
नेत्रयोर्द्वितयं रेजे संसक्तं तस्य कर्णयोः । [7]सश्रुती ताविवाश्रित्य [8]शिक्षितुं सूक्ष्मदर्शिताम् ॥३४॥
[9]उपकण्ठमसौ दध्रे हारं नीहारसच्छविम् । तारानिकरमास्येन्दोरिव सेवार्थमागतम् ॥३५॥
वक्षःस्थलेन पृथुना सोऽधाच्चन्दनचर्चिकाम् । मेरुर्निजतटीलग्नां[10] शारदीमिव चन्द्रिकाम् ॥३६॥

चित्त होकर चैत्यवृक्षके नीचे बैठ गया तथा वहीं निर्भय हो हाथ जोड़कर उच्चस्वरसे नमस्कार मन्त्रका ठीक-ठीक उच्चारण करता हुआ अदृश्यताको प्राप्त हो गया ॥२४-२५॥

इसी जम्बूद्वीपके महामेरुसे पूर्व दिशाकी ओर स्थित विदेह क्षेत्रमें जो महामनोहर पुष्कलावती नामका देश है वह स्वर्गभूमिके समान सुन्दर है । उसी देशमें एक उत्पलखेटक नामका नगर है जो कि कमलोंसे आच्छादित धानके खेतों, कोट और परिखा आदिकी शोभासे उस पुष्कलावती देशको भूषित करता रहता है ॥२६-२७॥ उस नगरीका राजा वज्रबाहु था जो कि इन्द्रके समान आज्ञा चलानेमें सदा तत्पर रहता था । उसकी रानीका नाम वसुन्धरा था । वह वसुन्धरा सहनशीलता आदि गुणोंसे ऐसी शोभायमान होती थी मानो दूसरी वसुन्धरा-पृथिवी ही हो ॥२८॥ वह ललिताङ्ग नामका देव स्वर्गसे च्युत होकर उन्हीं-वज्रबाहु और वसुन्धराके, वज्रके समान जंघा होनेसे 'वज्रजंघ' इस सार्थक नामको धारण करनेवाला पुत्र हुआ ॥२९॥ वह वज्रजंघ शत्रुरूपी कमलोंको संकुचित करता हुआ बन्धुरूपी कुमुदोंको हर्षित (विकसित) करता था तथा प्रतिदिन कलाओं (चतुराई, पक्षमें चन्द्रमाका सोलहवाँ भाग) की वृद्धि करता था इसलिये द्वितीयाके चन्द्रमाके समान बढ़ने लगा ॥३०॥ जब वह यौवन अवस्थाको प्राप्त हुआ तब उसकी रूपसंपत्ति अनुपम हो गई जैसे कि चन्द्रमा क्रम-क्रमसे बढ़कर जब पूर्ण हो जाता है तब उसकी कान्ति अनुपम हो जाती है ॥३१॥ उसके सिरपर काले कुटिल और लम्बे बाल ऐसे सुशोभित हो रहे थे मानो कामदेवरूपी काले सर्पके बढ़े हुए बच्चे ही हों ॥३२॥ वह वज्रजंघ, नेत्ररूपी भ्रमर और हास्यकी किरणरूपी केशरसे सहित अपने मुखकमलमें मकरन्दरसके समान मनोहर वाणीको धारण करता था ॥३३॥ कानोंसे मिले हुए उसके दोनों नेत्र ऐसे शोभायमान हो रहे थे मानो वे अनेक शास्त्रोंका श्रवण करनेवाले कानोंके समीप जाकर उनसे सूक्ष्मदर्शिता (पाण्डित्य और बारीक पदार्थको देखनेकी शक्ति) का अभ्यास ही कर रहे हों ॥३४॥ वह वज्रजंघ अपने कण्ठके समीप जिस हारको धारण किये हुए था वह नीहार-बरफके समान स्वच्छ कान्तिका धारक था तथा ऐसा मालूम होता था मानो मुखरूपी चन्द्रमाकी सेवाके लिये तारोंका समूह ही आया हो ॥३५॥ वह अपने विशाल वक्ष-स्थलपर चन्दनका विलेपन धारण कर रहा था जिससे ऐसा मालूम होता था मानो अपने तटपर शरद् ऋतुकी चाँदनी धारण किये हुए मेरु पर्वत ही

---

१ आगमत् । २ विषयः । जनसम्भवनिधिभूमिः, जनपद इत्यर्थः । जन्मभूमिः अ०, स०, द० । जनभूमिः ल० । ३ समानम् । ४ कुटिल । ५ इव । ६ मुखाब्जेऽस्य ल०, म० । ७ शास्त्रश्रवणसहितौ । ८ अभ्यासं कर्तुम् । ९ कण्ठस्य समीपे । १० -तटालग्नां अ०, प०, द०, स० । -तटे लग्नां म० ।

मुकुटोद्भासिनो [1]मेरुम्मन्यस्य शिरसोऽन्तिके । बाहू [2]तस्यायतौ नीलनिषधाविव रेजतुः ॥३७॥
सरिदावर्तगम्भीरा नाभिर्मध्येऽस्य निर्बभौ । नारीदृक्करिणीरोधे [3]वारीखातेव हृद्भुवा ॥३८॥
[4]रसनावेष्टितं तस्य कटीमण्डलमाबभौ । हेमवेदीपरिक्षिप्तमिव जम्बूद्रुमस्थलम् ॥३९॥
ऊरुद्वयमभात्तस्य स्थिरं वृत्तं सुसंहतम्[5] । रामामनोगजालानस्तम्भलीलां[6] समुद्वहत् ॥४०॥
जङ्घे वज्रस्थिरे नास्य [7]व्यावर्ण्यते मयाधुना । तन्नाम्नैव [8]गतार्थत्वात् पौनरुक्त्यविशङ्कया ॥४१॥
चरणद्वितयं सोऽधात् आरक्तं [9]मृदिमान्वितम् । श्रितं श्रियानपायिन्या [10]संचारीव स्थलाम्बुजम् ॥४२॥
रूपसम्पदमुष्यैषा भूषिता श्रुतसम्पदा । शरच्चन्द्रिकयेवेन्दोः मूर्तिरानन्दिनी दृशाम् ॥४३॥
[11]पदवाक्यप्रमाणेषु परं प्रावीण्यमागता । तस्य धीः सर्वशास्त्रेषु [12]दीपिकेव व्यदीप्यत ॥४४॥
स कलाः सकला [13]विद्वान् विनीतात्मा जितेन्द्रियः । राज्यलक्ष्मीकटाक्षाणां लक्ष्यतामगमत् कृती ॥४५॥
निसर्गजा गुणास्तस्य विश्वं जनमरञ्जयन् । जनानुरागः सोऽपुष्णात् महतीमस्य योग्यताम् ॥४६॥
अनुरागं सरस्वत्यां कीर्त्यां [14]प्रणयनिघ्नताम् । लक्ष्म्यां [15]वाल्लभ्यमातन्वन् विदुषां मूर्ध्नि सोऽभवत् ॥४७॥
स तथापि कृतप्रज्ञो यौवनं परमापिवान् । स्वयम्प्रभानुरागेण [16]प्रायोऽभूत् स्त्रीषु निःस्पृहः ॥४८॥

हो ॥३६॥ मुकुटसे शोभायमान उसका मस्तक ठीक मेरु पर्वतके समान मालूम होता था और उसके समीप लम्बी भुजाएँ नील तथा निषध गिरिके समान शोभायमान होती थीं ॥३७॥ उसके मध्य भागमें नदीकी भँवरके समान गम्भीर नाभि ऐसी जान पड़ती थी मानो स्त्रियोंकी दृष्टिरूपी हथिनियोंको रोकनेके लिये कामदेवके द्वारा खोदा हुआ एक गड्ढा ही हो ॥३८॥ करधनीसे घिरा हुआ उसका कटिभाग ऐसा शोभायमान था मानो सुवर्णकी वेदिकासे घिरा हुआ जम्बूवृक्षके रहनेका स्थान ही हो ॥३९॥ स्थिर गोल और एक दूसरेसे मिली हुई उसकी दोनों जांघें ऐसी जान पड़ती थीं मानो स्त्रियोंके मनरूपी हाथीको बांधनेके लिये दो स्तम्भ ही हों ॥४०॥ उसकी वज्रके समान स्थिर जंघाओं (पिंडरियों) का तो मैं वर्णन ही नहीं करता क्योंकि वह उसके वज्रजंघ नामसे ही गतार्थ हो जाता है। इतना होनेपर भी यदि वर्णन करूँ तो मुझे पुनरुक्ति दोषकी आशंका है ॥४१॥ उस वज्रजंघके कुछ लाल और कोमल दोनों चरण ऐसे जान पड़ते थे मानो अविनाशिनी लक्ष्मीसे आश्रित चलते फिरते दो स्थलकमल ही हों ॥४२॥ शास्त्रज्ञानसे भूषित उसकी यह रूपसम्पत्ति नेत्रोंको उतना ही आनन्द देती थी जितना कि शरद् ऋतुकी चांदनीसे भूषित चन्द्रमाकी मूर्ति देती है ॥४३॥ पद वाक्य और प्रमाण आदिके विषयमें अतिशय प्रवीणताको प्राप्त हुई उसकी बुद्धि सब शास्त्रोंमें दीपिकाके समान देदीप्यमान रहती थी ॥४४॥ वह समस्त कलाओंका ज्ञाता विनयी जितेन्द्रिय और कुशल था इसलिये राज्यलक्ष्मीके कटाक्षोंका भी आश्रय हुआ था, वह उसे प्राप्त करना चाहती थी ॥४५॥ उसके स्वाभाविक गुण सब लोगोंको प्रसन्न करते थे तथा उसका स्वाभाविक मनुष्य-प्रेम उसकी बड़ी भारी योग्यताको पुष्ट करता था ॥४६॥ वह वज्रजंघ सरस्वतीमें अनुराग, कीर्तिमें स्नेह और राज्यलक्ष्मीपर भोग करनेका अधिकार (स्वामित्व) रखता था इसलिये विद्वानोंमें शिरमौर समझा जाता था ॥४७॥ यद्यपि वह बुद्धिमान् वज्रजंघ उत्कृष्ट यौवनको प्राप्त हो गया था तथापि स्वयंप्रभाके अनुरागसे वह प्रायः अन्य स्त्रियोंमें निस्पृह ही रहता था ॥४८॥

---

१ आत्मानं मेरुमिव मन्यत इति मेरुम्मन्यस्तस्य । २ तस्यायितौ ल० । ३ वारीः गजवारणगर्तः 'वारी तु गजबन्धिनी' इत्यभिधानात् । ४ रशना-ल० । ५ निबिडम् । ६ बन्धस्तम्भशोभाम् । ७ विवर्ण्यते अ०, स० । ८ ज्ञातार्थत्वात् । ९ मृदुत्वम् । १० संचरणशीलम् । ११ शब्दागमपरमागमयुक्त्यागमेषु । १२ टिप्पणवत् । १३ ज्ञातवान् । १४ स्नेहाधीनताम् । १५ वल्लभत्वम् । १६ इव ।

तस्येति परमानन्दात् काले गच्छति धीमतः । स्वयंप्रभा दिवश्च्युत्वा [1]क्वोत्पन्नेत्यधुनोच्यते ॥४९॥
अथ स्वयंप्रभादेवी [2]तस्मिन् प्रच्युतिमीयुषि । तद्वियोगाच्चिरं खिन्ना चक्राह्वेव विभर्तृका ॥५०॥
[3]शुचाविव च संतापधारिणी भूरभूदभाः[4] । समुज्झितकलालापा कोकिलेव घनागमे ॥५१॥
दिव्यस्येवौषधस्यास्य विरहार्त्तां तथा सतीम् । [5]आधयोऽ[6]पीडयन् गाढं व्याधिकल्पाः[7] सुदुःसहाः ॥५२॥
ततोऽस्या दृढधर्माख्यो देवोऽन्तःपरिषद्भवः[8] । शुचं व्यपोह्य सन्मार्गे मतिमासञ्जयत्तराम्[9] ॥५३॥
सा चित्रप्रतिमेवासीत् तदा भोगेषु निःस्पृहा । विमुक्तमृतिभीशूरपुरुषस्येव शेमुषी ॥५४॥
श्रीमती सा भविष्यन्ती भव्यमालेव[10] धर्मभाक् । षण्मासान् जिनपूजायामुद्यताऽभून्मनस्विनी[11] ॥५५॥
ततः सौमनसोद्यानपूर्वदिग्जिनमन्दिरे । मूले चैत्यतरोः सम्यक् स्मरन्ती गुरुपञ्चकम् ॥५६॥
समाधिना कृतप्राणत्यागा [12]प्राच्योष्ट सा दिवः । तारकेव निशापाये सहसाऽदृश्यतां गता ॥५७॥
प्राग्वर्णिते विदेहेऽस्ति नगरी पुण्डरीकिणी । तस्याः पतिरभून्नाम्ना वज्रदन्तो महीपतिः ॥५८॥
लक्ष्मीरिवास्य कान्ताङ्गी लक्ष्मीमतिरभूत्प्रिया । स तया कल्पवल्ल्येव [13]सुरागोऽलङ्कृतो नृपः ॥५९॥
तयोः पुत्री बभूवासौ विश्रुता श्रीमतीति या । पताकेव मनोजस्य रूपसौन्दर्यलीलया[14] ॥६०॥
[illegible]मासाद्य मधुमासमिवाधिकम् । लोकस्य प्रमदं तेने बाला शशिकलेव सा ॥६१॥

इस प्रकार उस बुद्धिमान् वज्रजंघका समय बड़े आनन्दसे व्यतीत हो रहा था । अब स्वयंप्रभा महादेवी स्वर्गसे च्युत होकर कहाँ उत्पन्न हुई इस बातका वर्णन किया जाता है ॥४९॥ ललिताङ्गदेवके स्वर्गसे च्युत होनेपर वह स्वयंप्रभा देवी उसके वियोगसे चकवाके बिना चकवीकी तरह बहुत ही खेदखिन्न हुई ॥५०॥ अथवा ग्रीष्मऋतुमें जिस प्रकार पृथ्वी प्रभारहित होकर संताप धारण करने लगती है उसी प्रकार वह स्वयंप्रभा भी पतिके विरहमें प्रभारहित होकर संताप धारण करने लगी और जिस प्रकार वर्षा ऋतुमें कोयल अपना मनोहर आलाप छोड़ देती है उसी प्रकार उसने भी अपना मनोहर आलाप छोड़ दिया था– वह पतिके विरहमें चुपचाप बैठी रहती थी ॥५१॥ जिस प्रकार दिव्य औषधियोंके अभावमें अनेक कठिन बीमारियाँ दुःख देने लगती हैं उसी प्रकार ललिताङ्गदेवके अभावमें उस पतिव्रता स्वयंप्रभाको अनेक मानसिक व्यथाएँ दुःख देने लगी थीं ॥५२॥ तदनंतर उसकी अन्तःपरिषद्के सदस्य दृढधर्म नामके देवने उसका शोक दूरकर सन्मार्गमें उसकी मति लगाई ॥५३॥ उस समय वह स्वयंप्रभा चित्रलिखित प्रतिमाके समान अथवा मरणके भयसे रहित शूरवीर मनुष्यकी बुद्धि के समान भोगोंसे निस्पृह हो गई थी ॥ ५४ ॥ जो आगामी कालमें श्रीमती होनेवाली है ऐसी वह मनस्विनी (विचारशक्तिसे सहित) स्वयंप्रभा, भव्य जीवोंकी श्रेणीके समान धर्म सेवन करती हुई छह महीने तक बराबर जिनपूजा करनेमें उद्यत रही ॥ ५५ ॥ तदनन्तर सौमनस वनसम्बन्धी पूर्वदिशाके जिनमन्दिरमें चैत्यवृक्षके नीचे पञ्चपरमेष्ठियोंका भले प्रकार स्मरण करते हुए समाधिपूर्वक प्राण त्याग कर स्वर्गसे च्युत हो गई । वहांसे च्युत होते ही वह रात्रिका अन्त होने पर तारिका की तरह क्षण एकमें अदृश्य हो गई । ॥ ५६–५७ ॥

जिसका वर्णन पहले किया जा चुका है ऐसे विदेह क्षेत्रमें एक पुण्डरीकिणी नगरी है । वज्रदन्त नामक राजा उसका अधिपति था । उसकी रानीका नाम लक्ष्मीमती था जो वास्तवमें लक्ष्मीके समान ही सुन्दर शरीरवाली थी । वह राजा उस रानीसे ऐसा शोभायमान होता था जैसे कि कल्पलता से कल्पवृक्ष ॥ ५८–५९॥ वह स्वयंप्रभा उन दोनोंके श्रीमती नामसे प्रसिद्ध पुत्री हुई । वह श्रीमती अपने रूप और सौन्दर्यकी लीलासे कामदेवकी पताकाके समान मालूम होती थी ॥ ६० ॥ जिस प्रकार चैत्र मासको पाकर चन्द्रमाकी कला लोगोंको अधिक आनन्दित

१ इति प्रश्ने कृते । २ ललिताङ्गे । ३ आषाढे । ४ विगतकान्तिः । ५ मनःपीडाः । ६–पीपिडन् अ०, प०, स०, द० । ७ सदृशाः । ८ परिषत्त्रयदेवेष्वभ्यन्तरपरिषदि भवः । ९ नितरां संसक्तामकरोत् । १० समूहः । ११ प्रौढा । १२ च्युतवती । च्युङ् गताविति धातोः । १३ कल्पतरुः । पक्षे शोभनरागः । १४ शोभया ।

नखैराशपाटलैस्तस्या जिग्ये[1] कुरवकच्छविः । अशोकपल्लवच्छाया पादभासाधरीकृता[3] ॥६२॥
रणन्नूपुरमत्तालीझङ्कारमुखरीकृते । पादारविन्दे साऽधत्त लक्ष्म्या[4] शश्वत्कृतास्पदे ॥६३॥
चिरं यदुदवासेन[5] दधत्कण्टकितां[6] तनुम् । व्रतं [7]चचार [8]तेनाब्जं मन्येऽगात्तत्पदोपमाम् ॥६४॥
जङ्घे रराजतुस्तस्याः कुसुमेषोरिवेषुधी । ऊरुदण्डौ च बिभ्राते कामेभालानयष्टिताम्[9] ॥६५॥
नितम्बबिम्बमेतस्याः सरस्या इव सैकतम्[10] । लसद्दुकूलनीरेण [11]स्थगितं रुचिमानशे ॥६६॥
[12]वलिभं दक्षिणावर्त्तनाभिमध्यं बभार सा । नदीव जलमावर्त्तसंशोभिततरङ्गकम्[13] ॥६७॥
मध्यं स्तनभराक्रान्ति[14]चिन्तयेवात्ततानवम्[15] । रोमावलिच्छलेनास्या दधेऽवष्टम्भयष्टिकाम्[16] ॥६८॥
नाभिरन्ध्रादधस्तन्वीं रोमराजीमसौ दधे । [17]उपघ्नान्तरमन्विच्छोः[18] कामाहेः [19]पदवीमिव ॥६९॥
लतेवासौ मृदू बाहू दधौ [20]विटपसच्छवी । नखांशुमञ्जरी चास्या धत्ते स्म कुसुमश्रियम् ॥७०॥
आनीलचूचुकौ तस्याः कुचकुम्भौ विरेजतुः । पूर्णौ कामरसस्येव नीलरत्नाभिमुद्रितौ ॥७१॥
स्तनांशुकं शुकच्छायं तस्याः स्तनतटाश्रितम् । बभासे रुद्धपङ्केजकुड्मलं[21] शैवलं यथा ॥७२॥

करने लगती है उसी प्रकार नवयौवनको पाकर वह श्रीमती भी लोगोंको अधिक आनन्दित करने लगी थी ॥ ६१ ॥ उसके गुलाबी नखोंने कुरवक पुष्पकी कान्तिको जीत लिया था और चरणोंकी आभाने अशोकपल्लवोंकी कान्तिको तिरस्कृत कर दिया था ॥ ६२ ॥ वह श्रीमती, रुनझुन शब्द करते हुए नूपुररूपी मत्त भ्रमरोंकी झंकारसे मुखरित तथा लक्ष्मीके सदा निवास-स्थानस्वरूप चरणकमलोंको धारण कर रही थी ॥ ६३ ॥ मैं मानता हूँ कि कमलने चिरकाल तक पानीमें रहकर कण्टकित (रोमाञ्चित, पक्षमें काँटेदार) शरीर धारण किये हुए जो व्रताचरण किया था उसीसे वह श्रीमतीके चरणोंकी उपमा प्राप्त कर सका था ॥ ६४ ॥ उसकी दोनों जंघाएँ कामदेवके तरकसके समान शोभित थीं, और ऊरुदण्ड (जांघें) कामदेवरूपी हस्तीके बन्धनस्तम्भकी शोभा धारण कर रहे थे ॥ ६५ ॥ शोभायमान वस्त्ररूपी जलसे तिरोहित हुआ उसका नितम्बमण्डल किसी सरसीके बालूके टीलेके समान शोभाको प्राप्त हो रहा था ॥६६॥ वह त्रिवलियोंसे सुशोभित तथा दक्षिणावर्त्त नाभिसे युक्त मध्यभागको धारण कर रही थी इसलिये ऐसी जान पड़ती थी मानो भँवरसे शोभायमान और लहरोंसे युक्त जलको धारण करनेवाली नदी ही हो ॥६७॥ उसका मध्यभाग स्तनोंका बोझ बढ़ जानेकी चिन्तासे ही मानो कृश हो गया था और इसीलिये उसने रोमावलिके छलसे मानो सहारेकी लकड़ी धारण की थी ॥६८॥ वह नाभिरन्ध्रके नीचे एक पतली रोमराजीको धारण कर रही थी जो ऐसी जान पड़ती थी मानो दूसरा आश्रय चाहनेवाले कामदेवरूपी सर्पका मार्ग ही हो ॥६९॥ वह श्रीमती स्वयं लताके समान थी, उसकी भुजाएँ शाखाओंके समान थीं और नखोंकी किरणें फूलोंकी शोभा धारण करती थीं ॥७०॥ जिनका अग्रभाग कुछ-कुछ श्यामवर्ण है ऐसे उसके दोनों स्तन ऐसे शोभायमान होते थे मानो कामरससे भरे हुए और नीलरत्नकी मुद्रासे अंकित दो कलश ही हों ॥७१॥ उसके स्तनतटपर पड़ी हुई हरे रंगकी चोली ऐसी शोभायमान हो रही थी मानो कमलमुकुलपर पड़ा हुआ शैवाल

१ ईषदरुणैः । 'श्वेतरक्तस्तु पाटलः' । २ अरुणसैरेयकः । ३ अधःकृता । ४ लक्ष्मीशश्व –अ०, स० । ५ उदके आवासः उदवासः तेन । ६ रोमहर्षिताम् । पक्षे सञ्जातकण्टकाम् । 'रोमहर्षे च कण्टकः' इत्यभिधानात् । ७ चचारि म०, ल० । ८ व्रतेन । ९ बन्धस्तम्भताम् । १० पुलिनम् । ११ आच्छादितम् । १२ वलयः अस्य सन्तीति वलिभः तम् । वलितं अ०, प०, स०, द० । १३ –भितारङ्गकम् द०, स०, म०, ल०, अ० । १४ आक्रमणम् । १५ स्वीकृततनुत्वम् । १६ आधारयष्टिम् । १७ आश्रयान्तरम् । 'स्यादुपघ्नोऽन्तिकाश्रये' इत्यभिधानात् । १८ अन्वेष्टुमिच्छोः गवेषणशीलस्य । १९ मार्गः । २० शाखा । २१ –कुड्मलं अ०, स०, द०, म०, ल० ।

हारस्तस्याः स्तनोपान्ते [1]नीहाररुचिनिर्मलः । श्रियमाधत्त फेनस्य कञ्जकुट्[2]मलसंस्पृशः ॥७३॥
ग्रीवास्या [3]राजिभिर्भेजे [4]कम्बुबन्धुरविभ्रमम् । [5]स्रस्तावंसौ च हंसीव पक्षती सा दधे शुचौ[6] ॥७४॥
मुखमस्या दधे चन्द्रपद्मयोः श्रियमक्रमात्[7] । नेत्रानन्दि स्मितज्योत्स्नं स्फुरद्दन्तांशुकेसरम् ॥७५॥
स्वकलावृद्धिहानिभ्यां चिरं चान्द्रायणं तपः । कृत्वा नूनं शशी प्रापत् तद्वक्त्रस्योपमानताम् ॥७६॥
कर्णौ सहोत्पलौ[8] तस्या नेत्राभ्यां लङ्घितौ भृशम् । स्वायत्यारोधिनं को वा सहेतोपान्तवर्त्तिनम् ॥७७॥
कर्णपूरोत्पलं तस्या नेत्रोपान्ते स्म लक्ष्यते । [9]दिदृक्षमाणमस्येव शोभां स्वश्रीविहासिनीम्[10] ॥७८॥
मुखपङ्कजसंसक्तानलकालीन् [11]बभार सा । मलिनानपि नो धत्ते कः श्रितानन्पायिनः ॥७९॥
[12]धम्मिलभारमास्रस्तं[13] सा दधे मृदुकुञ्चितम् । चन्दनद्रुमवल्लीव कृष्णाहेर्भोग[14]मायतम् ॥८०॥
इत्यसौ मदनोन्मादजनिकां[15] रूपसम्पदम् । बभार स्वर्वधूरूपसारांशैरिव निर्मिताम् ॥८१॥
लक्ष्मीं चलां विनिर्माय यदागो वेधसार्जितम् । [16]तन्निर्माणेन तन्नूनं तेन प्रक्षालितं तदा ॥८२॥
पितरौ तां प्रपश्यन्तौ नितरां प्रीतिमापतुः । कलामिव सुधासूतेः जनतानन्दकारिणीम् ॥८३॥

ही हो ॥७२॥ उसके स्तनोंके अग्रभागपर पड़ा हुआ बरफके समान श्वेत और निर्मल हार कमल-कुड्मल (कमल पुष्पकी बौंड़ी) को छूनेवाले फेनकी शोभा धारण कर रहा था ॥७३॥ अनेक रेखाओंसे उपलक्षित उसकी ग्रीवा रेखासहित शंखकी शोभा धारण कर रही थी तथा वह स्वयं मनोहर कन्धोंको धारण किये हुए थी जिससे ऐसी मालूम होती थी मानो निर्मल पंखोंके मूलभागको धारण किये हुए हंसी हो ॥७४॥ नेत्रोंको आनन्द देनेवाला उसका मुख एक ही साथ चन्द्रमा और कमल दोनोंकी शोभा धारण कर रहा था क्योंकि वह हास्यरूपी चाँदनीसे चन्द्रमा-के समान जान पड़ता था और दाँतोंकी किरणरूपी केशरसे कमलके समान मालूम होता था ॥७५॥ चन्द्रमाने, अपनी कलाओंकी वृद्धि और हानिके द्वारा चिरकालतक चान्द्रायण व्रत किया था इसलिये मानो उसके फल स्वरूप ही वह श्रीमतीके मुखकी उपमाको प्राप्त हुआ था ॥७६॥ उसके नेत्र इतने बड़े थे कि उन्होंने उत्पल धारण किये हुए कानोंका भी उल्लंघन कर दिया था सो ठीक ही है अपना विस्तार रोकनेवालेको कौन सह सकता है ? भले ही वह समीपवर्ती क्यों न हो ॥७७॥ उसके नेत्रोंके समीप कर्णफूलरूपी कमल ऐसे दिखाई देते थे मानो अपनी शोभापर हँसनेवाले नेत्रोंकी शोभाको देखना ही चाहते हैं ॥७८॥ वह श्रीमती अपने मुखकमलके ऊपर (मस्तकपर) काली अलकावलीको धारण किये हुए थी सो ठीक ही है, आश्रयमें आये हुए निरुपद्रवी मलिन पदार्थोंको भी कौन धारण नहीं करता ? अर्थात् सभी करते हैं ॥७९॥ वह कुछ नीचेकी ओर लटके हुए, कोमल और कुटिल केशपाशको धारण कर रही थी जिससे ऐसी जान पड़ती थी मानो काले सर्पके लम्बायमान शरीरको धारण किये हुए चन्दनवृक्षकी लता ही हो ॥८०॥ इस प्रकार वह श्रीमती कामदेवको भी उन्मत्त बनानेवाली रूपसम्पत्तिको धारण करनेके कारण ऐसी मालूम होती थी मानो देवांगनाओंके रूपके सारभूत अंशोंसे ही बनाई गई हो ॥८१॥ ऐसा मालूम पड़ता था कि ब्रह्माने लक्ष्मीको चंचल बनाकर जो पाप उपार्जन किया था वह उसने श्रीमतीको बनाकर धो डाला था ॥८२॥ चन्द्रमाकी कलाके समान जनसमूहको आनन्द देनेवाली उस श्रीमतीको देख-देखकर उसके माता-पिता अत्यन्त प्रीतिको प्राप्त होते थे ॥८३॥

---

१ चन्द्रः । २ –कुड्मल –अ०, स०, द०, म०, ल० । ३ रेखाभिः । ४ शङ्खस्य ग्रीवाविलासम् । कम्बुकन्धरविभ्रमम् प०, द०, म०, ट० । ५ ईषन्नतौ । शस्तावंसौ द०, स०, ल० । ६ सामुद्रिकलक्षणोक्तदोषरहितौ, पक्षे शुभ्रौ । ७ युगपत् । ८ कर्णाभरणयुक्तौ । ९ 'स्मृदृश' इति तङो विधानात् आनश् । १० हसन्तीम् । ११ –न्कामलकालीं अ०, प०, स०, द० । १२ कचबन्धः । १३ आनतम् । १४ शरीरम् । १५ जननीम् । १६ श्रीमन्निर्मापणेन ।

अथान्येद्युरसौ सुप्ता हर्म्ये हंसांशुनिर्मले[1]। [2]परार्ध्यरत्नसंशोभे स्वर्विमानापहासिनि ॥८४॥
तदैतद्भवत्तस्याः [3]संविधानकमीदृशम्। यशोधरगुरोस्तस्मिन् पुरे कैवल्यसंभवे[4] ॥८५॥
मनोहराख्यमुद्यानम् अध्यासीनं तमर्चितुम्। देवाः संप्रापुरारूढविमानाः सह सम्पदा ॥८६॥
पुष्पवृष्टिर्दिशो रुद्ध्वा[5] तदापप्तत् सहालिभिः। स्वर्गलक्ष्म्येव तं द्रष्टुं प्रहिता नयनावली ॥८७॥
मन्दमाधूतमन्दारसान्द्रकिञ्जल्कपिञ्जरः। पुञ्जितालिरुता मञ्जुः[6] आगुञ्जन् मरुदाववौ ॥८८॥
दध्वनद्दुन्दुभिध्वानै[7]: अरुध्यन्त दिशो दश। सुराणां प्रमदोद्भूतो महान् [8]कलकलोऽप्यभूत् ॥८९॥
सा तदा तद्ध्वनिं श्रुत्वा निशान्ते सहसोत्थिता। भेजे हंसीव संत्रासं श्रुतपर्जन्यनिःस्वना[9] ॥९०॥
देवागमे क्षणात्तस्याः प्राग्जन्मस्मृतिराशु भूत्[10]। सा स्मृत्वा ललिताङ्गं तं मुमूर्च्छोत्कण्ठिता मुहुः ॥९१॥
सखीभिरथ सोपायम् आश्वास्य व्यजनानिलैः। [11]प्रत्यापत्तिं समानीता साभूद् भूयोऽप्यवाङ्मुखी[12] ॥९२॥
मनोहरं प्रभोद्भासि सुन्दरं [13]चारुलक्षणम्। तद्वपुर्मनसीवास्या लिखितं निर्बभौ तदा ॥९३॥
परिपृष्टापि साशङ्कं[14] सखीभिर्जोषमास्त[15] सा। मूकीभूता किलाप्राप्तेः तस्य मौनं मतेऽस्त्यलम् ॥९४॥
ततः पर्याकुलाः सख्यः तमुदन्तमशेषतः। गत्वा पितृभ्यामाचख्युः सख्यो [16]वर्षधरैः समम् ॥९५॥

तदनन्तर किसी एक दिन वह श्रीमती सूर्यकी किरणोंके समान निर्मल, महामूल्य रत्नोंसे शोभायमान और स्वर्गविमानको भी लज्जित करनेवाले राजभवनमें सो रही थी ॥ ८४ ॥ उसी दिन उससे सम्बन्ध रखनेवाली यह विचित्र घटना हुई कि उसी नगरके मनोहर नामक उद्यानमें श्रीयशोधर गुरु विराजमान थे उन्हें उसी दिन केवलज्ञान प्राप्त हुआ इसलिये स्वर्गके देव अपनी विभूतिके साथ विमानोंपर आरूढ़ होकर उनकी पूजा करनेके लिये आये थे ॥ ८५-८६ ॥ उस समय भ्रमरोंके साथ साथ, दिशाओंको व्याप्त करनेवाली जो पुष्पवर्षा हो रही थी वह ऐसी सुशोभित होती थी मानो यशोधर महाराजके दर्शन करनेके लिये स्वर्गलक्ष्मी द्वारा भेजी हुई नेत्रोंकी परम्परा ही हो ॥ ८७ ॥ उस समय मन्द मन्द हिलते हुए मन्दारवृक्षोंकी सघन केशरसे कुछ पीला हुआ तथा इकट्ठे हुए भ्रमरोंकी गुंजारसे मनोहर वायु शब्द करता हुआ बह रहा था ॥ ८८ ॥ और बजते हुए दुन्दुभि बाजोंके शब्दोंसे दशों दिशाओंको व्याप्त करता हुआ देवोंके हर्षसे उत्पन्न होनेवाला बड़ा भारी कोलाहल हो रहा था ॥ ८९ ॥ वह श्रीमती प्रातःकालके समय अकस्मात् उस कोलाहलको सुनकर उठी और मेघोंकी गर्जना सुनकर डरी हुई हंसिनीके समान भयभीत हो गई ॥ ९० ॥ उस समय देवोंका आगमन देखकर उसे शीघ्र ही पूर्वजन्मका स्मरण हो आया, जिससे वह ललिताङ्गदेवका स्मरण कर बारबार उत्कण्ठित होती हुई मूर्च्छित हो गई ॥ ९१ ॥ तत्पश्चात् सखियोंने अनेक शीतलोपचार और पङ्खाकी वायुसे आश्वासन देकर उसे सचेत किया परन्तु फिर भी उसने अपना मुँह ऊपर नहीं उठाया ॥ ९२ ॥ उस समय मनोहर, प्रभासे देदीप्यमान, सुन्दर और अनेक उत्तम उत्तम लक्षणोंसे सहित उस ललिताङ्गका शरीर, श्रीमतीके हृदयमें लिखे हुएके समान शोभायमान हो रहा था ॥ ९३ ॥ अनेक आशंकाएं करती हुई सखियोंने उससे उसका कारण भी पूछा परन्तु वह चुपचाप बैठी रही। ललिताङ्गकी प्राप्ति पर्यन्त मुझे मौन रखना ही श्रेयस्कर है ऐसा सोचकर मौन रह गई ॥ ९४ ॥ तदनन्तर घबड़ाई हुई सखियोंने पहरेदारोंके साथ जाकर उसके माता पितासे सब वृत्तान्त कह सुनाया

---

१ हंसांशुनिर्मले द०, ट०। हंसपक्षवच्छुभ्रे। २ परार्ध्यम् उत्कृष्टम्। ३ सामग्री। ४ उत्पन्ने सति। ५ रुद्धा ल०। ६ मनोज्ञः। ७ –नैरारुन्धंस्तद्दिशो दश अ०, ल०। ८ जयजयारावकोलाहलः। ९ अशनिः। [रसदब्दः गर्जन्मेघ इत्यर्थः] १० तिरन्वभूत् अ०। ११ पूर्वस्थितिम्। १२ अधोमुखी। १३ हलकुलिशादि। १४ आशङ्कया सहितं यथा भवति तथा। १५ तूष्णीमास्त। १६ प्रातिरयन्तम्। १७ वृद्धकञ्चुकीभिः।

तद्वार्ताकर्णनात्तूर्ण[1] तदभ्यर्ण[2]मुपागतौ । पितरौ तदवस्थाञ्च [3]दृष्ट्वैनां शुचमीयतुः ॥९६॥
अङ्ग पुत्रि [4]परिष्वङ्गं विधेह्युत्सङ्ग[5]मेहि नौ[6] । इति [7]निर्बध्यमानापि [8]मोमुह्येव यदास्त सा ॥९७॥
लक्ष्मीमतिमथोवाच प्रभुरिङ्गितकोविदः । जाता ते पुत्रिका तन्वी सेयमापूर्णयौवना ॥९८॥
अस्याः सुदति पश्येदं वपुरत्यन्तकान्तिमत् । अनीदृशमभूत् स्वर्गनारीभिरपि दुर्लभम् ॥९९॥
ततो विकृ[9]तिरेषास्या न दुष्यत्यद्य सुन्दरि । तेन मा स्म भयं देवि शङ्कमानान्यथा गमः ॥१००॥
प्राग्जन्मानुभवः कोऽपि नूनमस्या हृदि स्थितः । संस्कारान् प्राक्तनान् प्रायः स्मृत्वा मूर्च्छन्ति जन्तवः ॥१०१॥
इति ब्रुवाण एवासौ उत्तस्थौ सह कान्तया । नियोज्य पण्डितां धात्रीं कन्याश्वासनसंविधौ ॥१०२॥
तदा कार्यद्वयं तस्य युगपत् समुपस्थितम्[10] । कैवल्यं स्वगुरोश्चक्रसंभूतिश्चायुधालये ॥१०३॥
तत्कार्यद्वैतमासाद्य बभूव क्षणमाकुलः । प्राग्विधेयं किमत्रेति स निश्चेतुमशक्नुवन् ॥१०४॥
ततः किमत्र कर्त्तव्यम् इत्यसौ [11]संप्रधारयन् । गुरोः कैवल्यसंपूजाम् आदौ निश्चितवान् सुधीः ॥१०५॥
यतो [12]दूरात् समासन्नं कार्यं [13]कार्यं मनीषिभिः । [14]व्यतिपाति ततस्तस्मात् प्रधानं कार्यमाचरेत् ॥१०६॥
ततः श्रेयः शुभं तस्मात् तस्माच्च विपुलोदयम् । धर्मात्मकञ्च यत्कार्यम् अर्हत्पूजादिलक्षणम् ॥१०७॥

॥ ९५ ॥ सखियोंकी बात सुनकर उसके माता पिता शीघ्र ही उसके पास गये और उसकी वह अवस्था देखकर शोकको प्राप्त हुए ॥ ९६ ॥ 'हे पुत्री, हमारा आलिंगन कर, गोदमें आ' इस प्रकार समझाये जाने पर भी जब वह मूर्च्छित हो चुपचाप बैठी रही तब समस्त चेष्टाओं और मनके विकारोंको जाननेवाले वज्रदन्त महाराज रानी लक्ष्मीमतीसे बोले—हे तन्वि, अब यह तुम्हारी पुत्री पूर्ण यौवन अवस्थाको प्राप्त हो गई है ॥ ९७-९८ ॥ हे सुन्दर दाँतोंवाली, देख; यह इसका शरीर कैसा अनुपम और कान्तियुक्त हो गया है। ऐसा शरीर स्वर्गकी दिव्यांगनाओंको भी दुर्लभ है ९९ ॥ इसलिये हे सुन्दरि, इस समय इसका यह विकार कुछ भी दोष उत्पन्न नहीं कर सकता। अतएव हे देवि, तू अन्य रोग आदिकी शंका करती हुई व्यर्थ ही भयको प्राप्त न हो ॥ १०० ॥ निश्चय ही आज इसके हृदयमें कोई पूर्वभवका स्मरण हो आया है क्योंकि संसारी जीव प्रायः पुरातन संस्कारोंका स्मरण कर मूर्च्छित हो ही जाते हैं ॥ १०१ ॥ यह कहते कहते वज्रदन्त महाराज कन्याको आश्वासन देने के लिये पण्डिता नामक धायको नियुक्त कर लक्ष्मीमतीके साथ उठ खड़े हुए ॥ १०२ ॥ कन्याके पाससे वापिस आनेपर महाराज वज्रदन्तके सामने एक साथ दो कार्य आ उपस्थित हुए। एक तो अपने पूज्य पिता यशोधर महाराजको केवलज्ञानकी प्राप्ति हुई थी अतएव उनकी पूजाके लिये जाना और दूसरा आयुधशालामें चक्ररत्न उत्पन्न हुआ था अतएव दिग्विजयके लिये जाना ॥ १०३ ॥ महाराज वज्रदन्त एक साथ इन दोनों कार्योंका प्रसंग आनेपर निश्चय नहीं कर सके कि इनमें पहले किसे करना चाहिये और इसीलिये वे क्षणभरके लिए व्याकुल हो उठे ॥ १०४ ॥ तत्पश्चात् 'इनमें पहले किसे करना चाहिये' इस बातका विचार करते हुए बुद्धिमान् वज्रदन्तने निश्चय किया कि सबसे पहले गुरुदेव-यशोधर महाराजके केवलज्ञानकी पूजा करनी चाहिये ॥ १०५ ॥ क्योंकि बुद्धिमान् पुरुषोंको दूरवर्ती कार्यकी अपेक्षा निकटवर्ती कार्य ही पहले करना चाहिये, उसके बाद दूरवर्ती मुख्य कार्य करना चाहिये ॥ १०६॥ इसलिये जिस अर्हन्त पूजासे पुण्य होता है, जिससे बड़े बड़े अभ्युदय प्राप्त होते हैं, तथा जो धर्ममय आवश्यक कार्य हैं ऐसे अर्हन्तपूजा आदि प्रधान कार्यको ही पहले करना चाहिये ॥ १०७ ॥

१ शीघ्रम् । २ समीपम् । ३ तां दृष्ट्वा प०, द० । ४ आलिङ्गनम् । ५ अङ्कम् । ६ आवयोः । ७ निर्बाध्यमानापि अ०, प० । निर्बाध्यमानाऽपि द० । ८ मोमुह्यते इति मोमुह्या । मोमुह्येव ल० । मोमुहैव द०, ट० । ९ चित्तविकृतिः । १० आगतम् । ११ विचारयन् । १२ दूरादासन्नम् आगतं स्थिरमित्यर्थः । १३ कर्तव्यम् । १४ विनश्वरम ।

मनसीत्याकलय्या[1]सौ यशोधरगुरोः पराम् । पूजां कर्तु[2]समुत्तस्थौ नृपः पुण्यानुबन्धिनीम् ॥१०८॥
ततः पृतनया सार्द्धम् उपसृत्य जगद्गुरुम् । पूजयामास संप्रीतिप्रोत्फुल्लमुखपङ्कजः ॥१०९॥
तत्पादौ प्रणमन्नेव सोऽलब्धावधिमिद्धधीः । विशुद्धपरिणामेन भक्तिः किन्न फलिष्यति ॥११०॥
तेनाबुद्धान्युतेन्द्रत्वम् आत्मनः प्राक्तने भवे । ललिताङ्गप्रियायाश्च दुहितृत्वमिहात्मजा ॥१११॥
कृताभिवन्दनस्तस्मान्[3] निवृत्य [4]कृतधीः सुताम् । पण्डितायै समर्प्याशु प्रतस्थे दिग्जयाय सः ॥११२॥
चक्रपूजां ततः कृत्वा चक्री [5]शक्रसमद्युतिः । प्रास्थितासौ दिशो जेतुं ध्वजिन्या षडङ्गया ॥११३॥
अथ पण्डितिकान्येद्युः निपुणा निपुणं वचः । श्रीमत्याः प्रतिबोधाय रहस्येवमभाषत ॥११४॥
[6]अशोकवनिकामध्ये चन्द्रकान्तशिलातले । स्थित्वा सस्नेहमङ्गानि स्पृशन्ती मृदुपाणिना ॥११५॥
मुखपङ्कजसंसर्पद्दशनांशुजलप्लवैः । तस्या हृदयसंतापमिव निर्वापयन्त्यसौ ॥११६॥
अहं पण्डितिका सत्यं पण्डिता [7]कार्ययुक्तिषु । जननीनिर्विशेषास्मि तव प्राणसमा सखी ॥११७॥
ततो ब्रूहि [8]मिथः कन्ये धन्ये त्वं मौनकारणम् । नामयो गोपनीयो हि जनन्या इति विश्रुतम् ॥११८॥
मया सुनिपुणं चित्ते पर्यालोचितमीहितम् । तवासीन्न तु विज्ञातं तन्मे वद पतिंवरे ॥११९॥
किमेष मदनोन्मादः किमालि ग्रहविप्लवः[9] । प्रायो हि यौवनारम्भे जृम्भते मदनग्रहः ॥१२०॥

मनमें ऐसा विचार कर वह राजा वज्रदन्त पुण्य बढ़ानेवाली यशोधर महाराजकी उत्कृष्ट पूजा करनेके लिये उठ खड़ा हुआ ॥१०८॥ तदनन्तर सेनाके साथ जाकर उसने जगद्गुरु यशोधर महाराजकी पूजा की। पूजा करते समय उसका मुखकमल अत्यन्त प्रफुल्लित हो रहा था ॥१०९॥ प्रकाशमान बुद्धिके धारक वज्रदन्तने ज्योंही यशोधर गुरुके चरणोंमें प्रणाम किया त्योंही उसे अवधिज्ञान प्राप्त हो गया, सो ठीक ही है। विशुद्ध परिणामोंसे की गई भक्ति क्या फलीभूत नहीं होगी? अथवा क्या क्या फल नहीं देगी? ॥११०॥ उस अवधिज्ञानसे राजाने जान लिया कि पूर्वभवमें मैं अच्युत स्वर्गका इन्द्र था और यह मेरी पुत्री श्रीमती ललिताङ्गदेवकी स्वयंप्रभा नामक प्रिया थी ॥१११॥ वह बुद्धिमान् वज्रदन्त वन्दना आदि करके वहाँसे लौटा और पुत्री श्रीमतीको पण्डिता धायके लिये सौंपकर शीघ्र ही दिग्विजयके लिये चल पड़ा ॥११२॥ इन्द्रके समान कान्तिका धारक वह चक्रवर्ती चक्ररत्नकी पूजा करके हाथी घोड़ा रथ पियादे देव और विद्याधर इस प्रकार षडङ्ग सेनाके साथ दिशाओंको जीतनेके लिये गया ॥११३॥

तदनन्तर अतिशय चतुर पण्डिता नामकी धाय किसी एक दिन एकान्तमें श्रीमतीको समझानेके लिये इस प्रकार चातुर्यसे भरे वचन कहने लगी ॥११४॥ वह उस समय अशोकवाटिकाके मध्यमें चन्द्रकान्त शिलातल पर बैठी हुई थी तथा अपने कोमल हाथोंसे [सामने बैठी हुई] श्रीमतीके अंगोंका बड़े प्यारसे स्पर्श कर रही थी। बोलते समय उसके मुख-कमलसे जो दाँतोंकी किरणरूपी जलका प्रवाह बह रहा था उससे ऐसी मालूम होती थी मानो वह श्रीमतीके हृदयका संताप ही दूर कर रही हो ॥११५-११६॥ वह कहने लगी—हे पुत्रि, मैं समस्त कार्योंकी योजनामें पण्डिता हूँ—अतिशय चतुर हूँ। इसलिये मेरा पण्डिता यह नाम सत्य है—सार्थक है। इसके सिवाय मैं तुम्हारी माताके समान हूँ और प्राणोंके समान सदा साथ रहनेवाली प्रियसखी हूँ ॥११७॥ इसलिये हे धन्य कन्ये, तू यहाँ मुझसे अपने मौनका कारण कह। क्योंकि यह प्रसिद्ध है कि रोग मातासे नहीं छिपाया जाता ॥११८॥ मैंने अपने चित्तमें तेरी इस चेष्टाका अच्छी तरहसे विचार किया है परन्तु मुझे कुछ भी मालूम नहीं हुआ इसलिये हे कन्ये, ठीक ठीक कह ॥११९॥ हे सखि, क्या यह कामका उन्माद है अथवा किसी भूतादिका उपद्रव है? प्रायः करके यौवनके

१ विचार्य । २ उद्युक्तोऽभूत् । ३ जिनस्थानात् । ४ सम्पूर्णबुद्धिः । ५ इन्द्रसमतेजाः । ६ अशोकवनम् । ७ कार्यघटनासु । ८ रहसि । ९ पीडा ।

इति पृष्टा तया किञ्चित् आनम्य मुखपङ्कजम् । पद्मिनीव दिनापाये परिम्लानं महोत्पलम् ॥१२१॥
जगाद श्रीमती सत्यं न शक्तास्मीदृशं वचः । कस्यापि पुरतो वक्तुं [1]लज्जाविवशमानसा ॥१२२॥
किन्तु तेऽद्य पुरो नाहं जिहेम्यार्त्ता लपन्त्यलम् । जननीनिर्विशेषा त्वं चिरं परिचिता च मे ॥१२३॥
तद् वक्ष्ये शृणु सौम्याङ्गि महतीयं कथा मम । मया प्राग्जन्मचरितं स्मृतं देवागमेक्षणात् ॥१२४॥
तत्कीदृशं कथा वेति सर्वं वक्ष्ये सविस्तरम्। स्वप्नानुभूतमिव मे स्मृतौ तत्प्रतिभासते ॥१२५॥
अहं पूर्वभवेऽभूवं धातकीखण्डनामनि । महाद्वीपे सरोजाक्षि स्वर्गभूभ्यतिशायिनि ॥१२६॥
तत्रास्ति मन्दरात् पूर्वाद् विदेहे [2]प्रत्यगाश्रिते । विषयो गन्धिलाभिख्यो यः कुरूनपि निर्जयेत् ॥१२७॥
तत्रासीत् पाटलीग्रामे नागदत्तो वणिक्सुतः । सुमतिस्तस्य कान्ताभूत् तयोर्जाताः सुता इमे ॥१२८॥
नन्दश्च नन्दिमित्रश्च नन्दिषेणाह्वयः परः । वरसेनो जयादिश्च सेनस्तत्सूनवः क्रमात् ॥१२९॥
पुत्रिके च तयोर्जाते [3]मदनश्रीपदादिके । कान्ते तयोरहं जाता निर्नामेति कनीयसी ॥१३०॥
कदाचित् कानने रम्ये [4]चरिते चारणादिके । गिरावम्बरपूर्वेऽहं तिलके पिहितास्रवम् ॥१३१॥
नानर्द्धिभूषणं दृष्ट्वा मुनिं सावधिबोधनम् । इदमप्राक्षमानम्य [5]संबोध्य भगवन्निति ॥१३२॥
केनास्मि कर्मणा जाता कुले [6]दौर्गत्यशालिनि । ब्रूहीदमतिनिर्विण्णां[7] [8]दीनामनुगृहाण माम् ॥१३३॥
इति पृष्टो मुनीन्द्रोऽसौ जगौ मधुरया गिरा । इहैव विषयेऽमुत्र[9] पुत्रि जातासि कर्मणा ॥१३४॥

प्रारम्भमें कामरूपी ग्रहका उपद्रव हुआ ही करता है ॥१२०॥ इस तरह पण्डिता धायके द्वारा पूछे जानेपर श्रीमतीने अपना मुरझाया हुआ मुख इस प्रकार नीचा कर लिया जिस प्रकार कि सूर्यास्तके समय कमलिनी मुरझाकर नीचे झुक जाती है। वह मुख नीचा करके कहने लगी–यह सच है कि मैं ऐसे वचन किसीके भी सामने नहीं कह सकती क्योंकि मेरा हृदय लज्जासे पराधीन हो रहा है। ॥१२१-१२२॥ किंतु आज मैं तुम्हारे सामने कहती हुई लज्जित नहीं होती हूँ उसका कारण भी है कि मैं इस समय अत्यन्त दुःखी हो रही हूँ और आप हमारी माताके तुल्य तथा चिरपरिचिता हैं ॥१२३॥ इसलिये हे मनोहराङ्गि, सुन, मैं कहती हूँ। यह मेरी कथा बहुत बड़ी है। आज देवोंका आगमन देखनेसे मुझे अपने पूर्वभवके चरित्रका स्मरण हो आया है ॥१२४॥ वह पूर्व भवका चरित्र कैसा है अथवा वह कथा कैसी है? इन सब बातोंको मैं विस्तारके साथ कहती हूँ। वह सब विषय मेरी स्मृतिमें स्वप्नमें अनुभव कियेके समान स्पष्ट प्रतिभासित हो रहा है ॥१२५॥

हे कमलनयने, इसी मध्यलोकमें एक धातकीखण्ड नामका महाद्वीप है जो अपनी शोभासे स्वर्गभूमिको तिरस्कृत करता है। इस द्वीपके पूर्व मेरुसे पश्चिम दिशाकी ओर स्थित विदेह क्षेत्रमें एक गन्धिला नामका देश है जो कि अपनी शोभासे देवकुरु और उत्तरकुरुको भी जीत सकता है। उस देशमें एक पाटली नामका ग्राम है उसमें नागदत्त नामका एक वैश्य रहता था उसकी स्त्रीका नाम सुमति था और उन दोनोंके क्रमसे नन्द, नन्दिमित्र, नन्दिषेण, वरसेन, और जयसेन ये पाँच पुत्र तथा मदनकान्ता और श्रीकान्ता नामकी दो पुत्रियाँ उत्पन्न हुईं। पूर्व भवमें मैं इन्हींके घर निर्नामा नामकी सबसे छोटी पुत्री हुई थी ॥ १२६–१३०॥ किसी दिन मैंने चारणचरित नामक मनोहर वनमें अम्बरतिलक पर्वत पर विराजमान अवधिज्ञानसे सहित तथा अनेक ऋद्धियोंसे भूषित पिहितास्रव नामक मुनिराजके दर्शन किये। दर्शन और नमस्कार कर मैंने उनसे पूछा कि–हे भगवन्, मैं किस कर्मसे इस दरिद्र कुलमें उत्पन्न हुई हूँ। हे प्रभो, कृपा कर इसका कारण कहिये और मुझ दीन तथा अतिशय उद्विग्न स्त्री-जन पर अनुग्रह कीजिये ॥ १३१–१३३॥ इस प्रकार पूछे जाने पर वे मुनिराज मधुर वाणीसे कहने लगे कि हे पुत्रि, पूर्व भवमें तू अपने कर्मोदयसे इसी देशके पललपर्वत नामक ग्राममें देविलग्राम नामक

१ लज्जाधीनम्। २ अपरम्। ३ मदनकान्ता-श्रीकान्तेत्यर्थः। ४ चारणचरिते। ५ भो भगवन्नित्यभिमुखीकृत्य। ६ दारिद्र्य। ७ उद्वेगवतीम्। ८ अनाथाम्। ९ पूर्वजन्मनि। 'प्रेत्यामुत्र भवान्तरे'।

पलालपर्वतग्रामे देविलग्रामकूटकात् । सुमतेरुदरे पुत्री धनश्रीरिति विश्रुता ॥१३५॥
अन्येद्युश्च त्वमज्ञानात् शुनः पूति कलेवरम् । मुनेः समाधिगुप्तस्य पठतोऽन्ते न्यधा[1] मुदा ॥१३६॥
मुनिस्तद्वलोक्यासौ त्वामित्यन्वशिषत्तदा । त्वयेदं बालिके कर्म [2]विरूपकमनुष्ठितम् ॥१३७॥
फलिष्यति विपाके ते दुरन्तं कटुकं फलम् । दहत्यधिकमन्यस्मिन् [3]माननीयविमानता ॥१३८॥
इति ब्रुवन्तमभ्येत्य क्षमामग्राहयस्तदा[4] । भगवन्निदमज्ञानात् क्षमस्व कृतमित्यरम्[5] ॥१३९॥
तेनोपशमभावेन जातात्पं पुण्यमाश्रिता । मनुष्यजन्मनीहाद्य कुले [6]परमदुर्गते ॥१४०॥
[7]ततः [8]कल्याणि [9]कल्याणं गृहाणोपोषितं[10] व्रतम् । [11]जिनेन्द्रगुणसम्पत्तिं श्रुतज्ञानमपि [12]क्रमात् ॥१४१॥
कृतानां कर्मणामार्ये सहसा [13]परिपाचनम् । तपोऽनशनमाम्नातं[14] विधियुक्तमुपोषितम् ॥१४२॥
तीर्थकृत्त्वस्य पुण्यस्य कारणानीह[15] षोडश । कल्याणान्यत्र पञ्चैव प्रातिहार्याष्टकं तथा ॥१४३॥
[16]अतिशेषाश्चतुस्त्रिंशत् इमानुद्दिश्य सद्गुणान् । या साऽनुष्ठीयते भव्यैः सम्पज्जिनगुणादिका ॥१४४॥
उपवासदिनान्यत्र[17] त्रिषष्टिर्मुनिभिर्मता । श्रुतज्ञानोपवासस्य स्वरूपमधुनोच्यते ॥१४५॥
[18]अष्टाविंशतिमप्येकादश द्वौ च यथाक्रमम् । अष्टाशीतिमथैकञ्च चतुर्दश च [19]पञ्च च ॥१४६॥

पटेलकी सुमति स्त्रीके उदरसे धनश्री नामसे प्रसिद्ध पुत्री हुई थी ॥ १३४-१३५ ॥ किसी दिन तूने पाठ करते हुए समाधिगुप्त मुनिराजके समीप मरे हुए कुत्तेका कलेवर डाला था और अपने इस अज्ञानपूर्ण कार्यसे खुश भी हुई थी। यह देखकर मुनिराजने उस समय तुझे उपदेश दिया था कि बालिके, तूने यह बहुत ही विरुद्ध कार्य किया है, भविष्यमें उदयके समय यह तुझे दुःखदायी और कटुक फल देगा क्योंकि पूज्य पुरुषोंका किया हुआ अपमान अन्य पर्यायमें अधिक सन्ताप देता है ॥ १३६-१३८ ॥ मुनिराजके ऐसा कहने पर धनश्रीने उसी समय उनके सामने जाकर अपना अपराध क्षमा कराया और कहा कि हे भगवन्, मैंने यह कार्य अज्ञानवश ही किया है इसलिये क्षमा कर दीजिये ॥ १३९ ॥ उस उपशम भावसे-क्षमा माँग लेनेसे तुझे कुछ थोड़ा सा पुण्य प्राप्त हुआ था उसीसे तू इस समय मनुष्य योनिमें इस अतिशय दरिद्र कुलमें उत्पन्न हुई है ॥१४०॥ इसलिये हे कल्याणि, कल्याण करनेवाले जिनेन्द्रगुणसम्पत्ति और श्रुतज्ञान इन दो उपवास व्रतोंको क्रमसे ग्रहण करो ॥१४१॥ हे आर्ये, विधिपूर्वक किया गया यह अनशन तप, किये हुए कर्मोंको बहुत शीघ्र नष्ट करनेवाला माना गया है ॥१४२॥ तीर्थकर नामक पुण्य प्रकृतिके कारणभूत सोलह भावनाएँ, पाँच कल्याणक, आठ प्रातिहार्य तथा चौंतीस अतिशय इन त्रेशठ गुणोंको उद्देश्य कर जो उपवास व्रत किया जाता है उसे जिनेन्द्रगुणसम्पत्ति कहते हैं ॥ भावार्थ—इस व्रतमें जिनेन्द्र भगवान्के त्रेशठ गुणोंको लक्ष्यकर त्रेशठ उपवास किए जाते हैं जिनकी व्यवस्था इस प्रकार है—सोलह कारण भावनाओंकी सोलह प्रतिपदा, पंच कल्याणकोंकी पाँच पंचमी, आठ प्रातिहार्योंकी आठ अष्टमी और चौंतीस अतिशयोंकी बीस दशमी तथा चौदह चतुर्दशी इस प्रकार त्रेशठ उपवास होते हैं ॥१४३-१४४॥ पूर्वोक्त प्रकारसे जिनेन्द्रगुणसम्पत्ति नामक व्रतमें त्रेशठ उपवास करना चाहिये ऐसा गणधरादि मुनियोंने कहा है। अब इस समय श्रुतज्ञान नामक उपवास व्रतका स्वरूप कहा जाता है ॥१४५॥ अट्ठाईस, ग्यारह,

१ न्यधान्मुदा । २ निकृष्टम् । ३ पूज्यावज्ञा । ४ -ग्राहयत् तदा अ०, स० । -मभ्येत्याक्षमयस्त्वममुं तदा प० । ५ क्षिप्रम् । 'लघु क्षिप्रमरं द्रुतम्' इत्यमरः । ६ उत्कृष्टदरिद्रे । ७ तदनन्तरम् । ८ हे पुण्यवति । ९ शुभम् । १० व्रतम् । ११ एतद्द्वयनामकम् । १२ क्रममनतिक्रम्य । गृहाणेति यावत् । १३ परिपाचयतीति परिपाचनम् । १४ कथितम् । १५ उपोषितव्रते । १६ अतिशयाश्चतु— अ०, प०, स० । अतिशयांश्च—ल० । अतिशयाः । १७ जिनगुणसम्पत्तौ । १८ मतिज्ञानम् अष्टविंशतिप्रकारम् । एकादश इति एकादशाङ्गानि इत्यर्थः । परिकर्म च द्विप्रकारमित्यर्थः । सूत्रमष्टाशीतिप्रकारमित्यर्थः । आद्यनुयोगम् एकप्रकारमिति यावत् । चतुर्दश पूर्वाणि इत्यर्थः । चूलिकाश्च पञ्चप्रकारा इत्यर्थः । मनःपर्ययश्च द्विप्रकार इत्यर्थः । केवलज्ञानम् एकप्रकारमिति यावत् । १९ पञ्चमम् प०, द०, ल० ।

विद्धि षड्द्वयेकसंख्याञ्च[1] मत्यादिज्ञानपर्ययात्[2] । नामोद्देशक्रमश्चैषां ज्ञानानामित्यनुस्मृतः ॥१४७॥
मतिज्ञानमथैकादशाङ्गानि परिकर्म च । सूत्रमाद्यनुयोगञ्च पूर्वाण्यपि च चूलिकाम् ॥१४८॥
अवधिञ्च मनःपर्ययाख्यं केवलमेव च । ज्ञानभेदान् प्रतीत्येमान् श्रुतज्ञानमुपोष्यते ॥१४९॥
दिनानां शतमत्रेष्टम् अष्टापञ्चाशताधिकम् । [3]विद्धि [4]त्वमेतावालम्ब्य तपोऽनशनमाचर ॥१५०॥
उशन्ति ज्ञानसाम्राज्यं विध्योः फलमथैनयोः । स्वर्गाद्यपि फलं प्राहुः [5]अनयोरानुषङ्गजम्[6] ॥१५१॥
मुनयः पश्य कल्याणि शापानुग्रहयोः [7]क्षमाः । [8]अतिक्रान्तिरतस्तेषां लोकद्वयविरोधिनी ॥१५२॥
वाचातिलङ्घनं वाचं निरुणद्धि भवे परे । मनसोल्लङ्घनञ्चापि स्मृतिमाहन्ति मानसीम् ॥१५३॥
[9]कायेनातिक्रमस्तेषां कायार्त्तीः साधयेत्तराम् । तस्मात्तपोधनेन्द्राणां कार्यो नातिक्रमो बुधैः ॥१५४॥
क्षमाधनानां क्रोधाग्निं जनाः संधुक्षयन्ति ये । क्षमाभस्मप्रतिच्छन्नं दुर्वचो विस्फुलिङ्गकम् ॥१५५॥
संमोहकाष्ठजनितं [10]प्रातीप्य[11]पवनेरितम् । किं तैर्न नाशितं मुग्धे हितं लोकद्वयाश्रितम् ॥१५६॥
इत्थं मुनिवचः पथ्यम् अनुमत्य यथाविधि । उपोष्य तद्द्वयं स्वायुरन्ते स्वर्गमयासिषम् ॥१५७॥
ललिताङ्गस्य तत्रासं कान्तादेवी स्वयंप्रभा । सार्द्धं सपर्ययागत्य ततो गुरुमपूजयम् ॥१५८॥
कल्पेऽनल्पर्द्धिरैशाने श्रीप्रभाधिपसंयुता । भोगान् [12]भुक्त्वात्र जातेति कथापर्यवसानकम् ॥१५९॥

दो, अठासी, एक, चौदह, पाँच, छह, दो और एक इस प्रकार मतिज्ञान आदि भेदोंकी एक सौ अंठावन संख्या होती है। उनका नामानुसार क्रम इस प्रकार है कि मतिज्ञानके अट्ठाईस, अंगोंके ग्यारह, परिकर्मके दो, सूत्रके अठासी, अनुयोगका एक, पूर्वके चौदह, चूलिकाके पाँच, अवधिज्ञान-के छह, मनःपर्ययज्ञानके दो और केवलज्ञानका एक–इसप्रकार ज्ञानके इन एक सौ अंठावन भेदोंकी प्रतीतिकर जो एक सौ अंठावन दिनका उपवास किया जाता है उसे श्रुतज्ञान उपवास व्रत कहते हैं। हे पुत्रि, तू भी विधिपूर्वक ऊपर कहे हुए दोनों अनशन व्रतोंका आचरण कर॥१४६-१५०॥ हे पुत्रि, इन दोनों व्रतोंका मुख्य फल केवलज्ञानकी प्राप्ति और गौण फल स्वर्गादिकी प्राप्ति है ॥ १५१ ॥ हे कल्याणि, देख, मुनि शाप देने तथा अनुग्रह करने-दोनों में समर्थ होते हैं, इसलिए उनका अपमान करना दोनों लोकोंमें दुख देने वाला है ॥ १५२ ॥ जो पुरुष वचन द्वारा मुनियोंका उल्लङ्घन–अनादर करते हैं वे दूसरे भवमें गूंगे होते हैं। जो मनसे निरादर करते हैं उनकी मनसे सम्बन्ध रखनेवाली स्मरणशक्ति नष्ट हो जाती है और जो शरीरसे तिरस्कार करते हैं उन्हें ऐसे कौनसे दुःख हैं जो प्राप्त नहीं होते हैं इसलिये बुद्धिमान् पुरुषोंको तपस्वी मुनियोंका कभी अनादर नहीं करना चाहिये। हे मुग्धे, जो मनुष्य, क्षमा-रूपी धनको धारण करनेवाले मुनियोंकी, मोहरूपी काष्ठसे उत्पन्न हुई, विरोधरूपी वायु से प्रेरित हुई, दुर्वचनरूपी तिलगोंसे भरी हुई और क्षमारूपी भस्मसे ढकी हुई क्रोध-रूपी अग्नि को प्रज्वलित करते हैं उनके द्वारा, दोनों लोकोंमें होने वाला अपना कौनसा हित नष्ट नहीं किया जाता ? ॥ १५३-१५६ ॥ इस प्रकार मैं मुनिराजके हितकारी वचन मानकर और जिनेन्द्र-गुण सम्पत्ति तथा श्रुतज्ञान नामक दोनों व्रतोंके विधिपूर्वक उपवास कर आयुके अन्तमें स्वर्ग गई ॥ १५७ ॥ वहाँ ललिताङ्गदेवकी स्वयंप्रभा नामकी मनोहर महादेवी हुई और वहाँसे ललिताङ्ग-देवके साथ मध्यलोकमें आकर मैंने व्रत देनेवाले पिहितास्रव गुरुकी पूजा की ॥ १५८ ॥ बड़ी बड़ी ऋद्धियोंको धारण करनेवाली मैंने उस ऐशान स्वर्गमें श्रीप्रभविमानके अधिपति ललिताङ्ग-

---

१ संख्याश्च अ०, प०, स०, द०, ल०। २ पर्ययान् अ०, प०, स०, द०, ल०। ३ विधी ब०, अ०, द०, म०, प०, क०, ट०। ४ विधी। ५–योरनुषङ्गजम् अ०, प०, द०, म०, ल०, ट०। ६ आनु-षङ्गिकम्। ७ समर्थाः। ८ अतिक्रमणम्। ९ कायेनातिक्रमे तेषां कार्तिः सा या न ढौकते। अ०, प०, स०, द०। कायेनातिक्रमस्तेषां कायार्तिं साधयेत्तराम् म०। १० प्रतीप—अ०, स०, द०। ११ प्रातिकूल्यमेव वायुः। १२ भुक्त्वा तु।

ललिताङ्गच्युतौ तस्मात् षण्मासान् जिनपूजनम् । कृत्वा प्रच्युत्य संभूतिम् इहागमं तनूदरि ॥१६०॥
तमिदानीमनुस्मृत्य तदन्वेषणसंविधौ । यतेऽहं [1]प्रयता तेन [2]वाचंयमविधिं दधे ॥१६१॥
उत्कीर्ण इव देवोऽसौ पश्यामि मनो मम । अधितिष्ठति [3]दिव्येन रूपेणानङ्गतां[4] गतः ॥१६२॥
ललिताङ्गवपुः सौम्यं ललितं[5] ललितानने । [6]सहजाताम्बरं स्रग्वि स्फुरदाभरणोज्ज्वलम् ॥१६३॥
पश्यामीव सुखस्पर्शं तत्करस्पर्शलालिता[7] । [8]तदलाभे च मद्गात्रं [9]क्षामतां नैतदुज्झति ॥१६४॥
इमेऽश्रुबिन्दवोऽजस्रं निर्यान्ति मम लोचनात् । मद्दुःखमक्षमा द्रष्टुं तमन्वेष्टुमिवोद्यताः॥१६५॥
इत्युक्त्वा पुनरप्येवम् अवादीत् श्रीमती सखीम् । शक्ता त्वमेव नान्याऽस्ति मत्प्रियान्वेषणं प्रति ॥१६६॥
त्वयि सत्यां सरोजाक्षि कुतोऽद्य स्यान्ममासुखम् । नलिन्याः किमु दौःस्थित्यं तपत्यां तपनद्युतौ ॥१६७॥
सत्यं त्वं पण्डिता कार्यघटनास्वतिपण्डिता । तन्ममैतस्य कार्यस्य संसिद्धिस्त्वयि [10]तिष्ठते ॥१६८॥
ततो रक्ष मम प्राणान् प्राणेशस्य गवेषणात् । स्त्रीणां विपत्प्रतीकारे स्त्रिय एवावलम्बनम् ॥१६९॥
[11]तदुपायश्च तेऽद्याहं ब्रुवे [12]प्रस्तुतसिद्धये । मया विलिखितं पूर्वभवसम्बन्धिपट्टकम् ॥१७०॥

देवके साथ अनेक भोग भोगे तथा वहाँसे च्युत होकर यहाँ वज्रदन्त चक्रवर्तीके श्रीमती नामकी पुत्री हुई हूँ। हे सखि, यहाँ तक ही मेरी पूर्वभवकी कथा है ॥ १५९ ॥ हे कृशोदरि, ललिताङ्ग देवके स्वर्गसे च्युत होने पर मैं छह महीने तक जिनेन्द्रदेवकी पूजा करती रही फिर वहाँसे चय कर यहाँ उत्पन्न हुई हूँ ॥१६०॥ मैं इस समय उसीका स्मरणकर उसके अन्वेषणके लिये प्रयत्न कर रही हूँ और इसीलिये मैंने मौन धारण किया है ॥१६१॥ हे सखि, देख, यह ललिताङ्ग अब भी मेरे मनमें निवास कर रहा है। ऐसा मालूम होता है मानो किसीने टांकीद्वारा उकेरकर सदाके लिये मेरे मनमें स्थिर कर दिया हो। यद्यपि आज उसका वह दिव्य-वैक्रियिक शरीर नहीं है तथापि वह अपनी दिव्य शक्तिसे अनंगता (शरीरका अभाव और कामदेवपना) धारण कर मेरे मनमें अधिष्ठित है ॥१६२॥ हे सुमुखि, जो अतिशय सौम्य है, सुन्दर है, साथ साथ उत्पन्न हुए वस्त्र तथा माला आदिसे सहित है, प्रकाशमान आभरणोंसे उज्ज्वल है और सुखकर स्पर्शसे सहित है ऐसे ललिताङ्गदेवके शरीरको मैं सामने देख रही हूँ, उसके हाथके स्पर्शसे लालित सुखद स्पर्शको भी देख रही हूँ परन्तु उसकी प्राप्तिके बिना मेरा यह शरीर कृशताको नहीं छोड़ रहा है ॥१६३-१६४॥ ये अश्रुबिन्दु निरन्तर मेरे नेत्रोंसे निकल रहे हैं जिससे ऐसा मालूम होता है कि ये हमारा दुःख देखनेके लिये असमर्थ होकर उस ललिताङ्गको खोजनेके लिये ही मानो उद्यत हुए हैं ॥१६५॥ इतना कहकर वह श्रीमती फिर भी पण्डिता सखीसे कहने लगी कि हे प्रिय सखि, तू ही मेरे पतिको खोजनेके लिये समर्थ है। तेरे सिवाय और कोई यह कार्य नहीं कर सकता ॥१६६॥ हे कमलनयने, आज तेरे रहते हुए मुझे दुःख कैसे हो सकता है? सूर्यकी प्रभाके देदीप्यमान रहते हुए भी क्या कमलिनीको दुःख होता है? अर्थात् नहीं होता ॥१६७॥ हे सखि, तू समस्त कार्योंके करनेमें अतिशय निपुण है अतएव तू सचमुचमें पण्डिता है—तेरा पण्डिता नाम सार्थक है। इसलिए मेरे इस कार्यकी सिद्धि तुझपर ही अवलम्बित है ॥ १६८॥ हे सखि, मेरे प्राणपति ललिताङ्गको खोजकर मेरे प्राणोंकी रक्षा कर क्योंकि स्त्रियोंकी विपत्ति दूर करनेके लिए स्त्रियाँ ही अवलम्बन होती हैं ॥१६९॥ इस कार्यकी सिद्धिके लिये

---

१ पवित्रा। २ मौनम्। ३ दैवेन म०, ल०। ४ अशरीरत्वम्। ५ नलिनानने अ०, ब०, स०, ल०, म०। ल०, ब०, पुस्तकयोः 'ललितानने' 'नलिनानने' इत्युभयथा पाठोऽस्ति। ६ सहजाताम्बरस्रग्वी म०, ल०। ७ लालितम् प०, ल०। ८ ललिताङ्गस्यालाभे। ९ कृशत्वम्। १० स्थेयप्रकाशनेति सूत्रात् प्रतिज्ञानिर्णय प्रकाशनेषु आत्मनेपदी। तिष्ठति स०। ११ गवेषणोपायम्। १२ प्रकृत।

क्वचित्किञ्चिन्निगूढान्तःप्रकृतं चित्तरञ्जनम् । तद्व्रजादाय धूर्त्तानां मनःसंमोहकारणम् ॥ १७१॥
[1]पतिव्रुवाश्च ये मिथ्या [2]वैयात्योद्धतबुद्धयः । तान् स्मितांशुपटच्छन्नान् कुरु गूढार्थसङ्कटे ॥१७२॥
इत्युक्त्वा पण्डितावोचत् तच्चित्ताश्वासनं वचः । स्मितांशु [3]मञ्जरीपुञ्जैः [4]किरतीवोद्[5]माञ्जलिम् ॥ १७३॥
मयि सत्यां मनस्तापो मा भूत्ते कलभाषिणि । क्वसत्यां चूतमञ्जर्यां कोकिलायाः कुतोऽसुखम् ॥ १७४॥
कवेर्धीरिव सुश्लिष्टम् अर्थं ते मृगये पतिम् । सखि लक्ष्मीरिवोद्योगशालिनं पुरुषं [6]परम् ॥ १७५॥
घटयिष्यामि ते कार्यं पटुधीरहमुद्यता । दुर्घटं नास्ति मे किञ्चित् [7]प्रतीहीह जगत्त्रये ॥ १७६॥
नानाभरणविन्यासम् अतो धारय सुन्दरि । [8]वसन्तलतिकेवोद्यत्प्रवा[9]लाङ्कुरसङ्कुलम् ॥ १७७॥
तदत्र संशयो नैव [10]कार्यः कार्यस्य साधने । [11]श्रीमतीप्रार्थितार्थानां ननु सिद्धिरसंशयम् ॥ १७८॥
इत्युक्त्वा पण्डिताश्वास्य तां तदर्पितपट्टकम् । गृहीत्वागमदाश्वेव महापूतजिनालयम् ॥ १७९॥
यः सुदूरोच्छ्रितैः कूटैः लक्ष्यते रत्नभासुरैः । पातालादुत्फणस्तोषात् [12]किमप्युद्यन्निवाहिराट् ॥ १८०॥
वर्णसाङ्कर्यसंभूत[13]चित्रकर्मान्विता अपि । यद्भित्तयो जगच्चित्तहारिण्यो गणिका इव ॥ १८१॥

मैं आज तुझसे एक उपाय बताती हूँ। वह यह है कि मैंने अपने पूर्व भवसम्बन्धी चरित्रको बतानेवाला एक चित्रपट बनाया है ॥१७०॥ उसमें कहीं कहीं चित्त प्रसन्न करनेवाले गूढ़ विषय भी लिखे गये हैं। इसके सिवाय वह धूर्त मनुष्योंके मनको भ्रान्तिमें डालनेवाला है। हे सखि, तू इसे लेकर जा ॥१७१॥ धृष्टताके कारण उद्धत बुद्धिको धारण करनेवाले जो पुरुष झूठमूठ ही यदि अपने आपको पति कहें—मेरा पति बनना चाहें उन्हें गूढ़ विषयोंके संकटमें हास्यकिरणरूपी वस्त्रसे आच्छादित करना अर्थात् चित्रपट देखकर जो झूठमूठ ही हमारा पति बनना चाहें उनसे तू गूढ़ विषय पूछना जब वे उत्तर न दे सकें तो अपने मन्द हास्यसे उन्हें लज्जित करना ॥१७२॥ इस प्रकार जब श्रीमती कह चुकी तब ईषत् हास्य की किरणोंके बहाने पुष्पाञ्जलि बिखेरती हुई पण्डिता सखी, उसके चित्तको आश्वासन देनेवाले वचन कहने लगी ॥१७३॥ हे मधुरभाषिणि, मेरे रहते हुए तेरे चित्तको संताप नहीं हो सकता क्योंकि आम्रमंजरीके रहते हुए कोयलको दुख कैसे हो सकता है ॥१७४॥ हे सखि, जिस प्रकार कविकी बुद्धि सुश्लिष्ट—अनेक भावोंको सूचित करनेवाले उत्तम अर्थको और लक्ष्मी जिसप्रकार उद्योगशाली मनुष्यको खोज लाती है उसीप्रकार मैं भी तेरे पतिको खोज लाती हूँ ॥१७५॥ हे सखि, मैं चतुर बुद्धिकी धारक हूँ तथा कार्य करनेमें हमेशा उद्यत रहती हूँ इसलिए तेरा यह कार्य अवश्य सिद्ध कर दूँगी। तू यह निश्चित जान कि मुझे इन तीनों लोकोंमें कोई भी कार्य कठिन नहीं है ॥१७६॥ इसलिये हे सुन्दरि, जिसप्रकार माधवी लता प्रकट होते हुए प्रवालों और अंकुरोंके समूहको धारण करती है उसीप्रकार अब तू अनेक प्रकारके आभरणोंके विन्यासको धारण कर ॥१७७॥ इस कार्यकी सिद्धिमें तुझे संशय नहीं करना चाहिये क्योंकि श्रीमती के द्वारा चाहे हुए पदार्थोंकी सिद्धि निःसन्देह ही होती है ॥१७८॥ वह पण्डिता इस प्रकार कहकर तथा उस श्रीमतीको समझा कर उसके द्वारा दिये हुए चित्रपटको लेकर शीघ्र ही महापूत नामक अथवा अत्यन्त पवित्र जिनमन्दिर गई ॥ १७९ ॥ वह जिनमन्दिर रत्नोंकी किरणोंसे शोभायमान अपनी ऊँची उठी हुई शिखरोंसे ऐसा जान पड़ता था मानो फण ऊँचा किये हुए शेषनाग ही सन्तुष्ट होकर पाताल लोकसे निकला हो ॥१८०॥ उस मन्दिरकी दीवालें ठीक वेश्याओंके समान थीं क्योंकि जिस प्रकार वेश्याएँ वर्णसंकरता (ब्राह्मणादि वर्णोंके साथ व्यभिचार) से उत्पन्न हुई तथा अनेक आश्चर्यकारी कार्योंसे सहित होकर

१ आत्मानं पतिं ब्रुवते इति पतिब्रुवाः । २ धार्ष्ट्यम् । ३ पुष्पस्तवकैः । ४ किरन्ती अ०, स०, द०, ल० । ५ पुष्पम् । ६ उत्कृष्टम् । ७ जानीहि । ८ वसन्ततिलकेवोद्यत् ल० । माधवीलता । ९ नवपल्लवः । १० कर्तव्यः । ११ श्रीरस्यास्तीति श्रीमती तया वाञ्छितपदार्थानाम् । १२ येन केनापि प्रकारेण । १३ [आलेख्य कर्म] पक्षे नानाप्रकारपापकर्म ।

[1]दिवामन्यां निशां कर्तुं क्षमैर्मणिविचित्रितैः । तुङ्गः शृङ्गैः स्म यो भाति [2]दिवमुन्मीलय[3]न्निव ॥१८२॥
पठद्भिरनिशं साधुवृन्दैरामन्द्रनिस्वनम् । [4]भजन्निव यो भव्यैः[5]व्यभाव्यत समागतैः ॥१८३॥
यस्य कूटाग्रसंसक्ताः केतवोऽनिलवल्गिताः । विबभुर्वन्दनाभक्त्यै [6]व्याह्वयन्त इवामरान् ॥१८४॥
[7]यद्वातायननिर्याता धूपधूमाश्चकासिरे । स्वर्गस्योपायनीकर्तुं [8]निर्मिमाणा [9]घनानिव ॥१८५॥
यस्य कूटतटालग्नाः तारास्तरलरोचिषः । पुष्पोपहारसंमोहम्[10] आतन्वन्नभोजुषाम्[11] ॥१८६॥
[12]सद्वृत्तसङ्गता[13]श्चित्रसंदर्भरुचिराकृतिः । यः सु[14]शब्दो महान्मह्यां[15] काव्यबन्ध इवाबभौ ॥१८७॥
सपताको रणद्घण्टो यो दृढस्तम्भसंभृतः[16] । व्यभाद्गम्भीरनिर्घोषैः सबृंहित इवेभराट् ॥१८८॥
पठतां पुण्यनिर्घोषैः वन्दारूणां च निस्वनैः । यः संदधावकालेऽपि मदारम्भं शिखण्डिषु ॥१८९॥
यस्तुङ्गशिखरः शश्वत् चारणैः[17] कृतसंस्तवः[18] । [19]विद्याधरैः समासेव्यो मन्दराद्रिरिवाद्युतत् ॥१९०॥

जगत्‌के कामी पुरुषोंका चित्त हरण करती हैं उसी प्रकार वे दीवालें भी वर्ण-संकरता (काले पीले नीले लाल आदि रंगोंके मेल) से बने हुए अनेक चित्रोंसे सहित होकर जगत्‌के सब जीवोंका चित्त हरण करती थीं ॥१८१॥ रातको भी दिन बनानेमें समर्थ और मणियोंसे चित्र विचित्र रहने वाले अपने ऊँचे-ऊँचे शिखरोंसे वह मन्दिर ऐसा मालूम होता था मानो स्वर्गका उन्मीलन ही कर रहा है-स्वर्गको भी प्रकाशित कर रहा हो ॥१८२॥ उस मन्दिरमें रात-दिन अनेक मुनियोंके समूह गम्भीर शब्दोंसे स्तोत्रादिकका पाठ करते रहते थे जिससे ऐसा जान पड़ता था मानो वह आये हुए भव्यजीवोंके साथ सम्भाषण ही कर रहा हो ॥१८३॥ उसकी शिखरोंके अग्रभाग पर लगी हुई तथा वायुके द्वारा हिलती हुई पताकाएँ ऐसी सुशोभित हो रही थीं मानो वन्दना भक्ति आदिके लिये देवोंको हो बुला रही हों ॥१८४॥ उस मन्दिरके झरोखोंसे निकलते हुए धूपके धूम ऐसे मालूम होते थे मानो स्वर्गको भेंट देनेके लिये नवीन मेघ ही जा रहे हों ॥१८५॥ उस मन्दिरकी शिखरोंके चारों ओर जो चञ्चल किरणोंके धारक तारागण चमक रहे थे वे ऊपर आकाशमें स्थिर रहनेवाले देवोंकी पुष्पोपहारकी भ्रांति उत्पन्न किया करते थे अर्थात् देव लोग यह समझते थे कि कहीं शिखर पर किसीने फूलोंका उपहार तो नहीं चढ़ाया है ॥१८६॥ वह चैत्यालय सद्वृत्त-संगत–सम्यक् चारित्रके धारक मुनियोंसे सहित था, अनेक चित्रोंके समूहसे शोभायमान था, और स्तोत्रपाठ आदिके शब्दोंसे सहित था इसलिये किसी महाकाव्यके समान सुशोभित हो रहा था क्योंकि महाकाव्य भी, सद्वृत्त–वसन्ततिलका आदि सुन्दर-सुन्दर छन्दोंसे सहित होता है, मुरज कमल छत्र हार आदि चित्रश्लोकोंसे मनोहर होता है और उत्तम उत्तम शब्दोंसे सहित होता है ॥१८७॥ उस चैत्यालयपर पताकाएँ फहरा रही थीं, भीतर बजते हुए घंटे लटक रहे थे, स्तोत्र आदिके पढ़नेसे गंभीर शब्द हो रहा था, और स्वयं अनेक मजबूत खम्भोंसे स्थिर था इसलिये ऐसा जान पड़ता था मानो कोई बड़ा हाथी ही हो क्योंकि हाथी पर भी पताका फहराती है, उसके गले में मनोहर शब्द करता हुआ घंटा बँधा रहता है वह स्वयं गंभीर गर्जनाके शब्दसे सहित होता है तथा मजबूत खम्भोंसे बँधा रहनेके कारण स्थिर होता है ॥१८८॥ वह चैत्यालय पाठ करनेवाले मनुष्योंके पवित्र शब्दों तथा वन्दना करनेवाले मनुष्योंकी जय जय ध्वनिसे असमयमें ही मयूरोंको मदोन्मत्त बना देता था अर्थात् मन्दिर में होनेवाले शब्दको मेघका शब्द समझकर मयूर वर्षाके बिना ही मदोन्मत्त हो जाते थे ॥१८९॥ वह चैत्यालय अत्यन्त ऊँची

---

१ आत्मानं दिवा मन्यत इति दिवामन्या ताम् । २ स्वर्गम् । ३ पश्यन्निव । ४ सम्भाषणं कुर्वन् । ५ भव्यैः सह । ६ वाह्वयन्त अ०, स० । ७ तद्वाता–ल० । ८ निर्मिमीत इति निर्मिमाणा । ९ घना इव ल० । १० सम्भ्रान्तिम् । ११ मातन्वन्ति नभोजुषाम् द० । १२ सच्चारित्रवद्भव्यजनसहितः, पक्षे समीचीनवृत्तजातिसहितः । १३ चित्रपुत्रिकासंदर्भः, पक्षे चित्रार्थसन्दर्भरचना । १४ सुशब्दो । १५ भूमौ । १६ सम्यग् भृतः । १७ कुशीलवैः पक्षे चारणमुनिभिः । १८ पक्षे परिचयः । १९ शब्दागमपरमागमादिविद्याधरैः खचरैश्च ।

तत्र पट्टकशालायां पण्डिता कृतवन्दना । प्रसार्य पट्टकं तस्थौ [1]परिचिक्षिषुरागतान् ॥१९१॥
[2]प्रैक्षन्त केचिदागत्य सावधानं महाधियः । केचित्किमेतदित्युच्चैः जजल्पुर्वीक्ष्य पट्टकम् ॥१९२॥
तेषां समुचितैर्वाक्यैः ददती पण्डितोत्तरम् । तत्रास्ते स्म स्मितोद्योतैः किरन्ती [3]पण्डितायितान् ॥१९३॥
अथ दिग्विजयाच्चक्री न्यवृतत्कृतदिग्जयः । प्रणतीकृतनिःशेषनरविद्याधरामरः ॥१९४॥
ततोऽभिषेकं द्वात्रिंशत्सहस्रधरणीश्वरैः[4] । चक्रवर्ती परं प्रापत् पुण्यैः किं नु न लभ्यते ॥१९५॥
स च ते च समाकाराः कराङ्घ्रिवदनादिभिः । तथापि तैः समभ्यर्च्यः सोऽभूत् पुण्यानुभावतः ॥१९६॥
अनीदृशवपुश्चन्द्रसौम्यास्यः कमलेक्षणः । पुण्येन स बभौ सर्वान् अतिशय्य नरामरान् ॥१९७॥
शङ्खचक्राङ्कुशादीनि [5]लक्षणान्यस्य पादयोः । बभुरालिखितानीव लक्ष्म्या लक्ष्माणि चक्रिणः ॥१९८॥
अमोघशासने तस्मिन् भुवं शासति भूभुजि । न [6]दण्ड्यपक्षः कोऽप्यासीत् प्रजानामकृतागसाम् ॥१९९॥
स बिभ्रद्वक्षसा लक्ष्मीं वक्त्राब्जेन च वाग्वधूम् [7]प्रणाय्यामिव लोकान्तं प्राहिणोत् कीर्तिमेकिकाम्॥२००॥

ऊँची शिखरोंसे सहित था, अनेक चारण (मागध स्तुतिपाठक) सब उसकी स्तुति किया करते थे और अनेक विद्याधर (परमागमके जाननेवाले) उसकी सेवा करते थे इसलिये ऐसा शोभायमान होता था मानो मेरु पर्वत ही हो क्योंकि मेरु पर्वत भी अत्यन्त ऊँची शिखरोंसे सहित है, अनेक चारण (ऋद्धिके धारक मुनिजन) उसकी स्तुति करते रहते हैं तथा अनेक विद्याधर उसकी सेवा करते हैं ॥१९०॥ इत्यादि वर्णनयुक्त उस चैत्यालयमें जाकर पण्डिता धायने पहले जिनेन्द्र देवकी वन्दना की फिर वह वहाँकी चित्रशालामें अपना चित्रपट फैलाकर आये हुए लोगोंकी परीक्षा करनेकी इच्छासे बैठ गई ॥१९१॥ विशाल बुद्धिके धारक कितने ही पुरुष आकर बड़ी सावधानीसे उस चित्रपटको देखने लगे और कितने ही उसे देखकर यह क्या है ? इस प्रकार जोरसे बोलने लगे ॥१९२॥ वह पण्डिता समुचित वाक्योंसे उन सबका उत्तर देती हुई और पण्डिताभास-मूर्ख लोगों पर मन्द हास्यका प्रकाश डालती हुई गम्भीर भावसे वहाँ बैठी थी ॥१९३॥

अनन्तर जिसने समस्त दिशाओंको जीत लिया है और जिसे समस्त मनुष्य विद्याधर और देव नमस्कार करते हैं ऐसा वज्रदन्त चक्रवर्ती दिग्विजयसे वापिस लौटा ॥१९४॥ उस समय चक्रवर्तीने बत्तीस हजार राजाओं द्वारा किये हुए राज्याभिषेकमहोत्सवको प्राप्त किया था सो ठीक ही है, पुण्यसे क्या क्या नहीं प्राप्त होता ? ॥१९५॥ यद्यपि वह चक्रवर्ती और वे बत्तीस हजार राजा हाथ, पाँव, मुख आदि अवयवोंसे समान आकारके धारक थे तथापि वह चक्रवर्ती अपने पुण्यके माहात्म्यसे उन सबके द्वारा पूज्य हुआ था ॥१९६॥ इसका शरीर अनुपम था, मुख चन्द्रमाके समान सौम्य था, और नेत्र कमलके समान सुन्दर थे। पुण्यके उदयसे वह समस्त मनुष्य और देवोंसे बढ़कर शोभायमान हो रहा था ॥१९७॥ इसके दोनों पाँवोंमें जो शंख चक्र अंकुश आदिके चिह्न शोभायमान थे वे ऐसे जान पड़ते थे मानो लक्ष्मीने ही चक्रवर्तीके ये सब लक्षण लिखे हैं ॥१९८॥ अव्यर्थ आज्ञाके धारक महाराज वज्रदन्त जब पृथ्वीका शासन करते थे तब कोई भी प्रजा अपराध नहीं करती थी इसलिये कोई भी पुरुष दण्डका भागी नहीं होता था ॥१९९॥ वह चक्रवर्ती वक्षःस्थलपर लक्ष्मीको और मुखकमलमें सरस्वतीको धारण करता था परन्तु अत्यन्त प्रिय कीर्तिको धारण करनेके लिये उसके पास कोई स्थान ही नहीं रहा इसलिये उसने अकेली कीर्तिको लोकके अन्त तक पहुँचा दिया था। अर्थात् लक्ष्मी और सरस्वती तो

१ परीक्षितुमिच्छुः । २ प्रेक्ष्यन्ते अ०, स० । प्रेक्ष्यन्त म०, ल० । ३ पण्डिता इवाचरितान् । ४ धरणीधरैः अ०, प०, स०, म०, द०, ल० । ५ चिह्नानि । ६ दण्डयितुं योग्यो दण्ड्यः स चासौ पक्षश्च । ७ असम्मताम् । 'पाय्यधाय्यसान्नाय्यनिकाय्यप्रणाय्यानाय्यं मानहविर्निवाससम्मत्यनित्ये' इति सूत्रात् असम्मत्यर्थे ध्यणन्तनिपातनम् । प्राणाय्यमिव द०,ल० ।

सुधासूतिरिवोदंशुः अंशुमानिव चोत्करः। स कान्तिं दीप्तिमप्युच्चैः अधाऽप्यद्भुतोदयः ॥२०१॥
पुण्यकल्पतरोरुच्चैः फलानीव महान्त्यलम्। बभूवुस्तस्य रत्नानि चतुर्दश [१]विशां विभोः ॥२०२॥
निधयो नव तस्यासन् पुण्यानामिव राशयः। यैरक्षय्यैरमुष्यासीद् गृहवार्ता[२] महोदया ॥२०३॥
षट्खण्डमण्डितां पृथ्वीम् इति संपालयन्नसौ। दशाङ्गयोगसंभूतिम्[३] अभुङ्क्त[४] सुकृती चिरम् ॥२०४॥

हरिणीच्छन्दः

इति कतिपयैरेवाहोभिः कृती कृतदिग्जयो जयपृतनया सार्द्धं चक्री निवृत्य पुरीं विशन्।
सुरपृतनया [५]साकं शक्रो [६]विशन्नमरावतीमिव स रुरुचे भास्वन्मौलिर्ज्वलन्मणिकुण्डलः ॥२०५॥

मालिनी

विहितनिखिलकृत्योऽप्यात्मपुत्रीविवाह[७]व्यतिकरकरणीये किञ्चिदन्तःसचिन्तः।
पुरमविशदुदारश्रीपराध्यं पुरुश्रीर्मृदुपवनविधूतप्रोल्लसत्केतुमालम् ॥२०६॥

शार्दूलविक्रीडितम्

[८]क्षुन्दन्तो लवलीलतास्तटवने सिन्धोर्लवङ्गाततेे
तत्रासीनसुराङ्गनालसलसन्नेत्रैः शनैर्वीक्षिताः।
आभेजुर्विजयार्द्ध[९]कन्दरदरीरामृज्य[१०] सेनाचरा
यस्यासौ विजयी स्वपुण्यफलितां दीर्घं भुनक्ति स्म गाम्[११] ॥२०७॥

उसके समीप रहती थीं और कीर्ति समस्त लोकमें फैली हुई थी ॥२००॥ वह राजा चन्द्रमाके समान कान्तिमान् और सूर्यके समान उत्कर (तेजस्वी अथवा उत्कृष्ट टैक्स वसूल करनेवाला) था। आश्चर्यकारी उदयको धारण करने वाला वह राजा कान्ति और तेज दोनों को उत्कृष्ट रूपसे धारण करता था ॥२०१॥ पुण्यरूपी कल्पवृक्षके बड़ेसे बड़े फल इतने ही होते हैं यह बात सूचित करनेके लिये ही मानो उस चक्रवर्तीके चौदह महारत्न प्रकट हुए थे ॥२०२॥ उसके यहां पुण्यकी राशिके समान नौ अक्षय निधियां प्रकट हुई थीं उन निधियोंसे उसका भण्डार हमेशा भरा रहा था ॥२०३॥ इस प्रकार वह पुण्यवान् चक्रवर्ती छह खण्डोंसे शोभित पृथिवीका पालन करता हुआ चिरकाल तक दस प्रकारके भोग* भोगता रहा ॥२०४॥ इस प्रकार देदीप्यमान मुकुट और प्रकाशमान रत्नोंके कुण्डल धारण करने वाला वह कार्यकुशल चक्रवर्ती कुछ ही दिनोंमें दिग्विजय कर लौटा और अपनी विजयसेनाके साथ राजधानीमें प्रविष्ट हुआ। उस समय वह ऐसा शोभायमान हो रहा था जैसा कि देदीप्यमान मुकुट और रत्न-कुण्डलोंको धारण करने वाला कार्यकुशल इन्द्र अपनी देवसेनाके साथ अमरावतीमें प्रवेश करते समय शोभित होता है ॥२०५॥ समस्त कार्य कर चुकने पर भी जिसके हृदयमें पुत्री-श्रीमतीके विवाहकी कुछ चिन्ता विद्यमान है, ऐसे उत्कृष्ट शोभाके धारक उस वज्रदन्त चक्रवर्तीने मन्द मन्द वायुके द्वारा हिलती हुई पताकाओंसे शोभायमान तथा अन्य अनेक उत्तम उत्तम शोभासे श्रेष्ठ अपने नगरमें प्रवेश किया था ॥२०६॥ जिसकी सेनाके लोगोंने लवंगकी लताओंसे व्याप्त समुद्रतटके वनोंमें चन्दन लताओं-का चूर्ण किया है, उन वनोंमें बैठी हुई देवागनाओंने जिन्हें अपने आलस्य भरे सुशोभित नेत्रोंसे धीरे धीरे देखा है और जिन्होंने विजयार्ध पर्वतकी गुफाओंको स्वच्छकर उनमें आश्रय प्राप्त

---

१ मनुजपतेः। 'द्वौ विशौ वैश्यमनुजौ' इत्यभिधानात्। २ वृत्तिः। ३ भोगाः "दिव्वपुरं रमणं णिहि चमुभायणभोयणा य सयणं च। आसणवाहण णट्ट दसंग इमे ताणं॥ [सरत्ना निधयो दिव्याः पुरं शय्यासने चमूः। नाट्यं सभाजनं भोज्यं वाहनं चेति तानि वै ॥] ४–मभुक्ता म०, ल०। ५ सह। ६ बहुच्छरादीनां मत्यनजिरादेरिति दीर्घः। ७ श्रीमतीविवाहसम्बन्धकरणीये। ८ सञ्चूर्णयन्तः। ९ विजयार्द्धस्य कन्दरदर्यः गुहाः श्रेष्ठाः ताः। १० आमृज्य द०, ट०। सञ्चूर्ण्य। ११ भूमिम्। * १ चौदह रत्न, २ नौ निधि, ३ सुन्दर स्त्रियाँ, ४ नगर, ५ आसन, ६ शय्या, ७ सेना, ८ भोजन, ९ पात्र, और १० नाट्यशाला।

आक्रामन् वनवेदिकान्तरगतस्तां वैजयार्द्धीं तटी-
उल्लङ्घ्याब्धिवधूं तरङ्गतरलां गङ्गाञ्च सिन्धुं [1]धुनीम् ।
[2]जित्वाशाः कुलभूभृदुन्नतिमपि [3]न्यक्कृत्य चक्राङ्कितां
लेभेऽसौ जिनशासनार्पितमतिः श्रीवज्रदन्तः श्रियम् ॥२०८॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे
ललिताङ्गस्वर्गच्यवनवर्णनं नाम षष्ठं पर्व ॥६॥

किया है ऐसा वह सर्वत्र विजय प्राप्त करने वाला वज्रदन्त चक्रवर्ती अपने पुण्यके फलसे प्राप्त हुई पृथिवीका चिरकाल तक पालन करता रहा ॥ २०७ ॥ दिग्विजयके समय जो समुद्रके समीप वनवेदिकाके मध्यभागको प्राप्त हुआ, जिसने विजयार्ध पर्वतके तटोंका उल्लंघन किया, जिसने तरंगोंसे चंचल समुद्रकी स्त्रीरूप गङ्गा और सिन्धु नदीको पार किया और हिमवत् कुलाचलकी ऊंचाईको तिरस्कृत किया—उसपर अपना अधिकार किया ऐसा वह जिनशासनका ज्ञाता वज्रदन्त चक्रवर्ती समस्त दिशाओंको जीतकर चक्रवर्तीकी पूर्ण लक्ष्मीको प्राप्त हुआ ॥२०८॥

इस प्रकार आर्ष नामसे प्रसिद्ध, भगवज्जिनसेनाचार्य विरचित त्रिषष्टिलक्षण
महापुराण संग्रहमें ललितांग देवका स्वर्गसे च्युत होने आदिका
वर्णन करनेवाला छठा पर्व पूर्ण हुआ ।

---

१ नदीम् । २ जित्वाशां ल० । ३ अधःकृत्य ।

सप्तमं पर्व

अथाहूय सुतां चक्री तामित्यन्वशिषत् कृती । स्मितांशुसलिलैः सिञ्चन्निवैनामाधिबाधिताम् ॥१॥
पुत्रि मा स्म गमः शोकम् उपसंहर मौनिताम् । जानामि त्वत्पतेः सर्वं वृत्तान्तमवधित्विषा ॥२॥
[1]त्वकं पुत्रि सुखं [2]स्नाहि [3]प्रसाधनविधिं कुरु । चन्द्रबिम्बायिते पश्य दर्पणे मुखमण्डनम् ॥३॥
[4]अशान मधुरालापैः तर्पयेष्टं सखीजनम् । त्वदिष्टसङ्गमोऽवश्यम् अद्य श्वो वा भविष्यति ॥४॥
यशोधरमहायोगिकैवल्ये स मयावधिः । [5]समासादि ततोऽज्ञानम्[6] अभिन्न[7]समयावधि ॥५॥
शृणु पुत्रि तवास्माकं त्वत्कान्तस्यापि वृत्तकम् । जन्मान्तरनिबद्धं ते वक्ष्यामीदंतया[8] पृथक् ॥६॥
इतोऽहं पञ्चमेऽभूवं जन्मन्यस्यां महाद्युतौ । नगर्यां पुण्डरीकिण्यां स्वर्णगर्यामिवर्द्धिभिः ॥७॥
सुतोऽर्द्धचक्रिणश्चन्द्रकीर्तिरित्यात्त[9]कीर्त्तनः । जयकीर्तिर्वयस्यो मे तदासीत् सहवर्द्धितः ॥८॥
पितुः क्रमागतां लक्ष्मीम् आसाद्य परमोदयाम् । समं वयं [10]वयस्येन चिरमत्रारभावहि ॥९॥
गृहमेधी गृहीताणुव्रतः सोऽहं क्रमात्ततः । कालान्ते चन्द्रसेनाख्यं गुरुं श्रित्वा समाधये ॥१०॥
त्यक्ताहारशरीरः सन् उद्याने प्रीतिवर्द्धने । संन्यासविधिनाऽजाये कल्पे माहेन्द्रसंज्ञिके[11] ॥११॥
सप्तसागरकालायुःस्थितिः सामानिकः सुरः । जयकीर्त्तिश्च तत्रैव जातो मत्सदृशर्द्धिकः ॥१२॥
ततः प्रच्युत्य कालान्ते द्वीपे पुष्करसंज्ञके[12] । पूर्वमन्दरपौ[13]रस्त्यविदेहे प्राजनिष्वहि ॥१३॥

अनन्तर कार्य-कुशल चक्रवर्तीने मानसिक पीड़ासे पीड़ित पुत्रीको बुलाकर मन्द हास्यकी किरणरूपी जलके द्वारा सिंचन करते हुएकी तरह नीचे लिखे अनुसार उपदेश दिया ॥ १ ॥ हे पुत्रि, शोकको मत प्राप्त हो, मौनका संकोच कर, मैं अवधिज्ञानके द्वारा तेरे पतिका सब वृत्तान्त जानता हूँ ॥ २ ॥ हे पुत्रि, तू शीघ्र ही सुखपूर्वक स्नान कर, अलंकार धारण कर और चन्द्रबिम्बके समान उज्ज्वल दर्पणमें अपने मुखकी शोभा देख ॥ ३ ॥ भोजन कर और मधुर बातचीतसे प्रिय सखीजनोंको संतुष्ट कर । तेरे इष्ट पतिका समागम आज या कल अवश्य ही होगा ॥ ४ ॥ श्रीयशोधर तीर्थंकरके केवलज्ञान महोत्सवके समय मुझे अवधिज्ञान प्राप्त हुआ था, उसीसे मैं कुछ भवोंका वृत्तान्त जानने लगा हूँ ॥ ५ ॥ हे पुत्रि, तू अपने, मेरे और अपने पतिके पूर्व जन्म सम्बन्धी वृत्तान्त सुन । मैं तेरे लिये पृथक् पृथक् कहता हूँ ॥ ६ ॥ इस भवसे पहले पाँचवें भवमें मैं अपनी ऋद्धियोंसे स्वर्गपुरीके समान शोभायमान और महादेदीप्यमान इसी पुण्डरीकिणी नगरीमें अर्धचक्रवतीका पुत्र चन्द्रकीर्ति नामसे प्रसिद्ध हुआ था । उस समय जयकीर्ति नामका मेरा एक मित्र था जो हमारे ही साथ वृद्धिको प्राप्त हुआ था ॥ ७-८ ॥ समयानुसार पितासे कुल परम्परासे चली आई उत्कृष्ट राज्यविभूतिको पाकर मैं इसी नगरमें अपने मित्रके साथ चिरकाल तक क्रीड़ा करता रहा ॥ ९ ॥ उस समय मैं अणुव्रत धारण करनेवाला गृहस्थ था । फिर क्रमसे समय बीतने पर आयुके अन्त समयमें समाधि धारण करनेके लिये चन्द्रसेन नामक गुरुके पास पहुँचा । वहाँ प्रीतिवर्धन नामके उद्यानमें आहार तथा शरीरका त्यागकर संन्यास विधिके प्रभावसे चौथे माहेन्द्र स्वर्गमें उत्पन्न हुआ ॥ १०-११ ॥ वहाँ मैं सात सागरकी आयुका धारक सामानिक जातिका देव हुआ । मेरा मित्र जयकीर्ति भी वहीं उत्पन्न हुआ । वह भी मेरे ही समान ऋद्धिओंका धारक हुआ था ॥ १२ ॥ आयुके अन्तमें वहाँसे च्युत होकर

---

१ त्वरं ल०, म० । २ स्नानं कुरु । ३ अलंकारः । ४ भोजनं कुरु । ५ प्राप्तः । ६ अजानिषम् । ७ युक्तद्रव्यक्षेत्रकालभावसीम इत्यर्थः । ८ अनेन प्रकारेण ।—मीदं तथा प०, म०, द०, ल० । ९ आत्तम् स्वीकृतम् । १० मित्रेण । ११—संज्ञिते अ०, प०, द०, स०, ल० । १२—संज्ञिते प० । १३ पूर्व ।

विषये मङ्गलावत्यां नगरे रत्नसञ्चये । श्रीधरस्य महीभर्तुः तनयौ बलकेशवौ ॥१४॥
[1]मनोहरातद्भमयोः श्रीवर्मा च विभीषणः । ततो राज्यपदं प्राप्य दीर्घं [2]तत्रारमावहे [हि] ॥१५॥
पिता तु मयि निक्षिप्तराज्यभारः सुधर्मतः । दीक्षित्वोपोष्य सिद्धोऽभूत् उपवासविधीन् बहून् ॥१६॥
मनोहरा मयि स्नेहात् स्थितागारे शुचिव्रता । सुधर्मगुरुनिर्दिष्टम् आचरन्ती चिरं तपः ॥१७॥
उपोष्य विधिवत्कर्मक्षपणं विधिमुत्तमम् । जीवितान्ते समाराध्य ललिताङ्गसुरोऽभवत् ॥१८॥
ललिताङ्गस्ततोऽसौ मां विभीषणवियोगतः । शुचमापन्नमासाद्य सोपायं प्रत्यबोधयत् ॥१९॥
भद्र पुत्र [3]त्वरं मागाः शुचमज्ञो यथा जनः । जननादिभियोऽ[3]वश्यंभावुका[4] विद्धि संसृतौ ॥२०॥
इति मातृचरस्यास्य ललिताङ्गस्य बोधनात् । शुचमुत्सृज्य धर्मैकरसो[5]ऽभूवं प्रसन्नधीः ॥२१॥
ततो युगन्धरस्यान्ते दीक्षां जैनेश्वरीमहम् । नृपैर्दशसहस्राद्धमितैः सार्द्धमुपाददे ॥२२॥
यथाविधि तपस्तप्त्वा सिंहनिष्क्रीडितं तपः । सुदुश्चरं महोदर्कं सर्वतोभद्रमप्यदः ॥२३॥
[6]त्रिज्ञानविमलालोकः [7]कालान्ते [8]प्रापमिन्द्रताम् । कल्पेऽच्युते ह्यनल्पर्द्धौ द्वाविंशत्यब्धिजीवितः ॥२४॥
दिव्याननुभवन् भोगान् तत्र कल्पे महाद्युतौ । गत्वा च जननीस्नेहात् ललिताङ्गमपूजयम् ॥२५॥

हम दोनों पुष्कर नामक द्वीपमें पूर्व मेरुसम्बन्धी पूर्वविदेह क्षेत्रमें मङ्गलावती देशके रत्नसंचय नगरमें श्रीधर राजाके पुत्र हुए । मैं बलभद्र हुआ और जयकीर्तिका जीव नारायण हुआ । मेरा जन्म श्रीधर महाराजकी मनोहरा नामकी रानीसे हुआ था और श्रीवर्मा मेरा नाम था तथा जयकीर्तिका जन्म उसी राजाकी दूसरी रानी मनोरमासे हुआ था और उसका नाम विभीषण था । हम दोनों भाई राज्य पाकर वहाँ दीर्घकाल तक क्रीड़ा करते रहे ॥१३-१५॥ हमारे पिता श्रीधर महाराजने मुझे राज्यभार सौंपकर सुधर्माचार्यसे दीक्षा ले ली और अनेक प्रकारके उपवास करके सिद्ध पद प्राप्त कर लिया ॥१६॥ मेरी माता मनोहरा मुझपर बहुत स्नेह रखती थी इसलिये पवित्र व्रतोंका पालन करती हुई और सुधर्माचार्यके द्वारा बताये हुए तपोंका आचरण करती हुई वह चिरकाल तक घरमें ही रही ॥१७॥ उसने विधिपूर्वक *कर्मक्षपण नामक व्रतके उपवास किये थे और आयुके अन्तमें समाधिपूर्वक शरीर छोड़ा था जिससे मरकर स्वर्गमें ललिताङ्गदेव‡ हुई ॥१८॥ तदनन्तर कुछ समय बाद मेरे भाई विभीषणकी मृत्यु हो गई और उसके वियोगसे मैं जब बहुत शोक कर रहा था तब ललिताङ्गदेवने आकर अनेक उपायोंसे मुझे समझाया था ॥१९॥ कि हे पुत्र, तू अज्ञानी पुरुषके समान शोक मतकर और यह निश्चय समझ कि इस संसारमें जन्म मरण आदिके भय अवश्य ही हुआ करते हैं ॥२०॥ इस प्रकार जो पहले मेरी माता थी उस ललिताङ्ग देवके समझाने से मैंने शोक छोड़ा और प्रसन्न चित्त होकर धर्ममें मन लगाया ॥२१॥ तत्पश्चात् मैंने श्री युगन्धर मुनिके समीप पाँच हजार राजाओंके साथ जिनदीक्षा ग्रहण की ॥२२॥ और अत्यन्त कठिन, किन्तु उत्तम फल देनेवाले सिंहनिष्क्रीडित तथा सर्वतोभद्र नामक तपको विधिपूर्वक तपकर मति श्रुत अवधिज्ञानरूपी निर्मल प्रकाशको प्राप्त किया । फिर आयुके अन्तमें मरकर अनल्प ऋद्धियोंसे युक्त अच्युत नामक सोलहवें स्वर्गमें इन्द्र पदवी प्राप्त की । वहाँ मेरी आयु बाईस सागर प्रमाण थी ॥२३-२४॥ अत्यन्त कांतिमान उस अच्युत स्वर्गमें मैं दिव्य भोगोंको भोगता रहा । किसी दिन मैंने माताके

१ मनोहरामनोहरयोः श्रीधरस्य भार्ययोः । २ तत्रारमावहि ब०, प०, अ०, द०, म०, स०, ल० । त्वरं द०, स०, प० । ३ नियमेन भवितुं शीलं यासां ताः । ४ -भीलुका म० । ५ रसः अनुरागः । ६ ज्ञान-प० । ७-कल्यान्ते ल० । ८ अगमम् । *कर्मक्षपण व्रतमें १४८ उपवास करने पड़ते हैं जिनका क्रम इस प्रकार है । सात चतुर्थी, तीन सप्तमी, छतीस नवमी, एक दशमी, सोलह द्वादशी, और पचासी द्वादशी । कर्मोंकी १४८ प्रकृतियोंके नाशको उद्देश्यकर इस व्रतमें १४८ उपवास किये जाते हैं इसलिये इसका 'कर्मक्षपण' नाम है । ‡ यह ललिताङ्ग स्वयंप्रभा (श्रीमती) के पति ललिताङ्गदेव से भिन्न था ।

प्रीतिवर्द्धनमारोप्य विमानमतिभास्वरम् । नीत्वास्मत्कल्पमेवास्य कृतवानस्मि सत्क्रियाम् ॥२६॥
स नो[1] मातृचरस्तस्मिन् कल्पेऽनल्पसुखोदये । भोगाननुभवन् दिव्यान् असकृच्च मयार्चितः ॥२७॥
ललिताङ्गस्ततश्च्युत्वा जम्बूद्वीपस्य पूर्वके । विदेहे मङ्गलावत्यां रौप्यस्याद्रेरुदक्तटे[2] ॥२८॥
गन्धर्वपुरनाथस्य वासवस्य खगेशिनः । सूनुरासीत् प्रभावत्यां देव्यां नाम्ना महीधरः ॥२९॥
महीधरे निजं राज्यभारं निक्षिप्य वासवः । निकटेऽरिञ्जयाख्यस्य तप्त्वा मुक्तावलीं[3] तपः ॥३०॥
निर्वाणमगमत् पद्मावत्यार्यां च प्रभावती । समाश्रित्य तपस्तप्त्वा परं रत्नावलीमसौ ॥३१॥
अच्युतं कल्पमासाद्य प्रतीन्द्रपदभागभूत् । महीधरोऽपि संसिद्धविद्योऽभूदद्भुतोदयः ॥३२॥
कदाचिदथ गत्वाहं पुष्करार्द्धस्य पश्चिमे । भागे पूर्वविदेहे तं विषयं वत्सकावती ॥३३॥
तत्र प्रभाकरीपुर्यां विनयन्धरयोगिनः । निर्वाणपूजां निष्ठाप्य महामेरुमथागमम् ॥३४॥
तत्र नन्दनपूर्वाशाचैत्यालयमुपाश्रितम् । महीधरं समालोक्य विद्यापूजोद्यतं तदा ॥३५॥
प्रत्यबूबुध[4]मित्युच्चैः अहो खेन्द्र[5] महीधरम् । विद्धि मामच्युताधीशं ललिताङ्गस्त्वमप्यसौ ॥३६॥
त्वय्यसाधारणी प्रीतिः ममास्ति जननीचरे । तद्भद्र विषयासङ्गाद्[6] दुरन्ताद्विरमाधुना ॥३७॥
इत्युक्तमात्र एवासौ निर्विण्णः[7] कामभोगतः । महीकम्पे सुते ज्येष्ठे राज्यभारं स्वमर्पयन्[8] ॥३८॥
बहुभिः खेचरैः सार्द्धं जगन्नन्दनशिष्यताम् । प्रपद्य कनकावल्या प्राणतेन्द्रोऽभवद्विभुः ॥३९॥
विंशत्यब्धिस्थितिस्तत्र भोगान्निर्विश्य निश्च्युतः । धातकीखण्डपूर्वाशापश्चिमोरुविदेहगे ॥४०॥

स्नेहसे ललिताङ्गदेवके समीप जाकर उसकी पूजा की ॥२५॥ मैं उसे अत्यन्त चमकीले प्रीतिवर्धन नामके विमानमें बैठाकर अपने स्वर्ग (सोलहवाँ स्वर्ग) ले गया और वहाँ उसका मैंने बहुत ही सत्कार किया ॥२६॥ इस प्रकार मेरी माता का जीव ललिताङ्ग, अत्यन्त सुख संयुक्त स्वर्गमें दिव्य भोगोंको भोगता हुआ जब तक विद्यमान रहा तब तक मैंने कई बार उसका सत्कार किया ॥२७॥ तदनन्तर ललिताङ्गदेव वहाँसे चयकर जम्बूद्वीपके पूर्वविदेह क्षेत्रमें मङ्गलावती देशके विजयार्ध पर्वतकी उत्तर श्रेणीमें गन्धर्वपुरके राजा वासव विद्याधर के घर उसकी प्रभावती नामकी महादेवीसे महीधर नामका पुत्र हुआ ॥ २८-२९ ॥ राजा वासव अपना सब राज्यभार महीधर पुत्रके लिये सौंपकर तथा अरिंजय नामक मुनिराजके समीप मुक्तावली तप तपकर निर्वाणको प्राप्त हुए । रानी प्रभावती पद्मावती आर्यिका के समीप दीक्षित हो उत्कृष्ट रत्नावली तप तपकर अच्युत स्वर्गमें प्रतीन्द्र हुई और तब तक इधर महीधर भी अनेक विद्याओंको सिद्धकर आश्चर्यकारी विभवसे सम्पन्न हो गया ॥३०-३२॥ तदनन्तर किसी दिन मैं पुष्करार्ध द्वीपके पश्चिम भागके पूर्व विदेह सम्बन्धी वत्सकावती देशमें गया वहाँ प्रभाकरी नगरीमें श्री विनयंधर मुनिराजकी निर्वाण कल्याणकी पूजा की और पूजा समाप्त कर मेरु पर्वतपर गया । वहाँ उस समय नन्दनवनके पूर्व दिशा सम्बन्धी चैत्यालयमें स्थित राजा महीधरको (ललिताङ्गका जीव) विद्याओंकी पूजा करनेके लिये उद्यत देखकर मैंने उसे उच्चस्वरमें इस प्रकार समझाया-अहो भद्र, जानते हो, मैं अच्युत स्वर्गका इन्द्र हूँ और तू ललिताङ्ग है । तू मेरी माताका जीव है इसलिये तुझपर मेरा असाधारण प्रेम है । हे भद्र, दुःख देनेवाले इन विषयोंकी आसक्तिसे अब विरक्त हो ॥३३-३७॥ इस प्रकार मैंने उससे कहा ही था कि वह विषयभोगोंसे विरक्त हो गया और महीकंप नामक ज्येष्ठ पुत्रके लिये राज्यभार सौंपकर अनेक विद्याधरोंके साथ जगन्नन्दन मुनिका शिष्य हो गया, तथा कनकावली तप तपकर उसके प्रभावसे प्राणत स्वर्गमें बीस सागरकी स्थितिका धारक इन्द्र हुआ । वहां वह अनेक भोगोंको भोगकर धातकीखण्ड द्वीपके पूर्व दिशा सम्बन्धी पश्चिमविदेह क्षेत्रमें स्थित गंधिलदेशके

---

१ स मे मा-स०, प० । २ उत्तरश्रेण्याम् । ३-वलिं तपः प० । ४ प्रतिबोधयामि स्म । ५ भद्र ल० । ६ विषयासक्तेः । ७ निर्वेगपरः । ८ समर्पयत् अ०, प०, द०, स०, । समर्पयन् ल० । ९ मुनिः ।

गन्धिले विषयेऽयोध्यानगरे जयवर्मणः । सुप्रभायाश्च पुत्रोऽभूत् अजितञ्जय इत्यसौ[1] ॥४१॥
जयवर्माथ निक्षिप्य स्वं राज्यमजितञ्जये । पार्श्वेऽभिनन्दनस्याधात् तपः[2] साचाम्लवर्द्धनम् ॥४२॥
कर्मबन्धननिर्मुक्तो लेभेऽसौ परमं पदम् । यत्रात्यन्तिकमक्षय्यम् अव्याबाधं परं सुखम् ॥४३॥
सुप्रभा च समासाद्य गणिनीं तां सुदर्शनाम् । रत्नावलीमुपोष्याभूद् [3]अच्युतानुदिशाधिपः ॥४४॥
ततोऽजितञ्जयश्चक्री भूत्वा भक्त्याभिनन्दनम् । विवन्दिषुर्जिनं जातः पिहितास्रवनामभाक् ॥४५॥
तदा पापास्रवद्वारविधानान्नाम तादृशम् । लब्ध्वासौ सुचिरं कालं साम्राज्यसुखमन्वभूत् ॥४६॥
प्रबोधितश्च सोऽन्येद्युः मयैव[4] स्नेहनिर्भरम् । भो भव्य मा भवान् साङ्क्षीद्[5] विषयेष्वपहारिषु ॥४७॥
पश्य निर्विषयां तृप्तिम् उशन्त्यात्यन्तिकीं बुधाः । न सास्ति विषयैर्भुक्तैः दिव्यमानुषगोचरैः ॥४८॥
भूयो भुक्तेषु भोगेषु भवेन्नैव[6] रसान्तरम् । स एव चेद् रसः पूर्वः किं तैश्चर्वितचर्वणैः ॥४९॥
भोगैरैन्द्रैर्न यस्तृप्तः स किं तप्स्यति[7] मर्त्यजैः । [8]अनाशितम्भवैरेभिः तदलं भङ्गुरैः सुखैः ॥५०॥
इत्यस्मद्वचनाज्जातवैराग्यः पिहितास्रवः । सहस्रगुणविंशत्या समं पार्थिवकुञ्जरैः ॥५१॥
मन्दरस्थविरस्यान्ते दीक्षामादाय सोऽवधिम् । चारणर्द्धिं च संप्राप्य तिलकान्ते[9]ऽम्बरे गिरौ ॥५२॥
तपो जिनगुणर्द्धिश्च श्रुतज्ञानविधिश्च ते । तदाद[10]दाद्दानायै स्वर्गाग्रसुखसाधनम् ॥५३॥

अयोध्या नामक नगरमें जयवर्मा राजाके घर उसकी सुप्रभा रानीसे अजितंजय नामका पुत्र हुआ ॥३८-४१॥ कुछ समय बाद राजा जयवर्माने अपना समस्त राज्य अजितंजय पुत्रके लिये सौंपकर अभिनन्दन मुनिराजके समीप दीक्षा ले ली और आचाम्लवर्धन तप तपकर कर्म बन्धनसे रहित हो मोक्ष रूप उत्कृष्ट पदको प्राप्त कर लिया। उस मोक्षमें आत्यन्तिक, अविनाशी और अव्याबाध उत्कृष्ट सुख प्राप्त होता है ॥४२-४३॥ रानी सुप्रभा भी सुदर्शना नामकी गणिनीके पास जाकर तथा रत्नावली व्रतके उपवास कर अच्युत स्वर्गके अनुदिश विमानमें देव हुई ॥४४॥ तदनन्तर अजितंजय राजा चक्रवर्ती होकर किसी दिन भक्तिपूर्वक अभिनन्दन स्वामीकी वन्दनाके लिये गया। वन्दना करते समय उसके पापास्रवके द्वार रुक गये थे इसलिये उसका पिहितास्रव नाम पड़ गया। 'पिहितास्रव' इस सार्थक नामको पाकर वह सुदीर्घ काल तक राज्यसुखका अनुभव करता रहा ॥४५-४६॥ किसी दिन स्नेह पूर्वक मैंने उसे इस प्रकार समझाया—हे भव्य, तूं इन नष्ट हो जानेवाले विषयोंमें आसक्त मत हो। देख, पण्डित जन उस तृप्तिको ही सुख कहते हैं जो विषयोंसे उत्पन्न न हुई हो तथा अन्तसे रहित हो। वह तृप्ति मनुष्य तथा देवोंके उत्तमोत्तम विषय भोगने पर भी नहीं हो सकती। ये भोग बार बार भोगे जा चुके हैं, इनमें कुछ भी रस नहीं बदलता। जब इनमें वही पहलेका रस है तब फिर चर्वण किये हुएका पुनः चर्वण करनेमें क्या लाभ है? जो इन्द्र सम्बन्धी भोगोंसे तृप्त नहीं हुआ वह क्या मनुष्योंके भोगोंसे तृप्त हो सकेगा? ये भोग पर्यायका नाश न होने पर भी बीचमें भी नष्ट हो जाते हैं इसलिये इन्हें छोड़ ॥४७-५०॥ इस प्रकार मेरे वचनोंसे जिसे वैराग्य उत्पन्न हो गया है ऐसे पिहितास्रव राजाने बीस हजार बड़े बड़े राजाओंके साथ मन्दिरस्थविर नामक मुनिराजके समीप दीक्षा लेकर अवधिज्ञान तथा चारण ऋद्धि प्राप्त की। उन्हीं पिहितास्रव मुनिराजने अम्बरतिलक नामक पर्वत पर पूर्वभवमें तुम्हें स्वर्गके श्रेष्ठ सुख देनेवाले जिनगुण सम्पत्ति और श्रुतज्ञान सम्पत्ति नामके व्रत दिये थे। इस प्रकार हे पुत्रि, जो पिहितास्रव पहले मेरे गुरु थे—माताके जीव थे वही पिहितास्रव

१—यशाह्वयः प०,अ०,द०,स०,ल०। २ तपस्या चाम्ल अ०,स०,म०,ल०। तपश्चाचाम्ल द०। ३ अच्युतकल्पेऽनुदिशविमानाधीशः। ४ मयैवं अ०,प०,द०,ल०। ५ त्वं सङ्गं मा गाः 'षञ्ज सङ्गे' इति धातुः। भवच्छब्दप्रयोगे प्रथमपुरुष एव भवति।—न् काङ्क्षीत् प०,द०,स०। ६—न्नैषु अ०,प०,द०,स०,ल०। ७ तृप्तिमेष्यति। ८ अतृप्तिकरैः। अनाशितभवैः अ०, प०, द०, स०, ल०। ९ तिलकाम्बरे ब०। १० आदत्त इत्याददाना तस्यै।

ततोऽस्मद्गुरुरेवासीत् तवाप्यभ्यर्हितो[1] गुरुः। द्वाविंशतिं [2]गुरुस्नेहाल्ललिताङ्गानथार्चयम् ॥५४॥
तेष्वन्त्यो भवतीभर्ता[3] प्राग्भवेऽभून्महाबलः। स्वयम्बुद्धोपदेशेन सोऽन्वभूदामरीं श्रियम् ॥५५॥
ललिताङ्गश्च्युतः स्वर्गात् मर्त्यभावे स्थितोऽद्य नः। प्रत्यासन्नतमो बन्धुः स ते भर्ता भविष्यति ॥५६॥
तवाभिज्ञान[4]मन्यच्च वक्ष्ये पद्मानने शृणु। ब्रह्मेन्द्रलान्तवेशाभ्यां शक्रया पृष्टस्तदेत्यहम् ॥५७॥
युगन्धरजिनेन्द्रस्य[5] तीर्थेऽलप्स्वहि[6] दर्शनम्[7]। ततस्तच्चरितं कृत्स्नं [8]संबुभुत्सावहेऽधुना ॥५८॥
ततोऽवोचमहं ताभ्याम् इति तच्चरितं तदा। दम्पतिभ्यां समेताभ्यां[9] युवाभ्याञ्च यदृच्छया ॥५९॥
जम्बूद्वीपस्य पूर्वस्मिन् विदेहे वत्सकाह्वये। विषये भोगभूदेश्ये[10] सीतादक्षिणदिग्गते ॥६०॥
सुसीमानगरे नित्यं[11] वास्तव्यौ ज्ञानवित्तकौ। जातौ प्रहसिताख्यश्च तथा विकसिताह्वयः ॥६१॥
तत्पुराधिपतेः श्रीमदजितञ्जयभूभृतः। [12]नाम्नामृतमतिर्मन्त्री सत्यभामा प्रियास्य च ॥६२॥
तयोः प्रहसिताख्योऽयम् अभूत् सूनुर्विचक्षणः। सखा विकसितो[13]ऽस्यासौ सदेमौ[14] सहचारिणौ ॥६३॥
जात्या[15] हेतुतदाभासच्छलजात्यादिकोविदौ[16]। [17]तीर्णव्याकरणाम्भोधी सभारञ्जनतत्परौ ॥६४॥

व्रतदानकी अपेक्षा तेरे भी पूज्य गुरु हुए। मेरी माताके जीव ललिताङ्गने मुझे उपदेश दिया था इसलिये मैंने गुरुके स्नेहसे अपने समयमें होने वाले बाईस ललिताङ्ग देवोंकी पूजा की थी ॥ ५१-५४ ॥ [उन बाईस ललिताङ्गोंमें से पहला ललिताङ्ग तो मेरी माता मनोहराका जीव था जो कि क्रमसे जन्मान्तरमें पिहितास्रव हुआ] और अन्तका ललिताङ्ग तेरा पति था जो कि पूर्व भवमें महाबल था तथा स्वयंबुद्ध मन्त्रीके उपदेशसे देवोंकी विभूतिका अनुभव करनेवाला हुआ था ॥ ५५ ॥ वह बाईसवां ललिताङ्ग स्वर्गसे च्युत होकर इस समय मनुष्य लोकमें स्थित है। वह हमारा अत्यन्त निकट सम्बन्धी है। हे पुत्रि, वही तेरा पति होगा ॥५६॥ हे कमलानने, मैं उस विषयका परिचय करानेवाली एक कथा और कहता हूँ उसे भी सुन। जब मैं अच्युत स्वर्गका इन्द्र था तब एक बार ब्रह्मेन्द्र और लान्तव स्वर्गके इन्द्रोंने भक्तिपूर्वक मुझसे पूछा था कि हम दोनोंने युगंधर तीर्थंकरके तीर्थमें सम्यग्दर्शन प्राप्त किया है इसलिए इस समय उनका पूर्ण चरित्र जानना चाहते हैं ॥५७-५८॥ उस समय मैंने उन दोनों इन्द्रों तथा अपनी इच्छासे साथ-साथ आये हुए तुम दोनों दम्पतियों (ललितांग और स्वयंप्रभा) के लिए युगन्धर स्वामीका चरित्र इस प्रकार कहा था ॥५९॥

जम्बू द्वीपके पूर्व विदेह क्षेत्रमें एक वत्सकावती देश है जो कि भोगभूमिके समान है। इसी देशमें सीता नदीकी दक्षिण दिशाकी ओर एक सुसीमा नामका नगर है। उसमें किसी समय प्रहसित और विकसित नामके दो विद्वान् रहते थे, वे दोनों ज्ञानरूपी धनसे सहित अत्यन्त बुद्धिमान् थे ॥६०-६१॥ उस नगरके अधिपति श्रीमान् अजितंजय राजा थे। उनके मन्त्रीका नाम अमितमति और अमितमतिकी स्त्रीका नाम सत्यभामा था। प्रहसित, इन दोनोंका ही बुद्धिमान् पुत्र था और विकसित इसका मित्र था। ये दोनों सदा साथ-साथ रहते थे ॥६२-६३॥ ये दोनों विद्वान्, हेतु हेत्वाभास, छल, जाति आदि सब विषयोंके पण्डित, व्याकरणरूपी समुद्रके

---

१ पूज्यः। २ मातृस्नेहात्। ३ त्वत्पुरुषः। ४ चिह्नम्। ५ जिनेशस्य म०, ल०। ६ लब्धवन्तौ। ७ सम्यग्दर्शनम्। ८ सम्यग्बोद्धुमिच्छामः। ९ समागताभ्याम्। १० भोगभूमिसदृशे। 'ईषदसमाप्ते कल्पप् देश्यप् देशीयर्'। ११ नित्यवास्तव्यौ द०, ट०। सदा निवसन्तौ। १२ नाम्नामितमति-अ०, द०, ल०। १३ विकसितास्योऽसौ म०, ल०। १४ सदा तौ प०। सदोभौ द०। १५ जन्मना जननादारभ्य इत्यर्थः। जातौ अ०, प०, स०, द०, ल०। १६ जात्येति वचनेन परोपदेशमन्तरेणैव। हेतुतयाभासच्छलजात्यादिकोविदौ साधनबाधनाच्छलजातिनिग्रहप्रवीणौ। "कमप्यर्थमभिप्रेत्य प्रवृत्ते वचने पुनः। अनिष्टमर्थमारोप्य तन्निषेधः छलं मतम्।" "प्रवृत्ते स्थापनाहेतौ दूषणाशक्तमुत्तरम्। जातिमाहुरथान्ये तु सोऽव्याघातकमुत्तरम्।" "अखण्डिताहंकृतिनां पराहङ्कारखण्डनम्। निग्रहस्तन्निमित्तस्य निग्रहस्थानतोच्यते" १७ लङ्घितः।

तौ राजसम्मतौ वादकण्डूयाकाण्डपण्डितौ[1] । विद्यासंवादगोष्ठीषु निकषोपलतां गतौ ॥६५॥
कदाचिच्च नरेन्द्रेण समं गत्वा मुनीश्वरम् । मतिसागरमद्राष्टाम् अमृतस्रवणर्द्धिकम् ॥६६॥
नृपप्रश्नवशात्तस्मिन् जीवतत्त्वनिरूपणम् । कुर्वाणे [2]चोद्य[3]चुञ्चुत्वात् हृत्यब्रूतां प्रसह्य[4] तौ ॥६७॥
विनोपलब्ध्या[5] सद्भावं[6] प्रतीमः[7] कथमात्मनः । स नास्त्यतः कुतस्तस्य[8] प्रेत्यभावफलादिकम् ॥६८॥
[9]तदुपालम्भमित्युच्चैः आकर्ण्य मुनिपुङ्गवः । वचनं तत्प्रबोधीदं धीरधीः प्रत्यभाषत ॥६९॥
यदुक्तं जीवनास्तित्वेऽनुपलब्धिः प्रसाधनम् । तदसद्धेतुदोषाणां भूयसां तत्र संभवात् ॥७०॥
छद्मस्थानुपलब्धिभ्यः[10] सूक्ष्मादिषु[11] कुतो गतिः । अभावस्य ततो हेतुः[12] साध्यं व्यभिचरत्ययम् ॥७१॥
भवता किन्तु दृष्टोऽसौ त्वत्पितुर्यः पितामहः । तथापि सोऽस्ति चेदस्तु जीवस्याप्येवमस्तिता ॥७२॥
अभावेऽपि विवन्धूणां[13] जीवस्यानुपलब्धितः । स नास्तीति मृषास्तित्वात् सौक्ष्म्यस्येह विवन्धृणः[14] ॥७३॥
जीवशब्दाभिधेयस्य वचसः प्रत्ययस्य[15] च । यथास्तित्वं तथा बोह्योऽप्यर्थस्तस्यास्तु काऽक्षमा ॥७४॥

पारगामी, सभाको प्रसन्न करनेमें तत्पर, राजमान्य, वादविवादरूपी खुजलीको नष्ट करनेके लिए उत्तम वैद्य तथा विद्वानोंकी गोष्ठीमें यथार्थ ज्ञानकी परीक्षाके लिए कसौटीके समान थे ॥६४–६५॥ किसी दिन उन दोनों विद्वानोंने राजाके साथ अमृतस्राविणी ऋद्धिके धारक मतिसागर नामक मुनिराजके दर्शन किये ॥६६॥ राजाने मुनिराजसे जीव तत्त्वका स्वरूप पूछा, उत्तरमें वे मुनिराज जीवतत्त्वका निरूपण करने लगे उसी समय प्रश्न करनेमें चतुर होनेके कारण वे दोनों विद्वान् प्रहसित और विकसित हठपूर्वक बोले कि उपलब्धिके बिना हम जीवतत्त्वपर विश्वास कैसे करें ? जब कि जीव ही नहीं है तब मरनेके बाद होनेवाला परलोक और पुण्य पाप आदिका फल कैसे हो सकता है ? ॥६७-६८॥ वे धीर वीर मुनिराज उन विद्वानोंके ऐसे उपालम्भरूप वचन सुनकर उन्हें समझानेवाले नीचे लिखे वचन कहने लगे ॥६९॥

आप लोगोंने जीवका अभाव सिद्ध करनेके लिये जो अनुपलब्धि हेतु दिया है (जीव नहीं है क्योंकि वह अनुपलब्ध है) वह असत् हेतु है क्योंकि उसमें हेतुसम्बन्धी अनेक दोष पाये जाते हैं ॥७०॥ उपलब्धि पदार्थोंके सद्भावका कारण नहीं हो सकती क्योंकि अल्प ज्ञानियोंको परमाणु आदि सूक्ष्म, राम रावण आदि अन्तरित तथा मेरु आदि दूरवर्ती पदार्थोंकी भी उपलब्धि नहीं होती परन्तु इन सबका सद्भाव माना जाता है इसलिये जीवका अभाव सिद्ध करनेके लिये आपने जो हेतु दिया है वह व्यभिचारी है ॥७१॥ इसके सिवाय एक बात हम आपसे पूछते हैं कि आपने अपने पिताके पितामहको देखा है या नहीं ? यदि नहीं देखा है, तो वे थे या नहीं ? यदि नहीं थे तो आप कहांसे उत्पन्न हुए ? और थे, तो जब आपने उन्हें देखा ही नहीं है—आपको उनकी उपलब्धि हुई ही नहीं ; तब उनका सद्भाव कैसे माना जा सकता है। यदि उनका सद्भाव मानते हों तो उन्हींकी भाँति जीवका भी सद्भाव मानना चाहिये ॥७२॥ यदि यह मान भी लिया जाय कि जीवका अभाव है ; तो अनुपलब्धि होनेसे ही उसका अभाव सिद्ध नहीं हो सकता; क्योंकि ऐसे कितने ही सूक्ष्म पदार्थ हैं जिनका अस्तित्व तो है परन्तु उपलब्धि नहीं होती ॥७३॥ जैसे जीव अर्थको कहनेवाले 'जीव' शब्द और उसके ज्ञानका जीवज्ञान-सद्भाव माना जाता है उसी प्रकार उसके वाच्यभूत बाह्य-जीव अर्थके भी सद्भावको माननेमें क्या हानि है ? क्योंकि जब 'जीव' पदार्थ ही नहीं होता तो उसके वाचक शब्द कहांसे आते और उनके सुननेसे वैसा ज्ञान भी कैसे होता ? ॥ ७४ ॥

१ वादस्य कण्डूया वादकण्डूया तस्या काण्डः काण्डनं तत्र पण्डितौ निपुणौ । २ साक्षेपप्रश्नप्रतीतत्वात् । ३–चञ्चुत्वात् अ०, प०, म०, द०, ल० । ४ बलात्कारेण । 'प्रसह्य तु हठार्थकम्' इत्यभिधानात् । ५ दर्शनेन । ६ अस्तित्वम् । ७ विश्वासं कुर्मः । ८ प्रेत्य उत्तरभवः । ९ तज्जीवदूषणम् । १०—नुपलब्धिश्चेत् अ०, प०, द०, ल० । ११ परमाणुपिशाचादिषु । १२ साधनम् । १३ शरीरादीनाम् । विवक्षूणां प०, द०, स० । १४ वन्धकस्य । १५ ज्ञानस्य ।

जीवशब्दोऽयमभ्रान्तं बाह्यमर्थमपेक्षते । 'संज्ञात्वाल्लौकिक[2]भ्रान्ति[3]मतहेत्वादिशब्दवत्[4] ॥७५॥
इत्यादियुक्तिभिर्जीवतत्त्वं स निरणीनयत्[5] । तावपि ज्ञानजं गर्वम् उज्झित्वा नेमतुर्मुनिम् ॥७६॥
गुरोस्तस्यैव पार्श्वे तौ गृहीत्वा परमं तपः । सुदर्शनमथाचाम्लवर्द्धनं चाप्युपोषतुः ॥७७॥
निदानं वासुदेवत्वे व्यधाद्विकसितोऽप्यभुत्[6] । कालान्ते तावजायेतां महाशुक्रसुरोत्तमौ ॥७८॥
इन्द्रप्रतीन्द्रपदयोः षोडशाब्ध्युपमस्थिती । तौ तत्र सुख[7]साद्भूतौ अन्वभूतां सुरश्रियम् ॥७९॥
स्वायुरन्ते ततश्च्युत्वा धातकीखण्डगोचरे । विदेहे पुष्कलावत्यां पश्चिमार्द्धपुरोगते[8] ॥८०॥
विषये पुण्डरीकिण्यां पुर्यां राज्ञो धनञ्जयात् । जयसेनायशस्वत्योः देव्योर्व्यत्यासितक्रमौ[9] ॥८१॥
जज्ञाते तनयौ रामकेशवस्थानभागिनौ । ज्यायान् महाबलोऽन्यश्च ख्यातोऽतिबलसंज्ञया ॥८२॥
राज्यान्ते केशवेऽतीते तपस्तप्त्वा महाबलः । पार्श्वे समाधिगुप्तस्य प्राणतेन्द्रस्ततोऽभवत् ॥८३॥
भुक्त्वामरीं श्रियं तत्र विंशत्यब्ध्युपमात्यये । धातकीखण्डपश्चार्द्ध[10]पुरोवर्त्तिविदेहगे ॥८४॥
विषये वत्सकावत्यां प्रभाकर्याः पुरः[11] प्रभोः । महासेनस्य भूभर्त्तुः प्रतापानतविद्विषः ॥८५॥
देव्यां वसुन्धराख्यायां जयसेनाह्वयोऽजनि । प्रजानां जनितानन्दः चन्द्रमा इव नन्दनः ॥८६॥
क्रमाच्चक्रधरो भूत्वा प्रजाः स चिरमन्वशात् । विरक्तधीश्च भोगेषु प्रव्रज्यामार्हतीं श्रितः ॥८७॥

जीव शब्द अभ्रान्त बाह्य पदार्थकी अपेक्षा रखता है क्योंकि वह संज्ञावाचक शब्द है। जो जो संज्ञावाचक शब्द होते हैं, वे किसी संज्ञासे अपना सम्बन्ध रखते हैं जैसे लौकिक घट आदि शब्द, भ्रान्ति शब्द, मत शब्द और हेतु आदि शब्द। इत्यादि युक्तियोंसे मुनिराजने जीवतत्त्वका निर्णय किया, जिसे सुनकर उन दोनों विद्वानोंने ज्ञानका अहंकार छोड़कर मुनिको नमस्कार किया ॥ ७५-७६ ॥ उन दोनों विद्वानोंने उन्हीं मुनिके समीप उत्कृष्ट तप ग्रहणकर सुदर्शन और आचाम्लवर्द्धन व्रतोंके उपवास किये ॥ ७७ ॥ विकसितने नारायण पद प्राप्त होनेका निदान भी किया। आयुके अन्तमें दोनों शरीर छोड़कर महाशुक्र स्वर्गमें इन्द्र और प्रतीन्द्र पदपर सोलह सागर प्रमाण स्थितिके धारक उत्तम देव हुए। वे वहां सुखमें तन्मय होकर स्वर्ग-लक्ष्मीका अनुभव करने लगे ॥ ७८-७९ ॥ अपनी आयुके अन्तमें दोनों वहांसे चयकर धातकी खण्डद्वीपके पश्चिम भागसम्बन्धी पूर्वविदेह क्षेत्रमें पुष्कलावती देशकी पुण्डरीकिणी नगरीमें राजा धनंजयकी जयसेना और यशस्वती रानीके बलभद्र और नारायणका पद धारण करनेवाले पुत्र उत्पन्न हुए। अब उत्पत्तिकी अपेक्षा दोनोंके क्रममें विपर्यय हो गया था। अर्थात् बलभद्र ऊर्ध्वगामी था और नारायण अधोगामी था। बड़े पुत्रका नाम महाबल था और छोटेका नाम अतिबल था (महाबल प्रहसितका जीव था और अतिबल विकसितका जीव था) ॥ ८०-८२ ॥ राज्यके अन्तमें जब नारायण अतिबलकी आयु पूर्ण हो गई तब महाबलने समाधि-गुप्त मुनिराजके पास दीक्षा लेकर अनेक तप तपे, जिससे आयुके अन्तमें शरीर छोड़कर वह प्राणत नामक चौदहवें स्वर्गमें इन्द्र हुआ ॥ ८३ ॥ वहां वह बीस सागर तक देवोंकी लक्ष्मीका उपभोग करता रहा। आयु पूर्ण होनेपर वहांसे चयकर धातकीखण्ड द्वीपके पश्चिम भागसम्बन्धी पूर्वविदेह क्षेत्रमें स्थित वत्सकावती देशकी प्रभाकरी नगरीके अधिपति तथा अपने प्रतापसे समस्त शत्रुओंको नम्र करनेवाले महासेन राजाकी वसुन्धरा नामक रानीसे जयसेन नामका पुत्र हुआ। वह पुत्र चन्द्रमाके समान समस्त प्रजाको आनन्दित करता था ॥ ८४-८६ ॥ अनुक्रमसे उसने चक्रवर्ती

१ वाचकत्वात्। २ लौकिकं घटमानयेत्यादि। ३ भ्रान्तमतहेत्वादि-म०। -भ्रान्ति मत-अ०, स०। -भ्रान्तमतं हेत्वादि-द०, ल०। ३ इष्टाभिप्रायः। ४ धूलत्वादित्यादिशब्दवत्। ५ निश्चयमकारयत्। ६ अज्ञानी। -प्यसत् द०। -प्यभूत् ल०। ७ सुखाधीनौ। ८ पूर्वदिग्गते। ९ [अनुल्लङ्घितक्रमौ 'ऊर्द्धगाम्यधोगामिनौ' इति 'द'पुस्तके]। १० पूर्वदिग्वर्ति। ११ पुरस्य।

सीमन्धरार्हत्पादाब्जमूले [1]षोडशकारणीम्[2] । भावयन् सुचिरं तेपे तपो निरतिचारकम् ॥८८॥
स्वायुरन्तेऽहमिन्द्रोऽभूद् ग्रैवेयेषूर्ध्वमध्यमे । त्रिंशदब्ध्युपमं कालं दिव्यं तत्रान्वभूत् सुखम् ॥८९॥
ततोऽवतीर्णः स्वर्गाग्रात् पुष्करार्द्धपुरोगते । विदेहे मङ्गलावत्यां प्राक्पुरे रत्नसञ्चये ॥९०॥
अजितञ्जयभूपालाद् वसुमत्याः सुतोऽभवत् । युगन्धर इति ख्यातिम् उद्वहन्नृसुरार्चितः ॥९१॥
कल्याणत्रितये वर्यां स सपर्यामवापिवान् । क्रमात् कैवल्यमुत्पाद्य महानेष महीयते ॥९२॥
शुभानुबन्धिना सोऽयं कर्मणाऽभ्युदयं सुखम् । [3]षट्षष्ट्यब्ध्युपमं कालं भुक्त्वार्हन्त्यमथासदत् ॥९३॥
[4]युग्यो धर्मरथस्यार्यं युगज्येष्ठो युगन्धरः । तीर्थकृत्त्रायते[5] सोऽस्मान् भव्याब्जवनभानुमान् ॥९४॥
तदेति मद्वचः श्रुत्वा बहवो दर्शनं श्रिताः । युवां च धर्मसंवेगं[6] परमं समुपागतौ ॥९५॥
पिहितास्रवभट्टारकैवल्योपजनक्षणे[7] । समं गत्वार्चयिष्याम[8]: तदा पुत्रि स्मरस्यदः ॥९६॥
अभिजानासि तत्पुत्रि स्वयम्भूरमणोदधिम् । क्रीडाहेतोर्व्रजिष्यामो[9] गिरिं चाञ्जनसंज्ञकम् ॥९७॥
श्रीमती गुरुणेत्युक्ता तात युष्मत्प्रसादतः । अभिजानामि तत्सर्वम् इत्यसौ [10]प्रत्यभाषत ॥९८॥
[11]गुरोः स्मरामि कैवल्यपूजां [12]द्युतिलके गिरौ । [13]विहृतिं चाञ्जने शैले स्वयम्भूरमणे च यत् ॥९९॥

होकर पहले तो चिरकाल तक प्रजाका शासन किया और फिर भोगोंसे विरक्त हो जिनदीक्षा धारण की ॥ ८७ ॥ सीमन्धर स्वामीके चरणकमलोंके मूलमें सोलह कारण भावनाओंका चिन्तवन करते हुए उसने बहुत समय तक निर्दोष तपश्चरण किया ॥ ८८ ॥ फिर आयुका अन्त होनेपर उपरिम ग्रैवेयकके मध्यभाग अर्थात् आठवें ग्रैवेयकमें अहमिन्द्र पद प्राप्त किया। वहां तीस सागर तक दिव्य सुखोंका अनुभव कर वहांसे अवतीर्ण हुआ और पुष्करार्ध द्वीपके पूर्व विदेह क्षेत्रमें मंगलावती देशके रत्न-संचय नगरमें अजितंजय राजाकी वसुमती रानीसे युगन्धर नामका प्रसिद्ध पुत्र हुआ। वह पुत्र मनुष्य तथा देवों द्वारा पूजित था ॥ ८९-९१ ॥ वही पुत्र गर्भ, जन्म और तप इन तीनों कल्याणोंमें इन्द्र आदि देवों द्वारा की हुई पूजाको प्राप्त कर आज अनुक्रमसे केवलज्ञानी हो सबके द्वारा पूजित हो रहा है ॥ ९२ ॥ इस प्रकार उस प्रहसितके जीवने पुण्यकर्मसे छयासठ सागर (१६ + २० + ३० = ६६) तक स्वर्गोंके सुख भोगकर अरहन्त पद प्राप्त किया है ॥ ९३ ॥ ये युगन्धर स्वामी इस युगके सबसे श्रेष्ठ पुरुष हैं, तीर्थकर हैं, धर्म-रूपी रथके चलानेवाले हैं तथा भव्य जीवरूप कमल वनको विकसित करनेके लिये सूर्यके समान हैं। ऐसे ये तीर्थंकर देव हमारी रक्षा करें—संसारके दुःख दूरकर मोक्ष पद प्रदान करें ॥ ९४ ॥ उस समय मेरे ये वचन सुनकर अनेक जीव सम्यग्दर्शनको प्राप्त हुए थे तथा आप दोनों भी (ललितांग और स्वयंप्रभा) परम धर्मप्रेमको प्राप्त हुए थे ॥ ९५ ॥ हे पुत्रि, तुम्हें इस बातका स्मरण होगा कि जब पिहितास्रव भट्टारकको केवलज्ञान उत्पन्न हुआ था उस समय हम लोगों ने साथ-साथ जाकर ही उनकी पूजा की थी ॥ ९६ ॥ हे पुत्रि, तू यह भी जानती होगी कि हम लोग क्रीड़ा करनेके लिये स्वयंभूरमण समुद्र तथा अंजनगिरिपर जाया करते थे ॥ ९७ ॥ इस प्रकार पिताके कह चुकनेपर श्रीमतीने कहा कि हे तात, आपके प्रसादसे मैं यह सब जानती हूं ॥९८॥ अम्बरतिलक पर्वतपर गुरुदेव पिहितास्रव मुनिके केवलज्ञानकी जो पूजा की थी वह भी

१ षोडशकारणानि । षोडशकारणानां समाहारः । २—कारणम् अ०, प०, द०, स०, ल० । ३ षट् षष्ट्यब्ध्युपमम् इत्यस्य पदस्य निर्वाहः क्रियते । महाशुक्रे स्वर्गे षोडशाब्ध्युपमस्थितिः । प्राणते कल्पे विंशत्यब्ध्युपमायुः स्थितिः । ऊर्ध्वग्रैवेयेषु ऊर्ध्वमध्यमे त्रिंशदब्ध्युपमायुः स्थितिः । एतेषामायुषां सम्मेलने षट्षष्ट्युपमः कालो जात इति यावत् । ४ युगवाहः । ५ त्रायतां सो—प०, म०, द०, स०, ल० । —त्रायतां तस्मात् अ०, स० । ६ धर्मे धर्मफले चानुरागः संवेगस्तम् । ७ केवलज्ञानोत्पत्तिसमये । ८ पूजयिष्यामः । 'स्मृत्यर्थे यदि लृडिति' भूतानद्यतने लृट् । ९ अगमाम । १० प्रत्युत्तरमदात् । ११ पिहितास्रवस्य । १२ अम्बरतिलके । १३ विहृतं द०, ट० । विहरणम् ।

प्रत्यक्षमिव तत्सर्वं परिस्फुरति मे हृदि । किन्तु कान्तः क्व मे जात इति दोलायते मतिः[1] ॥१००॥
इति ब्रुवाणां तां भूयः प्रत्युवाच नराधिपः । पुत्रि स्वर्गस्थयोरेव[2] युवयोः प्राक्च्युतोऽच्युतात् ॥१०१॥
नगर्यामिह [3]धुर्योऽहं यशोधरमहीपतेः । देव्या वसुन्धरायाश्च वज्रदन्तः सुतोऽभवम् ॥१०२॥
[4]नियुताद्धप्रसंख्यानि[5] पूर्वाण्यायुःस्थितौ यदा । [6]भवतोः परिशिष्टानि तदाहं प्रच्युतो दिवः ॥१०३॥
युवां च परिशिष्टायुः भुक्त्वान्ते त्रिदिवाच्च्युतौ । जातौ यथास्वमत्रैव विषये राजदारकौ ॥१०४॥
[7]जनितेतस्तृतीयेऽह्नि ललिताङ्गचरेण ते । सङ्गमोऽद्यैव तद्वार्तां पण्डितानेष्यति[8] स्फुटम् ॥१०५॥
[9]पैतृष्वस्त्रीय एवायं तव[10] भर्ता भविष्यति । तदियं मृग्यमाणैव वल्ली पादेऽवसज्यते[11] ॥१०६॥
मातुलान्यास्तवायान्त्या वयमप्यद्य पुत्रिके । प्रत्युद्गच्छाम[12] इत्युक्त्वा राजोत्थाय ततोऽगमत् ॥१०७॥
पण्डिता तत्क्षणं प्राप्ता प्रफुल्लवदनाम्बुजा । मुखरागेण संलक्ष्यकार्यसिद्धिरुवाच ताम् ॥१०८॥
त्वं दिष्ट्या वर्द्धसे कन्ये पूर्णस्तेऽद्य मनोरथः । सप्रपञ्चञ्च तद्वच्मि सावधानमितः शृणु ॥१०९॥
[13]यदा पट्टकमादाय गताहं [14]त्वन्निदेशतः । तदास्थां विपुलाश्चर्ये महापूतजिनालये ॥११०॥
मया तत्र विचित्रस्य पट्टकस्य प्रसारणे । बहवस्तदविज्ञाय गताः पण्डितमानिनः ॥१११॥

मुझे याद है तथा अंजनगिरि और स्वयंभूरमण समुद्रमें जो विहार किये थे वे सब मुझे याद हैं ॥ ९९ ॥ हे पिता जी, वे सब बातें प्रत्यक्षकी तरह मेरे हृदयमें प्रतिभासित हो रही हैं किन्तु मेरा पति ललिताङ्ग कहाँ उत्पन्न हुआ है ? इसी विषयमें मेरा चित्त चञ्चल हो रहा है ॥ १०० ॥ इस प्रकार कहती हुई श्रीमतीसे वज्रदन्त पुनः कहने लगे कि हे पुत्रि, जब तुम दोनों स्वर्गमें स्थित थे तब मैं तुम्हारे च्युत होनेके पहले ही अच्युत स्वर्गसे च्युत हो गया था और इस नगरीमें यशोधर महाराज तथा वसुन्धरा रानीके वज्रदन्त नामका श्रेष्ठ पुत्र हुआ हूँ ॥ १०१-१०२ ॥ जब आप दोनोंकी आयुमें पचास हजार पूर्व वर्ष बाकी थे तब मैं स्वर्गसे च्युत हुआ था ॥ १०३ ॥ तुम दोनों भी अपनी बाकी आयु भोगकर स्वर्गसे च्युत हुए और इसी देशमें यथायोग्य राजपुत्र और राजपुत्री हुए हो ॥ १०४ ॥ आजसे तीसरे दिन तेरा ललिताङ्गके जीव राजपुत्रके साथ समागम हो जावेगा । तेरी पण्डिता सखी आज ही उसके सब समाचार स्पष्ट रूपसे लावेगी ॥ १०५ ॥ हे पुत्रि, वह ललिताङ्ग तेरी बुआके ही पुत्र उत्पन्न हुआ है और वही तेरी भर्ता होगा । यह समागम ऐसा आ मिला है मानो जिस बेलको खोज रहे हों वह स्वयं ही अपने पांवमें आ लगी हो ॥ १०६ ॥ हे पुत्री, तेरी मामी आज आ रही हैं इसलिये उन्हें लानेके लिये हम लोग भी उनके सन्मुख जाते हैं ऐसा कहकर राजा वज्रदन्त उठकर वहांसे बाहिर चले गये ॥ १०७ ॥

राजा गये ही थे कि उसी क्षण पण्डिता सखी आ पहुँची । उस समय उसका मुख प्रफुल्लित हो रहा था और मुखकी प्रसन्न कान्ति कार्यकी सफलताको सूचित कर रही थी । वह आकर श्रीमतीसे बोली ॥ १०८ ॥ हे कन्ये, तू भाग्यसे बढ़ रही है (तेरा भाग्य बड़ा बलवान् है) । आज तेरा मनोरथ पूर्ण हुआ है । मैं विस्तारके साथ सब समाचार कहती हूँ, तू सावधान होकर सुन ॥ १०९ ॥ उस समय मैं तेरी आज्ञासे चित्रपट लेकर यहांसे गई और अनेक आश्चर्योंसे भरे हुए महापूत नामक जिनालयमें जा ठहरी ॥ ११० ॥ मैंने वहाँ जाकर तेरा विचित्र चित्रपट फैलाकर रख दिया । अपने आपको पण्डित माननेवाले कितने ही मूर्ख लोग उसका आशय नहीं

---

१ मनः म०, ल० । २ सतोः । ३ धुरन्धरः । ४ वियुतार्द्ध-ल० । ५ पञ्चाशत्सहस्रसंख्यानि । ६ युवयोः । ७ भविष्यति । ८ गृहीत्वा आगमिष्यति । ९ पितुर्भगिन्याः पुत्रः । १० इदं पदं देहलीदीपन्यायेन सम्बन्धनीयम् । ११ संसक्ता भवति । १२ अभिमुखं गच्छामः । १३ तदा ल० । १४ तवाज्ञातः ।

तौ तु वासवदुर्दान्तौ यावली[1]कविचक्षणौ । दृष्ट्वास्मत्पट्टकं हृष्टा स्वानुमानाद्वोचताम् ॥११२॥
पट्टकार्थं[2] स्फुटं विद्वो[3] जातिस्मृतिमुपेयुषी । व्यलिखद्राजपुत्रीदं स्वपूर्वभवचेष्टितम् ॥११३॥
इति नागरिकत्वेन प्रवृत्तौ नायकब्रुवौ[4] । तावबोचं विहस्याहं चिरात् स्यादिदमीदृशम् ॥११४॥
हठात् प्रकृतगूढार्थं संप्रश्ने च मया कृते । जोष[5]मास्तां विलक्षौ[6] तौ मूकीभूय ततो गतौ ॥११५॥
[7]श्वसुर्यस्ते युवा वज्रजङ्घस्तत्रागमत्ततः । दिव्येन वपुषा कान्त्या दीप्त्या[8] चानुपमो भुवि ॥११६॥
अथ प्रदक्षिणीकृत्य भव्यस्तज्जिनमन्दिरम् । स्तुत्वा प्रणम्य चाभ्यर्च्य पट्टशालामुपासदत् ॥११७॥
निर्वर्ण्य[9] पट्टकं तत्र श्रीमानिदमवोचत । [10]ज्ञातपूर्वमिवेदं मे चरितं पट्टकस्थितम् ॥११८॥
वर्णनातीतमत्रेदं[11] चित्रकर्म विराजते । [12]मानोन्मानप्रमाणाढ्यं निम्नोन्नतविभागवत् ॥११९॥
अहो सुनिपुणं चित्रकर्मेदं विलसच्छवि । रसभावान्वितं हारि रेखामाधुर्यसङ्गतम् ॥१२०॥
अत्रास्मद्भवसम्बन्धः[13] पूर्वोऽलेखि[14] सविस्तरम् । [15]श्रीप्रभाधिपतां साक्षात् पश्यामीवेह मामिकाम् ॥१२१॥
अहो स्त्रीरूपमत्रेदं नितरामभिरोचते । स्वयम्प्रभाङ्गसंवादि[16] विचित्राभरणोज्ज्वलम् ॥१२२॥

समझ सके । इसलिये देखकर ही वापिस चले गये थे ॥ १११ ॥ हां, वासव और दुर्दान्त, जो झूठ बोलनेमें बहुत ही चतुर थे, हमारा चित्रपट देखकर बहुत प्रसन्न हुए और फिर अपने अनुमानसे बोले कि हम दोनों चित्रपटका स्पष्ट आशय जानते हैं । किसी राजपुत्रीको जाति-स्मरण हुआ है, इसलिये उसने अपने पूर्व भवकी समस्त चेष्टाएँ लिखी हैं ॥ ११२-११३ ॥ इस प्रकार कहते-कहते वे बड़ी चतुराईसे बोले कि इस राजपुत्रीके पूर्व जन्मके पति हम ही हैं । मैंने बहुत देर तक हँसकर कहा कि कदाचित् ऐसा हो सकता है ॥ ११४ ॥ अनन्तर जब मैंने उनसे चित्रपटके गूढ़ अर्थोंके विषयमें प्रश्न किये और उन्हें उत्तर देनेके लिये बाध्य किया तब वे चुप रह गये और लज्जित हो चुपचाप वहांसे चले गये ॥११५॥ तत्पश्चात् तेरे श्वसुरका तरुण पुत्र वज्रजंघ वहाँ आया, जो अपने दिव्य शरीर, कान्ति और तेजके द्वारा समस्त भूतलमें अनुपम था ॥ ११६ ॥ उस भव्यने आकर पहले जिनमन्दिरकी प्रदक्षिणा दी । फिर जिनेन्द्रदेवकी स्तुति कर उन्हें प्रणाम किया, उनकी पूजा की और फिर चित्रशालामें प्रवेश किया ॥ ११७ ॥ वह श्रीमान् इस चित्रपटको देखकर बोला कि ऐसा मालूम होता है मानो इस चित्रपटमें लिखा हुआ चरित्र मेरा पहले का जाना हुआ हो ॥ ११८ ॥ इस चित्रपटपर जो यह चित्र चित्रित किया गया है इसकी शोभा वाणीके अगोचर है । यह चित्र लम्बाई चौड़ाई ऊंचाई आदिके ठीक-ठीक प्रमाणसे सहित है तथा इसमें ऊंचे नीचे सभी प्रदेशोंका विभाग ठीक-ठीक दिखलाया गया है ॥ ११९ ॥ अहा, यह चित्र बड़ी चतुराईसे भरा हुआ है, इसकी दीप्ति बहुत ही शोभायमान है, यह रस और भावोंसे सहित है, मनोहर है तथा रेखाओंकी मधुरतासे संगत है ॥ १२० ॥ इस चित्रमें मेरे पूर्वभवका सम्बन्ध विस्तारके साथ लिखा गया है । ऐसा जान पड़ता है मानो मैं अपने पूर्वभवमें होनेवाले श्रीप्रभ विमानके अधिपति ललिताङ्गदेवके स्वामित्वको साक्षात् देख रहा हूँ ॥ १२१ ॥ अहा, यहाँ यह स्त्रीका रूप अत्यन्त शोभायमान हो रहा है । यह अनेक प्रकारके आभरणोंसे

---

१ मृषा । २ पट्टे स्थितार्थम् । ३ जानीवः । ४ आत्मानं नायकं ब्रुवत इति । ५ तूष्णीम् । ६ लज्जितौ । उक्तञ्च विदग्धचूडामणौ–'विलक्षो विस्मयान्वितः' इत्येतस्य व्याख्यानावसरे 'आत्मनश्चरिते सम्यग्ज्ञातेऽन्तर्यस्य जायते । अपत्रपातिमहती स विलक्ष इति स्मृतः ॥" इति । ७ वरः । ८ तेजसा । ९ अवलोक्य । 'निवर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।' इत्यमरः । १० पूर्वस्मिन् ज्ञातम् । ११ पटे । १२ "आयामसंश्रितं मानमिह मानं निगद्यते ।' नाहसंश्रितमुन्मानं प्रमाणं व्याससंश्रितम् ॥" १३ सम्बन्धं ल० । १४ पौर्वोऽलेखि म० । १५ श्रीप्रभविमानाधिपतित्वं ललिताङ्गत्वम् । १६ समानम् ।

किन्त्वत्र कतिचित् कस्माद् गूढानि प्रकृतानि भोः । मन्ये सम्मोहनायेदं जनानामिति चित्रितम् ॥१२३॥
ऐशानो लिखितः कल्पः श्रीप्रभं च प्रभास्वरम्[1] । [2]श्रीप्रभाधिपतेः पार्श्वे दर्शितेयं स्वयम्प्रभा ॥१२४॥
कल्पानोकहवीथीयम् इदमुत्पङ्कजं सरः । दोलागृहमिदं रम्यं रम्योऽयं कृतकाचलः ॥१२५॥
कृतप्रणयकोपेयं दर्शितात्र पराङ्मुखी । मन्दारवनवीथ्यन्ते लतेव पवनाहता ॥१२६॥
[3]कनकाद्रितटे क्रीडा ललिता दर्शितावयोः । इतो मणितटोत्सर्पत्प्रभाकाण्डपटावृते[4] ॥१२७॥
निगूढ[5]प्रेमसद्भावकैतवापादितेर्ष्यया । शय्योत्सङ्गे[6] मदुत्सङ्गात्[7] बलात् पादोऽर्पितोऽनया ॥१२८॥
मणिनूपुरझङ्कारचारुणा चरणेन माम् । ताडयन्तीह संरुद्धा काञ्च्या सख्येव गौरवात् ॥१२९॥
कृतव्यलीककोपं मां प्रसादयितुमानता । स्वोत्तमाङ्गेन पादौ मे घटयन्तीह दर्शिता ॥१३०॥
अच्युतेन्द्रसमायोगगुरु[8]पूजादिविस्तरः । दर्शितोऽत्र निगूढस्तु भावः प्रणयजो मिथः[9] ॥१३१॥
इह प्रणयकोपेऽस्याः पादयोर्निपतन्निह । कर्णोत्पलेन मृदुना ताड्यमानो न दर्शितः ॥१३२॥
सालक्तकपदाङ्गुष्ठमुद्रयाऽस्मदुरःस्थले । वाल्लभ्यलाञ्छनं[10] दत्तं प्रियया नात्र दर्शितम् ॥१३३॥

उज्ज्वल है और ऐसा जान पड़ता है मानो स्वयंप्रभाका ही रूप हो ॥ १२२ ॥ किन्तु इस चित्रमें कितने ही गूढ़ विषय क्यों दिखलाये गये हैं ? मालूम होता है कि अन्य लोगोंको मोहित करनेके लिये ही यह चित्र बनाया गया है ॥ १२३ ॥ यह ऐशान स्वर्ग लिखा गया है । यह देदीप्यमान श्रीप्रभविमान चित्रित किया गया है और यह श्रीप्रभविमानके अधिपति ललिताङ्गदेवके समीप स्वयंप्रभादेवी दिखलाई गई हैं ॥ १२४ ॥ यह कल्पवृक्षोंकी पंक्ति है, यह फूले हुए कमलोंसे शोभायमान सरोवर है, यह मनोहर दोलागृह है और यह अत्यन्त सुन्दर कृत्रिम पर्वत है ॥ १२५ ॥ इधर यह प्रणय-कोप कर पराङ्मुख बैठी हुई स्वयंप्रभा दिखलाई गई है जो कल्पवृक्षोंके समीप वायुसे झकोरी हुई लताके समान शोभायमान हो रही है ॥१२६॥ इधर तट भाग पर लगे हुए मणियोंकी फैलती हुई प्रभारूपी परदासे तिरोहित मेरुपर्वतके तट पर हम दोनोंकी मनोहर क्रीड़ा दिखलाई गई है ॥ १२७ ॥ इधर, अन्तःकरणमें छिपे हुए प्रेमके साथ कपटसे कुछ ईर्ष्या करती हुई स्वयंप्रभाने यह अपना पैर हठपूर्वक मेरी गोदीसे हटाकर शय्याके मध्यभाग पर रक्खा है ॥ १२८ ॥ इधर, यह स्वयंप्रभा मणिमय नूपुरोंकी झंकारसे मनोहर अपने चरणकमलके द्वारा मेरा ताड़न करना चाहती है परन्तु गौरवके कारण ही मानो सखीके समान इस करधनीने उसे रोक दिया है ॥ १२९ ॥ इधर दिखाया गया है कि मैं बनावटी कोप किये हुए बैठा हूँ और मुझे प्रसन्न करनेके लिये अति नम्रीभूत हुई स्वयंप्रभा अपना मस्तक मेरे चरणों पर रख रही है ॥ १३० ॥ इधर यह अच्युत स्वर्गके इन्द्रके साथ हुई भेंट तथा पिहितास्रव गुरुकी पूजा आदिका विस्तार दिखलाया गया है और इस स्थान पर परस्परके प्रेम भावसे उत्पन्न हुआ रति आदि भाव दिखलाया गया है ॥ १३१ ॥ यद्यपि इस चित्रमें अनेक बातें दिखला दी गई हैं; परन्तु कुछ बातें छूट भी गई हैं। जैसे कि एक दिन मैं प्रणय-कोपके समय इस स्वयंप्रभाके चरणोंपर पड़ा था और यह अपने कोमल कर्णफूलसे मेरा ताड़न कर रही थी; परन्तु वह विषय इसमें नहीं दिखाया गया है ॥ १३२ ॥ एक दिन इसने मेरे वक्षःस्थल पर महावर लगे हुए अपने पैरके अंगूठेसे छाप लगाई थी। वह छाप क्या थी मानो 'यह हमारा पति है' इस बातको सूचित करनेवाला चिह्न

---

१ प्रभास्करम् अ० । २ विमानम् । ३ मेरु । ४ यवनिका । ५ नितरां गूढो निगूढः, प्रेम्णः सद्भावः अस्तित्वं प्रेमसद्भावः । निगूढः प्रेमसद्भावो यस्याः सा । कैतवेनापादिता ईर्ष्या यस्याः सा । निगूढप्रेमसद्भावा चासौ कैतवापादितेर्ष्या च तया । ६ मध्ये । ७ अङ्कात् । ८ गुरुः पिहितास्रवः । ९ रहसि । १० वल्लभाया भावो वाल्लभ्यं तस्य चिह्नम् ।

कपोलफलके चास्याः [1]फलिनीफलसत्विषि । लिखितान्यालेख्य[2]पत्राणि नाहमत्र निदर्शितः ॥१३४॥
नूनं स्वयम्प्रभाचर्याहस्तनैपुण्यमीदृशम् । नान्यस्य स्त्रीजनस्येदृक् प्रावीण्यं स्यात् कलाविधौ ॥१३५॥
इति प्रतर्कयन्नेव पर्याकुल इव क्षणम् । शून्यान्तःकरणोऽध्यासीत्[3] [4]किमप्यामीलितेक्षणः ॥१३६॥
उदश्रुलोचनश्चायं दशामन्त्या[5]मिवोपयन् । दिष्ट्या संधारितोऽभ्येत्य तदा सख्येव मूर्च्छया ॥१३७॥
तदवस्थं तमालोक्य नाहमेवोन्मनायिता[6] । चित्रस्थान्यपि रूपाणि प्राया[7]न्प्रायोऽन्तरार्द्रताम् ॥१३८॥
[8]प्रत्याश्वासमथानीतः सोपायं परिचारिभिः । त्वदर्पितमनोवृत्तिः सोऽदर्शत्त्वन्म[9]यीर्दिशः ॥१३९॥
अचिराल्लब्धसंज्ञश्च[10] पृष्टवानिति मामसौ । भद्रे केनेदमालेख्ये[11] लिखितं नः पुरेहितम्[12] ॥१४०॥
प्रत्युक्तश्च मयेत्यस्ति स्त्रीसर्ग[13]स्यैकनायिका । दुहिता मातुलान्यास्ते श्रीमतीति पतिंवरा[14] ॥१४१॥
तां विद्धि मदनस्येव पताकामुज्ज्वलांशुकाम्[15] । स्त्रीसृष्टेरिव निर्माण[16]रेखां माधुर्यशालिनीम् ॥१४२॥
समग्रयौवनारम्भसूत्रपातैरिवायतैः । दृष्टिपातैः [17]स्वभूस्तस्याः श्लाघते शरकौशलम् ॥१४३॥
लक्ष्मीकराग्रसंसक्तलीलाम्बुजजिगीषया । तद्वक्त्रेन्दुः सदा भाति नूनं दन्तांशुपेशलः ॥१४४॥

ही था। परन्तु वह विषय भी यहाँ नहीं दिखाया गया है ॥ १३३ ॥ मैंने इसके प्रियंगु फलके समान कान्तिमान् कपोलफलक पर कितनी ही बार पत्र-रचना की थी, परन्तु वह विषय भी इस चित्रमें नहीं दिखाया है ॥ १३४ ॥ निश्चयसे यह हाथकी ऐसी चतुराई स्वयंप्रभाके जीवकी ही है क्योंकि चित्रकलाके विषयमें ऐसी चतुराई अन्य किसी स्त्रीके नहीं हो सकती ॥ १३५ ॥ इस प्रकार तर्क-वितर्क करता हुआ वह राजकुमार व्याकुलकी तरह शून्यहृदय और निमीलितनयन होकर क्षणभर कुछ सोचता रहा ॥ १३६ ॥ उस समय उसकी आँखोंसे आंसू झर रहे थे वह अन्तकी मरण अवस्थाको प्राप्त हुआ ही चाहता था कि दैव योगसे उसी समय मूर्च्छाने सखीके समान आकर उसे पकड़ लिया, अर्थात् वह मूर्च्छित हो गया ॥ १३७ ॥ उसकी वैसी अवस्था देखकर केवल मुझे ही विषाद नहीं हुआ था; किन्तु चित्रमें स्थित मूर्तियोंका अन्तःकरण भी आर्द्र हो गया था ॥ १३८ ॥ अनन्तर परिचारकोंने उसे अनेक उपायोंसे सचेत किया किन्तु उसकी चित्तवृत्ति तेरी ही ओर लगी रही। उसे समस्त दिशाएँ ऐसी दिखती थीं मानो तुझसे ही व्याप्त हों ॥ १३९ ॥ थोड़ी ही देर बाद जब वह सचेत हुआ तो मुझसे इस प्रकार पूछने लगा कि हे भद्रे, इस चित्रमें मेरे पूर्व भवकी ये चेष्टाएँ किसने लिखी हैं ? ॥ १४० ॥ मैंने उत्तर दिया कि तुम्हारी मामीकी एक श्रीमती नामकी पुत्री है वह स्त्रियोंकी सृष्टि की एक मात्र मुख्य नायिका है—वह स्त्रियोंमें सबसे अधिक सुन्दर है और पति-वरण करनेके योग्य अवस्थामें विद्यमान है—अविवाहित है ॥ १४१ ॥ हे राजकुमार, तुम उसे उज्ज्वल वस्त्रसे शोभायमान कामदेवकी पताका ही समझो, अथवा स्त्रीसृष्टिकी माधुर्यसे शोभायमान अन्तिम निर्माण-रेखा ही जानो अर्थात् स्त्रियोंमें इससे बढ़कर सुन्दर स्त्रियोंकी रचना नहीं हो सकती ॥ १४२ ॥ उसके लम्बायमान कटाक्ष क्या हैं मानो पूर्ण यौवनके प्रारम्भको सूचित करनेवाले सूत्रपात ही हैं। उसके ऐसे कटाक्षोंसे ही कामदेव अपने बाणोंके कौशलकी प्रशंसा करता है अर्थात् उसके लम्बायमान कटाक्षोंको देखकर मालूम होता है कि उसके शरीरमें पूर्ण यौवनका प्रारम्भ हो गया है तथा कामदेव जो अपने बाणोंकी प्रशंसा किया करता है सो उसके कटाक्षोंके भरोसे ही किया करता है ॥ १४३ ॥ उसका मुखरूपी चन्द्रमा सदा दांतोंकी उज्ज्वल किरणोंसे शोभाय-

---

१ फलिनी प्रियङ्गुः । २ मकरिकापत्राणि । ३ चिन्तयति स्म । ४ ईषत् । ५ मरणावस्थाम् । "सुदिदृक्षायतोच्छ्वासा ज्वरदाहाशनारुचीः । सम्मूर्च्छोन्मादमोहान्ताः कान्तामाप्नोत्यनाप्य ना॥" । ६ दुर्मना इवाचरिता । ७ अगच्छन् । ८ पुनरुज्जीवनम् । ९ त्वया निर्वृत्ताः । १० लब्धचैतन्यः । ११ पटे । १२ पूर्वभवचेष्टितम् । परेहितम् म०, ट० । १३ स्त्रीसृष्टेः । १४ कन्यका । १५ उज्ज्वलवस्त्राम् । उज्ज्वलकान्ति च । १६ जीवरेखाम् । १७ स्मरः ।

तस्याश्चरणविन्यासे लाक्षारक्तां पदावलीम् । भ्रमरा लङ्घयन्त्याशु रक्ताम्बुजविशङ्कया ॥१४५॥
कामविद्यामिवादेष्टुं[1] भ्रमर्यः कलनिस्वनाः । तस्याः कर्णोत्पले लग्ना [2]नापयान्त्यपि ताडिताः ॥१४६॥
देवस्य वज्रदन्तस्य प्रियपुत्र्या तयादरात् । कलाकौशलमात्मीयम् इहालेख्ये प्रदर्शितम् ॥१४७॥
लक्ष्मीरिवार्थिनां प्रार्थ्या सैषा कन्या घनस्तनी । [3]मृग्या मृगयते [4]त्वाद्य नान्यस्त्वमिव पुण्यवान् ॥१४८॥
ललिताङ्ग ब्रवीति त्वां प्रिया [5]दिव्येव तन्मृषा । [6]येनेहापि भवान् सौम्यो लक्ष्यते ललिताङ्गकः[7] ॥१४९॥
इत्युक्तस्तु मया साधु पण्डिते साधु जल्पितम् । विधेर्विलसितं[8] चित्रम् [9]अदृष्टार्थप्रसिद्धिषु ॥१५०॥
पश्य जन्मान्तराज्जन्तून् आनीयैवमनन्तरे । भवे संघटयत्याशु[10] विधिर्यातोऽनुलोमताम्[11] ॥१५१॥
द्वीपान्तराद्दिशामन्तात् [12]अन्तरीपादपांनिधेः । विधिर्घटयतीष्टार्थम् आनीयान्वीपतां[13] गतः ॥१५२॥
इतीरय[14]न् वचो भूयः प्रस्विद्यत्करपल्लवः । तदस्मत्पट्टकं पाणौ कृतवान् स कुतूहली ॥१५३॥
स्वपट्टकमिदं चान्यत् मम हस्ते [15]समार्पिपत् । यत्र त्वच्चित्रसंवादि[16] सर्वमालक्ष्यते स्फुटम् ॥१५४॥
श्रुत्वेति स्वान् भवान् भूयो भूनाथः प्रियया समम् । पृष्टवानिष्टवर्गस्य भवानतिकुतूहलात् ॥१८९॥
स्वबन्धुर्निर्विशेषा[4] मे स्निग्धा मतिवरादयः । तत्प्रसोद[5] भवानेषां[6] ब्रूहीत्याख्यच्च तान् मुनिः ॥१९०॥
अयं मतिवरोऽत्रैव जम्बूद्वीपे पुरोगते । विदेहो वत्सकावत्यां विषये त्रिदिवोपमे ॥१९१॥
तत्र पुर्यां प्रभाकर्याम् अतिगृद्ध्रो नृपोऽभवत् । विषयेषु[7] विष[8]क्तात्मा बह्वारम्भपरिग्रहैः ॥१९२॥
बद्ध्वायुर्नारक[9] जातः श्वभ्रे पङ्कप्रभाह्वये । दशाब्ध्युपमितं कालं नारकीं वेदनामगात् ॥१९३॥
ततो निष्पत्य[10] पूर्वोक्तनगरस्य समीपगे । व्याघ्रोऽभूत् प्राक्तनात्मीयधननिक्षेपपर्वते ॥१९४॥
अथान्यदा पुराधीशः[11] तत्रागत्य[12] समावसत् । निवर्त्य[13] स्वानुजन्मानं व्युत्थितं विजिगीषया ॥१९५॥
[14]स्वानुजन्मानमत्रस्थं नृपमाख्यत्[15] पुरोहितः । अत्रैव ते महाँल्लाभो [16]भविता मुनिदानतः ॥१९६॥
स मुनिः कथमेवात्र लभ्यश्चेच्छृणु पार्थिव । वक्ष्ये तदागमोपायं दिव्यज्ञानावलोकितम्[17] ॥१९७॥

नामक ग्राममें किसी वणिक्के निर्नामिका नामकी पुत्री हुई। वहां उसने पिहितास्रव नामक मुनिराजके आश्रयसे विधिपूर्वक जिनेन्द्रगुणसम्पत्ति और श्रुतज्ञान नामक व्रतोंके उपवास किये जिसके फलस्वरूप श्रीप्रभ विमानमें स्वयंप्रभा देवी हुई थी। जब तुम ललिताङ्ग देवकी पर्यायमें थे तब यह तुम्हारी प्रिय देवी थी और अब वहाँसे चयकर वज्रदन्त चक्रवर्तीके श्रीमती पुत्री हुई है ॥१८५-१८८॥ इस प्रकार राजा वज्रजंघने श्रीमतीके साथ अपने पूर्वभव सुनकर कौतूहलसे अपने इष्ट सम्बन्धियोंके पूर्वभव पूछे ॥ १८९ ॥ हे नाथ, ये मतिवर, आनन्द, धनमित्र और अकम्पन मुझे अपने भाईके समान अतिशय प्यारे हैं इसलिये आप प्रसन्न हूजिये और इनके पूर्वभव कहिये। इस प्रकार राजाका प्रश्न सुनकर उत्तरमें मुनिराज कहने लगे ॥ १९० ॥

हे राजन्, इसी जम्बूद्वीपके पूर्वविदेह क्षेत्रमें एक वत्सकावती नामका देश है जो कि स्वर्गके समान सुन्दर है उसमें एक प्रभाकरी नामकी नगरी है। यह मतिवर पूर्वभवमें इसी नगरीमें अतिगृध्र नामका राजा था। वह विषयोंमें अत्यन्त आसक्त रहता था। उसने बहुत आरम्भ और परिग्रहके कारण नरक आयुका बन्ध कर लिया था जिससे वह मरकर पङ्कप्रभा नामके चौथे नरकमें उत्पन्न हुआ। वहाँ दशसागर तक नरकोंके दुःख भोगता रहा ॥ १९१-१९३ ॥ उसने पूर्वभवमें पूर्वोक्त प्रभाकरी नगरीके समीप एक पर्वतपर अपना बहुतसा धन गाड़ रक्खा था। वह नरकसे निकलकर इसी पर्वतपर व्याघ्र हुआ ॥ १९४ ॥ तत्पश्चात् किसी एक दिन प्रभाकरी नगरीका राजा प्रीतिवर्धन अपने प्रतिकूल खड़े हुए छोटे भाईको जीतकर लौटा और उसी पर्वतपर ठहर गया ॥ १९५ ॥ वह वहाँ अपने छोटे भाईके साथ बैठा हुआ था कि इतनेमें पुरोहितने आकर उससे कहा कि आज यहाँ आपको मुनिदानके प्रभावसे बड़ा भारी लाभ होने-वाला है ॥ १९६ ॥ हे राजन्, वे मुनिराज यहाँ किस प्रकार प्राप्त हो सकेंगे। इसका उपाय मैं अपने दिव्यज्ञानसे जानकर आपके लिये कहता हूँ। सुनिये—॥ १९७ ॥

हम लोग नगरमें यह घोषणा दिलाये देते हैं कि आज राजाके बड़े भारी हर्षका समय है इसलिये समस्त नगरवासी लोग अपने-अपने घरोंपर पताकाएं फहराओ, तोरण बांधो और घरके

१ पूर्वमन्दरस्य। २ अपरविदेहे। ३ गन्धिलविषये। ४ समानाः। ५ कारणात्। ६ पूर्वभवान्। ७ विषयेष्वभिष– ट०। ८ आसक्तः। ९ –र्नरकं यातः ल०। १० निर्गत्य अ०, प०, द०, स०, ल०। ११ तत्पुरेशः प्रीतिवर्द्धननामा। १२ तत्पर्वतसमीपे। १३ पुनरावर्त्य। १४ सानुजन्मान–प०, ल०, म०, ट०। अनुजसहितम्। १५ –माख्यात् अ०, स०, द०। १६ भविष्यति। १७ महानिमित्तम्।

महानद्य नरेन्द्रस्य प्रमदस्तेन[1] नागराः[2] । सर्वे यूयं स्वगेहेषु बद्ध्वा केतून् सतोरणान् ॥१६८॥
गृहाङ्गणानि रथ्याश्च[3] कुरुताशुप्रसूनकैः । सोपहाराणि नीरन्ध्रम्[4] इति दद्यः प्रघोषणाम् ॥१६९॥
ततो मुनिरसौ त्यक्त्वा पुरमत्रागमिष्यति । विचिन्त्याप्रासुकत्वेन विहारायोग्यमात्मनः ॥२००॥
पुरोधोवचनात्तुष्टो नृपोऽसौ प्रीतिवर्द्धनः । तत्तथैवाकरोत् प्रीतो मुनिरप्यागमत्तथा[5] ॥२०१॥
पिहितास्रवनामासौ मासक्षपण[6]संयुतः । प्रविष्टो नृपतेः सद्म चरंश्चर्या[7]मनुक्रमात् ॥२०२॥
ततो नृपतिना तस्मै दत्तं दानं यथाविधि । पातिता च दिवो देवैः वसुधारा कृतारवम् ॥२०३॥
ततस्तदवलोक्यासौ शार्दूलो जातिमस्मरत् । उपशान्तश्च निर्मूर्च्छः[8] शरीराहारमत्यजत् ॥२०४॥
शिलातले निविष्टं च [9]संन्यस्तनिखिलोपधिम् । दिव्यज्ञानमयेनाक्ष्णा सहसाबुद्ध तं[10] मुनिः ॥२०५॥
ततो नृपमुवाचेत्थम्[11] अस्मिन्नद्रावुपासकः । सन्न्यासं कुरुते कोऽपि स त्वया परिचर्यताम् ॥२०६॥
स चक्रवर्तितामेत्य चरमाङ्गः पुरा पुरोः । सूनुर्भूत्वा परं धाम व्रजत्यत्र न संशयः ॥२०७॥
इति तद्वचनाज्जातविस्मयो मुनिना समम् । गत्वा नृपस्तमद्राक्षीत् शार्दूलं कृतसाहसम् ॥२०८॥
ततस्तस्य सपर्यायां[12] [13]साचिव्यमकरोन्नृपः । मुनिश्चास्मै ददौ [14]कर्णजापं स्वर्गी भवेत्यसौ[15] ॥२०९॥
व्याघ्रोऽष्टादशभिर्भक्तम् अहोभिरुपसंहरन् । दिवाकरप्रभो नाम्ना देवोऽभूत्त[16]द्विमानके ॥२१०॥

आंगन तथा नगरकी गलियोंमें सुगन्धित जल सींचकर इस प्रकार फूल बिखेर दो कि बीचमें कहीं कोई रन्ध्र खाली न रहे ॥१९८–१९९॥ ऐसा करनेसे नगरमें जानेवाले मुनि अप्रासुक होनेके कारण नगरको अपने विहारके अयोग्य समझ लौटकर यहांपर अवश्य ही आवेंगे ॥२००॥ पुरोहितके वचनोंसे सन्तुष्ट होकर राजा प्रीतिवर्धनने वैसा ही किया जिससे मुनिराज लौटकर वहां आये ॥२०१॥ पिहितास्रव नामके मुनिराज एक महीनेके उपवास समाप्त कर आहारके लिये भ्रमण करते हुए क्रम-क्रमसे राजा प्रीतिवर्धनके घरमें प्रविष्ट हुए । ॥२०२॥ राजाने उन्हें विधि-पूर्वक आहार दान दिया जिससे देवोंने आकाशसे रत्नोंकी वर्षा की और वे रत्न मनोहर शब्द करते हुए भूमिपर पड़े ॥२०३॥ राजा अतिगृध्रके जीव सिंहने भी वहां यह सब देखा जिससे उसे जाति स्मरण हो गया । वह अतिशय शान्त हो गया, उसकी मूर्छा (मोह) जाती रही और यहां तक कि उसने शरीर और आहारसे भी ममत्व छोड़ दिया ॥२०४॥ वह सब परिग्रह अथवा कषायोंका त्यागकर एक शिलातलपर बैठ गया । मुनिराज पिहितास्रवने भी अपने अवधि-ज्ञान-रूपी नेत्रसे अकस्मात् सिंहका सब वृत्तान्त जान लिया ॥२०५॥ और जानकर उन्होंने राजा प्रीतिवर्धनसे कहा कि—हे राजन्, इस पर्वतपर कोई श्रावक होकर (श्रावकके व्रत धारण कर) संन्यास कर रहा है तुम्हें उसकी सेवा करनी चाहिये ॥२०६॥ वह आगामी कालमें भरतक्षेत्रके प्रथम तीर्थंकर श्री वृषभदेवके चक्रवर्ती पदका धारक पुत्र होगा और उसी भवसे मोक्ष प्राप्त करेगा इस विषयमें कुछ भी संदेह नहीं है ॥२०७॥ मुनिराजके इन वचनोंसे राजा प्रीतिवर्धनको भारी आश्चर्य हुआ । उसने मुनिराजके साथ वहां जाकर अतिशय साहस करनेवाले सिंहको देखा ॥२०८॥ तत्पश्चात् राजाने उसकी सेवा अथवा समाधिमें योग्य सहायता की और यह देव होनेवाला है यह समझकर मुनिराजने भी उसके कानमें नमस्कार मन्त्र सुनाया ॥२०९॥ वह सिंह अठारह दिन तक आहारका त्याग कर समाधिसे शरीर छोड़ दूसरे स्वर्गमें दिवाकरप्रभ नामक

१ तेन कारणेन । २ नगरे भवाः । ३ वीथीः । ४ निविडम् । ५ –रप्यगमत्तथा प०। –रप्यागमत्तदा म०, ल० । ६ क्षपण उपवासः । ७ वीरचर्यामाचरन् । ८ निर्मोहः । ९ सन्त्यक्ता-खिलपरिग्रहम् । १० सन्मुनिः स०, अ० । तन्मुनिः प०, ब० । ११ –मुवाचेद–प० । १२ आराधनायाम् । १३ सहायत्वम् । १४ पञ्चनमस्कारम् । १५ भवत्यसौ अ०, स०, ल० । १६ दिवाकरप्रभविमाने ।

तदाश्चर्यं महद् दृष्ट्वा नृपस्यास्य चमूपतिः । मन्त्री पुरोहितश्च द्राक् उपशान्तिं परां गताः ॥२११॥
नृपदानानुमोदेन कुरुष्वार्यास्ततोऽभवन् । कालान्ते ते ततो गत्वा श्रीमदैशानकल्पजाः ॥२१२॥
सुरा जाता विमानेशा मन्त्री काञ्चनसंज्ञके । विमाने कनकाभोऽभूत् [1]रुषिताख्ये पुरोहितः ॥२१३॥
[2]प्रभञ्जनोऽभूत् सेनानीः [3]प्रभानाम्नि प्रभाकरः । ललिताङ्गभवे युष्मत्परिवारामरा इमे ॥२१४॥
ततः प्रच्युत्य शार्दूलचरो देवोऽभवत् स ते । मन्त्री मतिवरः सूनुः श्रीमत्यां मतिसागरात् ॥२१५॥
अपराजितसेनान्यः[4] च्युतः स्वर्गात् प्रभाकरः । आर्जवायाश्च पुत्रोऽभूत् अकम्पनसमाह्वयः ॥२१६॥
श्रुतकीर्तेरथानन्तमत्याश्च कनकप्रभः । सुतोऽभूदयमानन्दः पुरोधास्तव संमतः ॥२१७॥
प्रभञ्जनश्च्युतस्तस्मात् श्रेष्ठ्यभूद् धनमित्रकः । धनदत्तोदरे जातो धनदत्ताद् धनर्द्धिमान् ॥२१८॥
इति तस्य मुनीन्द्रस्य वचः श्रुत्वा नराधिपः । श्रीमती च तदा धर्मे परं संवेग[5]मापतुः ॥२१९॥
राजा सविस्मयं भूयोऽप्यपृच्छत्तं मुनीश्वरम् । अमी नकुलशार्दूलगोलाङ्गूलाः ससूकराः[6] ॥२२०॥
कस्मादस्मिञ्जनाकीर्णे देशे तिष्ठन्त्यनाकुलाः । भवन्मुखारविन्दावलोकने दत्तदृष्टयः ॥२२१॥
इति राज्ञानुयुक्तो[7]ऽसौ चारणर्षिरवोचत । शार्दूलोऽयं भवेऽन्यस्मिन् देशेऽस्मिन्नेव विश्रुते ॥२२२॥
हास्तिनाख्यपुरे ख्याते वैश्यात् सागरदत्ततः । धनवत्यामभूत् सूनुः उग्रसेनसमाह्वयः ॥२२३॥
सोऽप्रत्याख्यानतः क्रोधात् पृथिवीभेदसन्निभात् । तिर्यगायुर्बबन्धाऽज्ञो निसर्गादतिरोषणः ॥२२४॥

विमानमें दिवाकरप्रभ नामका देव हुआ ॥२१०॥ इस आश्चर्यको देखकर राजा प्रीतिवर्धनके सेनापति, मंत्री और पुरोहित भी शीघ्र ही अतिशय शान्त हो गये ॥२११॥ इन सभीने राजाके द्वारा दिये हुए पात्रदानकी अनुमोदना की थी इसलिये आयु समाप्त होनेपर वे उत्तरकुरु भोग-भूमिमें आर्य हुए ॥२१२॥ और आयुके अन्तमें वहांसे जाकर ऐशान स्वर्गमें लक्ष्मीमान् देव हुए ॥ उनमेंसे मंत्री, कांचन नामक विमानमें कनकाभ नामका देव हुआ, पुरोहित रुषित नामके विमानमें प्रभंजन नामका देव हुआ और सेनापति प्रभानामक विमानमें प्रभाकर नामका देव हुआ । आपकी ललिताङ्गदेवकी पर्यायमें ये सब आपके ही परिवारके देव थे ।।२१३-२१४॥ सिंहका जीव वहांसे च्युत हो मतिसागर और श्रीमतीका पुत्र होकर आपका मतिवर नामका मंत्री हुआ है ॥२१५॥ प्रभाकरका जीव स्वर्गसे च्युत होकर अपराजित सेनानी और आर्जवाका पुत्र होकर आपका अकंपन नामका सेनापति हुआ है ॥२१६॥ कनकप्रभका जीव श्रुतकीर्ति और अनन्तमतीका पुत्र होकर आपका आनन्द नामका प्रिय पुरोहित हुआ है ॥२१७॥ तथा प्रभंजन देव वहांसे च्युत होकर धनदत्त और धनदत्ताका पुत्र होकर आपका धनमित्र नामका सम्पत्तिशाली सेठ हुआ है ॥२१८॥—इस प्रकार मुनिराजके वचन सुनकर राजा वज्रजंघ और श्रीमती—दोनों ही धर्मके विषयमें अतिशय प्रीतिको प्राप्त हुए ॥२१९॥

राजा वज्रजंघने फिर भी बड़े आश्चर्यके साथ उन मुनिराजसे पूछा कि ये नकुल, सिंह, वानर और शूकर चारों जीव आपके मुख-कमलको देखनेमें दृष्टि लगाये हुए इस मनुष्योंसे भरे हुए स्थानमें भी निर्भय होकर क्यों बैठे हैं ? ॥ २२०-२२१ ॥ इस प्रकार राजाके पूछने पर चारण ऋद्धिके धारक ऋषिराज बोले—

हे राजन्, यह सिंह पूर्वभवमें इसी देशके प्रसिद्ध हस्तिनापुर नामक नगरमें सागरदत्त वैश्यसे उसकी धनवती नामक स्त्रीमें उग्रसेन नामका पुत्र हुआ था ॥ २२२-२२३ ॥ वह उग्रसेन स्वभावसे ही अत्यन्त क्रोधी था इसलिये उस अज्ञानीने पृथिवीभेदके समान अप्रत्याख्यानावरण

---

१ रुचिताख्ये अ०, स०, द० । २ प्रभञ्जने विमाने च नाम्नि तस्य प्रभाकरः अ० । ३ प्रभाविमाने प्रभाकरो देवः । ४ सेनापतेः । ५ धर्मे धर्मपदे चानुरागः संवेगस्तम् । ६ सशूकराः अ०, प० । ७ परिपृष्टः ।

कोष्ठागार[1]नियुक्तांश्च निर्भर्त्स्य[2] घृततण्डुलम् । बलादादाय वेश्याभिः[3] संप्रायच्छत[4] दुर्मदी ॥२२५॥
तद्वार्त्ताकर्णनाद् राज्ञा बन्धितस्तीव्रवेदनः । [5]चपेटाचरणाघातैः मृत्वा व्याघ्र इहाभवत् ॥२२६॥
वराहोऽयं भवेऽतीते पुरे विजयनामनि । सूनुर्वसन्तसेनायां महानन्दनृपादभूत् ॥२२७॥
हरिवाहननामासौ अप्रत्याख्यानमानतः । मानमस्थिसमं बिभ्रत् पित्रोरप्यविनीतकः ॥२२८॥
तिर्यगायुरतो बद्ध्वा [6]नैच्छत् पित्रनुशासनम्[7] । धावमानशिशलास्तम्भजर्जरीकृतमस्तकः ॥२२९॥
आर्त्तो मृत्वा वराहोऽभूद् वानरोऽयं पुरा भवे । पुरे धान्याह्वये[8] जातः [9]कुबेराख्यवणिक्सुतः ॥२३०॥
सुदत्तागर्भसंभूतो नागदत्तसमाह्वयः । अप्रत्याख्यानमायां तां मेषशृङ्गसमां श्रितः ॥२३१॥
स्वानुजाया विवाहार्थं स्वापणे[10] स्वापतेयकम् । स्वाम्बायामाददानायां सुपरीक्ष्य यथेप्सितम् ॥२३२॥
ततस्तद्वञ्चनोपायम्[11] अजानन्नार्त्तधीर्मृतः । तिर्यगायुर्वशेनासौ गोलाङ्गूलत्वमित्यगात् ॥२३३॥
नकुलोऽयं भवेन्यस्मिन् सुप्रतिष्ठितपत्तने । अभूत् कादम्बिको[12] नाम्ना लोलुपो धनलोलुपः ॥२३४॥
सोऽन्यदा नृपतौ चैत्यगृहनिर्मापणोद्यते[13] । [14]इष्टका[15]विष्टिपुरुषैः आनाययति लुब्धधीः ॥२३५॥

क्रोधके निमित्तसे तिर्यंच आयुका बन्ध कर लिया था ।। २२४ ।। एक दिन उस दुष्टने राजाके भण्डारकी रक्षा करनेवाले लोगोंको घुड़ककर वहांसे बलपूर्वक बहुतसा घी और चावल निकालकर वेश्याओंको दे दिया ।। २२५ ।। जब राजाने यह समाचार सुना तब उसने उसे बँधवा कर थप्पड़ लात घूँसा आदिकी बहुत ही मार दिलाई जिससे वह तीव्र वेदना सहकर मरा और यहां यह व्याघ्र हुआ है ।। २२६ ।।

हे राजन्, यह सूकर पूर्वभवमें विजय नामक नगरमें राजा महानन्दसे उसकी रानी वसन्तसेनामें हरिवाहन नामका पुत्र हुआ था । वह अप्रत्याख्यानावरण मानके उदयसे हड्डीके समान मानको धारण करता था इसलिये मातापिताका भी विनय नहीं करता था ।। २२७-२२८ ।। और इसीलिये उसे तिर्यंच आयुका बन्ध हो गया था । एक दिन यह माता पिताका अनुशासन नहीं मानकर दौड़ा जा रहा था कि पत्थरके खम्भेसे टकराकर उसका शिर फट गया और इसी वेदनामें आर्त ध्यानसे मरकर यह सूकर हुआ है ।। २२९ ।।

हे राजन्, यह वानर पूर्वभवमें धन्यपुर नामके नगरमें कुबेर नामक वणिक्के घर उसकी सुदत्ता नामकी स्त्रीके गर्भसे नागदत्त नामका पुत्र हुआ था । वह भेंड़ेके सींगके समान अप्रत्याख्यानावरण मायाको धारण करता था ।। २३०-२३१ ।। एक दिन इसकी माता, नागदत्तकी छोटी बहिनके विवाहके लिये अपनी दूकानसे इच्छानुसार छांट छांटकर कुछ सामान ले रही थी । नागदत्त उसे ठगना चाहता था परन्तु किस प्रकार ठगना चाहिये ? इसका उपाय वह नहीं जानता था इसलिये उसी उधेड़बुनमें लगा रहा और अचानक आर्त ध्यानसे मरकर तिर्यञ्च आयुका बन्ध होनेसे यहां यह वानर अवस्थाको प्राप्त हुआ है ॥ २३२-२३३ ॥ और—

हे राजन्, यह नकुल (नेवला) भी पूर्वभवमें इसी सुप्रतिष्ठित नगरमें लोलुप नामका हलवाई था । वह धनका बड़ा लोभी था ।। २३४ ।। किसी समय वहांका राजा जिनमन्दिर बनवा रहा था और उसके लिये वह मजदूरोंसे ईंटें बुलाता था । वह लोभी मूर्ख हलवाई उन

---

१ भाण्डागारिकान् । २ सन्तर्ज्य । ३ वेश्याभ्यः । 'दाणाद्धर्मे तज्जदेयैः' इति चतुर्थ्यर्थे तृतीया । वेश्यायै अ०, प०, द०, स० । ४ प्रयच्छति स्म । तेनैव सूत्रेणात्मनेपदी । ५ हस्ततलपादताडनैः । ६ नेच्छत् प०, ब० । ७ पित्रानुशासनम् प० । ८ धन्याह्वये ल० । ९ कुबेराह्ववणिक्पुत्रः । कुबेराख्यो वणिक्सुतः अ० । १० निजविपण्याम् । ११ वञ्चनापाय– अ० । १२ भक्ष्यकारः । १३ –णोद्यमे ल० । १४ इष्टिकाविष्ट– प०, द० । इष्टकाविष्ट– अ० । १५ वेतनपुरुषैः ।

दत्त्वापूपं[1] निगूढं स्वं मूढः प्रावेशयद् गृहम् । इष्टकास्तत्र कासाञ्चित् भेदेऽपश्यच्च काञ्चनम् ॥२३६॥
तल्लोभादिष्टका भूयोऽप्यानाययितुमुद्यतः । पुरुषैर्वैष्टिकैस्तेभ्यो दत्त्वापूपादिभोजनम् ॥२३७॥
स्वसुताग्राममन्येद्युः स गच्छन् पुत्रमात्मनः । न्ययुङ्क्त पुत्रकाहारं दत्त्वाऽऽनाय्यास्त्वयेष्टकाः ॥२३८॥
इत्युक्त्वास्मिन् गते पुत्रः तत्तथा नाकरोदतः । स निवृत्त्य सुतं पृष्ट्वा[2] रुष्टोऽसौ दुष्टमानसः ॥२३९॥
शिरः पुत्रस्य निर्भिद्य[3] [4]लकुटोपलताडनैः । चरणौ स्वौ च निर्वेदाद् बभञ्ज किल मूढधीः ॥२४०॥
राज्ञा च घातितो मृत्वा नकुलत्वमुपागमत् । अप्रत्याख्यानलोभेन नीतः सोऽयं [5]दशामिमाम् ॥२४१॥
युष्मद्दानं समीक्ष्यैते प्रमोदं परमागताः । प्राप्ता जातिस्मरत्वञ्च निर्वेदमधिकं श्रिताः ॥२४२॥
भवद्दानानुमोदेन बद्धायुष्काः कुरुष्वमी । ततोऽमी भीतिमुत्सृज्य स्थिता धर्मश्रवार्थिनः[6] ॥२४३॥
इतोऽष्टमे भवे भाविन्यपुनर्भवतां[7] भवान् । [8]भवितामी च तत्रैव भवे [9]सेत्स्यन्त्यसंशयम् ॥२४४॥
तावच्चाभ्युदयं सौख्यं दिव्यमानुषगोचरम् । त्वयैव सममेतेऽनुभोक्तारः[10] पुण्यभागिनः ॥२४५॥
श्रीमती च भवत्तीर्थे[11] दानतीर्थप्रवर्त्तकः । श्रेयान् भूत्वा परं श्रेयः श्रमिष्यति न संशयः ॥२४६॥
इति चारणयोगीन्द्रवचः श्रुत्वा नराधिपः । दधे रोमाञ्चितं गात्रं [12]ततं प्रेमाङ्कुरैरिव ॥२४७॥

जदूरोंको कुछ पुआ वगैरह देकर उनसे छिपकर कुछ ईंटें अपने घरमें डलवा लेता था। न ईंटोंके फोड़ने पर उनमेंसे कुछमें सुवर्ण निकला। यह देखकर इसका लोभ और भी बढ़ गया। उस सुवर्णके लोभसे उसने बार बार मजदूरोंको पुआ आदि देकर उनसे बहुतसी ईंटें अपने घर डलवाना प्रारम्भ किया ॥ २३५–२३७ ॥ एक दिन उसे अपनी पुत्रीके गाँव जाना पड़ा। जाते समय वह पुत्रसे कह गया कि हे पुत्र, तुम भी मजदूरोंको कुछ भोजन देकर उनसे अपने घर ईंटें डलवा लेना ॥ २३८ ॥ यह कहकर वह तो चला गया परन्तु पुत्रने उसके कहे अनुसार घर पर ईंटें नहीं डलवाईं। जब वह दुष्ट लौटकर घर आया और पुत्रसे पूछने पर जब उसे सब हाल मालूम हुआ तब वह पुत्रसे भारी कुपित हुआ ॥ २३९ ॥ उस मूर्खने लकड़ी तथा पत्थरोंकी मारसे पुत्रका शिर फोड़ डाला और उस दुःखसे दुखी होकर अपने पैर भी काट डाले ॥ २४० ॥ अन्तमें वह राजाके द्वारा मारा गया और मरकर इस नकुल पर्यायको प्राप्त हुआ है। वह हलवाई अप्रत्याख्यानावरण लोभके उदयसे ही इस दशा तक पहुँचा है ॥ २४१ ॥

हे राजन, आपके दानको देखकर ये चारों ही परम हर्षको प्राप्त हो रहे हैं और इन चारोंको ही जाति-स्मरण हो गया है जिससे ये संसारसे बहुत ही विरक्त हो गये हैं ॥ २४२ ॥ आपके दिये हुए दानकी अनुमोदना करनेसे इन सभीने उत्तम भोगभूमिकी आयुका बन्ध किया है। इसलिये ये भय छोड़कर धर्मश्रवण करनेकी इच्छासे यहाँ बैठे हुए हैं ॥ २४३ ॥ हे राजन्, इस भवसे आठवें आगामी भवमें तुम वृषभनाथ तीर्थंकर होकर मोक्ष प्राप्त करोगे और उसी भवमें ये सब भी सिद्ध होंगे इस विषयमें कुछ भी संदेह नहीं है ॥ २४४ ॥ और तब तक ये पुण्यशील जीव आपके साथ साथ ही देव और मनुष्योंके उत्तम उत्तम सुख तथा विभूतियोंका अनुभोग करते रहेंगे ॥ २४५ ॥ इस श्रीमतीका जीव भी आपके तीर्थमें दानतीर्थकी प्रवृत्ति चलानेवाला राजा श्रेयांस होगा और उसी भवसे उत्कृष्ट कल्याण अर्थात् मोक्षको प्राप्त होगा इसमें संशय नहीं है ॥ २४६ ॥ इस प्रकार चारण ऋद्धिधारी मुनिराजके वचन सुनकर

---

१ दत्त्वापूपान् द०, अ०, स०, प० । अपूपं भक्ष्यम् । २ दृष्ट्वा अ० । ३ निर्भेद्य अ०, स० । ४ लकुटो दण्डः । ५ अवस्थाम् । ६ श्रवः श्रवणम् । ७ पुनर्भवरहितत्वम् सिद्धत्वमित्यर्थः । ८ प्राप्स्यति । अत्र भूधातुः प्राप्त्यर्थः शाकटायनापेक्षया तङन्तो वा अतङन्तो वाऽस्तु । 'भुवः प्राप्ताविणि' इति सूत्र-व्याख्याने वाऽऽत्मनेपदीति तङन्त एव । ९ सिद्धिं प्राप्स्यन्ति । सेत्स्यत्यसं— ल० । १० अनुभविष्यन्ति ११ भवत्तीर्थदान—स०, अ० । १२ विस्तृतम् ।

ततोऽभिवन्द्य योगीन्द्रौ नरेन्द्रः प्रिययान्वितः । स्वावासं प्रत्यगात् प्रीतैः[1] समं मतिवरादिभिः ॥२४८॥
मुनी च वातरशनौ[2] वायुमन्वीयतुस्तदा । मुनिवृत्तेरसङ्गत्वं [3]ख्यापयन्तौ नभोगती ॥२४९॥
नृपोऽपि तद्गुणध्यानसमुत्कण्ठितमानसः । तत्रैव तदहःशेषम्[4] अतिवाह्य[5]ससाधनः ॥२५०॥
ततः प्रयाणकैः कैश्चित् संप्रापत् पुण्डरीकिणीम् । तत्रापश्यच्च शोकार्त्तां देवीं लक्ष्मीमतीं सतीम् ॥२५१॥
अनुन्धरीञ्च सोत्कण्ठां समाश्वास्य शनैरसौ । पुण्डरीकस्य तद्राज्यम् अकरोन्निरुपप्लवम्[6] ॥२५२॥
[7]प्रकृतीरपि सामाद्यैः[8] उपायैः सोऽन्वरञ्जयत् । सामन्तानपि संमान्य[9] यथापूर्वमतिष्ठपत् ॥२५३॥
समन्त्रिकं ततो राज्ये बालं बालार्कसप्रभम्[10] । निवेश्य पुनरावृत्तः प्रापदुत्पलखेटकम् ॥२५४॥

मालिनीच्छन्दः

अथ परमविभूत्या वज्रजङ्घः क्षितीशः
पुरममरपुराभं स्वं[11] विशन्[12] कान्तयामा ।
शतमख इव शच्या संभृतश्रीः[13] स रेजे
पुरवरवनितानां लोचनैः पीयमानः ॥२५५॥

राजा वज्रजंघका शरीर हर्षसे रोमाञ्चित हो उठा जिससे ऐसा मालूम होता था मानो प्रेमके अंकुरोंसे व्याप्त ही हो गया हो ॥ २४७ ॥ तदनन्तर राजा उन दोनों मुनिराजोंको नमस्कार कर रानी श्रीमती और अतिशय प्रसन्न हुए मतिवर आदिके साथ अपने डेरे पर लौट आया ॥ २४८ ॥ तत्पश्चात् वायुरूपी वस्त्रको धारण करनेवाले (दिगम्बर) वे दोनों मुनिराज 'मुनियोंकी वृत्ति परिग्रहरहित होती है' इस बातको प्रकट करते हुए वायुके साथ साथ ही आकाशमार्गसे विहार कर गये ॥ २४९ ॥ राजा वज्रजंघने उन मुनियोंके गुणोंका ध्यान करते हुए उत्कण्ठित चित्त होकर उस दिनका शेष भाग अपनी सेनाके साथ उसी शष्प नामक सरोवरके किनारे व्यतीत किया ॥ २५० ॥ तदनन्तर वहांसे कितने ही पड़ाव चलकर वे पुण्डरीकिणी नगरीमें जा पहुँचे । वहां जाकर राजा वज्रजंघने शोकसे पीड़ित हुई सती लक्ष्मीमती देवीको देखा और भाईके मिलनेकी उत्कंठासे सहित अपनी छोटी बहिन अनुंधरीको भी देखा । दोनोंको धीरे धीरे आश्वासन देकर समझाया तथा पुण्डरीकके राज्यको निष्कण्टक कर दिया ॥ २५१-२५२ ॥ उसने साम दाम दण्ड भेद आदि उपायोंसे समस्त प्रजाको अनुरक्त किया और सरदारों तथा आश्रित राजाओंका भी सन्मान कर उन्हें पहलेकी भांति (चक्रवर्तीके समयके समान) अपने अपने कार्योंमें नियुक्त कर दिया ॥ २५३ ॥ तत्पश्चात् प्रातःकालीन सूर्यके समान देदीप्यमान पुण्डरीक बालकको राज्य-सिंहासन पर बैठाकर और राज्यकी सब व्यवस्था सुयोग्य मंत्रियोंके हाथ सौंपकर राजा वज्रजंघ लौटकर अपने उत्पलखेटक नगरमें आ पहुँचे ॥ २५४ ॥ उत्कृष्ट शोभासे सुशोभित महाराज वज्रजंघने प्रिया श्रीमतीके साथ बड़े ठाट-बाटसे स्वर्गपुरीके समान सुन्दर अपने उत्पलखेटक नगरमें प्रवेश किया। प्रवेश करते समय नगरकी मनोहर स्त्रियां अपने नेत्रोंद्वारा उनके सौन्दर्य-रसका पान कर रही थीं। नगरमें प्रवेश करता हुआ वज्रजंघ ऐसा शोभायमान हो रहा था मानो स्वर्गमें प्रवेश करता हुआ इन्द्र ही हो ॥ २५५ ॥

१ प्रीत्यै समं- अ० । २ वातवसनौ द०, ल० । वान्तवसनौ प० । वान्तरसनौ अ० । ३ कथयन्तौ । ४ दिवसावशेषम् । ५ अतीत्य । ६ निरुपद्रवम् । ७ प्रजाः । ८ सामभेददानदण्डैः । ९ सत्कृत्य । १० सदृशम् । ११ आत्मीयम् । १२ विशत्का- अ०, प०, स०, म० । १३ सम्यग्धृतश्रीः ।

किमयममरनाथः किंस्विदीशो धनानां
किमुत फणिगणेशः किं वपुष्माननङ्गः ।
इति पुरनरनारीजल्पनैः [1]कथ्यमानो
गृहमविशदुदारश्रीः परार्ध्यं महर्द्धिः ॥२५६॥

शार्दूलविक्रीडितम्

तत्रासौ [2]सुखमावसत्स्वरुचितान्[3] भोगान् स्वपुण्योर्जितान्
भुञ्जानः षड्ऋतुप्रमोदजनने हर्म्ये मनोहारिणि ।
संभोगैरुचितैः शचीमिव हरिः संभावयन् प्रेयसीं[4]
जैनं धर्ममनुस्मरन् स्मरनिभः कीर्तिञ्च तन्वन् दिशि[5] ॥२५७॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे
श्रीमतीवज्रजङ्घपात्रदानानुवर्णनं नामा-
ष्टमं पर्व ॥८॥

क्या यह इंद्र है ? अथवा कुबेर है ? अथवा धरणेन्द्र है ? अथवा शरीरधारी कामदेव है ? इस प्रकार नगरकी नर-नारियोंकी बातचीतके द्वारा जिनकी प्रशंसा हो रही है ऐसे अत्यन्त शोभायमान और उत्कृष्ट विभूतिके धारक वज्रजंघने अपने श्रेष्ठ भवनमें प्रवेश किया ॥ २५६ ॥ छहों ऋतुओंमें हर्ष उत्पन्न करनेवाले उस मनोहर राजमहलमें कामदेवके समान सुन्दर वज्रजंघ अपने पुण्यके उदयसे प्राप्त हुए मनवांछित भोगोंको भोगता हुआ सुखसे निवास करता था । तथा जिस प्रकार संभोगादि उचित उपायोंके द्वारा इन्द्र इन्द्राणीको प्रसन्न रखता है उसी प्रकार वह वज्रजंघ संभोग आदि उपायोंसे श्रीमतीको प्रसन्न रखता था । वह सदा जैन धर्मका स्मरण रखता था और दिशाओंमें अपनी कीर्ति फैलाता रहता था ॥ २५७ ॥

इस प्रकार आर्ष नामसे प्रसिद्ध भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण
महापुराण संग्रहमें श्रीमती और वज्रजंघके पात्रदानका वर्णन
करनेवाला आठवां पर्व समाप्त हुआ ।

---

१ श्लाघ्यमानः । २ –सौ पुरमाव– अ० । ३ आत्माभीष्टान् । ४ प्रियतमाम् । ५ दिशः द०, स० ।

नवमं पर्व

अथ त्रिवर्गसंसर्गरम्यं राज्यं प्रकुर्वतः । तस्य कालोऽगमद् भूयान् भोगैः षड्ऋतुसुन्दरैः ॥१॥
स रेमे[1] शरदारम्भे प्रफुल्लाब्जसरोजले । वनेष्वयु[2]क्छदामोदसुभगेषु प्रियान्वितः ॥२॥
सरित्पुलिनदेशेषु प्रियाजघनहारिषु । राजहंसो धृतिं[3] लेभे [4]सध्रीचीमनुयन्नयम्[5] ॥३॥
कुर्वन्नीलोत्पलं कर्णे स कान्ताया वतंसकम्[6] । शोभामिव दृशोरस्याः [7]तेनाभूत् सन्निकर्षयन्[8] ॥४॥
सरसाब्जरजःपुञ्जपिञ्जरं स्तनमण्डलम् । स पश्यन् बहुमेनेऽस्याः कामस्येव करण्डकम् ॥५॥
[9]वासगेहे समुत्सर्पद्धूपामोदसुगन्धिनि । प्रियास्तनोष्मणा[10] भेजे हिमर्तौ स परां धृतिम् ॥६॥
कुङ्कुमालिप्तसर्वाङ्गीम् अम्लानमुखाम्बुजाम् । प्रियामरमयद् गाढम् आश्लिष्यन् [11]शिशिरागमे ॥७॥
मधौ [12]मधुमदामत्तकामिनीजनसुन्दरे । वनेषु सहकाराणां स रेमे रामया समम् ॥८॥
अशोककलिकां कर्णे न्यस्यन्नस्या मनोभवः । जनचेतोभिदो दध्यौ[13] शोणिताक्ताः[14] स तीरिकाः[15] ॥९॥
घर्मे घर्माम्बुविच्छेदिसरोऽनिलहृतक्लमः । जलकेलिविधौ कान्तां रमयन् विजहार सः ॥१०॥
चन्दनद्रवसिक्ताङ्गीं प्रियां हारविभूषणाम् । कण्ठे गृह्णन् स घर्मोत्थं नाज्ञासीत् कमपि श्रमम् ॥११॥

तदनन्तर धर्म, अर्थ और काम इन तीन वर्गोंके संसर्गसे मनोहर राज्य करनेवाले महाराज वज्रजंघका छहों ऋतुओंके सुन्दर भोग भोगते हुए बहुतसा समय व्यतीत हो गया ॥१॥ अपनी प्रिया श्रीमतीके साथ वह राजा शरद्‌ऋतुके प्रारम्भकालमें फूले हुए कमलोंसे सुशोभित तालाबोंके जलमें और सप्तपर्ण जातिके वृक्षोंकी सुगन्धिसे मनोहर वनोंमें क्रीड़ा करता था ॥ २ ॥ कभी वह श्रेष्ठ राजा, राजहंस पक्षीके समान अपनी सहचरीके पीछे पीछे चलता हुआ प्रियाके नितम्बके समान मनोहर नदियोंके तटप्रदेशोंपर सन्तुष्ट होता था ॥ ३ ॥ कभी श्रीमतीके कानोंमें नील कमलका आभूषण पहिनाता था । उस समय वह ऐसा जान पड़ता था मानो उन नील कमलके आभूषणोंके छलसे उसके नेत्रोंकी शोभा ही बढ़ा रहा हो ॥ ४ ॥ श्रीमतीका स्तनमण्डल तालाबोंकी परागके समूहसे पीला पड़ गया था इसलिये कामदेवके पिटारेके समान जान पड़ता था। राजा वज्रजंघ उस स्तन-मण्डलको देखता हुआ बहुत ही हर्षित होता था ॥ ५ ॥ हेमन्त ऋतुमें वह वज्रजंघ धूपकी फैलती हुई सुगन्धसे सुगन्धित शयनागारमें श्रीमतीके स्तनोंकी उष्णतासे परम धैर्यको प्राप्त होता था ॥ ६ ॥ तथा शिशिर ऋतुका आगमन होने पर जिसका संपूर्ण शरीर केशरसे लिप्त हो रहा है और जिसका मुख-कमल प्रसन्नतासे खिल रहा है ऐसी प्रिया श्रीमतीको गाढ़ आलिंगनसे प्रसन्न करता था ॥ ७ ॥ मधुके मदसे उन्मत्त हुई स्त्रियोंसे हरेभरे सुन्दर वसन्तमें वज्रजंघ अपनी स्त्रीके साथ साथ आमोंके वनोंमें क्रीड़ा करता था ॥ ८ ॥ कभी श्रीमतीके कानोंमें अशोक वृक्षकी नई कली पहिनाता था । उस समय वह ऐसा सुशोभित होता था मानो मनुष्यके चित्तको भेदन करनेवाले और खूनसे रँगे हुए अपने लाल लाल बाण पहिनाता हुआ कामदेव ही हो ॥ ९ ॥ ग्रीष्म ऋतुमें पसीनेको सुखानेवाली तालाबोंके समीपवर्ती वायुसे जिसकी सब थकावट दूर हो गई है ऐसा वज्रजंघ जलक्रीड़ा कर श्रीमतीको प्रसन्न करता हुआ विहार करता था ॥ १० ॥ चन्दनके द्रवसे जिसका सारा शरीर लिप्त हो रहा है और जो कण्ठमें हार पहने हुई है

---

१ रेजे म०, ल० । २ सप्तपर्णः । ३ सन्तोषम् । ४ सहायां श्रीमतीमित्यर्थः । ५ अनुगच्छन् । ६ कर्णपूरम् । ७ कर्णपूरकरणेन । ८ संनियोजयन् । ९ शय्यागृहे । १० उष्णेन । ११ स हिमागमे अ०, प०, द०, स० । १२ मधुमदायत्त– प०, द० । मधुमहामत्त– अ० । १३ ध्यायति स्म । १४ रक्तलिप्ताः । १५ बाणाः । तीरकाः ल० । तीरकान् म० ।

शिरीषकुसुमैः कान्ताम् अलङ्कुर्वन् वतंसितैः । रूपिणीमिव नैदाघीं श्रियं तां बह्वमंस्त सः ॥१२॥
घनागमे घनोपान्तस्फुरत्तडिति साध्वसात् । कान्तयाश्लेषि विश्लेषभीतया घनमेव[1] सः ॥१३॥
इन्द्रगोपचिता भूमिः आमन्द्रस्तनिता घनाः । ऐन्द्रचापश्च पान्थानां चक्रुरुत्कण्ठितं मनः ॥१४॥
नभः [2]स्थगितमस्माभिः सुरगोपैस्तता[3] मही । क्व[4] याथेति [5]न्यषेधन्नु[6] पथिकान् गर्जितैर्घनाः[7] ॥१५॥
विकासिकुटजच्छन्ना भूधराणामुपत्यकाः[8] । मनोऽस्य निन्युरौत्सुक्यं स्वनैरुन्मदकेकिनाम् ॥१६॥
कदम्बानिलसंवास[9]सुरभीकृतसानवः । गिरयोऽस्य मनो जह्रुः काले[10] नृत्यच्छिखावले ॥१७॥
अनेहसि[11] लसद्विद्युदुद्योतितविहायसि । स रेमे रम्यहर्म्याग्रम्[12] अधिशय्य प्रियासखः ॥१८॥
सरितामुद्धताम्भोभिः प्रियामानप्रधाविभिः[13] । प्रवाहैर्धृतिरस्यासीत् वर्षर्तौ[14] समुपागमे ॥१९॥
भोगान् षड्ऋतुजानित्थं भुञ्जानोऽसौ सहाङ्गनः । साक्षात्कृत्येव मूढानां तपःफलमदर्शयत् ॥२०॥
अथ कालागुरूद्दामधूपधूमाधिवासिते । मणिप्रदीपकोद्योतदूरीकृततमस्तरे[15] ॥२१॥
[16]प्रतिपादिकविन्यस्तरत्नमञ्चोपशोभिनि । दधत्यालम्बिभिर्मुक्ताजालकैर्ह[17]सितश्रियम् ॥२२॥

ऐसी श्रीमतीको गलेमें लगाता हुआ वज्रजंघ गर्मीसे पैदा होनेवाले किसी भी परिश्रमको नहीं जानता था ॥११॥ वह कभी शिरीषके फूलोंके आभरणोंसे श्रीमतीको सजाता था और फिर उसे साक्षात् शरीर धारण करनेवाली ग्रीष्म ऋतुकी शोभा समझता हुआ बहुत कुछ मानता था ॥ १२ ॥ वर्षाऋतुमें जब मेघोंके किनारेपर बिजली चमकती थी उस समय वियोगके भयसे अत्यन्त भयभीत हुई श्रीमती बिजलीके डरसे वज्रजंघका स्वयं गाढ़ आलिङ्गन करने लगती थी ॥ १३ ॥ उस समय वीरबहूटी नामके लाल लाल कीड़ोंसे व्याप्त पृथ्वी, गम्भीर गर्जना करते हुए मेघ और इन्द्रधनुष ये सब पथिकोंके मनको बहुत ही उत्कण्ठित बना रहे थे ॥ १४ ॥ उस समय गरजते हुए बादल मानो यह कह कर ही पथिकोंको गमन करनेसे रोक रहे थे कि आकाश तो हम लोगोंने घेर लिया है और पृथिवी वीरबहूटी कीड़ोंसे भरी हुई है अब तुम कहाँ जाओगे ? ॥ १५ ॥ उस समय खिले हुए कुटज जातिके वृक्षोंसे व्याप्त पर्वतके समीपकी भूमि उन्मत्त हुए मयूरोंके शब्दोंसे राजा वज्रजंघका मन उत्कंठित कर रही थी ॥ १६ ॥ जिस समय मयूर नृत्य कर रहे थे ऐसे उस वर्षा-समयमें कदम्बपुष्पोंकी वायुके संपर्कसे सुगन्धित शिखरोंवाले पर्वत राजा वज्रजंघका मन हरण कर रहे थे ॥ १७ ॥ जिस समय चमकती हुई बिजलीसे आकाश प्रकाशमान रहता है ऐसे उस वर्षाकालमें राजा वज्रजंघ अपने सुन्दर महलके अग्रभागमें प्रिया श्रीमतीके साथ शयन करता हुआ रमण करता था ॥ १८ ॥ वर्षा ऋतु आनेपर स्त्रियोंका मान दूर करनेवाले और उछलते हुए जलसे शोभायमान नदियोंके पूरसे उसे बहुत ही सन्तोष होता था ॥ १९ ॥ इस प्रकार वह राजा वज्रजंघ अपनी प्रिया श्रीमतीके साथ साथ छहों ऋतुओं-के भोगोंका अनुभव करता हुआ मानो मूर्ख लोगोंको पूर्वभवमें किये हुए अपने तपका साक्षात् फल ही दिखला रहा था ॥ २० ॥

अथानन्तर एक दिन वह वज्रजंघ अपने शयनागारमें कोमल, मनोहर और गंगा नदीके बालूदार तटके समान सुशोभित रेशमी चद्दरसे उज्ज्वल शय्या पर शयन कर रहा था । जिस शयनागारमें वह शयन करता था वह कृष्ण अगुरुकी बनी हुई उत्कृष्ट धूपके धूमसे अत्यन्त

१ निविडम् । २ आच्छादितम् । ३ विस्तृता । ४ कुत्र गच्छथ । ५ निषेधं चक्रिरे । ६ इव । ७ गर्जिता घनाः म०, ल० । ८ आसन्नभूमिः । ९ सहवास । १० प्रावृषि इत्यर्थः । ११ काले । १२ सौधाग्रे 'शीङ्स्थासोरधेराधारः' इति सूत्रात् सप्तम्यर्थे द्वितीया । १३ अहंकारप्रक्षालकैः । १४ वर्षर्तौ ल० । १५ निविडान्धकारे । १६ प्रतिपादकेषु स्थापित । १७ हसितं हसनम् ।

कुन्देन्दीवरमन्दारसान्द्रामोदाश्रितालिनि । चित्रभित्तिगतानेकरूपकर्ममनोहरे[1] ॥२३॥
[2]वासगेहेऽन्यदा शिश्ये तल्पे मृदुनि हारिणि । गङ्गासैकतनिर्भासि[3]दुकूल[4]प्रच्छदोज्ज्वले ॥२४॥
प्रियास्तनतटस्पर्शसुखामीलितलोचनः । मेरुकन्दरमाश्लिष्यन् स विद्युदिव वारिदः ॥२५॥
तत्र वातायनद्वारपिधानारुद्धधूमके । केशसंस्कारधूपोद्यद्धूमेन क्षणमूर्च्छितौ ॥२६॥
निरुद्धोच्छ्वासदौःस्थित्यात् अन्तः किञ्चिदिवाकुलौ । दम्पती तौ निशामध्ये दीर्घनिद्रामुपेयतुः ॥२७॥
जीवापाये तयोर्देहौ क्षणाद् विच्छायतां गतौ । प्रदीपापायसंवृद्ध[5]तमस्कन्धौ यथा गृहौ ॥२८॥
वियुतासुरसौ छायां न लेभे सहकान्तया । [6]पर्यस्त इव कालेन सलतः कल्पपादपः ॥२९॥
[7]भोगाङ्गेनापि धूपेन[8] तयोरासीत् परासुता[9] । धिगिमान् भोगि[10]भोगाभान् भोगान् प्राणापहारिणः ॥३०॥
तौ तथा[11] सुखसाद्भूतौ[12] संभोगैरुपलालितैः । प्रापतावेकपदे[13] शोच्यां दशां धिक्संसृतिस्थितिम् ॥३१॥
भोगाङ्गैरपि जन्तूनां यदि चेदीदृशी दशा । जनाः किमेभिरस्वन्तैः[14] कुरुतात्समते रतिम् ॥३२॥

सुगन्धित हो रहा था, मणिमय दीपकोंके प्रकाशसे उसका समस्त अन्धकार नष्ट हो गया था। जिनके प्रत्येक पायेमें रत्न जड़े हुए हैं ऐसे अनेक मंचोंसे वह शोभायमान था। उसमें जो चारों ओर मोतियोंके गुच्छे लटक रहे थे उनसे वह ऐसा मालूम होता था मानो हँस ही रहा हो। कुन्द, नीलकमल और मन्दार जातिके फूलोंकी तीव्र सुगन्धिके कारण उसमें बहुतसे भ्रमर आकर इकट्ठे हुए थे। तथा दीवालों पर बने हुए तरह-तरहके चित्रोंसे वह अतिशय शोभायमान हो रहा था ॥२१-२४॥ श्रीमतीके स्तनतटके स्पर्शसे उत्पन्न हुए सुखसे जिसके नेत्र निमीलित (बंद) हो रहे हैं ऐसा वह वज्रजंघ मेरु पर्वतकी कन्दराका स्पर्श करते हुए बिजली सहित बादलके समान शोभायमान हो रहा था ॥२५॥ शयनागारको सुगन्धित बनाने और केशोंका संस्कार करनेके लिये उस भवनमें अनेक प्रकारका सुगन्धित धूप जल रहा था। भाग्यवश उस दिन सेवक लोग झरोखेके द्वार खोलना भूल गये इसलिये वह धूम उसी शयनागारमें रुकता रहा। निदान, केशोंके संस्कारके लिए जो धूप जल रहा था उसके उठते हुए धूमसे वे दोनों पति-पत्नी क्षण भरमें मूर्छित हो गये ॥२६॥ उस धूमसे उन दोनोंके श्वास रुक गये जिससे अन्तःकरणमें उन दोनोंको कुछ व्याकुलता हुई। अन्तमें मध्य रात्रिके समय वे दोनों ही दम्पति दीर्घ निद्राको प्राप्त हो गये- सदाके लिए सो गये- मर गये ॥२७॥ जिस प्रकार दीपक बुझ जानेपर रुके हुए अन्धकारके समूहसे मकान निष्प्रभ-मलिन-हो जाते हैं, उसी प्रकार जीव निकल जानेपर उन दोनोंके शरीर क्षणभरमें निष्प्रभ—मलिन—हो गये ॥२८॥ जिस प्रकार समय पाकर उखड़ा हुआ कल्पवृक्ष लतासे सहित होनेपर भी शोभायमान नहीं होता उसी प्रकार प्राणरहित वज्रजंघ श्रीमतीके साथ रहते हुए भी शोभायमान नहीं हो रहा था ॥२९॥ यद्यपि वह धूप उनके भोगोपभोगका साधन था तथापि उससे उनकी मृत्यु हो गई इसलिये सर्पके फणाके समान प्राणोंका हरण करनेवाले इन भोगोंको धिक्कार हो ॥ ३० ॥ जो श्रीमती और वज्रजंघ उत्तम-उत्तम भोगोंका अनुभव करते हुए हमेशा सुखी रहते थे वे भी उस समय एक ही साथ शोचनीय अवस्थाको प्राप्त हुए थे इसलिये संसारकी ऐसी स्थितिको धिक्कार हो ॥३१॥ हे भव्यजन, जब कि भोगोपभोगके साधनोंसे ही जीवोंकी ऐसी अवस्था हो जाती है तब अन्तमें दुःख देनेवाले इन भोगोंसे क्या प्रयोजन है ? इन्हें छोड़कर जिनेन्द्रदेवके वीतराग मतमेंही प्रीति करो ॥३२॥

१ चित्रकर्म। २ शय्यागृहे। ३ सदृश। ४ प्रच्छलो–म०, ल०। ५ संरुद्ध–म०, द०, ल०। ६ विध्वस्तः। ७ भोगकारणेन। ८ धूमेन प०। ९ मृतिः। १० सर्पशरीर। ११ तदा अ०, म०, स०, ल०। १२ सुखाधीनौ। १३ तत्क्षणे। 'सहसैकपदे सद्योऽकस्मात् सपदि तत्क्षणे' इत्यभिधानचिन्तामणिः। १४ दुःखान्तैः।

पात्रदानात्त[1]पुण्येन बद्धोदक्कु[2]रुजायुषौ। क्षणात् कुरून् समासाद्य तत्र तौ जन्म भेजतुः ॥३३॥
जम्बूद्वीपमहामेरोः उत्तरां दिशमाश्रिताः। सन्त्युदक्कुरवो नाम स्वर्गश्रीपरिहासिनः ॥३४॥
मद्यातोद्यविभूषास्रग्दीपज्योतिर्गृहाङ्गकाः। भोजनामत्र[3]वस्त्राङ्गा इत्यन्वर्थसमाह्वयाः ॥३५॥
यत्र कल्पद्रुमा रम्या दशधा परिकीर्त्तिताः। नानारत्नमयाः [4]स्फीतप्रभोद्योतितदिङ्मुखाः ॥३६॥
मद्याङ्गा मधुमैरेयसीध्वरिष्टासवादिकान्। रसभेदांस्ततामोदान् वितरन्त्यमृतोपमान् ॥३७॥
कामोद्दीपनसाधर्म्यात् मद्यमित्युपचर्यते। तारवो[5] रसभेदोऽयं यः सेव्यो भोगभूमिजैः ॥३८॥
मदस्य करणं मद्यं [6]पानशौण्डैर्यदादृतम्। तद्वर्जनीयमार्याणाम् अन्तःकरणमोहदम्[7] ॥३९॥
पटहान् मर्दलांस्तालं[8] [9]झल्लरीशङ्खकाहलम्। फलन्ति पणवाद्यांश्च वाद्यभेदांस्तदंघ्रिपाः ॥४०॥
तुलाकोटिक[10]केयूररुचकाङ्गदवेष्टकान्[11]। हारान् मकुटभेदांश्च[12] सुवते भूषणाङ्गकाः ॥४१॥
स्रजो नानाविधाः कर्णपूरभेदांश्च नैकधा[13]। सर्वर्तुकुसुमाकीर्णाः सुमनोङ्गा दधत्यलम् ॥४२॥
मणिप्रदीपैराभान्ति दीपाङ्गाख्या महाद्रुमाः। ज्योतिरङ्गाः सदा[14]द्योतमातन्वन्ति स्फुरद्रुचः ॥४३॥
गृहाङ्गाः सौधमुत्तुङ्गं मण्डपञ्च सभागृहम्। चित्रनर्त्तनशालाश्च सन्निधापयितुं[15] क्षमाः ॥४४॥

उन दोनोंने पात्रदानसे प्राप्त हुए पुण्य के कारण उत्तरकुरु भोगभूमिकी आयुका बन्ध किया था इसलिए क्षणभरमें वहीं जाकर जन्म-धारण कर लिया ॥३३॥

जम्बूद्वीप सम्बन्धी मेरु पर्वतसे उत्तरकी ओर उत्तरकुरु नामकी भोगभूमि है जो कि अपनी शोभासे सदा स्वर्गकी शोभाको हँसती रहती है ॥३४॥ जहां मद्यांग, वादित्रांग, भूषणांग, मालांग, दीपांग, ज्योतिरंग, गृहांग, भोजनांग, भाजनांग और वस्त्रांग ये सार्थक नामको धारण करनेवाले दस प्रकारके कल्पवृक्ष हैं। ये कल्पवृक्ष अनेक रत्नोंके बने हुए हैं और अपनी विस्तृत प्रभासे दसों दिशाओंको प्रकाशित करते रहते हैं ॥३५-३६॥ इनमें मद्यांग-जातिके वृक्ष फैलती हुई सुगन्धिसे युक्त तथा •अमृतके समान मीठे मधु—मैरेय, सीधु, अरिष्ट और आसव आदि अनेक प्रकारके रस देते हैं ॥३७॥• कामोद्दीपनकी समानता होनेसे शीघ्र ही इन मधु आदिको उपचारसे मद्य कहते हैं। वास्तवमें ये वृक्षोंके एक प्रकारके रस हैं जिन्हें भोगभूमिमें उत्पन्न होनेवाले आर्य पुरुष सेवन करते हैं ॥३८॥ मद्यपायी लोग जिस मद्यका पान करते हैं वह नशा करनेवाला है और अन्तःकरणको मोहित करनेवाला है इसलिए आर्य-पुरुषोंके लिये सर्वथा त्याज्य है ॥३९॥ वादित्रांग जातिके वृक्षमें दुन्दुभि, मृदंग, झल्लरी, शंख, भेरी, चंग आदि अनेक प्रकारके बाजे फलते हैं ॥४०॥ भूषणांग जातिके वृक्ष नूपुर, बाजूबन्द, रुचिक, अंगद (अनन्त), करधनी, हार और मुकुट आदि अनेक प्रकारके आभूषण उत्पन्न करते हैं ॥४१॥ मालांग जातिके वृक्ष सब ऋतुओंके फूलोंसे व्याप्त अनेक प्रकारकी मालाएं और कर्णफूल आदि अनेक प्रकारके कर्णाभरण अधिक रूपसे धारण करते हैं ॥४२॥ दीपांग नामके कल्पवृक्ष मणिमय दीपकोंसे शोभायमान रहते हैं और प्रकाशमान कान्तिके धारक ज्योतिरङ्ग जातिके वृक्ष सदा प्रकाश फैलाते रहते हैं ॥४३॥ गृहांग जातिके कल्पवृक्ष, ऊंचे ऊंचे राजभवन, मंडप, सभागृह, चित्रशाला और नृत्यशाला आदि अनेक प्रकारके भवन तैयार करनेके लिये समर्थ रहते हैं ॥४४॥

---

१ स्वीकृत। २ उत्तरकुरु। ३ भाजन। ४ बहल। ५ तरुसम्बन्धी। ६ मद्यपायिभिः। ७ -मन्तःकरणमोहनम् द०, स०, प०। -मन्तस्करणमोहदम् अ०। ८ -तालझल्लरी -प०। पटहान्मर्दलं तालझल्लरी अ०। ९ जयघण्टा। १० नूपुरम्। रुचकं कुण्डलं ग्रीवाभरणं वा। 'रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः' इत्यभिधानात्। ११ वेष्टकं रशना। १२ -मुकुट- अ०, प०, स०। १३ अनेकधा। १४ सदा द्योतिं वितन्वन्ति अ०, स०। सदोद्योतमातन्वन्ति प०, द०, म०। १५ कर्तुम्।

भोजनाङ्गा वराहारान् अमृतस्वाददायिनः । [1]वपुष्करान् फलन्त्यात्तषड्रसानशनादिकान् ॥४५॥
अशनं पानकं खाद्यं स्वाद्यं चान्नं[2] चतुर्विधम् । [3]कट्वम्लतिक्तमधुरकषायलवणा रसाः ॥४६॥
स्थालानि[4] चषकान्[5] शुक्ति[6]भृङ्गारकरकादिकान् । भाजनाङ्गा दिशन्त्याविर्भवच्छाखाविषञ्जिणः[7] ॥४७॥
चीनपट्टदुकूलानि [8]प्रावारपरिधानकम्[9] । मृदुश्लक्ष्णमहार्घाणि[10] वस्त्राङ्गा दधति द्रुमाः ॥४८॥
न वनस्पतयोऽप्येते नैव [11]दिव्यैरधिष्ठिताः[12] । केवलं पृथिवीसाराः[13] तन्मयत्वमुपागताः[14] ॥४९॥
अनादिनिधनाश्चैते निसर्गात् फलदायिनः । नहि [15]भावस्वभावानाम् उपालम्भः[16] सुसङ्गतः[17] ॥५०॥
नृणां दानफलादेते फलन्ति विपुलं फलम् । [18]यथान्यपादपाः काले प्राणिनामुपकारकाः ॥५१॥
सर्वरत्नमयं यत्र धरणीतलमुज्ज्वलैः । प्रसूनैः सोपहारत्वात् मुच्यते जातु न श्रिया ॥५२॥
यत्र तृण्या[19] महीपृष्ठं चतुरङ्गुलसंमिता । शुकच्छायांशुकेनेव प्रच्छादयति हारिणी ॥५३॥
मृगाश्चरन्ति[20] यत्रत्याः[21] कोमलास्तृणसम्पदः । [22]स्वाद्वीर्मृदयसीह द्धा [23]रसायनरसास्थया ॥५४॥

भोजनांग जातिके वृक्ष, अमृतके समान स्वाद देनेवाले, शरीरको पुष्ट करनेवाले और छहों रस सहित अशन पान आदि उत्तम-उत्तम आहार उत्पन्न करते हैं ॥४५॥ अशन (रोटी दाल भात आदि खानेके पदार्थ), पानक (दूध, पानी आदि पीनेके पदार्थ), खाद्य (लड्डू आदि खाने योग्य पदार्थ) और स्वाद्य (पान सुपारी जावित्री आदि स्वाद लेने योग्य पदार्थ) ये चार प्रकारके आहार और कड़ुवा, खट्टा, चरपरा, मीठा, कसैला और खारा ये छह प्रकारके रस हैं ॥४६॥ भाजनांग जातिके वृक्ष थाली, कटोरा, सीपके आकारके बर्तन, भृंगार और करक (करवा) आदि अनेक प्रकारके बर्तन देते हैं। ये बर्तन इन वृक्षों की शाखाओंमें लटकते रहते हैं ॥ ४७ ॥ और वस्त्रांग जातिके वृक्ष चायना सिल्क, रेशम वस्त्र, दुपट्टे और धोती आदि अनेक प्रकारके कोमल चिकने और महामूल्य वस्त्र धारण करते हैं ॥४८॥ ये कल्पवृक्ष न तो वनस्पतिकायिक हैं और न देवोंके द्वारा अधिष्ठित ही हैं। केवल, वृक्षके आकार परिणत हुआ पृथ्वीका सार ही हैं ॥४९॥ ये सभी वृक्ष अनादिनिधन हैं और स्वभावसे ही फल देनेवाले हैं। इन वृक्षोंका यह ऐसा स्वभाव ही है इसलिये 'ये वृक्ष वस्त्र तथा बर्तन आदि कैसे देते होंगे, इस प्रकार कुतर्क कर इनके स्वभावमें दूषण लगाना उचित नहीं है। भावार्थ—पदार्थोंके स्वभाव अनेक प्रकारके होते हैं इसलिये उनमें तर्क करनेकी आवश्यकता नहीं है जैसा कि कहा भी है 'स्वभावोऽतर्कगोचरः' अर्थात् स्वभाव तर्कका विषय नहीं है ॥ ५० ॥ जिस प्रकार आजकलके अन्य वृक्ष अपने अपने फलनेका समय आनेपर अनेक प्रकारके फल देकर प्राणियोंका उपकार करते हैं उसी प्रकार उपर्युक्त कल्पवृक्ष भी मनुष्योंके दानके फलसे अनेक प्रकारके फल फलते हुए वहांके प्राणियोंका उपकार करते हैं ॥ ५१ ॥ जहांकी पृथ्वी सब प्रकारके रत्नोंसे बनी हुई है और उसपर उज्ज्वल फूलोंका उपहार पड़ा रहता है इसलिये उसे शोभा कभी छोड़ती ही नहीं है ॥ ५२ ॥ जहांकी भूमिपर हमेशा चार अंगुल प्रमाण मनोहर घास लहलहाती रहती है जिससे ऐसा मालूम होता है कि मानो हरे रंगके वस्त्रसे भूपृष्ठको ढक रही हो अर्थात् जमीनपर हरे रंगका कपड़ा बिछा हो ॥ ५३ ॥ जहांके पशु

---

१ पुष्टिकरान्। २ चान्धश्चतुर्विधम् प०, स०, म०। चाथ चतुर्विधम् अ०। ३ कट्वाम्ल– म०, ल०। ४ –भोजनभाजनानि। ५ पानपात्र। ६ शुक्ती– प०। शुक्तीन् अ०, स०, द०। ७ संसक्तान् ८ उत्तरीयवस्त्र। ९ अधोंऽशुक। १० महामूल्यानि। ११ देवै– म०, ल०। १२ स्थापिताः १३ पृथिवीसारस्तन्मयत्व– ब०, अ०, प०, म०, स०, द०, ल०। १४ –मुपागतः ब०, अ०, प०, स०, द० १५ पदार्थ। १६ दूषणम्। १७ मनोज्ञः। १८ यथाद्य अ०, प०, स०, द०। १९ वनसंहतिः २० भक्षयन्ति। २१ यत्र भवाः। तत्रत्याः अ०, स०। २२ अतिशयेन रुच्या। २३ अमृतरसबुद्ध्या

सोत्पला दीर्घिका यत्र विदलत्कनकाम्बुजाः । हंसानां कलमन्द्रेण विरुतेन मनोहराः ॥५५॥
सरांस्युत्फुल्लपद्मानि वनमुन्मत्तकोकिलम् । क्रीडाद्रयश्च रुचिराः सन्ति यत्र पदे पदे ॥५६॥
यत्राधूय तरून्मन्दम् आवाति मृदुमारुतः । [1]पटवासमिवातन्वन् मकरन्दरजोऽभितः ॥५७॥
यत्र गन्धवहाधूतैः आकीर्णा पुष्परेणुभिः । वसुधा राजते पीत[2]क्षौमेणेवावकुण्ठिता[3] ॥५८॥
यत्रामोदितदिग्भागैः मरुद्भिः पुष्पजं रजः । नभसि श्रियमाधत्ते वितानस्याभितो हृतम् ॥५९॥
यत्र नातपसंबाधा न वृष्टिर्न हिमादयः । नेतयो दन्दशूका वा प्राणिनां भयहेतवः ॥६०॥
न ज्योत्स्ना नाप्यहोरात्रविभागो नर्तु[4]संक्रमः । नित्यैकवृत्तयो भावा[4] यत्रैषां सुखहेतवः ॥६१॥
वनानि नित्यपुष्पाणि नलिन्यो नित्यपङ्कजाः । यत्र नित्यसुखा देशा रत्नपांसुभिराचिता ॥६२॥
यत्रोत्पन्नवतां दिव्यम् अङ्गुल्याहारमुद्रसम्[5] । वदन्त्युत्तानशय्यायाम् आसप्ताहव्यतिक्रमात् ॥६३॥
ततो देशान्तरं तेषाम् आमनन्ति मनीषिणः । दम्पतीनां महीरङ्गरङ्गिणां दिनसप्तकम् ॥६४॥
सप्ताहेन परेणाथ प्रोत्थाय कलभाषिणः । स्खलद्गति सहेलञ्च सञ्चरन्ति महीतले ॥६५॥
ततः स्थिरपदन्यासैः व्रजन्ति दिनसप्तकम् । कलाज्ञानेन सप्ताहं [6]निर्विशन्ति गुणैश्च ते ॥६६॥
परेण सप्तरात्रेण सम्पूर्णनवयौवनाः । लसदंशुकसद्भूषा जायन्ते भोगभागिनः ॥६७॥

स्वादिष्ट, कोमल और मनोहर तृणरूपी संपत्तिको रसायन समझकर बड़े हर्षसे चरा करते हैं ॥ ५४ ॥ जहाँ अनेक वापिकाएँ हैं जो कमलोंसे सहित हैं, उनमें सुवर्णके समान पीले कमल फूल रहे हैं और जो हंसोंके मधुर तथा गंभीर शब्दोंसे अतिशय मनोहर जान पड़ती हैं ॥ ५५ ॥ जहाँ जगह जगह पर फूले हुए कमलोंसे सुशोभित तालाब, उन्मत्त कोकिलाओंसे भरे हुए वन और सुन्दर क्रीड़ापर्वत हैं ॥ ५६ ॥ जहाँ कोमल वायु वृक्षोंको हिलाता हुआ धीरे धीरे बहता रहता है। वह वायु बहते समय सब ओर कमलोंकी परागको उड़ाता रहता है जिससे ऐसा मालूम होता है मानो सब ओर सुगन्धित चूर्ण ही फैला रहा हो ॥ ५७ ॥ जहाँ वायुके द्वारा उड़कर आये हुए पुष्पपरागसे ढकी हुई पृथ्वी ऐसी शोभायमान हो रही है मानो पीले रंगके रेशमी वस्त्रसे ढकी हो ॥ ५८ ॥ जहाँ दशों दिशाओंमें वायुके द्वारा उड़ उड़कर आकाशमें इकट्ठा हुआ पुष्पपराग सब ओरसे तने हुए चँदोवाकी शोभा धारण करता है ॥ ५९ ॥ जहाँ न गर्मीका क्लेश होता है न पानी बरसता है, न तुषार आदि पड़ता है न अतिवृष्टि आदि ईतियाँ हैं और न प्राणियोंको भय उत्पन्न करनेवाले साँप बिच्छू खटमल आदि दुष्ट जन्तु ही हुआ करते हैं ॥६०॥ जहाँ न चाँदनी है, न रात-दिनका विभाग और न ऋतुओंका परिवर्तन ही है, जहाँ सुख देनेवाले सब पदार्थ सदा एकसे रहते हैं ॥ ६१ ॥ जहांके वन सदा फूलोंसे युक्त रहते हैं, कमलिनियोंमें सदा कमल लगे रहते हैं, और रत्नकी धूलिसे व्याप्त हुए देश सदा सुखी रहते हैं ॥ ६२ ॥ जहाँ उत्पन्न हुए आर्य लोग प्रथम सात दिन तक अपनी शय्यापर चित्त पड़े रहते हैं। उस समय आचार्योंने हाथका रसीला अंगूठा चूसना ही उनका दिव्य आहार बतलाया है ॥ ६३ ॥ तत्पश्चात् विद्वानोंका मत है कि वे दोनों दम्पती द्वितीय सप्ताहमें पृथ्वी-रूपी रंगभूमिमें घुटनोंके बल चलते हुए एक स्थानसे दूसरे स्थानतक जाने लगते हैं ॥ ६४ ॥ तदनन्तर तीसरे सप्ताहमें वे खड़े होकर अस्पष्ट किन्तु मीठी मीठी बातें कहने लगते हैं और गिरते पड़ते खेलते हुए जमीनपर चलने लगते हैं ॥ ६५ ॥ फिर चौथे सप्ताहमें अपने पैर स्थिरतासे रखते हुए चलने लगते हैं तथा पाँचवें सप्ताहमें अनेक कलाओं और गुणोंसे सहित हो जाते हैं ॥ ६६ ॥ छठवें सप्ताहमें पूर्ण जवान हो जाते हैं और सातवें सप्ताहमें अच्छे अच्छे वस्त्राभूषण धारण कर भोग भोगनेवाले

---

१ वासचूर्णम् । २ स्वर्णवर्णपट्टवस्त्रेण । ३ आच्छादिता । –गुण्ठिता अ०, प०, स०, द० । ४ पदार्थाः । ५ उद्गतरसम् । ६ अनुभवन्ति ।

नवमासं स्थिता गर्भे रत्नगर्भगृहोपमे । यत्र दम्पतितामेत्य जायन्ते दानिनो नराः ॥६८॥
यदा दम्पतिसंभूतिः [1]जनयित्रोः परासुता । तदैव तत्र पुत्रादिसङ्कल्पो यत्र देहिनाम् ॥६९॥
क्षुत[2]जृम्भितमात्रेण यत्राहुर्मृतिमङ्गिनाम् । स्वभावमार्दवाद् यान्ति दिवमेव यदुद्भवाः ॥७०॥
देहोच्छ्रायं नृणां यत्र नानालक्षणसुन्दरम् । धनुषां षट्सहस्राणि [3]विवृण्वन्त्याप्तसूक्तयः ॥७१॥
पल्यत्रयमितं यत्र देहिनामायुरिष्यते । दिनत्रयेण चाहारः [4]कुवलीफलमात्रकः ॥७२॥
[5]यद्भुवां न जरातङ्का न वियोगो न शोचनम् । नानिष्टसम्प्रयोगश्च न चिन्ता दैन्यमेव च ॥७३॥
न निद्रा नातितन्द्राणं[6] नात्युन्मेषनिमेषणम् । न शारीरमलं यत्र न लालास्वेदसंभवः ॥७४॥
न यत्र विरहोन्मादो न यत्र मदनज्वरः । न यत्र खण्डना भोगे सुखं यत्र निरन्तरम् ॥७५॥
न विषादो भयं ग्लानिः[7] नारुचिः कुपितञ्च[8] न । न कार्पण्यमनाचारो न बली यत्र नाबलः ॥७६॥
[9]बालार्कसमनिर्भासा निःस्वेदा नीरजोऽम्बराः । यत्र पुण्योदयान्नित्यं रंरम्यन्ते नराः सुखम् ॥७७॥
दशाङ्गतरुसम्भूतभोगानुभवनोद्भवम् । सुखं यत्रातिशेते तां चक्रिणो भोगसम्पदम् ॥७८॥
यत्र दीर्घायुषां नृणां [10]नाकाण्डे मृत्युसंभवः । निरुपद्रवमायुः स्वं जीवन्त्युक्तप्रमाणकम् ॥७९॥

हो जाते हैं । ६७ ॥ पूर्वभवमें दान देनेवाले मनुष्य ही जहाँ उत्पन्न होते हैं । वे उत्पन्न होनेके पहले नौ माह तक गर्भमें इस प्रकार रहते हैं जिस प्रकार कि कोई रत्नोंके महलमें रहता है । उन्हें गर्भमें कुछ भी दुःख नहीं होता । और स्त्री पुरुष साथ साथ ही पैदा होते । वे दोनों स्त्री पुरुष दम्पतिपनेको प्राप्त होकर ही रहते हैं ॥ ६८ ॥ वहाँ जिस समय दम्पतिका जन्म होता है उसी समय उनके माता-पिताका देहान्त हो जाता है अतएव वहांके जीवोंमें पुत्र आदिका संकल्प नहीं होता ॥६९॥ जहाँ केवल छींक और जंभाई लेने मात्रसे ही प्राणियोंकी मृत्यु हो जाती है अर्थात् अन्त समयमें माताको छींक और पुरुषको जंभाई आती है । जहाँ उत्पन्न होनेवाले जीव स्वभावसे कोमलपरिणामी होनेके कारण स्वर्गको ही जाते हैं ॥ ७० ॥ जहाँ उत्पन्न होने-वाले लोगोंका शरीर अनेक लक्षणोंसे सुशोभित तथा छः हजार धनुष ऊँचा होता है ऐसा आप्तप्रणीत आगम स्पष्ट वर्णन करते हैं ॥ ७१ ॥ जहाँ जीवोंकी आयु तीन पल्य प्रमाण होती है और आहार तीन दिनके बाद होता है, वह भी बदरीफल (छोटे बेरके) बराबर ॥ ७२ ॥ जहाँ उत्पन्न हुए जीवोंके न बुढ़ापा आता है न रोग होता है, न विरह होता है, न शोक होता है, न अनिष्टका संयोग होता है, न चिन्ता होती है, न दीनता होती है, न नींद आती है, न आलस्य आता है, न नेत्रोंके पलक झपते हैं, न शरीरमें मल होता है, न लार बहती है और न पसीना ही आता है ॥ ७३-७४ ॥ जहाँ न विरहका उन्माद है, न कामज्वर है, न भोगोंका विच्छेद है किन्तु निरन्तर सुख ही सुख रहता है ॥ ७५ ॥ जहाँ न विषाद है, न भय है, न ग्लानि है, न अरुचि है, न क्रोध है, न कृपणता है, न अनाचार है, न कोई बलवान् है और न कोई निर्बल है ॥ ७६ ॥ जहांके मनुष्य बालसूर्यके समान देदीप्यमान, पसीना-रहित और स्वच्छ वस्त्रोंके धारक होते हैं तथा पुण्यके उदयसे सदा सुख-पूर्वक क्रीड़ा करते रहते है ॥ ७७ ॥ जहाँ दश प्रकारके कल्पवृक्षोंसे उत्पन्न हुए भोगोंके अनुभव करनेसे उत्पन्न हुआ सुख चक्रवर्तीकी भोग सम्पदाओंका भी उल्लंघन करता है अर्थात् वहांके जीव चक्रवर्तीकी अपेक्षा अधिक सुखी रहते हैं ॥ ७८ ॥ जहाँ मनुष्य बड़ी लम्बी आयुके धारक होते हैं उनकी असमयमें मृत्यु नहीं होती । वे अपनी तीन पल्य प्रमाण आयु तक निर्विघ्न रूपसे जीवित रहते हैं ॥ ७९ ॥

---

१ जननीजनकयोः । २ जृम्भण । ३ विवरणं कुर्वन्ति । ४ बदरम् । ५ यत्रोत्पन्नानाम् । ६ तन्द्रा । ७ हर्षक्षयः । ८ कोपः । ९ तरुणार्कसदृशशरीरुचः । १० अकाले ।

सर्वेऽपि समसंभोगाः सर्वे समसुखोदयाः । सर्वे सर्वर्तुजान् भोगान् यत्र [1]विन्दन्त्यनामयाः ॥८०॥
सर्वेऽपि सुन्दराकाराः सर्वे वज्रास्थिबन्धनाः । सर्वे चिरायुषः कान्त्या गीर्वाणा इव यद्भुवः[2] ॥८१॥
यत्र कल्पतरुच्छायाम् उपेत्य ललितस्मितौ । दम्पती गीतवादित्रै रमेते[3] सततोत्सवैः ॥८२॥
कलाकुशलता कल्य[4]देहत्वं कलकण्ठता[5] । मात्सर्येर्ष्यादिवैकल्यमपि यत्र निसर्गजम् ॥८३॥
स्वभावसुन्दराकाराः स्वभावललितेहिताः[6] । स्वभावमधुरालापा मोदन्ते यत्र देहिनः ॥८४॥
दानाद् दानानुमोदाद्वा यत्र पात्रसमाश्रितात् । प्राणिनः सुखमेधन्ते यावज्जीवमनामयाः ॥८५॥
कुदृष्टयो व्रतैर्हीनाः केवलं भोगकाङ्क्षिणः । दत्वा दानान्यपात्रेषु तिर्यक्त्वं यत्र यान्त्यमी ॥८६॥
कुशीलाः कुत्सिताचाराः कुवेषा दुरुपोषिताः । मायाचाराश्च जायन्ते मृगा यत्र व्रतच्युताः ॥८७॥
[7]मिथुनं मिथुनं तेषां मृगाणामपि जायते । न मिथोऽस्ति विरोधो[8] वा [9]वैरं [10]वैरस्यमेव वा ॥८८॥
इत्यत्यन्तसुखे तस्मिन् क्षेत्रे पात्रप्रदानतः । श्रीमती वज्रजङ्घश्च दम्पतित्वमुपेयतुः ॥८९॥
प्रागुक्ताश्च मृगा जन्म भेजुस्तत्रैव भद्रकाः । पात्रदानानुमोदेन दिव्यं मानुष्यमाश्रिताः ॥९०॥
तथा मतिवराद्याश्च तद्वियोगाद् गताश्शुचम् । दृढधर्मान्तिके दीक्षां जैनीमाशिश्रियन् पराम् ॥९१॥
ते सम्यग्दर्शनज्ञानचारित्राचारसम्पदम् । समाराध्य यथाकालं स्वर्गलोकमयासिषुः ॥९२॥

जहाँ सब जीव समान रूपसे भोगोंका अनुभव करते हैं, सबके एक समान सुखका उदय होता है, सभी नीरोग रहकर छहों ऋतुओंके भोगोपभोग प्राप्त करते हैं ॥ ८० ॥ जहाँ उत्पन्न हुए सभी जीव सुन्दर आकारके धारक हैं, सभी वज्रवृषभनाराचसंहननसे सहित हैं, सभी दीर्घ आयुके धारक हैं और सभी कान्तिसे देवोंके समान हैं ॥ ८१ ॥ जहाँ स्त्री पुरुष कल्पवृक्षकी छायामें जाकर लीलापूर्वक मन्द मन्द हँसते हुए, गाना-बजाना आदि उत्सवोंसे सदा क्रीड़ा करते रहते हैं ॥८२॥ जहाँ कलाओंमें कुशल होना, स्वर्गके समान सुंदर शरीर प्राप्त होना, मधुर कंठ होना और मात्सर्य ईर्ष्या आदि दोषोंका अभाव होना आदि बातें स्वभावसे ही होती हैं ॥८३॥ जहांके जीव स्वभावसे ही सुन्दर आकारवाले, स्वभावसे ही मनोहर चेष्टाओंवाले और स्वभावसे ही मधुर वचन बोलनेवाले होते हैं । इस प्रकार वे सदा प्रसन्न रहते हैं ॥ ८४ ॥ उत्तम पात्रके लिये दान देने अथवा उनके लिये दिये हुए दानकी अनुमोदना करनेसे जीव जिस भोगभूमिमें उत्पन्न होते हैं और जीवनपर्यन्त नीरोग रहकर सुखसे बढ़ते रहते हैं ॥८५॥ जो जीव मिथ्यादृष्टि हैं, व्रतोंसे हीन हैं और केवल भोगोंके अभिलाषी हैं वे अपात्रोंमें दान देकर वहाँ तिर्यञ्च पर्यायको प्राप्त होते हैं ॥८६॥ जो जीव कुशील हैं—खोटे स्वभावके धारक हैं, मिथ्या आचारके पालक हैं, कुवेषी हैं, मिथ्या उपवास करनेवाले हैं, मायाचारी हैं और व्रतभ्रष्ट हैं वे जिस भोगभूमिमें हरिण आदि पशु होते हैं॥ ८७ ॥ और जहाँ पशुओंके युगल भी आनन्दसे क्रीड़ा करते हैं । उनके परस्परमें न विरोध होता है न वैर होता है और न उनका जीवन ही नीरस होता है ॥ ८८ ॥ इस प्रकार अत्यन्त सुखोंसे भरे हुए उस उत्तर कुरुक्षेत्रमें पात्रदानके प्रभावसे वे दोनों श्रीमती और वज्रजंघ दम्पती अवस्थाको प्राप्त हुए—स्त्री और पुरुष रूपसे उत्पन्न हुए ॥८९॥ जिनका वर्णन पहले किया जा चुका है ऐसे नकुल, सिंह, वानर और शूकर भी पात्रदानकी अनुमोदनाके प्रभावसे वहीं पर दिव्य मनुष्यशरीरको पाकर भद्रपरिणामी आर्य हुए ॥९०॥ इधर मतिवर, आनन्द, धनमित्र और अकम्पन ये चारों ही जीव श्रीमती और वज्रजंघके विरहसे भारी शोकको प्राप्त हुए और अन्तमें चारोंने ही श्रीदृढधर्म नामके आचार्यके समीप उत्कृष्ट जिनदीक्षा धारण कर ली ॥९१॥ और

१ लभन्ते । 'विदुङ् लाभे' । २ यत्रोत्पन्नाः । ३ रेमाते अ०, प०, द०, स०, म० । ४ निरामय । कल्पदेहत्वं अ०, प०, द०, स० । ५ मनोज्ञकण्ठत्वम् । ६ चेष्टाः । ७ मैथुनं मि– स०, द०, ल० । ८ वध्यवधकादिभावः । ९ मानसिको द्वेषः । १० रसद्वयः ।

अधो ग्रैवेयकस्याधो विमाने तेऽहमिन्द्रताम् । प्राप्तास्तपोऽनुभावेन तपो हि फलतीप्सितम् ॥९३॥
[1]अथातो वज्रजङ्घार्यः कान्तया सममेकदा । कल्पपादपजां लक्ष्मीम् ईक्षमाणः क्षणं स्थितः ॥९४॥
सूर्यप्रभस्य देवस्य नभोयायि विमानकम् । दृष्ट्वा जातिस्मरो भूत्वा प्रबुद्धः प्रियया समम् ॥९५॥
तावच्चारणयोर्युग्मं दूरादागच्छदैक्षत । तच्च तावनुगृह्णन्तौ व्योम्नः [2]समवतेरतुः ॥९६॥
दृष्ट्वा तौ सहसास्यासीत् अभ्युत्थानादिसंभ्रमः । संस्काराः प्राक्तना नूनं प्रेरयन्त्यङ्गिनो हिते ॥९७॥
अभ्युत्तिष्ठन्नसौ रेजे मुनीन्द्रौ सह कान्तया । नलिन्या दिवसः सूर्यप्रतिसूर्याविवोद्गतौ[3] ॥९८॥
तयोरधिपदद्वन्द्वं[4] दत्तार्घः प्रणनाम सः । आनन्दाश्रुलवैः सान्द्रैः क्षालयन्निव तत्क्रमौ ॥९९॥
तावाशीर्भिरथाश्वास्य प्रणतं प्रमदान्वितम् । [5]यती समुचितं देशं अध्यासीनौ यथाक्रमम् ॥१००॥
ततः सुखोपविष्टौ तौ सोऽपृच्छदिति चारणौ । लसद्दन्तांशुसन्तानैः पुष्पाञ्जलिमिवाकिरन् ॥१०१॥
भगवन्तौ युवां [6]क्वत्यौ [7]कुतस्त्यौ किन्नु कारणम् । युष्मदागमने ब्रूतम् इदमेतत्तथाद्य[8] मे ॥१०२॥
युष्मत्संदर्शनाज्जातसौहार्दं मम मानसम् । प्रसीदति किमु ज्ञात[9] पूर्वौ [10]ज्ञाती युवां मम ॥१०३॥

चारों ही सम्यग्दर्शन, सम्यग्ज्ञान तथा सम्यक्चारित्ररूपी सम्पदाकी आराधना कर अपनी अपनी आयुके अनुसार स्वर्गलोक गये ॥ ९२ ॥ वहाँ तपके प्रभावसे अधोग्रैवेयकके सबसे नीचेके विमानमें (पहले ग्रैवेयकमें) अहमिन्द्र पदको प्राप्त हुए । सो ठीक ही है । तप सबके अभीष्ट फलोंको फलता है ॥ ९३ ॥

अनन्तर एक समय वज्रजंघ आर्य अपनी स्त्रीके साथ कल्पवृक्षकी शोभा निहारता हुआ क्षण भर बैठा ही था ॥ ९४ ॥ कि इतनेमें आकाशमें जाते हुए सूर्यप्रभ देवके विमानको देखकर उसे अपनी स्त्रीके साथ साथ ही जातिस्मरण हो गया और उसी क्षण दोनोंको संसारके स्वरूपका यथार्थ ज्ञान हो गया ॥ ९५ ॥ उसी समय वज्रजंघके जीवने दूरसे आते हुए दो चारण मुनि देखे । वे मुनि भी उसपर अनुग्रह करते हुए आकाशमार्गसे उतर पड़े ॥ ९६ ॥ वज्रजंघका जीव उन्हें आता हुआ देखकर शीघ्र ही खड़ा हो गया । सच है, पूर्व जन्मके संस्कार ही जीवोंको हित-कार्यमें प्रेरित करते रहते हैं ॥ ९७ ॥ दोनों मुनियोंके समक्ष अपनी स्त्रीके साथ खड़ा होता हुआ वज्रजंघका जीव ऐसा शोभायमान हो रहा था जैसे उदित होते हुए सूर्य और प्रतिसूर्यके समक्ष कमलिनीके साथ दिन शोभायमान होता है ॥ ९८ ॥ वज्रजंघके जीवने दोनों मुनियोंके चरणयुगलमें अर्घ चढ़ाया और नमस्कार किया । उस समय उसके नेत्रोंसे हर्षके आँसू निकल-निकल कर मुनिराजके चरणों पर पड़ रहे थे जिससे वह ऐसा जान पड़ता था मानो अश्रुजलसे उनके चरणोंका प्रक्षालन ही कर रहा हो ॥ ९९ ॥ वे दोनों मुनि स्त्रीके साथ प्रणाम करते हुए आर्य वज्रजंघको आशीर्वाद द्वारा आश्वासन देकर मुनियोंके योग्य स्थान पर यथाक्रम बैठ गये ॥ १०० ॥ तदनन्तर सुखपूर्वक बैठे हुए दोनों चारण मुनियोंसे वज्रजंघ नीचे लिखे अनुसार पूछने लगा । पूछते समय उसके मुखसे दाँतोंकी किरणोंका समूह निकल रहा था जिससे ऐसा मालूम होता था मानो वह पुष्पाञ्जलि ही बिखेर रहा हो ॥ १०१ ॥ वह बोला—हे भगवन्, आप कहांके रहनेवाले हैं ? आप कहांसे आये हैं और आपके आनेका क्या कारण है ? यह सब आज मुझसे कहिये ॥ १०२ ॥ हे प्रभो, आपके दर्शनसे मेरे हृदयमें मित्रताका भाव उमड़ रहा है, चित्त बहुत ही प्रसन्न हो रहा है और मुझे ऐसा मालूम होता है कि मानो आप मेरे परि-

१ अनन्तरम् । २ अवतरतः स्म । ३ –विवोद्गतौ प० । ४ पदयुगले । ५ यतेः म०, ल० । ६ क्व भवौ । ७ कुत आगतौ । 'क्वेहामातस्त्रात् त्यच्' इति यथाक्रमं भवार्थे आगतार्थे च त्यच्प्रत्ययः । ८ प्रत्यक्षतया । –मेतत्तथाद्य मे म० ल० । ९ पूर्वस्मिन् ज्ञातौ । १० बन्धू ।

इति प्रश्नावसानेऽस्य मुनिर्ज्यायानभाषत । दशनांशुजलोत्पीडैः[1] क्षालयन्निव तत्तनुम् ॥१०४॥
त्वं विद्धि मां स्वयम्बुद्धं यतोऽबुद्धाः[2] प्रबुद्धधीः । महाबलभवे जैनं धर्मं कर्मनिबर्हणम्[3] ॥१०५॥
त्वद्वियोगादहं जातनिर्वेदो बोधमाश्रितः । दीक्षित्वाऽभूवमुत्सृष्टदेहः सौधर्मकल्पजः ॥१०६॥
स्वयम्प्रभविमानेऽग्रे मणिचूलाह्वयः सुरः । साधिकाऽब्ध्युपमायुष्कः ततश्च्युत्वा भुवं श्रितः ॥१०७॥
जम्बूद्वीपस्य पूर्वस्मिन् विदेहे पौष्कलावते[4] । नगर्यां पुण्डरीकिण्यां प्रियसेनमहीभृतः ॥१०८॥
सुन्दर्याश्च सुतोऽभूवं ज्यायान् प्रीतिङ्कराह्वयः । प्रीतिदेवः कनीयान् मे मुनिरेष महातपाः ॥१०९॥
स्वयम्प्रभजिनोपान्ते दीक्षित्वा वामलप्स्वहि । सावधिज्ञानमाकाशचारणत्वं तपोबलात् ॥११०॥
बुद्ध्वाऽवधिमयं चक्षुः व्यापार्या[5]जर्यसङ्गतम्[6] । [7]त्वामार्यमिह सम्भूतं प्रबोधयितुमागतौ ॥१११॥
[8]विदाङ्कुरु [9]कुरुष्वार्य पात्रदानविशेषतः । समुत्पन्नमिहात्मानं विशुद्धाद् दर्शनाद् विना ॥११२॥
महाबलभवेऽस्मत्तो बुद्ध्वा त्यक्ततनुस्थितिः । नालब्धा[10] दर्शने शुद्धिं भोगकाङ्क्षानुबन्धतः ॥११३॥
तस्मात्त्वं दर्शनं सम्यग्विशेषणमनुत्तरम् । आयातौ दातुकामौ स्व[11] स्वर्मोक्षसुखसाधनम् ॥११४॥
तद्गृहाणाद्य सम्यक्त्वं तल्लाभे काल एष ते । काललब्ध्या विना नार्य तदुत्पत्तिरिहाङ्गिनाम् ॥११५॥
देशनाकाललब्ध्यादिबाह्यकारणसम्पदि । [12]अन्तःकरणसामग्र्यां भव्यात्मा स्याद् विशुद्धकृत्[13][दृक्] ॥११६॥

चित बन्धु हैं ॥ १०३ ॥ इस प्रकार वज्रजंघका प्रश्न समाप्त होते ही ज्येष्ठ मुनि अपने दांतोंकी किरणों रूपी जलके समूहसे उसके शरीरका प्रक्षालन करते हुए नीचे लिखे अनुसार उत्तर देने लगे ॥ १०४ ॥ हे आर्य, तू मुझे स्वयंबुद्ध मन्त्रीका जीव जान, जिससे कि तूने महाबलके भवमें सम्यग् ज्ञान प्राप्त कर कर्मोंका क्षय करनेवाले जैनधर्मका ज्ञान प्राप्त किया था ॥ १०५ ॥ उस भवमें तेरे वियोगसे सम्यग्ज्ञान प्राप्त कर मैंने दीक्षा धारण की थी और आयुके अन्तमें संन्यासपूर्वक शरीर छोड़ सौधर्म स्वर्गके स्वयंप्रभ विमानमें मणिचूल नामका देव हुआ था। वहां मेरी आयु एक सागरसे कुछ अधिक थी। तत्पश्चात् वहांसे च्युत होकर भूलोकमें उत्पन्न हुआ हूँ ॥ १०६–१०७ ॥ जम्बू द्वीपके पूर्वविदेह क्षेत्रमें स्थित पुष्कलावती देशसम्बन्धी पुण्डरीकिणी नगरीमें प्रियसेन राजा और उनकी महाराज्ञी सुन्दरी देवीके प्रीतिंकर नामका बड़ा पुत्र हुआ हूँ और यह महातपस्वी प्रीतिदेव मेरा छोटा भाई है ॥ १०८–१०९ ॥ हम दोनों भाइयोंने भी स्वयंप्रभ जिनेन्द्रके समीप दीक्षा लेकर तपोबलसे अवधि-ज्ञान तथा आकाशगामिनी चारण ऋद्धि प्राप्त की है ॥ ११० ॥ हे आर्य, हम दोनोंने अपने अवधिज्ञानरूपी नेत्रसे जाना है कि आप यहां उत्पन्न हुए हैं। चूंकि आप हमारे परम मित्र थे इसलिये आपको समझानेके लिये हम लोग यहां आये हैं ॥ १११ ॥ हे आर्य, तूं निर्मल सम्यग्दर्शनके बिना केवल पात्रदान की विशेषतासे ही यहां उत्पन्न हुआ है यह निश्चय समझ ॥ ११२ ॥ महाबलके भवमें तूने हमसे ही तत्त्वज्ञान प्राप्त कर शरीर छोड़ा था परन्तु उस समय भोगोंकी आकांक्षाके वशसे तू सम्यग्दर्शनकी विशुद्धताको प्राप्त नहीं कर सका था ॥ ११३ ॥ अब हम दोनों, सर्वश्रेष्ठ तथा स्वर्ग और मोक्ष सम्बन्धी सुखके प्रधान कारणरूप सम्यग्दर्शनको देनेकी इच्छासे यहां आये हैं ॥ ११४ ॥ इसलिये हे आर्य, आज सम्यग्दर्शन ग्रहण कर। उसके ग्रहण करनेका यह समय है क्योंकि काललब्धिके बिना इस संसारमें जीवोंको सम्यग्दर्शनकी उत्पत्ति नहीं होती है ॥ ११५ ॥ जब देशनालब्धि और काललब्धि आदि बहिरङ्ग कारण तथा करणलब्धिरूप अन्तरङ्ग

---

१ प्रवाहैः । २ बुद्ध्या अ० । ३ विनाशकम् । ४ पुष्कलावत्या अयं पौष्कलावतः तस्मिन् । ५ अविनाशितसङ्गमम् । ६ –सङ्गतः अ०, प० । ७ त्वामावामिह ल०, अ० । ८ विद्धि । ९ भोगभूमिषु । १० नालब्धो– म०, ल० । ११ भवावः । १२ अभ्यन्तःकरण । 'करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि' इत्यभिधानात् । १३ विशुद्धदृक् ब०, अ०, प०, द०, स०, म०, ल० ।

शमाद् दर्शनमोहस्य सम्यक्त्वादानमादितः[1] । जन्तोरनादिमिथ्यात्वकलङ्ककलि[2]लात्मनः ॥११७॥
यथा पित्तोदयोद्भ्रान्तस्वान्तवृत्तेस्तदत्ययात् । यथार्थदर्शनं तद्वत् अन्तर्मोहोपशान्तितः ॥११८॥
अनिद्धृ[3]य तमो नैशं[3] यथा नोदयतेंऽशुमान् । तथानुद्भिद्य मिथ्यात्वतमो नोदेति दर्शनम् ॥११९॥
त्रिधा[4] विपाट्य मिथ्यात्वप्रकृतिं करणैस्त्रिभिः । भव्यात्मा ह्रासयन् कर्मस्थितिं सम्यक्त्वभाग् भवेत् ॥१२०॥
आप्तागमपदार्थानां श्रद्धानं परया मुदा । सम्यग्दर्शनमाम्नातं तन्मूले[5] ज्ञानचेष्टिते[6] ॥१२१॥
[7]आत्मादिमुक्तिपर्यन्ततत्त्वश्रद्धानमञ्जसा । त्रिभिर्मूढैरनालीढम् अष्टाङ्गं विद्धि दर्शनम् ॥१२२॥
तस्य प्रशमसंवेगौ आस्तिक्यं चानुकम्पनम् । गुणाः श्रद्धारुचिस्पर्शप्रत्ययाश्चेति पर्ययाः ॥१२३॥
तस्य निश्शङ्कितत्वादीन्यष्टावङ्गानि निश्चिनु । यैरंशुभिरिवाभाति रत्नं सद्दर्शनाह्वयम् ॥१२४॥
शङ्कां जहीहि सन्मार्गे भोगकाङ्क्षामपाकुरु । [8]विचिकित्साद्वयं हित्वा भजस्वामूढदृष्टिताम् ॥१२५॥
कुरूपबृंहणं धर्मे मलस्थाननिगूहनैः । मार्गाच्चलति धर्मस्थे स्थितीकरणमाचर ॥१२६॥
रत्नत्रितयवत्यार्यसङ्घे वात्सल्यमातनु । विधेहि शासने जैने यथाशक्ति प्रभावनाम् ॥१२७॥
देवतालोकपाषण्डव्यामोहांश्च समुत्सृज । मोहान्धो हि जनस्तत्त्वं पश्यन्नपि न पश्यति ॥१२८॥

कारण सामग्रीकी प्राप्ति होती है तभी यह भव्य प्राणी विशुद्ध सम्यग्दर्शनका धारक हो सकता है ॥ ११६ ॥ जिस जीवका आत्मा अनादि कालसे लगे हुए मिथ्यात्वरूपी कलंकसे दूषित हो रहा है उस जीवको सबसे पहले दर्शन मोहनीय कर्मका उपशम होनेसे औपशमिक सम्यक्त्वकी प्राप्ति होती है ॥ ११७ ॥ जिस प्रकार पित्तके उदयसे उद्भ्रान्त हुई चित्तवृत्तिका अभाव होने पर क्षीर आदि पदार्थोंके यथार्थ स्वरूपका परिज्ञान होने लगता है उसी प्रकार अन्तरङ्ग कारणरूप मोहनीय कर्मका उपशम होने पर जीव आदि पदार्थोंके यथार्थ स्वरूपका परिज्ञान होने लगता है ॥ ११८ ॥ जिस प्रकार सूर्य रात्रिसम्बन्धी अन्धकारको दूर किये बिना उदित नहीं होता उसी प्रकार सम्यग्दर्शन मिथ्यात्वरूपी अन्धकारको दूर किये बिना उदित नहीं होता—प्राप्त नहीं होता ॥ ११६ ॥ यह भव्य जीव, अधःकरण अपूर्वकरण और अनिवृत्तिकरण इन तीन करणों द्वारा मिथ्यात्वप्रकृतिके मिथ्यात्व, सम्यङ्मिथ्यात्व और सम्यक्त्वप्रकृतिरूप तीन खण्ड करके कर्मोंकी स्थिति कम करता हुआ सम्यग्दृष्टि होता है ॥ १२० ॥ वीतराग सर्वज्ञ देव, आप्तोपज्ञ आगम और जीवादि पदार्थोंका बड़ी निष्ठासे श्रद्धान करना सम्यग्दर्शन माना गया है। यह सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्रका मूल कारण है। इसके बिना वे दोनों नहीं हो सकते ॥ १२१ ॥ जीवादि सात तत्त्वोंका तीन मूढ़ता-रहित और आठ अंग-सहित यथार्थ श्रद्धान करना सम्यग्दर्शन है ॥ १२२ ॥ प्रशम, संवेग, आस्तिक्य और अनुकम्पा ये चार सम्यग्दर्शनके गुण हैं और श्रद्धा, रुचि, स्पर्श तथा प्रत्यय ये उसके पर्याय हैं ॥ १२३ ॥ निःशंकित, निःकांक्षित, निर्विचिकित्सा, अमूढ़दृष्टि, उपगूहन, वात्सल्य, स्थितिकरण और प्रभावना ये सम्यग्दर्शनके आठ अंग हैं। इन आठ अंगरूपी किरणोंसे सम्यग्दर्शनरूपी रत्न बहुत ही शोभायमान होता है ॥ १२४ ॥ हे आर्य, तू इस श्रेष्ठ जैन मार्गमें शंकाको छोड़—किसी प्रकारका सन्देह मत कर, भोगोंकी इच्छा दूर कर, ग्लानिको छोड़कर अमूढ़दृष्टि (विवेकपूर्ण दृष्टि) को प्राप्त कर दोषके स्थानोंको छिपाकर समीचीन धर्मकी वृद्धि कर, मार्गसे विचलित होते हुए धर्मात्माका स्थितीकरण कर, रत्नत्रयके धारक आर्य पुरुषोंके संघमें प्रेमभावका विस्तार कर और जैन शासनकी शक्ति अनुसार प्रभावना कर ॥ १२५–१२७ ॥ देवमूढ़ता, लोकमूढ़ता और

१ प्रथमोपशमसम्यक्त्वादानम्। २ दूषित। ३ निशाया इदम्। ४ मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वप्रकृतिभेदेन। ५ तद्दर्शनं मूलं कारणं ययोः। ६ ज्ञानचारित्रे। ७ जीवादिमोक्षपर्यन्तसप्ततत्त्वश्रद्धानम्। ८ स्वपराश्रयभेदेन द्वयम्।

[1]प्रतीहि धर्मसर्वस्वं दर्शनं चारुदर्शन[2] । तस्मिन्नाप्ते[3] दुरापाणि[4] न सुखानीह देहिनाम् ॥१२९॥
लब्धं तेनैव सज्जन्म स कृतार्थः स पण्डितः । परिस्फुरति निर्व्याजं यस्य सद्दर्शनं हृदि ॥१३०॥
सिद्धिप्रसादसोपानं विद्धि दर्शनमग्रिमम् । दुर्गतिद्वारसंरोधि [5]कवाटपुटमूर्जितम् ॥१३१॥
स्थिरं धर्मतरोर्मूलं द्वारं स्वर्मोक्षवेश्मनः । शीलाभरणहारस्य तरलं[6] तरलोपमम्[7] ॥१३२॥
अलङ्करिष्णु रोचिष्णु रत्नसारमनुत्तरम् । सम्यक्त्वं हृदये धत्स्व मुक्तिश्रीहारविभ्रमम्[8] ॥१३३॥
सम्यग्दर्शनसद्रत्नं येनासादि[9] दुरासदम् । सोऽचिरान्मुक्तिपर्यन्तां [10]सुखतातिमवाप्नुयात् ॥१३४॥
लब्धसद्दर्शनो जीवो मुहूर्त्तमपि पश्य यः । संसारलतिकां छित्वा कुरुते ह्रासिनीमसौ ॥१३५॥
सुदेवत्वसुमानुष्ये जन्मनी तस्य नेतरत् । दुर्जन्म जायते जातु हृदि यस्यास्ति दर्शनम् ॥१३६॥
किं वा बहुभिरालापैः श्लाघैषैवास्तु दर्शने । लब्धेन येन संसारो यात्यनन्तोऽपि सान्तताम् ॥१३७॥
तत्त्वं जैनेश्वरीमाज्ञां अस्मद्वाक्यात् प्रमाणयन् । अनन्यशरणो भूत्वा प्रतिपद्यस्व दर्शनम् ॥१३८॥
उत्तमाङ्गमिवाङ्गेषु नेत्रद्वयमिवानने । मुक्त्यङ्गेषु प्रधानाङ्गम् आप्ताः सद्दर्शनं विदुः ॥१३९॥

पाषण्ड मूढ़ता इन तीन मूढ़ताओंको छोड़ क्योंकि मूढ़ताओंसे अन्धा हुआ प्राणी तत्त्वोंको देखता हुआ भी नहीं देखता है ॥ १२८ ॥ हे आर्य, पदार्थके ठीक ठीक स्वरूपका दर्शन करनेवाले सम्यग्दर्शनको ही तू धर्मका सर्वस्व समझ, उस सम्यग्दर्शनके प्राप्त हो चुकने पर संसारमें ऐसा कोई सुख नहीं रहता जो जीवोंको प्राप्त नहीं होता हो ॥ १२९ ॥ इस संसारमें उसी पुरुषने श्रेष्ठ जन्म पाया है, वही कृतार्थ है और वही पण्डित है जिसके हृदयमें छलरहित–वास्तविक सम्यग्दर्शन प्रकाशमान रहता है ॥ १३० ॥ हे आर्य, तू यह निश्चित जान कि यह सम्यग्दर्शन मोक्षरूपी महलकी पहली सीढ़ी है। नरकादि दुर्गतियोंके द्वारको रोकनेवाले मजबूत किवाड़ हैं, धर्मरूपी वृक्षकी स्थिर जड़ है, स्वर्ग और मोक्षरूपी घरका द्वार है, और शीलरूपी रत्नहारके मध्यमें लगा हुआ श्रेष्ठ रत्न है ॥ १३१–१३२ ॥ यह सम्यग्दर्शन जीवोंको अलंकृत करनेवाला है, स्वयं देदीप्यमान है, रत्नोंमें श्रेष्ठ है, सबसे उत्कृष्ट है और मुक्तिरूपी लक्ष्मीके हारके समान है। ऐसे इस सम्यग्दर्शनरूपी रत्नहारको हे भव्य, तूं अपने हृदयमें धारण कर ॥ १३३ ॥ जिस पुरुषने अत्यन्त दुर्लभ इस सम्यग्दर्शनरूपी श्रेष्ठ रत्नको पा लिया है वह शीघ्र ही मोक्ष तकके सुखको पा लेता है ॥ १३४ ॥ देखो, जो पुरुष एक मुहूर्तके लिये भी सम्यग्दर्शन प्राप्त कर लेता है वह इस संसाररूपी बेलको काटकर बहुत ही छोटी कर देता है अर्थात् वह अर्द्ध पुद्गल परावर्तनसे अधिक समय तक संसारमें नहीं रहता ॥ १३५ ॥ जिसके हृदयमें सम्यग्दर्शन विद्यमान है वह उत्तम देव और उत्तम मनुष्य पर्यायमें ही उत्पन्न होता है। उसके नारकी और तिर्यञ्चोंके खोटे जन्म कभी भी नहीं होते ॥ १३६ ॥ इस सम्यग्दर्शनके विषयमें अधिक कहनेसे क्या लाभ है ? इसकी तो यही प्रशंसा पर्याप्त है कि सम्यग्दर्शनके प्राप्त होने पर अनंत संसार भी सान्त (अन्तसहित) हो जाता है ॥ १३७ ॥ हे आर्य, तू मेरे कहनेसे अर्हन्त देवकी आज्ञाको प्रमाण मानता हुआ अनन्यशरण होकर अन्य रागी द्वेषी देवताओंकी शरणमें न जाकर सम्यग्दर्शन स्वीकार कर ॥ १३८ ॥ जिस प्रकार शरीरके हस्त पाद आदि अंगोंमें मस्तक प्रधान है और मुखमें नेत्र प्रधान है उसी प्रकार मोक्षके समस्त अंगोंमें गण-

१ जानीहि। २ चारुदर्शनम् ब०, अ०, प०, म०, स, ल०। ३ प्राप्ते सति। ४ दुर्लभानि। ५ कवाटपट— म०, ल०। ६ कान्तिमत्। ७ तरलोपलम् ब०, ट०। मध्यमणिः "उपलौ रत्नपाषाणौ उपला शर्करापि च' इति। 'तरलो हारमध्यगः' इत्यमरः। 'हारमध्यस्थितं रत्नं तरलं नायकं विदुः" इति हलायुधः। ८ शोभाम्। ९ प्राप्तम्। १० सुखपरम्पराम्।

अपास्य लोक[1]पाषण्डदेवतासु विमूढताम् । [2]परतीर्थैरनालीढम् उज्ज्वलीकुरु दर्शनम् ॥१४०॥
संसारलतिकायामं छिन्धि सद्दर्शनासिना । नासि नासन्नभव्यस्त्वं भविष्यत्तीर्थनायकः ॥१४१॥
सम्यक्त्वमधि[3]कृत्यैवम् आप्तसूक्त्यनुसारतः । कृतार्य देशनास्माभिः ग्राह्यैषा श्रेयसे त्वया ॥१४२॥
त्वमप्यम्बावलम्बेथाः सम्यक्त्वमविलम्बितम्[4] । भवाम्बुधेस्तरण्डं तत्[5] [6]स्त्रैणात् किं बत खिद्यसि ॥१४३॥
सद्दृष्टेः स्त्रीष्वनुत्पत्तिः पृथिवीष्वपि षट्स्वधः । त्रिषु देवनिकायेषु नीचेष्वन्येषु[7] [8]वाम्बिके ॥१४४॥
धिगिदं स्त्रै[9]णमश्लाघ्यं नैर्ग्रन्थ्यप्रतिबन्धि यत् । कारीषाग्निनिभं तापं निराहुस्तत्र तद्विदः ॥१४५॥
तदेतत् स्त्रैणमुत्सृज्य सम्यगाराध्य दर्शनम् । प्राप्तासि[10] परमस्थान[11]सप्तकं त्वमनुक्रमात् ॥१४६॥
युवां कतिपयैरेव भवैः श्रेयोऽनुबन्धिभिः । ध्यानाग्निदग्धकर्माणौ प्राप्तास्थः[11] परमं पदम् ॥१४७॥
इति प्रीतिङ्कराचार्यवचनं स प्रमाणयन् । [12]सजानिरादधे सम्यग्दर्शनं प्रीतमानसः ॥१४८॥
स सद्दर्शनमासाद्य सप्रियः पिप्रियेतराम् । पुण्यात्यलब्धलाभो हि देहिनां महती धृतिम् ॥१४९॥
प्राप्य [13]सूत्रानुगां हृद्यां सम्यग्दर्शनकण्ठिकाम् । यौवराज्यपदे सोऽस्थात् मुक्तिसाम्राज्यसम्पदः ॥१५०॥

धरादि देव सम्यग्दर्शनको ही प्रधान अंग मानते हैं ॥ १३९ ॥ हे आर्य, तू लोकमूढ़ता, पाषण्डि-मूढ़ता और देवमूढ़ताका परित्याग कर जिसे मिथ्यादृष्टि प्राप्त नहीं कर सकते ऐसे सम्यग्दर्शन-को उज्ज्वल कर–विशुद्ध सम्यग्दर्शन धारण कर ॥ १४० ॥ तू सम्यग्दर्शनरूपी तलवारके द्वारा संसाररूपी लताकी दीर्घताको काट । तू अवश्य ही निकट भव्य है और भविष्यत् कालमें तीर्थंकर होनेवाला है ॥ १४१ ॥ हे आर्य, इस प्रकार मैंने अरहन्त देवके कहे अनुसार, सम्यग्द-र्शन विषयको लेकर, यह उपदेश किया है सो मोक्षरूपी कल्याणकी प्राप्तिके लिये तुझे यह अवश्य ही ग्रहण करना चाहिये ॥ १४२ ॥ इस प्रकार वे मुनिराज आर्य वज्रजंघको समझाकर आर्या श्रीमतीसे कहने लगे कि माता, तू भी बहुत शीघ्र ही संसाररूपी समुद्रसे पार करनेके लिये नौकाके समान इस सम्यग्दर्शनको ग्रहण कर । वृथा ही स्त्री पर्यायमें क्यों खेद-खिन्न हो रही है ? ॥ १४३ ॥ हे माता, सब स्त्रियोंमें, रत्नप्रभाको छोड़कर नीचेकी छः पृथिवियोंमें भवनवासी व्यन्तर और ज्योतिषी देवोंमें तथा अन्य नीच पर्यायोंमें सम्यग्दृष्टि जीवोंकी उत्पत्ति नहीं होती ॥ १४४ ॥ इस निन्द्य स्त्री पर्यायको धिक्कार है जो कि निर्ग्रन्थ-दिगम्बर मुनिधर्म पालन करनेके लिये बाधक है और जिसमें विद्वानोंने करीष (कण्डाकी आग) की अग्निके समान कामका संताप कहा है ॥ १४५ ॥ हे माता, अब तू निर्दोष सम्यग्दर्शनकी आराधना कर और इस स्त्रीपर्यायको छोड़कर क्रमसे सप्त परम स्थानोंको प्राप्त कर । भावार्थ—१ 'सज्जाति' २ 'सद्गृहस्थता' (श्रावकके व्रत), ३ 'पारिव्रज्य' (मुनियोंके व्रत), ४ 'सुरेन्द्र पद' ५ 'राज्यपद' ६ 'अरहन्त पद' ७ 'सिद्धपद' ये सात परम स्थान (उत्कृष्ट पद) कहलाते हैं । सम्यग्दृष्टि जीव क्रम क्रमसे इन परम स्थानोंको प्राप्त होता है ॥ १४६ ॥ आप लोग कुछ पुण्य भवोंको धारण कर ध्यानरूपी अग्निसे समस्त कर्मोंको भस्म कर परम पदको प्राप्त करोगे ॥ १४७ ॥

इस प्रकार प्रीतिंकर आचार्यके वचनोंको प्रमाण मानते हुए आर्य वज्रजंघने अपनी स्त्रीके साथ साथ प्रसन्नचित्त होकर सम्यग्दर्शन धारण किया ॥ १४८ ॥ वह वज्रजंघका जीव अपनी प्रियाके साथ साथ सम्यग्दर्शन पाकर बहुत ही संतुष्ट हुआ । सो ठीक ही है, अपूर्व वस्तुका लाभ प्राणियोंके महान् संतोषको पुष्ट करता ही है ॥ १४९ ॥ जिस प्रकार कोई राजकुमार सूत्र (तन्तु)

---

१ पाखण्ड– प०, द० । पाषण्डि– म०, ल० । २ परशास्त्रैः परवादिभिर्वा । ३ अधिकारं कृत्वा । ४ शीघ्रम् । ५ कारणात् । ६ स्त्रीत्वात् । ७ विकलेन्द्रियजातिषु । ८ चाम्बिके द० । ९ लुटि मध्यमपुरुषैकवचनम् । १० "सज्जातिः सद्गृहस्थत्वं पारिव्राज्यं सुरेन्द्रता । साम्राज्यं परमार्हन्त्यं निर्वाणं चेति सप्तधा ॥" ११ आप्लृ व्याप्तौ लुटि । १२ सवनितः । १३ आगम ।

सापि सम्यक्त्वलाभेन नितरामतुषत् सती । विशुद्धपुंस्त्वयोगेन निर्वाणमभिलाषुका ॥१५१॥
अलब्धपूर्वमास्वाद्य सद्दर्शनरसायनम् । प्रापतुस्तौ परां पुष्टिं धर्मे कर्मनिबर्हणे ॥१५२॥
शार्दूलार्यादयोऽप्याभ्यां समं सद्दर्शनामृतम् । तथा भेजुर्गुरोरस्य पादमूलमुपाश्रिताः ॥१५३॥
तौ दम्पती [1]कृतानन्दसंदर्शितमनोरथौ । मुनीन्द्रौ धर्मसंवेगात् चिरस्यास्पृक्षतां मुहुः ॥१५४॥
जन्मान्तरनिबद्धेन प्रेम्णा [2]विस्फारितेक्षणः । क्षणं मुनिपदाम्भोजसंस्पर्शात् सोऽन्वभूद् धृतिम् ॥१५५॥
कृतप्रणाममाशीर्भिः आशास्य तमनुस्थितम् । ततो यथोचितं देशं तावृषी गन्तुमुद्यतौ ॥१५६॥
पुनर्दर्शनमस्त्वार्य सद्धर्मं मा स्म विस्मरः । इत्युक्त्वान्तर्हितौ[3] सद्यः चारणौ व्योमचारणौ ॥१५७॥
गतेऽथ चारणद्वन्द्वे सोऽभूदुत्कण्ठितः क्षणम् । प्रेयसां विप्रयोगो हि मनस्तापाय कल्प्यते ॥१५८॥
मुहुर्मुनिगुणाध्यानैः[4] आर्द्रयन्नात्मनो मनः । इति चिन्तामसौ भेजे चिरं धर्मानुबन्धिनीम् ॥१५९॥
धुनोति दवथुं[5] स्वान्तात् तनोत्यानन्दथुं[6] परम् । धिनोति[7] च मनोवृत्तिम् अहो साधुसमागमः ॥१६०॥
मुष्णाति दुरितं दूरात् परं पुष्णाति योग्यताम् । भूयः श्रेयोऽनुबध्नाति प्रायः साधुसमागमः ॥१६१॥

में पिरोई हुई मनोहर मालाको प्राप्त कर अपनी राज्यलक्ष्मीके युवराज पदपर स्थित होता है उसी प्रकार वह वज्रजंघका जीव भी सूत्र (जैन सिद्धान्त) में पिरोई हुई मनोहर सम्यग्दर्शन-रूपी कंठमालाको प्राप्त कर मुक्तिरूपी राज्यसम्पदाके युवराज-पदपर स्थित हुआ था ॥ १५० ॥ विशुद्ध पुरुषपर्यायके संयोगसे निर्वाण प्राप्त करनेकी इच्छा करती हुई वह सती आर्या भी सम्यक्त्वकी प्राप्तिसे अत्यन्त संतुष्ट हुई थी ॥ १५१ ॥ जो पहले कभी प्राप्त नहीं हुआ है ऐसे सम्यग्दर्शनरूपी रसायनका आस्वाद कर वे दोनों ही दम्पती कर्म नष्ट करनेवाले जैन धर्ममें बड़ी दृढ़ताको प्राप्त हुए ॥ १५२ ॥ पहले कहे हुए सिंह, वानर, नकुल और सूकरके जीव भी गुरुदेव–प्रीतिंकर मुनिके चरण-मूलका आश्रय लेकर आर्य वज्रजंघ और आर्या श्रीमतीके साथ साथ ही सम्यग्दर्शनरूपी अमृतको प्राप्त हुए थे ॥ १५३ ॥ जिन्होंने हर्षसूचक चिह्नोंसे अपने मनोरथकी सिद्धिको प्रकट किया है ऐसे दोनों दम्पतियोंको दोनों ही मुनिराज धर्म-प्रेमसे बारबार स्पर्श कर रहे थे ॥ १५४ ॥ वह वज्रजंघका जीव जन्मान्तर-सम्बन्धी प्रेमसे आँखें फाड़ फाड़कर श्री प्रीतिंकर मुनिके चरण-कमलोंकी ओर देख रहा था और उनके क्षण भरके स्पर्शसे बहुत ही सन्तुष्ट हो रहा था ॥ १५५ ॥ तत्पश्चात् वे दोनों चारण मुनि अपने योग्य देशमें जानेके लिये तैयार हुए। उस समय वज्रजंघके जीवने उन्हें प्रणाम किया और कुछ दूरतक भेजनेके लिये वह उनके पीछे खड़ा हो गया। चलते समय दोनों मुनियोंने उसे आशीर्वाद देकर हितका उपदेश दिया और कहा कि हे आर्य, फिर भी तेरा दर्शन हो, तू इस सम्यग्दर्शनरूपी समीचीन धर्मको नहीं भूलना। यह कहकर वे दोनों गगनगामी मुनि शीघ्र ही अन्तर्हित हो गये ॥ १५६–१५७ ॥

अनन्तर जब दोनों चारण मुनिराज चले गये तब वह वज्रजंघका जीव क्षण एक तक बहुत ही उत्कण्ठित होता रहा। सो ठीक ही है, प्रिय मनुष्योंका विरह मनके सन्तापके लिये ही होता है ॥ १५८ ॥ वह बार बार मुनियोंके गुणोंका चिन्तवन कर अपने मनको आर्द्र करता हुआ चिर काल तक धर्म बढ़ानेवाले नीचे लिखे हुए विचार करने लगा ॥ १५९ ॥ अहा ! कैसा आश्चर्य है कि साधु पुरुषोंका समागम हृदयसे सन्तापको दूर करता है, परम आनन्दको बढ़ाता है और मनकी वृत्तिको सन्तुष्ट कर देता है ॥ १६० ॥ प्रायः साधु पुरुषोंका समागम दूरसे ही पापको नष्ट कर देता है, उत्कृष्ट योग्यताको पुष्ट करता है, और अत्यधिक कल्याणको

---

१ धृतानन्द– प०, अ०, द०, स० । २ विस्तारितेक्षणः अ० । ३ अन्तर्धिमगाताम् । ४ स्मरणैः । ५ सन्तापम् । ६ आनन्दम् । ७ प्रीणयति ।

साधवो मुक्तिमार्गस्य साधनेऽर्पितधीधनाः । [१]लोकानुवृत्तिसाध्यांशो नैषां कश्चन पुष्कलः[२] ॥१६२॥
परानुग्रहबुद्ध्या तु केवलं मार्गदेशनाम्[३] । कुर्वतेऽमी प्रगत्यापि[४] निसर्गोऽयं महात्मनाम् ॥१६३॥
स्वदुःखे निर्घृणारम्भाः परदुःखेषु दुःखिताः । निर्व्यपेक्षं परार्थेषु बद्धकक्ष्या[५] मुमुक्षवः ॥१६४॥
क्व वयं निस्पृहाः क्वेमे क्वेयं भूमिः सुखोचिता । तथाप्यनुग्रहेऽस्माकं सावधानास्तपोधनाः ॥१६५॥
भवन्तु सुखिनः सर्वे सत्त्वा इत्येव केवलम् । यतो यतन्ते तेनैषां यतित्वं सन्निरुच्यते ॥१६६॥
एवं नाम महीयांसः परार्थे कुर्वते रतिम् । दूरादपि समागत्य यथैतौ चारणावुभौ[६] ॥१६७॥
अद्यापि चारणौ साक्षात् पश्यामीव पुरःस्थितौ । तपस्तनूनपात्ताप[७]तनूकृततनू मुनी ॥१६८॥
चारणौ चरणद्वन्द्वे प्रणतं मृदुपाणिना । स्पृशन्तौ स्नेहनिघ्नं मां व्यधातामधिमस्तकम् ॥१६९॥
[८]अपिप्यतां च मां धर्मतृषितं दर्शनामृतम् । अपास्य भोग[९]संतापं निर्वृतं येन मे मनः ॥१७०॥
सत्यं प्रीतिङ्करो ज्यायान् मुनिर्योऽस्मास्वदर्शयत् । प्रीतिं सर्वत्र[१०]गप्रीतिः सन्मार्गप्रतिबोधनात् ॥१७१॥

बढ़ाता है ॥१६१॥ ये साधु पुरुष मोक्षमार्गको सिद्ध करनेमें सदा दत्तचित्त रहते हैं इन्हें संसारिक लोगोंको प्रसन्न करनेका कुछ भी प्रयोजन नहीं रहता ॥१६२॥ ये मुनिजन केवल परोपकार करनेकी बुद्धिसे ही उनके पास जा जाकर मोक्षमार्गका उपदेश दिया करते हैं। वास्तवमें यह महापुरुषोंका स्वभाव ही है ॥ १६३ ॥ मोक्षकी इच्छा करनेवाले ये साधुजन अपने दुख दूर करनेके लिए सदा निर्दय रहते हैं अर्थात् अपने दुःख दूर करनेके लिये किसी प्रकारका कोई आरम्भ नहीं करते। परके दुःखोंमें सदा दुखी रहते हैं अर्थात् उनके दुःख दूर करनेके लिये सदा तत्पर रहते हैं। और दूसरोंके कार्य सिद्ध करनेके लिये निःस्वार्थ भावसे सदा तैयार रहते हैं ॥ १६४ ॥ कहाँ हम और कहाँ ये अत्यन्त निःस्पृह साधु? और कहाँ यह मात्र सुखोंका स्थान भोगभूमि अर्थात् निःस्पृह मुनियोंका भोगभूमिमें जाकर वहांके मनुष्योंको उपदेश देना सहज कार्य नहीं है तथापि ये तपस्वी हम लोगोंके उपकारमें कैसे सावधान हैं ॥ १६५ ॥ ये साधुजन सदा यही प्रयत्न किया करते हैं कि संसारके समस्त जीव सदा सुखी रहें और इसीलिये वे यति (यतते इति यतिः) कहलाते हैं ॥ १६६ ॥ जिस प्रकार इन चारण ऋद्धिधारी पुरुषोंने दूरसे आकर हम लोगोंका उपकार किया उसी प्रकार महापुरुष दूसरोंका उपकार करनेमें सदा प्रीति रखते हैं ॥ १६७ ॥ तपरूपी अग्निके संतापसे जिनका शरीर अत्यन्त कृश हो गया है ऐसे उन चारण मुनियोंको मैं अब भी साक्षात् देख रहा हूं, मानो वे अब भी मेरे सामने ही खड़े हैं ॥ १६८ ॥ मैं उनके चरणकमलोंमें प्रणाम कर रहा हूं और वे दोनों चारण मुनि कोमल हाथसे मस्तक पर स्पर्श करते हुए मुझे स्नेहके वशीभूत कर रहे हैं ॥ १६९ ॥ मुझ, धर्मके प्यासे मानवको उन्होंने सम्यग्दर्शनरूपी अमृत पिलाया है, इसीलिये मेरा मन भोगजन्य संतापको छोड़कर अत्यन्त प्रसन्न हो रहा है ॥ १७० ॥ वे प्रीतिंकर नामके ज्येष्ठ मुनि सचमुचमें प्रीतिंकर हैं क्योंकि उनकी प्रीति सर्वत्र गामी है और मार्गका उपदेश देकर उन्होंने हम लोगों पर अपार प्रेम दर्शाया है। भावार्थ-जो मनुष्य सब जगह जानेकी सामर्थ्य होने पर भी किसी खास जगह किसी खास व्यक्तिके पास जाकर उसे उपदेश आदि देवे तो उससे उसकी अपार प्रीतिका पता चलता है। यहां पर भी उन मुनियों में चारण ऋद्धि होनेसे सब जगह जानेकी सामर्थ्य थी परन्तु उस समय अन्य जगह न जाकर वे वज्रजंघके जीवके पास पहुँचे इससे उसके विषयमें उनकी अपार प्रीतिका पता

१ जनानुवर्तनम्। २ श्रेष्ठः। ३ – दर्शनम् अ०, स०। –देशनम् म०, ल०। ४ पुनरुत्पद्य। ५ वाञ्छा। ६ चारणर्षभौ अ०, स०। ७ तापोऽग्निः। ८ पानमकारयताम्। ९ भोगसन्तर्षम् प०, अ०, द०, स०, म०। १० सर्वत्रगः प्रीतः म०, ल०।

महाबलभवेऽप्यासीत् स्वयम्बुद्धो गुरुः स नः। वितीर्य दर्शनं सम्यग् अधुना तु विशेषतः ॥१७२॥
[1]गुरूणां यदि संसर्गो न स्यान्न स्याद् गुणार्जनम्। विना गुणार्जनात् [2]क्वास्य जन्तोः सफलजन्मता ॥१७३॥
रसोपविद्धः सन् धातुः यथा याति सुवर्णताम्। तथा गुरुगुणाश्लिष्टो भव्यात्मा शुद्धिमृच्छति ॥१७४॥
न विना यानपात्रेण तरितुं शक्यतेऽर्णवः। नर्ते गुरूपदेशाच्च सुतरोऽयं भवार्णवः ॥१७५॥
यथान्धतमसच्छन्नान् नार्थान् दीपाद् विनेक्षते। तथा जीवादिभावांश्च नोपदेष्टुर्विनेक्षते ॥१७६॥
बन्धवो गुरवश्चेति द्वये सम्प्रीतये नृणाम्। बन्धवोऽत्रैव सम्प्रीत्यै गुरवोऽमुत्र चात्र च ॥१७७॥
यतो गुरुनिदेशेन जाता नः शुद्धिरीदृशी। ततो गुरुपदे भक्तिः भूयाज्जन्मान्तरेऽपि नः ॥१७८॥
इति चिन्तयतोऽस्यासीद् दृढा सम्यक्त्वभावना। सा तु कल्पलतेवास्मै सर्वमिष्टं फलिष्यति ॥१७९॥
समानभावनानेन साप्यभूच्छ्रीमतीचरी। समानशीलयोश्चासीद् आच्छिन्ना प्रीतिरेनयोः ॥१८०॥
दम्पत्योरिति सम्प्रीत्या भोगान्निर्विशतोश्चिरम्। भोगकालस्तयोर्निष्ठां[3] प्रापत् पल्यत्रयोन्मितः[4] ॥१८१॥
जीवितान्ते सुखं प्राणान् हित्वा तौ पुण्यशेषतः। प्रापतुः कल्पमैशानं गृहादिव गृहान्तरम् ॥१८२॥
विलीयन्ते यथा मेघा यथाकालं कृतोदयाः। भोगभूमिभुवां देहाः तथान्ते[5] विशरारवः[6] ॥१८३॥
यथा वैक्रियिके देहे न दोषमलसंभवः। तथा दिव्यमनुष्याणां[7] देहे शुद्धिरुदाहृता ॥१८४॥

चलता है ॥१७१॥ महाबल भवमें भी वे मेरे स्वयंबुद्ध नामक गुरु हुए थे और आज इस भवमें भी सम्यग्दर्शन देकर विशेष गुरु हुए हैं ॥ १७२ ॥ यदि संसारमें गुरुओंकी संगति न हो तो गुणोंकी प्राप्ति भी नहीं हो सकती और गुणोंकी प्राप्तिके बिना जीवोंके जन्मकी सफलता भी नहीं हो सकती ॥ १७३ ॥ जिस प्रकार सिद्ध रसके संयोगसे तांबा आदि धातुएँ सुवर्णपनेको प्राप्त हो जाती हैं उसी प्रकार गुरुदेवके उपदेशसे प्रकट हुए गुणोंके संयोगसे भव्य जीव भी शुद्धिको प्राप्त हो जाते हैं ॥ १७४ ॥ जिस प्रकार जहाजके बिना समुद्र नहीं तिरा जा सकता है उसी प्रकार गुरुके उपदेशके बिना यह संसाररूपी समुद्र नहीं तिरा जा सकता ॥ १७५ ॥ जिस प्रकार कोई पुरुष दीपकके बिना गाढ़ अन्धकारमें छिपे हुए घट पट आदि पदार्थोंको नहीं देख सकता उसी प्रकार यह जीव भी उपदेश देनेवाले गुरुके बिना जीव अजीव आदि पदार्थोंको नहीं जान सकता ॥ १७६ ॥ इस संसारमें भाई और गुरु ये दोनों ही पदार्थ मनुष्योंकी प्रीतिके लिये हैं। पर भाई तो इस लोकमें ही प्रीति उत्पन्न करते हैं और गुरु इस लोक तथा परलोक, दोनों ही लोकोंमें विशेष रूपसे प्रीति उत्पन्न करते हैं ॥ १७७ ॥ जब कि गुरुके उपदेशसे ही हम लोगोंको इस प्रकारकी विशुद्धि प्राप्त हुई है तब हम चाहते हैं कि जन्मान्तरमें भी मेरी भक्ति गुरुदेवके चरण-कमलोंमें बनी रहे ॥ १७८ ॥ इस प्रकार चिन्तवन करते हुए वज्रजंघकी सम्यक्त्व भावना अत्यन्त दृढ़ हो गई। यही भावना आगे चलकर इस वज्रजंघके लिये कल्पलताके समान समस्त इष्ट फल देनेवाली होगी ॥ १७९ ॥ श्रीमतीके जीवने भी वज्रजंघके जीवके समान ऊपर लिखे अनुसार चिन्तन किया था इसलिये इसकी सम्यक्त्व भावना भी सुदृढ़ हो गई थी। इन दोनों पति-पत्नियोंका स्वभाव एकसा था इसलिये दोनोंमें एकसी अखण्ड प्रीति रहती थी ॥ १८० ॥ इस प्रकार प्रीतिपूर्वक भोग भोगते हुए उन दोनों दम्पतियोंका तीन पल्य प्रमाण भारी काल व्यतीत हो गया ॥ १८१ ॥ और दोनों जीवनके अन्तमें सुखपूर्वक प्राण छोड़कर बाकी बचे हुए पुण्यसे एक घरसे दूसरे घरके समान ऐशान स्वर्गमें जा पहुंचे ॥ १८२ ॥ जिस प्रकार वर्षाकालमें मेघ अपने आप ही उत्पन्न हो जाते हैं और समय पाकर आप ही विलीन हो जाते हैं उसी प्रकार भोगभूमिज जीवोंके शरीर अपने आप ही उत्पन्न होते हैं और जीवनके अन्तमें अपने आप ही विलीन हो जाते हैं ॥ १८३ ॥ जिस प्रकार वैक्रियिक

१ गुरुणा यदि– अ०, प०, स०। २ –पश्य म०, ल०। ३ अन्तम्। ४ प्रमितः। ५ तदन्ते म०, ल०। ६ विशरणशीलः। ७ भोगभूमिजानाम्।

विमाने श्रीप्रभे तत्र[1] नित्यालोके स्फुरत्प्रभः । स श्रीमान् वज्रजङ्घार्यः श्रीधराख्यः सुरोऽभवत् ।।१८५।।
सापि सम्यक्त्वमाहात्म्यात् स्त्रैणाद् विश्लेषमीयुषी । स्वयम्प्रभविमानेऽभूत् तत्समनामा[2] सुरोत्तमः ।।१८६।।
शार्दूलार्यादयोऽप्यस्मिन् कल्पेऽनल्पसुखोदये । महर्द्धिकाः सुरा जाताः पुण्यैः किन्नु दुरासदम् ।।१८७।।
ऋते धर्मात् कुतः स्वर्गः कुतः स्वर्गादृते सुखम् । तस्मात् सुखार्थिनां सेव्यो धर्मकल्पतरुश्चिरम् ।।१८८।।
शार्दूलभूतपूर्वो यः स विमाने मनोहरे । चित्राङ्गदे ज्वलन्मौलिः अभूच्चित्राङ्गदोऽमरः ।।१८९।।
वराहार्यश्च नन्दाख्ये विमाने मणिकुण्डली । ज्वलन्मकुट[3]केयूरमणिकुण्डलभूषितः ।।१९०।।
नन्द्यावर्त्तविमानेऽभूद् वानरार्यो मनोहरः[4] । सुराङ्गनामनोहारिचतुराकारसुन्दरः ।।१९१।।
प्रभाकरविमानेऽभूत् नकुलार्यो मनोरथः । मनोरथशतावाप्तदिव्यभोगोऽमृताशनः[5] ।।१९२।।
इति पुण्योदयात्तेषां स्वर्लोकसुखभोगिनाम्[7] । रूपसौन्दर्यभोगादिवर्णना ललिताङ्गवत् ।।१९३।।

शार्दूलविक्रीडितम्

इत्युच्चैः प्रमदोदयात् सुरवरः श्रीमानसौ श्रीधरः
स्वर्गश्रीनयनोत्सवं शुचितरं बिभ्रद्वपुर्भास्वरम्[8] ।
कान्ताभिः कलभाषिणीभिरुचितान् भोगान् मनोरञ्जनान्
भुञ्जानः सततोत्सवैररमत स्वस्मिन् विमानोत्सवे ।।१९४।।

शरीरमें दोष और मल नहीं होते उसी प्रकार भोगभूमिज जीवोंके शरीरमें भी दोष और मल नहीं होते। उनका शरीर भी देवोंके शरीरके समान ही शुद्ध रहता है ॥ १८४ ॥ वह वज्रजंघ आर्य ऐशान स्वर्गमें हमेशा प्रकाशमान रहनेवाले श्रीप्रभ विमानमें देदीप्यमान कान्तिका धारक श्रीधर नामका ऋद्धिधारी देव हुआ ॥ १८५ ॥ और आर्या श्रीमती भी सम्यग्दर्शनके प्रभावसे स्त्रीलिङ्गसे छुटकारा पाकर उसी ऐशान स्वर्गके स्वयंप्रभ विमानमें स्वयंप्रभ नामका उत्तम देव हुई ॥ १८६ ॥ सिंह, नकुल, वानर और शूकरके जीव भी अत्यन्त सुखमय इसी ऐशान स्वर्गमें बड़ी बड़ी ऋद्धियोंके धारक देव हुए। सो ठीक ही है पुण्यसे क्या दुर्लभ है? ॥ १८७ ॥ इस संसारमें धर्मके बिना स्वर्ग कहाँ? और स्वर्गके बिना सुख कहाँ? इसलिये सुख चाहनेवाले पुरुषोंको चिरकाल तक धर्मरूपी कल्पवृक्षकी ही सेवा करनी चाहिये ॥ १८८ ॥ जो जीव पहले सिंह था वह चित्रांगद नामके मनोहर विमानमें प्रकाशमान मुकुटका धारक चित्रांगद नामका देव हुआ ॥ १८९ ॥ शूकरका जीव नन्द नामक विमानमें प्रकाशमान मुकुट, बाजूबंद और मणिमय कुंडलोंसे भूषित मणिकुण्डली नामका देव हुआ ॥ १९० ॥ वानरका जीव नन्द्यावर्त नामक विमानमें मनोहर नामका देव हुआ जो कि देवांगनाओंके मनको हरण करनेवाले सुन्दर आकारसे शोभायमान था ॥ १९१ ॥ और नकुलका जीव प्रभाकर विमानमें मनोरथ नामका देव हुआ जो कि सैकड़ों मनोरथोंसे प्राप्त हुए दिव्य भोगरूपी अमृतका सेवन करनेवाला था ॥ १९२ ॥ इस प्रकार पुण्यके उदयसे स्वर्गलोकके सुख भोगनेवाले उन छहों जीवोंके रूप सौन्दर्य भोग आदिका वर्णन ललिताङ्गदेवके समान जानना चाहिये ॥ १९३ ॥ इस प्रकार पुण्यके उदयसे स्वर्गलक्ष्मीके नेत्रोंको उत्सव देनेवाले, अत्यन्त पवित्र और चमकीले शरीरको धारण करनेवाला वह ऋद्धिधारी श्रीधर देव मधुर वचन बोलनेवाली देवाङ्गनाओंके साथ मनोहर भोग भोगता हुआ अपने ही विमानमें अनेक उत्सवोंद्वारा क्रीड़ा करता रहता था ॥१९४॥

---

१ ऐशानकल्पे । २ तेन विमानेन समानं नाम यस्यासौ श्रीस्वयम्प्रभ इत्यर्थः । ३ –मुकुट– अ०, प०, द० । ४ मनोहरनामा । ५ –भोगामृताशनः । ६ देवः । ७ –सुखभागिनाम् अ०, प०, स०, द०, म० । ८ –र्भासुरम् अ०, स० ।

कान्तानां करपल्लवैर्मृदुतलैः संवाह्यमानक्रमः
तद्वक्त्रेन्दुशुचिस्मितांशुसलिलैः संसिच्यमानो मुहुः ।
[1]सभ्रूविभ्रमतत्कटाक्षविशिखैर्लक्ष्यीकृतोऽनुक्षणं
भोगाङ्गैरपि सोऽतृपत् प्रमुदितो वर्त्स्यज्जिनः श्रीधरः ॥१९५॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणश्रीमहापुराणसंग्रहे
श्रीमतीवज्रजङ्घार्यसम्यग्दर्शनोत्पत्तिवर्णनं नाम
नवमं पर्व ॥९॥

कभी देवाङ्गनायें अपने कोमल करपल्लवोंसे उसके चरण दबाती थीं, कभी अपने मुखरूपी चन्द्रमासे निकलती हुई मन्द मुसकानकी किरणोंरूपी जलसे बार बार उसका अभिषेक करती थीं और कभी भौंहोंके विलाससे युक्त कटाक्षरूपी बाणोंका उसे लक्ष्य बनाती थीं। इस प्रकार आगामी कालमें तीर्थंकर होनेवाला वह प्रसन्नचित्त श्रीधरदेव भोगोपभोगकी सामग्रीसे प्रत्येक क्षण संतुष्ट रहता था ॥ १९५ ॥

इस प्रकार आर्षनामसे प्रसिद्ध भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण
श्रीमहापुराणसंग्रहमें श्रीमती और वज्रजंघ आर्यको सम्यग्दर्शन
की उत्पत्तिका वर्णन करनेवाला नवाँ पर्व समाप्त हुआ ।

---

१ सद्भ्रू– प० । सुभ्रू– अ०, स० ।

दशमं पर्व

अथान्येद्युरवुद्धासौ[1] प्रयुक्तावधिरञ्जसा[2] । स्वगुरुं प्राप्तकैवल्यं श्रीप्रभाद्रिमधिष्ठितम् ॥१॥
जगत्प्रीतिङ्करो[3] योऽस्य[4] गुरुः प्रीतिङ्कराह्वयः । तमर्चितुमभीयाय[5] वर्यया सपर्यया ॥२॥
श्रीप्रभाद्रौ तमभ्यर्च्य सर्वज्ञमभिवन्द्य च । श्रुत्वा धर्मं ततोऽपृच्छत् इत्यसौ स्वमनीषितम् ॥३॥
महाबलभवे येऽस्मन्मन्त्रिणो दुर्दृशस्त्रयः । क्वाद्य ते लब्धजन्मानः कीदृशीं वा गतिं श्रिताः ॥४॥
इति पृष्टवते तस्मै सोऽवोचत् सर्वभाववित् । तन्मनोध्वान्तसन्तानम् अपाकुर्वन् वचोंऽशुभिः ॥५॥
त्वयि [6]स्वर्गंगतेऽस्मासु लब्धबोधिषु ते तदा । प्रपद्य दुर्मृतिं [7]याता बियाता वत दुर्गतिम् ॥६॥
द्वौ निगोतास्पदं[8] यातौ तमोऽन्धं यत्र केवलम् । [9]तप्ताधिश्रयणोद्वृत्तभूयिष्ठैर्जन्ममृत्युभिः ॥७॥
[10]गतं [तः] शतमतिः श्वभ्रं मिथ्यात्वपरिपाकतः । विपाकक्षेत्रमाम्नातं[11] तद्धि दुष्कृतकर्मणाम् ॥८॥
मिथ्यात्वविषसंसुप्ता ये [12]मार्गपरिपन्थिनः । ते यान्ति दीर्घमध्वानं[13] कुयोन्यावर्त्तसङ्कुलम् ॥९॥
तमस्यन्धे निमज्जन्ति [14]सज्ज्ञानद्वेषिणो नराः । आप्तोपज्ञमतो[15] ज्ञानं बुधोऽभ्यस्येदनारतम् ॥१०॥

अथानन्तर किसी एक दिन श्रीधरदेवको अवधि ज्ञानका प्रयोग करने पर यथार्थ रूपसे मालूम हुआ कि हमारे गुरु श्रीप्रभ पर्वतपर विराजमान हैं और उन्हें केवलज्ञान प्राप्त हुआ है ॥ १ ॥ संसारके समस्त प्राणियोंके साथ प्रीति करनेवाले जो प्रीतिंकर मुनिराज थे वे ही इसके गुरु थे। उन्हींकी पूजा करनेके लिये अच्छी-अच्छी सामग्री लेकर श्रीधरदेव उनके सम्मुख गया ॥ २ ॥ जाते ही उसने श्रीप्रभ पर्वतपर विद्यमान सर्वज्ञ प्रीतिंकर महाराजकी पूजा की, उन्हें नमस्कार किया, धर्मका स्वरूप सुना और फिर नीचे लिखे अनुसार अपने मन की बात पूछी ॥ ३ ॥ हे प्रभो, मेरे महाबल भवमें जो मेरे तीन मिथ्यादृष्टि मंत्री थे वे इस समय कहां उत्पन्न हुए हैं वे कौनसी गतिको प्राप्त हुए हैं ? ॥ ४ ॥ इस प्रकार पूछनेवाले श्रीधरदेवसे सर्वज्ञदेव, अपने वचनरूपी किरणोंके द्वारा उसके हृदयगत समस्त अज्ञानान्धकारको नष्ट करते हुए कहने लगे ॥ ५ ॥ कि हे भव्य, जब तूं महाबलका शरीर छोड़कर स्वर्ग चला गया और मैंने रत्नत्रयको प्राप्त कर दीक्षा धारण कर ली तब खेद है कि वे तीनों ढीठ मन्त्री कुमरणसे मरकर दुर्गतिको प्राप्त हुए थे ॥ ६ ॥ उन तीनोंमेंसे महामति और संभिन्नमति ये दो तो उस निगोद स्थानको प्राप्त हुए हैं जहां मात्र सघन अज्ञानान्धकारका ही अधिकार है। और जहां अत्यन्त तप्त खौलते हुए जलमें उठनेवाली खलबलाहटके समान अनेक बार जन्म मरण होते रहते हैं ॥ ७ ॥ तथा शतमति मंत्री अपने मिथ्यात्वके कारण नरक गति गया है। यथार्थमें खोटे कर्मोंका फल भोगनेके लिये नरक ही मुख्य क्षेत्र है ॥ ८ ॥ जो जीव मिथ्यात्वरूपी विषसे मूर्छित होकर समीचीन जैन मार्गका विरोध करते हैं वे कुयोनिरूपी भँवरोंसे व्याप्त इस संसाररूपी मार्गमें दीर्घकाल तक घूमते रहते हैं ॥ ९ ॥ चूंकि सम्यग्ज्ञानके विरोधी जीव अवश्य ही नरकरूपी गाढ़ अन्धकारमें

१ –न्येद्युः प्राबुद्धासौ अ०। –प्रबुद्धासौ स०। २ झटिति। ३ जगत्प्रीतिकरो स०। ४ श्रीधरस्य। ५ अभिमुखमगच्छत्। ६ स्वर्गे गते अ०, प०, स०। ७ याता वत बुद्ध्यापि दुर्गतिम् अ०, स०। वियाता धृष्टाः। ८ निगोदास्पदं द०, म०, स०। ९ निकृष्टपीडाश्रयलेपप्रचुरैः। तप्तादिश्रय– म०, ल०। १० गतः शत– ब०, अ०, प०, स०, द०, म०, ल०। ११ कथितम्। १२ सन्मार्गविरोधिनः। १३ कालम्। "अध्वा वर्त्मनि संस्थाने सास्रवस्कन्धकालयोः" इत्यभिधानात्। १४ सतां ज्ञानम्। संज्ञान– द०, स०, अ०, प०। १५ अतः कारणात्।

धर्मेणात्मा व्रजत्यूर्ध्वम् अधर्मेण पतत्यधः । मिश्रस्तु याति मानुष्यम् इत्याप्तोक्तिं[1] विनिश्चिनु ॥११॥
स एष शतबुद्धिस्ते मिथ्याज्ञानस्य दार्ढ्यतः । द्वितीयनरके दुःखम् अनुभुङ्क्तेऽतिदारुणम् ॥१२॥
सोऽयं स्वयंकृतोऽनर्थो जन्तोरघजितात्मनः[2] । यदयं विद्विषन् धर्मम् अधर्मे कुरुते रतिम् ॥१३॥
धर्मात् सुखमधर्माच्च दुःखमित्यविगानतः[3] । धर्मैकपरतां धत्ते बुधोऽनर्थजिहासया[4] ॥१४॥
धर्मः प्राणिदया सत्यं क्षान्तिः शौचं वितृष्णता । [5]ज्ञानवैराग्यसम्पत्तिः अधर्मस्तद्विपर्ययः ॥१५॥
तनोति विषयासङ्गः[6] सुखसंत[7]र्षमङ्गिनः । स तीव्रमनुसन्धत्ते तापं दीप्त इवानलः ॥१६॥
संतप्तस्तत्प्रतीकारम् ईप्सन् पापेऽनुरज्यते । द्वेष्टि पापरतो धर्मम् अधर्माच्च पतत्यधः ॥१७॥
विपच्यते यथाकालं नरके दुरनुष्ठितम्[8] । अनेहसि[9] समभ्यर्णे यथाऽलर्कशुनो[10] विषम् ॥१८॥
यथोपच[11]रितैर्जन्तुं तीव्रं ज्वरयति ज्वरः । तथा दुरीहितैः पाप्मा गाढीभवति दुर्दृशः ॥१९॥
दुरन्तः कर्मणां पाको ददाति कटुकं फलम् । येनात्मा पतितः श्वभ्रे क्षणं दुःखान्न मुच्यते ॥२०॥
कीदृशं नरके दुःखं तत्रोत्पत्तिः कुतोऽङ्गिनाम् । इति चेच्छृणु तत्सम्यक् प्रणिधाय मनः क्षणम् ॥२१॥
हिंसायां निरता ये स्युः ये मृषावादतत्पराः । चुराशीलाः परस्त्रीषु ये रता मद्यपाश्च ये ॥२२॥

निमग्न होते हैं इसलिये विद्वान् पुरुषोंको आप्त प्रणीत सम्यग्ज्ञानका ही निरन्तर अभ्यास करना चाहिये॥ १० ॥ यह आत्मा धर्मके प्रभावसे स्वर्ग मोक्ष रूप उच्च स्थानोंको प्राप्त होता है । अधर्मके प्रभावसे अधोगति अर्थात् नरकको प्राप्त होता है । और धर्म अधर्म दोनोंके संयोगसे मनुष्य पर्यायको प्राप्त होता है । हे भद्र, तूं उपर्युक्त अर्हन्तदेवके वचनोंका निश्चय कर ॥ ११ ॥ वह तुम्हारा शतबुद्धि मंत्री मिथ्याज्ञानकी दृढतासे दूसरे नरकमें अत्यन्त भयंकर दुःख भोग रहा है ॥ १२ ॥ पापसे पराजित आत्माको स्वयं किये हुए अनर्थका यह फल है जो उसका धर्मसे द्वेष और अधर्मसे प्रेम होता है ॥ १३ ॥ 'धर्मसे सुख प्राप्त होता है और अधर्मसे दुःख मिलता है' यह बात निर्विवाद प्रसिद्ध है इसीलिये तो बुद्धिमान् पुरुष अनर्थोंको छोड़नेकी इच्छासे धर्ममें ही तत्परता धारण करते हैं ॥ १४ ॥ प्राणियोंपर दया करना, सच बोलना, क्षमा धारण करना, लोभका त्याग करना, तृष्णाका अभाव करना, सम्यग्ज्ञान और वैराग्यरूपी संपत्तिका इकट्ठा करना ही धर्म है और उससे उलटे अदया आदि भाव अधर्म है ॥ १५ ॥ विषयासक्ति जीवोंके इन्द्रियजन्य सुखकी तृष्णाको बढ़ाती है, इन्द्रियजन्य सुखकी तृष्णा प्रज्वलित अग्निके समान भारी संताप पैदा करती है । तृष्णासे संतप्त हुआ प्राणी उसे दूर करनेकी इच्छासे पापमें अनुरक्त हो जाता है, पापमें अनुराग करनेवाला प्राणी धर्मसे द्वेष करने लगता है और धर्मसे द्वेष करनेवाला जीव अधर्मके कारण अधोगतिको प्राप्त होता है ॥१६–१७ ॥

जिस प्रकार समय आनेपर (प्रायः वर्षाकालमें) पागल कुत्तेका विष अपना असर दिखलाने लगता है उसी प्रकार किये हुए पापकर्म भी समय पाकर नरकमें भारी दुःख देने लगते हैं ॥ १८ ॥ जिस प्रकार अपथ्य सेवनसे मूर्ख मनुष्योंका ज्वर बढ़ जाता है उसी प्रकार पापाचरणसे मिथ्यादृष्टि जीवोंका पाप भी बहुत बड़ा हो जाता है ॥ १९ ॥ किये हुए कर्मोंका परिपाक बहुत ही बुरा होता है । वह सदा कड़ुए फल देता रहता है; उसीसे यह जीव नरकमें पड़कर वहाँ क्षण भरके लिये भी दुःखसे नहीं छूटता ॥ २० ॥ नरकोंमें कैसा दुःख है ? और वहाँ जीवोंकी उत्पत्ति किस कारणसे होती है ? यदि तूं यह जानना चाहता है तो क्षणभरके लिये मन स्थिर कर सुन ॥ २१ ॥ जो जीव हिंसा करनेमें आसक्त रहते हैं, झूठ बोलनेमें तत्पर

---

१ –मित्याप्तोक्तविनिश्चितम् अ०, स० । २ –रविजितात्मनः द०, स०, अ०, ल० । ३ अविप्रतिपत्तितः । ४ हातुमिच्छया । ५ ज्ञानं वै– स० । ६ विषयासक्तिः । ७ अभिलाषम् । ८ दुराचारः । ९ काले । १० उत्तमशुनकस्य । ११ अपथ्यभोजनैः ।

ये च मिथ्यादृशः क्रूरा रौद्रध्यानपरायणाः । सत्त्वेषु निरनुक्रोशा[1] बह्वारम्भपरिग्रहाः ॥२३॥
धर्मद्रुहश्च[2] ये नित्यम् अधर्मपरिपोषकाः[3] । दूषकाः साधुवर्गस्य मात्सर्योपहताश्च ये ॥२४॥
रुष्यन्त्यकारणं ये च निर्ग्रन्थेभ्योऽतिपातकाः । मुनिभ्यो धर्मशीलेभ्यो मधुमांसाशने रताः ॥२५॥
[4]वधकान् पोषयित्वान्यजीवानां येऽतिनिर्घृणाः । खादका मधुमांसस्य तेषां ये चानुमोदकाः ॥२६॥
ते नराः पापभारेण प्रविशन्ति रसातलम् । विपाकक्षेत्रमेतद्धि विद्धि दुष्कृतकर्मणाम् ॥२७॥
जलस्थलचराः क्रूराः सोरगाश्च सरीसृपाः । पापशीलाश्च मानिन्यः पक्षिणश्च प्रयान्त्यधः ॥२८॥
प्रयान्त्यसंज्ञिनो घर्मां तां वंशां च सरीसृपाः । पक्षिणस्ते[5] तृतीयाञ्च तां चतुर्थीं च पन्नगाः ॥२९॥
सिंहास्तां पञ्चमीं चैव ताश्च षष्ठीं च योषितः । प्रयान्ति सप्तमीं ताश्च मर्त्या मत्स्याश्च पापिनः ॥३०॥
रत्नशर्करवालुक्यः पङ्कधूमतमःप्रभाः । तमस्तमःप्रभा[6] चेति सप्ताधः श्वभ्रभूमयः ॥३१॥
तासां पर्यायनामानि घर्मा वंशा शिलाञ्जना । [7]अरिष्टा मघवी चैव माघवी चेत्यनुक्रमात् ॥ ३२॥
तत्र बीभत्सुनि स्थाने जाले[8] मधुकृतामिव[9] । तेऽधोमुखाः प्रजायन्ते पापिनामुन्नतिः कुतः ॥३३॥
तेऽन्तर्मुहूर्त्ततो गात्रं पूतिगन्धि जुगुप्सितम् । पर्याप्नुवन्ति दुष्प्रेक्षं विकृताकृति दुष्कृतात्[10] ॥३४॥
पर्याप्ताश्च महीपृष्ठे [11]ज्वलदग्न्यतिदुःसहे । विच्छिन्नबन्धनानीव पत्राणि विलुठन्त्यधः ॥३५॥
निपत्य च महीपृष्ठे निशितायुधमूर्धसु । पूत्कुर्वन्ति दुरात्मानः छिन्नसर्वाङ्गसन्धयः ॥३६॥

होते हैं, चोरी करते हैं, परस्त्रीरमण करते हैं, मद्य पीते हैं, मिथ्यादृष्टि हैं, क्रूर हैं, रौद्रध्यानमें तत्पर हैं, प्राणियोंमें सदा निर्दय रहते हैं, बहुत आरम्भ और परिग्रह रखते हैं, सदा धर्मसे द्रोह करते हैं, अधर्ममें सन्तोष रखते हैं, साधुओंकी निन्दा करते हैं, मात्सर्यसे उपहत हैं, धर्म सेवन करनेवाले परिग्रहरहित मुनियोंसे विना कारण ही क्रोध करते हैं, अतिशय पापी हैं, मधु और मांस खानेमें तत्पर हैं, अन्य जीवोंकी हिंसा करनेवाले कुत्ता बिल्ली आदि पशुओंको पालते हैं, अतिशय निर्दय हैं, स्वयं मधु मांस खाते हैं और उनके खानेवालोंकी अनुमोदना करते हैं वे जीव पापके भारसे नरकमें प्रवेश करते हैं। इस नरकको ही खोटे कर्मोंके फल देनेका क्षेत्र जानना चाहिये ॥ २२-२७ ॥ क्रूर जलचर, थलचर, सर्प, सरीसृप, पाप करनेवाली स्त्रियां और क्रूर पक्षी आदि जीव नरकमें जाते हैं ॥ २८ ॥ असैनी पञ्चेन्द्रिय जीव घर्मानामक पहली पृथ्वी तक जाते हैं, सरीसृप-सरकनेवाले-गुहा दूसरी पृथ्वी तक जाते हैं, पक्षी तीसरी पृथ्वी तक, सर्प चौथी पृथ्वी तक, सिंह पांचवीं पृथ्वी तक, स्त्रियां छठवीं पृथ्वी तक और पापी मनुष्य तथा मच्छ सातवीं पृथ्वी तक जाते हैं ॥ २९-३० ॥ रत्नप्रभा, शर्कराप्रभा, बालुकाप्रभा, पङ्कप्रभा, धूमप्रभा, तमःप्रभा, और महातमःप्रभा ये सात पृथिवियाँ हैं जो कि क्रम क्रमसे नीचे नीचे हैं ॥ ३१ ॥ घर्मा, वंशा, शिला (मेघा), अंजना, अरिष्टा, मघवी और माघवी ये सात पृथिवियोंके क्रमसे नामान्तर हैं ॥ ३२ ॥ उन पृथिवियोंमें वे जीव मधुमक्खियोंके छत्तेके समान लटकते हुए घृणित स्थानोंमें नीचेकी ओर मुख करके पैदा होते हैं। सो ठीक ही है पापी जीवोंकी उन्नति कैसे हो सकती है ? ॥ ३३ ॥ वे जीव पापकर्मके उदयसे अन्तर्मुहूर्तमें ही दुर्गन्धित, घृणित, देखनेके अयोग्य और बुरी आकृतिवाले शरीरकी पूर्ण रचना कर लेते हैं ॥ ३४ ॥ जिस प्रकार वृक्षके पत्ते शाखासे बन्धन टूट जानेपर नीचे गिर पड़ते हैं उसी प्रकार वे नारकी जीव शरीरकी पूर्ण रचना होते ही उस उत्पत्तिस्थानसे जलती हुई अत्यन्त दुःसह नरककी भूमिपर गिर पड़ते हैं ॥ ३५ ॥ वहाँकी भूमिपर अनेक तीक्ष्ण हथियार गड़े हुए हैं, नारकी उन हथियारोंकी नोंकपर गिरते हैं

१ निष्कृपाः । २ धर्मघातकाः । ३ –परितोषकाः ल० । ४ शुनकादीन् । ५ घर्मावंशे । ६ महातमःप्रभा । ७ सारिष्टा अ०, प०, द०, स० । ८ गोलके । ९ मधुमक्षिणाम् । १० दुःकृतात् ब०, अ०, प०, द०, स० । ११ ज्वलनिन्यति–ब०, ट०, ज्वलति न्यति–अ०, प०, द०, स०, ल० ।

भूम्युष्मणा च संतप्ता दुःस्सहेनाकुलीकृताः[1]। तप्तभ्राष्ट्रे[2] तिला यद्वत्[3] निपतन्त्युत्पतन्ति च ॥३७॥
ततस्तेषां निकृन्तन्ति गात्राणि निशितायुधैः। नारकाः [4]परुषक्रोधाः तर्जयन्तोऽतिभीषणम् ॥३८॥
तेषां छिन्नानि गात्राणि संधानं[5] यान्ति तत्क्षणम्। दण्डाहतानि वारीणि यद्वद्विक्षिप्य[6] शस्कशः[7] ॥३९॥
वैरमन्योऽन्यसम्बन्धि निवेद्यानुभवाद् गतम्। दण्डांस्तदनुरूपांस्ते योजयन्ति परस्परम् ॥४०॥
चोदयन्त्यसुराश्चैनान् यूयं युध्यध्वमित्यरम्। संस्मार्य पूर्ववैराणि [8]प्राक्चतुर्थ्याः सुदारुणाः[9] ॥४१॥
वज्रचञ्चूपुटैर्गृद्ध्राः कृतन्तत्येतान् भयङ्कराः। श्वानश्चानजुनाः[10] शूना[11] दणन्ति[12] नखरैः खरैः ॥४२॥
मूषाक्वथिततात्राादिरसान् केचित् प्रपायिताः। प्रयान्ति विलयं सद्यो रसन्तो[13] विरसस्वनम् ॥४३॥
इक्षुयन्त्रेषु निक्षिप्य पीड्यन्ते खण्डशः कृताः। [14]उष्ट्रिकासु च निष्क्वाथ्य नीयन्ते रसतां परे ॥४४॥
केचित् स्वान्येव मांसानि खाद्यन्ते बलिभिः परैः। विशस्य[15] निशितैः शस्त्रैः परमांसाशिनः पुरा ॥४५॥
[16]संदंशकैर्विदार्यास्यं गले पाटिकया[17] बलात्। ग्रास्यन्ते तापितांल्लोहपिण्डान् मांसप्रियाः पुरा ॥४६॥
सैषा तव प्रियेत्युच्चैः तप्तायःपुत्रिकां गले[18]। आलिङ्ग्यन्ते बलादन्यैः अनलार्च्चिःकणाचिताम् ॥४७॥

जिसमें उनके शरीरकी सब सन्धियां छिन्न-भिन्न हो जाती हैं और इस दुःखसे दुखी होकर वे पापी जीव रोने-चिल्लाने लगते हैं ॥ ३६ ॥ वहांकी भूमिकी असह्य गर्मीसे संतप्त होकर व्याकुल हुए नारकी गरम भाड़में डाले हुए तिलोंके समान पहले तो उछलते हैं और नीचे गिर पड़ते हैं ॥३७ ॥ वहां पड़ते ही अतिशय क्रोधी नारकी भयंकर तर्जना करते हुए तीक्ष्ण शस्त्रोंसे उन नवीन नारकियोंके शरीरके टुकड़े टुकड़े कर डालते हैं ॥ ३८ ॥ जिस प्रकार किसी डण्डेसे ताड़ित हुआ जल बूँद बूँद होकर बिखर जाता है और फिर क्षणभरमें मिलकर एक हो जाता है उसी प्रकार उन नारकियोंका शरीर भी हथियारोंके प्रहारसे छिन्न भिन्न होकर जहाँ तहाँ बिखर जाता है और फिर क्षणभरमें मिलकर एक हो जाता है ॥ ३९ ॥ उन नारकियोंको अवधि-ज्ञान होनेसे अपनी पूर्वभव सम्बन्धी घटनाओंका अनुभव होता रहता है, उस अनुभवसे वे परस्पर एक दूसरे को अपना पूर्व वैर बतलाकर आपसमें दण्ड देते रहते हैं ॥ ४० ॥ पहलेकी तीन पृथिवियोंतक अतिशय भयंकर असुरकुमार जातिके देव जाकर वहांके नारकियोंको उनके पूर्वभवके वैरका स्मरण कराकर परस्परमें लड़नेके लिये प्रेरणा करते रहते हैं ॥ ४१ ॥ वहांके भयंकर गीध* अपनी वज्रमयी चोंचसे उन नारकियोंके शरीरको चीर डालते हैं और काले काले सुन-कुत्ते अपने पैने नखोंसे फाड़ डालते हैं ॥ ४२ ॥ कितने ही नारकियोंको खौलती हुई ताँबा आदि धातुएँ पिलाई जाती हैं जिसके दुःखसे वे बुरी तरह चिल्ला चिल्लाकर शीघ्र ही विलीन (नष्ट) हो जाते हैं ॥ ४३ ॥ कितने ही नारकियोंके टुकड़े टुकड़े कर कोल्हू (गन्ना पेलनेके यन्त्र) में डालकर पेलते हैं और कितने ही नारकियोंको कढ़ाईमें खौलाकर उनका रस बनाते हैं ॥४४ ॥ जो जीव पूर्व पर्यायमें मांसभक्षी थे उन नारकियोंके शरीरको बलवान् नारकी अपने पैने शास्त्रोंसे काट काटकर उनका मांस उन्हें ही खिलाते हैं ॥४५॥ जो जीव पहले बड़े शौकसे मांस खाया करते थे ? सँड़ासीसे उनका मुख फाड़कर उनके गलेमें जबरदस्ती तपाये हुए लोहेके गोले निगलाये जाते हैं ॥४६॥ 'यह वही तुम्हारी उत्तमप्रिया है' ऐसा कहते हुए बलवान् नारकी अग्निके फुलिंगोंसे

१ दुस्सहोष्णाकुली– अ०। २ अम्बरीषे। ३ स्थालीपच्यमानतण्डुलोत्पतननिपतनवत्। ४ परुषाः क्रोधाः अ०, स०, द०। ५ सम्बन्धम्। ६ विकीर्य। ७ खण्डशः। ८ चतुर्थनरकात् प्राक्। ९ सुदारुणम् प०। १० कृष्णाः। ११ स्थूलाः। १२ विदारयन्ति। १३ ध्वनन्तः। १४ कटाहेषु। १५ छित्वा। १६ कङ्कमुखैः। १७ पादिकया अ०, प०, स०, द०। १८ परे द०। परैः स०।

* ये गीध, कुत्ते आदि जीव तिर्यञ्चगतिके नहीं है किन्तु नारकी ही विक्रिया शक्तिसे अपने शरीरमें वैसा परिणमन कर लेते हैं।

सङ्केतकेतकोद्याने[1] कर्कशक्रकचच्छदे । त्वामिहोपह्वरे[2] कान्ता[3]ह्वयत्यभिसिसीर्षया[4] ॥४८॥
पुरा पराङ्गनासङ्गरतिं दुर्ललितानिति । संयोजयन्ति तप्तायःपुत्रिकाभिर्बलात् परे ॥४९॥
तांस्तदालिङ्गनासङ्गात् क्षणमूर्च्छामुपागतान् । तुदन्त्ययोमयैस्तोत्रैः[5] अन्ये मर्मसु नारकाः ॥५०॥
तदङ्गालिङ्गनासङ्गात्[7] क्षणामीलितलोचनाः । निपतन्ति महीरङ्गे[8] तेऽङ्गारीकृतविग्रहाः ॥५१॥
[9]भस्त्राग्निदीपितान् केचित्[10]आयसान् शाल्मलीद्रुमान् । [11]आरोप्यन्ते हठात् कैश्चित् तीक्ष्णोर्ध्वाधोऽग्रकण्टकान्
ते तदारोपणोर्ध्वाधःकर्षणैरतिकर्षिताः । मुच्यन्ते नारकैः कृच्छ्रात् क्षरत्क्षतजमूर्तयः ॥५३॥
[12]अरुष्करद्रवापूर्णनदीरन्ये विगाहिताः । क्षणाद् विशीर्णसर्वाङ्गा [13]विलुप्यन्ते[14]ऽम्बुचारिभिः ॥५४॥
विस्फुलिङ्गमयीं शय्यां ज्वलन्तीमधिशायिताः । शेरते प्लुष्यमाणाङ्गा दीर्घनिद्रासुखेप्सया ॥५५॥
असिपत्रवनान्यन्ये श्रयन्त्युष्णार्दिता यदा । तदा वाति मरुत्तीव्रो विस्फुलिङ्गकणान् किरन् ॥५६॥
तेन पत्राणि [15]पात्यन्ते सर्वायुधमयान्यरम् । तैश्छिन्नभिन्नसर्वाङ्गाः पूत्कुर्वन्ति वराककाः ॥५७॥

व्याप्त तपाई हुई लोहेकी पुतलीका जबरदस्ती गलेसे आलिंगन कराते हैं ॥ ४७ ॥ जिन्होंने पूर्वभव में परस्त्रियोंके साथ रति-क्रीड़ा की थी ऐसे नारकी जीवोंसे अन्य नारकी आकर कहते हैं कि 'तुम्हें तुम्हारी प्रिया अभिसार करनेकी इच्छासे संकेत किये हुए केतकीवनके एकान्तमें बुला रही है' इस प्रकार कहकर उन्हें कठोर करोंत जैसे पत्तेवाले केतकीवनमें ले जाकर तपाई हुई, लोहेकी पुतलियोंके साथ आलिङ्गन कराते हैं ॥ ४८–४९ ॥ उन लोहेकी पुतलियोंके आलिङ्गनसे तत्क्षण ही मूर्छित हुए उन नारकियोंको अन्य नारकी लोहेके चाबुकोंसे मर्म स्थानोंमें पीटते हैं ॥ ५० ॥ उन लोहेकी पुतलियोंके आलिंगनकालमें ही जिनके नेत्र दुःखसे बन्द हो गये हैं तथा जिनका शरीर अंगारोंसे जल रहा है ऐसे वे नारकी उसी क्षण जमीन पर गिर पड़ते हैं ॥ ५१ ॥ कितने ही नारकी, जिनपर ऊपरसे नीचे तक पैने कांटे लगे हुए हैं और जो धौंकनीसे प्रदीप्त किये गये हैं ऐसे लोहेके बने हुए सेमरके वृक्षों पर अन्य नारकियोंको जबरदस्ती चढ़ाते हैं ॥ ५२ ॥ वे नारकी उन वृक्षों पर चढ़ते हैं, कोई नारकी उन्हें ऊपरसे नीचेकी ओर घसीट देता है और कोई नीचेसे ऊपरको घसीट ले जाता है । इस तरह जब उनका सारा शरीर छिल जाता है और उससे रुधिर बहने लगता है तब कहीं बड़ी कठिनाईसे छुटकारा पाते हैं ॥ ५३ ॥ कितने ही नारकियोंको भिलावेके रससे भरी हुई नदीमें जबरदस्ती पटक देते हैं जिससे आप क्षण भरमें उनका सारा शरीर गल जाता है और उसके खारे जलकी लहरें उन्हें लिप्त कर उनके घावोंको भारी दुःख पहुँचाती हैं ॥ ५४ ॥ कितने ही नारकियोंको फुलिङ्गोंसे व्याप्त जलती हुई अग्निकी शय्या पर सुलाते हैं । दीर्घनिद्रा लेकर सुख प्राप्त करनेकी इच्छासे वे नारकी उस पर सोते हैं जिससे उनका सारा शरीर जलने लगता है ॥ ५५ ॥ गर्मीके दुःखसे पीड़ित हुए नारकी ज्योंही असिपत्र वनमें (तलवारकी धारके समान पैने पत्तोंवाले वनमें) पहुँचते हैं त्योंही वहां अग्निके फुलिङ्गोंको बरसाता हुआ प्रचण्ड वायु बहने लगता है । उस वायुके आघातसे अनेक आयुधमय पत्ते शीघ्र ही गिरने लगते हैं जिनसे उन नारकियोंका सम्पूर्ण शरीर छिन्न-भिन्न हो जाता है उस दुःखसे दुखी होकर बेचारे दीन नारकी रोने चिल्लाने लगते हैं ॥ ५६–५७ ॥

१ केतकीवने । २ रहसि । ३ आह्वानं करोति । ४ अभिसर्तुमिच्छा अभिसिसीर्षा तया । निधुवनेच्छयेत्यर्थः । ५ हस्तान् । ६ तोदनैः । 'प्राजनं तोदनं तोत्रम्' इत्यभिधानात् । तुदन्त्यनेनेति तोत्रम् 'तुद व्यथने' इति धातोः करणे त्रङ् प्रत्ययः । ७ -सङ्ग- अ०, प०, द०, स०, ल० । ८ तेऽङ्गाराङ्कितविग्रहाः प०, द०, स०, अ०, ल० । ९ चर्मप्रसेविकाग्नि । 'भस्त्रा चर्मप्रसेविका' इत्यभिधानात् । १० अयोमयान् । ११ 'रुह बीजजन्मनि' णिङ् परिहापा इति सूत्रेण हकारस्य पकारः । १२ भल्लातकीतैलम् । १३ छिद्यन्ते । १४ विलिप्यन्तेऽम्बु ल० । १५ सात्यन्ते स०, द०, अ०, प०, ल०, ।

[1]वल्लूरीकृत्य शोष्यन्ते [2]शूल्यमांसीकृताः परे । पात्यन्ते च गिरेरग्राद् अधःकृतमुखाः परैः[3] ॥५८॥
दार्यन्ते क्रकचैस्तीक्ष्णैः केचिन्मर्मास्थिसन्धिषु । तप्तायःसूचिनिर्भिन्ननखाग्रो[4]ल्वणवेदनाः ॥५९॥
कांश्चिन्निशातशूलाग्र[5]प्रोतांल्लम्बा[6]न्त्रसन्ततीन् । भ्रमयत्युच्छलच्छोणशोणितारुणविग्रहान् ॥६०॥
व्रणजर्जरितान् कांश्चित् सिञ्चन्ति क्षारवारिभिः । [7]तत्किलाप्यायनं तेषां मूर्च्छाविह्वलितात्मनाम् ॥६१॥
कांश्चिदुत्तुङ्गशैलाग्रात् पातितानतिनिष्ठुराः । नारकाः परुषं घ्नन्ति शतशो वज्रमुष्टिभिः[8] ॥६२॥
अन्यानन्ये विनिघ्नन्ति [9]द्रुघणैरतिनिर्घृणाः । विच्छिन्नप्रोच्छलच्चक्षुर्गोलोकानधिमस्तकम् ॥६३॥
[10]औरभ्रैश्च [11]रणैरन्यान् योधयन्ति मिथोऽसुराः । स्फुरद्ध्वनिदलन्मूर्द्ध[12]गलन्मस्तिष्ककर्दमान् ॥६४॥
तप्तलोहासनेष्वन्यान् [13]आसयन्ति पुरोद्धतान् । शाययन्ति च [14]विन्यासैः [15]शितायःकण्टकास्तरे[16]॥६५॥
इत्यसह्यतरां घोरां नारकीं प्राप्य [17]यातनाम् । [18]उद्विग्नानां मनस्येषाम् एषा चिन्तोपजायते ॥६६॥
अहो दुरासदा[19] भूमिः प्रदीप्ता ज्वलनार्चिषा । वायवो वान्ति दुःस्पर्शाः स्फुलिङ्गकणवाहिनः ॥६७॥
दीप्ता दिशश्च दिग्दाहशङ्कां सञ्जनयन्त्यमूः । तप्तपांसुमयीं वृष्टिं किरन्त्यम्बुमुचोऽम्बरात् ॥६८॥

वे नारकी कितने ही नारकियोंको लोहेकी सलाई पर लगाये हुए मांसके समान लोहदण्डों पर टाँगकर अग्निमें इतना सुखाते हैं कि वे सूखकर वल्लूर (शुष्क मांस) की तरह हो जाते हैं और कितने ही नारकियोंको नीचेकी ओर मुँह कर पहाड़की चोटी परसे पटक देते हैं ॥ ५८ ॥ कितने ही नारकियोंके मर्मस्थान और हड्डियोंके सन्धिस्थानोंको पैनी करोंतसे विदीर्ण कर डालते हैं और उनके नखोंके अग्रभागमें तपाई हुई लोहेकी सुइयां चुभाकर उन्हें भयंकर वेदना पहुँचाते हैं ॥ ५९ ॥ कितने ही नारकियोंको पैने शूलके अग्रभाग पर चढ़ाकर घुमाते हैं जिससे उनकी अँतड़ियाँ निकलकर लटकने लगती हैं और छलकते हुए खूनसे उनका सारा शरीर लाल लाल हो जाता है ॥ ६० ॥ इस प्रकार अनेक घावोंसे जिनका शरीर जर्जर हो रहा है ऐसे नारकियोंको वे बलिष्ठ नारकी खारे पानीसे सींचते हैं। जो नारकी घावोंकी व्यथासे मूर्छित हो जाते हैं खारे पानीके सींचनेसे वे पुनः सचेत हो जाते हैं ॥ ६१ ॥ कितने ही नारकियोंको पहाड़की ऊंची चोटीसे नीचे पटक देते हैं और फिर नीचे आने पर उन्हें अनेक निर्दय नारकी बड़ी कठोरताके साथ सैकड़ों वज्रमय मुट्ठियोंसे मारते हैं ॥ ६२ ॥ कितने ही निर्दय नारकी अन्य नारकियोंको उनके मस्तक पर मुद्गरोंसे पीटते हैं जिससे उनके नेत्रोंके गोलक (गटेना) निकलकर बाहिर गिर पड़ते हैं ॥ ६३ ॥ तीसरी पृथिवी तक असुर कुमारदेव नारकियोंको मेढ़ा बनाकर परस्परमें लड़ाते हैं जिससे उनके मस्तक शब्द करते हुए फट जाते हैं और उनसे रक्तमांस आदि बहुतसा मल बाहर निकलने लगता है ॥ ६४ ॥ जो जीव पहले बड़े उद्दण्ड थे उन्हें वे नारकी तपाये हुए लोहेके आसनपर बैठाते हैं और विधिपूर्वक पैने काँटोंके बिछौने पर सुलाते हैं ॥ ६५ ॥ इस प्रकार नरककी अत्यन्त असह्य और भयंकर वेदना पाकर भयभीत हुए नारकियोंके मनमें यह चिन्ता उत्पन्न होती है ॥ ६६ ॥ कि अहो ! अग्निकी ज्वालाओंसे तपी हुई यह भूमि बड़ी ही दुरासद (सुखपूर्वक ठहरनेके अयोग्य) है। यहां पर सदा अग्निके फुलिङ्गोंको धारण करनेवाला वह वायु बहता रहता है जिसका कि स्पर्श भी सुखसे नहीं किया जा सकता ॥ ६७ ॥ ये जलती हुई दिशाएं दिशाओंमें आग लगनेका सन्देह उत्पन्न कर रही हैं

१ शुष्कमांसीकृत्य । "उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्" । २ शूले संस्कृतं दग्धं शूल्यं तच्च मांसं च शूल्यमांसम् । ३ परे म०, ल० । ४ उत्कट । ५ शूलाग्रेण निक्षिप्तान् । ६ आन्त्रं परीतम् । ७ क्षाराम्बुसेचनम् । ८ दृढमुष्टिप्रहारैः । ९ मुद्गरैः । १० मेषसम्बन्धिभिः । 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ।' इत्यभिधानात् । ११ युद्धैः । १२ किट्टः । -मस्तिक्य- प०, म०, स० । -मस्तक- अ० । -मास्तिक- ल० । १३ 'आस उपवेशने' । १४ विधिन्यासैः । १५ शितं निशितम् 'तीक्ष्णम्' । १६ शय्याविशेषे । १७ तीव्रवेदनाम् । १८ भीतानाम् । १९ दुर्गमा ।

विषारण्यमिदं विश्वग् विषवल्लीभिराततम् । असिपत्रवनं चेदम् असिपत्रैर्भयानकम्[1] ॥६९॥
[2]मृषाभिसारिकाश्चेमाः[3] तप्तायोमयपुत्रिकाः । [4]काममुद्दीपयन्त्यस्मान् आलिङ्गन्त्यो बलाद् गले ॥७०॥
योधयन्ति बलादस्मान् इमे केऽपि [5]महत्तराः । नूनं प्रेताधिना[6]थेन प्रयुक्ताः कर्मसाक्षिणः[7] ॥७१॥
[8]खरारटितमुत्प्रोथं[9] ज्वलज्ज्वालाकरालितम् । [10]गिलितुमनलोद्गारि [11]खरोष्ट्रं नोऽभिधावति ॥७२॥
अमी च भीषणाकाराः कृपाणोद्यतपाणयः । पुरुषास्तर्जयन्त्यस्मान् अकारणरणोद्धुराः[12] ॥७३॥
इमे च परुषापाता गृध्रा नोऽभि[13]द्रवन्त्यरम् । [14]भषन्तः सारमेयाश्च [15]भीषयन्तेतरामिमे ॥७४॥
[16]नूनमेतन्निभे[17]नास्मद्दुरितान्येव निर्दयम् । पीडामुत्पादयन्त्येवम् अहो व्यसनसन्निधिः[18] ॥७५॥
इतः [19]स्वरति यद्घोषो[20] नारकाणां प्रधावताम् । इतश्च करुणाक्रन्दगर्भः पूत्कारनिःस्वनः ॥७६॥
इतोऽयं प्रध्वनद्ध्वाङ्क्ष[21]कठोरारावमूर्च्छितः[22] । [23]शिवानामशिवाध्वानः[24] प्रध्वानयति रोदसी[25] ॥७७॥
इतः परुषसम्पातपवनाधूननोत्थितः । असिपत्रवने पत्रनिर्मोक्षपरुषध्वनिः ॥७८॥
सोऽयं कण्टकितस्कन्धः कूटशाल्मलिपादपः । यस्मिन् स्मृतेऽपि नोङ्गानि तुद्यन्त इव कण्टकैः ॥७९॥

और ये मेघ तप्तधूलिकी वर्षा कर रहे हैं ॥ ६८ ॥ यह विषवन है जो कि सब ओरसे विष लताओंसे व्याप्त है और यह तलवारकी धारके समान पैने पत्तोंसे भयंकर असिपत्र वन है ॥ ६९ ॥ ये गरम की हुई लोहेकी पुतलियां नीच व्यभिचारिणी स्त्रियोंके समान जबरदस्ती गलेका आलिंगन करती हुई हम लोगोंको अतिशय सन्ताप देती हैं (पक्षमें कामोत्तेजन करती हैं) ॥ ७० ॥ ये कोई महाबलवान् पुरुष हम लोगोंको जबरदस्ती लड़ा रहे हैं और ऐसे मालूम होते हैं मानो हमारे पूर्वजन्म सम्बन्धी दुष्कर्मोंकी साक्षी देनेके लिये यमराजके द्वारा ही भेजे गये हों ॥ ७१ ॥ जिनके शब्द बड़े ही भयानक हैं, जो अपनी नासिका ऊपरको उठाये हुए हैं, जो जलती हुई ज्वालाओंसे भयंकर हैं और जो मुँहसे अग्नि उगल रहे हैं ऐसे ऊंट और गधोंका यह समूह हम लोगोंको निगलनेके लिये ही सामने दौड़ा आ रहा है ॥ ७२ ॥ जिनका आकार अत्यन्त भयानक है जिन्होंने अपने हाथमें तलवार उठा रखी है और जो बिना कारण ही, लड़नेके लिये तैयार हैं ऐसे ये पुरुष हम लोगोंकी तर्जना कर रहे हैं—हम लोगोंको घुड़क रहे हैं—डांट दिखला रहे हैं ॥ ७३ ॥ भयंकर रूपसे आकाशसे पड़ते हुए ये गीध शीघ्र ही हमारे सामने झपट रहे हैं और ये भोंकते हुए कुत्ते हमें अतिशय भयभीत कर रहे हैं ॥ ७४ ॥ निश्चय ही इन दुष्ट जीवोंके छलसे हमारे पूर्वभवके पाप ही हमें इस प्रकार दुःख उत्पन्न कर रहे हैं। बड़े आश्चर्यकी बात है कि हम लोगोंको सब ओरसे दुःखोंने घेर रक्खा है ॥ ७५ ॥ इधर यह दौड़ते हुए नारकियोंके पैरोंकी आवाज सन्ताप उत्पन्न कर रही है और इधर यह करुण विलापसे भरा हुआ किसीके रोनेका शब्द आ रहा है ॥ ७६ ॥ इधर यह कांव कांव करते हुए कौवोंके कठोर शब्दसे विस्तारको प्राप्त हुआ शृगालोंका अमंगलकारी शब्द आकाश-पातालको शब्दायमान कर रहा है ॥ ७७ ॥ इधर यह असिपत्र वनमें कठिन रूपसे चलनेवाले वायुके प्रकम्पनसे उत्पन्न हुआ शब्द तथा उस वायुके आघातसे गिरते हुए पत्तोंका कठोर शब्द हो रहा है ॥ ७८ ॥ जिसके स्कन्ध भाग पर कांटे लगे हुए हैं ऐसा यह वही कृत्रिम सेमरका

१ भयङ्करम् । २ मिथ्यागणिका । ३ -श्चैता-म०, ल० । ४ अत्यर्थम् । ५ असुराः । ६ यमेन । ७ कृताध्यक्षाः । ८ कटुरवं भवति तथा । ९ नासिका । १० चर्वितुम् । 'गृ निगरणे' धातोस्तुमुन् प्रत्ययः । ११ गर्दभोष्ट्रसमूहः । १२ दर्पाविष्टाः । १३ अभिमुखमागच्छन्ति । १४ तर्जयन्तः । १५ सन्त्रासयन्ति । १६ अहमेवं मन्ये । १७ व्याजेन । १८ समीपः । स्फुरति अ०, प०, स० । १९ स्वरति 'ओस्वृ शब्दोपतानयोः । २० पादरवः । २१ प्रद्ध्वनद्ध्वाङ्क्षः अ०, स०, ल० । ध्वाङ्क्षः वायसः । २२ मिश्रितः । २३ शृगालानाम् । २४ अमङ्गल । २५ आकाशभूमी ।

सैषा वैतरणी नाम सरित् सारुष्करद्रवा[1] । आस्तां तरणमेतस्याः स्मरणञ्च भयावहम् ॥८०॥
एते[2] च नारकावासाः प्रज्वलन्त्यन्तरूष्मणा । अन्धमूषास्विवावर्त्तं नीयन्ते यत्र नारकाः ॥८१॥
दुस्सहा वेदनास्तीव्राः प्रहारा दुर्धरा इमे । अकाले दुस्त्यजाः प्राणा दुर्निवाराश्च नारकाः ॥८२॥
क्व यामः क्व नु तिष्ठामः [3]क्वास्महे क्व नु [4]शेमहे । यत्र यत्रोपसर्पामः तत्र तत्राधयोऽधिकाः ॥८३॥
इत्यपारमिदं दुःखं तरिष्यामः कदा वयम् । नाब्धयोऽप्युपमानं नो जीवितस्यालघीयसः ॥८४॥
इत्यनुध्यायतां तेषां योऽन्तस्तापोऽनुसन्ततः[5] । स एव प्राणसंशीतिं[6] तानारोपयितुं क्षमः ॥८५॥
किमत्र बहुनोक्तेन यद्यद्दुःखं सुदारुणम् । तत्तत्पिण्डीकृतं तेषु दुर्मोचैः पापकर्मभिः ॥८६॥
अक्ष्णोर्निमेषमात्रञ्च न तेषां सुखसङ्गतिः । दुःखमेवानुबन्धीदग् नारकाणामहर्निशम् ॥८७॥
नानादुःखशतावर्ते मग्नानां नरकार्णवे । तेषामास्तां सुखावाप्तिः तत्स्मृतिश्च दवीयसी[7] ॥८८॥
शीतोष्णनरकेष्वेषां दुःखं यदुपजायते । तदसह्यमचिन्त्यञ्च बत केनोपमीयते ॥८९॥
शीतं षष्ठयाञ्च सप्तम्यां पञ्चम्यां तद्द्वयं मतम्[8] । पृथिवीषूष्णमुद्दिष्टं चतसृष्वादिमासु च ॥९०॥
त्रिंशत्पञ्चहताः पञ्चत्रिपञ्च दश च क्रमात् । तिस्रः पञ्चभिरूनैका लक्षाः पञ्च च सप्तसु ॥९१॥

पेड़ है जिसकी याद आते ही हम लोगोंके समस्त अंग कांटे चुभनेके समान दुखी होने लगते हैं ॥ ७९ ॥ इधर यह भिलावेके रससे भरी हुई वैतरणी नामकी नदी है। इसमें तैरना तो दूर रहा इसका स्मरण करना भी भयका देनेवाला है ॥ ८० ॥ ये वही नारकियोंके रहनेके घर (बिल) हैं जो कि गरमीसे भीतर ही भीतर जल रहे हैं और जिनमें ये नारकी छिद्र-रहित सांचेमें गली हुई सुवर्ण चांदी आदि धातुओंकी तरह घुमाये जाते हैं ॥ ८१ ॥ यहांकी वेदना इतनी तीव्र है कि उसे कोई सह नहीं सकता, मार भी इतनी कठिन है कि उसे कोई बरदाश्त नहीं कर सकता। ये प्राण भी आयु पूर्ण हुए बिना छूट नहीं सकते और ये नारकी भी किसीसे रोके नहीं जा सकते ॥ ८२ ॥ ऐसी अवस्थामें हम लोग कहां जावें ? कहां खड़े हों ? कहां बैठें ? और कहां सोवें ? हम लोग जहां जहां जाते हैं वहां वहां अधिक ही अधिक दुःख पाते हैं ॥ ८३ ॥ इस प्रकार यहांके इस अपार दुःखसे हम कब तिरेंगे ?—कब पार होंगे ? हम लोगोंकी आयु भी इतनी अधिक है कि सागर भी उसके उपमान नहीं हो सकते ॥ ८४ ॥ इस प्रकार प्रतिक्षण चिन्तवन करते हुए नारकियोंको जो निरन्तर मानसिक संताप होता रहता है वही उनके प्राणोंको संशयमें डाले रखनेके लिये समर्थ है अर्थात् उक्त प्रकारके संतापसे उन्हें मरनेका संशय बना रहता है ॥ ८५ ॥ इस विषयमें और अधिक कहनेसे क्या लाभ है ? इतना ही पर्याप्त है, कि संसारमें जो जो भयंकर दुःख होते हैं उन सभीको, कठिनतासे दूर होने योग्य कर्मोंने नरकोंमें इकट्ठा कर दिया है ॥ ८६ ॥ उन नारकियोंको नेत्रोंके निमेष मात्र भी सुख नहीं है। उन्हें रात-दिन इसी प्रकार दुःख ही दुःख भोगना पड़ता है ॥ ८७ ॥ नाना प्रकारके दुःखरूपी सैकड़ों आवर्तोंसे भरे हुए नरकरूपी समुद्रमें डूबे हुए नारकियोंको सुखकी प्राप्ति तो दूर रही उसका स्मरण होना भी बहुत दूर रहता है ॥ ८८ ॥ शीत अथवा उष्ण नरकोंमें इन नारकियोंको जो दुःख होता है वह सर्वथा असह्य और अचिन्त्य है। संसारमें ऐसा कोई पदार्थ भी तो नहीं है जिसके साथ उस दुःखकी उपमा दी जा सके ॥ ८९ ॥ पहलेकी चार पृथिवियों-में उष्ण वेदना है पांचवीं पृथिवीमें उष्ण और शीत दोनों वेदनाएं हैं अर्थात् ऊपरके दो लाख बिलोंमें उष्ण वेदना है और नीचेके एक लाख बिलोंमें शीत वेदना है। छठवीं और सातवीं पृथिवीमें शीत वेदना है। यह उष्ण और शीतकी वेदना नीचे नीचेके नरकोंमें क्रम क्रमसे बढ़ती हुई है ॥ ९० ॥ उन सातों पृथिवियोंमें क्रमसे तीस लाख, पच्चीस लाख, पन्द्रह

---

१ भल्लातकतैलसहिता। २ एते ते अ०, प०, द०, स०। ३ 'आस उपवेशने'। ४ 'शीङ् स्वप्ने। ५ विस्तृतः। ६ सन्देहः। ७ नितरां दूरा। ८ –यं समम् ल०।

नरकेषु बिलानि स्युः प्रज्वलन्ति महान्ति च। नारका येषु पच्यन्ते [1]कुम्भीष्विव दुरात्मकाः ॥९२॥
एकं त्रीणि तथा सप्त दश सप्तदशापि च। द्वाविंशतिस्त्रयस्त्रिंशदायुस्तत्राब्धिसंख्यया ॥९३॥
धनूंषि सप्त तिस्रः स्युः अरत्न्योऽङ्गुलयश्च षट्। घर्मायां नारकोत्सेधो [2]द्विर्द्विश्शेषासु लक्ष्यताम् ॥९४॥
[3]पोगण्डा हुण्डसंस्थानाः [4]षण्ढकाः पूतिगन्धयः। दुर्वर्णाश्चैव दुःस्पर्शा दुःस्वरा दुर्भगाश्च ते ॥९५॥
तमोमयैरिवारब्धा विरूक्षैः परमाणुभिः। जायन्ते कालकालाभाः[5] नारका द्रव्यलेश्यया ॥९६॥
भावलेश्या तु कापोती[6] जघन्या मध्यमोत्तमा। नीला च मध्यमा नीला नीलोत्कृष्टा च कृष्णया ॥९७॥
कृष्णा च मध्यमोत्कृष्टा कृष्णा चेति यथाक्रमम्। घर्मादि सप्तमी यावत् तावत्पृथिवीषु वर्णिताः ॥९८॥
यादृशः कटुकालाबुकाञ्जीरादिसमागमे[7]। रसः कटुरनिष्टश्च तद्गात्रेष्वपि तादृशः ॥९९॥
श्वमार्जारखरोष्ट्रादिकुणपानां [8]समाहृतौ। यद्दौर्गन्ध्यं तदप्येषां देहगन्धस्य नोपमा ॥१००॥
यादृशः करपत्रेषु[9] गोक्षुरेषु[10] च यादृशः। तादृशः कर्कशः स्पर्शः तदङ्गेष्वपि जायते ॥१०१॥

लाख, दस लाख, तीन लाख, पांच कम एक लाख और पांच बिल हैं। ये बिल सदा ही जाज्वल्यमान रहते हैं और बड़े बड़े हैं। इन बिलोंमें पापी नारकी जीव हमेशा कुम्भीपाक (बंद घड़ेमें पकाये जानेवाले जल आदि) के समान पकते रहते हैं ॥९१-९२॥ उन नरकोंमें क्रमसे एक सागर, तीन सागर, सात सागर, दस सागर, सत्रह सागर, बाईस सागर और तेंतीस सागरकी उत्कृष्ट आयु है ॥ ९३ ॥ पहली पृथिवीमें नारकियोंके शरीरकी ऊँचाई सात धनुष तीन हाथ और छह अंगुल है। और द्वितीय आदि पृथिवियोंमें क्रम क्रमसे दूनी दूनी समझना चाहिये। अर्थात् दूसरी पृथिवीमें पन्द्रह धनुष दो हाथ बारह अंगुल, तीसरी पृथिवीमें इकतीस धनुष एक हाथ, चौथी पृथिवीमें बासठ धनुष दो हाथ पांचवीं पृथिवीमें एक सौ पच्चीस धनुष, छठवी पृथिवीमें दो सौ पचास हाथ और सातवीं पृथिवीमें पांच सौ धनुष शरीरकी ऊँचाई है ॥ ९४ ॥ वे नारकी विकलांग, हुण्डक संस्थानवाले, नपुंसक, दुर्गन्धयुक्त, बुरे काले रंगके धारक, कठिन स्पर्शवाले, कठोर स्वर सहित तथा दुर्भग (देखनेमें अप्रिय) होते हैं ॥९५॥ उन नारकियोंका शरीर अन्धकारके समान काले और रूखे परमाणुओंसे बना हुआ होता है। उन सबकी द्रव्यलेश्या अत्यन्त कृष्ण होती है ॥ ९६ ॥ परन्तु भावलेश्यामें अन्तर है जो कि इस प्रकार है—पहली पृथिवीमें जघन्य कापोती भावलेश्या है, दूसरी पृथिवीमें मध्यम कापोती लेश्या है, तीसरी पृथिवीमें उत्कृष्ट कापोती लेश्या और जघन्य नील लेश्या है, चौथी पृथिवीमें मध्यम नील लेश्या है, पांचवींमें उत्कृष्ट नील तथा जघन्य कृष्ण लेश्या है, छठवीं पृथिवीमें मध्यम कृष्ण लेश्या है और सातवीं पृथिवीमें उत्कृष्ट कृष्ण लेश्या है। इस प्रकार घर्मा आदि सात पृथिवियोंमें क्रमसे भावलेश्याका वर्णन किया ॥ ९७-९८ ॥ कड़वी तूंबी और कांजीरके संयोगसे जैसा कड़ुआ और अनिष्ट रस उत्पन्न होता है वैसा ही रस नारकियोंके शरीरमें भी उत्पन्न होता है ॥ ९९ ॥ कुत्ता, बिलाव, गधा, ऊँट आदि जीवोंके मृतक कलेवरोंको इकट्ठा करनेसे जो दुर्गन्ध उत्पन्न होती है वह भी इन नारकियोंके शरीरकी दुर्गन्धकी बराबरी नहीं कर सकती ॥ १०० ॥ करोंत और गोखुरूमें जैसा कठोर स्पर्श होता है वैसा ही कठोर स्पर्श नार-

---

१ पिठरेषु। 'कुम्भी तु पाटला वारी पर्णे पिठरकट्फले' इत्यभिधानात्। कुम्भेष्विव म०, ल०। २ द्विगुणः द्विगुणः। ३ विकलाङ्गाः। ४ षण्डकाः ब०, अ०, प०। ५ अतिकृष्णाभाः। ६ घर्मायां कापोती जघन्या। वंशायां मध्यमा कापोती लेश्या मेघायाम्—उत्तमा कापोती लेश्या जघन्या नीललेश्या च। अञ्जनायां मध्यमा नीललेश्या अरिष्टायाम् उत्कृष्टा नीललेश्या जघन्या कृष्णलेश्या च। मध्यमा कृष्णा माघव्यां मघव्यां सप्तम्यां भूमौ उत्कृष्टा कृष्णलेश्या। ७ संयोगे। ८ संग्रहे। ९ क्रकचेषु। १० गोकण्टकेषु।

अपृथग्विक्रियास्तेषाम् अशुभाद् दुरितोदयात् । ततो[1] विकृतबीभत्सविरूपात्मैव[2] सा मता ॥१०२॥
विशेषोऽस्ति विभङ्गाख्यः तेषां पर्याप्त्यनन्तरम् । तेनान्यजन्मवैराणां स्मरन्त्युद्घट्टयन्ति[3] च ॥१०३॥
यदमी प्राक्तने जन्मन्यासन् पापेषु पण्डिताः । कद्वदाश्च[4] दुराचाराः तद्विपाकोऽयमुल्बणः[5] ॥१०४॥
ईदृग्विधं महादुःखं द्वितीयनरकाश्रितम् । पापेन कर्मणा प्रापत् शतबुद्धिरसौ सुर ॥१०५॥
तस्माद्दुःखमनिच्छूनां नारकं तीव्रमीदृशम् । उपास्योऽयं जिनेन्द्राणां धर्मो मतिमतां नृणाम् ॥१०६॥
धर्मः प्रपाति दुःखेभ्यो धर्मः शर्म तनोत्ययम् । धर्मो नैःश्रेयसं सौख्यं दत्ते कर्मक्षयोद्भवम् ॥१०७॥
धर्मादेव सुरेन्द्रत्वं नरेन्द्रत्वं गणेन्द्रता । धर्मात्तीर्थकरत्वञ्च परमानन्त्यमेव च ॥१०८॥
धर्मो बन्धुश्च मित्रञ्च धर्मोऽयं गुरुरङ्गिनाम् । तस्माद्धर्मे मतिं धत्स्व स्वर्मोक्षसुखदायिनि ॥१०९॥
तदा प्रीतिङ्करस्येति वचः श्रुत्वा जिनेशिनः । श्रीधरो धर्मसंवेगं परं प्रापत् स पुण्यधीः ॥११०॥
[6]गत्वा गुरुनिदेशेन शतबुद्धिमबोधयत् । किं भद्रमुख[7] मां वेत्सि शतबुद्धे महाबलम् ॥१११॥
तदासीत्तव मिथ्यात्वम् उद्रिक्तं[8] दुर्नयाश्रयात् । पश्य तत्परिपाकोऽयम् अस्वन्तस्ते[9] पुरःस्थितः ॥११२॥
इत्यसौ बोधितस्तेन शुद्धं दर्शनमग्रहीत् । मिथ्यात्वकलुषापायात् परां शुद्धिमुपाश्रितः ॥११३॥
कालान्ते नरकाद्भीमात् निर्गत्य शतधीचरः । पुष्करद्वीपपूर्वार्द्धप्राग्विदेहमुपागतः ॥११४॥

कियोंके शरीरमें भी होता है ॥ १०१ ॥ उन नारकियोंके अशुभ कर्मका उदय होनेसे अपृथक विक्रिया ही होती है और वह भी अत्यन्त विकृत, घृणित तथा कुरूप हुआ करती है । भावार्थ—एक नारकी एक समयमें अपने शरीरका एक ही आकार बना सकता है सो वह भी अत्यन्त विकृत, घृणाका स्थान और कुरूप आकार बनाता है, देवोंके समान मनचाहे अनेक रूप बनानेकी सामर्थ्य नारकी जीवोंमें नहीं होती ॥१०२ ॥ पर्याप्तक होते ही उन्हें विभंगावधि ज्ञान प्राप्त हो जाता है जिससे वे पूर्वभवके वैरोंका स्मरण कर लेते हैं और उन्हें प्रकट भी करने लगते हैं ॥ १०३ ॥ जो जीव पूर्वजन्ममें पाप करनेमें बहुत ही पण्डित थे, जो खोटे वचन कहनेमें चतुर थे और दुराचारी थे यह उन्हींके दुष्कर्मोंका फल है ॥ १०४ ॥ हे देव, वह शत-बुद्धि मन्त्रीका जीव अपने पापकर्मके उदयसे ऊपर कहे अनुसार द्वितीय नरक सम्बन्धी बड़े बड़े दुःखोंको प्राप्त हुआ है ॥ १०५ ॥ इसलिये जो जीव ऊपर कहे हुए नरकोंके तीव्र दुःख नहीं चाहते उन बुद्धिमान् पुरुषोंको इस जिनेन्द्रप्रणीत धर्मकी उपासना करनी चाहिये ॥ १०६ ॥ यही जैन धर्म ही दुःखोंसे रक्षा करता है, यही धर्म सुख विस्तृत करता है, और यही धर्म कर्मोंके क्षयसे उत्पन्न होनेवाले मोक्षसुखको देता है ॥ १०७ ॥ इस जैन धर्मसे इन्द्र चक्रवर्ती और गणधरके पद प्राप्त होते हैं । तीर्थंकर पद भी इसी धर्मसे प्राप्त होता है और सर्वोत्कृष्ट सिद्ध पद भी इसीसे मिलता है ॥ १०८ ॥ यह जैन धर्म ही जीवोंका बन्धु है, यही मित्र है और यही गुरु है, इसलिये हे देव, स्वर्ग और मोक्षके सुख देनेवाले इस जैनधर्ममें ही तू अपनी बुद्धि लगा ॥ १०९ ॥ उस समय प्रीतिंकर जिनेन्द्रके ऊपर कहे वचन सुनकर पवित्र बुद्धिका धारक श्रीधरदेव अतिशय धर्मप्रेमको प्राप्त हुआ ॥ ११० ॥ और गुरुके आज्ञानुसार दूसरे नरकमें जाकर शतबुद्धिको समझाने लगा कि हे भोले मूर्ख शतबुद्धि, क्या तू मुझ महाबलको जानता है ? ॥ १११ ॥ उस भवमें अनेक मिथ्यानयोंके आश्रयसे तेरा मिथ्यात्व बहुत ही प्रबल हो रहा था । देख, उसी मिथ्यात्वका यह दुःख देनेवाला फल तेरे सामने है ॥ ११२ ॥ इस प्रकार श्रीधरदेवके द्वारा समझाये हुए शतबुद्धिके जीवने शुद्ध सम्यग्दर्शन धारण किया और मिथ्यात्वरूपी मैलके नष्ट हो जानेसे उत्कृष्ट विशुद्धि प्राप्त की ॥११३॥ तत्पश्चात्

१ ततः कारणात् । २ विरूप दुर्वर्णा । ३ उद्घाट्टयन्ति । ४ दुर्वचनाः । ५ उत्कटः । ६ द्वितीयनरकमेत्य । ७ भद्रश्रेष्ठ । भद्रमुग्ध अ०, प०, स० । ८ उत्कटम् । ९ दुःखावसानः ।

विषये मङ्गलावत्यां नगर्यां रत्नसञ्चये । महीधरस्य सम्राजः सुन्दर्याश्च सुतोऽभवत् ॥११५॥
जयसेनश्रुतिर्बुद्ध्वा विवाहसमये सुरात् । श्रीधराख्यात् प्रवव्राज गुरुं यमधरं श्रितः ॥११६॥
नारकीं वेदनां घोरां तेनासौ किल बोधितः । निर्विद्य विषयासङ्गात् तपो दुश्चरमाचरत् ॥११७॥
ततो ब्रह्मेन्द्रतां सोऽगात् जीवितान्ते समाहितः[1] । क्व नारकः क्व देवोऽयं विचित्रा कर्मणां गतिः ॥११८॥
नीचैर्नृ तिरधर्मेण धर्मेणोच्चैः स्थितिं भजेत् । तस्मादुच्चैः पदं वाञ्छन् नरो धर्मपरो भवेत् ॥११९॥
ब्रह्मलोकादथागत्य ब्रह्मेन्द्रः सोऽवधीक्षणः । श्रीधरं पूजयामास गतं कल्याणमित्रताम् ॥१२०॥
श्रीधरोऽथ दिवश्च्युत्वा जम्बूद्वीपमुपाश्रिते । प्राग्विदेहे महावत्सविषये स्वर्गसन्निभे ॥१२१॥
सुसीमानगरे[2] जज्ञे सुदृष्टिनृपतेः सुतः । मातुः सुन्दरनन्दायाः सुविधिर्नाम पुण्यधीः ॥१२२॥
बाल्यात् प्रभृति सर्वासां कलानां सोऽभवन्निधिः । शशीव जगतस्तन्वन् अन्वहं नयनोत्सवम् ॥१२३॥
स बाल्य[3] एव सद्धर्मम् अबुद्ध प्रतिबुद्धधीः । प्रायेणात्मवतां[4] चित्तम् आत्मश्रेयसि रज्यते ॥१२४॥
शैशवेऽपि स संप्रापत् जनतानन्ददायिनीं । रूपसम्पदमापूर्णयौवनस्तु विशेषतः ॥१२५॥
[5]मकुटालङ्कृतप्रांशु[6]मूर्द्धा[7] प्रोन्नतिमादधे । मेरुः कुलमहीध्राणामिव मध्ये स भूभृताम् ॥१२६॥

वह शतबुद्धिका जीव आयुके अन्तमें भयंकर नरकसे निकलकर पूर्व पुष्कर द्वीपके पूर्व विदेह क्षेत्रमें मंगलावती देशके रत्नसंचय नगरमें महीधर चक्रवर्तीके सुन्दरी नामक रानीसे जयसेन नामका पुत्र हुआ। जब उसका विवाह हो रहा था कि उसी समय श्रीधर-देवने आकर उसे समझाया जिससे विरक्त होकर उसने यमधर मुनिराजके समीप दीक्षा धारण कर ली। श्रीधरदेवने उसे नरकोंके भयंकर दुःखकी याद दिलाई थी जिससे वह विषयोंसे विरक्त होकर कठिन तपश्चरण करने लगा ॥ ११४-११७ ॥ तदनन्तर आयुके अन्त समयमें समाधि-पूर्वक प्राण छोड़कर ब्रह्म स्वर्गमें इन्द्र पदको प्राप्त हुआ। देखो, कहाँ तो नारकी होना और कहाँ इन्द्र पद प्राप्त होना! वास्तवमें, कर्मोंकी गति बड़ी ही विचित्र है ॥ ११८ ॥ यह जीव हिंसा आदि अधर्मकार्योंसे नरकादि नीच गतियोंमें उत्पन्न होता है और अहिंसा आदि धर्म-कार्योंसे स्वर्ग आदि उच्च गतियोंको प्राप्त होता है इसलिये उच्च पदकी इच्छा करनेवाले पुरुषको सदा धर्ममें तत्पर रहना चाहिये ॥ ११९ ॥ अनन्तर अवधिज्ञानरूपी नेत्रसे युक्त उस ब्रह्मेन्द्रने (शतबुद्धि या जयसेनके जीवने) ब्रह्म स्वर्गसे आकर अपने कल्याणकारी मित्र श्रीधरदेवकी पूजा की ॥ १२० ॥

अनन्तर वह श्रीधरदेव स्वर्गसे च्युत होकर जम्बूद्वीप सम्बन्धी पूर्व विदेह क्षेत्रमें स्वर्गके समान शोभायमान होनेवाले महावत्स देशके सुसीमानगरमें सुदृष्टि राजाकी सुन्दरनन्दा नामकी रानीसे पवित्रबुद्धिका धारक सुविधि नामका पुत्र उत्पन्न हुआ ॥ १२१-१२२ ॥ वह सुविधि बाल्यावस्थासे ही चन्द्रमाके समान समस्त कलाओंका भाण्डार था और प्रतिदिन लोगोंके नेत्रोंका आनन्द बढ़ाता रहता था ॥ १२३ ॥ उस बुद्धिमान् सुविधिने बाल्य अवस्थामें ही समीचीन धर्मका स्वरूप समझ लिया था। सो ठीक ही है, आत्मज्ञानी पुरुषोंका चित्त आत्म-कल्याणमें ही अनुरक्त रहता है ॥ १२४ ॥ वह बाल्य अवस्थामें ही लोगोंको आनन्द देनेवाली रूपसम्पदाको प्राप्त था और पूर्ण युवा होनेपर विशेष रूपसे मनोहर सम्पदाको प्राप्त हो गया था ॥१२५॥ उस सुविधिका ऊँचा मस्तक सदा मुकुटसे अलंकृत रहता था इसलिये अन्य राजाओंके बीचमें वह सुविधि उस प्रकार उन्नतता धारण करता था जिस प्रकार कि कुलाचलोंके

१ समाधानयुक्तः। २ सीतानद्युत्तरतटवर्तिनि। ३ यौवने। ४ बुद्धिमताम्। ५ मुकुटा- अ०, प०। ६ उन्नतः। ७ -मूर्ध्ना द०, म०, स०, ल०।

कुण्डलोद्भासि तस्याभात् मुखमुद्भ्रूविलोचनम् । सचन्द्रार्क्कं सतारं च सेन्द्रचापमिवाम्बरम् ॥१२७॥
मुखं सुरभिनिश्वासं कान्ताधरमभाद् विभोः । महोत्पलमिवोद्भिन्नदलं सुरभिगन्धि च ॥१२८॥
नासिका घ्रातुमस्येव[1] गन्धमायतिमादधे । अवाङ्मुखी[2] विरेकाभ्याम्[3] आपिबन्तीव तद्रसम् ॥१२९॥
[4]कन्धरस्तन्मुखाब्जस्य नाललीलां दधे पराम् । मृणालवलयेनेव हारेण परिराजितः[5] ॥१३०॥
महोरःस्थलमस्याभात् महारत्नांशुपेशलम्[6] । ज्वलद्दीपमिवाम्भोज[7]वासिन्या वासगेहकम् ॥१३१॥
अंसावभ्युन्नतौ तस्य दिग्गजस्येव सद्वृतेः । कुम्भाविव रराजाते सुवंशस्य महोन्नतेः ॥१३२॥
[8]व्यायामशालिनावस्य रेजतुर्भूभुजो भुजौ । भूलोकापायरक्षार्थं क्लृप्तौ वज्राविवार्गलौ ॥१३३॥
नखताराभिरुद्भूतचन्द्रार्कस्फुटलक्षणम् । चारुहस्ततलं तस्य नभस्थलमिवाबभौ ॥१३४॥
मध्यमस्य जगन्मध्यविभ्रमं[9] बिभ्रद्युतत् । छतता[10]नवमूर्ध्वाधोविस्तीर्णपरिमण्डलम्[11] ॥१३५॥

बीचमें चूलिका सहित मेरु पर्वत उच्चता धारण करता है ॥ १२६ ॥ उसका मुख सूर्य चन्द्रमा तारे और इन्द्रधनुषसे सुशोभित आकाशके समान शोभायमान हो रहा था। क्योंकि वह दो कुण्डलोंसे शोभायमान था जो कि सूर्य और चन्द्रमाके समान जान पड़ते थे तथा कुछ ऊँची उठी हुई भौंहों सहित चमकते हुए नेत्रोंसे युक्त था इसलिये इन्द्रधनुष और ताराओंसे युक्त हुआसा जान पड़ता था ॥ १२७ ॥ अथवा उसका मुख एक फूले हुए कमलके समान शोभायमान हो रहा था क्योंकि फूले हुए कमलमें जिस प्रकार उसकी कलिकाएँ विकसित होती हैं उसी प्रकार उसके मुखमें मनोहर ओंठ शोभायमान थे और फूला हुआ कमल जिस प्रकार मनोज्ञ गन्धसे युक्त होता है उसी प्रकार उसका मुख भी श्वासोच्छ्वासकी मनोज्ञ गन्धसे युक्त था ॥ १२८ ॥ उसकी नाक स्वभावसे ही लम्बी थी, इसीलिये ऐसी जान पड़ती थी मानो उसने मुख-कमलकी सुगन्ध सूँघनेके लिये ही लम्बाई धारण की हो। और उसमें जो दो छिद्र थे उनसे ऐसी मालूम होती थी मानो नीचेकी ओर मुँह करके उन छिद्रों द्वारा उसका रसपान ही कर रही हो ॥ १२९ ॥ उसका गला मृणालवलयके समान श्वेत हारसे शोभायमान था इसलिये ऐसा जान पड़ता था मानो मुखरूपी कमलकी उत्तम नालको ही धारण कर रहा हो ॥ १३० ॥ बड़े बड़े रत्नोंकी किरणोंसे मनोहर उसका विशाल वक्षःस्थल ऐसा शोभायमान होता था मानो कमलवासिनी लक्ष्मीका जलते हुए दीपकोंसे शोभायमान निवासगृह ही हो ॥ १३१ ॥ वह सुविधि स्वयं दिग्गजके समान शोभायमान था और उसके ऊँचे उठे हुए दोनों कन्धे दिग्गजके कुम्भस्थलके समान शोभायमान हो रहे थे। क्योंकि जिस प्रकार दिग्गज सद्वृति अर्थात् समीचीन चालका धारक होता है उसी प्रकार वह सुविधि भी सद्वृति अर्थात् समीचीन आचरणोंका धारक अथवा सत्पुरुषोंका आश्रय था। दिग्गज जिस प्रकार सुवंश अर्थात् पीठकी रीढ़से सहित होता है इसी प्रकार वह सुविधि भी सुवंश अर्थात् उच्च कुलवाला था और दिग्गज जिस प्रकार महोन्नत अर्थात् अत्यन्त ऊँचा होता है उसी प्रकार वह सुविधि भी महोन्नत अर्थात् अत्यन्त उत्कृष्ट था ॥ १३२ ॥ उस राजाकी अत्यन्त लम्बी दोनों भुजाएँ ऐसी सुशोभित हो रही थीं मानो उपद्रवोंसे लोककी रक्षा करनेके लिये वज्रके बने हुए दो अर्गलदण्ड ही हों ॥ १३३ ॥ उसकी दोनों सुन्दर हथेलियाँ नखरूपी ताराओंसे शोभायमान थीं और सूर्य तथा चन्द्रमाके चिह्नोंसे सहित थीं इसलिये तारे और सूर्य-चन्द्रमासे सहित आकाशके समान शोभायमान हो रही थीं ॥ १३४ ॥ उसका मध्य भाग लोकके मध्य भागकी शोभाको धारण करता हुआ अत्यन्त शोभायमान था, क्योंकि लोकका मध्य भाग

१ –मस्येवं म०, ल०। २ अधोमुखी। ३ रन्ध्राभ्याम्। ४ कण्ठः। ५ परिरञ्जितः म०। ६ मनोज्ञम्। ७ लक्ष्म्या। ८ दैर्घ्य। ९ शोभा। १० कृशत्वम्। ११ परिधिः।

जघनाभोगमामुक्त[1]कटिसूत्रमसौ दधे । मेरुर्नितम्बमालम्बिसेन्द्रचापाम्बुदं यथा ॥१३६॥
सोऽधात् कनकराजीवकिञ्जल्कपरिपिञ्जरौ । ऊरू जगद्गृहोद्ग्रतोरणस्तम्भसन्निभौ ॥१३७॥
जङ्घाद्वयञ्च सुश्लिष्टं[2] नृणां चित्तस्य रञ्जकम् । सालङ्कारं व्यजेष्टास्य सुकवेः काव्यबन्धनम् ॥१३८॥
तत्क्रमाब्जं मृदुस्पर्शं लक्ष्मीसंवाहनोचितम्[3] । [4]शोणिमानं दधे लग्नमिव तत्करपल्लवात् ॥१३९॥
इत्याविष्कृतरूपेण हारिणा चारुलक्ष्मणा । मनांसि जगतां जह्रे स बालाद् बालकोऽपि सन् ॥१४०॥
स तथा[5] यौवनारम्भे मदनोत्कोच[6]कारिणी । वशी युवजरन्नासीत् [7]अरिषड्वर्गनिग्रहात् ॥१४१॥
सोऽनुमेने यथाकालं सत्कलत्रपरिग्रहम् । उपरोधाद् गुरोः प्राप्तराज्यलक्ष्मीपरिच्छदः ॥१४२॥
चक्रिणोऽभयघोषस्य [8]स्वस्रीयोऽयं [9]यतो युवा । ततश्चक्रिसुतानेन परिणिन्ये मनोरमा ॥१४३॥
तयानुकूलया सत्या[10] स रेमे सुचिरं नृपः । सुशीलमनुकूलञ्च कलत्रं रमयेन्नरम् ॥१४४॥
तयोरत्यन्तसंप्रीत्या काले गच्छत्यनन्तरम् । स्वयं प्रभो दिवश्च्युत्वा केशवाख्यः सुतोऽजनि ॥१४५॥

जिस प्रकार कुश है उसी प्रकार उसका मध्य भाग भी कृश था और जिस प्रकार लोकके मध्य भागसे ऊपर और नीचेका हिस्सा विस्तीर्ण होता है उसी प्रकार उसके मध्य भागसे ऊपर नीचेका हिस्सा भी विस्तीर्ण था ॥ १३५ ॥ जिस प्रकार मेरु पर्वत इन्द्रधनुष सहित मेघोंसे घिरे हुए नितम्ब भाग (मध्य भागको) धारण करता है उसी प्रकार वह सुविधि भी सुवर्णमय करधनी-को धारण किये हुए नितम्ब भाग (जघन भाग) को धारण करता था ॥ १३६ ॥ वह सुविधि, सुवर्ण कमलकी केशरके समान पीली जिन दो ऊरुओंको धारण कर रहा था वे ऐसी मालूम होती थीं मानो जगत्रूपी घरके दो तोरण-स्तम्भ (तोरण बाँधनेके खम्भे) ही हों ॥ १३७ ॥ उसकी दोनों जंघाएँ सुश्लिष्ट थीं अर्थात् संगठित होनेके कारण परस्परमें सटी हुई थीं, मनुष्योंके चित्तको प्रसन्न करनेवाली थीं और उनके अलंकारों (आभूषणोंसे) सहित थीं इसलिए किसी उत्तम कविकी सुश्लिष्ट अर्थात् श्लेषगुणसे सहित मनुष्योंके चित्तको प्रसन्न करनेवाली और उपमा रूपक आदि अलंकारोंसे युक्त काव्य-रचनाको भी जीतती थीं ॥ १३८ ॥ अत्यन्त कोमल स्पर्शके धारक और लक्ष्मीके द्वारा सेवा करने योग्य (दाबनेके योग्य) उसके दोनों चरण-कमल जिस स्वाभाविक लालिमाको धारण कर रहे थे वह ऐसी मालूम होती थी मानो सेवा करते समय लक्ष्मीके कर-पल्लवसे छूटकर ही लग गई हो ॥ १३९ ॥ इस प्रकार वह सुविधि बालक होनेपर भी अनेक सामुद्रिक चिह्नोंसे युक्त प्रकट हुए अपने मनोहर रूपके द्वारा संसारके समस्त जीवोंके मनको जबरदस्ती हरण करता था ॥ १४० ॥ उस जितेन्द्रिय राजकुमारने कामका उद्रेक करनेवाले यौवनके प्रारम्भ समयमें ही काम, क्रोध, लोभ, मोह, मद और मात्सर्य इन छः अन्तरङ्ग शत्रुओंका निग्रह कर दिया था इसलिए वह तरुण होकर भी वृद्धोंके समान जान पड़ता था ॥१४१ ॥ उसने यथायोग्य समयपर गुरुजनोंके आग्रहसे उत्तम स्त्रीके साथ पाणिग्रहण करानेकी अनुमति दी थी और छत्र चमर आदि राज्य-लक्ष्मीके चिह्न भी धारण किये थे, राज्य-पद स्वीकृत किया था ॥ १४२ ॥ तरुण अवस्थाको धारण करनेवाला वह सुविधि अभयघोष चक्रवर्तीका भानजा था इसलिए उसने उन्हीं चक्रवर्तीकी पुत्री मनोरमाके साथ विवाह किया था ॥ १४३ ॥ सदा अनुकूल सती मनोरमाके साथ वह राजा चिरकाल तक क्रीड़ा करता रहा सो ठीक है । सुशील और अनुकूल स्त्री ही पतिको प्रसन्न कर सकती है ॥ १४४ ॥ इस प्रकार प्रीतिपूर्वक क्रीड़ा करते हुए उन दोनोंका समय बीत रहा था कि स्वयंप्रभ नामका देव (श्रीमती-

---

१ पिनद्धकटिसूत्रम् । २ सुसम्बद्धम् । ३ सम्मर्दन । ४ शोणत्वम् । ५ यथा प० । ६ उद्रेक । ७ 'अयुक्तितः प्रणीताः कामक्रोधलोभमानमदहर्षाः' इत्यरिषड्वर्गः । ८ स्वसुः पुत्रः भागिनेय इत्यर्थः । ९ यतः कारणात् । १० पतिव्रतया ।

वज्रजङ्घभवे यासौ श्रीमती तस्य वल्लभा । [1]सैवास्य पुत्रतां याता संसृतिस्थितिरीदृशी ॥१४६॥
तस्मिन् पुत्रे नृपस्यास्य प्रीतिरासीद् गरीयसी । पुत्रमात्रञ्च संप्रीत्यै किमु [2]तेष्टाङ्गनाचरः ॥१४७॥
शार्दूलार्यचराद्याश्च देशेऽत्रैव नृपात्मजाः । जाताः समानपुण्यत्वात् अन्योऽन्यसदृशर्द्धयः ॥१४८॥
विभीषणनृपात् पुत्रः प्रियदत्तोदरेऽजनि । देवश्चित्राङ्गद[3]श्च्युत्वा वरदत्ताह्वयो दिवः ॥१४९॥
नन्दिषेणनृपानन्तमत्योः सूनुरजायत । मणिकुण्डलनामासौ[4] वरसेनसमाह्वयः ॥१५०॥
[5]रतिषेणमहीभर्तु[6]: चन्द्रमत्यां सुतोऽजनि । मनोहरो[6] दिवश्च्युत्वा चित्राङ्गदसमाख्यया ॥१५१॥
प्रभञ्जननृपाच्चित्रमालिन्यां स मनोरथः । प्रशान्तमदनः सूनुः अजनिष्ट दिवश्च्युतः ॥१५२॥
ते सर्वे सदृशाकाररूपलावण्यसम्पदः । स्वोचितां श्रियमासाद्य चिरं भोगानभुञ्जत ॥१५३॥
ततोऽमी चक्रिणान्येद्युः अभिवन्द्य समं जिनम् । भक्त्या विमलवाहाख्यं महाप्राव्राज्यमाश्रिताः ॥१५४॥
नृपैरष्टादशाभ्यस्त[7]सहस्रप्रमितैरमा[8] । सहस्रैः पञ्चभिः पुत्रैः प्राव्राजीच्चक्रवर्त्यसौ ॥१५५॥
परं संवेगनिर्वेदपरिणाममुपागतः । ते तेपिरे तपस्तीव्रं [9]मार्गः स्वर्गापवर्गयोः ॥१५६॥
संवेगः परमा प्रीतिः धर्मे धर्मफलेषु च । निर्वेदो देहभोगेषु संसारे च विरक्तता ॥१५७॥

का जीव) स्वर्गसे च्युत होकर उन दोनोंके केशव नामका पुत्र हुआ ॥ १४५ ॥ वज्रजंघ पर्यायमें जो इसकी श्रीमती नामकी प्यारी स्त्री थी वही इस भवमें इसका पुत्र हुई है। क्या कहा जाय ? संसारकी स्थिति ही ऐसी है ॥ १४६ ॥ उस पुत्रपर सुविधि राजाका भारी प्रेम था सो ठीक ही है। जब कि पुत्र मात्र ही प्रीतिके लिए होता है तब यदि पूर्वभवका प्रेमपात्र स्त्रीका जीव ही आकर पुत्र उत्पन्न हुआ हो तो फिर कहना ही क्या है ? उस पर तो सबसे अधिक प्रेम होता ही है ॥ १४७ ॥ सिंह, नकुल, वानर और शूकरके जीव जो कि भोगभूमिके बाद द्वितीय स्वर्गमें देव हुए थे वे भी वहांसे चय कर इसी वत्सकावती देशमें सुविधिके समान पुण्याधिकारी होनेसे उसीके समान विभूतिके धारक राजपुत्र हुए ॥ १४८ ॥ सिंहका जीव-चित्रांगद देव स्वर्गसे च्युत होकर विभीषण राजासे उसकी प्रियदत्ता नामकी पत्नीके उदरमें वरदत्त नामका पुत्र हुआ ॥ १४९ ॥ शूकरका जीव—मणिकुण्डल नामका देव नन्दिषेण राजा और अनन्तमती रानीके वरसेन नामका पुत्र हुआ ॥ १५० ॥ वानरका जीव—मनोहर नामका देव स्वर्गसे च्युत होकर रतिषेण राजाकी चन्द्रमती रानीके चित्रांगद नामका पुत्र हुआ ॥१५१॥ और नकुलका जीव-मनोरथ नामका देव स्वर्गसे च्युत होकर प्रभंजन राजाकी चित्रमालिनी रानीके प्रशान्तमदन नामका पुत्र हुआ ॥ १५२ ॥ समान आकार, समान रूप, समान सौन्दर्य और समान सम्पत्तिके धारण करनेवाले वे सभी राजपुत्र अपने अपने योग्य राज्यलक्ष्मी पाकर चिरकाल तक भोगोंका अनुभव करते रहे ॥ १५३ ॥

तदनन्तर किसी दिन वे चारों ही राजा, चक्रवर्ती अभयघोषके साथ विमलवाह जिनेन्द्र देवकी वन्दना करनेके लिए गये। वहाँ सबने भक्तिपूर्वक वन्दना की और फिर सभीने विरक्त होकर दीक्षा धारण कर ली ॥ १५४ ॥ वह चक्रवर्ती अठारह हजार राजाओं और पाँच हजार पुत्रोंके साथ दीक्षित हुआ था ॥ १५५ ॥ वे सब मुनीश्वर उत्कृष्ट संवेग और निर्वेदरूप परिणामोंको प्राप्त होकर स्वर्ग और मोक्षके मार्गभूत कठिन तप तपने लगे ॥ १५६ ॥ धर्म और धर्मके फलोंमें उत्कृष्ट प्रीति करना संवेग कहलाता है और शरीर, भोग तथा संसारसे विरक्त

---

१ सैवाद्य प०, द०, स०, अ० । २ किमु तेष्वङ्गना– ल० । ३ व्याघ्रचरः । ४ वराहचरः । ५ रविषेण– अ०, प०, स० । ६ मर्कटचरः । ७ अभ्यस्तं गुणितम् । ८ –रमी प०, ल० । ९ मार्गे द०, स०, म०, ल० ।

नृपस्तु सुविधिः पुत्रस्नेहाद् गार्हस्थ्यमत्यजन् । उत्कृष्टोपासकस्थाने तपस्तेपे सुदुश्चरम् ॥१५८॥
सद्दर्शनं व्रतोद्योतं [1]समतां प्रोषधव्रतम् । सचित्तसेवाविरतिं[2] महःस्त्रीसङ्गवर्ज्जनम् ॥१५९॥
ब्रह्मचर्य्यमथारम्भपरिग्रहपरिच्युतिम् । तत्रानुमननत्यागं स्वोद्दिष्टपरिवर्जनम् ॥१६०॥
स्थानानि गृहिणां प्राहुः एकादशगणाधिपाः[3] । स तेषु पश्चिमं स्थानम् आससाद क्रमान्नृपः ॥१६१॥
पञ्चैवाणुव्रतान्येषां त्रिविधञ्च गुणव्रतम् । शिक्षाव्रतानि चत्वारि व्रतान्याहुर्गृहाश्रमे ॥१६२॥
स्थूलात् प्राणातिपाताच्च मृषावादाच्च चौर्यतः । परस्त्रीसेवनात्तृष्णाप्रकर्षाच्च निवृत्तयः॥१६३॥
व्रतान्येतानि पञ्च स्युः भावनासंस्कृतानि वै । सम्यक्त्वशुद्धियुक्तानि [4]महोदर्काण्यगारिणाम् ॥१६४॥
दिग्देशानर्थदण्डेभ्यो विरतिः स्यादणुव्रतम् । [5]भोगोपभोगसंख्यानमप्याहुस्तद्गुणव्रतम् ॥१६५॥
[6]समतां प्रोषधविधिं तथैवातिथिसंग्रहम् । मरणान्ते च संन्यासं प्राहुः शिक्षाव्रतान्यपि ॥१६६॥
द्वादशात्मकमेतद्धि व्रतं स्याद् गृहमेधिनाम् । स्वर्गसौधस्य सोपानं पिधानमपि दुर्गतेः ॥१६७॥
ततो दर्शनसंपूतां व्रतशुद्धिमुपेयिवान् । उपासिष्ट[7] स मोक्षस्य मार्गं राजर्षिरूर्जितम् ॥१६८॥
अथावसाने नैर्ग्रन्थीं प्रव्रज्यामुपसेदिवान् । सुविधिर्विधिनाराध्य[8] मुक्तिमार्गमनुत्तरम् ॥१६९॥
समाधिना तनुत्यागात् अच्युतेन्द्रोऽभवद् विभुः । द्वाविंशत्यब्धिसंख्यात[9]परमायुर्महर्द्धिकः ॥१७०॥

होनेको निर्वेद कहते हैं ॥ १५७ ॥ राजा सुविधि केशव पुत्रके स्नेहसे गृहस्थ अवस्थाका परित्याग नहीं कर सका था, इसलिए श्रावकके उत्कृष्ट पदमें स्थित रहकर कठिन तप तपता था ॥ १५८ ॥ जिनेन्द्रदेवने गृहस्थोंके नीचे लिखे अनुसार ग्यारह स्थान या प्रतिमाएँ कहीं हैं (१) दर्शनप्रतिमा (२) व्रत प्रतिमा (३) सामायिक प्रतिमा (४) प्रोषध प्रतिमा (५) सचित्तत्याग प्रतिमा (६) दिवामैथुनत्याग प्रतिमा (७) ब्रह्मचर्य प्रतिमा (८) आरम्भत्याग प्रतिमा (९) परिग्रह-त्याग प्रतिमा (१०) अनुमतित्याग प्रतिमा और (११) उद्दिष्टत्याग प्रतिमा। इनमेंसे सुविधि राजाने क्रम क्रमसे ग्यारहवाँ स्थान–उद्दिष्टत्याग प्रतिमा धारण की थी ॥ १५९-१६१ ॥ जिनेन्द्र-देवने गृहस्थाश्रमके उक्त ग्यारह स्थानोंमें पाँच अणुव्रत, तीन गुण व्रत और चार शिक्षाव्रत इन बारह व्रतोंका निरूपण किया है ॥ १६२ ॥ स्थूल हिंसा, झूठ, चोरी, कुशील और परिग्रहसे निवृत्त होनेको क्रमसे अहिंसाणुव्रत,, सत्याणुव्रत, अचौर्याणुव्रत ब्रह्मचर्याणुव्रत और परिग्रह परिमाणाणुव्रत कहते हैं ॥ १६३ ॥ यदि इन पाँच अणुव्रतोंको हरएक व्रतकी पाँच पाँच भावनाओंसे सुसंस्कृत और सम्यग्दर्शनकी विशुद्धिसे युक्त कर धारण किया जावे तो उनसे गृहस्थोंको बड़े बड़े फलोंकी प्राप्ति हो सकती है ॥ १६४ ॥ दिग्विरति, देशविरति और अनर्थ-दण्डविरति ये तीन गुणव्रत हैं। कोई कोई आचार्य भोगोपभोग परिमाण व्रतको भी गुणव्रत कहते हैं [और देशव्रतको शिक्षाव्रतोंमें शामिल करते हैं] ॥ १६५ ॥ सामायिक, प्रोषधोपवास, अतिथिसंविभाग और मरण समयमें संन्यास धारण करना ये चार शिक्षाव्रत कहलाते हैं। [अनेक आचार्योंने देशव्रतको शिक्षाव्रतमें शामिल किया है और संन्यासका बारह व्रतोंसे भिन्न वर्णन किया है] ॥ १६६ ॥ गृहस्थोंके ये उपर्युक्त बारह व्रत स्वर्गरूपी राजमहलपर चढ़नेके लिए सीढ़ीके समान हैं और नरकादि दुर्गतियोंका आवरण करनेवाले हैं ॥ १६७ ॥ इस प्रकार सम्य-ग्दर्शनसे पवित्र व्रतोंकी शुद्धताको प्राप्त हुए राजर्षि सुविधि चिरकाल तक श्रेष्ठ मोक्षमार्गकी उपासना करते रहे ॥ १६८ ॥ अनन्तर जीवनके अन्त समयमें परिग्रहरहित दिगम्बर दीक्षाको प्राप्त हुए सुविधि महाराजने विधिपूर्वक उत्कृष्ट मोक्षमार्गकी आराधना कर समाधि-मरणपूर्वक शरीर छोड़ा जिससे अच्युत स्वर्गमें इन्द्र हुए ॥ १६९ ॥ वहाँ उनकी आयु बीस सागर प्रमाण थी

१ सामायिकम्। २ –महि स्त्री– अ०, द०, स०, म० । –महि स्त्रीसङ्गवर्जितम् प० । ३ जिनाधिपः म०, ल० । ४ महोत्तरफलानि । ५ भोगोपभोगपरिमाणम् । ६ सामायिकम् । ७ आराधयति स्म । ८ –विधिमाराध्य प० । ९ –संख्यान– अ०, स० ।

केशवश्च परित्यक्तकृत्स्नबाह्येतरोपधिः । नैःसङ्गीमाश्रितो दीक्षां प्रतीन्द्रोऽभवदच्युते ॥१७१॥
पूर्वोक्ता नृपपुत्राश्च वरदत्तादयः क्रमात् । समजायन्त पुण्यैः स्वैः तत्र सामानिकाः सुराः ॥१७२॥
तत्राष्टगुणमैश्वर्यं दिव्यं भोगं च निर्विशन् । स रेमे सुचिरं कालम् अच्युतेन्द्रोऽच्युतस्थितिः ॥१७३॥
दिव्यानु[1]भावमस्यासीद् वपुरव्याजसुन्दरम् । विषशस्त्रादिबाधाभिः अस्पृष्टमतिनिर्मलम् ॥१७४॥
सन्तानकुसुमोत्तंसम् असौ धत्ते स्म मौलिना । तपः फलमतिस्फीतं मूर्ध्नेवोद्धृत्य दर्शयन् ॥१७५॥
सहजैर्भूषणैरस्य रुरुचे रुचिरं वपुः । दयावल्लीफलैरुद्धैः[2] प्रत्यङ्गमिव सङ्गतैः ॥१७६॥
समं सुप्रविभक्ताङ्गः स रेजे दिव्यलक्षणैः । सुरद्रुम इवाकीर्णः पुष्पैरुच्चावचात्मभिः[3] ॥१७७॥
शिरः सकुन्तलं तस्य रेजे सोष्णीषपट्टकम् । सतमालमिवाद्रीन्द्रकूटं व्योमापगाश्रितम् ॥१७८॥
मुखमस्य लसन्नेत्रभृङ्गसङ्गतमाबभौ । स्मितांशुभिर्जलाक्रान्तं प्रबुद्धमिव पङ्कजम् ॥१७९॥
वक्षःस्थले पृथौ रम्ये हारं सोऽधत्त निर्मलम् । शरदम्भोदसङ्घातमिव मेरो[4]स्तटाश्रितम् ॥१८०
लसदंशुकसंवीतं[5] जघनं तस्य निर्बभौ । तरङ्गाक्रान्तमम्भोधेरिव सैकतमण्डलम् ॥१८१॥
सुवर्णकदलीस्तम्भविभ्रमं रुचिमानशे । तस्योरुद्वितयं चारु सुरनारीमनोहरम् ॥१८२॥

और उन्हें अनेक ऋद्धियाँ प्राप्त हुई थीं ॥ १७० ॥ श्रीमतीके जीव केशवने भी समस्त बाह्य और आभ्यन्तर परिग्रहका त्याग कर निर्ग्रन्थ दीक्षा धारण की और आयुके अन्तमें अच्युत स्वर्गमें प्रतीन्द्र पद प्राप्त किया ॥ १७१ ॥ जिनका वर्णन ऊपर किया जा चुका है ऐसे वरदत्त आदि राजपुत्र भी अपने अपने पुण्यके उदयसे उसी अच्युत स्वर्गमें सामानिक जातिके देव हुए ॥ १७२ ॥ पूर्ण आयुको धारण करनेवाला वह अच्युत स्वर्गका इन्द्र अणिमा महिमा आदि आठ गुण, ऐश्वर्य और दिव्य भोगोंका अनुभव करता हुआ चिरकाल तक क्रीड़ा करता था ॥ १७३ ॥ उसका शरीर दिव्य प्रभावसे सहित था, स्वभावसे ही सुन्दर था, विष शस्त्र आदिकी बाधासे रहित था और अत्यन्त निर्मल था ॥ १७४ ॥ वह अपने मस्तकपर कल्पवृक्षके पुष्पोंका मुकुट धारण करता था जिससे ऐसा मालूम होता था मानो पूर्व भवमें किये हुए तपश्चरणके विशाल फलको मस्तकपर उठाकर सबको दिखा ही रहा हो ॥ १७५ ॥ उसका सुन्दर शरीर साथ साथ उत्पन्न हुए आभूषणोंसे ऐसा मालूम होता था मानो उसके प्रत्येक अंगपर दयारूपी लताके प्रशंसनीय फल ही लग रहे हैं ॥ १७६ ॥ समचतुरस्र संस्थानका धारक वह इन्द्र अपने अनेक दिव्य लक्षणोंसे ऐसा सुशोभित होता था जैसा कि ऊँचे-नीचे सभी प्रदेशोंमें स्थित फूलोंसे व्याप्त हुआ कल्पवृक्ष सुशोभित होता है ॥ १७७ ॥ काले काले केश और श्वेतवर्णकी पगड़ीसे सहित उसका मस्तक ऐसा जान पड़ता था मानो तापिच्छ पुष्पसे सहित और आकाशगंगाके पूरसे युक्त हिमालयका शिखर ही हो ॥ १७८ ॥ उस इन्द्रका मुखकमल फूले हुए कमलके समान शोभायमान था, क्योंकि जिस प्रकार कमलपर भौंरे होते हैं उसी प्रकार उसके मुखपर शोभायमान नेत्र थे और कमल जिस प्रकार जलसे आक्रांत होता है उसी प्रकार उसका मुख भी मुसकानकी सफेद सफेद किरणोंसे आक्रान्त था ॥ १७९ ॥ वह अपने मनोहर और विशाल वक्षस्थलपर जिस निर्मल हारको धारण कर रहा था वह ऐसा मालूम होता था मानो मेरु पर्वतके तटपर अवलम्बित शरद् ऋतुके बादलोंका समूह ही हो॥१८०॥ शोभायमान वस्त्रसे ढँका हुआ उसका नितम्बमण्डल ऐसा शोभायमान हो रहा था मानो लहरोंसे ढँका हुआ समुद्रका बालूदार टीला ही हो ॥ १८१ ॥ देवाङ्गनाओंके मनको हरण करनेवाले उसके दोनों सुन्दर ऊरु सुवर्ण कदलीके स्तम्भोंका सन्देह करते हुए अत्यन्त शोभायमान हो रहे थे ॥ १८२ ॥

१ दिव्यप्रभावम् । २ प्रशस्तैः । ३ अनेकभेदात्मभिः । ४—तटश्रितम् म०, ल० । ५ वेष्टितम् ।

तस्य पादद्वये लक्ष्मीः [1]काप्यभूदब्जशोभिनि । नखांशुस्वच्छसलिले सरसीव झषाङ्किते[2] ॥१८३॥
इत्युदारतरं बिभ्रद्दिव्यं वैक्रियिकं वपुः । स तत्र बुभुजे भोगान् अच्युतेन्द्रः स्वकल्पजान् ॥१८४॥
इतो रज्जूः षडुत्पत्य कल्पोऽस्त्यच्युतसंज्ञकः । सोऽस्य भुक्तिरभूत् पुण्यात् पुण्यैः किन्नु न लभ्यते ॥१८५॥
तस्य भुक्तौ[3] विमानानां परिसंख्या मता जिनैः । शतमेकमथैकान्न[4]षष्टिश्च परमागमे ॥१८६॥
[5]त्रयोविंशं शतं तेषु विमानेषु प्रकीर्णकाः । श्रेणीबद्धास्ततोऽन्ये स्युः अतिरुन्द्राः सहेन्द्रकाः ॥१८७॥
त्रयस्त्रिंशदथास्य स्युः त्रायस्त्रिंशाः सुरोत्तमाः । ते च पुत्रीयितास्तेन स्नेहनिर्भरया धिया ॥१८८॥
[6]अयुतप्रमिताश्चास्य सामानिकसुरा मताः । ते ह्यस्य सदृशाः सर्वैः भोगैराज्ञा तु भिद्यते ॥१८९॥
आत्मरक्षाश्च तस्योक्ताः [7]चत्वार्येवायुतानि वै । तेऽप्यङ्गरक्षकैस्तुल्या विभावायैव वर्णिताः ॥१९०॥
अन्तःपरिषदस्याद्या[8] सपादं[9] शतमिष्यते । मध्यमार्द्ध[10]तृतीयं स्याद् बाह्या तद्‌द्विगुणा मता ॥१९१॥
चत्वारो लोकपालाश्च तल्लोकान्तप्रपालकाः । प्रत्येकं च तथैतेषां देव्यो द्वात्रिंशदेव हि ॥१९२॥
अष्टावस्य महादेव्यो रूपसौन्दर्यसंपदा । तन्मनोलोहमाक्रष्टुं क्लृप्तायस्कान्तपुत्रिकाः ॥१९३॥
अन्या वल्लभिकास्तस्य त्रिषष्टिः परिकीर्तिताः । एकशोऽग्रमहिष्यर्द्धं तृतीयत्रिशतैर्वृता ॥१९४॥

उस इन्द्रके दोनों चरण किसी तालाबके समान मालूम पड़ते थे क्योंकि तालाब जिस प्रकार जलसे सुशोभित होता है उसी प्रकार उसके चरण भी नखोंकी किरणोंरूपी निर्मल जलसे सुशोभित थे, तालाब जिस प्रकार कमलोंसे शोभायमान होता है उसी प्रकार उसके चरण भी कमलके चिह्नोंसे सहित थे और तालाब जिस प्रकार मच्छ वगैरहसे सहित होता है उसी प्रकार उसके चरण भी मत्स्यरेखा आदिसे युक्त थे। इस प्रकार उसके चरणोंमें कोई अपूर्व ही शोभा थी॥ १८३ ॥ इस तरह अत्यन्त श्रेष्ठ और सुन्दर वैक्रियिक शरीरको धारण करता हुआ वह अच्युतेन्द्र अपने स्वर्गमें उत्पन्न हुए भोगोंका अनुभव करता था॥ १८४ ॥ वह अच्युत स्वर्ग इस मध्यलोकसे छह राजु ऊपर चल कर है तथापि पुण्यके उदयसे वह सुविधि राजाके भोगोपभोगका स्थान हुआ सो ठीक ही है। पुण्यके उदयसे क्या नहीं प्राप्त होता ? ॥१८५॥ उस इन्द्रके उपभोगमें आनेवाले विमानोंकी संख्या सर्वज्ञ प्रणीत आगममें जिनेन्द्रदेवने एक सौ उनसठ कही है ॥ १८६ ॥ उन एक सौ उनसठ विमानोंमें एक सौ तेईस विमान प्रकीर्णक हैं, एक इन्द्रक विमान है और बाकीके पैंतीस बड़े बड़े श्रेणीबद्ध विमान हैं॥ १८७ ॥ उस इन्द्रके तैंतीस त्रायस्त्रिंश जातिके उत्तम देव थे। वह उन्हें अपनी स्नेह भरी बुद्धिसे पुत्रके समान समझता था॥१८८॥ उसके दश हजार सामानिक देव थे। वे सब देव भोगोपभोगकी सामग्रीसे इन्द्रके ही समान थे परन्तु इन्द्रके समान उनकी आज्ञा नहीं चलती ॥ १८९ ॥ उसके अंगरक्षकोंके समान चालीस हजार आत्मरक्षक देव थे। यद्यपि स्वर्गमें किसी प्रकारका भय नहीं रहता तथापि इन्द्रकी विभूति दिखलानेके लिए ही वे होते हैं॥१९०॥ अन्तःपरिषद्, मध्यम परिषद् और बाह्य परिषद्के भेदसे उस इन्द्रकी तीन सभायें थीं। उनमेंसे पहली परिषद्में एक सौ पच्चीस देव थे, दूसरी परिषद्में दो सौ पचास देव थे और तीसरी परिषद्में पांच सौ देव थे॥ १९१ ॥ उस अच्युत स्वर्गके अन्तभागकी रक्षा करनेवाले चारों दिशाओं सम्बन्धी चार लोकपाल थे और प्रत्येक लोकपालकी बत्तीस-बत्तीस देवियाँ थीं॥१९२॥ उस अच्युतेन्द्रकी आठ महादेवियाँ थीं जो कि अपने वर्ण और सौन्दर्यरूपी सम्पत्तिके द्वारा इन्द्रके मनरूपी लोहेको खींचनेके लिए बनी हुई पुतलियोंके समान शोभायमान होती थीं॥ १९३ ॥ इन आठ महादेवियोंके सिवाय उसके तिरसठ वल्लभिका देवियाँ और थीं

१ अब्जं लक्षणरूपकमलम्। २ मत्स्ययुक्ते। मत्स्यादिशुभलक्षणयुक्ते च। ३ भुक्तिः भुक्तिक्षेत्रम्। ४ –मथैकोन– अ०, प०, द०, स०, म०, ल०। ५ त्रयोविंशत्युत्तरशतम्। ६ दशसहस्र। ७ चत्वारिंशत्सहस्राणि। ८ –स्यान्या अ०, प०, स०, द०। ९ पञ्चविंशत्युत्तरशतम्। १० पञ्चाशदधिकद्विशतैः।

द्वे सहस्रे तथैकाग्रा सप्ततिश्च समुच्चिताः । सर्वा देव्योऽस्य याः स्मृत्वा याति चेतोऽस्य निर्वृतिम्[1] ॥१९५॥
तासां मृदुकरस्पर्शैः तद्वक्त्राब्जनिरीक्षणैः । स लेभेऽभ्यधिकां तृप्तिं संभोगैरपि मानसैः ॥१९६॥
[2]षट्चतुष्कं सहस्राणि नियुतानि दशैव च । विकरोत्येकशो देवी दिव्यरूपाणि योषिताम् ॥१९७॥
[3]चमूनां सप्तकक्षाः[4] स्युः आद्यात्रायुतयोर्द्वयम् । द्विर्द्विः शेषनिकायेषु महाब्धे[5]रिव वीचयः ॥१९८॥
हस्त्यश्वरथपादातवृषगन्धर्वनर्तकी । सप्तानीकान्युशन्त्यस्य प्रत्येकञ्च महत्तरम् ॥१९९॥
एकैकस्याश्च देव्याः स्याद् अप्सरःपरिषत्त्रयम् । पञ्चवर्गश्च पञ्चाशच्छतं चैव यथाक्रमम् ॥२००॥
इत्युक्तपरिवारेण सार्द्धमच्युतकल्पजाम् । लक्ष्मीं निर्विशतस्तस्य[6] [7]व्यावर्ण्यालं परां श्रियम् ॥२०१॥
मानसोऽस्य प्रवीचारो [8]विश्वाणोऽप्यस्य मानसः । द्वाविंशतिसहस्रैश्च [9]समानां सकृदाहरेत् ॥२०२॥
तथैकादशभिर्मासैः सकृदुच्छ्वसितं भजेत् । त्र्यरत्निप्रमितोत्सेधदिव्यदेहधरः स च ॥२०३॥
धर्मेणेत्यच्युतेन्द्रोऽसौ प्रापत् सत्परम्पराम् । तस्मात्तदर्थिभिर्धर्मे मतिः कार्या जिनोदिते ॥२०४॥

मालिनीच्छन्दः

अथ सुललितवेषा[10] दिव्ययोषाः सभूषाः
सुरभिकुसुममालाः [11]स्रस्तचूलाः सलीलाः ।
मधुरविरुतगानारब्ध[12]ताना: [13]समानाः
प्रमदभरमनूनं निन्युरेनं सुरेनम्[14] ॥२०५॥

तथा एक-एक महादेवी अढ़ाईसौ-अढ़ाईसौ अन्य देवियोंसे घिरी रहती थी ॥ १९४ ॥ इस प्रकार सब मिलाकर उसकी दो हजार इकहत्तर देवियाँ थीं। इन देवियोंका स्मरण करने मात्र से ही उसका चित्त संतुष्ट हो जाता था—उसकी कामव्यथा नष्ट हो जाती थी* ॥ १९५ ॥ वह इन्द्र उन देवियोंके कोमल हाथोंके स्पर्शसे, मुखकमलके देखनेसे और मानसिक संभोगसे अत्यन्त तृप्तिको प्राप्त होता था ॥ १९६ ॥ इस इन्द्रकी प्रत्येक देवी अपनी विक्रिया शक्तिके द्वारा सुन्दर स्त्रियोंके दस लाख चौबीस हजार सुन्दर रूप बना सकती थी ॥ १९७ ॥ हाथी, घोड़े, रथ, पियादे, बैल, गन्धर्व और नृत्यकारिणीके भेदसे उसकी सेनाकी सात कक्षाएँ थीं। उनमेंसे पहली कक्षामें बीस हजार हाथी थे, फिर आगेकी कक्षाओंमें दूनी-दूनी संख्या थी। उसकी यह विशाल सेना किसी बड़े समुद्रकी लहरोंके समान जान पड़ती थी। यह सातों ही प्रकारकी सेना अपने अपने महत्तर (सर्वश्रेष्ठ) के अधीन रहती थी ॥ १९८-१९९ ॥ उस इन्द्रकी एक-एक देवीकी तीन-तीन सभाएँ थीं। उनमेंसे पहली सभामें २५ अप्सराएँ थी, दूसरी सभामें ५० अप्सराएँ थीं, और तीसरी सभामें सौ अप्सराएँ थीं ॥ २०० ॥ इस प्रकार ऊपर कहे हुए परिवारके साथ अच्युत स्वर्गमें उत्पन्न हुई लक्ष्मीका उपभोग करनेवाले उस अच्युतेन्द्रकी उत्कृष्ट विभूतिका वर्णन करना कठिन है—जितना वर्णन किया जा चुका है उतना ही पर्याप्त है ॥ २०१ ॥ उस अच्युतेन्द्रका मैथुन मानसिक था और आहार भी मानसिक था तथा वह बाईस हजार वर्षोंमें एक बार आहार करता था ॥ २०२ ॥ ग्यारह महीनेमें एक बार श्वासोच्छ्वास लेता था और तीन हाथ ऊँचे सुन्दर शरीरको धारण करनेवाला था ॥ २०३ ॥ वह अच्युतेन्द्र धर्मके द्वारा ही उत्तम-उत्तम विभूतिको प्राप्त हुआ था इसलिए उत्तम-उत्तम विभूतियोंके अभिलाषी जनोंको जिनेन्द्रदेवके द्वारा कहे धर्ममें ही बुद्धि लगानी चाहिये ॥ २०४ ॥ उस अच्युत स्वर्गमें, जिनके वेष बहुत ही सुन्दर हैं,

१ सुखम् । २ चतुर्विंशतिसहस्रोत्तरदशलक्षरूपाणि । ३ अनीकानाम् । ४ कक्षा भेदः । ५ महाब्धिरिव म०, ल० । ६ अनुभवतः । ७ वर्णनयाऽलम् । ८ आहारः । ९ संवत्सराणाम् । १० आकारवेषा । ११ श्लथधम्मिलाः । १२ उपक्रमितस्वरविश्रमस्थानभेदाः । १३ अहङ्कारयुक्ताः । १४ सुरेशम् ।

* ८ × २५० = २००० । २००० + ६३ + ८ = २०७१ ।

ललितपदविहारैर्भ्रू विकारैरुदारैः
नयनयुगविलासैरङ्गलासैः[1] सुहासैः ।
प्रकटितमृदु[2]भावैः सानुभावैश्च[3] भावैः[4]
जगृहुरथ मनोऽस्याब्जोपमास्या वयस्याः[5] ॥२०६॥

शार्दूलविक्रीडितम्

तासामिन्दुकलामले स्ववदनं पश्यन् कपोलाब्दके
तद्वक्त्राम्बुजभृङ्गतां च घटयन्नाघ्रातवक्त्रानिलः ।
तन्नेत्रैश्च मनोजबाणसदृशैर्भ्रू[6]चापमुक्तैर्भृशं
विद्धं स्वं हृदयं तदीयकरसंस्पर्शैः समाश्वासयन् ॥२०७॥

स्रग्धरा

रेमे रामाननेन्दुद्युतिरुचिरतरे स्वे विमाने विमाने[6]
भुञ्जानो दिव्यभोगानमरपरिवृतो यान्[7] सुरेभैः[8] सुरेभैः[9] ।
जैनीं पूजां[10]च तन्वन् मुहुरतनुरुचा भासमानोऽसमानो
लक्ष्मीवानच्युतेन्द्रः सुचिरमुरुतर[11]स्वां[12]सकान्तः सकान्तः ॥२०८॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे
श्रीमदच्युतेन्द्रैश्वर्यवर्णनं नाम दशमं पर्व ॥१०॥

जो उत्तम-उत्तम आभूषण पहने हुई हैं, जो सुगन्धित पुष्पोंकी मालाओंसे सहित हैं, जिनके लम्बी चोटी नीचेकी ओर लटक रही है, जो अनेक प्रकारकी लीलाओंसे सहित हैं, जो मधुर शब्दोंसे गाती हुई राग-रागिनियोंका प्रारम्भ कर रही हैं, और जो हरप्रकारसे समान हैं—सदृश हैं अथवा गर्वसे युक्त हैं ऐसी देवाङ्गनाएँ उस अच्युतेन्द्रको बड़ा आनन्द प्राप्त करा रही थीं ॥ २०५ ॥ जिनके मुख कमलके समान सुन्दर हैं ऐसी देवाङ्गनाएँ, अपने मनोहर चरणोंके गमन, भौंहोंके विकार, सुन्दर दोनों नेत्रोंके कटाक्ष, अंगोपाङ्गोंकी लचक, सुन्दर हास्य, स्पष्ट और कोमल हाव तथा रोमाञ्च आदि अनुभावोंसे सहित रति आदि अनेक भावोंके द्वारा उस अच्युतेन्द्रका मन ग्रहण करती रहती थीं ॥२०६॥ जो अपनी विशाल कान्तिसे शोभायमान है, जिसकी कोई बराबरी नहीं कर सकता, और जो अपने स्थूल कन्धोंसे शोभायमान है ऐसा वह समृद्धिशाली अच्युतेन्द्र, स्त्रियोंके मुखरूपी चन्द्रमासे अत्यन्त देदीप्यमान अपने विस्तृत विमानमें कभी देवांगनाओंके चन्द्रमाकी कलाके समान निर्मल कपोलरूपी दर्पणमें अपना मुख देखता हुआ, कभी उनके मुखकी श्वासको सूंघकर उनके मुखरूपी कमलपर भ्रमर-जैसी शोभाको प्राप्त होता हुआ, कभी भौंहरूपी धनुषसे छोड़े हुए उनके नेत्रोंके कटाक्षोंसे घायल हुए अपने हृदयको उन्हींके कोमल हाथोंके स्पर्शसे धैर्य बँधाता हुआ, कभी दिव्य भोगोंका अनुभव करता हुआ, कभी अनेक देवोंसे परिवृत होकर हाथीके आकार विक्रिया किये हुए देवोंपर चढ़कर गमन करता हुआ और कभी बार बार जिनेन्द्रदेवकी पूजाका विस्तार करता हुआ अपनी देवाङ्गनाओंके साथ चिरकाल तक क्रीड़ा करता रहा ॥२०७-२०८॥

इस प्रकार आर्षनामसे प्रसिद्ध भवगज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण महापुराण संग्रहमें श्रीमान् अच्युतेन्द्रके ऐश्वर्यका वर्णन करनेवाला दशवाँ पर्व समाप्त हुआ ।

---

१ वलनैः । २ मृदुत्वैः । ३ससामर्थ्यैः । ४ विकारैः । ५ वयस्विन्यः । ६ विगतप्रमाणे । ७ गच्छन् । ८ देवगजैः । ९ शोभनशब्दैः । १० पूजां वितन्वन् प० । ११ निजभुजाशिखरम् । १२ –स्वान्तकान्तः स० ।

एकादशं पर्व

स्फुरन्ति यस्य वाक्पूजा[1] [2]प्राप्त्युपायगुणांशवः । स वः पुनातु भव्याब्जवनबोधीजिनांशुमान् ॥१॥
अथ तस्मिन् दिवं मुक्त्वा भुवनमेष्यति[3] तत्तनौ । म्लानिमायात् किलाम्लानपूर्वा[4] मन्दारमालिका ॥२॥
स्वर्गप्रच्युतिलिङ्गानि यथान्येषां सुधाशिनाम् । स्पष्टानि न तथेन्द्राणां किन्तु लेशेन केनचित्[5] ॥३॥
ततोऽबोधि सुरेन्द्रोऽसौ स्वर्गप्रच्युतिमात्मनः । तथापि न [6]व्यसीदत् स तद्धि धैर्यं महात्मनाम् ॥४॥
षण्मासशेषमात्रायुः सपर्यामर्हतामसौ । प्रारेभे पुण्यधीः कर्तुं प्रायः श्रेयोर्ऽथिनो बुधाः ॥५॥
स मनः [7]प्रणिधायान्ते पदेषु परमेष्ठिनाम् । निष्ठितायु[8]रभूत् पुण्यैः परिशिष्टैरधिष्ठितः ॥६॥
तथापि सुखसाद्भूता महाधैर्या महर्द्धयः । प्रच्यवन्ते दिवो देवा [9]धिगेनां संसृतिस्थितिम् ॥७॥
ततोऽच्युतेन्द्रः प्रच्युत्य जम्बूद्वीपे महाद्युतौ । [10]प्राग्विदेहाश्रिते देशे पुष्कलावत्यभिष्टवे[11] ॥८॥

* स्तोत्रों द्वारा की हुई पूजा ही जिनकी प्राप्तिका उपाय है ऐसे सम्यग्दर्शन, सम्यग्ज्ञान और और सम्यक्चारित्र आदि अनेक गुणरूपी जिसकी किरणें प्रकाशमान हो रही हैं और जो भव्य जीवरूपी कमलोंके वनको विकसित करनेवाला है ऐसा वह जिनेन्द्ररूपी सूर्य तुम सब श्रोताओंको पवित्र करे ॥ १ ॥

अनन्तर जब वह अच्युतेन्द्र स्वर्ग छोड़कर पृथिवीपर आनेके सम्मुख हुआ तब उसके शरीरपर पड़ी हुई कल्पवृक्षके पुष्पोंकी माला अचानक मुरझा गई। वह माला इससे पहले कभी नहीं मुरझाई थी ॥ २ ॥ स्वर्गसे च्युत होनेके चिह्न जैसे अन्य साधारण देवोंके स्पष्ट प्रकट होते हैं वैसे इन्द्रोंके नहीं होते किन्तु कुछ कुछ ही प्रकट होते हैं ॥ ३ ॥ माला मुरझानेसे यद्यपि इन्द्रको मालूम हो गया था कि अब मैं स्वर्गसे च्युत होनेवाला हूँ तथापि वह कुछ भी दुखी नहीं हुआ सो ठीक ही है। वास्तवमें महापुरुषोंका ऐसा ही धैर्य होता है ॥ ४ ॥ जब उसकी आयु मात्र छह माहकी बाकी रह गई तब उस पवित्र बुद्धिके धारक अच्युतेन्द्रने अर्हन्तदेवकी पूजा करना प्रारम्भ कर दिया सो ठीक ही है, प्रायः पण्डित जन आत्मकल्याणके अभिलाषी हुआ ही करते हैं ॥ ५ ॥ आयुके अन्त समयमें उसने अपना चित्त पञ्चपरमेष्ठियोंके चरणोंमें लगाया और उपभोग करनेसे बाकी बचे हुए पुण्यकर्मसे अधिष्ठित होकर वहाँकी आयु समाप्त की ॥ ६ ॥ यद्यपि स्वर्गोंके देव सदा सुखके अधीन रहते हैं, महाधैर्यवान् और बड़ी बड़ी ऋद्धियोंके धारक होते हैं तथापि वे स्वर्गसे च्युत हो जाते हैं इसलिये संसारकी इस स्थितिको धिक्कार हो ॥ ७ ॥

तत्पश्चात् वह अच्युतेन्द्र स्वर्गसे च्युत होकर महाकान्तिमान् जम्बूद्वीपके पूर्व विदेह क्षेत्रमें

---

१ प्राप्तिः अनन्तचतुष्टयस्य प्राप्तिरित्यर्थः। अपायः घातिकर्मणां वियोगः अपाय इति यावत्। अपायप्राप्तिः। वाक्पूजा– विहारस्यायिका तनू प्रवृत्तय इति ख्याता जिनस्यातिशया इमे। २ प्राप्त्यपाय-गुणांशवः ट०। ३ आगमिष्यति सति। ४ पूर्वस्मिन्नम्लाना। ५ कानिचित् अ०, प०, स०, द०। ६ न दुःखभूत्। ७ एकाग्रीकृत्य। ८ नाशितायुः। ९ धिगिमां– प०, अ०, स०। १० पूर्वः। ११ अभिष्टवः स्तवनं यस्य।

* एक अर्थ यह भी हो सकता है कि 'वचनोंमें प्रतिष्ठा करानेके कारणभूत गुणरूप किरणें जिसके प्रकाशमान हो रही हैं ·····'। इसके सिवाय 'ट' नामकी टिप्पणप्रतिमें 'वाक्पूजाप्राप्त्यपायगुणांशवः' ऐसा पाठ स्वीकृत किया गया है, जिसका उसी टिप्पणके आधारपर यह अर्थ होता है कि दिव्य ध्वनि, अनन्त चतुष्टयकी प्राप्ति और घातिचतुष्कका क्षय आदि गुण ही—अतिशय ही जिसकी किरणें हैं.....।

नगर्यां पुण्डरीकिण्यां वज्रसेनस्य भूभुजः । श्रीकान्तायाश्च पुत्रोऽभूद् वज्रनाभिरिति प्रभुः ॥९॥
तयोरेव सुता जाता [1]वरदत्तादयः क्रमात् । विजयो वैजयन्तश्च जयन्तोऽप्यपराजितः ॥१०॥
तदाभूवंस्तयोरेव प्रियाः पुत्रा महोदयाः । [2]पूर्वोद्दिष्टाहमिन्द्रास्तेऽप्यधोग्रैवेयकाच्च्युताः ॥११॥
सुबाहुरहमिन्द्रोऽभूद् यः प्राग्मतिवरः कृती । आनन्दश्च महाबाहुः पीठाह्वोऽभूदकम्पनः ॥१२॥
महापीठोऽभवत् सोऽपि धनमित्रचरः सुरः । संस्कारैः प्राक्तनैरेव घटनैकत्र देहिनाम् ॥१३॥
नगर्यां केशवोऽत्रैव धनदेवाह्वयोऽभवत्[3] । कुबेरदत्तवणिजोऽनन्तमत्याश्च नन्दनः ॥१४॥
वज्रनाभिरथापूर्णयौवनो रुरुचे भृशम् । बालार्क इव निष्टप्तचामीकरसमद्युतिः ॥१५॥
विनीलकुटिलैः केशैः शिरोऽस्य रुचिमानशे । [4]प्रावृषेण्याम्बुदच्छन्नमिव शृङ्गं महीभृतः ॥१६॥
कुण्डलार्ककरस्पृष्टगण्डपर्यन्तशोभिना । स बभासे मुखाब्जेन पद्माकर इवोन्मिषन्[5] ॥१७॥
ललाटाद्रितटे तस्य भ्रूलते रेजतुस्तराम् । नेत्रांशुपुष्पमञ्जर्या मधुपायिततारया ॥१८॥
कामिनीनेत्रभृङ्गालिम् आकर्षन् मुखपङ्कजम् । स्वामोदमाविरस्याभून् स्मितकेशरनिर्गमम् ॥१९॥
कान्त्यासवमिवापातुम् आपतन्त्यतृपत्तराम् । जनतानेत्रभृङ्गाली तन्मुखाब्जे विकासिनि ॥२०॥
नासिकास्य रुचिं दध्रे नेत्रयोर्मध्यवर्त्तिनी । सीमेव रचिता धात्रा तयोः क्षेत्रानतिक्रमे ॥२१॥

स्थित पुष्कलावती देशकी पुण्डरीकिणी नगरीमें वज्रसेन राजा और श्रीकान्ता नामकी रानीके वज्रनाभि नामका समर्थ पुत्र उत्पन्न हुआ ॥ ८-९ ॥ पहले कहे हुए व्याघ्र आदिके जीव वरदत्त आदि भी क्रमसे उन्हीं राजा रानीके विजय, वैजयन्त, जयन्त और अपराजित नामके पुत्र हुए ॥ १० ॥ जिनका वर्णन पहले किया जा चुका है ऐसे मतिवर मंत्री आदिके जीव जो अधो-ग्रैवेयकमें अहमिन्द्र हुए थे वहांसे च्युत होकर उन्हीं राजा रानीके सम्पत्तिशाली पुत्र हुए ॥ ११ ॥ जो पहले (वज्रजंघके समयमें) मतिवर नामका बुद्धिमान् मंत्री था वह अधोग्रैवेयकसे च्युत होकर उनके सुबाहु नामका पुत्र हुआ। आनन्द पुरोहितका जीव महाबाहु नामका पुत्र हुआ, सेनापति अंकपनका जीव पीठ नामका पुत्र हुआ और धनमित्र सेठका जीव महापीठ नामका पुत्र हुआ। सो ठीक ही है, जीव पूर्वभवके संस्कारोंसे ही एक जगह इकट्ठे होते हैं ॥ १२-१३ ॥ श्रीमतीका जीव केशव, जो कि अच्युत स्वर्गमें प्रतीन्द्र हुआ था वह भी वहाँसे च्युत होकर इसी नगरीमें कुबेरदत वणिक्के उसकी स्त्री अनन्तमतीसे धनदेव नामका पुत्र हुआ ॥ १४ ॥

अथानन्तर जब वज्रनाभि पूर्ण यौवन अवस्थाको प्राप्त हुआ तब उसका शरीर तपाये हुए सुवर्णके समान अतिशय देदीप्यमान हो उठा और इसीलिये वह प्रातःकालके सूर्यके समान बड़ा ही सुशोभित होने लगा ॥ १५ ॥ अत्यन्त काले और टेढ़े बालोंसे उसका सिर ऐसा सुशोभित होता था जैसा कि वर्षा ऋतुके बादलोंसे ढका हुआ पर्वतका शिखर सुशोभित होता है ॥ १६ ॥ कुण्डलरूपी सूर्यकी किरणोंके स्पर्शसे जिसके कपोलोंका पर्यन्त भाग शोभायमान हो रहा है ऐसे मुखरूपी कमलसे वह वज्रनाभि फूले हुए कमलोंसे सुशोभित किसी सरोवरके समान शोभायमान हो रहा था ॥ १७ ॥ उसके ललाटरूपी पर्वतके तटपर दोनों भौंहरूपी लताएँ नेत्रोंकी किरणोंरूपी पुष्पमंजरियों और तारेरूप भ्रमरोंसे बहुत ही अधिक शोभायमान हो रही थीं ॥ १८ ॥ उसका मुख श्वासोच्छ्वासकी सुगन्धिसे सहित था, मुसकानरूपी केशरसे युक्त था और स्त्रियोंके नेत्ररूपी भ्रमरोंका आकर्षण करता था इसलिये ठीक कमलके समान जान पड़ता था ॥ १९ ॥ सदा विकसित रहनेवाले उसके मुख-कमलपर जनसमूहके नेत्ररूपी भ्रमरोंकी पंक्ति मानो कान्तिरूपी आसवको पीनेके लिये ही सब ओरसे आकर झपटती थी और उसका पान कर अत्यन्त तृप्त होती थी ॥ २० ॥ दोनों नेत्रोंके मध्यभागमें रहनेवाली उसकी नाक ऐसी

---

१ शार्दूलार्यचरवरदत्त-वराहार्यचरवरसेन-गोलाङ्गूलार्यचरचित्राङ्गद-नकुलार्यचरप्रशान्तमदनाः । २ मति-वरादिचराः । ३ –प्यभूत् ल०, म० । ४ प्रावृषि भवः । ५ विकसन् ।

हारेण कण्ठपर्यन्तवर्तिनासौ श्रियं दधे । मृणालवलयेनेव लक्ष्म्यालिङ्गनसङ्गिना ॥२२॥
वक्षोऽस्य पद्मरागांशुच्छुरितं[1] रुचिमानशे । सान्द्रबालातपच्छन्नसानोः कनकशृङ्गिणः ॥२३॥
वक्षःस्थलस्य पर्यन्ते तस्यांसौ रुचिमापतुः । लक्ष्म्याः क्रीडार्थमुत्तुङ्गौ क्रीडाद्री घटिताविव ॥२४॥
वक्षोभवनपर्यन्ते तोरणस्तम्भविभ्रमम् । बाहू दधतुरस्योच्चैः हारतोरणधारिणौ ॥२५॥
[2]वज्राङ्गबन्धनस्यास्य [3]मध्येनाभि समैक्ष्यत । वज्रालाञ्छनमुद्भूतं वर्त्स्यत्साम्राज्यलाञ्छनम् ॥२६॥
लसद्दुकूलपुलिनं [4]रतिहंसीनिषेवितम् । [5]परां श्रिय[6]मधादस्य कटिस्थानसरोवरम् ॥२७॥
सुवृत्तमसृणावूरू तस्य कान्तिमवापताम् । सञ्चरत्कामगन्धेभरोधे [7]कलसाविवार्गलौ ॥२८॥
जानु[8]गुल्फ[8]स्पृशौ जङ्घे तस्य शिश्रियतुः श्रियम् । सन्धिमेव युवाम् धत्त[9]मित्यादेष्टुमिवोद्यते ॥२९॥
पद्मकान्तिश्रितावस्य पादावङ्गुलिपत्रकौ । सिषेवे सुचिरं लक्ष्मीः नखेन्दुद्युतिकेसरौ ॥३०॥
इति लक्ष्मीपरिष्वङ्गाद्[10] अस्याति रुचिरं वपुः । नूनं सुराङ्गनानाञ्च कुर्यात् स्वे[11]स्पृहयालुताम् ॥३१॥
तथापि यौवनारम्भे मदनज्वरकोपिनि । नास्याजनि मदः कोऽपि स्वभ्यस्तश्रुतसम्पदः ॥३२॥
सोऽधीते स्म त्रिवर्गार्थसाधनीर्विपुलोदयाः । समन्त्रा राजविद्यास्ता लक्ष्म्याकर्षविधौ क्षमाः ॥३३॥

मालूम होती थी मानो अपने अपने क्षेत्रका उल्लंघन न करनेके लिये ब्रह्माने उनके बीचमें सीमा ही बना दी हो ॥ २१ ॥ गलेके समीप पड़े हुए हारसे वह ऐसा शोभायमान हो रहा था मानो वक्षःस्थलवासिनी लक्ष्मीका आलिंगन करनेवाले मृणालवलय (गोल कमलनाल) से ही शोभायमान हो रहा हो ॥ २२ ॥ पद्मरागमणियोंकी किरणोंसे व्याप्त हुआ उसका वक्षःस्थल ऐसा सुशोभित हो रहा था मानो उदय होते हुए सूर्यकी लाल लाल सघन प्रभासे आच्छादित हुआ मेरु पर्वतका तट ही हो ॥ २३ ॥ वक्षःस्थलके दोनों ओर उसके ऊँचे कन्धे ऐसे जान पड़ते थे मानो लक्ष्मीकी क्रीड़ाके लिये अतिशय ऊँचे दो क्रीड़ा पर्वत ही बनाये गये हों ॥ २४ ॥ हार-रूपी तोरणको धारण करनेवाली उसकी दोनों भुजाएँ वक्षःस्थलरूपी महलके दोनों ओर खड़े किये गये तोरण बांधनेके खम्भोंका सन्देह पैदा कर रही थीं ॥ २५ ॥ जिसके शरीरका संगठन वज्रके समान मजबूत है ऐसे उस वज्रनाभिकी नाभिके बीचमें एक अत्यन्त स्पष्ट वज्रका चिह्न दिखाई देता था जो कि आगामी कालमें होनेवाले साम्राज्य (चक्रवर्तित्व) का मानो चिह्न ही था ॥ २६ ॥ जो रेशमी वस्त्ररूपी तटसे शोभायमान था और रतिरूपी हंसीसे सेवित था ऐसा उसका कटिप्रदेश किसी सरोवरकी शोभा धारण कर रहा था ॥ २७ ॥ उसके अतिशय गोल और चिकने ऊरु, यहाँ वहाँ फिरनेवाले कामदेव-रूपी हस्तीको रोकनेके लिये बनाये गये अर्गल-दण्डोंके समान शोभाको प्राप्त हो रहे थे ॥ २८ ॥ घुटनों और पैरके ऊपरकी गांठोंसे मिली हुई उसकी दोनों जङ्घाएँ ऐसी सुशोभित हो रही थीं मानो लोगोंको यह उपदेश देनेके लिये ही उद्यत हुई हों कि हमारे समान तुम लोग भी सन्धि (मेल) धारण करो ॥ २९ ॥ अँगुलीरूपी पत्तोंसे सहित और नखरूपी चन्द्रमाकी कान्तिरूपी केशरसे युक्त उसके दोनों चरण, कमलकी शोभा धारण कर रहे थे और इसी लिये लक्ष्मी चिरकालसे उनकी सेवा करती थी ॥ ३० ॥ इस प्रकार लक्ष्मीका आलिंगन करनेसे अतिशय सुन्दरताको प्राप्त हुआ उसका शरीर अपनेमें देवाङ्ग-नाओंकी भी रुचि उत्पन्न करता था—देवाङ्गनाएँ भी उसे देखकर कामातुर हो जाती थीं ॥ ३१ ॥ उसने शास्त्ररूपी सम्पत्तिका अच्छी तरह अभ्यास किया था इसलिये कामज्वरका प्रकोप बढ़ानेवाले यौवनके प्रारम्भ समयमें भी उसे कोई मद उत्पन्न नहीं हुआ था ॥ ३२ ॥ जो

१ मिश्रितम् । २ वज्रशरीरबन्धनस्य । ३ नाभिमध्ये । ४ रतिरूपमराली । ५ परश्रिय– द०, म०, ल० । ६ –श्रियमगाद– अ०, स० । ७ ऊरूपर्व । ८ गुल्फः घुण्टिका । ९ विभृतम् । १० आलिङ्गनात् । ११ आत्मनि ।

तस्मिल्लक्ष्मीसरस्वत्योः अतिवा[1]ल्लभ्यमाश्रिते । ईर्ष्ययेवाभजत् कीर्तिः दिगन्तान् विधुनिर्मला ॥३४॥
नूनं तद्गुणसंख्यानं वेधसा संविधित्सुना । शलाका स्थापिता व्योम्नि तारकानिकर[2]च्छलात् ॥३५॥
तस्य तद्रूपमाहार्यं[3] सा विद्या तच्च यौवनम् । जनानावर्जयन्ति[4]स्म गुणैरावर्ज्यते न कः ॥३६॥
गुणैरस्यैव शेषाश्च कुमाराः कृतवर्णनाः । ननु चन्द्रगुणानंशैः भजत्युडुगणोऽप्ययम् ॥३७॥
ततोऽस्य योग्यतां मत्वा वज्रसेनमहाप्रभुः । राज्यलक्ष्मीं समग्रां स्वाम् अस्मिन्नेव न्ययोजयत् ॥३८॥
[5]नृपोऽभिषेकमस्योच्चैः स्वसमक्षमकारयत् । पट्टबन्धञ्च [6]सामात्यैः नृपैर्मकुटधारिभिः ॥३९॥
नृपासनस्थमेनञ्च वीजयन्ति स्म चामरैः । गंगातरंगसच्छायैः[7] भंगिभिर्ललितांगनाः ॥४०॥
धुन्वानाश्चामराण्यस्य ता[8] ममोत्प्रेक्षते मनः । जनापवादजं लक्ष्म्या रजो[9]ऽपासितुमुद्यताः ॥४१॥
वक्षसि प्रणयं लक्ष्मीः दृढमस्याकरोत्तदा । पट्टबन्धापदेशेन तस्मिन् प्राध्वङ्कृतेव[10] सा ॥४२॥
मकुटं[11] मूर्ध्नि तस्याधात् नृपैर्नृपवरः समम् । स्वं भारमवतार्यास्मिन्ससाक्षिकमिवार्पयत्[12] ॥४३॥
हारेणालङ्कृतं वक्षो भुजावस्याङ्गदादिभिः[13] । [14]पट्टिकाकटिसूत्रेण कटी पट्टांशुकेन च ॥४४॥

धर्म अर्थ काम इन तीनों पुरुषार्थोंको सिद्ध करनेवाली हैं, जो बड़े बड़े फलोंको देनेवाली हैं और जो लक्ष्मीका आकर्षण करनेमें समर्थ हैं ऐसी मंत्रसहित समस्त राजविद्याएँ उसने पढ़ ली थीं ॥ ३३ ॥ उसपर लक्ष्मी और सरस्वती दोनों ही अतिशय प्रेम रखती थीं इसलिये चन्द्रमाके समान निर्मल कीर्ति मानो उन दोनोंकी ईर्ष्यासे ही दशों दिशाओंके अन्त तक भाग गई थीं ॥ ३४ ॥ मालूम होता है कि ब्रह्माने उसके गुणोंकी संख्या करनेकी इच्छासे ही आकाशमें ताराओंके समूहके छलसे अनेक रेखाएँ बनाई थीं ॥ ३५ ॥ उसका वह मनोहर रूप, वह विद्या और वह यौवन, सभी कुछ लोगोंको वशीभूत कर लेते थे, सो ठीक ही है। गुणोंसे कौन वशीभूत नहीं होता ? ॥ ३६ ॥ यहाँ जो वज्रनाभिके गुणोंका वर्णन किया है उसीसे अन्य राजकुमारोंका भी वर्णन समझ लेना चाहिये। क्योंकि जिस प्रकार तारागण कुछ अंशोंमें चन्द्रमाके गुणोंको धारण करते हैं उसी प्रकार वे शेष राजकुमार भी कुछ अंशोंमें वज्रनाभिके गुण धारण करते थे ॥ ३७ ॥ तदनन्तर, इसकी योग्यता जानकर वज्रसेन महाराजने अपनी सम्पूर्ण राज्यलक्ष्मी इसे ही सौंप दी ॥ ३८ ॥ राजाने अपने ही सामने बड़े ठाट-बाटसे इसका राज्याभिषेक कराया तथा मंत्री और मुकुटबद्ध राजाओंके द्वारा उसका पट्टबन्ध कराया ॥ ३९ ॥ पट्टबन्धके समय वह राजसिंहासनपर बैठा हुआ था और अनेक सुन्दर स्त्रियाँ गंगा नदीकी तरंगोंके समान निर्मल चमर ढोर रही थीं ॥ ४० ॥ चमर ढोरती हुई उन स्त्रियोंको देखकर मेरा मन यही उत्प्रेक्षा करता है कि वे मानो राजलक्ष्मीके संसर्गसे वज्रनाभिपर पड़नेवाली लोकापवाद रूपी धूलिको ही दूर करनेके लिये उद्यत हुई हों ॥ ४१ ॥ उस समय राजलक्ष्मी भी उसके वक्षःस्थलपर गाढ़ प्रेम करती थी और ऐसी मालूम होती थी मानो पट्टबन्धके छलसे वह उसपर बाँध ही दी गई हो ॥ ४२ ॥ राजाओंमें श्रेष्ठ वज्रसेन महाराजने अनेक राजाओंके साथ अपना मुकुट वज्रनाभिके मस्तकपर रखा था। उस समय वे ऐसे जान पड़ते थे मानो सबकी साक्षीपूर्वक अपना भार ही उतारकर उसे समर्पण कर रहे हों ॥ ४३ ॥ उस समय उसका वक्षःस्थल हारसे अलंकृत हो रहा था, भुजाएँ बाजूबंद आदि आभूषणोंसे सुशोभित हो रही थीं और

---

१ वल्लभत्वम् । २ व्याजात् । ३ मनोहरम् । ४ नामयन्ति स्म । ५ नृपाभिषेक– अ०, प०, ब०, द० । ६ सप्रधानैः । ७ समानैः । ८ चामरग्राहिणीः । ९ अपसारणाय । १० आनुकूल्यं कृता । 'आनुकूल्यार्थकं प्राध्वम्' इत्यभिधानात् । अथवा बद्ध्वा प्राध्वमित्यन्वयः । ११ मुकुटं अ०, प०, द०, स०, ल० । १२ –मिवार्पयन् ब०, द०, म०, ल० । १३ –वस्याङ्गदांशुभिः अ०, प०, ब०, स०, द० । १४ काञ्चीविशेषेण ।

कृती कृताभिषेकाय सोऽस्मै [1]नार्पत्यमार्पिपत् । नृपैः समं समाशास्य[2] महान् सम्राड् भवेत्यमुम् ॥४५॥
अनन्तरञ्च लौकान्तिकामरैः प्रतिबोधितः । वज्रसेनमहाराजो न्यधान्निष्क्रमणे मतिम् ॥४६॥
यथोचितामपचितिं[3] तन्वत्सूत्तमनाकिषु[4] । परिनिष्क्रम्य चक्रेऽसौ मुक्तिलक्ष्मीं प्रमोदिनीम् ॥४७॥
समं भगवतानेन सहस्रगणनामिताः । महत्याम्रवनोद्याने नृपाः प्राव्राजिषुस्तदा ॥४८॥
राज्यं निष्कण्टकीकृत्य वज्रनाभिरपालयत् । भगवानपि योगीन्द्रः तपश्चक्रे विकल्मषम् ॥४९॥
राज्यलक्ष्मीपरिष्वङ्गाद्[5] वज्रनाभिस्तुतोष सः । तपोलक्ष्मीसमासङ्गाद्[6] गुरुरस्यातिपिप्रिये ॥५०॥
भ्रातृभिर्धृतिरस्यासीद् वज्रनाभेः समाहितैः[7] । गुणैस्तु धृतिमातेने योगी श्रेयोऽनुबन्धिभिः ॥५१॥
वज्रनाभिनृपोऽमात्यैः [8]संविधत्ते स्म राजकम्[9] । मुनीन्द्रोऽपि तपोयोगैः गुणग्राममपोषयत् ॥५२॥
निजे राज्याश्रमे पुत्रो गुरुरन्त्याश्रमे[10] स्थितः । परार्थबद्धकक्ष्यौ[11] तौ पालयामासतुः प्रजाः[12] ॥५३॥
वज्रनाभेर्जयागारे[13] चक्रं भास्वरमुद्बभौ । योगिनोऽपि मनोगारे ध्यानचक्रं स्फुरद्द्युतिः ॥५४॥
ततो व्यजेष्ट निश्शेषां महीमेष महीपतिः । मुनिः कर्मजयावाप्तमहिमा जगतीत्रयीम्[14] ॥५५॥

कमर करधनी तथा रेशमी वस्त्रकी पट्टीसे शोभायमान हो रही थी ॥ ४४ ॥ अत्यन्त कुशल वज्रसेन महाराजने, जिसका राज्याभिषेक हो चुका है ऐसे वज्रनाभिके लिये 'तू बड़ा भारी चक्रवर्ती हो' इस प्रकार अनेक राजाओंके साथ साथ आशीर्वाद देकर अपना समस्त राज्यभार सौंप दिया ॥ ४५ ॥

शिवसुखमिव तेषां संमुखायातमासीत् ॥२१८॥

सुखमसुखमितीदं संसृतौ देहभाजां
द्वितयमुदितमाप्तैः कर्मबन्धानुरूपम् ।
सुकृत[3]विकृतभेदात्तच्च कर्म द्विधोक्तं
मधुरकटुकपाकं[4] भुक्तमेकं तथान्नम् ॥२१९॥

सुकृतफलमुदारं विद्धि सर्वार्थसिद्धौ
दुरितफलमुदग्रं सप्तमीनारकाणाम् ।
शमदमयमयोगे[5]रग्रिमं[6] पुण्यभाजाम्-
अशमदमयमानां कर्मणा दुष्कृतेन ॥२२०॥

सुखी कहलाते हैं तब जिनके शरीर अथवा अन्य अल्प परिग्रह विद्यमान हैं ऐसे अहमिन्द्र भी अपेक्षाकृत सुखी क्यों न कहलावें ? ॥ २१७ ॥ जिनके पुण्यका फल प्रकट हुआ है ऐसे स्वर्गलोकसे आगे (सर्वार्थसिद्धिमें) रहनेवाले उन वज्रनाभि आदि अहमिन्द्रोंको जो सुख प्राप्त हुआ था वह ऐसा जान पड़ता था मानो मोक्षका सुख ही उनके संमुख प्राप्त हुआ हो क्योंकि जिस प्रकार मोक्षका सुख अतिशयरहित, उदार, प्रवीचाररहित, दिव्य (उत्तम) और स्वभावसे ही मनोहर रहता है उसी प्रकार उन अहमिन्द्रोंका सुख भी अतिशयरहित, उदार, प्रवीचाररहित, दिव्य (स्वर्ग सम्बन्धी) और स्वभावसे ही मनोहर था ॥ भावार्थ—मोक्षके सुख और अहमिन्द्र अवस्थाके सुखमें भारी अन्तर रहता है तथापि यहाँ श्रेष्ठता दिखानेके लिए अहमिन्द्रोंके सुखमें मोक्षके सुखका सादृश्य बताया है ॥ २१८ ॥ इस संसारमें जीवोंको जो सुख दुःख होते हैं वे दोनों ही अपने-अपने कर्मबन्धके अनुसार हुआ करते हैं ऐसा श्री अरहन्त देवने कहा है । वह कर्म पुण्य और पापके भेदसे दो प्रकारका कहा गया है । जिस प्रकार खाये हुए एक ही अन्नका मधुर और कटुक रूपसे दो प्रकारका विपाक देखा जाता है उसी प्रकार उन पुण्य और पाप रूपी कर्मोंका भी क्रमसे मधुर (सुखदायी) और कटुक (दुःखदायी) विपाक–फल–देखा जाता है ॥ २१९ ॥ पुण्यकर्मोंका उत्कृष्ट फल सर्वार्थसिद्धिमें और पापकर्मोंका उत्कृष्ट फल सप्तम पृथिवीके नारकियोंके जानना चाहिये । पुण्यका उत्कृष्ट फल परिणामोंको शान्त रखने, इन्द्रियोंका दमन करने और निर्दोष चारित्र पालन करनेसे पुण्यात्मा जीवोंको प्राप्त होता है और पापका उत्कृष्ट फल परिणामों को शान्त नहीं रखने, इन्द्रियोंका दमन नहीं करने तथा निर्दोष चारित्र पालन नहीं करनेसे पापी

१ कल्पातीतानाम् । २ अनुपाधिमनोज्ञम् । ३ –तदुरितभेदा– अ०, प०, स०, द०, म०, ल० । ४ परिणमनम् । ५ योगः ध्यानम् । ६ प्रथमम् ।

[1]कृतमतिरिति धीमान्[2] शङ्करीं तां जिनाज्ञां[3]
शमदमयमशुद्ध्यै[4] भावयेदस्ततन्द्रः ।
सुखमतुलमभीप्सुर्दुःखभारं [5]जिहासु-
र्निकटतरजिनश्रीर्वज्रनाभिर्यथायम् ॥२२१॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे
भगवद्वज्रनाभिसर्वार्थसिद्धिगमनवर्णनं नाम
एकादशं पर्व ॥११॥

जीवोंको प्राप्त होता है ॥ २२० ॥ जिस प्रकार बहुत ही शीघ्र जिनेन्द्र लक्ष्मी (तीर्थंकर पद) प्राप्त करनेवाले इस वज्रनाभिने शम, दम और यम (चारित्र) की विशुद्धिके लिए आलस्यरहित होकर श्री जिनेन्द्रदेवकी कल्याण करनेवाली आज्ञाका चिन्तवन किया था उसी प्रकार अनुपम सुखके अभिलाषी दुःखके भारको छोड़नेकी इच्छा करनेवाले, बुद्धिमान् विद्वान् पुरुषोंको भी शम, दम, यमकी विशुद्धिके लिये आलस्य (प्रमाद) रहित होकर कल्याण करनेवाली श्री जिनेन्द्र देवकी आज्ञाका चिन्तवन करना चाहिये—दर्शन-विशुद्धि आदि सोलह भावनाओंका चिन्तवन करना चाहिये ॥ २२१ ॥

इस प्रकार आर्ष नामसे प्रसिद्ध श्री भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण
महापुराण संग्रहमें श्री भगवान् वज्रनाभिके सर्वार्थसिद्धि गमनका
वर्णन करनेवाला ग्यारहवाँ पर्व समाप्त हुआ ।

---

१ सम्पूर्णबुद्धिः । २ विद्वान् । ३ श्रीजिनाज्ञां म०, ल० । ४ –सिद्ध्यै अ०, स० । ५ हातुमिच्छुः ।

द्वादशं पर्व

अथ तस्मिन् महाभागे[1] स्वर्लोकाद् भुवमेष्यति[2] । यद्वृत्तकं जगत्यस्मिन् तद्वक्ष्ये शृणुताधुना ॥१॥
अत्रान्तरे[3] पुराणार्थकोविदं वदतां वरम् । पप्रच्छुर्मुनयो नम्रा गौतमं गणनायकम् ॥२॥
भगवन् भारते वर्षे भोगभूमिस्थितिच्युतौ । कर्मभूमिव्यवस्थायां[4] प्रसृतायां यथायथम् ॥३॥
तथा[5] कुलधरोत्पत्तिः त्वया प्रागेव वर्णिता । नाभिराजश्च तत्रान्त्यो विश्वक्षत्रगणाग्रणीः[6] ॥४॥
स एष धर्मसर्गस्य[7] सूत्रधारं[8] महाधियम् । इक्ष्वाकुज्येष्ठमृषभं क्वाश्रमे[9] समजीजनत् ॥५॥
तस्य स्वर्गावतारादिकल्याणर्द्धिश्च कीदृशी । इदमेतत्त्वया बोद्धुम् इच्छामस्त्वदनुग्रहात् ॥६॥
[10]तत्प्रश्नावसितानित्थं व्याजहार गणाधिपः । स [11]तान् विकल्मषान् कुर्वन् शुचिभिर्दशनांशुभिः ॥७॥
इह जम्बूमति द्वीपे भरते खचराचलात् । दक्षिणे मध्यमे[12] खण्डे कालसन्धौ पुरोदिते ॥८॥
पूर्वोक्तकुलकृत्स्वन्त्यो नाभिराजोऽग्रिमोऽप्यभूत् । व्यावर्णितायुरुत्सेधरूपसौन्दर्यविभ्रमः ॥९॥
सनाभिर्भाविनां राज्ञां [13]सनाभिः [14]स्वगुणांशुभिः । भास्वानिव बभौ लोके भास्वन्मौलिर्महाद्युतिः[15] ॥१०॥
शशीव स कलाधारः तेजस्वी भानुमानिव । प्रभुः शक्र इवाभीष्टफलदः कल्पशाखिवत् ॥११॥

अनन्तर गौतम स्वामी कहने लगे कि जब वह वज्रनाभिका जीव अहमिन्द्र, स्वर्गलोकसे पृथ्वी पर अवतार लेनेके सन्मुख हुआ तब इस संसारमें जो वृत्तान्त हुआ था अब मैं उसे ही कहूँगा । आप लोग ध्यान देकर सुनिये ॥ १ ॥ इसी बीचमें मुनियोंने नम्र होकर पुराणके अर्थको जाननेवाले और वक्ताओंमें श्रेष्ठ श्री गौतम गणधरसे प्रश्न किया ॥ २ ॥ कि हे भगवन्, जब इस भारतवर्षमें भोगभूमिकी स्थिति नष्ट हो गई थी और क्रम क्रमसे कर्मभूमिकी व्यवस्था फैल चुकी थी उस समय जो कुलकरोंकी उत्पत्ति हुई थी उसका वर्णन आप पहले ही कर चुके हैं । उन कुलकरोंमें अन्तिम कुलकर नाभिराज हुए थे जो कि समस्त क्षत्रिय-समूहके अगुआ (प्रधान) थे । उन नाभिराजने धर्मरूपी सृष्टिके सूत्रधार, महाबुद्धिमान् और इक्ष्वाकु कुलके सर्वश्रेष्ठ भगवान् ऋषभदेवको किस आश्रममें उत्पन्न किया था? उनके स्वर्गावतार आदि कल्याणकोंका ऐश्वर्य कैसा था? आपके अनुग्रहसे हमलोग यह सब जानना चाहते हैं ॥ ३-६ ॥ इस प्रकार जब उन मुनियोंका प्रश्न समाप्त हो चुका तब गणनायक गौतम स्वामी अपने दांतोंकी निर्मल किरणोंके द्वारा मुनिजनोंको पापरहित करते हुए बोले ॥ ७ ॥ कि हम पहले जिस कालसंधिका वर्णन कर चुके हैं उस कालसंधि (भोगभूमिका अन्त और कर्मभूमिका प्रारम्भ होने) के समय इसी जम्बू द्वीपके भरत क्षेत्रमें विजयार्ध पर्वतसे दक्षिणकी ओर मध्यम-आर्य खण्डमें नाभिराज हुए थे । वे नाभिराज चौदह कुलकरोंमें अन्तिम कुलकर होने पर भी सबसे अग्रिम (पहले) थे । (पक्षमें सबसे श्रेष्ठ थे) उनकी आयु, शरीरकी ऊंचाई, रूप, सौन्दर्य और विलास आदिका वर्णन पहले किया जा चुका है ॥ ८-९ ॥ देदीप्यमान मुकुटसे शोभायमान और महाकान्तिके धारण करनेवाले वे नाभिराज आगामी कालमें होनेवाले राजाओंके बन्धु थे और अपने गुणरूपी किरणोंसे लोकमें सूर्यके समान शोभायमान हो रहे थे ॥ १० ॥ वे चन्द्रमाके समान कलाओं (अनेक विद्याओं) के आधार थे, सूर्यके समान तेजस्वी थे, इन्द्रके समान ऐश्वर्यशाली थे और कल्प वृक्षके समान मनचाहे फल देनेवाले थे ॥ ११ ॥

---

१ महाभाग्यवति । २ आगमिष्यति सति । ३ अवसरे । ४ स्थितौ । ५ तदा अ०, प०, स०, म०, द०, ल० । ६ सकलक्षत्रियसमूहः । ७ सृष्टेः । ८ प्रवर्तकम् । ९ स्थाने । १० तन्मुनीनां प्रश्नावसाने । ११ मुनीन् । १२ आर्यखण्डे । १३ बन्धुः । १४ -भिश्च गुणा- प०, द० । १५ तेजः ।

तस्यासीन्मरुदेवीति देवी देवीव सा शची । रूपलावण्यकान्तिश्रीमतिद्युतिविभूति[1]भिः ॥१२॥
सा कलेवैन्दवी[2] कान्त्या जनतानन्ददायिनी । स्वर्गस्त्रीरूपसर्वस्वम् उच्चित्येव विनिर्मिता ॥१३॥
तन्वङ्गी पक्वबिम्बोष्ठी सुभ्रूश्चारुपयोधरा । मनोभुवा जगज्जेतुं सा पताकेव दर्शिता ॥१४॥
तद्रूपसौष्ठवं तस्या [3]हावं भावं च विभ्रमम् । भावयित्वा कृती कोऽपि नाट्यशास्त्रं व्यधाद् ध्रुवम् ॥१५॥
नूनं तस्याः कलालापे [4]भावयन् स्वरमण्डलम् । [5]प्रणीतगीतशास्त्रार्थो जनो जगति सम्मतः ॥१६॥
रूपसर्वस्वहरणं कृत्वान्यस्त्रीजनस्य सा । [6]वैरूप्यं कुर्वती व्यक्तं [7]किंराज्ञां वृत्तिमन्वयात्[8] ॥१७॥
सा दधेऽधिपदद्वन्द्वं लक्षणानि विचक्षणा । [9]प्रणिन्युर्लक्षणं स्त्रीणां यैरुदाहरणीकृतैः ॥१८॥
मृद्वङ्गुलिदले तस्याः [10]पदाब्जे श्रियमूहतुः[11] । नखदीधितिसन्तानलसत्केसरशोभिनी ॥१९॥
जित्वा रक्ताब्जमेतस्याः क्रमौ संप्राप्तनिर्वृती[12] । नखांशुमञ्जरीव्याजात् स्मितमातेनतुर्ध्रुवम् ॥२०॥

उन नाभिराजके मरुदेवी नामकी रानी थी जो कि अपने रूप, सौन्दर्य, कान्ति, शोभा, द्युति और विभूति आदि गुणोंसे इन्द्राणी देवीके समान थी ॥ १२ ॥ वह अपनी कान्तिसे चन्द्रमाकी कलाके समान सब लोगोंको आनन्द देनेवाली थी और ऐसी मालूम होती थी मानो स्वर्गकी स्त्रियोंके रूपका सार इकट्ठा करके ही बनाई गई हो ॥ १३ ॥ उसका शरीर कृश था, ओठ पके हुए बिम्बफलके समान थे, भौंहें अच्छी थीं और स्तन भी मनोहर थे। उन सबसे वह ऐसी जान पड़ती थी मानो कामदेवने जगत्को जीतनेके लिये पताका ही दिखाई हो ॥ १४ ॥ ऐसा मालूम होता है कि किसी चतुर विद्वान्ने उसके रूपकी सुन्दरता, उसके हाव, भाव और विलासका अच्छी तरह विचार करके ही नाट्यशास्त्रकी रचना की हो। भावार्थ—नाट्य शास्त्रमें जिन हाव, भाव और विलासका वर्णन किया गया है वह मानो मरुदेवीके हाव, भाव और विलासको देखकर ही किया गया है ॥ १५ ॥ मालूम होता है कि संगीतशास्त्रकी रचना करनेवाले विद्वान्ने मरुदेवीकी मधुर वाणीमें ही संगीतके निषाद, ऋषभ, गान्धार आदि समस्त स्वरोंका विचार कर लिया था। इसीलिये तो वह जगत्में प्रसिद्ध हुआ है ॥ १६ ॥ उस मरुदेवीने अन्य स्त्रियोंके सौन्दर्यरूपी सर्वस्व धनका अपहरण कर उन्हें दरिद्र बना दिया था, इसलिये स्पष्ट ही मालूम होता था कि उसने किसी दुष्ट राजाकी प्रवृत्तिका अनुसरण किया था क्योंकि दुष्ट राजा भी तो प्रजाका धन अपहरण कर उसे दरिद्र बना देता है ॥ १७ ॥ वह चतुर मरुदेवी अपने दोनों चरणोंमें अनेक सामुद्रिक लक्षण धारण किये हुए थी। मालूम होता है कि उन लक्षणोंको ही उदाहरण मानकर कवियोंने अन्य स्त्रियोंके लक्षणोंका निरूपण किया है ॥ १८ ॥ उसके दोनों ही चरण कोमल अँगुलियोंरूपी दलोंसे सहित थे और नखोंकी किरणरूपी देदीप्यमान केशरसे सुशोभित थे इसलिये कमलके समान जान पड़ते थे और दोनों ही साक्षात् लक्ष्मी (शोभा) को धारण कर रहे थे ॥ १९ ॥ मालूम होता है कि मरुदेवीके चरणोंने लाल कमलोंको जीत लिया इसीलिये तो वे सन्तुष्ट होकर नखोंकी किरणरूपी मंजरीके छलसे कुछ कुछ हँस रहे थे ॥ २० ॥

१ विभूतिः अणिमादिः । २ इन्दोरियम् । ३ 'हावो मुखविकारः स्याद्भावः स्याच्चित्तसम्भवः । विलासो नेत्रजो ज्ञेयो विभ्रमो भ्रूयुगान्तयोः ॥" ४ संस्कारं कुर्वन् । ५ प्रणीतः प्रोक्तः । ६ विरूपत्वं विरुद्धं च । ७ किंनृपाणाम् । ८ -मन्वियात् प०, म०, ल० । 'प' पुस्तके सप्तदशश्लोकानन्तरमयं श्लोकः समुद्धृतः— उक्तं च काव्यं [सामुद्रिके] "भृङ्गराश[स] न वाजिकुञ्जररथश्रीवृक्षयूपेषु च [धी] मालाकुण्डलचामराकुशयव [चामराङ्कुशयवाः] शैलध्वजा तोरणाः । मत्स्यस्वस्तिकवेदिका व्यजनिका शङ्खश्च पत्राम्बुजं पादौ पाणितलेऽथवा युवतयो गच्छन्ति राज्ञः [राज्ञी] पदम् ॥" ९ ऊचुः । १० पादाब्जे अ०, प०, स०, म०, द०, ल० । ११ बिभ्रतुः । १२ सम्प्राप्तसुखौ ।

नखैः कुरबकच्छायां क्रमौ जित्वाप्यनिर्वृतौ[1] । विजिग्याते [2]गतेनास्या हंसीनां गतिविभ्रमम् ॥२१॥
मणिनूपुरझङ्कारमुखरौ सुभ्रुवः क्रमौ । पद्माविव रणद्भृङ्गसङ्गतौ रुचिमापतुः ॥२२॥
[3]निगूढगुल्फसन्धित्वात् युक्तपार्ष्णिपरिग्रहात् । श्रितौ यानासनाभ्याञ्च तत्क्रमौ विजिगीषुताम् ॥२३॥
शोभा जङ्घाद्वये यास्याः[4] काप्यन्यत्र न सास्त्यतः । अन्योऽन्योपमयैवास्[5]वर्णनं तन्न वर्ण्यते ॥२४॥
जानुद्वयं[6] समाश्लिष्टं यदस्याः कामनीयकम् । तदेवालं जगज्जेतुं किं तरां चिन्तयानया ॥२५॥
ऊरुद्वयमुदारश्रि चारु हारि सुखावहम्[7] । स्पर्द्धयेव सुरस्त्रीभिः अतिरम्यं बभार सा ॥२६॥
वामोरुरिति या रूढिः तां स्वसात्कर्तुमन्यथा । [8]वामवृत्ती कृतावूरू मन्येऽन्यस्त्रीजयेऽमुया ॥२७॥

उसके दोनों चरण नखोंके द्वारा कुरबक जातिके वृक्षोंको जीतकर भी सन्तुष्ट नहीं हुए थे इसी लिये उन्होंने अपनी गतिसे हंसिनीकी गतिके विलासको भी जीत लिया था ॥२१॥ सुन्दर भौंहोंवाली उस मरुदेवीके दोनों चरण मणिमय नूपुरोंकी झंकारसे सदा शब्दायमान रहते थे इसलिये गुंजार करते हुए भ्रमरोंसे सहित कमलोंके समान सुशोभित होते थे ॥ २२ ॥ उसके दोनों चरण किसी विजिगीषु (शत्रुको जीतनेकी इच्छा करनेवाले) राजाकी शोभा धारण कर रहे थे, क्योंकि जिस प्रकार विजिगीषु राजा सन्धिवार्ताको गुप्त रखता है अर्थात् युद्ध करते हुए भी मनमें सन्धि करनेकी भावना रखता है, पार्ष्णि (पीछेसे सहायता करनेवाली) सेनासे युक्त होता है, शत्रुके प्रति यान (युद्धके लिए प्रस्थान) करता है और आसन (परिस्थितिवश अपने ही स्थानपर चुपचाप रहना) गुणसे सहित होता है उसी प्रकार उसके चरण भी गाँठोंकी सन्धियाँ गुप्त रखते थे अर्थात् पुष्टकाय होनेके कारण गाँठोंकी संधिया माँसपिण्डमें विलीन थीं इसलिये बाहर नहीं दिखती थीं, पार्ष्णि (एड़ी)से युक्त थे, मनोहर यान (गमन) करते थे और सुन्दर आसन (बैठना आदिसे) सहित थे । इसके सिवाय जैसे विजिगीषु राजा अन्य शत्रु राजाओंको जीतना चाहता है वैसे ही उसके चरण भी अन्य स्त्रियोंके चरणोंकी शोभा जीतना चाहते थे ॥ २३ ॥ उसकी दोनों जंघाओंमें जो शोभा थी वह अन्यत्र कहीं नहीं थी । उन दोनोंकी उपमा परस्पर ही दी जाती थी अर्थात् उसकी वाम जंघा उसकी दक्षिण जंघाके समान थी और दक्षिण जंघा वामजंघाके समान थी । इसलिये ही उन दोनोंका वर्णन अन्य किसीकी उपमा देकर नहीं किया जा सकता था ॥ २४ ॥ 'अत्यन्त मनोहर और परस्परमें एक दूसरेसे मिले हुए उसके दोनों घुटने ही क्या जगत्को जीतनेके लिये समर्थ हैं, इस चिन्तासे कोई लाभ नहीं था क्योंकि वे अपने सौन्दर्यसे जगत्को जीत ही रहे थे ॥ २५ ॥ उसके दोनों ही ऊरु उत्कृष्ट शोभाके धारक थे, सुन्दर थे, मनोहर थे और सुख देनेवाले थे, जिससे ऐसा मालूम पड़ता था मानो देवांगनाओंके साथ स्पर्धा करके ही उसने ऐसे सुन्दर ऊरु धारण किये हों ॥ २६ ॥ मैं ऐसा मानता हूँ कि अभी तक संसारमें जो 'वामोरु' (मनोहर ऊरु वाली) शब्द प्रसिद्ध था उसे उस मरुदेवीने अन्य प्रकारसे अपने स्वाधीन करनेके लिये ही मानो अन्य स्त्रियोंके विजय करनेमें अपने दोनों ऊरुओंको वाम वृत्ति (शत्रुके समान बर्ताव करनेवाले) कर लिया था । भावार्थ—कोशकारोंने स्त्रियोंका एक नाम 'वामोरु' भी लिखा है जिसका अर्थ होता है सुन्दर ऊरुवाली स्त्री । परन्तु मरुदेवीने 'वामोरु' शब्दको अन्य प्रकारसे (दूसरे अर्थसे) अपनाया था । वह 'वामोरु' शब्दका अर्थ करती थी 'जिसके ऊरु शत्रुभूत हों ऐसी स्त्री' । मानो उसने अपनी उक्त मान्यताको सफल बनानेके लिये ही अपने ऊरुओंको अन्य स्त्रियोंके ऊरुओंके सामने वामवृत्ति अर्थात् शत्रुरूप बना लिया था । संक्षेपमें भाव यह है कि उसने अपने ऊरुओंकी शोभासे अन्य स्त्रियोंके

१ असुखौ । २ गमनेन । ३ गुल्फिका [घुटिका] । ४ –स्यात् म०, ल० । ५ प्राप्तकीर्तनम् । ६ जानु ऊरुपर्व । ७ सुखाहरम् द०, स० । ८ वक्रवृत्ती ।

[1]कलत्रस्थानमेतस्याः स्थानीकृत्य मनोभुवा । विनिर्जितं जगन्नूनम्[2] अनूनपरिमण्डलम् ॥२८॥
[3]कटीमण्डलमेतस्याः काञ्चीसालपरिष्कृतम्[4] । मन्ये दुर्गमनङ्गस्य जगड्डम[5]रकारिणः ॥२९॥
लसदंशुकसंसक्तं काञ्चीवेष्टं बभार सा । फणिनं [6]स्रस्तनिर्मोकमिव चन्दनवल्लरी ॥३०॥
रोमराजी विनीलास्या रेजे मध्येतनूदरम् । हरिनीलमयीवावष्टम्भयष्टिर्मनोभुवः ॥३१॥
तनुमध्यं बभारासौ [7]वलिभं निम्ननाभिकम् । शरन्नदीव सावर्त्तं स्रोतः[8] प्रतनुवीचिकम्[9] ॥३२॥
स्तनावस्याः समुत्तुङ्गौ रेजतुः परिणाहिनौ[10] । यौवनश्रीविलासाय क्लृप्तौ क्रीडाचलाविव ॥३३॥
धृतांशुकमसौ दध्रे कुङ्कुमाङ्कं[11] कुचद्वयम् । । वीचिरुद्धमिवानोङ्क[12]मिथुनं सुरनिम्नगा ॥३४॥
स्तनावलग्न[13]संलग्नहाररोचिरसौ बभौ । सरोज[14]कुट्मलाभ्यर्णस्थितफेना यथाब्जिनी ॥३५॥
[15]व्यराजि कन्धरेणास्याः [16]तनुराजीविराजिना[17] । उल्लिख्य[18] घटितेनेव धात्रा [19]निर्माणकौशलात् ॥३६॥
अधिकन्धरमाबद्ध[20]हारयष्टिर्व्यभादसौ । पतद्गिरिसरिस्स्रोताः [21]सानुलेखेव शृङ्गिणः ॥३७॥

पराजित कर दिया था ॥ २७ ॥ इसमें कोई सन्देह नहीं कि कामदेवने मरुदेवीके स्थूल नितम्बमण्डलको ही अपना स्थान बनाकर इतने बड़े विस्तृत संसारको पराजित किया था ॥ २८ ॥ करधनीरूपी कोटसे घिरा हुआ उसका कटिमण्डल ऐसा मालूम होता था मानो जगत् भरमें विप्लव करनेवाले कामदेवका किला ही हो ॥ २९ ॥ जिस प्रकार चन्दनकी लता, जिसकी काँचली निकल गई है ऐसे सर्पको धारण करती है उसी प्रकार वह मरुदेवी भी शोभायमान अधोवस्त्रसे सटी हुई करधनीको धारण कर रही थी ॥ ३० ॥ उस मरुदेवीके कृश उदरभाग पर अत्यन्त काली रोमोंकी पंक्ति ऐसी सुशोभित होती थी मानो इन्द्रनील मणिकी बनी हुई कामदेवकी आलम्बनयष्टि (सहारा लेनेकी लकड़ी) ही हो ॥ ३१ ॥ जिस प्रकार शरद् ऋतुकी नदी भँवरसे युक्त और पतली पतली लहरोंसे सुशोभित प्रवाहको धारण करती है उसी प्रकार वह मरुदेवी भी त्रिवलिसे युक्त और गंभीर नाभिसे शोभायमान, अपने शरीरके मध्यभागको धारण करती थी ॥ ३२ ॥ उसके अतिशय ऊँचे और विशाल स्तन ऐसे शोभायमान होते थे मानो तारुण्य-लक्ष्मीकी क्रीड़ाके लिये बनाये हुए दो क्रीडाचल ही हों ॥ ३३ ॥ जिस प्रकार आकाशगंगा लहरोंमें रुके हुए दो चक्रवाक पक्षियोंको धारण करती है उसी प्रकार वह मरुदेवी जिनपर केशर लगी हुई है और जो वस्त्रसे ढके हुए हैं ऐसे दोनों स्तनोंको धारण कर रही थी ॥ ३४ ॥ जिसके स्तनोंके मध्य भागमें हारकी सफेद सफेद किरणें लग रही थीं ऐसी वह मरुदेवी उस कमलिनीकी तरह सुशोभित हो रही थी जिसके कि कमलोंकी बोंड़ियोंके समीप सफेद सफेद फेन लग रहा है ॥ ३५ ॥ सूक्ष्म रेखाओंसे उसका शोभायमान कण्ठ बहुत ही सुशोभित हो रहा था और ऐसा जान पड़ता था मानो विधाताने अपना निर्माण-सम्बन्धी कौशल दिखानेके लिये ही सूक्ष्म रेखाएँ उकेरकर उसकी रचना की हो ॥ ३६ ॥ जिसके गलेमें रत्नमय हार लटक रहा है ऐसी वह मरुदेवी, पर्वतकी उस शिखरके समान शोभायमान होती थी जिसपर कि ऊपरसे

---

१ कलत्र नितम्ब । 'कलत्रं श्रोणिभार्ययोः' इत्यभिधानात् । २ निश्चयेन । ३ अयं श्लोकः पुरुदेवचम्पूकारेण अर्हद्दासेन स्वकीये पुरुदेवचम्पूकाव्ये चतुर्थस्तवके त्र्यशीतिपृष्ठे ग्रन्थाङ्गतां प्रापितः । ४ अलङ्कृतम् । ५ डमरः विप्लवः । ६ स्रस्त—च्युत । ७ वलिरस्यास्तीति वलिभम् । ८ प्रवाहः । ९ स्वल्पतरङ्गकम् । १० विशालवन्तौ 'परिणाहो विशालता' इत्यभिधानात् । परिणाहितौ प०, स०, द० । ११ कुङ्कमाक्तम् प०, अ० । १२ रथाङ्गमिथुनम् । चक्रवाकयुगलमित्यर्थः । 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इत्यभिधानात् । १३ अवलग्न मध्य । १४ कुड्मला— द०, स०, म०, ल० । १५ भावे लुङ् । १६ स्वल्परेखा । १७ विभासिता अ०, स०, म०, ल० । १८ उत्कीर्य । १९ निर्माण सर्जन । २० —मारब्ध— ब० । २१ नितम्बलेखा ।

शिरीषसुकुमाराङ्गाः तस्या बाहू विरेजतुः । कल्पवल्ल्या इवावाग्रौ[1] विटपौ[2] मणिभूषणौ ॥३८॥
मृदुबाहुलते तस्याः करपल्लवसंश्रिताम् । नखांशूल्लसितव्याजाद् दधतुः पुष्पमञ्जरीम् ॥३९॥
अशोकपल्लवच्छायं बिभ्रती करपल्लवम् । पाणौ कृतमिवाशेषं मनोरागमुवाह सा ॥४०॥
सा दधे किमपि[3] स्रस्तौ अंसौ हंसीव [4]पक्षती । आस्रस्तकबरीभार[5]वाहिकाखेदिताविव ॥४१॥
मुखमस्याः सरोजाक्ष्या जहास शशिमण्डलम् । [6]सकलं विकलङ्कञ्च विकलं सकलङ्ककम् ॥४२॥
वैधव्य[7]दूषितेन्दुश्रीः अब्जश्रीः पङ्कदूषिता । तस्याः सदोज्ज्वलास्यश्रीः वद केनोपमीयते ॥४३॥
दशनच्छदरागोऽस्याः स्मितांशुभिरनुद्रुतः[8] । पयःकणावकीर्णस्य विद्रुमस्याजय[9]च्छ्रियम् ॥४४॥
सुकण्ठ्याः कण्ठरागोऽस्या गीतगोष्ठीषु पप्रथे । मौर्वीरव इवाकृष्टधनुषः पुष्पधन्वनः ॥४५॥
कपोलावलकानस्या दधतुः प्रतिबिम्बितान् । शुद्धिभाजोऽनुगृह्णन्ति मलिनानपि संश्रितान् ॥४६॥
तस्या नासाग्रमव्यग्रं[10] बभौ मुखमभिस्थितम् । तदामोदमिवाघ्रातुं तन्निःश्वसितमुत्थितम् ॥४७॥
नयनोत्पलयोः कान्तिः तस्याः [11]कर्णान्तमाश्रयत् । कर्णेजपत्वमन्योऽन्यस्पर्धयेव चिकीर्षतोः ॥४८॥

पहाड़ी नदीके जलका प्रवाह पड़ रहा हो ॥ ३७ ॥ शिरीषके फूलके समान अतिशय कोमल अंगोंवाली उस मरुदेवीकी मणियोंके आभूषणोंसे सुशोभित दोनों भुजाएँ ऐसी भली जान पड़ती थीं मानो मणियोंके आभूषणोंसे सहित कल्पवृक्षकी दो मुख्य शाखाएँ ही हों ॥ ३८ ॥ उसकी दोनों कोमल भुजाएँ लताओंके समान थीं और वे नखोंकी शोभायमान किरणोंके बहाने हस्तरूपी पल्लवोंके पास लगी हुई पुष्पमंजरियाँ धारण कर रही थीं ॥ ३९ ॥ अशोक वृक्षके किसलयके समान लाल लाल हस्तरूपी पल्लवोंको धारण करती हुई वह मरुदेवी ऐसी जान पड़ती थी मानो हाथोंमें इकट्ठे हुए अपने मनके समस्त अनुरागको ही धारण कर रही हो ॥ ४० ॥ जिस प्रकार हंसिनी कुछ नीचेकी ओर ढले हुए पंखोंके मूल भागको धारण करती है उसी प्रकार वह मरुदेवी कुछ नीचेकी ओर झुके हुए दोनों कंधोंको धारण कर रही थी, उसके वे झुके हुए कन्धे ऐसे मालूम होते थे मानो लटकते हुए केशोंका भार धारण करनेके कारण खेद-खिन्न होकर ही नीचेकी ओर झुक गये हों ॥ ४१ ॥ उस कमलनयनीका मुख चन्द्रमण्डलकी हँसी उड़ा रहा था क्योंकि उसका मुख सदा कलाओंसे सहित रहता था और चन्द्रमाका मण्डल एक पूर्णिमाको छोड़कर बाकी दिनोंमें कलाओंसे रहित होने लगता है उसका मुख कलंकरहित था और चन्द्रमण्डल कलंकसे सहित था ॥ ४२ ॥ चन्द्रमाकी शोभा दिनमें चन्द्रमाके नष्ट हो जानेके कारण वैधव्य दोषसे दूषित हो जाती है और कमलिनी कीचड़से दूषित रहती है इसलिये सदा उज्ज्वल रहनेवाले उसके मुखकी शोभाको तुलना किस पदार्थसे की जावे ? तुम्हीं कहो ॥ ४३ ॥ उसके मन्दहास्यकी किरणोंसे सहित दोनों ओंठोंकी लाली जलके कणोंसे व्याप्त मूँगाकी भी शोभा जीत रही थी ॥ ४४ ॥ उत्तम कण्ठवाली उस मरुदेवीके कण्ठका राग (स्वर) संगीतकी गोष्ठियोंमें ऐसा प्रसिद्ध था मानो कामदेवके खींचे हुए धनुषकी डोरीका शब्द ही हो ॥४५॥ उसके दोनों ही कपोल अपनेमें प्रतिबिम्बित हुए काले केशोंको धारण कर रहे थे सो ठीक ही है शुद्धिको प्राप्त हुए पदार्थ शरणमें आये हुए मलिन पदार्थोंपर भी अनुग्रह करते हैं—उन्हें स्वीकार करते हैं ॥ ४६ ॥ लम्बा और मुखके सन्मुख स्थित हुआ उसकी नासिकाका अग्रभाग ऐसा सुशोभित हो रहा था मानो उसके श्वासकी सुगन्धिको सूंघनेके लिये ही उद्यत हो ॥ ४७ ॥ उसके नयन-कमलोंकी कान्ति कानके समीप तक पहुँच गई थी जिससे ऐसी जान पड़ती थी मानो दोनों ही नयन-कमल परस्परकी स्पर्धासे एक दूसरेकी चुगली करना

१ आनतौ । इवावग्रौ ल० । २ शाखे । ३ ईषन्नतौ । ४ पक्षमूले । 'स्त्री पक्षतिः पक्षमूलम्' इत्यभिधानात् । ५ वाहनम् । ६ सम्पूर्णम् । ७ विधवात्व विधुत्व वा । ८ अनुगतः । ९ —जयत् श्रियम् अ०, स०, म० ल० । १० स्थिरम् । ११ कर्णसमीपम् ।

[1]श्रुतेनालंकृतावस्याः कर्णौ पुनरलंकृतौ । कर्णाभरणविन्यासैः श्रुतदेव्या इवार्चनैः ॥४९॥
ललाटेनाष्टमीचन्द्रचारुणास्या विदिद्युते । मनोजश्रीविलासिन्या दर्पणेनेव हारिणा ॥५०॥
विनीलैरलकैरस्या मुखाब्जे मधुपायितम् । भ्रूभ्याञ्च[2] निर्जिता [3]सज्या मदनस्य धनुर्लता ॥५१॥
कचभारो बभौ तस्या विनीलकुटिलायतः । मुखेन्दुग्रासलोभेन विधिन्तुद[4] इवाश्रितः ॥५२॥
[5]विस्रस्तकबरीबन्धविगलत्कुसुमोत्करैः । सोपहारामिव क्षोणीं चक्रे चंक्रमणेषु[6] सा ॥५३॥
[7]समसुप्रविभक्ताङ्गम् इत्यस्या वपुरूर्जितम् । स्त्रीसर्गस्य प्रतिच्छन्द[8]भावेनेव विधिर्व्यधात् ॥५४॥
सुयशाः सुचिरायुश्च [9]सुप्रजाश्च सुमङ्गला । [10]पतिवत्नी च या नारी सा तु तामनुवर्णिता ॥५५॥
सा खनिर्गुणरत्नानां साऽवनिः पुण्यसम्पदाम् । पावनी श्रुतदेवीव[11] साऽनधीत्यैव पण्डिता ॥५६॥
सौभाग्यस्य परा कोटिः सौरूप्यस्य परा धृतिः[12] । [13]सौहार्दस्य परा प्रीतिः सौजन्यस्य परा गतिः[14] ॥५७॥
कुसृतिः[15](?)कामतत्वस्य[16] [17]कलागमसरित्स्रुतिः । प्र[18]सृतिर्यशसां साऽऽसीत् [19]सतीत्वस्य पराभृतिः ।५८।
तस्याः किल समुद्वाहे[20] सुरराजेन चोदिताः । सुरोत्तमा महाभूत्या चक्रुः कल्याणकौतुकम्[21] ॥५९॥

चाहते हों ॥ ४८ ॥ यद्यपि उसके दोनों कान शास्त्र श्रवण करनेसे अलंकृत थे तथापि सरस्वती देवीके पूजाके पुष्पोंके समान कर्णभूषण पहिनाकर फिर भी अलंकृत किये गये थे ॥ ४९ ॥ अष्टमीके चन्द्रमाके समान सुन्दर उसका ललाट अतिशय देदीप्यमान हो रहा था और ऐसा मालूम पड़ता था मानो कामदेवकी लक्ष्मीरूपी स्त्रीका मनोहर दर्पण ही हो ॥ ५० ॥ उसके अत्यन्त काले केश मुखकमल पर इकट्ठे हुए भौंरोंके समान जान पड़ते थे और उसकी भौंहोंने कामदेवकी डोरी सहित धनुष-लताको भी जीत लिया था ॥ ५१ ॥ उसके अतिशय काले, टेढ़े और लम्बे केशोंका समूह ऐसा शोभायमान होता था मानो मुखरूपी चन्द्रमाको ग्रसनेके लोभसे राहु ही आया हो ॥ ५२ ॥ वह मरुदेवी चलते समय कुछ कुछ ढीली हुई अपनी चोटीसे नीचे गिरते हुए फूलोंके समूहसे पृथ्वीको उपहार सहित करती थी ॥ ५३ ॥ इस प्रकार जिसके प्रत्येक अंग उपांगकी रचना सुन्दर है ऐसा उसका सुदृढ़ शरीर ऐसा अच्छा जान पड़ता था मानो विधाताने स्त्रियोंकी सृष्टि करनेके लिये एक सुन्दर प्रतिबिम्ब ही बनाया हो ॥ ५४ ॥ संसारमें जो स्त्रियां अतिशय यश वाली, दीर्घ आयुवाली, उत्तम सन्तानवाली, मंगलरूपिणी और उत्तम पतिवाली थीं वे सब मरुदेवीसे पीछे थीं, अर्थात् मरुदेवी उन सबमें मुख्य थी ॥ ५५ ॥ वह गुणरूपी रत्नोंकी खानि थी, पुण्यरूपी संपत्तियोंकी पृथिवी थी, पवित्र सरस्वती देवी थी और बिना पढ़े ही पण्डिता थी ॥ ५६ ॥ वह सौभाग्यकी परम सीमा थी, सुन्दरताकी उत्कृष्ट पुष्टि थी, मित्रताकी परम प्रीति थी और सज्जनताकी उत्कृष्ट गति (आश्रय) थी ॥ ५७ ॥ वह काम शास्त्रको उत्पन्न करनेवाली थी, कलाशास्त्ररूपी नदीका प्रवाह थी, कीर्तिका उत्पत्तिस्थान थी और पातिव्रत्य धर्मकी परम सीमा थी ॥ ५८ ॥ उस मरुदेवीके विवाहके समय इन्द्रके द्वारा

१ शास्त्रश्रवणेन । २ भ्रूभ्यां विनि– प०, म०, ल० । ३ सगुणा । ४ राहुः । ५ विस्रस्त विश्लथ । ६ पुनः पुनर्गमनेषु । ७ समानं यथा भवति तथा सुष्ठुविभक्तावयवम् । ८ प्रतिनिधि । ९ सत्पुत्रवती । १० सभर्तृका । ११ श्रुतदेवी च म०, ल० । १२ धृतिः धारणम् । भृतिः ल० । १३ सुहृदयत्वस्य । १४ आधारः । १५ 'त, ब०' पुस्तकसम्मतोऽयं पाठः । कुसृति-स्थाने 'प्रसृतिः प्रसूतिः' इति वा पाठः । इत्यपि त० ब० पुस्तकयोः पार्श्वे लिखितम् । 'प्रसूतिः कामतत्त्वस्य कलागमसरिच्छ्रुतिः । प्रसूतिर्यशसां साऽऽसीत् सतीत्वस्य परा धृतिः ॥'' स०, अ० । ''प्रसूतिः कामतत्त्वस्य कलागमसरित्स्रुतिः । प्रसूतिर्यशसां साऽऽसीत् सतीत्वस्य परा धृतिः ॥'' प्रसृतिः कामतत्त्वस्य कलागमसरिच्छ्रुतिः । प्रसूतिर्यशसां साऽऽसीत्सतीत्वस्य परा वृतिः ॥'' द० । ''प्रसूतिः कामतत्त्वस्य कलागमसरिच्छ्रुतिः ॥'' प्रसूतिर्यशसां सासीत् सतीत्वस्य परा धृतिः ॥'' ल० । ''कुसृतिः कामतत्त्वस्य कलागमसरित्स्रुतिः ॥'' ट० । कुसृतिः शाठ्यम् । १६ कामतन्त्रस्य । १७ कलाशास्त्रनद्याः प्रवाहः । १८ प्रसरणम् । १९ पातिव्रतस्य । २० विवाहे । २१ विवाहोत्साहम् ।

पुण्यसम्पत्तिरेवास्या जननीत्वमुपागता । [1]सखीभूयं गता लज्जा गुणाः परिजनायिताः ॥६०॥
रूपप्रभावविज्ञानैः [2]इति रूढिं परांगता । भर्तु[3]र्मनोगजालाने[3] भेजे साऽऽलान[4]यष्टिताम् ॥६१॥
तद्वक्त्रेन्दोः स्मितज्योत्स्ना तन्वती नयनोत्सवम् । भर्त्तु[5]श्चेतोऽम्बुधेः क्षोभम् अनुवेलं समातनोत् ॥६२॥
रूपलावण्यसम्पत्त्या [5]पत्या श्रीरिव सा मता । [6]मतावित्र मुनिस्तस्याम् अतानीत् स परां धृतिम्[7] ॥६३॥
परिहासेष्वमर्मस्पृक् सम्भोगेष्वनुवर्त्तिनी । [8]साचिव्यमकरोत्तस्य[9] [10]नर्मणः प्रणयस्य च ॥६४॥
साभवत् प्रेयसी तस्य प्राणेभ्योऽपि गरीयसी । शचीव देवराजस्य परा [11]प्रणयभूमिका ॥६५॥
स तया कल्पवल्ल्येव लसदंशुकभूषया । समाश्लिष्टतनुः श्रीमान् कल्पद्रुम इवाद्युतत् ॥६६॥
स एव पुण्यवांल्लोके सैव पुण्यवती सती । ययोरयोनि[12]जन्मासौ वृषभो [13]भवितात्मजः ॥६७॥
तौ दम्पती तदा तत्र भोगैक[14]रसतां गतौ । भोगभूमिश्रियं साक्षात् चक्रतुर्वियुता[15]मपि ॥६८॥
ताभ्यामलंकृते पुण्ये देशे कल्पांघ्रिपात्यये । तत्पुण्यैर्मुहुराहूतः पुरुहूतः पुरीं व्यधात् ॥६९॥
सुराः ससंभ्रमाः सद्यः पाकशासनशासनात् । तां पुरीं परमानन्दाद् व्यधुः सुरपुरीनिभाम् ॥७०॥

प्रेरित हुए उत्तम देवोंने बड़ी विभूतिके साथ उसका विवाहोत्सव किया था ॥ ५९ ॥ पुण्यरूपी सम्पत्ति उसके मातृभावको प्राप्त हुई थी, लज्जा सखी अवस्थाको प्राप्त हुई थी और अनेक गुण उसके परिजनोंके समान थे। भावार्थ–पुण्यरूपी सम्पत्ति ही उसकी माता थी, लज्जा ही उसकी सखी थी और दया उदारता आदि गुण ही उसके परिवारके लोग थे ॥ ६० ॥ रूप प्रभाव और विज्ञान आदिके द्वारा वह बहुत ही प्रसिद्धिको प्राप्त हुई थी तथा अपने स्वामी नाभिराजके मन रूपी हाथीको बांधनेके लिये खम्भेके समान मालूम पड़ती थी ॥ ६१ ॥ उसके मुखरूपी चन्द्रमाकी मुसकानरूपी चांदनी, नेत्रोंके उत्सवको बढ़ाती हुई अपने पति नाभिराजके मनरूपी समुद्रके क्षोभको हर समय विस्तृत करती रहती थी ॥ ६२ ॥ महाराज नाभिराज रूप और लावण्यरूपी सम्पदाके द्वारा उसे साक्षात् लक्ष्मीके समान मानते थे और उसके विषयमें अपने उत्कृष्ट सन्तोषको उस तरह विस्तृत करते रहते थे जिस तरह कि निर्मल बुद्धिके विषयमें मुनि अपना उत्कृष्ट संतोष विस्तृत करते रहते हैं ॥ ६३ ॥ वह परिहासके समय कुवचन बोलकर पतिके मर्म स्थानको कष्ट नहीं पहुँचाती थी और संभोग-कालमें सदा उनके अनुकूल प्रवृत्ति करती थी इसलिये वह अपने पति नाभिराजके परिहास्य और स्नेहके विषयमें मंत्रिणीका काम करती थी ॥ ६४ ॥ वह मरुदेवी नाभिराजको प्राणोंसे भी अधिक प्यारी थी, वे उससे उतना ही स्नेह करते थे जितना कि इन्द्र इन्द्राणीसे करता है ॥ ६५ ॥ अतिशय शोभायुक्त महाराज नाभिराज देदीप्यमान वस्त्र और आभूषणोंसे सुशोभित उस मरुदेवीसे आलिङ्गित शरीर होकर ऐसे शोभायमान होते थे जैसे देदीप्यमान वस्त्र और आभूषणोंको धारण करनेवाली कल्पलतासे वेष्टित हुआ (लिपटा हुआ) कल्पवृक्ष ही हो ॥ ६६ ॥ संसारमें महाराज नाभिराज ही सबसे अधिक पुण्यवान् थे और मरुदेवी ही सबसे अधिक पुण्यवती थी। क्योंकि जिनके स्वयंभू भगवान् वृषभदेव पुत्र होंगे उनके समान और कौन हो सकता है ? ॥ ६७ ॥ उस समय भोगोपभोगोंमें अतिशय तल्लीनताको प्राप्त हुए वे दोनों दम्पती ऐसे जान पड़ते थे मानो भोगभूमिकी नष्ट हुई लक्ष्मीको ही साक्षात् दिखला रहे हों ॥ ६८ ॥ मरुदेवी और नाभिराजसे अलंकृत पवित्र स्थानमें जब कल्पवृक्षोंका अभाव हो गया तब वहां उनके पुण्यके द्वारा बार बार बुलाये हुए इन्द्रने एक नगरीकी रचना की ॥ ६९ ॥ इन्द्रकी आज्ञासे शीघ्र ही अनेक उत्साही देवोंने बड़े आनन्दके साथ

१ सखीत्वम् । २ –नैरतिरूढि ब०, प०, द० । ३ बन्धने । ४ बन्धस्तम्भत्वम् । ५ भर्त्रा । ६ बुद्धौ । ७ सन्तोषम् । ८ सहायत्वम् । ९ –मकरोत्सास्य अ०, प०, स०, द०, म०, ल० । १० क्रीडायाः । ११ स्नेहस्थानम् । १२ स्वयम्भूः । १३ भविष्यति । १४ भोगमुख्यानुरागताम् । १५ वियुक्ताम् । अपेतामित्यर्थः ।

स्वर्गस्यैव प्रतिच्छन्दं[1] भूलोकेऽस्मिन्निधित्सुभिः[2] । विशेषरमणीयैव [3]निर्ममे सामरैः पुरी ॥७१॥
[4]स्वस्वर्गस्त्रिदशा[5]वासः स्वल्प [6]इत्यवमत्य तम् । [7]परश्शतजनावासभूमिकां तां नु ते व्यधुः ॥७२॥
इतस्ततश्च विक्षिप्तान् आनीयानीय मानवान् । पुरीं निवेशयामासुः विन्यासैर्विविधैः सुराः ॥७३॥
नरेन्द्रभवनं चास्याः सुरैर्मध्ये निवेशितम् । सुरेन्द्रभवन[8]स्पर्द्धि परार्ध्यविभवान्वितम् ॥७४॥
[9]सुत्रामा सूत्र[10]धारोऽस्याः शिल्पिनः कल्पजाः सुराः । [11]वास्तुजातं मही कृत्स्ना सोद्धा[12] नास्तु कथं पुरी॥७५॥
[13]सञ्चस्करुश्च तां वप्रप्राकारपरिखादिभिः । [14]अयोध्यां न परं नाम्ना गुणेनाप्यरिभिः सुराः ॥७६॥
[15]साकेतरूढिरप्यस्याः श्लाघ्यैव [16]स्वैर्निकेतनैः । स्वर्निकेतमिवाह्वातुं[17] [18]साकूतैः केतुबाहुभिः ॥७७॥
[19]सुकोशलेति च ख्यातिं सा देशाभिख्यया[20] गता । विनीतजनताकीर्णा विनीतेति च सा मता ॥७८॥

स्वर्गपुरीके समान उस नगरीकी रचना की ॥ ७० ॥ उन देवोंने वह नगरी विशेष सुन्दर बनाई थी जिससे ऐसा जान पड़ता था मानो इस मध्यम लोकमें स्वर्गलोकका प्रतिबिम्ब रखनेकी इच्छासे ही उन्होंने उसे अत्यन्त सुन्दर बनाया हो ॥ ७१ ॥ 'हमारा स्वर्ग बहुत ही छोटा है क्योंकि यह त्रिदशावास है अर्थात् सिर्फ त्रि+दश तीस व्यक्तियोंके रहने योग्य स्थान है (पक्षमें त्रिदश=देवोंके रहने योग्य स्थान है)'—ऐसा मानकर ही मानो उन्होंने सैकड़ों हजारों मनुष्योंके रहने योग्य उस नगरी (विस्तृत स्वर्ग) की रचना की थी ॥ ७२ ॥ उस समय जो मनुष्य जहां तहां बिखरे हुए रहते थे देवोंने उन सबको लाकर उस नगरीमें बसाया और सबके सुभीतेके लिए अनेक प्रकारके उपयोगी स्थानोंकी रचना की ॥ ७३ ॥ उस नगरीके मध्य भागमें देवोंने राजमहल बनाया था वह राजमहल इन्द्रपुरीके साथ स्पर्धा करनेवाला था और बहुमूल्य अनेक विभूतियोंसे सहित था ॥ ७४ ॥ जब कि उस नगरीकी रचना करनेवाले कारीगर स्वर्गके देव थे, उनका अधिकारी सूत्रधार (मेंट) इन्द्र था और मकान वगैरह बनानेके लिये सम्पूर्ण पृथिवी पड़ी थी तब वह नगरी प्रशंसनीय क्यों न हो ? ॥ ७५ ॥ देवोंने उस नगरीको वप्र (धूलिके बने हुए छोटे कोट), प्राकार (चार मुख्य दरवाजोंसे सहित, पत्थरके बने हुए मजबूत कोट) और परिखा आदिसे सुशोभित किया था । उस नगरीका नाम अयोध्या था । वह केवल नाममात्रसे अयोध्या नहीं थी किन्तु गुणोंसे भी अयोध्या थी । कोई भी शत्रु उससे युद्ध नहीं कर सकते थे इसलिये उसका वह नाम सार्थक था [अरिभिः योद्धुं न शक्या—अयोध्या] ॥ ७६ ॥ उस नगरीका दूसरा नाम साकेत भी था क्योंकि वह अपने अच्छे अच्छे मकानोंसे बड़ी ही प्रशंसनीय थी । उन मकानोंपर पताकाएं फहरा रही थीं जिससे वे ऐसे जान पड़ते थे मानो स्वर्गलोकके मकानोंको बुलानेके लिये अपनी पताकारूपी भुजाओंके द्वारा संकेत ही कर रहे हों । [आकेतैः गृहैः सह वर्तमाना = साकेता, 'स+आकेता'—घरोंसे सहित] ॥ ७७ ॥ वह नगरी सुकोशल देशमें थी इसलिये देशके नामसे 'सुकोशला, इस प्रसिद्धिको भी प्राप्त हुई थी । तथा वह नगरी अनेक विनीत—शिक्षित—पढ़े-लिखे विनयवान् या सभ्य मनुष्योंसे व्याप्त थी इसलिये

१ प्रतिनिधिम् । २ विधित्सुभिः ब० । निधातुमिच्छुभिः । ३ निर्मिता । ४ स्वः आत्मीयः । ५ ध्वनौ त्रिंशज्जनावासः त्रयोदशजनावासो वा इत्यर्थः । ६ अवज्ञां कृत्वा । इत्यवमन्य प०, अ०, स० । ७ शतोपरितनसंख्यावज्जनावासाधारस्थानभूताम् । ८ —न्द्रनगरस्प—म०, ल० । ९ अस्य श्लोकस्य पूर्वार्धः पुरुदेवचम्प्वाश्चतुर्थस्तबकेऽष्टादशश्लोकस्य पूर्वार्धत्वतां प्रापितस्तत्कर्त्रा । १० शिल्पाचार्यः । ११ अगारसमूहम् । १२ उद्घा प्रशस्ता । सोघा— ल० । १३ अलञ्चक्रुः । १४ योद्धुमयोग्याम् । १५ आकेतैः गृहैः सह आवर्तत इति साकेतम् । १६ स्वनिकेतनैः म०, ल० । १७ स्पर्द्धां कर्तुम् । १८ साभिप्रायैः । १९ शोभनः कोशलो यस्याः सा । २० अभिख्यया शोभया ।

बभौ सुकोशला भाविविषयस्यालघीयसः । नाभिलक्ष्मीं दधानासौ राजधानी सुविश्रुता ॥७९॥
सनृपालयमुद्वप्रं [1]दीप्रशालं सखातिकम् । तद्वत्स्यन्नगरारम्भे प्रतिच्छ[2]न्दायितं पुरम् ॥८०॥
पुण्येऽहनि मुहूर्त्ते च शुभयोगे शुभोदये[3] । पुण्याहघोषणां तत्र सुराश्चक्रुः प्रमोदिनः ॥८१॥
[4]अध्यवात्तां तदानीं तौ तमयोध्यां महर्द्धिकाम् । दम्पती परमानन्दाद् [5]आप्तसम्पत्परम्परौ ॥८२॥
विश्वदृश्वैतयोः पुत्रो [6]जनितेति शतक्रतुः । तयोः पूजां व्यधत्तोच्चैः अभिषेकपुरस्सरम्[7] ॥८३॥
षड्भिर्मासैरथैतस्मिन् स्वर्गादव[8]तरिष्यति । रत्नवृष्टिं दिवो देवाः पातयामासुरादरात् ॥८४॥
सङ्क्रन्दननियुक्तेन धनदेन निपातिता । साभात् स्वसंपदौत्सुक्यात् [9]प्रस्थितेवाग्रतो विभोः ॥८५॥
[10]हरिन्मणिमहानीलपद्मरागांशुसंकरैः[11] । सा द्युतत् सुरचापश्रीः [12]प्रगुणत्वमिवाश्रिता ॥८६॥
[13]रैधारैरावतस्थूल[14]समायतकराकृतिः । बभौ पुण्यद्रुमस्येव पृथुः प्रारोहसन्ततिः[15] ॥८७॥
[16]नीरन्ध्रं रोदसी[17] रुद्ध्वा रायां[18] धारा पतन्त्यभात् । सुरद्रुमैरिवोन्मुक्ता सा प्रारोहपरम्परा ॥८८॥
रेजे हिरण्मयी वृष्टिः खाङ्गणान्निपतन्त्यसौ । ज्योतिर्गणप्रभेवोच्चैः आयान्ती सुरसद्मनः ॥८९॥

वह 'विनीता' भी मानी गई थी—उसका एक नाम 'विनीता' भी था ॥ ७८ ॥ वह सुकोशला नामकी राजधानी अत्यन्त प्रसिद्ध थी और आगे होनेवाले बड़े भारी देशकी नाभि (मध्यभागकी) शोभा धारण करती हुई सुशोभित होती थी ॥ ७९ ॥ राजभवन, वप्र, कोट और खाईसे सहित वह नगर ऐसा जान पड़ता था मानो आगे–कर्मभूमिके समयमें होनेवाले नगरोंकी रचना प्रारम्भ करनेके लिये एक प्रतिबिम्ब-नकशा ही बनाया गया हो ॥ ८० ॥ अनन्तर उस अयोध्या नगरीमें सब देवोंने मिलकर किसी शुभ दिन, शुभ मुहूर्त, शुभ योग और शुभ लग्नमें हर्षित होकर पुण्याहवाचन किया ॥ ८१ ॥ जिन्हें अनेक सम्पदाओंकी परम्परा प्राप्त हुई थी ऐसे महाराज नाभिराज और मरुदेवीने अत्यन्त आनन्दित होकर पुण्याहवाचनके समय ही उस अतिशय ऋद्धियुक्त अयोध्या नगरीमें निवास करना प्रारम्भ किया था ॥ ८२ ॥ "इन दोनोंके सर्वज्ञ ऋषभदेव पुत्र जन्म लेंगे" यह समझकर इन्द्रने अभिषेकपूर्वक उन दोनोंकी बड़ी पूजा की थी ॥ ८३ ॥

तदनन्तर छह महीने बाद ही भगवान् वृषभदेव यहाँ स्वर्गसे अवतार लेंगे ऐसा जानकर देवोंने बड़े आदरके साथ आकाशसे रत्नोंकी वर्षा की ॥ ८४ ॥ इन्द्रके द्वारा नियुक्त हुए कुबेरने जो रत्नकी वर्षा की थी वह ऐसी सुशोभित होती थी मानो वृषभदेवकी सम्पत्ति उत्सुकताके कारण उनके आनेसे पहले ही आ गई हो ॥ ८५ ॥ वह रत्नवृष्टि हरिन्मणि इन्द्रनील मणि और पद्मराग आदि मणियोंकी किरणोंके समूहसे ऐसी देदीप्यमान हो रही थी मानो सरलताको प्राप्त होकर (एक रेखामें सीधी होकर) इन्द्रधनुषकी शोभा ही आ रही हो ॥ ८६ ॥ ऐरावत हाथीकी सूँड़के समान स्थूल, गोल और लम्बी आकृतिको धारण करनेवाली वह रत्नोंकी धारा ऐसी शोभायमान होती थी मानो पुण्यरूपी वृक्षके बड़े मोटे अंकुरोंकी संतति ही हो ॥ ८७ ॥ अथवा अतिशय सघन तथा आकाश पृथिवीको रोककर पड़ती हुई वह रत्नोंकी धारा ऐसी सुशोभित होती थी मानो कल्पवृक्षोंके द्वारा छोड़े हुए अंकुरोंकी परम्परा ही हो ॥ ८८ ॥ अथवा आकाश रूपी आँगनसे पड़ती हुई वह सुवर्णमयी वृष्टि ऐसी शोभायमान हो रही थी मानो स्वर्गसे

---

१ दीप्तशा– म०, ल० । २ प्रतिनिधिरिवाचरितम् । ३ शुभग्रहोदये शुभलग्ने इत्यर्थः । 'राशीनामुदयो लग्नं ते तु मेषवृषादयः' इत्यभिधानात् । ४ 'वस निवासे' लुङ् । ५ –नन्दावाप्त– अ०, प०, द०, स०, म० । ६ भविष्यति । ७ –पुरस्सराम् अ०, द०, स०, म०, ल० । ८ आगमिष्यति सति । ९ आगता । १० मरकत । ११ –शुकेसरैः म०, ल० । १२ ऋजुत्वम् । १३ 'प' पुस्तके ८६–८७ श्लोकयोः क्रमभेदोऽस्ति । १४ समानायाम् । १५ शिफासमूहः । १६ निबिडम् । १७ भूम्याकाशे । १८ रत्नसुवर्णानाम् ।

खाद् भ्रष्टा[1] रत्नवृष्टिः सा क्षणमुत्प्रेक्षिता जनैः । [2]गर्भस्रुतिर्निधीनां किं जगत्क्षोभादभूदिति ॥९०॥
खाङ्गणे विप्रकीर्णानि रत्नानि क्षणमाबभुः । द्रुशाखिनां फलानीव [3]शातितानि सुरद्विपैः ॥९१॥
खाङ्गणे गणनातीता रत्नधारा रराज सा । विप्रकीर्णेव कालेन तरला तारकावली ॥९२॥
विद्युदिन्द्रायुधे किञ्चित् जटिले[4] सुरनायकैः । दिवो विगलिते स्याताम् इत्यसौ क्षणमैक्ष्यत ॥९३॥
किमेषा वैद्युती[5] दीप्तिः किमुत द्युसदां[6] द्युतिः । इति व्योमचरैरैक्षि क्षणमाशङ्क्य साम्बरे ॥९४॥
सैषा हिरण्मयी वृष्टिः धनेशेन निपातिता । विभोर्हिरण्यगर्भत्वमिव बोधयितुं जगत् ॥९५॥
षण्मासानिति सापप्तत् पुण्ये नाभिनृपालये स्वर्गावतरणाद् भर्तुः प्राक्तरां [7]द्युम्नसन्ततिः ॥९६॥
पश्चाच्च नवमासेषु वसुधारा तदा[8] मता । अहो महान् प्रभावोऽस्य तीर्थकृत्त्वस्य भाविनः ॥९७॥
रत्नगर्भा धरा जाता हर्षगर्भाः सुरोत्तमाः । क्षोभमा[9]याज्जगद्गर्भो गर्भाधानोत्सवे[10] विभोः[11] ॥९८॥
सिक्ता जलकणैर्गाङ्गैः मही रत्नैरलङ्कृता । गर्भाधाने[12] जगद्भर्तुः गर्भिणीवाभवद् गुरुः ॥९९॥
रत्नैः कीर्णा प्रसूनैश्च सिक्ता गन्धाम्बुभिर्बभौ । [13]तदास्नातानुलिप्तेव भूषिताङ्गी धराङ्गना ॥१००॥

अथवा विमानोंसे ज्योतिषी देवोंकी उत्कृष्ट प्रभा ही आ रही हो ॥ ८९ ॥ अथवा आकाशसे बरसती हुई रत्नवृष्टिको देखकर लोग यही उत्प्रेक्षा करते थे कि क्या जगतमें क्षोभ होनेसे निधियोंका गर्भपात हो रहा है ॥ ९० ॥ आकाशरूपी आँगनमें जहाँ-तहाँ फैले हुए वे रत्न क्षण भरके लिये ऐसे शोभायमान होते थे मानो देवोंके हाथियोंने कल्पवृक्षोंके फल ही तोड़ तोड़कर डाले हों ॥ ९१ ॥ आकाशरूपी आँगनमें वह असंख्यात रत्नोंकी धारा ऐसी जान पड़ती थी मानो समय पाकर फैली हुई नक्षत्रोंकी चञ्चल और चमकीली पङ्क्ति ही हो ॥ ९२ ॥ अथवा उस रत्न-वर्षाको देखकर क्षणभरके लिये यही उत्प्रेक्षा होती थी कि स्वर्गसे मानो परस्पर मिले हुए बिजली और इन्द्रधनुष ही देवोंने नीचे गिरा दिये हों ॥ ९३ ॥ अथवा देव और विद्याधर उसे देखकर क्षणभरके लिये यही आशंका करते थे कि यह क्या आकाशमें बिजलीकी कान्ति है अथवा देवोंकी प्रभा है ? ॥ ९४ ॥ कुबेरने जो यह हिरण्य अर्थात् सुवर्णकी वृष्टि की थी वह ऐसी मालूम होती थी मानो जगत्को भगवान्की 'हिरण्यगर्भता' बतलानेके लिये ही की हो [जिसके गर्भमें रहते हुए हिरण्य-सुवर्णकी वर्षा आदि हो वह हिरण्यगर्भ कहलाता है] ॥ ९५ ॥ इस प्रकार स्वामी वृषभदेवके स्वर्गावतरणसे छह महीने पहलेसे लेकर अतिशय पवित्र नाभिराजके घरपर रत्न और सुवर्णकी वर्षा हुई थी ॥ ९६ ॥ और इसी प्रकार गर्भावतरणसे पीछे भी नौ महीने तक रत्न तथा सुवर्णकी वर्षा होती रही थी सो ठीक ही है क्योंकि होनेवाले तीर्थंकरका आश्चर्यकारक बड़ा भारी प्रभाव होता है ॥ ९७ ॥ भगवान्के गर्भावतरण-उत्सवके समय यह समस्त पृथिवी रत्नोंसे व्याप्त हो गई थी देव हर्षित हो गये थे और समस्त लोक क्षोभको प्राप्त हो गया था ॥ ९८ ॥ भगवान्के गर्भावतरणके समय यह पृथिवी गंगा नदीके जलके कणोंसे सींची गई थी तथा अनेक प्रकारके रत्नोंसे अलंकृत की गई थी इसलिये वह भी किसी गर्भिणी स्त्रीके समान भारी हो गई थी ॥ ९९ ॥ उस समय रत्न और फूलोंसे व्याप्त तथा सुगन्धित जलसे सींची गई यह पृथिवीरूपी स्त्री स्नान कर चन्दनका विलेपन लगाये और आभूषणोंसे सुसज्जित

१ खाद् वृष्टा ल० । भ्रष्टा पतिता । २ स्रुति स्रवः । ३ पातितानि । 'शद्लृ शातने' । ४ घनतां नीते । ५ विद्युत्सम्बन्धिनी । ६ देवानाम् । ७ हिरण्यसमूहः 'हिरण्यं द्रविणं द्युम्नम्' । ८ तथा स०, म०, द०, ल० । ९ आगच्छत् । १० गर्भादानोत्सवे म०, ल० । ११ अयं श्लोकः पुरुदेवचम्पूकर्त्रा स्वकीयग्रन्थस्य चतुर्थस्तवकस्यैकविंशस्थाने स्थापितः । १२ गर्भादाने म०, ल० । १३ स्नानानुलिप्तेव अ०, ल० । स०, म० पुस्तकयोरुभयथा पाठः ।

सम्मता नाभिराजस्य पुष्पवत्यरजस्वला । वसुन्धरा तदा भेजे जिनमातुरनुक्रियाम्[1] ॥१०१॥
अथ सुप्तैकदा देवी सौधे मृदुनि तल्पके । गङ्गातरङ्गसच्छाय[2]दुकूलप्रच्छदोज्ज्वले ॥१०२॥
सापश्यत् षोडशस्वप्नान् इमान् शुभफलोदयान् । निशायाः पश्चिमे यामे जिनजन्मानुशंसिनः ॥१०३॥
गजेन्द्रमैन्द्रमामन्द्रबृंहितं त्रिमदस्रुतम्[3] । ध्वनन्तमिव सासारं[4] सा ददर्श शरद्घनम् ॥१०४॥
गवेन्द्रं दुन्दुभिस्कन्धं कुमुदापाण्डुरद्युतिम् । पीयूषराशिनीकाशं[5] सापश्यत् मन्द्रनिःस्वनम्[6] ॥१०५॥
मृगेन्द्रमिन्दुसच्छायवपुषं रक्तकन्धरम् । ज्योत्स्नया संध्यया चैव घटिताङ्गमिवैक्षत ॥१०६॥
पद्मां पद्ममयोत्तुङ्गविष्टरे सुरवारणैः । स्नाप्यां हिरण्मयैः कुम्भैः अदर्शत् स्वामिव श्रियम् ॥१०७॥
दामनी कुसुमामोद-[7]समालग्नमदालिनी । तज्झङ्कृतैरिवारब्धगाने सानन्दमैक्षत ॥१०८॥
समग्रबिम्बमुज्ज्योत्स्नं ताराधीशं सतारकम् । स्मेरं स्वमिव वक्त्राब्जं समौक्तिकमलोकयत् ॥१०९॥
विधूतध्वान्तमुद्यन्तं भास्वन्तमुदयाचलात् । शातकुम्भमयं कुम्भमिवाद्राक्षीत् स्वमङ्गले ॥११०॥
कुम्भौ हिरण्मयौ पद्मपिहितास्यौ व्यलोकत । स्तनकुम्भाविवात्मीयौ समासक्तकराम्बुजौ ॥१११॥

सी जान पड़ती थी ॥१००॥ अथवा उस समय वह पृथिवी भगवान् वृषभदेवकी माता मरुदेवीकी सदृशताको प्राप्त हो रही थी क्योंकि मरुदेवी जिस प्रकार नाभिराजको प्रिय थी उसी प्रकार वह पृथिवी उन्हें प्रिय थी और मरुदेवी जिस प्रकार रजस्वला न होकर पुष्पवती थी उसी प्रकार वह पृथिवी भी रजस्वला (धूलिसे युक्त) न होकर पुष्पवती (जिसपर फूल बिखरे हुए थे) थी ॥१०१॥

अनन्तर किसी दिन मरुदेवी राजमहलमें गंगाकी लहरोंके समान सफेद और रेशमी चद्दरसे उज्ज्वल कोमल शय्या पर सो रही थी । सोते समय उसने रात्रिके पिछले पहरमें जिनेन्द्र देवके जन्मको सूचित करनेवाले तथा शुभ फल देनेवाले नीचे लिखे हुए स्वप्न देखे ॥ १०२–१०३ ॥ सबसे पहले उसने इन्द्रका ऐरावत हाथी देखा । वह गंभीर गर्जना कर रहा था तथा उसके दोनों कपोल और सूँड़ इन तीन स्थानोंसे मद झर रहा था इसलिये वह ऐसा जान पड़ता था मानो गरजता और बरसता हुआ शरद् ऋतुका बादल ही हो ॥ १०४ ॥ दूसरे स्वप्नमें उसने एक बैल देखा । उस बैलके कंधे नगाड़ेके समान विस्तृत थे, वह सफेद कमलके समान कुछ कुछ शुक्ल वर्ण था । अमृतकी राशिके समान सुशोभित था और मन्द्र गंभीर शब्द कर रहा था ॥ १०५ ॥ तीसरे स्वप्नमें उसने एक सिंह देखा । उस सिंहका शरीर चन्द्रमाके समान शुक्लवर्ण था और कंधे लाल रंगके थे इसलिये वह ऐसा मालूम होता था मानो चाँदनी और संध्याके द्वारा ही उसका शरीर बना हो ॥ १०६ ॥ चौथे स्वप्नमें उसने अपनी शोभाके समान लक्ष्मीको देखा । वह लक्ष्मी कमलोंके बने हुए ऊंचे आसन पर बैठी थी और देवोंके हाथी सुवर्णमय कलशोंसे उसका अभिषेक कर रहे थे ॥१०७॥ पाँचवें स्वप्नमें उसने बड़े ही आनन्दके साथ दो पुष्प-मालाएँ देखीं । उन मालाओं पर फूलोंकी सुगन्धिके कारण बड़े बड़े भौंरे आ लगे थे और वे मनोहर झंकार शब्द कर रहे थे जिससे ऐसा जान पड़ता था मानो उन मालाओंने गाना ही प्रारम्भ किया हो ॥ १०८ ॥ छठवें स्वप्नमें उसने पूर्ण चन्द्रमण्डल देखा । वह चन्द्रमण्डल ताराओंसे सहित था और उत्कृष्ट चाँदनीसे युक्त था इसलिये ऐसा जान पड़ता था मानो मोतियोंसे सहित हँसता हुआ अपना (मरुदेवीका) मुख-कमल ही हो ॥ १०९ ॥ सातवें स्वप्नमें उसने उदयाचलसे उदित होते हुए तथा अन्धकारको नष्ट करते हुए सूर्यको देखा । वह सूर्य ऐसा मालूम होता था मानो मरुदेवीके माङ्गलिक कार्यमें रखा हुआ सुवर्णमय कलश ही हो ॥ ११० ॥ आठवें स्वप्नमें उसने सुवर्णके दो कलश देखे । उन कलशोंके मुख कमलोंसे ढके हुए थे जिससे वे ऐसे जान पड़ते थे मानो हस्तकमलसे आच्छादित हुए अपने दोनों स्तन-

१ सादृश्यम् । २ –सच्छाये अ०, स०, म०, ल० । ३ कपोलद्वयनासिकाग्रमिति त्रिस्थानमदस्राविणाम् । ४ आसारेण सहितम् । ५ सदृशम् । ६ –मन्दनिःस्वनम् म०, ल० । ७ समलग्नमहालिनी ।

झषौ सरसि संफुल्लकुमुदोत्पलपङ्कजे । सापश्यन्नयनायामं[1] दर्शयन्ताविवात्मनः ॥११२॥
तरत्सरोजकिञ्जल्कपिञ्जरोदकमैक्षत । सुवर्णद्रवसम्पूर्णमिव दिव्यं सरोवरम् ॥११३॥
क्षुभ्यन्तमब्धिमुद्वेलं चलत्कल्लोलकाहलम्[2] । सादर्शच्छीकरैर्मोक्तुम् अट्टहासमिवोद्यतम् ॥११४॥
सैंहमासनमुत्तुङ्गं स्फुरन्मणिहिरण्मयम् । सापश्यन्मेरुशृङ्गस्य वैदग्धीं[3] दधदूर्जिताम् ॥११५॥
नाकालयं व्यलोकिष्ट परार्ध्यमणिभासुरम् । स्वसूनोः प्रसवागारमिव[4] देवैरुपाहृतम्[5] ॥११६॥
फणीन्द्रभवनं भूमिम् उद्भिद्योद्गतमैक्षत । प्राग्दृष्टस्वर्विमानेन स्पर्द्धां कर्तुमिवोद्यतम् ॥११७॥
रत्नानां राशिमुत्सर्पदंशुपल्लवितांबरम् । सा निदध्यौ[6] धरादेव्या निधानमिव दर्शितम् ॥११८॥
ज्वलद्भासुरनिर्धूमवपुषं विषमार्चिषम्[7] । प्रतापमिव पुत्रस्य मूर्त्तिरूपं न्यचायत[8] ॥११९॥
न्यशामयच्च[9] तुङ्गाङ्गं पुङ्गवं रुक्मसच्छविम् । प्रविशन्तं स्ववक्त्राब्जं स्वप्नान्ते पीनकन्धरम् ॥१२०॥
ततः [10]प्राबोधिकैस्तूर्यैः ध्वनद्भिः प्रत्यबुद्ध सा । बन्दिनां मङ्गलोद्गीतीः शृण्वतीति सुमङ्गलाः ॥१२१
सुखप्रबोधमाधातुम् एतस्याः पुण्यपाठकाः । तदा प्रपेठुरित्युच्चैः मङ्गलान्यस्खलद्भिरः ॥१२२॥

कलश ही हों ॥ १११ ॥ नौवें स्वप्नमें फूले हुए कुमुद और कमलोंसे शोभायमान तालाबमें क्रीड़ा करती हुई दो मछलियाँ देखीं । वे मछलियाँ ऐसी मालूम होती थीं मानो अपने (मरुदेवीके) नेत्रोंकी लम्बाई ही दिखला रही हों ॥ ११२ ॥ दशवें स्वप्नमें उसने एक सुन्दर तालाब देखा । उस तालाबका पानी तैरते हुए कमलोंकी केशरसे पीला पीला हो रहा था जिससे ऐसा मालूम होता था मानो पिघले हुए सुवर्णसे ही भरा हो॥ ११३ ॥ ग्यारहवें स्वप्नमें उसने क्षुभित हो बेला (तट) को उल्लघंन करता हुआ समुद्र देखा । उस समय उस समुद्रमें उठती हुई लहरोंसे कुछ कुछ गंभीर शब्द हो रहा था और जलके छोटे छोटे कण उड़कर उसके चारों ओर पड़ रहे थे जिससे ऐसा मालूम होता था मानो वह अट्टहास ही कर रहा हो ॥ ११४ ॥ बारहवें स्वप्नमें उसने एक ऊंचा सिंहासन देखा । वह सिंहासन सुवर्णका बना हुआ था और उसमें अनेक प्रकारके चमकीले मणि लगे हुए थे जिससे ऐसा मालूम होता था मानो वह मेरु पर्वतके शिखरकी उत्कृष्ट शोभा ही धारण कर रहा हो ॥ ११५ ॥ तेरहवें स्वप्नमें उसने एक स्वर्गका विमान देखा । वह विमान बहुमूल्य श्रेष्ठ रत्नोंसे देदीप्यमान था और ऐसा मालूम होता था मानो देवोंके द्वारा उपहारमें दिया हुआ, अपने पुत्रका प्रसूतिगृह (उत्पत्तिस्थान) ही हो ॥ ११६ ॥ चौदहवें स्वप्नमें उसने पृथिवीको भेदन कर ऊपर आया हुआ नागेन्द्रका भवन देखा । वह भवन ऐसा मालूम होता था मानो पहले दिखे हुए स्वर्गके विमानके साथ स्पर्धा करनेके लिये ही उद्यत हुआ हो ॥ ११७ ॥ पन्द्रहवें स्वप्नमें उसने अपनी उठती हुई किरणोंसे आकाशको पल्लवित करनेवाली रत्नोंकी राशि देखी । उस रत्नोंकी राशिको मरुदेवीने ऐसा समझा था मानो पृथिवी देवीने उसे अपना खजाना ही दिखाया हो ॥ ११८ ॥ और सोलहवें स्वप्नमें उसने जलती हुई प्रकाशमान तथा धूमरहित अग्नि देखी । वह अग्नि ऐसी मालूम होती थी मानो होनेवाले पुत्रका मूर्तिधारी प्रताप ही हो ॥ ११९ ॥ इस प्रकार सोलह स्वप्न देखनेके बाद उसने देखा कि सुवर्णके समान पीली कान्तिका धारक और ऊंचे कंधोंवाला एक ऊँचा बैल हमारे मुख-कमलमें प्रवेश कर रहा है ॥ १२० ॥

तदनन्तर वह बजते हुए बाजोंकी ध्वनिसे जग गई और बन्दीजनोंके नीचे लिखे हुए मङ्गलकारक मङ्गल-गीत सुनने लगी ॥१२१॥ उस समय मरुदेवीको सुख-पूर्वक जगानेके लिये, जिनकी वाणी अत्यन्त स्पष्ट है ऐसे पुण्य पाठ करनेवाले बन्दीजन उच्च स्वरसे नीचे लिखे अनुसार मङ्गल-

---

१ दैर्घ्यम् । २ अव्यक्तशब्दम् । ३ शोभाम् । ४ प्रसूतिगृहम् । ५ उपायनीकृत्यानीतम् । ६ ददर्श । ७ सप्तार्चिषम् अग्निम् इति यावत् । ८ ऐक्षत 'चायृ पूजायां च' । ९ अपश्यत् । १० प्रबोधे नियुक्तैः ।

प्रबोधसमयोऽयं ते देवि सम्मुखमागतः । रचयन् [1]दरविश्लिष्टदलैरब्जैरिवाञ्जलिम् ॥१२३॥
विभावरी विभात्येषा दधती बिम्बमैन्दवम् । जितं त्वन्मुखकान्त्येव गलज्ज्योत्स्ना [2]परिच्छदम् ॥१२४॥
विच्छायतां गते चन्द्रबिम्बे मन्दीकृतादरम् । जगदानन्दयत्वद्य [3]विबुद्धं त्वन्मुखाम्बुजम् ॥१२५॥
दिगङ्गनामुखानीन्दुः संस्पृशन्नस्फुटैः करैः । [4]आपिपृच्छिषते नूनं [5]प्रवसन्स्वप्रियाङ्गनाः ॥१२६॥
ताराततिरियं व्योम्नि विरलं लक्ष्यतेऽधुना । विप्रकीर्णेव हारश्रीः यामिन्या गतिसंभ्रमात् ॥१२७॥
रूयते[6] कलमामन्द्रम् इतः सरसि सारसैः । स्तोतुकामैरिवास्माभिः समं [7]त्वाम्नात[8]मङ्गलैः ॥१२८॥
उ[9]च्छ्वसत्कमलास्येयम् इतोऽधिगृह[10]दीर्घिकम् । भवन्तीं गायतीवोच्चैः अब्जिनी भ्रमरारवैः ॥१२९॥
निशाविरहसंतप्तम् इतश्चक्राह्वयोर्युगम् । सरस्तरङ्गसंस्पर्शैः इदमाश्वास्यतेऽधुना ॥१३०॥
रथाङ्गमिथुनैरद्य प्रार्थ्यते [11]मित्रसन्निधिः । तीव्रमायासितैरन्तः करैरिन्दोर्विदाहिभिः ॥१३१॥
दुनोति[12] कृकवाकूणां ध्वनिरेष समुच्चरन् । कान्तासन्नवियोगार्त्तिपिशुनः कामिनां मनः ॥१३२॥
यदिन्दोः प्राप्तमान्द्यस्य [13]नोदस्तं मृदुभिः करैः । तत्प्रलीनं तमो नैशं[14] [15]खरांशावुदयोन्मुखे ॥१३३॥

पाठ पढ़ रहे थे ॥ १२२ ॥ हे देवि, यह तेरे जागनेका समय है जो कि ऐसा मालूम होता है मानो कुछ-कुछ फूले हुए कमलोंके द्वारा तुम्हें हाथ ही जोड़ रहा हो ॥ १२३ ॥ तुम्हारे मुखकी कांतिसे पराजित होनेके कारण ही मानो जिसकी समस्त चांदनी नष्ट हो गई है ऐसे चन्द्र-मण्डलको धारण करती हुई यह रात्रि कैसी विचित्र शोभायमान हो रही है ॥१२४॥ हे देवि, अब कांतिरहित चन्द्रमामें जगत्‌का आदर कम हो गया है इसलिये प्रफुल्लित हुआ यह तेरा मुख-कमल ही समस्त जगत्‌को आनन्दित करे ॥ १२५ ॥ यह चन्द्रमा छिपी हुई किरणों (पक्षमें हाथों) से अपनी दिशारूपी स्त्रियोंके मुखका स्पर्श कर रहा है जिससे ऐसा मालूम होता है मानो परदेश जानेके लिए अपनी प्यारी स्त्रियोंसे आज्ञा ही लेना चाहता हो ॥ १२६ ॥ ताराओंका समूह भी अब आकाशमें कहीं-कहीं दिखाई देता है और ऐसा जान पड़ता है मानो जानेकी जल्दीसे रात्रिके हारकी शोभा ही टूट-टूटकर बिखर गई हो ॥ १२७ ॥ हे देवि, इधर तालाबोंपर ये सारस पक्षी मनोहर और गम्भीर शब्द कर रहे हैं और ऐसे मालूम होते हैं मानो मंगल-पाठ करते हुए हम लोगोंके साथ-साथ तुम्हारी स्तुति ही करना चाहते हों ॥ १२८ ॥ इधर घरकी बावड़ीमें भी कमलिनीके कमलरूपी मुख प्रफुल्लित हो गये हैं और उनपर भौंरे शब्द कर रहे हैं जिससे ऐसा मालूम होता है मानो वह कमलिनी उच्च-स्वरसे आपका यश ही गा रही हो ॥ १२९ ॥ इधर रात्रिमें परस्परके विरहसे अतिशय संतप्त हुआ यह चकवा-चकवीका युगल अब तालाबकी तरंगोंके स्पर्शसे कुछ-कुछ आश्वासन प्राप्त कर रहा है ॥१३०॥ अतिशय दाह करनेवाली चन्द्रमाकी किरणोंसे हृदयमें अत्यन्त दुखी हुए चकवा चकवी अब मित्र (सूर्य) के समागमकी प्रार्थना कर रहे हैं भावार्थ—जैसे जब कोई किसीके द्वारा सताया जाता है तब वह अपने मित्रके साथ समागमकी इच्छा करता है वैसे ही चकवा-चकवी चन्द्रमाके द्वारा सताये जानेपर मित्र अर्थात् सूर्यके समागमकी इच्छा कर रहे हैं ॥१३१॥ इधर बहुत जल्दी होनेवाले स्त्रियोंके वियोगसे उत्पन्न हुए दुःखकी सूचना करनेवाली मुरगोंकी तेज आवाज कामी पुरुषोंके मनको संताप पहुँचा रही है ॥ १३२ ॥ शांत स्वभावी चन्द्रमाकी कोमल किरणोंसे रात्रिका जो अन्धकार नष्ट नहीं हो सका था वह अब तेज

---

१ ईषद् विकसित । २ परिकरः । ३ विकसितम् । ४ अनुज्ञापयितुमिच्छति । ५ गच्छन् । ६ शब्द्यते । 'रु शब्दे' । ७ त्वा त्वाम् । ८ आम्नात अभ्यस्त । त्वामात्तमङ्गलैः अ०, प०, म०, ल० । ९ विकसत्कमलानना । १० गृहदीर्घिकायाम् । ११ सूर्यसमीपम् सहायसमीपं वा । १२ परितापयति 'टुदु परितापे' । १३ न नाशितम् । १४ निशाया इदम् । १५ रवौ ।

तमः शार्वरमुद्भिद्य करैर्भानोरुदेष्यतः । सेनेवाग्रेसरी सन्ध्या स्फुरत्येषानुरागिणी ॥१३४॥
मित्रमण्डलमुद्गच्छद् इदमातनुते द्वयम् । विकासमब्जिनीषण्डे[1] ग्लानिं च कुमुदाकरे ॥१३५॥
[2]विकस्वरं समालोक्य पद्मिन्याः पङ्कजाननम् । सासूयेव परिम्लानिं प्रयात्येषा कुमुद्वती ॥१३६॥
पुरः प्रसारयन्नुच्चैः करानुद्याति भानुमान् । प्राचीदिगङ्गनागर्भात् तेजोगर्भ इवार्भकः ॥१३७॥
लक्ष्यते निषधोत्सङ्गे भानुरारक्तमण्डलः । पुञ्जीकृत इवैकत्र सान्ध्यो रागः सुरेश्वरैः ॥१३८॥
तमो [3]विधूतमुद्भूतः चक्रवाकपरिक्लमः । प्रबोधिताब्जिनी भानोः [4]जन्मनोन्मीलितं[5] जगत् ॥१३९॥
समन्तादापतत्येष[6] प्रभाते शिशिरो मरुत् । कमलामोदमाकर्षन् प्रफुल्लादब्जिनीवनात् ॥१४०॥
इति प्रस्पष्ट एवायं प्रबोधसमयस्तव । देवि मुञ्चाधुना तल्पं शुचि हंसीव सैकतम् ॥१४१॥
[7]सुप्रातमस्तु ते नित्यं कल्याणशतभाग्भव । प्राचीवार्कं प्रसोषीष्ठा[8] पुत्रं त्रैलोक्यदीपकम् ॥१४२॥
स्वप्नसंदर्शनादेव प्रबुद्धा प्राक्तरां पुनः । प्रबोधितेत्यदर्शत् सा संप्रमोदमयं जगत् ॥१४३॥
प्रबुद्धा च शुभस्वप्नदर्शनानन्दनिर्भरात्[9] । तनुं कण्टकितामूहे साब्जिनीव विकासिनी ॥१४४॥

किरणवाले सूर्यके उदयके सन्मुख होते ही नष्ट हो गया है ॥ १३३ ॥ अपनी किरणोंके द्वारा रात्रि संबन्धी अंधकारको नष्ट करनेवाला सूर्य आगे चलकर उदित होगा परन्तु उससे अनुराग (प्रेम और लाली) करनेवाली संध्या पहलेसे ही प्रकट हो गई है और ऐसी जान पड़ती है मानो सूर्यरूपी सेनापतिकी आगे चलनेवाली सेना ही हो ॥ १३४ ॥ यह उदित होता हुआ सूर्यमण्डल एक साथ दो काम करता है—एक तो कमलिनियोंके समूहमें विकासको विस्तृत करता है और दूसरा कुमुदिनियोंके समूहमें म्लानताका विस्तार करता है ॥ १३५ ॥ अथवा कमलिनीके कमलरूपी मुखको प्रफुल्लित हुआ देखकर यह कुमुदिनी मानो ईर्षासे म्लानताको प्राप्त हो रही है ॥ १३६ ॥ यह सूर्य अपने ऊंचे कर अर्थात् किरणोंको (पक्षमें हाथोंको) सामने फैलाता हुआ उदित हो रहा है जिससे ऐसा मालूम होता है मानो पूर्व दिशारूपी स्त्रीके गर्भसे कोई तेजस्वी बालक ही पैदा हो रहा हो ॥ १३७ ॥ निषध पर्वतके समीप आरक्त (लाल) मण्डलका धारक यह सूर्य ऐसा जान पड़ता है मानो इन्द्रोंके द्वारा इकट्ठा किया हुआ सब संध्याओंका राग (लालिमा) ही हो ॥ १३८ ॥ सूर्यका उदय होते ही समस्त अंधकार नष्ट हो गया, चकवा-चकवियोंका क्लेश दूर हो गया, कमलिनी विकसित हो गई और सारा जगत् प्रकाशमान हो गया ॥ १३९ ॥ अब प्रभातके समय फूले हुए कमलिनियोंके वनसे कमलोंकी सुगन्ध ग्रहण करता हुआ यह शीतल पवन सब ओर बह रहा है ॥ १४० ॥ इसलिए हे देवि, स्पष्ट ही यह तेरे जागनेका समय आ गया है । अतएव जिस प्रकार हंसिनी बालूके टीलेको छोड़ देती है उसी प्रकार तू भी अब अपनी निर्मल शय्या छोड़ ॥ १४१ ॥ तेरा प्रभात सदा मंगलमय हो, तू सैकड़ों कल्याणोंको प्राप्त हो और जिस प्रकार पूर्व दिशा सूर्यको उत्पन्न करती है उसी प्रकार तू भी तीन लोकको प्रकाशित करनेवाले पुत्रको उत्पन्न कर ॥ १४२ ॥ यद्यपि वह मरुदेवी स्वप्न देखनेके कारण, बन्दीजनोंके मंगल-गानसे बहुत पहले ही जाग चुकी थी, तथापि उन्होंने उसे फिरसे जगाया । इस प्रकार जागृत होकर उसने समस्त संसारको आनंदमय देखा ॥ १४३ ॥ शुभ स्वप्न देखनेसे जिसे अत्यन्त आनन्द हो रहा है ऐसी जागी हुई मरुदेवी फूली हुई कमलिनीके समान कंटकित अर्थात् रोमांचित (पक्षमें काँटोंसे व्याप्त) शरीर धारण कर रही थी ॥ १४४ ॥

१ –खण्डे अ०, म०, द०, स०, ल० । २ विकसनशीलम् । ३ विधुत स०, ल० । ४ उदयेन । ५ प्रकाशितम् । ६ आवाति । ७ शोभनं प्रातःकल्यं यस्याहः तत् । ८ 'षू प्राणिप्रसवे' लिङ् । ९ –निर्भरा ल० ।

ततस्तद्दर्शनानन्दं वोढुं स्वाङ्गेष्विवाक्षमा । कृतमङ्गलनेपथ्या सा भेजे पत्युरन्तिकम् ॥१४५॥
उचितेन नियोगेन दृष्ट्वा सा नाभिभूभुजम् । तस्मै नृपासनस्थाय सुखासीना व्यजिज्ञपत् ॥१४६॥
देवाद्य यामिन्याभागे पश्चिमे सुखनिद्रिता । अद्राक्षं षोडश स्वप्नान् इमानत्यद्भुतोदयान् ॥१४७॥
गजेन्द्रमवदाताङ्गं वृषभं[1] दुन्दुभिस्वनम् । सिंहमुल्लङ्घिताद्र्यग्रं लक्ष्मीं स्नाप्यां सुरद्विपैः ॥१४८॥
दामनी लम्बमाने खे शीतांशुं द्योतिताम्बरम् । प्रोद्यन्तमब्जिनीबन्धुं बन्धुरं झषयुग्मकम् ॥१४९॥
कलशावमृतापूर्णौ सरः स्वच्छाम्बु साम्बुजम् । वाराशिं क्षुभितावर्त्तं सैंहं भासुरमासनम् ॥१५०॥
विमानमापतत् स्वर्गाद् भुवो[2] भ[3]वनमुद्भवत् । रत्नराशिं स्फुरद्रश्मिं ज्वलनं प्रज्वलद्द्युतिम् ॥१५१॥
दृष्ट्वैतान् षोडशस्वप्नान् अथादर्शं महीपते । वदने मे विशन्तं तं गवेन्द्रं कनकच्छविम् ॥१५२॥
वदैतेषां फलं देव शुश्रूषा मे विवर्द्धते । अपूर्वदर्शनात् कस्य न स्यात् कौतुकवन्मनः ॥१५३॥
अथासाववधिज्ञानविबुद्धस्वप्नसत्फलः । प्रोवाच तत्फलं देव्यै लसद्दशनदीधितिः ॥१५४॥
शृणु देवि महान् पुत्रो भविता ते गजेक्षणात् । समस्तभुवनज्येष्ठो महावृषभदर्शनात् ॥१५५॥
सिंहेनानन्तवीर्योऽसौ दाम्ना सद्धर्मतीर्थकृत् । लक्ष्म्याभिषेकमाप्तासौ[4] मेरोर्मूर्ध्नि सुरोत्तमैः ॥१५६॥
पूर्णेन्दुना जनाह्लादी भास्वता भास्वरद्युतिः । कुम्भाभ्यां निधिभागी स्यात् सुखी मत्स्ययुगेक्षणात् ॥१५७॥
सरसा लक्षणोद्भासी सोऽब्धिना केवली भवेत् । सिंहासनेन साम्राज्यम् अवाप्स्यति जगद्गुरुः ॥१५८॥

जा रहा हो और कन्दराओंके द्वारा बाहर उगला जा रहा हो ॥ १४४ ॥ उस समय मेरुपर्वत पर अभिषेक जलके जो झिरने पड़ रहे थे उनसे ऐसा मालूम होता था मानो वह यह कहता हुआ स्वर्गको धिक्कार ही दे रहा हो कि अब स्वर्ग क्या वस्तु है? उसे तो देवोंने भी छोड़ दिया है। इस समय समस्त देव हमारे यहां आ गये हैं इसलिये हमें ही साक्षात् स्वर्ग मानना योग्य है ॥ १४५ ॥ उस जलके प्रवाहने समस्त आकाशको ढक लिया था, ज्योतिष्पटलको घेर लिया था, मेरुपर्वतको आच्छादित कर लिया था और पृथिवी तथा आकाशके अन्तरालको रोक लिया था ॥ १४६ ॥ उस जलके प्रवाहने मेरुपर्वतके अच्छे वनोंमें क्षणभर विश्राम किया और फिर संतुष्ट हुए के समान वह दूसरे ही क्षणमें वहांसे दूसरी जगह व्याप्त हो गया ॥ १४७ ॥ वह जलका बड़ा भारी प्रवाह वनके भीतर वृक्षोंके समूहसे रुक जानेके कारण धीरे धीरे चलता था परन्तु ज्योंही उसने वनके मार्गको पार किया त्योंही वह शीघ्र ही दूर तक फैल गया ॥ १४८ ॥ मेरुपर्वत पर फैलता और आकाशको आच्छादित करता हुआ वह जलका प्रवाह ऐसा सुशोभित हो रहा था मानो मेरुपर्वतको सफेद वस्त्रोंसे ढंक ही रहा हो ॥ १४९ ॥ सब ओरसे मेरुपर्वतको आच्छादित कर बहता हुआ वह क्षीरसागरके जलका प्रवाह आकाशगंगाके जलप्रवाहकी शोभा धारण कर रहा था ॥ १५० ॥ मेरु पर्वतकी गुफाओंमें शब्द करता हुआ वह जलका प्रवाह ऐसा मालूम होता था मानो शब्दाद्वैतका ही विस्तार कर रहा हो अथवा सारी सृष्टिको जल रूप ही सिद्ध कर रहा हो ॥ भावार्थ–शब्दाद्वैत वादियोंका कहना है कि संसारमें शब्द ही शब्द है शब्दके सिवाय और कुछ भी नहीं है। उस समय सुमेरुकी गुफाओंमें पड़ता हुआ जल प्रवाह भी भारी शब्द कर रहा था इसलिये ऐसा जान पड़ता था मानो शब्दाद्वैतवादका समर्थन ही कर रहा हो। ईश्वरसृष्टिवादियोंका कहना है कि यह समस्त सृष्टि पहले जलमयी थी, उसके बाद ही स्थल आदिकी रचना हुई है उस समय सब ओर जल ही जल दिखलाई पड़ रहा था इसलिये ऐसा मालूम होता था मानो वह सारी सृष्टिको जलमय ही सिद्ध करना चाहता हो ॥ १५१ ॥ वह मेरुपर्वत ऊपरसे लेकर नीचे पृथिवीतल तक सभी ओर जल प्रवाहसे तर हो रहा था इसलिये प्रत्यक्ष ज्ञानी देवोंको भी अज्ञात पूर्व मालूम होता था अर्थात् ऐसा जान पड़ता था

१ स्वर्गः। २ हसति स्म। –मित्यकषीन्– प०, द०। –मित्यकथन्– अ०, स०। ३ स्वर्गम्। ४ 'ह्वगे संवरणे'। ५ 'ऊर्णुञ् आच्छादने'। ६ द्यावापृथिव्यौ। ७ अहिंस्येषु। अच्छेद्येष्वित्यर्थः। ८ प्राप्तसन्तोष इव। ९ व्यानशे। १० अनुत्कटः। ११ 'आराद् दूरसमीपयोः'। १२ मेरौ। १३ आच्छादयन्। १४ आच्छादिताकाशः। १५ छादयित्वा। १६ प्रवाहरूपेण गच्छन्। १७ धरति स्म। १८ स्वः स्रवन्त्याः अ०, प०, द०, स०, म०, ल०। १९ गङ्गाजलप्रवाहस्य। २० स्फोटवादम्। २१ –मिवाप्मयीम् म०, ल०। जलमयीन्। २२ लसति स्म। २३ –नन्नद्रिकुक्षिषु द०, म०, ल०। दीप्तगुहासु। २४ जलप्रवाहैः। २५ प्रत्यक्षज्ञानिनाम्।

न मेरुरयमुत्फुल्लनमेरुतरुराजितः । 'राजतो गिरिरेष स्याद् उल्लसद्बिसपाण्डरः[2] ॥१५३॥
पीयूषस्यैव राशिर्नु स्फाटिको नु शिलोच्चयः[3] । सुधाधवलितः किन्तु प्रासादस्त्रिजगच्छ्रियः ॥१५४॥
वितर्कमिति तन्वानो गिरिराजे पयःप्लवः । व्यानशे [4]विश्वदिक्कान्तो दिक्कान्ताः स्नपयन्निव ॥१५५॥
ऊर्ध्वमुच्चलिताः केचित् शीकरा विश्वदिग्गताः[5] । श्वेतच्छत्रश्रियं मेरोः आतेनुर्विधुनिर्मलाः ॥१५६॥
हारनीहारकल्हारकुमुदाम्भोजसत्त्विषः । प्रावर्त्तन्त पयःपूरा यशःपूरा इवार्हतः ॥१५७॥
गगनाङ्गणपुष्पोपहारा हारामलत्विषः । दिग्वधूकर्णपूरास्ते बभुः स्नपनाम्बुशीकराः ॥१५८॥
शीकरैराकिरन्नाकम् आलोकान्तविसर्पिभिः । ज्योतिर्लोकमनुप्राप्य जजृम्भे सोऽम्भसां प्लवः ॥१५९॥
स्नानपूरे निमग्नाङ्ग्यः तारास्तरलरोचिषः । मुक्ताफलश्रियं भेजुः विप्रकीर्णाः समन्ततः ॥१६०॥
तारकाः क्षणमध्यास्य स्नानपूरं विनिस्सृताः । पयोलवस्रुतो[6] रेजुः [7]करकाणामिवालयः[8] ॥१६१॥
स्नानाम्भसि बभौ भास्वान् तत्क्षणं[9] [10]कृतनिर्वृतिः । तप्तः पिण्डो महाँल्लौहः पानीयमिव पायितः ॥१६२॥
पयःपूरे वहत्यस्मिन् श्वेतभानु[11]र्व्यभाव्यत । जरद्धंस इवोदूढ[12]जडिमा [13]मन्थरं तरन् ॥१६३॥

जैसे उसे पहले कभी देखा ही न हो ॥ १५२ ॥ उस समय वह पर्वत शोभायमान मृणालके समान सफेद हो रहा था और फूले हुए नमेरु वृक्षोंसे सुशोभित था इसलिये यही मालूम होता था कि वह मेरु नहीं है किन्तु कोई दूसरा चांदीका पर्वत है ॥ १५३ ॥ क्या यह अमृतकी राशि है ? अथवा स्फटिक मणिका पर्वत है ? अथवा चूनेसे सफेद किया गया तीनों जगत्की लक्ष्मीका महल है इस प्रकार मेरु पर्वतके विषयमें वितर्क पैदा करता हुआ वह जलका प्रवाह सभी दिशाओंके अन्त तक इस प्रकार फैल गया मानो दिशारूपी स्त्रियोंका अभिषेक ही कर रहा हो ॥ १५४–१५५ ॥ चन्द्रमाके समान निर्मल उस अभिषेक जलकी कितनी ही बूंदें ऊपरको उछल कर सब दिशाओंमें फैल गई थीं जिससे ऐसी जान पड़ती थीं मानो मेरुपर्वत पर सफेद छत्रकी शोभा ही बढ़ा रही हों ॥ १५६ ॥ हार, बर्फ, सफेद कमल और कुमुदोंके समान सफेद जलके प्रवाह सब ओर प्रवृत्त हो रहे थे और वे ऐसे जान पड़ते थे मानो जिनेन्द्र भगवान्के यशके प्रवाह ही हों ॥ १५७ ॥ हारके समान निर्मल कान्तिवाले वे अभिषेक जलके छींटे ऐसे मालूम होते थे मानो आकाशरूपी आंगनमें फूलोंके उपहार ही चढ़ाये गये हों अथवा दिशारूपी स्त्रियोंके कानोंके कर्णफूल ही हों ॥ १५८ ॥ वह जलका प्रवाह लोकके अन्त तक फैलनेवाली अपनी बूंदोंसे ऊपर स्वर्गतक व्याप्त होकर नीचेकी ओर ज्योतिष्पटल तक पहुँचकर सब ओर वृद्धिको प्राप्त हो गया था ॥ १५९ ॥ उस समय आकाशमें चारों ओर फैले हुए तारागण अभिषेकके जलमें डूबकर कुछ चंचल प्रभाके धारक हो गये थे इसलिये बिखरे हुए मोतियोंके समान सुशोभित हो रहे थे ॥ १६० ॥ वे तारागण अभिषेकजलके प्रवाहमें क्षणभर रहकर उससे बाहिर निकल आये थे परन्तु उस समय भी उनसे कुछ कुछ पानी चू रहा था इसलिये ओलोंकी पङ्क्तिके समान शोभायमान हो रहे थे ॥ १६१ ॥ सूर्य भी उस जलप्रवाहमें क्षण भर रहकर उससे अलग हो गया था, उस समय वह ठंढा भी हो गया था जिससे ऐसा मालूम होता था मानो कोई तपा हुआ लोहेका बड़ा भारी गोला पानीमें डालकर निकाला गया हो ॥ १६२ ॥ उस बहते हुए जलप्रवाहमें चन्द्रमा ऐसा मालूम होता था मानो ठण्डसे जड़ होकर (ठिठुर कर) धीरे धीरे तैरता हुआ एक बूढ़ा हंस ही हो ॥ १६३ ॥ उस समय ग्रहमण्डल भी चारों ओर फैले हुए जलके प्रवाहसे आकृष्ट होकर (खिंचकर) विपरीत गतिको प्राप्त हो गया था। मालूम होता है कि उसी कारणसे

१ रजतमयः । २ –सद्बिसपाण्डुरः अ०, प०, ल०, ट० । बिसवद्धवलः । ३ पर्वतः । ४ विश्वदिक्पर्यन्तः । ५ –दिग्गताः स० । ६ स्रवन्तः । ७ वर्षोपलानाम् । 'वर्षोपलस्तु करकः' इत्यभिधानात् । ८ पङ्क्तयः । ९ तत्क्षणात् प०, द० । १० कृतसुखः । ११ चन्द्रः । १२ धृतजडत्वम् । १३ मन्दं तरन् ।

ग्रहमण्डलमाक्रष्टं [1]पर्यस्तैस्सलिलप्लवैः । [2]विपर्यस्तां गतिं भेजे [3]वक्रचारमिवाश्रितम् ॥१६४॥
[4]भगणः प्रगुणीभूत[5]किरणं जलविप्लुतम्[6] । सिषेवे पूषणं[7] मोहात् [8]प्रालेयांशुविशङ्कया ॥१६५॥
ज्योतिश्चक्रं क्षरज्ज्योतिः क्षीरपूरमनुभ्रमत् । वेलातिक्रमभीत्येव नास्थादेकमपि क्षणम् ॥१६६॥
ज्योतिःपटलमित्यासीत् स्नानौघैः[9] क्षणमाकुलम् । कुलालचक्रमाविद्धमिव तिर्यक्परिभ्रमत्[10] ॥१६७॥
पर्यापतद्भिरुत्सङ्गाद् गिरेः स्वर्लोकधारिणः । विरलैः स्नानपूरैस्तैः नृलोकः पावनीकृतः ॥१६८॥
निर्वापिता मही कृत्स्ना कुलशैलाः पवित्रिताः । कृता निरीतयो देशाः प्रजाः क्षेमेण योजिताः ॥१६९॥
कृत्स्नामिति जगन्नाडीं पवित्रीकुर्वतामुना । किं नाम स्नानपूरेण श्रेयश्शेषितमङ्गिनाम् ॥१७०॥
अथ तस्मिन् महापूरे ध्वानापूरितदिङ्मुखे । प्रशान्ते शमिताशेषभुवनोष्मण्य[11]शेषतः ॥१७१॥
[12]रेचितेषु महामेरोः कन्दरेषु जलप्लवैः । प्रत्याश्वासमिवायाते मेरौ [13]सवनकानने ॥१७२॥
धूपेषु दह्यमानेषु सुगन्धीन्धनयोनिषु । ज्वलत्सु मणिदीपेषु [14]भक्तिमात्रोपयोगिषु ॥१७३॥
[15]पुण्यपाठान् पठत्सूच्चैः संपाठं[16] सुरवन्दिषु । गायन्तीषु सुकण्ठीषु किन्नरीषु कलस्वनम् ॥१७४॥
जिनकल्याणसम्बन्धि[17]मङ्गलोद्गीतिनिस्स्वनैः । कुर्वाणे विश्वगीर्वाण[18]लोकस्य श्रवणोत्सवम् ॥१७५॥

वह अब भी वक्रगतिका आश्रय लिये हुए है ॥ १६४ ॥ उस समय जलमें डूबे हुए तथा सीधी और शान्त किरणोंसे युक्त सूर्यको भ्रान्तिसे चन्द्रमा समझकर तारागण भी उसकी सेवा करने लगे थे ॥ १६५ ॥ सम्पूर्ण ज्योतिष्चक्र जलप्रवाहमें डूबकर कान्ति रहित हो गया था और उस जलप्रवाहके पीछे पीछे चलने लगा था मानो अवसर चूक जानेके भयसे एक क्षण भी नहीं ठहर सका हो ॥ १६६ ॥ इस प्रकार स्नानजलके प्रवाहसे व्याकुल हुआ ज्योतिष्पटल क्षणभरके लिये, घुमाये हुए कुम्हारके चक्रके समान तिरछा चलने लगा था ॥ १६७ ॥ स्वर्गलोकको धारण करनेवाले मेरु पर्वतके मध्य भागसे सब ओर पड़ते हुए भगवान्के स्नानजलने जहाँ तहाँ फैल कर समस्त मनुष्यलोकको पवित्र कर दिया था ॥ १६८ ॥ उस जलप्रवाहने समस्त पृथिवी संतुष्ट (सुखरूप) कर दी थी, सब कुलाचल पवित्र कर दिये थे, सब देश अतिवृष्टि आदि ईतियोंसे रहित कर दिये थे, और समस्त प्रजा कल्याणसे युक्त कर दी थी। इस प्रकार समस्त लोक-नाडीको पवित्र करते हुए उस अभिषेकजलके प्रवाहने प्राणियोंका ऐसा कौनसा कल्याण बाकी रख छोड़ा था जिसे उसने न किया हो ? अर्थात् कुछ भी नहीं ॥ १६९-१७० ॥

अथानन्तर, अपने 'कलकल', शब्दोंसे समस्त दिशाओंको भरनेवाला, तथा समस्त लोककी उष्णता शान्त करनेवाला वह जलका बड़ा भारी प्रवाह जब बिल्कुल ही शान्त हो गया ॥ १७१ ॥ जब मेरुपर्वतकी गुफाएँ जलसे रिक्त (खाली) हो गईं, जल और वन सहित मेरुपर्वतने कुछ विश्राम लिया ॥ १७२ ॥ जब सुगन्धित लकड़ियोंकी अग्निमें अनेक प्रकारके धूप जलाये जाने लगे और मात्र भक्ति प्रकट करनेके लिये मणिमय दीपक प्रज्वलित किये गये ॥१७३॥ जब देवोंके बन्दीजन अच्छी तरह उच्च स्वरसे पुण्य बढ़ानेवाले अनेक स्तोत्र पढ़ रहे थे, मनोहर आवाजवाली किन्नरी देवियाँ मधुर शब्द करती हुई गीत गा रही थीं ॥ १७४ ॥ जब जिनेन्द्र भगवान्के कल्याणक सम्बन्धी मंगल गानेके शब्द समस्त देव लोगोंके कानोंका उत्सव

१ परितः क्षिप्तैः । २ विप्रकीर्णाम् । ३ वक्रगमनम् । ४ नक्षत्रसमूहः । ५ ऋजुभूतकरम् । ६ धौतम् । ७ सूर्यम् । ८ चन्द्रः । ९ स्नानजलप्रवाहैः । १० -परिभ्रमम् । ११ उष्मे । १२ परित्यक्तेषु । १३ सजलवने । १४ जिनदेहदीप्तेः सकाशात् निजदीप्तेर्व्यर्थत्वात् । १५ प्रशस्यगद्य-पद्यादिमङ्गलान् । १६ सम्यक्पाठं यथा भवति तथा । १७ मङ्गलगीत । १८ जनस्य ।

जिनजन्माभिषेकार्थ[1]प्रतिबद्धैर्निदर्शनैः[2] । [3]नाट्यवेदं प्रयुञ्जाने [4]सुरशैलूषपेटके ॥१७६॥
गन्धर्वारब्धसङ्गीतमृदङ्गाध्वनिमूर्च्छिते[5] । दुन्दुभिध्वनिते मन्द्रे श्रोत्रानन्दं प्रतन्वति ॥१७७॥
कुचकुम्भैः सुरस्त्रीणां [6]कुङ्कमाङ्कैरलङ्कृते । हाररोचिःप्रसूनौघकृतपुष्पोपहारके ॥१७८॥
मेरुरङ्गेऽप्सरोवृन्दे सलीलं परिनृत्यति । [7]करणैरङ्गहारैश्च[8] [9]सलयैश्च परिक्रमैः[10] ॥१७९॥
शृण्वत्सु मङ्गलोद्गीतीः सावधानं सुधाशिषु[11] । वृत्तेषु जनजल्पेषु जिनप्राभवशंसिषु ॥१८०॥
नान्दीतूर्यरवे विश्वग् आपूरयति रोदसी[12] । जयघोषप्रतिध्वानैः स्तुवान इव मन्दरे ॥१८१॥
सञ्चरत्खचरी[13]वक्त्रधर्माम्बुकणचुम्बिनी । [14]धुतोपान्तवने वाति मन्दं मन्दं [15]नभस्वति ॥१८२॥
सुरदौवारिकैश्चित्रवेत्रदण्डधरैर्मुहुः । [16]सामाजिकजने विष्वक् [17]सार्यमाणे सहुङ्कृतम् ॥१८३॥
तत्समुत्सारणत्रासात् मूकीभावमुपागते । [18]अनियुक्तजने सद्यः चित्रार्पित इव स्थिते ॥१८४॥
शुद्धाम्बुस्नपने निष्ठां[19] गते गन्धाम्बुभिश्शुभैः । ततोऽभिषेक्तुमीशानं[20] [21]शतयज्वा [22]प्रचक्रमे ॥१८५॥
[दशभिः कुलकम्]

श्रीमद्गन्धोदकैर्दिव्यैः[23]गन्धाहूतमधुव्रतैः । अभ्यषिञ्चद् विधानज्ञो विधातारं शताध्वरः ॥१८६॥
पूता गन्धाम्बुधारासौ आपतन्ती तनौ विभोः । तद्गन्धातिशयात् प्राप्तलज्जेवासीदवाङ्मुखी[24] ॥१८७॥

कर रहे थे ॥ १७५ ॥ जब नृत्य करनेवाले देवोंका समूह जिनेंद्रदेवके जन्मकल्याणसम्बन्धी अर्थोंसे सम्बन्ध रखनेवाले अनेक उदाहरणोंके द्वारा नाट्यवेदका प्रयोग कर रहे थे—नृत्य कर रहे थे ॥ १७६ ॥ जब गन्धर्व देवोंके द्वारा प्रारम्भ किये हुए संगीत और मृदंगकी ध्वनिसे मिला हुआ दुन्दुभि बाजोंका गम्भीर शब्द कानोंका आनन्द बढ़ा रहा था ॥ १७७ ॥ जब केशर लगे हुए देवांगनाओंके स्तनरूपी कलशोंसे शोभायमान, तथा हारोंकी किरणरूपी पुष्पोंके उपहारसे युक्त सुमेरुपर्वतरूपी रंगभूमिमें अप्सराओंका समूह हाथ उठाकर, शरीर हिलाकर और तालके साथ साथ फिरकी लगाकर लीलासहित नृत्य कर रहा था ॥ १७८-१७९ ॥ जब देवलोग सावधान होकर मंगलगान सुन रहे थे, और अनेक जनोंके बीच भगवान्के प्रभावकी प्रशंसा करनेवाली बात-चीत हो रही थी ॥ १८० ॥ जब नांदी, तुरही आदि बाजोंके शब्द सब ओर आकाश और पृथिवीके बीचके अन्तरालको भर रहे थे, जब जय घोषणाकी प्रतिध्वनियोंसे मानो मेरुपर्वत ही भगवान्की स्तुति कर रहा था ॥ १८१ ॥ जब सब ओर घूमती हुई विद्याधरियोंके मुखके स्वेदजलके कणोंका चुम्बन करनेवाला वायु समीपवर्ती वनोंको हिलाता हुआ धीरे धीरे बह रहा था ॥ १८२ ॥ जब विचित्र वेत्रके दण्ड हाथमें लिये हुए देवोंके द्वारपाल सभाके लोगोंको हुंकार शब्द करते हुए चारों ओर पीछे हटा रहे थे ॥ १८३ ॥ 'हमें द्वारपाल पीछे न हटा दें' इस डरसे कितने ही लोग चित्रलिखितके समान जब चुपचाप बैठे हुए थे ॥ १८४ ॥ और जब शुद्ध जलका अभिषेक समाप्त हो गया था तब इन्द्रने शुभ सुगन्धित जलसे भगवान्का अभिषेक करना प्रारम्भ किया ॥ १८५ ॥ विधिविधानको जाननेवाले इन्द्रने अपनी सुगन्धिसे भ्रमरोंका आह्वान करनेवाले सुगन्धित जलरूपी द्रव्यसे भगवान्का अभिषेक किया ॥ १८६ ॥ भगवान्के शरीरपर पड़ती हुई वह सुगन्धित जलकी पवित्र धारा ऐसी मालूम होती थी मानो भगवान्के शरीरकी उत्कृष्ट सुगन्धिसे लज्जित होकर ही अधोमुखी (नीचेको

---

१ सम्बद्धैः । २ भूमिकाभिः । ३ नाट्यशास्त्रम् । ४ देवनर्तकवृन्दे । 'शैलालिनस्तु शैलूषजाया जीवाः कृशाश्विनः' इत्यभिधानात् । बहुरूपाख्यनृत्यविशेषविधायिन इत्यर्थः । ५ मिश्रिते । ६ कुङ्कुमाक्तैः प०, द०, म०, ल० । ७ करन्यासैः । ८ अङ्गविक्षेपैः । ९ तालमानसहितैः । १० पादविन्यासैः । ११ देवेषु । १२ भूम्याकाशे । १३ सञ्चरत्खेचरी- ल० । १४ धूतोपान्त- प०, ब०, म०, ल० । १५ पवने । १६ सभाजने । १७ उत्सार्यमाणे । १८ स्वैरमागत्य नियोगमन्तरेण स्थितजने । १९ निर्वाणं पर्याप्तिमित्यर्थः । २० सर्वज्ञम् । २१ इन्द्रः । २२ प्रारेभे । श्लोकोऽयमर्हद्दासकविना स्वकीयपुरुदेवचम्पूकाव्यस्य पञ्चमस्तबकस्य एकादशतमश्लोकतां नीतः । २३ -र्दिव्यै- स०, द० । २४ अधोमुखी ।

कनत्कनकभृङ्गारनालाद्धारा पतन्त्यसौ । रेजे भक्तिभरेणैव जिनमानन्तु[1]मुद्यता ॥१८८॥
विभोर्देहप्रभोत्सर्पैः तडिदापिञ्जरैस्तता । साभाद् विभावसौ[2] दीप्ते प्रयुक्तेव घृताहुतिः ॥१८९॥
निसर्गसुरभिण्यङ्गे विभोरत्यन्तपावने । पतित्वा चरितार्था सा [3]स्वसादकृत तद्गुणान्[4] ॥१९०॥
सुगन्धिकुसुमैर्गन्धद्रव्यैरपि सुवासिता । साधान्नतिशयं कञ्चिद् विभोरङ्गेऽम्भसां ततिः ॥१९१॥
समस्ताः पूरयन्त्याशा जगदानन्ददायिनी । वसुधारेव धारासौ क्षीरधारा मुदेऽस्तु नः ॥१९२॥
या पुण्यास्रवधारेव सूते संपत्परम्पराम् । सास्मान्गन्धपयोधारा [5]धिनोत्वनिधनैर्धनैः ॥१९३॥
या निशातासिधारेव विघ्नवर्गं विनिघ्नती[7] । पुण्यगन्धाम्भसां धारा सा शिवाय[8] सदास्तु नः ॥१९४॥
माननीया मुनीन्द्राणां जगतामेकपावनी । साव्या[9]द् गन्धाम्बुधारास्मान् या स्म व्योमापगायते ॥१९५॥
तनुं भगवतः प्राप्य याता यातिपवित्रिताम् । पवित्रयतु नः स्वान्तं धारा गन्धाम्भसामसौ ॥१९६॥
कृत्वा गन्धोदकैरित्थम् अभिषेकं सुरोत्तमाः । जगतां शान्तये [10]शान्तिं घोषयामासुरुच्चकैः ॥१९७॥
प्रचक्रुरुत्तमाङ्गेषु चक्रुः सर्वाङ्गसङ्गतम् । स्वर्गस्योपायनं चक्रुः तद्गन्धाम्बु दिवौकसः ॥१९८॥
गन्धाम्बुस्नपनस्यान्ते जयकोलाहलैस्समम् । [11]व्यात्युक्षीममराश्चक्रुः सचूर्णैर्गन्धवारिभिः ॥१९९॥

मुख किये हुई) हो गई हो ॥ १८७ ॥ देदीप्यमान सुवर्णकी झारीके नालसे पड़ती हुई वह सुगन्धित जलकी धारा ऐसी शोभायमान होती थी मानो भक्तिके भारसे भगवान्‌को नमस्कार करनेके लिये ही उद्यत हुई हो ॥ १८८ ॥ बिजलीके समान कुछ कुछ पीले भगवान्‌के शरीरकी प्रभाके समूहसे व्याप्त हुई वह धारा ऐसी सुशोभित हो रही थी मानो जलती हुई अग्निमें घीकी आहुति ही डाली जा रही हो ॥ १८९ ॥ स्वभावसे सुगन्धित और अत्यन्त पवित्र भगवान्‌के शरीरपर पड़कर वह धारा चरितार्थ हो गई थी और उसने भगवान्‌के उक्त दोनों ही गुण अपने आधीन कर लिये थे—ग्रहण कर लिये थे ॥ १९० ॥ यद्यपि वह जलका समूह सुगन्धित फूलों और सुगन्धित द्रव्योंसे सुवासित किया गया था तथापि वह भगवान्‌के शरीरपर कुछ भी विशेषता धारण नहीं कर सका था—उनके शरीरकी सुगन्धिके सामने उस जलकी सुगन्धि तुच्छ जान पड़ती थी ॥ १९१ ॥ वह दूधके समान श्वेत जलकी धारा हम सबके आनन्दके लिये हो जो कि रत्नोंकी धाराके समान समस्त आशाओं (इच्छाओं और दिशाओं) को पूर्ण करनेवाली तथा समस्त जगत्‌को आनन्द देनेवाली थी ॥ १९२ ॥ जो पुण्यास्रवकी धाराके समान अनेक सम्पदाओंको उत्पन्न करनेवाली है ऐसी वह सुगन्धित जलकी धारा हम लोगोंको कभी नष्ट नहीं होनेवाले रत्नत्रयरूपी धनसे संतुष्ट करे ॥ १९३ ॥ जो पैनी तलवारकी धाराके समान विघ्नोंका समूह नष्ट कर देती है ऐसी वह पवित्र सुगन्धित जलकी धारा सदा हम लोगोंके मोक्षके लिये हो ॥ १९४ ॥ जो बड़े बड़े मुनियोंको मान्य है जो जगत्‌को एकमात्र पवित्र करनेवाली है और जो आकाशगंगाके समान शोभायमान है ऐसी वह सुगन्धित जलकी धारा हम सबकी रक्षा करे ॥ १९५ ॥ और जो भगवान्‌के शरीरको पाकर अत्यन्त पवित्रताको प्राप्त हुई है ऐसी वह सुगन्धित जलकी धारा हम सबके मनको पवित्र करे ॥ १९६ ॥ इस प्रकार इन्द्र सुगन्धित जलसे भगवान्‌का अभिषेक कर जगत्‌की शांतिके लिये उच्च स्वरसे शान्ति-मंत्र पढ़ने लगे ॥ १९७ ॥ तदनन्तर देवोंने उस गन्धोदकको पहले अपने मस्तकोंपर लगाया फिर सारे शरीरमें लगाया और फिर बाकी बचे हुए को स्वर्ग ले जानेके लिये रख लिया ॥ १९८ ॥ सुगन्धित जलका अभिषेक समाप्त होने पर देवोंने जय जय शब्दके कोलाहलके साथ साथ चूर्ण मिले हुए सुगन्धित

---

१ नमस्कर्तुम् । २ अग्नौ । ३ स्वाधीनमकरोत् । ४ तदङ्गसौगन्ध्यसौकुमार्यादिगुणान् । ५ प्रीणयतु । ६ रत्नत्रयात्मकधनैः । ७ विनाशयती । ८ नित्यसुखाय । ९ रक्षतु । १० शान्तिमन्त्रम् । ११ अन्योन्यजलसेचनम् ।

निवृ त्तावभिषेकस्य [1]कृतावभृथमज्जनाः । परीत्य परमं ज्योतिः [2]आनर्चुर्भुवनार्चितम् ॥२००॥
गन्धैर्धूपैश्च दीपैश्च साक्षतैः कुसुमोदकैः । मन्त्रपूतैः फलैः सार्घैः सुरेन्द्रा विभुमीजिरे[4] ॥२०१॥
[5]कृतेष्टयः कृतानिष्टविघाताः कृतपौष्टिकाः । जन्माभिषेकमित्युच्चैः नाकेन्द्रा [6]निरतिष्ठिपन् ॥२०२॥
इन्द्रेन्द्राण्यौ समं देवैः परमानन्ददायिनम् । क्षणं चूडामणिं मेरोः परीत्यैनं प्रणेमतुः ॥२०३॥
दिवोऽपप्तत्तदा पौष्पी वृष्टिर्जलकणैस्समम् । मुक्तानन्दाश्रुबिन्दूनां श्रेणीव त्रिदिवश्रिया ॥२०४॥
रजःपटलमाधूय [7]सुरागसुमनोभवम् । मातरिश्वा ववौ मन्दं स्नानाम्भश्शीकरान् किरन् ॥२०५॥
सज्ज्योतिर्भगवान् मेरोः कुलशैलायिताः सुराः । क्षीरमेघायिताः कुम्भाः सुरनार्योऽप्सरायिताः[8] ॥२०६॥
शक्रः [9]स्नपयितार्हीन्द्रः स्नानपीठो[10] सुराङ्गनाः । नर्त्तक्यः किङ्करा देवाः [11]स्नानद्रोणी पयोऽर्णवः ॥२०७॥
इति श्लाघ्यतमे मेरौ [12]निवृ त्तः स्नपनोत्सवः । स यस्य भगवान् पूयात् पूतात्मा वृषभो जगत् ॥२०८॥

मालिनी

अथ पवनकुमाराः [13]स्वामिव [14]प्राज्यभक्तिं
दिशि दिशि विभजन्तो मन्दमन्दं [15]विचेरुः ।
मुमुचुरमृतगर्भाः शीकरासारधाराः
किल [16]जलदकुमारा मेरवीषु[17] स्थलीषु ॥२०९॥

जलसे परस्परमें फाग की अर्थात् वह सुगन्धित जल एक दूसरे पर डाला ॥ १९९ ॥ इस प्रकार अभिषेककी समाप्ति होने पर सब देवोंने स्नान किया और फिर त्रिलोकपूज्य उत्कृष्ट ज्योति-स्वरूप भगवान्की प्रदक्षिणा देकर पूजा की ॥ २०० ॥ सब इन्द्रोंने मंत्रोंसे पवित्र हुए जल, गन्ध, अक्षत, पुष्प, नैवेद्य, दीप, धूप, फल और अर्घके द्वारा भगवान्की पूजा की ॥ २०१ ॥ इस तरह इन्द्रोंने भगवान्की पूजा की, उसके प्रभावसे अपने अनिष्ट-अमंगलोंका नाश किया और फिर पौष्टिक कर्म कर बड़े समारोहके साथ जन्माभिषेककी विधि समाप्त की ॥ २०२ ॥ तत्पश्चात् इन्द्र इन्द्राणीने समस्त देवोंके साथ परम आनन्द देनेवाले और क्षणभरके लिये मेरु पर्वतपर चूड़ामणिके समान शोभायमान होनेवाले भगवान्की प्रदक्षिणा देकर उन्हें नमस्कार किया ॥ २०३ ॥ उस समय स्वर्गसे पानीकी छोटी छोटी बूँदोंके साथ फूलोंकी वर्षा हो रही थी और वह ऐसी मालूम होती थी मानो स्वर्गकी लक्ष्मीके हर्षसे पड़ते हुए अश्रुओंकी बूँदें ही हों ॥ २०४ ॥ उस समय कल्पवृक्षोंके पुष्पोंसे उत्पन्न हुए पराग-समूहको कंपाता हुआ और भगवान्के अभिषेक-जलकी बूँदोंको बरसाता हुआ वायु मन्द मन्द बह रहा था ॥ २०५ ॥ उस समय भगवान् वृषभदेव मेरुके समान जान पड़ते थे, देव कुलाचलोंके समान मालूम होते थे, कलश दूधके मेघोंके समान प्रतिभासित होते थे और देवियाँ जलसे भरे हुए सरोवरोंके समान आचरण करती थीं ॥ २०६ ॥ जिनका अभिषेक करानेवाला स्वयं इन्द्र था, मेरु पर्वत स्नान करनेका सिंहासन था, देवियाँ नृत्य करनेवाली थीं, देव किंकर थे और क्षीरसमुद्र स्नान करनेका कटाह (टब) था। इस प्रकार अतिशय प्रशंसनीय मेरु पर्वत पर जिनका स्नपन महोत्सव समाप्त हुआ था वे पवित्र आत्मावाले भगवान् समस्त जगत्को पवित्र करें ॥२०७-२०८॥

अथानन्तर पवनकुमार जातिके देव अपनी उत्कृष्ट भक्तिको प्रत्येक दिशाओंमें वितरण करते हुए के समान धीरे धीरे चलने लगे और मेघकुमार जातिके देव उस मेरु पर्वतसम्बन्धी भूमि पर अमृतसे मिले हुए जलके छींटोंकी अखण्ड धारा छोड़ने लगे-मन्द मन्द जलवृष्टि करने

१ परिसमाप्तौ । निवृत्ता– अ०, प०, स०, म०, ल० । २ विहितयजनमन्त्रक्रियमाणस्नानाः । ३ अर्चयन्ति स्म । ४ पूजयामासुः । ५ विहितपूजाः । ६ निर्वर्तयन्ति स्म । ७ कल्पवृक्ष । ८ सरोवरायिताः । ९ स्नानकारी । १० स्नानपीठः अ०, स०, ल० । स्नानपीठं द० । ११ स्नानकटाहः । १२ निर्वर्तितः । १३ आत्मीयाम् । १४ प्रभूता । १५ विचरन्ति स्म । १६ मेघकुमाराः । १७ मेरुसम्बन्धिनीषु ।

सपदि [1]विधुतकल्पानोकहैर्व्योमगङ्गा-
शिशिरतरतरङ्गोत्क्षेपदक्षैर्मरुद्भिः ।
तटवनमनुपुष्पाण्याहरद्भिस्समन्तात्
[2]परगतिमिव कर्तुं बभ्रमे शैलभर्तुः ॥२१०॥

अनुचितमशिवानां[3] स्थातुमद्य त्रिलोक्यां
जनयति शिवमस्मिन्नुत्सवे विश्वभर्तुः ।
इति किल शिवमुच्चैर्घोषयन्दुन्दुभीनां
सुरकरनिहतानां शुश्रुवे मन्द्रनादः ॥२११॥

सुरकुजकुसुमानां वृष्टिरापप्तदुच्चैः-
रमरकरविकीर्णा विश्वगाकृष्टभृङ्गा ।
जिनजनन[4]सपर्यालोकनार्थं समन्तात्
नयनततिरिवाविर्भाविता स्वर्गलक्ष्म्या ॥२१२॥

शार्दूलविक्रीडितम्

इत्थं यस्य सुरासुरैः प्रमुदितैर्जन्माभिषेकोत्सवः
चक्रे शक्रपुरस्सरैः सुरगिरौ क्षीरार्णवस्याम्बुभिः ।
नृत्यन्तीषु सुराङ्गनासु सलयं नानाविधैर्लास्यकैः[5]
स श्रीमान् वृषभो जगत्त्रयगुरुर्जीयाज्जिनः पावनः ॥२१३॥

[6]जन्मानन्तरमेव यस्य मिलितैर्देवा सुराणां गणैः
नानायानविमानपत्तिनिवहव्यारुद्धरोदोऽङ्गणैः[7] ।
क्षीराब्धेः [8]समुपाहृतैश्शुचिजलैः कृत्वाभिषेकं विभोः
मेरोर्मूर्धनि जातकर्म विदधे सोऽव्याज्जिनो [9]नोऽग्रिमः ॥२१४॥

लगे ॥ २०९ ॥ जो वायु शीघ्र ही कल्पवृक्षोंको हिला रहा था, जो आकाशगंगाकी अत्यन्त शीतल तरंगोंके उड़ानेमें समर्थ था और जो किनारेके वनोंसे पुष्पोंका अपहरण कर रहा था ऐसा वायु मेरु पर्वतके चारों ओर घूम रहा था और ऐसा मालूम होता था मानो उसकी प्रदक्षिणा ही कर रहा हो ॥ २१० ॥ देवोंके हाथोंसे ताड़ित हुए दुन्दुभि बाजोंका गम्भीर शब्द सुनाई दे रहा था और वह मानो जोर जोरसे यह कहता हुआ कल्याणकी घोषणा ही कर रहा था कि जब त्रिलोकीनाथ भगवान् वृषभदेवका जन्ममहोत्सव तीनों लोकोंमें अनेक कल्याण उत्पन्न कर रहा है तब यहाँ अकल्याणोंका रहना अनुचित है ॥ २११ ॥ उस समय देवोंके हाथसे बिखरे हुए कल्पवृक्षोंके फूलोंकी वर्षा बहुत ही ऊँचेसे पड़ रही थी, सुगन्धिके कारण वह चारों ओरसे भ्रमरोंको खींच रही थी और ऐसा मालूम होती थी मानो भगवान्के जन्म कल्याणककी पूजा देखनेके लिये स्वर्गकी लक्ष्मीने चारों ओर अपने नेत्रोंकी पङ्क्ति ही प्रकट की हो ॥ २१२ ॥ इस प्रकार जिस समय अनेक देवांगनाएँ ताल सहित नाना प्रकारकी नृत्यकलाके साथ नृत्य कर रही थीं उस समय इन्द्रादि देव और धरणेन्द्रोंने हर्षित होकर मेरु पर्वत पर क्षीरसागरके जलसे जिनके जन्माभिषेकका उत्सव किया था वे परम पवित्र तथा तीनों लोकोंके गुरु श्री वृषभनाथ जिनेन्द्र सदा जयवन्त हों ॥ २१३ ॥ जन्म होनेके अनन्तर ही नाना प्रकारके वाहन, विमान और पयादे आदिके द्वारा आकाशको रोककर इकट्ठे हुए देव और असुरोंके समूहने मेरु पर्वतके मस्तकपर लाये हुए क्षीरसागरके पवित्र जलसे जिनका अभिषेक कर

१ कम्पित । २ प्रदक्षिणगमनम् । ३ अमङ्गलानाम् । ४ पूजा । ५ नाट्यकैः । ६ उत्पत्त्यनन्तरम् । ७ गगनाङ्गणैः । ८ उपानीतैः । ९ वोऽग्रिमः प०, म०, ल० ।

सद्यः संहृतमौष्ण्यमुष्णकिरणैराम्रेडितं[1] शीकरैः
शैत्यं शीतकरैरुदू[2]ढमुडुभिर्बद्धोडुपैः[3] क्रीडितम् ।
तारौघैस्तरलैस्तरद्भिरधिकं डिण्डीरपिण्डायितं
यस्मिन् मज्जनसंविधौ स जयताज्जैनो जगत्पावनः ॥२१५॥
सानन्दं त्रिदशेश्वरैस्सचकितं देवीभिरुत्पुष्करैः
सत्रासं सुरवारणैः [4]प्रणिहितैराप्तादरं चारणैः ।
साशङ्कं गगनेचरैः किमिदमित्यालोकितो यः स्फुर-
न्मेरोर्मूर्द्धिन स नोऽवताज्जिनविभोर्जन्मोत्सवाम्भःप्लवः ॥२१६॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे-
भगवज्जन्माभिषेकवर्णनं नाम
त्रयोदशं पर्व ॥१३॥

जन्मोत्सव किया था वे प्रथम जिनेन्द्र तुम सबकी रक्षा करें ॥ २१४ ॥ जिनके जन्माभिषेकके समय सूर्यने शीघ्र ही अपनी उष्णता छोड़ दी थी, जलके छींटे बार बार उछल रहे थे, चन्द्रमाने शीतलताको धारण किया था, नक्षत्रोंने बँधी हुई छोटी छोटी नौकाओंके समान जहाँ-तहाँ क्रीड़ा की थी, और तैरते हुए चंचल ताराओंके समूहने फेनके पिण्डके समान शोभा धारण की थी वे जगत्को पवित्र करनेवाले जिनेन्द्र भगवान् सदा जयशील हों ॥ २१५ ॥ मेरु पर्वतके मस्तक पर स्फुरायमान होता हुआ, जिनेन्द्र भगवान्के जन्माभिषेकका वह जल-प्रवाह हम सबकी रक्षा करे जिसे कि इन्द्रोंने बड़े आनन्दसे, देवियोंने आश्चर्यसे, देवोंके हाथियोंने सूँड़ ऊँची उठाकर बड़े भयसे, चारण ऋद्धिधारी मुनियोंने एकाग्रचित्त होकर बड़े आदरसे और विद्याधरोंने 'यह क्या है' ऐसी शंका करते हुए देखा था ॥ २१६ ॥

इस प्रकार आर्ष नामसे प्रसिद्ध श्री भगवज्जिनसेनाचार्यविरचित त्रिषष्टि-
लक्षणमहापुराणसंग्रहमें भगवान्के जन्माभिषेकका वर्णन
करनेवाला तेरहवां पर्व समाप्त हुआ ॥ १३ ॥

१ द्विस्त्रिरुक्तम् । २ धृतम् । ३ बद्धकालैः सद्भिः क्रीडितम् । 'उडुपं तु प्लवः कोलः' इत्यभिधानात् । ४ अवधानपरैः, ध्यानस्थैरित्यर्थः ।

चतुर्दश पर्व

अथाभिषेकनिर्वृत्तौ[1] शची देवी जगद्गुरोः । [2]प्रसाधनविधौ यत्नम् अकरोत् कृतकौतुका[3] ॥१॥
तस्याभिषिक्तमात्रस्य दधतः पावनीं तनुम् । साङ्गलग्नान्ममार्जाम्भःकणान् स्वच्छामलांशुकैः[4] ॥२॥
[5]स्वासन्नापाङ्गसङ्क्रान्तसितच्छायं विभोर्मुखम् । प्रमृष्टमपि सामार्जीत्[6] भूयो जलकणास्थया[7] ॥३॥
गन्धैः सुगन्धिभिः सान्द्रैः इन्द्राणी गात्रमीशितुः । अन्वलिम्पत लिम्पद्भिः इवामोदैस्त्रिविष्टपम् ॥४॥
गन्धेनामोदिना भर्तुः शरीरसहजन्मना । गन्धास्ते न्यक्कृता[8] एव सौगन्ध्येनापि[9] संश्रिताः ॥५॥
तिलकञ्च ललाटेऽस्य शची चक्रे किलादरात् । जगतां तिलकस्तेन किमलङ्क्रियते विभुः ॥६॥
मन्दारमालयोत्तंसम्[10] इन्द्राणी विदधे विभोः । तयालङ्कृतमूर्द्धासौ कीर्त्येव व्यरुचद् भृशम् ॥७॥
जगच्चूडामणेरस्य मूर्ध्नि चूडामणिं न्यधात् । सतां मूर्धाभिषिक्तस्य[11] पौलोमी भक्तिनिर्भरा[12] ॥८॥
[13]अनञ्जितासिते भर्तुः लोचने सान्द्रपक्ष्मणी । पुनरञ्जनसंस्कारम् आचार इति लम्भिते[14] ॥९॥
कर्णावविद्धसच्छिद्रौ कुण्डलाभ्यां विरेजतुः । कान्तिदीप्ती मुखे द्रष्टुम् इन्द्वर्काभ्यामिवाश्रितौ ॥१०॥
हारिणा मणिहारेण कण्ठशोभा महत्यभूत् । मुक्तिश्रीकण्ठिकादाम[15]चारुणा त्रिजगत्पतेः ॥११॥

अथानन्तर, जब अभिषेककी विधि समाप्त हो चुकी तब इन्द्राणी देवीने बड़े हर्षके साथ जगद्गुरु भगवान् वृषभदेवको वस्त्राभूषण पहिनानेका प्रयत्न किया ॥ १ ॥ जिनका अभिषेक किया जा चुका है ऐसे पवित्र शरीर धारण करनेवाले भगवान् वृषभदेवके शरीरमें लगे हुए जलकणोंको इन्द्राणीने स्वच्छ एवं निर्मल वस्त्रसे पोंछा ॥ २ ॥ भगवानके मुखपर, अपने निकट-वर्ती कटाक्षोंकी जो सफेद छाया पड़ रही थी उसे इन्द्राणी जलकण समझती थी । अतः पोंछे हुए मुखको भी वह बार-बार पोंछ रही थी ॥ ३ ॥ अपनी सुगन्धिसे स्वर्ग अथवा तीनों लोकोंको लिप्त करनेवाले अतिशय सुगन्धित गाढ़े सुगन्ध द्रव्योंसे उसने भगवानके शरीरपर विलेपन किया था ॥ ४ ॥ यद्यपि वे सुगन्ध द्रव्य उत्कृष्ट सुगन्धिसे सहित थे तथापि भगवान्के शरीरकी स्वाभा-विक तथा दूर-दूर तक फैलनेवाली सुगन्धने उन्हें तिरस्कृत कर दिया था ॥ ५ ॥ इन्द्राणीने बड़े आदरसे भगवान्के ललाटपर तिलक लगाया परन्तु जगत्के तिलक-स्वरूप भगवान् क्या उस तिलकसे शोभायमान हुए थे ? ॥ ६ ॥ इन्द्राणीने भगवान्के मस्तकपर कल्पवृक्षके पुष्पोंकी मालासे बना हुआ मुकुट धारण किया था । उन मालाओंसे अलंकृतमस्तक होकर भगवान् ऐसे शोभा-यमान हो रहे थे मानो कीर्तिसे ही अलंकृत किये गये हों ॥ ७ ॥ यद्यपि भगवान् स्वयं जगत्के चूडामणि थे और सज्जनोंमें सबसे मुख्य थे तथापि इन्द्राणीने भक्तिसे निर्भर होकर उनके मस्तक पर चूडामणि रत्न रक्खा था ॥ ८ ॥ यद्यपि भगवान्के सघन बरौनीवाले दोनों नेत्र अंजन लगाये बिना ही श्यामवर्ण थे तथापि इन्द्राणीने नियोग मात्र समझकर उनके नेत्रोंमें अंजनका संस्कार किया था ॥ ९ ॥ भगवान्के दोनों कान बिना वेधन किये ही छिद्रसहित थे, इन्द्राणीने उनमें मणिमय कुण्डल पहिनाये थे जिससे वे ऐसे जान पड़ते थे मानो भगवान्के मुखकी कान्ति और दीप्तिको देखनेके लिये सूर्य और चन्द्रमा ही उनके पास पहुँचे हों ॥ १० ॥ मोक्ष-लक्ष्मीके गलेके हारके समान अतिशय सुन्दर और मनोहर मणियोंके हारसे त्रिलोकीनाथ भगवान् वृषभदेवके

१ सम्पूर्णे सति । २ अलङ्कारविधाने । ३ विहितसन्तोषा । ४ श्लक्ष्णनिर्मलाम्बरैः । ५ निजनिकटकटाक्षसङ्क्रमण । ६ साम्राक्षीत् प० । म० पुस्तके द्विविधः । ७ अम्बुबिन्दुबुद्ध्या । ८ अधः कृता । न्यत्कृता अ०, द०, म०, ल० । ९ समानगन्धत्वेन । १० शेखरम् । ११ श्रेष्ठस्य । १२ भक्त्यतिशया । १३ अञ्जनम्रक्षमन्तरेण कृष्णे । १४ प्रापिते । इति रञ्जिते स० । १५ कण्ठमाला ।

बाह्वोर्युगञ्च केयूरकटकाङ्गदभूषितम् । तस्य कल्पाङ्घ्रिपस्येव विटपद्वयमाबभौ ॥१२॥
रेजे मणिमयं दाम[1] [2]किङ्किणीभिर्विराजितम् । कटीतटेऽस्य कल्पाग[3]प्ररोहश्रियमुद्वहत् ॥१३॥
पादौ [4]गोमुखनिर्भासैः [5]मणिभिस्तस्य रेजतुः । वाचालितौ सरस्वत्या कृतसेवाविवादरात् ॥१४॥
लक्ष्म्याः पुञ्ज इवोद्भूतो धाम्नां राशिरिवोच्छिखः । [6]भाग्यानामिव संपात[7]स्तदाभाद् भूषितो विभुः ।१५।
सौन्दर्यस्येव सन्दोहः सौभाग्यस्येव सन्निधिः । गुणानामिव संवासः[8] सालङ्कारो विभुर्बभौ ॥१६॥
निसर्गरुचिरं भर्तुः वपुर्भ्रेजे[9] सभूषणम् । सालङ्कारं कवेः काव्यमिव सुश्लिष्टबन्धनम् ॥१७॥
प्रत्यङ्गमिति विन्यस्तैः पौलोम्या मणिभूषणैः । स रेजे कल्पशाखीव शाखोल्लासिविभूषणः ॥१८॥
इति प्रसाध्य[10] तं देवम् इन्द्रोत्सङ्गगतं शची । स्वयं विस्मयमायासीत् पश्यन्ती रूपसम्पदम् ॥१९॥
सङ्क्रन्दनोऽपि तद्रूपशोभां द्रष्टुं तदातनीम्[11] । सहस्राक्षोऽभवन्नूनं स्पृहयालुरतृप्तिकः[12] ॥२०॥
तदा निमेषविमुखैः[13] लोचनैस्तं सुरासुराः । ददृशुर्गिरिराजस्य शिखामणिमिव क्षणम् ॥२१॥
ततस्तं स्तोतुमिन्द्राद्याः [14]प्राक्रमन्त सुरोत्तमाः । वर्त्स्यत्तीर्थकरत्वस्य प्राभवं तद्धि पुष्कलम्[15] ॥२२॥

कण्ठकी शोभा बहुत भारी हो गयी थी ॥ ११ ॥ बाजूबंद, कड़ा, अनन्त आदिसे शोभायमान उनकी दोनों भुजाएँ ऐसी मालूम होती थीं मानो कल्पवृक्षकी दो शाखाएँ ही हों ॥ १२ ॥ भगवान्‌के कटिप्रदेशमें छोटी-छोटी घंटियों (बोरों) से सुशोभित मणीमयी करधनी ऐसी शोभायमान हो रही थी मानो कल्पवृक्षके अंकुर ही हों ॥ १३ ॥ गोमुखके आकारके चमकीले मणियोंसे शब्दायमान उनके दोनों चरण ऐसे शोभायमान हो रहे थे मानो सरस्वती देवी ही आदर सहित उनकी सेवा कर रही हो ॥ १४ ॥ उस समय अनेक आभूषणोंसे शोभायमान भगवान् ऐसे जान पड़ते थे मानो लक्ष्मीका पुंज ही प्रकट हुआ हो, ऊँची शिखावाली रत्नोंकी राशि ही हो अथवा भोग्य वस्तुओंका समूह ही हो ॥ १५ ॥ अथवा अलंकारसहित भगवान् ऐसे शोभायमान हो रहे थे मानो सौन्दर्यका समूह ही हो, सौभाग्यका खजाना ही हो अथवा गुणोंका निवासस्थान ही हो ॥ १६ ॥ स्वभावसे सुन्दर तथा संगठित भगवान्‌का शरीर अलंकारोंसे युक्त होनेपर ऐसा शोभायमान होने लगा था मानो उपमा, रूपक आदि अलंकारोंसे युक्त तथा सुन्दर रचनासे सहित किसी कविका काव्य ही हो ॥ १७ ॥ इस प्रकार इन्द्राणीके द्वारा प्रत्येक अंगमें धारण किये हुए मणिमय आभूषणोंसे वे भगवान् उस कल्पवृक्षके समान शोभायमान हो रहे थे जिसकी प्रत्येक शाखापर आभूषण सुशोभित हो रहे हैं ॥ १८ ॥ इस तरह इन्द्राणीने इन्द्रकी गोदीमें बैठे हुए भगवान्‌को अनेक वस्त्राभूषणोंसे अलंकृत कर जब उनकी रूप-संपदा देखी तब वह स्वयं भारी आश्चर्यको प्राप्त हुई ॥१९॥ इन्द्रने भी भगवान्‌के उस समयकी रूप-सम्बन्धी शोभा देखनी चाही, परन्तु दो नेत्रोंसे देख कर सन्तुष्ट नहीं हुआ इसीलिये मालूम होता है कि वह द्व्यक्षसे सहस्राक्ष (हजारों नेत्रोंवाला) हो गया था—उसने विक्रिया शक्तिसे हजार नेत्र बनाकर भगवान्‌का रूप देखा था ॥ २० ॥ उस समय देव और असुरोंने अपने टिमकार रहित नेत्रोंसे क्षणभरके लिये मेरु पर्वतके शिखामणिके समान सुशोभित होनेवाले भगवान्‌को देखा ॥ २१ ॥ तदनन्तर इन्द्र आदि श्रेष्ठ देव उनकी स्तुति करनेके लिए तत्पर हुए सो ठीक ही है तीर्थंकर होनेवाले पुरुषका ऐसा ही अधिक प्रभाव होता है ॥ २२ ॥

१ काञ्चीदाम । २ क्षुद्रघंटिकाभिः । ४ कल्पाङ्ग– म०, ल० । ४ गोमुखवद्भासमानैः । ५ घर्घरैः । ६ भोग्यानामिव म०, ल० । ७ पुञ्जः । ८ आश्रयः । ९ –र्भेजे प०, अ०, म०, ल० । १० अलङ्कृत्य । ११ तत्कालभवाम् । १२ –रतृप्तकः म०, ल० । १३ अनिमेषैः । १४ उपक्रमं चक्रिरे । १५ प्रभूतम् ।

त्वं देव परमानन्दम् अस्माकं कर्त्तुमुद्गतः । किमु प्रबोधमायान्ति विनार्कात् कमलाकराः ॥२३॥
मिथ्याज्ञानान्धकूपेऽस्मिन् निपतन्तमिमं जनम् । त्वमुद्धर्त्तुमना धर्महस्तालम्बं प्रदास्यसि ॥२४॥
तव वाक्किरणैर्नूनम् अस्मच्चेतोगतं तमः । [1]पुरा प्रलीयते देव तमो भास्वत्करैरिव ॥२५॥
त्वमादिर्देवदेवानां त्वमादिर्जगतां गुरुः । त्वमादिर्जगतां स्रष्टा त्वमादिर्धर्मनायकः ॥२६॥
त्वमेव जगतां भर्त्ता त्वमेव जगतां पिता । त्वमेव जगतां त्राता[2] त्वमेव जगतां गतिः[3] ॥२७॥
त्वं पूतात्मा जगद्विश्वं [4]पुनासि परमैर्गुणैः । स्वयं धौतो[5] यथा लोकं धवलीकुरुते शशी ॥२८॥
त्वत्तः कल्याणमाप्स्यन्ति संसारामयलङ्घिताः[6] । उल्लाघिता[7] भवद्वाक्यभैषजैरमृतोपमैः ॥२९॥
त्वं पूतस्त्वं [8]पुनानोऽसि परं ज्योतिस्त्वमक्षरम्[9] । निर्धूय निखिलं क्लेशं यत्प्राप्तासि[10] परं पदम् ॥३०॥
[11]कूटस्थोऽपि न कूटस्थः त्वमद्य प्रतिभासि नः । त्वय्येव [12]स्फातिमेष्यन्ति यदमी योगजा[13] गुणाः ॥३१॥
अस्नातपूतगात्रोऽपि स्नपितोऽस्यद्य मन्दरे । पवित्रयितुमेवैतत् जगदेनो मलीमसम् ॥३२॥
युष्मज्जन्माभिषेकेण वयमेव न केवलम् । नीताः पवित्रतां मेरुः क्षीराब्धिस्तज्ज[14]लान्यपि ॥३३॥

हे देव, हम लोगोंको परम आनन्द देनेके लिये ही आप उदित हुए हैं। क्या सूर्यके उदित हुए बिना कभी कमलोंका समूह प्रबोधको प्राप्त होता है ? ॥ २३ ॥ हे देव, मिथ्याज्ञान-रूपी अंधकूपमें पड़े हुए इन संसारी जीवोंके उद्धार करनेकी इच्छासे आप धर्मरूपी हाथका सहारा देनेवाले हैं ॥ २४ ॥ हे देव, जिस प्रकार सूर्यकी किरणोंके द्वारा उदय होनेसे पहले ही अन्धकार नष्ट प्राय कर दिया जाता है उसी प्रकार आपके वचनरूपी किरणोंके द्वारा भी हम लोगोंके हृदयका अन्धकार नष्ट कर दिया गया है ॥ २५ ॥ हे देव, आप देवोंके आदि देव हैं, तीनों जगत्के आदि गुरु हैं, जगत्के आदि विधाता हैं और धर्मके आदि नायक हैं ॥ २६ ॥ हे देव, आप ही जगत्के स्वामी हैं, आप ही जगत्के पिता हैं, आप ही जगत्के रक्षक हैं, और आप ही जगत्के नायक हैं ॥ २७ ॥ हे देव, जिस प्रकार स्वयं धवल रहनेवाला चन्द्रमा अपनी चाँदनीसे समस्त लोकको धवल कर देता है उसी प्रकार स्वयं पवित्र रहनेवाले आप अपने उत्कृष्ट गुणोंसे सारे संसारको पवित्र कर देते हैं ॥ २८ ॥ हे नाथ, संसाररूपी रोगसे दुखी हुए ये प्राणी अमृतके समान आपके वचनरूपी औषधिके द्वारा नीरोग होकर आपसे परम कल्याणको प्राप्त होंगे ॥ २९ ॥ हे भगवन्, आप सम्पूर्ण क्लेशोंको नष्टकर इस तीर्थंकररूप परम पदको प्राप्त हुए हैं अतएव आप ही पवित्र हैं, आप ही दूसरोंको पवित्र करनेवाले हैं और आप ही अविनाशी उत्कृष्ट ज्योतिस्वरूप हैं ॥ ३० ॥ हे नाथ, यद्यपि आप कूटस्थ हैं—नित्य हैं तथापि आज हम लोगोंको कूटस्थ नहीं मालूम होते क्योंकि ध्यानसे होनेवाले समस्त गुण आपमें ही वृद्धिको प्राप्त होते रहते हैं। भावार्थ—जो कूटस्थ (नित्य) होता है उसमें किसी प्रकारका परिवर्तन नहीं होता अर्थात् न उनमें कोई गुण घटता है और न बढ़ता है, परन्तु हम देखते हैं कि आपमें ध्यान आदि योगाभ्याससे होनेवाले अनेक गुण प्रति समय बढ़ते रहते हैं इस अपेक्षासे आप हमें कूटस्थ नहीं मालूम होते ॥ ३१ ॥ हे देव, यद्यपि आप बिना स्नान किये ही पवित्र हैं तथापि मेरु पर्वतपर जो आपका अभिषेक किया गया है वह पापोंसे मलिन हुए इस जगत्को पवित्र करनेके लिये ही किया गया है ॥ ३२ ॥ हे देव, आपके जन्माभिषेकसे केवल हम लोग ही पवित्र नहीं हुए हैं किन्तु यह मेरु पर्वत, क्षीरसमुद्र तथा उन दोनोंके वन (उपवन और

१ पश्चात्काले । २ रक्षकः । ३ आधारः । ४ पवित्रं करोषि । ५ धवलः । ६ रोगाक्रान्ताः । ७ व्याधिनिर्मुक्ताः । ८ पवित्रं कुर्वाणः । ९ अनश्वरम् । १० गमिष्यसि । 'लुट्' । ११ एकरूपतया कालव्यापी कूटस्थः, नित्य इत्यर्थः । १२ वृद्धिम् । स्फीति– अ०, प०, म०, स०, द०, ल० । १३ योगतः ट० । ध्यानात् । १४ तद्वनान्यपि अ०, प०, स०, द०, ल० । म० पुस्तके द्विविधः पाठः ।

दिग्मुखेषूल्लसन्ति स्म युष्मत्स्नानाम्बुशीकराः । जगदानन्दिनः सान्द्रा यशसामिव राशयः ॥३४॥
अविलिप्तसुगन्धिस्त्वम् अविभूषितसुन्दरः । [1]भक्तैरभ्यर्चितोऽस्माभिः भूषणैः सानुलेपनैः ॥३५॥
लोकाधिकं दधद्धाम प्रादुरासीस्त्वमात्मभूः[2] । [3]मेरोर्गर्भादिव क्ष्मायाः तव देव समुद्भवः[4] ॥३६॥
सद्योजातश्रुतिं बिभ्रत् स्वर्गावतरणेऽच्युतः । त्वमद्य वामतां[5] धत्से कामनीयकमुद्वहन् ॥३७॥
यथा शुद्धाकरोद्भूतो मणिः संस्कारयोगतः । दीप्यतेऽधिकमेव त्वं जातकर्माभिसंस्कृतः ॥३८॥
आरामं[6] तस्य[7] पश्यन्ति न [8]तं पश्यन्ति केचन । [9]इत्यसद् [10]यत्परं ज्योतिः प्रत्यक्षोऽसि त्वमद्य नः ॥३९॥
त्वामामनन्ति योगीन्द्राः पुराणपुरुषं पुरुम् । कविं पुराणमित्यादि पठन्तः स्तवविस्तरम् ॥४०॥
पूतात्मने नमस्तुभ्यं नमः ख्यातगुणाय ते । नमो भीतिभिदे[11] तुभ्यं गुणानामेकभूतये[12] ॥४१॥
[13]क्षमागुणप्रधानाय नमस्ते [14]क्षितिमूर्त्तये । जगदाह्लादिने तुभ्यं नमोऽस्तु सलिलात्मने ॥४२॥

जल) भी पवित्रताको प्राप्त हो गये हैं ॥ ३३ ॥ हे देव, आपके अभिषेकके जलकण सब दिशाओंमें ऐसे शोभायमान हो रहे थे मानो संसारको आनन्द देनेवाला और घनीभूत आपके यशका समूह ही हो ॥ ३४ ॥ हे देव, यद्यपि आप बिना लेप लगाये ही सुगन्धित हैं और बिना आभूषण पहने ही सुन्दर हैं तथापि हम भक्तोंने भक्तिवश ही सुगन्धित द्रव्योंके लेप और आभूषणोंसे आपकी पूजा की है ॥ ३५ ॥ हे भगवन्, आप तेजस्वी हैं और ससारमें सबसे अधिक तेज धारण करते हुए प्रकट हुए हैं इसलिये ऐसे मालूम होते हैं मानो मेरु पर्वतके गर्भसे संसारका एक शिखामणि—सूर्य ही उदय हुआ हो ॥ ३६ ॥ हे देव, स्वर्गावतरणके समय आप 'सद्योजात' नामको धारण कर रहे थे, 'अच्युत' (अविनाशी) आप हैं ही और आज सुन्दरताको धारण करते हुए 'वामदेव' इस नामको भी धारण कर रहे हैं अर्थात् आप ही ब्रह्मा, विष्णु और महेश हैं ॥ ३७ ॥ जिस प्रकार शुद्ध खानिसे निकला हुआ मणि संस्कारके योगसे अतिशय देदीप्यमान हो जाता है उसी प्रकार आप भी जन्माभिषेकरूपी जातकर्म-संस्कारके योगसे अतिशय देदीप्यमान हो रहे हैं ॥ ३८ ॥ हे नाथ, यह जो ब्रह्माद्वैतवादियोंका कहना है कि 'सब लोग परं ब्रह्मकी शरीर आदि पर्यायें ही देख सकते हैं उसे साक्षात् कोई नहीं देख सकते' वह सब झूठ है क्योंकि परं ज्योतिःस्वरूप आप आज हमारे प्रत्यक्ष दृष्टिगोचर हो रहे हैं ॥ ३९ ॥ हे देव, विस्तारसे आपकी स्तुति करनेवाले योगिराज आपको पुराण पुरुष, पुरु, कवि और पुराण आदि मानते हैं ॥ ४० ॥ हे भगवन्, आपकी आत्मा अत्यन्त पवित्र है इसलिये आपको नमस्कार हो, आपके गुण सर्वत्र प्रसिद्ध हैं इसलिये आपको नमस्कार हो, आप जन्म-मरणका भय नष्ट करनेवाले हैं और गुणोंके एकमात्र उत्पन्न करनेवाले हैं इसलिये आपको नमस्कार हो ॥ ४१ ॥ हे नाथ, आप क्षमा (पृथ्वी) के समान क्षमा (शान्ति) गुणको ही प्रधान रूपसे धारण करते हैं इसलिये क्षमा अर्थात् पृथिवीरूपको धारण करनेवाले आपके लिये नमस्कार हो, आप जलके समान जगत्को आनन्दित करनेवाले हैं इसलिये जलरूपको

१ भाक्तिकैः । २ स्वयम्भूः । ३ मेरोर्गर्भादिवोद्भूतो भुवनैकशिखामणिः अ०, प०, द०, स०, ल० । म० पुस्तके द्विविधः पाठः । ४ उत्पत्तिः । ५ पक्षे वक्रताम् । ६ शरीरादिपर्यायम् । ७ परब्रह्मणः । ८ परब्रह्मणम् । ९ मृषा । १० यस्मात् कारणात् । ११ विनाशकाय । १२ सूतये म०, द०, स०, ट० । म० पुस्तके 'भूतये' इत्यपि पाठः । सूतये उत्पत्त्यै । १३ क्षान्तिगुणमुख्याय । हेतुगर्भितमेतद्विशेषणम् । १४ पृथिवीमूर्त्तये । अयमभिप्रायः— यथा क्षित्यां क्षमा गुणो विद्यते तथैव तस्मिन्नपि क्षमागुणं विलोक्य गुणसाम्यात् क्षितिमूर्तिरित्युक्तम् । एवमष्टमूर्तिष्वपि यथायोग्यं योज्यम् ।

निस्सङ्गवृत्तये[1] तुभ्यं बिभ्रते पावनीं[2] तनुम् । नमस्तरस्विने[3] रुग्ण[4]महामोहमहीरुहे ॥४३॥
कर्मेन्धनदहे[5] तुभ्यं नमः पावकमूर्त्तये । [6]पिशङ्गजटिलाङ्गाय समिद्धध्यानतेजसे ॥४४॥
[7]अरजोऽमलसङ्गाय नमस्ते गगनात्मने । [8]विभवेऽनाद्यनन्ताय महत्त्वावधये[9] परम् ॥४५॥
[10]सुयज्वने नमस्तुभ्यं सर्वक्रतुमयात्मने[11] । [12]निर्वाणदायिने तुभ्यं नमश्शीतांशुमूर्त्तये ॥४६॥
नमस्तेऽनन्तबोधार्कात् अविनिर्भक्तशक्तये[13] । तीर्थकृद्भाविने[14] तुभ्यं नमःस्तादष्टमूर्त्तये[15] ॥४७॥
महाबल[16] नमस्तुभ्यं ललिताङ्गाय[17] ते नमः । श्रीमते वज्रजङ्घाय[18] धर्मतीर्थप्रवर्त्तिने ॥४८॥

धारण करनेवाले आपको नमस्कार हो ॥ ४२ ॥ आप वायुके समान परिग्रह-रहित हैं, वेगशाली हैं और मोहरूपी महावृक्षको उखाड़नेवाले हैं इसलिये वायुरूपको धारण करनेवाले आपके लिये नमस्कार हो ॥ ४३ ॥ आप कर्मरूपी ईंधनको जलानेवाले हैं, आपका शरीर कुछ लालिमा लिये हुए पीतवर्ण तथा पुष्ट है, और आपका ध्यानरूपी तेज सदा प्रदीप्त रहता है इसलिये अग्निरूपको धारण करनेवाले आपके लिये नमस्कार हो ॥ ४४ ॥ आप आकाशकी तरह पाप-रूपी धूलिकी संगतिसे रहित हैं, विभु हैं, व्यापक हैं, अनादि अनन्त हैं, निर्विकार हैं, सबके रक्षक हैं इसलिये आकाशरूपको धारण करनेवाले आपके लिये नमस्कार हो ॥ ४५ ॥ आप याजकके समान ध्यानरूपी अग्निमें कर्मरूपी साकल्यका होम करनेवाले हैं इसलिये याजक रूपको धारण करनेवाले आपके लिये नमस्कार हो, आप चन्द्रमाके समान निर्वाण (मोक्ष अथवा आनन्द) देनेवाले हैं इसलिये चन्द्ररूपको धारण करनेवाले आपको नमस्कार हो ॥४६॥ और आप अनन्त पदार्थोंको प्रकाशित करनेवाले केवलज्ञानरूपी सूर्यसे सर्वथा अभिन्न रहते हैं इसलिये सूर्यरूपको धारण करनेवाले आपके लिये नमस्कार हो । हे नाथ, इस प्रकार आप पृथ्वी, जल, वायु, अग्नि, आकाश, याजक, चन्द्र और सूर्य इन आठ मूर्तियोंको धारण करनेवाले हैं तथा तीर्थंकर होनेवाले हैं इसलिये आपको नमस्कार हो । भावार्थ—अन्य मतावलम्बियोंने महादेवकी पृथ्वी जल आदि आठ मूर्तियाँ मानी हैं, यहाँ आचार्यने ऊपर लिखे वर्णनसे भगवान् वृषभदेवको ही उन आठ मूर्तियोंको धारण करनेवाला महादेव मानकर उनकी स्तुति की है ॥ ४७ ॥ हे नाथ, आप महाबल अर्थात् अतुल्य बलके धारक हैं अथवा इस भवसे पूर्व दशवें भवमें महाबल विद्या-धर थे इसलिये आपको नमस्कार हो, आप ललितांग हैं अर्थात् सुन्दर शरीरको धारण करनेवाले अथवा नौवें भवमें ऐशान स्वर्गके ललितांग देव थे, इसलिये आपको नमस्कार हो, आप धर्मरूपी तीर्थको प्रवर्तानेवाले ऐश्वर्यशाली और वज्रजंघ हैं अर्थात् वज्रके समान मजबूत जंघाओंको धारण करनेवाले हैं अथवा आठवें भवमें 'वज्रजंघ' नामके राजा थे ऐसे आपको नमस्कार

१ निःपरिग्रहाय । २ पवित्राम् । पक्षे पवनसम्बन्धिनीम् । ३ वेगिने वायवे वा । यथा वायुः वेगयुक्तः सन् वृक्षभङ्गं करोति तथायमपि ध्यानगुणेन वेगयुक्तः सन् मोहमहीरुहभङ्गं करोति । ४ भग्नमहा– अ०, प०, स०, द०, ल० । रुग्णो भग्नो महामोह महीरुड् वृक्षो येन स तस्मै तेन वायुमूर्ति-रित्युक्तं भवति । ५ कर्मेन्धनानि दहतीति कर्मेन्धनधक् तस्मै । ६ कपिलवर्ण । ७ पापरजोमलसङ्ग-रहिताय । ८ प्रभवे पक्षे व्यापिने । ९ निर्विकाराय तायिने अ०, प०, द०, स०, म०, ल० । १० पूजकाय, आत्मने इत्यर्थः । ११ सकलपूजास्वरूपस्वभावाय । १२ नित्यसुखदायिने पक्षे आह्लाददायिने । १३ अपृथक्कृता । १४ भावितीर्थकराय । १५ क्षितिमूर्त्याद्यष्टमूर्तये । १६ भो अनन्तवीर्य । पक्षे महाबल इति विद्याधरराज । १७ मनोहरावयवाय पक्षे 'ललिताङ्गनाम्ने । १८ वज्रवत् स्थिरे जङ्घे यस्यासौ तस्मै । पक्षे तन्नाम्ने ।

[1]नमः स्तादार्य[2] ते शुद्धिश्रिते[3] श्रीधर[4] ते नमः । नमः सुविधये[5] तुभ्यम् अच्युतेन्द्र[6] नमोऽस्तु ते ॥४९॥
वज्रस्तम्भस्थिराङ्गाय नमस्ते वज्रनाभये[7] । सर्वार्थसिद्धिनाथाय सर्वार्थां सिद्धिमीयुषे ॥५०॥
[8]दशावतारचरमपरमौदारिकत्विषे । सूनवे नाभिराजस्य नमोऽस्तु परमेष्ठिने ॥५१॥
भवन्तमित्यभिष्टुत्य [9]नान्यदाशास्महे[10] वयम् । भक्तिस्त्वय्येव नो[11] भूयाद् अलमन्यैर्मितैः फलैः ॥५२॥
इति स्तुत्वा सुरेन्द्रास्तं परमानन्दनिर्भराः[12] । अयोध्यागमने भूयो मतिं चक्रुः कृतोत्सवाः ॥५३॥
तथैव[13] प्रहता भेर्यः तथैवाघोषितो जयः । तथैवैरावतेभेन्द्रस्कन्धारूढं व्यधुर्जिनम् ॥५४॥
महाकलकलैर्गीतैः नृत्तैः सजयघोषणैः । गगनाङ्गणमुत्पत्य द्रागाजग्मुरमूं पुरीम् ॥५५॥

हो ॥ ४८ ॥ आप आर्य अर्थात् पूज्य हैं अथवा सातवें भवमें भोगभूमिज आर्य थे इसलिये आपको नमस्कार हो, आप दिव्य श्रीधर अर्थात् उत्तम शोभाको धारण करनेवाले हैं अथवा छठवें भवमें श्रीधर नामके देव थे ऐसे आपके लिये नमस्कार हो, आप सुविधि अर्थात् उत्तम भाग्यशाली हैं अथवा पाँचवें भवमें सुविधि नामके राजा थे इसलिये आपको नमस्कार हो, आप अच्युतेन्द्र अर्थात् अविनाशी स्वामी हैं अथवा चौथे भवमें अच्युत स्वर्गके इन्द्र थे इसलिये आपको नमस्कार हो ॥ ४९ ॥ आपका शरीर वज्रके खंभेके समान स्थिर हैं और आप वज्रनाभि अर्थात् वज्रके समान मजबूत नाभिको धारण करनेवाले हैं अथवा तीसरे भवमें वज्रनाभि नामके चक्रवर्ती थे ऐसे आपको नमस्कार हो । आप सर्वार्थसिद्धिके नाथ अर्थात् सब पदार्थोंकी सिद्धिके स्वामी तथा सर्वार्थसिद्धि अर्थात् सब प्रयोजनोंकी सिद्धिको प्राप्त हैं अथवा दूसरे भवमें सर्वार्थसिद्धि विमानको प्राप्त कर उसके स्वामी थे इसलिये आपको नमस्कार हो ॥ ५० ॥ हे नाथ ! आप दशावतारचरम अर्थात् सांसारिक पर्यायोंमें अन्तिम अथवा ऊपर कहे हुए महाबल आदि दश अवतारोंमें अन्तिम परमौदारिक शरीरको धारण करनेवाले नाभिराजके पुत्र वृषभदेव परमेष्ठी हुए हैं इसलिये आपको नमस्कार हो । भावार्थ—इस प्रकार श्लेषालंकारका आश्रय लेकर आचार्यने भगवान् वृषभदेवके दश अवतारोंका वर्णन किया है, उसका अभिप्राय यह है कि अन्यमतावलंबी श्रीकृष्ण विष्णुके दश अवतार मानते हैं यहाँ आचार्यने दश अवतार बतलाकर भगवान् वृषभदेवको ही श्रीकृष्ण-विष्णु सिद्ध किया है ॥ ५१ ॥ हे देव, इस प्रकार आपकी स्तुति कर हम लोग इसी फलकी आशा करते हैं कि हम लोगोंकी भक्ति आपमें ही रहे । हमें अन्य परिमित फलोंसे कुछ भी प्रयोजन नहीं है ॥ ५२ ॥ इस प्रकार परम आनन्दसे भरे हुए इन्द्रोंने भगवान् ऋषभदेवकी स्तुति कर उत्सवके साथ अयोध्या चलनेका फिर विचार किया ॥५३॥ अयोध्यासे मेरु पर्वत तक जाते समय मार्गमें जैसा उत्सव हुआ था उसी प्रकार फिर होने लगा । उसी प्रकार दुन्दुभि बजने लगे, उसी प्रकार जय जय शब्दका उच्चारण होने लगा और उसी प्रकार इन्द्रने जिनेन्द्र भगवान्‌को ऐरावत हाथीके कन्धेपर विराजमान किया ॥ ५४ ॥ वे देव बड़ा भारी कोलाहल, गीत, नृत्य और जय जय शब्दकी घोषणा करते हुए आकाशरूपी आंगनको उलँघकर शीघ्र ही अयोध्यापुरी आ पहुँचे ॥ ५५ ॥

---

१ नमोऽस्तु तुभ्यमार्याय दिव्यश्रीधर ते नमः अ०, प०, द०, स०, ल० । म० पुस्तके द्विविधः पाठः । २ पूज्य । पक्षे भोगभूमिजन । ३ दर्शनशुद्धिप्राप्ताय । ४ सम्पद्धर पक्षे श्रीधरनामदेव । ५ शोभनदैवाय । शोभनभोग्यायेत्यर्थः । 'विधिविधाने दैवेऽपि' इत्यभिधानात् । पक्षे सुविधिनामनृपाय । ६ अविनश्वरश्रेष्ठैश्वर्य । पक्षे अच्युतकल्पामरेन्द्र । ७ वज्रस्तम्भस्थिराङ्गत्वाद् वज्रनाभिर्यस्यासौ वज्रनाभिस्तस्मै । पक्षे वज्रनाभिचक्रिणे । ८ महाबलादिदशावतारेष्वन्त्यपरमौदारिकदेहमरीचये । ९ फलमाशास्महे वयम् अ०, प०, स०, द०, ल० । म० पुस्तके द्विविधः पाठः । १० याचामहे । ११ अस्माकम् । १२ परमानन्दातिशयाः । १३ अयोध्यापुरान्निर्गत्य मेरुप्रस्थानसमये यथा वाद्यवादनादयो जातास्तथैव ते सर्वे इदानीमपि जाताः ।

[1]याचक्राद् गगनोल्लङ्घिशिखरैः पृथुगोपुरैः। स्वर्गमाह्वयमानेव[2] पवनोच्छ्रितकेतनैः ॥५६॥
यस्यां[3] मणिमयी भूमिः तारकाप्रतिबिम्बितैः[4]। दधे कुमुद्वतीलक्ष्मीम् अक्षूणां[5] क्षणदामुखे[6] ॥५७॥
या पताकाकरैर्दूरम् उत्क्षिप्तैः पवनाहतैः। [7]आजुहूषुरिव स्वर्गवासिनोऽभूत् कुतूहलात् ॥५८॥
यस्यां मणिमयैर्हर्म्यैः कृतदम्पतिसंश्रयैः। [8]आक्षिप्तेव सुराधीशविमानश्रीरसंभ्रमम्[9] ॥५९॥
यत्र सौधाग्रसंलग्नैः इन्दुकान्तशिलातलैः[10]। चन्द्रपादाभिसंस्पर्शात् क्षरद्भिर्जलदायितम् ॥६०॥
या धत्ते स्म महासौधशिखरैर्मणिभासुरैः। सुरचापश्रियं दिक्षु विततां रत्नभामयीम् ॥६१॥
सरोजरागमाणिक्य[11]किरणैः क्वचिदम्बरम्। यत्र सन्ध्याम्बुदच्छन्नमिवालक्ष्यत पाटलम् ॥६२॥
इन्द्रनीलोपलैः सौधकूटलग्नैर्विलङ्घितम्[12]। स्फुरद्भिर्ज्योतिषां चक्रं यत्र नालक्ष्यताम्बरे ॥६३॥
गिरिकूटतटानीव सौधकूटानि शारदाः। घना यत्राश्रयन्ति स्म सून्नतः कस्य नाश्रयः ॥६४॥
प्रकारवलयो यस्याः चामीकरमयोऽद्युतत्। मानुषोत्तरशैलस्य श्रियं रत्नैरिवाहसन्[13] ॥६५॥
यत्खातिका महाम्भोधेः लीलां [14]यादोभिरुद्धतैः। धत्ते स्म क्षुभितालोलकल्लोलावर्त्तभीषणा ॥६६॥
जिनप्रसवभूमित्वात् या शुद्धाकरभूमिवत्। सूते स्म पुरुषानर्घ्यमहारत्नानि कोटिशः ॥६७॥

जिनके शिखर आकाशको उल्लंघन करनेवाले हैं और जिनपर लगी हुई पताकाएँ वायुके वेगसे फहरा रही हैं ऐसे गोपुर दरवाजोंसे वह अयोध्या नगरी ऐसी शोभायमान होती थी मानो स्वर्गपुरीको ही बुला रही हो ॥ ५६ ॥ उस अयोध्यापुरीकी मणिमयी भूमि रात्रिके प्रारम्भ समयमें ताराओंका प्रतिबिम्ब पड़नेसे ऐसी जान पड़ती थी मानो कुमुदोंसे सहित सरसीकी अखण्ड शोभा ही धारण कर रही हो ॥५७॥ दूर तक आकाशमें वायुके द्वारा हिलती हुई पताकाओंसे वह अयोध्या ऐसी मालूम होती थी मानो कौतूहलवश ऊँचे उठाये हुए हाथोंसे स्वर्गवासी देवोंको बुलाना चाहती हो ॥ ५८ ॥ जिनमें अनेक सुन्दर स्त्री-पुरुष निवास करते थे ऐसे वहांके मणिमय महलोंको देखकर निःसन्देह कहना पड़ता था कि मानो इन महलोंने इन्द्रके विमानोंकी शोभा छीन ली थी अथवा तिरस्कृत कर दी थी ॥ ५९ ॥ वहाँपर चूना गचीके बने हुए बड़े बड़े महलोंके अग्रभागपर सैकड़ों चन्द्रकान्त मणि लगे हुए थे, रातमें चन्द्रमाकी किरणोंका स्पर्श पाकर उनसे पानी झर रहा था जिससे वे मणि मेघके समान मालूम होते थे ॥ ६० ॥ उस नगरीके बड़े बड़े राजमहलोंके शिखर अनेक मणियोंसे देदीप्यमान रहते थे, उनसे सब दिशाओंमें रत्नोंका प्रकाश फैलता रहता था जिससे ऐसा मालूम होता था मानो वह नगरी इन्द्रधनुष ही धारण कर रही हो ॥ ६१ ॥ उस नगरीका आकाश कहीं कहीं पर पद्मराग मणियोंकी किरणोंसे कुछ कुछ लाल हो रहा था जिससे ऐसा मालूम होता था मानो संध्याकालके बादलोंसे आच्छादित ही हो रहा हो ॥ ६२ ॥ वहांके राजमहलोंकी शिखरोंमें लगे हुए देदीप्यमान इन्द्रनील मणियोंसे छिपा हुआ ज्योतिश्चक्र आकाशमें दिखाई ही नहीं पड़ता था ॥ ६३ ॥ उस नगरीके राजमहलोंके शिखर पर्वतोंकी शिखरोंके समान बहुत ही ऊँचे थे और उनपर शरद् ऋतुके मेघ आश्रय लेते थे सो ठीक ही है क्योंकि जो अतिशय उन्नत (ऊँचा या उदार) होता है वह किसका आश्रय नहीं होता ? ॥ ६४ ॥ उस नगरीका सुवर्णका बना हुआ परकोटा ऐसा अच्छा शोभायमान हो रहा था मानो अपनेमें लगे हुए रत्नोंकी किरणोंसे सुमेरु पर्वतकी शोभाकी हँसी ही कर रहा हो ॥ ६५ ॥ अयोध्यापुरीकी परिखा उद्धत हुए जलचर जीवोंसे सदा क्षोभको प्राप्त होती रहती थी और चञ्चल लहरों तथा आवर्तोंसे भयंकर रहती थी इसलिये किसी बड़े भारी समुद्रकी लीला धारण करती थी ॥ ६६ ॥ भगवान् वृषभदेवकी जन्मभूमि होनेसे

१ अभात्। २ स्पर्द्धमाना। (आकारयन्ती वा) 'ह्वेञ् स्पर्धायां शब्दे च'। ३ यस्या प०, ल०। ४ प्रतिबिम्बैः। ५ -मक्षुण्णां ल०। ६ रजनीमुखे। ७ आह्वातुमिच्छुः। ८ तिरस्कृता। ९ निराकुलं यथा भवति तथा। १० -शिलाशतैः अ०, प०, द०, स०, म०, ल०। ११ पद्मराग। १२ आक्रान्तम्। १३ -रिवाहसत् प०, द०, स०, म०, ल०। १४ मकरादिजलजन्तुभिः।

यस्याश्च बहिरुद्यानैः अनेकानोकहाकुलैः । फलच्छायप्रदैः[1] कल्पतरुच्छाया स्म लङ्घ्यते ॥६८॥
यस्याः पर्यन्तमावेष्ट्य स्थिता सा सरयूर्नदी । लसत्पुलिनसंसुप्तसारसा हंसनादिनी ॥६९॥
यां[2] प्राहुररिदुर्लङ्घ्याम्[3] अयोध्यां [4]योधसङ्कुलाम् । विनीताखण्डमध्यस्था[5] या [6]तन्नाभिरिवाबभौ ॥७०॥
तामारुध्य पुरीं विष्वग् अनीकानि सुधाशिनाम् । तस्थुर्जगन्ति[7] तच्छोभाम् आगतानीव वीक्षितुम् ॥७१॥
ततः कतिपयैर्देवैः देवमादाय देवराट् । प्रविवेश नृपागारं परार्ध्यश्रीपरम्परम् ॥७२॥
तत्रामरकृतानेक[8]विन्यासे श्रीगृहाङ्गणे । हर्यासने कुमारं तं सौधर्मेन्द्रो न्यवीविशत्[9] ॥७३॥
नाभिराजः समुद्भिन्नपुलकं गात्रमुद्वहन् । प्रीतिविस्फारिताक्षस्तं ददर्श प्रियदर्शनम्[10] ॥७४॥
मायानिद्रामपाकृत्य देवी शच्या प्रबोधिता । देवीभिः सममैक्षिष्ट प्रहृष्टा जगतां पतिम् ॥७५॥
तेजःपुञ्जमिवोद्भूतं सापश्यत् स्वसुतं सती । [11]बालार्केणेन्द्रेण च [सा] तेन दिगैन्द्रीव विद्युते ॥७६॥
शच्या समं च नाकेशं तावद्राष्टां जगद्गुरोः । पितरौ नितरां प्रीतौ परिपूर्णमनोरथौ ॥७७॥
ततस्तौ जगतां पूज्यौ पूजयामास वासवः । विचित्रैर्भूषणैः स्रग्भिः अंशुकैश्च[12] महार्घकैः[13] ॥७८॥
तौ प्रीतः प्रशशंसेति सौधर्मेन्द्रः सुरैस्समम् । युवां पुण्यधनौ[14] धन्यौ ययोर्लोकाग्रणीः सुतः ॥७९॥

वह नगरी शुद्ध खानिकी भूमिके समान थी और उसने करोड़ों पुरुषरूपी अमूल्य महारत्न उत्पन्न भी किये थे ॥ ६७ ॥ अनेक प्रकारके फल तथा छाया देनेवाले और अनेक प्रकारके वृक्षोंसे भरे हुए वहांके बाहरी उपवनोंने कल्पवृक्षोंकी शोभा तिरस्कृत कर दी थी ॥ ६८ ॥ उसके समीपवर्ती प्रदेशको घेरकर सरयू नदी स्थित थी जिसके सुन्दर किनारोंपर सारस पक्षी सो रहे थे और हंस मनोहर शब्द कर रहे थे ॥ ६९ ॥ वह नगरी अन्य शत्रुओंके द्वारा दुर्लंघ्य थी और स्वयं अनेक योद्धाओंसे भरी हुई थी इसीलिये लोग उसे 'अयोध्या' (जिससे कोई युद्ध नहीं कर सके) कहते थे। उसका दूसरा नाम विनीता भी था और वह आर्यखण्डके मध्यमें स्थित थी इसलिये उसकी नाभिके समान शोभायमान हो रही थी ॥७०॥ देवोंकी सेनाएं उस अयोध्यापुरीको चारों ओरसे घेरकर ठहर गई थीं जिससे ऐसी मालूम होती थी मानो उसकी शोभा देखनेके लिये तीनों लोक ही आगये हों ॥ ७१ ॥ तत्पश्चात् इन्द्रने भगवान् वृषभदेवको लेकर कुछ देवोंके साथ उत्कृष्ट लक्ष्मीसे सुशोभित महाराज नाभिराजके घरमें प्रवेश किया ॥७२॥ और वहां जहां पर देवोंने अनेक प्रकारकी सुन्दर रचना की है ऐसे श्रीगृहके आंगनमें बालकरूपधारी भगवान्‌को सिंहासनपर विराजमान किया ॥ ७३ ॥ महाराज नाभिराज उन प्रियदर्शन भगवान्‌को देखने लगे, उस समय उनका सारा शरीर रोमांचित हो रहा था, नेत्र प्रीतिसे प्रफुल्लित तथा विस्तृत हो रहे थे ॥ ७४ ॥ मायामयी निद्रा दूर कर इन्द्राणीके द्वारा प्रबोधको प्राप्त हुई माता मरुदेवी भी हर्षितचित्त होकर देवियोंके साथ-साथ तीनों जगत्‌के स्वामी भगवान् वृषभदेवको देखने लगी ॥ ७५ ॥ वह सती मरुदेवी अपने पुत्रको उदय हुए तेजके पुंजके समान देख रही थी और वह उससे ऐसी सुशोभित हो रही थी जैसी कि बालसूर्यसे पूर्व दिशा सुशोभित होती है ॥ ७६ ॥ जिनके मनोरथ पूर्ण हो चुके हैं ऐसे जगद्गुरु भगवान् वृषभदेवके माता-पिता अतिशय प्रसन्न होते हुए इन्द्राणीके साथ साथ इन्द्रको देखने लगे ॥ ७७ ॥ तत्पश्चात् इन्द्रने आश्चर्यकारी, महामूल्य और अनेक प्रकारके आभूषणों तथा मालाओंसे उन जगत्पूज्य माता-पिताकी पूजा की ॥ ७८ ॥ फिर वह सौधर्म स्वर्गका इन्द्र अत्यन्त सन्तुष्ट हो कर उन दोनोंकी इस प्रकार स्तुति करने लगा

१ शोभा अनातपो वा। २ यामाहु– अ०, स०, म०,। ३ शत्रुदुर्गमाम्। हेतुगर्भितमिदं विशेषणम्। ४ भटसङ्कीर्णाम्। ५ आर्यखण्डनाभिः। ६ तदार्यखण्डनाभिः। ७ जगत्त्रयम्। ८ अनेकरचनाविन्यासे। ९ स्थापयामास। १० प्रीतिकरावलोकनम्। ११ बालार्केणेव सा तेन प०, द०, स०, म०, ल०। १२ –रद्भुतैश्च अ०, म०, ग०, ल०। १३ महामूल्यैः। १४ पुण्यधनौ ब०, अ०, प०, म०, द०, स०, ल०।

युवामेव महाभागौ[1] युवां कल्याणभागिनौ । युवयोर्न तुला लोके युवामधि[2]गुरोर्गुरू[3] ॥८०॥
भो नाभिराज सत्यं त्वम् उदयाद्रिर्महोदयः । देवी प्राच्येव [4]यज्ज्योतिः [5]युष्मत्तः परमुद्बभौ ॥८१॥
देवधिष्ण्यमिवागारम्[6] इदमाराध्यमद्य वाम्[7] । पूज्यौ युवां च नः शश्वत् पितरौ जगतां पितुः ॥८२॥
इत्यभिष्टुत्य तौ देवम् अर्पयित्वा च तत्करे । शताध्वरः क्षणं तस्थौ कुर्वंस्तामेव[8] संकथाम्[9] ॥८३॥
तौ शक्रेण यथावृत्तम् आवेदितजिनोत्सवौ । प्रमदस्य परां कोटिम् आरूढौ विस्मयस्य च ॥८४॥
जातकर्मोत्सवं भूयः चक्रतुस्तौ शतक्रतोः[10] । लब्ध्वानुमतिमिद्धर्द्ध्या समं पौरैर्धृतोत्सवैः ॥८५॥
सा केतुमालिकाकीर्णा[11] पुरी [12]साकेतसाह्वया । तदासीत् स्वर्गमाह्वातुं[13] सा[14]कूतेवात्तकौतुका ॥८६॥
पुरी स्वर्गपुरीवासौ समाः पौरा दिवौकसाम् । [15]तदा संभृतनेपथ्याः[16] पुरनार्योऽप्सरःसमाः ॥८७॥
धूपामोदैर्दिशो रुद्धाः [17]पटवासैस्ततं[18] नभः । सङ्गीतमुरवध्वानैः[19] दिक्चक्रं बधिरीकृतम् ॥८८॥
पुरवीथ्यस्तदाभूवन् रत्नचूर्णैरलङ्कृताः । निरुद्धातपसंपाताः[20] प्रचलत्केतनांशुकैः ॥८९॥
चलत्पताकमाबद्धतोरणाञ्चितगोपुरम् । कृतोपशोभमारब्धसङ्गीतरवरुद्धदिक् ॥९०॥

कि आप दोनों पुण्यरूपी धनसे सहित हैं तथा बड़े ही धन्य हैं क्योंकि समस्त लोकमें श्रेष्ठ पुत्र आपके ही हुआ है ॥ ७९ ॥ इस संसारमें आप दोनों ही महाभाग्यशाली हैं, आप दोनों ही अनेक कल्याणोंको प्राप्त होनेवाले हैं और लोकमें आप दोनोंकी बराबरी करनेवाला कोई नहीं है, क्योंकि आप जगत्के गुरुके भी गुरु अर्थात् माता-पिता हैं ॥ ८० ॥ हे नाभिराज, सच है कि आप ऐश्वर्यशाली उदयाचल हैं और रानी मरुदेवी पूर्व दिशा है क्योंकि यह पुत्ररूपी परम ज्योति आपसे ही उत्पन्न हुई है ॥ ८१ ॥ आज आपका यह घर हम लोगोंके लिये जिनालयके समान पूज्य है और आप जगत्पिताके भी माता-पिता हैं इसलिये हम लोगोंके सदा पूज्य हैं ॥ ८२ ॥ इस प्रकार इन्द्रने माता-पिताकी स्तुति कर उनके हाथोंमें भगवान्को सौंप दिया और फिर उन्हींके जन्माभिषेककी उत्तम कथा कहता हुआ वह क्षणभर वहीं पर खड़ा रहा ॥ ८३ ॥ इन्द्रके द्वारा जन्माभिषेककी सब कथा मालूम कर माता-पिता दोनों ही हर्ष और आश्चर्यकी अन्तिम सीमा पर आरूढ़ हुए ॥ ८४ ॥ माता-पिताने इन्द्रकी अनुमति प्राप्त कर अनेक उत्सव करनेवाले पुरवासी लोगोंके साथ साथ बड़ी विभूतिसे भगवान्का फिर भी जन्मोत्सव किया ॥ ८५ ॥ उस समय पताकाओंकी पङ्क्तिसे भरी हुई वह अयोध्या नगरी ऐसी मालूम होती थी मानो कौतुकवश स्वर्गको बुलानेके लिये इशारा ही कर रही हो ॥ ८६ ॥ उस समय वह अयोध्या नगरी स्वर्गपुरीके समान मालूम होती थी, नगरवासी लोग देवोंके तुल्य जान पड़ते थे और अनेक वस्त्राभूषण धारण किये हुई नगरनिवासिनी स्त्रियाँ अप्सराओंके समान जान पड़ती थीं ॥ ८७ ॥ धूपकी सुगन्धिसे सब दिशाएँ भर गई थीं, सुगन्धित चूर्णसे आकाश व्याप्त हो गया था और संगीत तथा मृदङ्गोंके शब्दसे समस्त दिशाएँ बहरी हो गई थीं ॥ ८८ ॥ उस समय नगरकी सब गलियाँ रत्नोंके चूर्णसे अलंकृत हो रही थीं और हिलती हुई पताकाओंके वस्त्रोंसे उनमें सब संताप रुक गया था ॥ ८९ ॥ उस समय उस नगरमें सब स्थानों पर पताकाएँ हिल रही थीं (फहरा रही थीं) जिससे ऐसा जान पड़ता था मानो वह नगर नृत्य ही कर रहा हो । उसके गोपुर दरवाजे बँधे हुए तोरणोंसे शोभायमान हो रहे थे जिससे ऐसा मालूम होता था मानो वह अपने मुखकी सुन्दरता ही दिखला रहा हो, जगह जगह वह नगर सजाया गया

१ महाभाग्यवन्तौ । २ जगत्त्रयगुरोः । ३ पितरौ । ४ यस्मात् कारणात् । ५ युवाभ्याम् । ६ देवतागृहम् । ७ युवयोः । ८ जन्माभिषेकसम्बन्धिनीम् । ९ सत्कथाम् अ०, म०, ल० । १० इन्द्रात् । ११ –कार्ष्णा– म०, ल० । १२ आह्वयेन सहिता साह्वया साकेतेति साह्वया साकेतसाह्वया । १३ स्पर्द्धां कर्तुम् । १४ साभिप्राया । १५ तदावभृत–प० । तदा संभृत– अ० । १६ अलङ्काराः । १७ पटवासचूर्णैः । १८ आच्छादितम् । १९ –मुरज– स०, म०, ल० । २० सम्पर्काः ।

प्रनृत्यदिव सौमुख्य[1]मिव तद्दर्शयत्पुरम्। [2]सनेपथ्यमिवानन्दात् प्रजल्पदिव चाभवत् ॥९१॥
ततो गीतैश्च नृत्तैश्च वादित्रैश्च[3] समङ्गलैः। व्यग्रः[4] पौरजनः सर्वोऽप्यासीदानन्दनिर्भरः ॥९२॥
न तदा कोऽप्यभूद् दीनो[5] न तदा कोऽपि दुर्विधः[6]। न तदा कोऽप्यपूर्णेच्छो[7] न तदा कोऽप्यकौतुकः ॥९३॥
सप्रमोदमयं विश्वम् इत्यातन्वन्महोत्सवः। यथा मेरौ तथैवास्मिन् पुरे सान्तःपुरेऽवृतत् ॥९४॥
दृष्ट्वा प्रमुदितं[8] तेषां[9] स्वं प्रमोदं प्रकाशयन्। सङ्क्रन्दनो मनोवृत्तिम् आनन्दानन्दनाटके[10] ॥९५॥
नृत्तारम्भे महेन्द्रस्य सज्जः[11] सङ्गीतविस्तरः। [12]गन्धर्वैस्तद्विधानज्ञैः [13]भाण्डोपवहनादिभिः ॥९६॥
कृतानुकरणं[14] नाट्यं तत्प्रयोज्यं यथागमम्[15]। स चागमो महेन्द्राद्यैः यथाम्नाय[16]मनुस्मृतः[17] ॥९७॥
वक्तॄणां तत्प्रयोक्तृत्वे[18] लालित्यं[19] किमु वर्ण्यते। [20]पात्रान्तरेऽपि सङ्क्रान्तं [21]यत् सतां चित्तरञ्जनम् ॥९८॥
ततः[22] श्रव्यं च दृश्यं च [23]तत्प्रयुक्तं महात्मनाम्[24]। [25]पाठ्यैर्नानाविधैश्चित्रैः [26]आङ्गिकाभिनयैरपि ॥९९॥
विकृष्टः[27] कुतपन्यासो[28] मही सकुलभूधरा। रङ्गस्त्रिभुवनाभोगः[29] सहस्राक्षो महानटः[30] ॥१००॥

था जिससे ऐसा जान पड़ता था मानो वस्त्राभूषण ही धारण किये हो और प्रारम्भ किये हुए संगीतके शब्दसे उस नगरकी समस्त दिशाएँ भर रही थीं जिससे ऐसा जान पड़ता था मानो वह आनन्दसे बातचीत ही कर रहा हो अथवा गा रहा हो ॥ ९०–९१ ॥ इस प्रकार आनन्दसे भरे हुए समस्त पुरवासी जन गीत, नृत्य, वादित्र तथा अन्य अनेक मङ्गल-कार्योंमें व्यग्र हो रहे थे ॥ ९२ ॥ उस समय उस नगरमें न तो कोई दीन रहा था, न निर्धन रहा था, न कोई ऐसा ही रहा था जिसकी इच्छाएँ पूर्ण नहीं हुई हों और न कोई ऐसा ही था जिसे आनन्द उत्पन्न नहीं हुआ हो ॥ ९३ ॥ इस तरह सारे संसारको आनन्दित करनेवाला वह महोत्सव जैसा मेरु पर्वतपर हुआ था वैसा ही अन्तःपुर सहित इस अयोध्या नगरमें हुआ ॥ ९४ ॥ उन नगर-वासियोंका आनन्द देखकर अपने आनन्दको प्रकाशित करते हुए इन्द्रने आनन्द नामक नाटक करनेमें अपना मन लगाया ॥ ९५ ॥ ज्यों ही इन्द्रने नृत्य करना प्रारम्भ किया त्यों ही संगीत विद्याके जाननेवाले गन्धर्वोंने अपने बाजे वगैरह ठीक कर विस्तारके साथ संगीत करना प्रारम्भ कर दिया ॥ ९६ ॥ पहले किसीके द्वारा किये हुए कार्यका अनुकरण करना नाट्य कहलाता है, वह नाट्य, नाट्यशास्त्रके अनुसार ही करनेके योग्य है और उस नाट्यशास्त्रको इन्द्रादि देव ही अच्छी तरह जानते हैं ॥ ९७ ॥ जो नाट्य या नृत्य शिष्य प्रतिशिष्य रूप अन्य पात्रोंमें संक्रान्त होकर भी सज्जनोंका मनोरंजन करता रहता है यदि उसे स्वयं उसका निरूपण करनेवाला ही करे तो फिर उसकी मनोहरताका क्या वर्णन करना है ? ॥ ९८ ॥ तत्पश्चात् अनेक प्रकारके पाठों और चित्र-विचित्र शरीरकी चेष्टाओंसे इन्द्रके द्वारा किया हुआ वह नृत्य महात्मा पुरुषोंके देखने और सुनने योग्य था ॥ ९९ ॥ उस समय अनेक प्रकारके बाजे बज रहे थे, तीनों लोकोंमें फैली हुई कुलाचलों सहित पृथिवी ही उसकी रंगभूमि थी, स्वयं इन्द्र प्रधान नृत्य करनेवाला था, नाभिराज आदि उत्तम उत्तम पुरुष उस नृत्यके दर्शक थे, जगद्गुरु भगवान् वृषभदेव उसके आराध्य (प्रसन्न करने योग्य) देव थे, और धर्म अर्थ काम इन तीन पुरुषार्थोंकी सिद्धि तथा

---

१ सुमुखत्वम्। २ सालङ्कारम्। ३ वाद्यैः। ४ आसक्तः। ५ लुब्धः। ६ दरिद्रः। ७ असम्पूर्ण-वाञ्छः। ८ प्रमोदम्। ९ नाभिराजादीनाम्। १० –मबध्नादानन्दनाटके प०, द०, म०। आनन्द बबन्ध। 'अदु बन्धने' लिट्। ११ कृतप्रयत्नः। १२ गीतैः देवभेदैर्वा। १३ वाद्यधारणादिभिः। १४ पूर्वस्मिन् कृतस्यानुकरणमभिनयः। १५ नाट्यशास्त्रानतिक्रमेण। १६ सन्ततिमनतिक्रम्य। १७ ज्ञातः। १८ तन्नाट्य-प्रयोक्तृत्वे। १९ ललितत्वम्। २० पात्रभेदेऽपि। २१ यत् नाट्यशास्त्रलालित्यं पात्रान्तरेऽपि सङ्क्रान्तं चेत्। २२ ततः कारणात्। २३ नाट्यम्। २४ महात्मना द०, ट०। महेन्द्रेण। २५ गद्यपद्यादिभिः। २६ अङ्गजनिताभिनयैः। २७ विलिखितः, ताडित इत्यर्थः। २८ वाद्यानां न्यासः। 'कुतपोऽर्के गवि विप्रे ब्रह्मावतिथौ च भागिनेये च। अस्त्री दिनाष्टमांशे कुशतिलयोः छागकम्बले वाद्ये॥' इत्यभिधानात्। २९ त्रिलोकस्याभोगो विस्तारो यस्य सः। ३० महानर्तकः।

प्रेक्षका नाभिराजाद्याः समाराध्यो[1] जगद्गुरुः । फलं त्रिवर्गसंभूतिः[2] परमानन्द एव च ॥१०१॥
इत्येकशोऽपि संप्रीत्यै वस्तुजातमिदं सताम् । किमु तत्सर्वसन्दोहः पुण्यैरेकत्र सङ्गतः ॥१०२॥
कृत्वा समवतारं[3] तु त्रिवर्गफलसाधनम् । जन्माभिषेकसम्बन्धं [4]प्रायुङ्क्तैनं तदा हरिः ॥१०३॥
तदा प्रयुक्तमन्यच्च रूपकं बहुरूपकम्[5] । [6]दशावतारसंदर्भम् अधिकृत्य जिनेशिनः ॥१०४॥
तत्प्रयोगविधौ पूर्वं पूर्वरङ्गं[7] समङ्गलम् । प्रारेभे मघवाघानां विघाताय [8]समाहितः ॥१०५॥
पूर्वरङ्गप्रसङ्गेन[9] पुष्पाञ्जलिपुरस्सरम् । ताण्डवारम्भमेवाग्रे[10] [11]सुरप्राग्रहरोऽग्रहीत् ॥१०६॥
प्रयोज्य [12]नान्दीमन्तेऽस्या[13]विशन् रङ्गं बभौ हरिः । धृतमङ्गलनेपथ्यो[14] [15]नाट्यवेदावतारवित्[16] ॥१०७॥
स रङ्गमवतीर्णोऽभाद् वैशाखस्थानमास्थितः । लोकस्कन्ध इवोद्भूतो [17]मरुद्भिरभितो वृतः ॥१०८॥
[18]मध्येरङ्गमसौ रेजे क्षिपन् पुष्पाञ्जलिं हरिः । [19]विभजन्निव पीताव[20]शेषनाट्यरसं स्वयम् ॥१०९॥
ललितोद्भटनेपथ्यो[21] लसन्नयनसन्ततिः । स रेजे कल्पशाखीव सप्रसूनः सभूषणः ॥११०॥
[22]पुष्पाञ्जलिः पतन् रेजे मत्तालिभिरनुद्रुतः[23] । नेत्रौघ इव वृत्रघ्नः[24] [25]कल्मापितनभोऽङ्गणः ॥१११॥

परमानन्द रूप मोक्षकी प्राप्ति होना ही उसका फल था। इन ऊपर कही हुई वस्तुओंमेंसे एक एक वस्तु भी सज्जन पुरुषोंको प्रीति उत्पन्न करनेवाली है फिर पुण्योदयसे पूर्वोक्त सभी वस्तुओंका समुदाय किसी एक जगह आ मिले तो कहना ही क्या है? ॥ १००-१०२॥ उस समय इन्द्रने पहले त्रिवर्ग (धर्म अर्थ काम) रूप फलको सिद्ध करनेवाला गर्भावतार सम्बन्धी नाटक किया और फिर जन्माभिषेक सम्बन्धी नाटक करना प्रारम्भ किया ॥ १०३ ॥ तदनन्तर इन्द्रने भगवान्के महाबल आदि दशावतार सम्बन्धी वृत्तान्तको लेकर अनेक रूप दिखलानेवाले अन्य अनेक नाटक करना प्रारम्भ किये ॥ १०४ ॥ उन नाटकोंका प्रयोग करते समय इन्द्रने सबसे पहले, पापोंका नाश करनेके लिये मंगलाचरण किया और फिर सावधान होकर पूर्वरङ्गका प्रारम्भ किया ॥ १०५ ॥ पूर्वरंग प्रारम्भ करते समय इन्द्रने पुष्पाञ्जलि क्षेपण करते हुए सबसे पहले ताण्डव नृत्य प्रारम्भ किया ॥ १०६ ॥ ताण्डव नृत्यके प्रारम्भमें उसने नान्दी मङ्गल किया और फिर नान्दी मङ्गल कर चुकनेके बाद रङ्गभूमिमें प्रवेश किया। उस समय नाट्य शास्त्रके अवतारको जाननेवाला और मंगलमय वस्त्राभूषण धारण करनेवाला वह इन्द्र बहुत ही शोभायमान हो रहा था ॥१०७॥ जिस समय वह रंग भूमिमें अवतीर्ण हुआ था उस समय वह अपने दोनों हाथ कमरपर रखे हुआ था और चारों ओरसे मरुत् अर्थात् देवोंसे घिरा हुआ था इसलिये ऐसा जान पड़ता था मानो मरुत् अर्थात् वात वलयोंसे घिरा हुआ लोकस्कन्ध ही हो ॥ १०८ ॥ रंगभूमिके मध्यमें पुष्पाञ्जलि बिखेरता हुआ वह इन्द्र ऐसा भला मालूम होता था मानो अपने पान करनेसे बचे हुए नाट्य रसको दूसरोंके लिये बाँट ही रहा हो ॥ १०९ ॥ वह इन्द्र अच्छे अच्छे वस्त्राभूषणोंसे शोभायमान था और उत्तम नेत्रोंका समूह धारण कर रहा था इसलिये पुष्पों और आभूषणोंसे सहित किसी कल्पवृक्षके समान सुशोभित हो रहा था ॥ ११० ॥ जिसके पीछे अनेक मदोन्मत्त भौंरे दौड़ रहे हैं ऐसी वह पड़ती हुई पुष्पाञ्जलि ऐसी सुशोभित हो रही थी मानो आकाशको चित्र विचित्र

१ समापतिः । २ उत्पत्तिः । ३ गर्भावतारम् । ४ प्रयुक्तवान् । ५ भूमिकाम् । ६ महाबलादि । ७ पूर्वशुद्धचित्रमिति । "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥' ८ अवधानपरः । ९ पूर्वरङ्गविधानेन । १० ललितभाषणगर्भलास्यं ताण्डवं तस्यारम्भम् । ११ सुरश्रेष्ठः । १२ जर्झरपूजामङ्गल पटहोच्चारणपुष्पाञ्जलिक्षेपणादिनान्दीविधिम् । १३ नान्द्याः । १४ मङ्गलालङ्कारः । १५ नाट्यशास्त्रम् । १६ –वित् वत् म० पुस्तके द्वौ पाठौ । १७ देवैः । १८ रङ्गस्य मध्ये । १९ दिशि दिशि विभागीकुर्वन् । २० पीतावशिष्टं नाट्य– प०, अ०, ल० । २१ मनोज्ञोल्वणालङ्कारः । २२ अयं श्लोकः पुरुदेवचम्पूकारेण स्वकीये पुरुदेवचम्पूप्रबन्धे पञ्चमस्तवकस्य चतुर्विंशतितमश्लोकतां प्रापितः । २३ अनुगतः । २४ वार्त्रघ्नः अ०, प०, म०, द०, स०, ल० । २५ कर्बुरित ।

परितः परितस्तार[1] तारास्य[2] नयनावली । रङ्गमात्मप्रभोत्सर्पैः श्रितैर्जवनिकाश्रियम् ॥११२॥
सलयैः[3] पदविन्यासैः परितो रङ्गमण्डलम् । परिक्रामन्नसौ[4] रेजे विमान[5] इव काश्यपीम्[6] ॥११३॥
कृतपुष्पाञ्जलेरस्य ताण्डवारम्भसंभ्रमे । पुष्पवर्षं दिवोऽमुञ्चन् सुरास्तद्भक्तितोषिताः[7] ॥११४॥
तदा पुष्करवाद्यानि[8] मन्द्रं दध्वनुरक्रमात्[9] । दिक्तटेषु प्रतिध्वानान् आतन्वानि कोटिशः ॥११५॥
वीणा मधुरमारेणुः [10]कलं वंशा[11] विसस्वनुः । [12]गेयान्यनुगतान्येषां समं तालैरराणिपुः[13] ॥११६॥
[14]उपवादकवाद्यानि परिवादकवादितैः[15] । बभूवुः सङ्गतान्येव[16] साङ्गत्यं[17] हि सयोनिषु ॥११७॥
[18]काकलीकलमामन्द्रतारमूर्च्छनमुज्जगे । तदोपवीणयन्तीभिः[19] किन्नरीभिरनुल्वणम्[20] ॥११८॥
ध्वनद्भिर्मधुरं मौखं[21] सम्बन्धं प्राप्य शिष्यवत् । कृतं वंशोचितं[22] वंशैः प्रयोगेष्वविवादिभिः[23] ॥११९॥
प्रयुज्य मघवा शुद्धं पूर्वरङ्गमनुक्रमात् । [24]करणैरङ्गहारैश्च[25] चित्रं प्रायुङ्क्त तं पुनः ॥१२०॥
चित्रैश्च रेचकैः[26] पादकटिकण्ठकराश्रितैः । ननाट ताण्डवं शक्रो दर्शयन् रसमूर्जितम् ॥१२१॥

करनेवाला इन्द्रके नेत्रोंका समूह ही हो ॥ १११ ॥ इन्द्रके बड़े बड़े नेत्रोंकी पङ्क्ति जवनिका (परदा) की शोभा धारण करनेवाली अपनी फैलती हुई प्रभासे रंगभूमिको चारों ओरसे आच्छादित कर रही थी ॥ ११२ ॥ वह इन्द्र तालके साथ साथ पैर रखकर रंगभूमिके चारो ओर घूमता हुआ ऐसा शोभायमान हो रहा था मानो पृथिवीको नाप ही रहा हो ॥ ११३ ॥ जब इन्द्रने पुष्पाञ्जलि क्षेपण कर ताण्डव नृत्य करना प्रारम्भ किया तब उसकी भक्तिसे प्रसन्न हुए देवोंने स्वर्ग अथवा आकाशसे पुष्प वर्षा की थी ॥ ११४ ॥ उस समय दिशाओंके अन्त भाग तक प्रतिध्वनिको विस्तृत करते हुए पुष्कर आदि करोड़ों बाजे एक साथ गम्भीर शब्दोंसे बज रहे थे ॥ ११५ ॥ वीणा भी मनोहर शब्द कर रही थी, मनोहर मुरली भी मधुर शब्दोंसे बज रही थी और उन बाजोंके साथ ही साथ तालसे सहित संगीतके शब्द हो रहे थे ॥ ११६ ॥ वीणा बजानेवाले मनुष्य जिस स्वर वा शैलीसे वीणा बजा रहे थे, साथके अन्य बाजोंके बजानेवाले मनुष्य भी अपने अपने बाजोंको उसी स्वर वा शैलीसे मिलाकर बजा रहे थे सो ठीक ही है एकसी वस्तुओंमें मिलाप होना ही चाहिये ॥ ११७ ॥ उस समय वीणा बजाती हुई किन्नर-देवियाँ कोमल, मनोहर कुछ कुछ गंभीर, उच्च और सूक्ष्मरूपसे गा रही थीं ॥ ११८ ॥ जिस प्रकार उत्तम शिष्य गुरुका उपदेश पाकर मधुर शब्द करता है और अनुमानादिके प्रयोगमें किसी प्रकारका वाद विवाद नहीं करता हुआ अपने उत्तम वंश (कुल) के योग्य कार्य करता है उसी प्रकार वंशी आदि बांसोंके बाजे भी मुखका सम्बन्ध पाकर मनोहर शब्द कर रहे थे और नृत्य-संगीत आदिके प्रयोगमें किसी प्रकारका विवाद (विरोध) नहीं करते हुए अपने वंश (बांस) के योग्य कार्य कर रहे थे ॥ ११९ ॥ इस प्रकार इन्द्रने पहले तो शुद्ध (कार्यान्तरसे रहित) पूर्वरङ्गका प्रयोग किया और फिर करण (हाथोंका हिलाना तथा अङ्गहार (शरीरका मटकाना) के द्वारा विविधरूपमें उसका प्रयोग किया ॥ १२० ॥ वह इन्द्र पाँव कमर कंठ और हाथोंको अनेक प्रकारसे घुमाकर उत्तम रस दिखलाता हुआ ताण्डव नृत्य कर रहा

---

१ 'स्तृञ् आच्छादने'। २ स्फुरती। ३ तालमानयुतैः। ४ परिभ्रमन्। ५ प्रमाणं कुर्वन्। ६ पृथ्वीम्। ७ इन्द्रभक्ति। ८ चर्मसम्बद्धमुखतूर्याणि। 'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले' इत्यभिधानात्। ९ युगपत्। १० कलवंशाः म०, ल०। ११ वांशाः। १२ प्रबन्धाः। १३ गानं चक्रुरित्यर्थः। १४ उप समीपे वदन्तीति उपवादकानि तानि च तानि वाद्यानि च उपवादकवाद्यानि। १५ वीणाशब्दैः। १६ संयुक्तानि। हृदयङ्गमानि वा। 'सङ्गतं हृदयङ्गमम्' इत्यभिधानात्। १७ समानधर्मवस्तु। १८ 'काकली तु कले सूक्ष्मे' इत्यमरः। १९ वीणया उपगायन्तीभिः। २० अनुत्कटं यथा भवति तथा। २१ मुखाज्जातम्। २२ वेणोरन्वयस्य वोचितम्। २३ विवादमकुर्वद्भिः। २४ करन्यासैः। २५ अङ्गविक्षेपैः। २६ भ्रमणैः।

तस्मिन्बाहुसहस्राणि विकृत्य[1] प्रणिनृत्यति । धरा चरणविन्यासैः स्फुटन्तीव तदाचलत्[2] ॥१२२॥
कुलाचलाश्चलन्ति स्म तृणानामिव राशयः । अभूज्जलधिरुद्वेलः प्रमदादिव निध्वनन्[3] ॥१२३॥
लसद्बाहुर्महोदग्रविग्रहः सुरनायकः । कल्पाङ्घ्रिप इवानर्तीत् चलदंशुकभूषणः ॥१२४॥
चलत्तन्मौलिरत्नांशुपरिवेषैर्नभःस्थलम्[4] । तदा विदिद्युते विद्युत्सहस्रैरिव सन्ततम्[5] ॥१२५॥
विक्षिप्ता[6] बाहुविक्षेपैः तारकाः परितोऽभ्रमन् । [7]भ्रमणाविद्धविच्छिन्नहारमुक्ताफलश्रियः ॥१२६॥
नृत्यतोऽस्य भुजोल्लासैः पयोदाः परिघट्टिताः । पयोलवच्युतो रेजुः शुचेव स्वरदश्रवः[8] ॥१२७॥
रेचकेऽस्य[9] चलन्मौलिप्रोच्छलन्मणिरीतयः[10] । [11]वेगाविद्धाः समं भ्रेमुः अलातवलयायिताः ॥१२८॥
नृत्तक्षोभान्महीक्षोभे क्षुभिता जलराशयः । क्षालयन्ति स्म दिग्भित्तीः [12]प्रोच्चलत्जलशीकरैः ॥१२९॥
क्षणादेकः क्षणान्नैकः क्षणाद् व्यापी क्षणादणुः । क्षणादारात् क्षणाद् दूरे क्षणाद् व्योम्नि क्षणाद् भुवि ।१३०।
इति प्रतन्वतात्मीयं सामर्थ्यं विक्रियोत्थितम् । इन्द्रजालमिवेन्द्रेण प्रयुक्तमभवत् तदा ॥१३१॥
नेटुरप्सरसः शक्रभुजशाखासु सस्मिताः । सलीलभ्रूलतोत्क्षेपम् अङ्गहारैः[13] सचारिभिः[14] ॥१३२॥

था ॥ १२१ ॥ जिस समय वह इन्द्र विक्रियासे हजार भुजाएँ बनाकर नृत्य कर रहा था, उस समय पृथिवी उसके पैरोंके रखनेसे हिलने लगी थी मानो फट रही हो, कुलपर्वत तृणोंकी राशिके समान चञ्चल हो उठे थे और समुद्र भी मानो आनन्दसे शब्द करता हुआ लहराने लगा था ॥ १२२-१२३ ॥ उस समय इन्द्रकी चञ्चल भुजाएँ बड़ी ही मनोहर थीं, वह शरीरसे स्वयं ऊँचा था और चञ्चल वस्त्र तथा आभूषणोंसे सहित था इसलिये ऐसा जान पड़ता था मानो जिसकी शाखायें हिल रहीं हैं जो बहुत ऊँचा है और जो हिलते हुए वस्त्र तथा आभूषणोंसे सुशोभित है ऐसा कल्पवृक्ष ही नृत्य कर रहा हो ॥ १२४ ॥ उस समय इन्द्रके हिलते हुए मुकुटमें लगे हुए रत्नोंकी किरणोंके मण्डलसे व्याप्त हुआ आकाश ऐसा जान पड़ता था मानो हजारों बिजलियों से ही व्याप्त हो रहा हो ॥ १२५ ॥ नृत्य करते समय इन्द्रकी भुजाओंके विक्षेपसे बिखरे हुए तारे चारों ओर फिर रहे थे और ऐसे मालूम होते थे मानो फिरकी लगानेसे टूटे हुए हारके मोती ही हों ॥ १२६ ॥ नृत्य करते समय इन्द्रकी भुजाओं के उल्लाससे टकराये हुए तथा पानीकी छोटी छोटी बूंदोंको छोड़ते हुए मेघ ऐसे मालूम होते थे मानो शोकसे आंसू ही छोड़ रहे हों ॥ १२७ ॥ नृत्य करते करते जब कभी इन्द्र फिरकी लेता था तब उसके वेगके आवेशसे फिरती हुई उसके मुकुटके मणियोंकी पङ्क्तियां अलातचक्रकी नांई भ्रमण करने लगती थीं ॥ १२८ ॥ इन्द्रके उस नृत्यके क्षोभसे पृथिवी क्षुभित हो उठी थी, पृथिवीके क्षुभित होनेसे समुद्र भी क्षुभित हो उठे थे और उछलते हुए जलके कणोंसे दिशाओंकी भित्तियोंका प्रक्षालन करने लगे थे ॥ १२९ ॥ नृत्य करते समय वह इन्द्र क्षणभरमें एक रह जाता था, क्षणभरमें अनेक हो जाता था, क्षण भरमें सब जगह व्याप्त हो जाता था, क्षणभरमें छोटासा रह जाता था, क्षण भरमें पास ही दिखाई देता था, क्षण भरमें दूर पहुँच जाता था, क्षण भरमें आकाशमें दिखाई देता था, और क्षण भरमें फिर जमीन पर आ जाता था, इस प्रकार विक्रियासे उत्पन्न हुई अपनी सामर्थ्यको प्रकट करते हुए उस इन्द्रने उस समय ऐसा नृत्य किया था मानो इन्द्रजालका खेल ही किया हो ॥ १३०-१३१ ॥ इन्द्रकी भुजारूपी शाखाओं पर मन्द मन्द हँसती हुई अप्सराएं लीलापूर्वक भौंहरूपी लताओंको चलाती हुई, शरीर हिलाती हुई और

१ विकुर्वणां कृत्वा । २ चलति स्म । ३ नितरां ध्वनन् । ४ –नभस्तलम् अ०, प०, द०, स०, म०, ल० । ५ विस्तृतम् । ६ विप्रकीर्णाः । ७ प्रेरित । ८ गलदश्रुबिन्दवः । ९ भ्रमणे । रेनकस्य ल० । १० पङ्क्तयः । प्रवाहाः । ११ वेगेनाताडिताः । १२ प्रोच्छलज्जल– अ०, प०, द०, स०, ल० । १३ अङ्गविक्षेपैः । १४ पादन्यासभेदसहितैः ।

वर्द्धमानलयैः काश्चित् काश्चित् ताण्डवलास्यकैः[1] । ननृतुः सुरनर्तक्यः चित्रैरभिनयैस्तदा ॥१३३॥
काश्चिदैरावतीं [2]पिण्डीम् ऐन्द्रीं बद्ध्वामराङ्गनाः । प्रानर्तिषुः प्रवेशैश्च निष्क्रमैश्च[3] नियन्त्रितैः ॥१३४॥
कल्पद्रुमस्य शाखासु कल्पवल्ल्य इवोद्गताः । रेजिरे सुरराजस्य बाहुशाखासु तास्तदा ॥१३५॥
स ताभिः सममारब्धरेचको[4] व्यरुचत्तराम् । चक्रान्दोल इव श्रीमान् चलन्मुकुटशेखरः ॥१३६॥
सहस्राक्षसमुत्फुल्लविकसत्पङ्कजाकरे । ताः पद्मिन्य इवाभूवन् स्मेरवक्त्राम्बुजश्रियः ॥१३७॥
स्मितांशुभिर्विभिन्नानि[5] तद्वक्त्राणि चकासिरे । विकस्वराणि[6] पद्मानि [7]प्लुतानीवामृतप्लवैः[8] ॥१३८॥
कुलशैलायितानस्य भुजानध्यास्य काश्चन । रेजिरे परिनृत्यन्त्यः[9] मूर्त्तिमत्य इव श्रियः ॥१३९॥
नेटुरैरावतालान[10]स्तम्भयष्टिसमायतान् । अध्यासीना भुजानस्य वीरलक्ष्म्य इवापराः ॥१४०॥
हारमुक्ताफलेष्वन्याः सङ्क्रान्तप्रतियातनाः[11] । ननृतुर्बहुरूपिण्यो विद्या इव विडौजसः ॥१४१॥
कराङ्गुलीषु शक्रस्य न्यस्यन्त्यः क्रमपल्लवान् । सलीलमनटन् काश्चित् सूचीनाट्यमिवास्थिताः[12] ॥१४२॥
भ्रेमुः कराङ्गुलीरन्याः [13]सुपर्वाग्रिविवेशिनः । वंशयष्टीरिवारुह्य तदग्रार्पितनाभयः ॥१४३॥

सुन्दरतापूर्वक पैर उठाती रखती हुई (थिरक थिरककर) नृत्य कर रही थीं ॥ १३२ ॥ उस समय कितनी ही देवनर्तकियां वर्द्धमान लयके साथ, कितनी ही ताण्डव नृत्यके साथ और कितनी ही अनेक प्रकारके अभिनय दिखलाती हुई नृत्य कर रही थीं ॥ १३३ ॥ कितनी देवियां बिजलीका और कितनी ही इन्द्रका शरीर धारण कर नाट्यशास्त्रके अनुसार प्रवेश तथा निष्क्रमण दिखलाती हुई नृत्य कर रही थीं ॥ १३४ ॥ उस समय इन्द्रकी भुजारूपी शाखाओं पर नृत्य करती हुई वे देवियां ऐसी शोभायमान हो रही थीं मानो कल्प वृक्षकी शाखाओं पर फैली हुई कल्पलताएं ही हों ॥ १३५ ॥ वह श्रीमान् इन्द्र नृत्य करते समय उन देवियोंके साथ जब फिरकी लगाता था तब उसके मुकुटका सेहरा भी हिल जाता था और वह ऐसा शोभायमान होता था मानो कोई चक्र ही घूम रहा हो॥ १३६ ॥ हजार आँखोंको धारण करनेवाला वह इन्द्र फूले हुए विकसित कमलोंसे सुशोभित तालाबके समान जान पड़ता था और मन्द मन्द हँसते हुए मुखरूपी कमलोंसे शोभायमान, भुजाओंपर नृत्य करनेवाली वे देवियां कमलिनियोंके समान जान पड़ती थीं ॥१३७॥ मन्द हास्यकी किरणोंसे मिले हुए उन देवियोंके मुख ऐसे शोभायमान हो रहे थे मानो अमृतके प्रवाहमें डूबे हुए विकसित कमल ही हों ॥ १३८ ॥ कितनी ही देवियाँ कुलाचलोंके समान शोभायमान उस इन्द्रकी भुजाओं-पर आरूढ़ होकर नृत्य कर रही थीं और ऐसी सुशोभित हो रही थीं मानो शरीरधारिणी लक्ष्मी ही हों ॥१३९॥ ऐरावत हाथीके बाँधनेके खम्भेके समान लम्बी इन्द्रकी भुजाओंपर आरूढ़ होकर कितनी ही देवियाँ नृत्य कर रही थीं और ऐसी मालूम थीं मानो कोई अन्य वीर-लक्ष्मी ही हों ॥१४०॥ नृत्य करते समय कितनी ही देवियोंका प्रतिबिम्ब उन्हींके हारके मोतियों-पर पड़ता था जिससे वे ऐसी मालूम होती थीं मानो इन्द्रकी बहुरूपिणी विद्या ही नृत्य कर रही हो ॥१४१॥ कितनी ही देवियाँ इन्द्रके हाथोंकी अँगुलियोंपर अपने चरण-पल्लव रखती हुई लीलापूर्वक नृत्य कर रही थीं और ऐसी मालूम होती थीं मानो सूचीनाट्य (सूईकी नोकपर किया जानेवाला नृत्य) ही कर रही हों ॥१४२॥ कितनी ही देवियाँ सुन्दर पर्वों सहित इन्द्रकी अँगुलियोंके अग्रभाग पर अपनी नाभि रखकर इस प्रकार फिरकी लगा रही थीं मानो किसी बाँसकी लकड़ी पर चढ़कर उसके अग्रभाग पर नाभि रखकर मनोहर फिरकी लगा रही

१ ताण्डवरूपनर्तनैः । २ शरीरम् । 'सङ्घातग्रासयोः पिण्डीर्द्वयोः पुंसि कलेवरे ।' इत्यभिधानात् । ३ निर्गमनैश्च । ४ भ्रमणाः । ५ युक्तानि । ६ विकसनशीलानि । ७ धौतानि । ८ प्रवाहैः । ९ परिनृत्यन्तो प०, म०, ल० । १० बन्धनस्तम्भः । ११ प्रतिबिम्बाः । १२ आश्रिताः । १३ सुमन्यौ ।

प्रतिबाह्वमरेन्द्रस्य सन्नटन्त्योऽमराङ्गनाः । सयत्नं सञ्चरन्ति स्म [1]पञ्चयन्त्योऽक्षिसङ्कुलम् ॥१४४॥
स्फुटन्निव कटाक्षेषु कपोलेषु स्फुरन्निव । प्रसरन्निव पादेषु करेषु विलसन्निव ॥१४५॥
विहसन्निव वक्त्रेषु नेत्रेषु विकसन्निव । रज्यन्निवाङ्गरागेषु निमज्जन्निव नाभिषु ॥१४६॥
चलन्निव कटीष्वासां मेखलासु स्खलन्निव । तदा नाट्यरसोऽङ्गेषु ववृधे वर्द्धितोत्सवः ॥१४७॥
प्रत्यङ्गममरेन्द्रस्य याश्चेष्टा नृत्यतोऽभवन् । ता एव तेषु पात्रेषु संविभक्ता इवारुचन् ॥१४८॥
[2]रसास्त एव ते[3] [4]भावास्तेऽनुभावास्तदिङ्गितम्[5] । अनुप्रवेशितो नूनमात्मा तेष्वमरेशिना ॥१४९॥
सोऽभात्स्वभुजदण्डेषु नर्त्तयन्सुरनर्त्तकीः । [6]दारवीः पुत्रिका यन्त्रफलकेष्विव यान्त्रिकः[7] ॥१५०॥
ऊर्ध्वमुत्चलयन्व्योम्नि नटन्तीर्दर्शयन्पुनः[8] । क्षणात्कुर्वन्नदृश्यास्ताः सोऽभून्माहेन्द्रजालकः ॥१५१॥
इतश्चेतः स्वदोर्जाले गूढं सञ्चारयन् नटीः । [9]सभवान् [10]हस्तसञ्चारमिवासीदाचरन् हरिः ॥१५२॥
नर्तयन्नेकतो यूनो युवतीरन्यतो हरिः । भुजशाखासु सोऽनर्तीद् दर्शिताद्भुतविक्रियः ॥१५३॥
नेदुस्तद्भुजरङ्गेषु ते च ताश्च [11]परिक्रमैः । सुत्रामा सूत्रधारोऽभून्नाट्यवेदविदांवरः ॥१५४॥
[12]दीप्तोद्धतरसप्रायं नृत्यं ताण्डवमेकतः । सुकुमारप्रयोगाढ्यं ललितं लास्यमन्यतः ॥१५५॥

हों ॥१४३॥ देवियां इन्द्रकी प्रत्येक भुजा पर नृत्य करती हुई और अपने नेत्रोंके कटाक्षोंको फैलाती हुई बड़े यत्नसे संचार कर रही थीं ॥१४४॥ उस समय उत्सवको बढ़ाता हुआ वह नाट्य रस उन देवियोंके शरीरमें खूब ही बढ़ रहा था और ऐसा मालूम होता था मानो उनके कटाक्षोंमें प्रकट हो रहा हो, कपोलोंमें स्फुरायमान हो रहा हो, पाँवोंमें फैल रहा हो, हाथोंमें विलसित हो रहा हो, मुखोंपर हँस रहा हो, नेत्रोंमें विकसित हो रहा हो, अंगरागमें लाल वर्ण हो रहा हो, नाभिमें निमग्न हो रहा हो, कटिप्रदेशोंपर चल रहा हो और मेखलाओंपर स्खलित हो रहा हो ॥१४५-१४७॥ नृत्य करते हुए इन्द्रके प्रत्येक अंगमें जो चेष्टाएँ होती थीं वही चेष्टाएँ अन्य सभी पात्रोंमें हो रही थीं जिससे ऐसा जान पड़ता था मानो इन्द्रने अपनी चेष्टाएँ उन सबके लिये बाँट ही दी हों ॥१४८॥ उस समय इन्द्रके नृत्यमें जो रस, भाव, अनुभाव और चेष्टाएँ थीं वे ही रस, भाव, अनुभाव और चेष्टाएँ अन्य सभी पात्रोंमें थी जिससे ऐसा जान पड़ता था मानो इन्द्रने अपनी आत्माको ही उनमें प्रविष्ट करा दिया हो ॥१४९॥ अपने भुजदंडोंपर देव-नर्तकियोंको नृत्य कराता हुआ वह इन्द्र ऐसा शोभायमान हो रहा था मानो किसी यन्त्रकी पटियों पर लकड़ीकी पुतलियोंको नचाता हुआ कोई यान्त्रिक अर्थात् यन्त्र चलानेवाला ही हो ॥१५०॥ वह इन्द्र नृत्य करती हुई उन देवियोंको कभी ऊपर आकाशमें चलाता था, कभी सामने नृत्य करती हुई दिखला देता था और कभी क्षणभरमें उन्हें अदृश्य कर देता था, इन सब बातोंसे वह किसी इन्द्रजालका खेल करनेवालेके समान जान पड़ता था ॥१५१॥ नृत्य करनेवाली देवियोंको अपनी भुजाओंके समूह पर गुप्त रूपसे जहाँ-तहाँ घुमाता हुआ वह इन्द्र हाथकी सफाई दिखलाने वाले किसी बाजीगरके समान जान पड़ता था ॥१५२॥ वह इन्द्र अपनी एक ओरकी भुजाओं पर तरुण देवोंको नृत्य करा रहा था और दूसरी ओरकी भुजाओंपर तरुण देवियोंको नृत्य करा रहा था तथा अद्भुत विक्रिया शक्ति दिखलाता हुआ अपनी भुजारूपी शाखाओं पर स्वयं भी नृत्य कर रहा था ॥ १५३ ॥ इन्द्रकी भुजारूपी रंगभूमिमें वे देव और देवांगनाएँ प्रदक्षिणा देती हुई नृत्य कर रही थीं इसलिये वह इन्द्र नाट्यशास्त्रके जाननेवाले सूत्रधारके समान मालूम होता था ॥१५४॥ उस समय एक ओर तो दीप्त और

---

१ विस्तारयन्त्यः । 'पचि विस्तारवचने' । वञ्चयन्त्यो-- ब०, अ०, प०, स० । २ शृङ्गारादयः । ३ ते एव भावाः चित्तसमुन्नतयः । ४ भावबोधकाः । ५ चित्तविकृति । ६ तरुसम्बन्धिपाञ्चालिका । 'पाञ्चालिका पुत्रिका स्याद् वस्त्रदन्तादिभिः कृता' । ७ सूत्रधारः । ८ पुरः म०, ल० । ९ पूज्यः । १० हस्तसंचालनम् । ११ पदसंचारैः । १२ दारुणः ।

विभिन्नरसमित्युच्चैः दर्शयन् नाट्यमद्भुतम् । [1]सामाजिकजने शक्रः परां प्रीतिमजीजनत् ॥१५६॥
गन्धर्वनायकारब्धविविधातोद्यसंविधिः[2] । आनन्दनृत्यमित्युच्चैः मघवा निरवर्त्तयत् ॥१५७॥
[3]सकंसतालमुद्वेणु[4] [5]विततध्वनिसङ्कुलम् । [6]साप्सरः सरसं[7] नृत्तं तदुद्यानमिवाद्युतत् ॥१५८॥
नाभिराजः समं देव्या दृष्ट्वा तन्नाट्यमद्भुतम् । विसिस्मिये परां श्लाघां प्रापच्च सुरसत्तमैः ॥१५९॥
वृषभोऽयं जगज्ज्येष्ठो वर्षिष्यति जगद्धितम् । धर्मामृतमितीन्द्रास्तम् अकार्षुर्वृषभाह्वयम् ॥१६०॥
वृषो हि [8]भगवान्धर्मः तेन यद्भाति तीर्थकृत् । ततोऽयं वृषभस्वामीत्याह्वा[9]स्तैन पुरन्दरः ॥१६१॥
स्वर्गावतरणे दृष्टः स्वप्नेऽस्य वृषभो यतः । जनन्या तदयं देवैः आहूतो वृषभाख्यया ॥१६२॥
पुरुहूतः पुरुं देवम् आह्वयन्नाख्ययानया । पुरुहूतः इति ख्यातिं बभारान्वर्थतां गताम् ॥१६३॥
[10]ततोऽस्य सवयोरूप[11] वेषान्सुरकुमारकान् । निरूप्य परिचर्यायै[12] दिवं जग्मुर्नायकाः ॥१६४॥
धात्र्यो नियोजिताश्चास्य देव्यः शक्रेण सादरम् । मज्जने मण्डने स्तन्ये[13] संस्कारे क्रीडनेऽपि च ॥१६५॥

उद्धत रससे भरा हुआ ताण्डव नृत्य हो रहा था और दूसरी ओर सुकुमार प्रयोगोंसे भरा हुआ लास्य नृत्य हो रहा था ॥१५५॥ इस प्रकार भिन्न भिन्न रसवाले, उत्कृष्ट और आश्चर्यकारक नृत्य दिखलाते हुए इन्द्र ने सभाके लोगोंमें अतिशय प्रेम उत्पन्न किया था ॥१५६॥ इस प्रकार जिसमें श्रेष्ठ गन्धर्वोंके द्वारा अनेक प्रकारके बाजोंका बजाना प्रारम्भ किया गया था ऐसे आनन्द नामक नृत्यको इन्द्रने बड़ी सजधजके साथ समाप्त किया ॥१५७॥ उस समय वह नृत्य किसी उद्यानके समान जान पड़ता था क्योंकि जिस प्रकार उद्यान काँस और ताल (ताड़) वृक्षोंसे सहित होता है उसी प्रकार वह नृत्य भी काँसेकी बनी हुई झाँझोंके तालसे सहित था, उद्यान जिस प्रकार ऊँचे ऊँचे बाँसोंके फैलते हुए शब्दोंसे व्याप्त रहता है उसी प्रकार वह नृत्य भी उत्कृष्ट बाँसुरियोंके दूर तक फैलनेवाले शब्दोंसे व्याप्त था, उद्यान जिस प्रकार अप्सर अर्थात् जलके सरोवरोंसे सहित होता है उसी प्रकार वह नृत्य भी अप्सर अर्थात् देवनतकियोंसे सहित था और उद्यान जिस प्रकार सरस अर्थात् जलसे सहित होता है उसी प्रकार वह नृत्य भी सरस अर्थात् शृङ्गार आदि रसोंसे सहित था ॥१५८॥ महाराज नाभिराज मरुदेवीके साथ साथ वह आश्चर्यकारी नृत्य देखकर बहुत ही चकित हुए और इन्द्रोंके द्वारा की हुई प्रशंसाको प्राप्त हुए ॥१५९॥ ये भगवान् वृषभदेव जगत् भरमें ज्येष्ठ हैं और जगत्का हित करनेवाले धर्मरूपी अमृतकी वर्षा करेंगे इसलिये ही इन्द्रोंने उनका वृषभदेव नाम रक्खा था ॥१६०॥ अथवा वृष श्रेष्ठ धर्मको कहते हैं और तीर्थंकर भगवान् उस वृष अर्थात् श्रेष्ठ धर्मसे शोभायमान हो रहे हैं इसलिये ही इन्द्रने उन्हें 'वृषभ-स्वामी' इस नामसे पुकारा था ॥१६१॥ अथवा उनके गर्भावतरणके समय माता मरुदेवीने एक वृषभ देखा था इसलिये ही देवोंने उनका 'वृषभ' नामसे आह्वान किया था ॥१६२॥ इन्द्रने सबसे पहले भगवान् वृषभनाथको 'पुरुदेव' इस नामसे पुकारा था इसलिये इन्द्र अपने पुरुहूत (पुरु अर्थात् भगवान् वृषभदेवको आह्वान करनेवाला) नामको सार्थक ही धारण करता था ॥१६३॥ तदनन्तर वे इन्द्र भगवान्की सेवाके लिये समान अवस्था, समान रूप और समान वेषवाले देवकुमारोंको निश्चित कर अपने अपने स्वर्गको चले गये ॥१६४॥ इन्द्रने आदर सहित भगवान्को स्नान कराने, वस्त्राभूषण पहनाने, दूध पिलाने, शरीरके संस्कार (तेल कज्जल आदि लगाना) करने और खिलानेके कार्यमें अनेक देवियोंको धाय बनाकर नियुक्त किया था ॥१६५॥

---

१ सभाजने । २ सामग्री । ३ कंसतालसहितम् । ४ उद्गतवासादि उन्नतवंशं च । ५ ततविततघनशुषिरभेदेन चतुर्विधवाद्येषु विततशब्देन पटहादिकमुच्यते अमरसिंहे– ततमानद्धशब्देनोक्तम्– 'आनद्धं मुरजादिकम्' इति । पटहादिवाद्यध्वनिसङ्कीर्णम् । पक्षे पक्षिविस्तृत ध्वनिसङ्कीर्णम् । ६ देवस्त्रीसहितम्, पक्षे जलभरितसरोवरसहितम् । साप्सरं ल० । ७ शृङ्गारादिरसयुक्तम् । पक्षे रसयुक्तम् । ८ पूज्यः । ९ आह्वयति स्म । १० अनन्तरम् । ११ समानप्रायरूपाभरणम् । १२ शुश्रूषायै । १३ स्तनधायिविधौ ।

ततोऽसौ स्मितमातन्वन् संसर्पन्मणिभूमिषु । पित्रोर्मुदं ततानाद्ये वयस्यद्भुतचेष्टितः ॥१६६॥
जगदानन्दि नेत्राणाम् उत्सवप्रदमूर्जितम् । कलोज्ज्वलं तदस्यासीत् शैशवं शशिनो यथा ॥१६७॥
मुग्धस्मितमभूदस्य मुखेन्दौ चन्द्रिकामलम् । तेन पित्रोर्मनस्तोषजलधिर्ववृधेतराम् ॥१६८॥
पीठबन्धः[1] सरस्वत्या लक्ष्म्या हसितविभ्रमः । कीर्तिवल्ल्या विकासोऽस्य मुखे [2]मुग्धस्मयोऽभवत् ॥१६९॥
श्रीमन्मुखाम्बुजेऽस्यासीत् क्रमान्मन्मनभारती[3] । सरस्वतीव [4]तद्बाल्यम् अनुकर्तुं तदाश्रिता[5] ॥१७०॥
स्खलत्पदं शनैरिन्द्रनीलभूमिषु संचरन् । स रेजे वसुधां रक्तैः अब्जैरुपहरन्निव[6] ॥१७१॥
[7]रत्नपांसुषु चिक्रीड स समं सुरदारकैः । पित्रोर्मनसि संतोषम् आतन्वँल्ललिताकृतिः ॥१७२॥
प्रजानां दधदानन्दं गुणैः आह्लादिभिर्निजैः । कीर्तिज्योत्स्नापरीताङ्गः स बभौ बालचन्द्रमाः ॥१७३॥
बालावस्थामतीतस्य तस्याभूद् रुचिरं वपुः । [8]कौमारं देवनाथानाम् अर्चितस्य[9] महौजसः ॥१७४॥

तदनन्तर आश्चर्यकारक चेष्टाओंको धारण करनेवाले भगवान् वृषभदेव अपनी पहली अवस्था (शैशव अवस्था) में कभी मंद मंद हँसते थे और कभी मणिमयी भूमिपर अच्छी तरह चलते थे, इस प्रकार वे माता-पिताका हर्ष बढ़ा रहे थे ॥ १६६ ॥ भगवान्‌की वह बाल्य अवस्था ठीक चन्द्रमाकी बाल्य अवस्थाके समान थी, क्योंकि जिस प्रकार चन्द्रमाकी बाल्य अवस्था जगत्‌को आनन्द देनेवाली होती है उसी प्रकार भगवान्‌की बाल्य अवस्था भी जगत्‌को आनन्द देनेवाली थी, चन्द्रमाकी बाल्य अवस्था जिस प्रकार नेत्रोंको उत्कृष्ट आनन्द देनेवाली होती है उसी प्रकार उनकी बाल्यावस्था नेत्रोंको उत्कृष्ट आनन्द देनेवाली थी और चन्द्रमाकी बाल्यावस्था जिस प्रकार कला मात्रसे उज्ज्वल होती है उसी प्रकार उनकी बाल्यावस्था भी अनेक कलाओं-विद्याओंसे उज्ज्वल थी ॥ १६७ ॥ भगवान्‌के मुखरूपी चन्द्रमा पर मन्द हास्यरूपी निर्मल चांदनी प्रकट रहती थी और उससे माता पिताका संतोषरूपी समुद्र अत्यन्त वृद्धिको प्राप्त होता रहता था ॥ १६८ ॥ उस समय भगवान्‌के मुखपर जो मनोहर मन्द हास्य प्रकट हुआ था वह ऐसा जान पड़ता था मानों सरस्वतीका गीतबंध अर्थात् संगीतका प्रथम राग ही हो, अथवा लक्ष्मीके हास्यकी शोभा ही हो अथवा कीर्तिरूपी लताका विकास ही हो ॥ १६९ ॥ भगवान्‌के शोभायमान मुख-कमलमें क्रम क्रमसे अस्पष्ट वाणी प्रकट हुई जो कि ऐसी मालूम होती थी मानो भगवान्‌की बाल्य अवस्थाका अनुकरण करनेके लिये सरस्वती देवी ही स्वयं आई हों ॥ १७० ॥ इन्द्रनील मणियोंकी भूमिपर धीरे धीरे गिरते-पड़ते पैरोंसे चलते हुए बालक भगवान् ऐसे सुशोभित हो रहे थे मानो पृथिवीको लालकमलोंका उपहार ही दे रहे हों ॥ १७१ ॥ सुन्दर आकारको धारण करनेवाले वे भगवान् माता-पिताके मनमें संतोषको बढ़ाते हुए देवबालकोंके साथ साथ रत्नोंकी धूलिमें क्रीड़ा करते थे ॥ १७२ ॥ वे बाल भगवान् चन्द्रमाके समान शोभायमान होते थे, क्योंकि जिस प्रकार चन्द्रमा अपने आह्लादकारी गुणोंसे प्रजाको आनन्द पहुँचाता है उसी प्रकार वे भी अपने आह्लादकारी गुणोंसे प्रजाको आनन्द पहुँचा रहे थे और चन्द्रमाका शरीर जिस प्रकार चाँदनीसे व्याप्त रहता है उसी प्रकार उनका शरीर भी कीर्तिरूपी चाँदनीसे व्याप्त था ॥ १७३ ॥ जब भगवान्‌की बाल्यावस्था व्यतीत हुई तब इन्द्रोंके द्वारा पूज्य और महाप्रतापी भगवान्‌का कौमार अवस्थाका शरीर बहुत ही सुन्दर

१ गीतबन्धः प०, द०, म०, ल० । अयं श्लोकः पुरुदेवचम्पूकाव्ये तत्कर्त्रा पञ्चमस्तबकस्य पञ्चविंशतितमश्लोकस्थाने स्वकीयग्रन्थाङ्गतां नीतः । २ दरहासः । ३ अव्यक्तवाक् । ४ कुमारस्य बाल्यम् । ५ तथाश्रिता अ०, स०, द०, म० । यथाश्रिता प० । ६ उपहारं कुर्वन् । ७ रङ्गवलिरत्नधूलिषु । ८ कुमारसम्बन्धि । ९ 'अर्च सदाधारे' इति षष्ठी । देवेन्द्रैः पूजितस्य ।

वपुषो वृद्धिमन्वस्य[1] गुणा ववृधिरे विभोः । शशाङ्कमण्डलस्येव [2]कान्तिदीप्त्यादयोऽन्वहम् ॥१७५॥
वपुः कान्तं प्रिया वाणी मधुरं तस्य वीक्षितम्[3] । जगतः[4] प्रीतिमातेनुः सस्मितं च [5]प्रजल्पितम् ।१७६।
कलाश्च सकलास्तस्य वृद्धौ वृद्धिमुपाययुः । इन्दोरिव जगच्चेतः नन्दनस्य[6] जगत्पतेः ॥१७७॥
मतिश्रुते सहोत्पन्ने ज्ञानं चावधिसंज्ञकम् । [7]ततोऽबोधि स निश्शेषा विद्या लोकस्थितीरपि ॥१७८॥
विश्वविद्येश्वरस्यास्य विद्याः परिणताः स्वयम् । ननु जन्मान्तराभ्यासः [8]स्मृतिं पुष्णाति पुष्कलाम् ।१७९।
कलासु कौशलं श्लाघ्यं विश्वविद्यासु पाटवम्[9] । क्रियासु कर्मठत्वं[10] च स भेजे शिक्षया विना ॥१८०॥
[11]वाङ्मयं सकलं तस्य प्रत्यक्षं वाक्प्रभोरभूत् । [12]येन विश्वस्य लोकस्य [13]वाचस्पत्यादभूद् गुरुः ॥१८१॥
पुराणस्स कविर्वाग्मी गमकश्चेति [14]नोच्यते । कोष्ठबुद्ध्यादयो बोधा येन तस्य निसर्गजाः ॥१८२॥
क्षायिकं दर्शनं[15] तस्य चेतोऽमलमपाहरत् । वाग्मलं च निसर्गेण प्रसृतास्य सरस्वती ॥१८३॥
श्रुतं निसर्गतोऽस्यासीत् प्रसूतः[16] प्रशमः श्रुतात् । ततो[17] जगद्धितास्यासीत् चेष्टा सापालयत् प्रजाः ॥१८४॥
यथा यथास्य वर्द्धन्ते गुणांशा वपुषा समम् । तथा तथास्य जनता बन्धुता चागमन्मुदम् ॥१८५॥

हो गया ॥ १७४ ॥ जिस प्रकार चन्द्रमण्डलकी वृद्धिके साथ साथ ही उसके कान्ति दीप्ति आदि अनेक गुण प्रतिदिन बढ़ते जाते हैं उसी प्रकार भगवान्‌के शरीरकी वृद्धिके साथ साथ ही अनेक गुण प्रतिदिन बढ़ते जाते थे ॥ १७५ ॥ उस समय उनका मनोहर शरीर, प्यारी बोली, मनोहर अवलोकन और मुसकाते हुए बातचीत करना यह सब संसारकी प्रीतिको विस्तृत कर रहे थे ॥ १७६ ॥ जिस प्रकार जगत्‌के मनको हर्षित करनेवाले चन्द्रमाकी वृद्धि होने पर उसकी समस्त कलाएं बढ़ने लगती हैं उसी प्रकार समस्त जीवोंके हृदयको आनन्द देनेवाले जगत्पति—भगवान्‌के शरीरकी वृद्धि होने पर उनकी समस्त कलाएँ बढ़ने लगी थीं ॥ १७७ ॥ मति, श्रुत और अवधि ये तीनों ही ज्ञान भगवान्‌के साथ साथ ही उत्पन्न हुए थे इसलिये उन्होंने समस्त विद्याओं और लोककी स्थितिको अच्छी तरह जान लिया था ॥ १७८ ॥ वे भगवान् समस्त विद्याओंके ईश्वर थे इसलिये उन्हें समस्त विद्याएँ अपने आप ही प्राप्त हो गई थीं सो ठीक ही है क्योंकि जन्मान्तरका अभ्यास स्मरण-शक्तिको अत्यन्त पुष्ट रखता है ॥ १७९ ॥ वे भगवान् शिक्षाके विना ही समस्त कलाओंमें प्रशंसनीय कुशलताको, समस्त विद्याओंमें प्रशंसनीय चतुराईको और समस्त क्रियाओंमें प्रशंसनीय कर्मठता (कार्य करनेकी सामर्थ्य) को प्राप्त हो गये थे ॥ १८० ॥ वे भगवान् सरस्वतीके एकमात्र स्वामी थे इसलिये उन्हें समस्त वाङ्मय (शास्त्र) प्रत्यक्ष हो गये थे और इसलिये वे समस्त लोकके गुरु हो गये थे ॥ १८१ ॥ वे भगवान् पुराण थे अर्थात् प्राचीन इतिहासके जानकार थे, कवि थे, उत्तम वक्ता थे, गमक (टीका आदिके द्वारा पदार्थको स्पष्ट करनेवाले) थे और सबको प्रिय थे क्योंकि कोष्ठबुद्धि आदि अनेक विद्याएँ उन्हें स्वभावसे ही प्राप्त हो गई थीं ॥ १८२ ॥ उनके क्षायिक सम्यग्दर्शनने उनके चित्तके समस्त मलको दूर कर दिया था और स्वभावसे ही विस्तारको प्राप्त हुई सरस्वती-ने उनके वचन-सम्बन्धी समस्त दोषोंका अपहरण कर लिया था ॥ १८३ ॥ उन भगवान्‌के स्वभावसे ही शास्त्रज्ञान था, उस शास्त्रज्ञानसे उनके परिणाम बहुत ही शान्त रहते थे । परिणामोंके शान्त रहनेसे उनकी चेष्टाएँ जगत्‌का हित करनेवाली होती थीं और उन जगत्-हितकारी चेष्टाओंसे वे प्रजाका पालन करते थे ॥ १८४ ॥ ज्यों ज्यों शरीरके साथ साथ उनके

१ अभिवृद्ध्या सह । 'सहार्थेऽनुना' इति द्वितीया । २ किरणतेजःप्रमुखाः । ३ आलोकनम् । ४ जगतां—प०, द०, म०, ल०, । ५ प्रजल्पनम् । ६ आह्लादकरस्य । ७ ज्ञानत्रयात् । ८ अभ्यासः संस्कारः । ९ पटुत्वम् । १० कर्मशूरत्वम् । ११ वाग्जालम् । १२ वाङ्मयेन । १३ वाक्पतित्वात् । १४ चोच्यते— प०, द० । रोच्यते स०, अ० । रुच्यते ल० । १५ सम्यक्त्वम् । १६ उत्पन्नः । १७ प्रशमतः ।

स पित्रोः परमानन्दं बन्धुतायाश्च निर्वृतिम्[1] । जगज्जनस्य संप्रीतिं वर्द्धयन् समवर्द्धत ॥१८६॥
परमायुरथास्याभूत् चरमं बिभ्रतो वपुः । संपूर्णा पूर्वलक्षाणाम् अशीतिश्चतुरुत्तरा ॥१८७॥
[2]दीर्घदर्शी सुदीर्घायुः दीर्घबाहुश्च दीर्घदृक्[3] । स दीर्घसूत्रो[4] लोकानाम् अभजत् सूत्रधारताम् ॥१८८॥
कदाचिल्लिपिसंख्यान[5]गन्धर्वादिकलागमम्[6] । [7]स्वभ्यस्तपूर्वमभ्यस्यन् स्वयमभ्यासयत् परान् ॥१८९॥
[8]छन्दोऽवचित्यलङ्कारप्रस्तारादिविवेचनैः[9] । कदाचिद् भावयन् गोष्ठीः चित्राद्यैश्च कलागमैः ॥१९०॥
कदाचित् पद[10]गोष्ठीभिः काव्यगोष्ठीभिरन्यदा । [11]वावदूकैः समं कैश्चित् जल्पगोष्ठीभिरेकदा ॥१९१॥
कर्हिचिद् गीतगोष्ठीभिः नृत्त[12]गोष्ठीभिरेकदा । कदाचिद् वाद्यगोष्ठीभिः वीणागोष्ठीभिरन्यदा ॥१९२॥
कर्हिचिद् बर्हिरूपेण नटतः सुरचेटकान् । नटयन् करतालेन लयमार्गानुयायिना ॥१९३॥
कांश्चिच्च शुकरूपेण समासादितविक्रियान् । संपाठं पाठयंश्लोकान् अम्लिष्ट[13]मधुराक्षरम् ॥१९४॥
हंसविक्रियया कांश्चित् कूजतो[14] [15]मन्द्रगद्गदम् । [16]बिसभङ्गैः स्वहस्तेन दत्तैः संभावयन्मुहुः ॥१९५॥
गजविक्रियया कांश्चिद् दधतः कालभीं[17] दशाम् । [18]सान्त्वयन्मुहुरानात्थ्यं[19][राना[20]ध्य]करभा[21]क्रीडयन्मुदा

गुण बढ़ते जाते थे त्यों त्यों समस्त जनसमूह और उनके परिवारके लोग हर्षको प्राप्त होते जाते थे ॥ १८५ ॥ इस प्रकार वे भगवान् माता-पिताके परम आनन्दको, बन्धुओंके सुखको और जगत्के समस्त जीवोंकी परम प्रीतिको बढ़ाते हुए वृद्धिको प्राप्त हो रहे थे ॥ १८६ ॥ चरम शरीरको धारण करनेवाले भगवान्की सम्पूर्ण आयु चौरासी लाख पूर्वकी थी ॥१८७॥ वे भगवान् दीर्घदर्शी थे, दीर्घ आयुके धारक थे, दीर्घ भुजाओंसे युक्त थे, दीर्घ नेत्र धारण करनेवाले थे और दीर्घ सूत्र अर्थात् दृढ़ विचारके साथ कार्य करनेवाले थे इसलिये तीनों ही लोकोंकी सूत्रधारता–गुरुत्वको प्राप्त हुए थे ॥१८८॥ भगवान् वृषभदेव कभी तो, जिनका पूर्व भवमें अच्छी तरह अभ्यास किया है ऐसी लिपि विद्या, गणित विद्या तथा संगीत आदि कला-शास्त्रोंका स्वयं अभ्यास करते थे और कभी दूसरोंको कराते थे ॥१८९॥ कभी छन्दशास्त्र, कभी अलंकार शास्त्र, कभी प्रस्तार नष्ट उद्दिष्ट संख्या आदिका विवेचन और कभी चित्र खींचना आदि कला शास्त्रोंका मनन करते थे ॥१९०॥ कभी वैयाकरणोंके साथ व्याकरण सम्बन्धी चर्चा करते थे, कभी कवियोंके साथ काव्य विषयकी चर्चा करते थे और कभी अधिक बोलने वाले वादियोंके साथ वाद करते थे ॥१९१॥ कभी गीतगोष्ठी, कभी नृत्यगोष्ठी, कभी वादित्रगोष्ठी और कभी वीणागोष्ठीके द्वारा समय व्यतीत करते थे ॥१९२॥ कभी मयूरोंका रूप धरकर नृत्य करते हुए देवकिंकरोंको लयके अनुसार हाथकी ताल देकर नृत्य कराते थे ॥१९३॥ कभी विक्रिया शक्तिसे तोतेका रूप धारण करने वाले देवकुमारोंको स्पष्ट और मधुर अक्षरोंसे श्लोक पढ़ाते थे ॥१९४॥ कभी हंसकी विक्रिया कर धीरे धीरे गद्गद बोलीसे शब्द करते हुए हंसरूपधारी देवोंको अपने हाथसे मृणालके टुकड़े देकर सन्मानित करते थे ॥१९५॥ कभी विक्रियासे हाथियोंके बच्चोंका रूप धारण करनेवाले देवोंको सान्त्वना देकर या सूंड़में प्रहार कर उनके साथ आनन्दसे क्रीड़ा करते थे ॥१९६॥

१ सुखम् । २ सम्यग् विचार्य वक्ता । ३ विशालाक्षः । ४ स्थिरीभूय कार्यकारी इत्यर्थः । ५ गणितम् ।–संख्यानं प०, द०, म०, ल० । –संख्याना– अ०, स० । ६ कलाशास्त्रम् । ७ सुष्ठु पूर्वस्मन् अभ्यस्तम् । ८ छन्दःप्रतिपादकशास्त्रम् । छन्दोवचिन्त्यालङ्कार– प०, ल० । ९ विवरणैः । १० व्याकरणशास्त्रगोष्ठीभिः । ११ वाग्मिभिः । १२– नृत्य– अ० । १३ व्यक्तम् । सुश्लिष्ट– प० । –नाश्लिष्ट– अ, ल० । १४ ध्वनिं कुर्वतः । १५ मन्द–अ०, स०, द०, ल० । १६ विसखण्डैः । १७ कलभसम्बन्धिनीम् । १८ अनुनयन् । १९ –रानाय्य अ०, प०, स०, । रानाध्य द० । –रानाञ्य म०, ल० । २० सम्प्रार्थ्य । २१ शुण्डादण्ड-मानर्तयन् ।

मणिकुट्टिमसंक्रान्तैः स्वैरेव प्रतिबिम्बकैः । [1]कृकवाकूयितान् कांश्चिद् योद्धुकामान् परामृशन्[2] ॥१९७॥
मल्लविक्रियया कांश्चिद् [3]युयुत्सूननभिद्रुहः[4] । प्रोत्साहयन्कृतास्फोटवल्गनानभिनृत्यतः ॥१९८॥
[5]क्रौञ्चसारसरूपेण [6]तारकेङ्कारकारिणाम् । शृण्वन्ननुगतं शब्दं केषाञ्चित् श्रुतिपेशलम् ॥१९९॥
स्रग्विणः शुचिलिप्ताङ्गान् [7]समेतान्सुरदारकान् । [8]दाण्डां क्रीडां समायोज्य नर्त्तयंश्च कदाचन ॥२००॥
अनारतञ्च कुन्देन्दुमन्दाकिन्यपछटामलम् । सुरवन्दिभिरुद्गीतं स्वं[9] समाकर्णयन् यशः ॥२०१॥
[10]अतन्द्रितं च देवीभिः न्यस्यमानं गृहाङ्गणे । रत्नचूर्णैर्बलिं चित्रं सानन्दमवलोकयन् ॥२०२॥
संभावयन् कदाचिच्च प्रकृती[11]र्द्रष्टुमागताः । [12]वीक्षितैर्मधुरैः स्निग्धैः स्मितैः सादरभाषितैः ॥२०३॥
कदाचिद् दीर्घिकाम्भस्सु समं सुरकुमारकैः । जलक्रीडाविनोदेन रममाणः [13]ससंमदम् ॥२०४॥
सारवं[14] जलमासाद्य [15]सारवं हंसकूजितैः । [16]तारवैर्यन्त्रकैः[17] क्रीडन् जलास्फालकृतारवैः[18] ॥२०५॥
जलकेलिविधावेनं भक्त्या मेघकुमारकाः । भेजुर्धारागृहीभूय स्फुरद्धाराः समन्ततः ॥२०६॥
कदाचित् नन्दनस्पर्द्धितरुशोभाञ्चिते वने । वनक्रीडां समातन्वन् वयस्यै[19]रन्वितः सुरैः ॥२०७॥
वनक्रीडाविनोदेऽस्य विरजीकृतभूतलाः । मन्दं [20]दुधुवुरुद्यानपादपान् पवनामराः ॥२०८॥
इति कालोचिताः क्रीडा[21] विनोदांश्च[22] स निर्विशन्[23] । आसांचक्रे[24] सुखं देवः समं देवकुमारकैः ॥२०९॥

कभी मुर्गोंका रूप धारण कर रत्नमयी जमीनमें पड़ते हुए अपने प्रतिबिम्बोंके साथ ही युद्ध करनेकी इच्छा करनेवाले देवोंको देखते थे या उनपर हाथ फेरते थे ॥१९७॥ कभी विक्रिया शक्तिसे मल्लका रूप धारण कर वैरके विना ही मात्र क्रीड़ा करनेके लिये युद्ध करनेकी इच्छा करनेवाले गम्भीर गर्जना करते हुए और इधर-उधर नृत्य सा करते हुए देवोंको प्रोत्साहित करते थे ॥१९८॥ कभी क्रौञ्च और सारस पक्षियोंका रूप धारण कर उच्च स्वरसे क्रेंकार शब्द करते हुए देवोंके निरन्तर होनेवाले कर्णप्रिय शब्द सुनते थे ॥१९९॥ कभी माला पहिने हुए, शरीरमें चन्दन लगाये हुए और इकट्ठे होकर आये हुए देवबालकोंको दण्ड क्रीड़ा (पड़गरका खेल) में लगा कर नचाते थे ॥२००॥ कभी स्तुति पढ़नेवाले देवोंके द्वारा निरन्तर गाये गये और कुन्द, चन्द्रमा तथा गङ्गा नदीके जलके छींटोंके समान निर्मल अपने यशको सुनते थे ॥२०१॥ कभी घरके आँगनमें आलस्यरहित देवियोंके द्वारा बनाई हुई रत्नचूर्णकी चित्रावलिको आनन्दके साथ देखते थे ॥२०२॥ कभी अपने दर्शन करनेके लिये आई हुई प्रजाका, मधुर और स्नेहयुक्त अवलोकनके द्वारा तथा मन्द हास्य और आदर सहित संभाषणके द्वारा सत्कार करते थे ॥२०३॥ कभी बावड़ियोंके जलमें देवकुमारोंके साथ साथ आनन्दसहित जल-क्रीड़ाका विनोद करते हुए क्रीड़ा करते थे ॥२०४॥ कभी हंसोंके शब्दोंसे शब्दायमान सरयू नदीका जल प्राप्त कर उसमें पानीके आस्फालनसे शब्द करनेवाले लकड़ीके बने हुए यन्त्रोंसे जलक्रीड़ा करते थे ॥२०५॥ जल-क्रीड़ाके समय मेघकुमार जातिके देव भक्तिसे धारागृह (फव्वारा)का रूप धारण कर चारो ओरसे जलकी धारा छोड़ते हुए भगवान्‌की सेवा करते थे ॥२०६॥ कभी नन्दनवनके साथ स्पर्धा करने वाले वृक्षोंकी शोभासे सुशोभित नन्दन वनमें मित्ररूप हुए देवोंके साथ साथ वनक्रीड़ा करते थे ॥२०७॥ वनक्रीड़ाके विनोदके समय पवनकुमार जातिके देव पृथिवीको धूलिरहित करते थे और उद्यानके वृक्षोंको धीरे धीरे हिलाते थे ॥२०८॥ इस प्रकार देवकुमारोंके साथ अपने अपने

---

१ कृकवाकव इवाचरितान् । २ स्पृशन् । ३ योद्धुमिच्छून् । ४ परस्परमबाधकान् । ५ क्रुङ् । ६ अत्युच्चैः स्वरभेदः । ७ सम्मिलितान् । ८ दण्डसम्बन्धिक्रीडाम् । दण्ड्यां–प०, द० । 'म०' पुस्तके द्विविधः पाठः । ९ आत्मीयम् । १० अजाड्यं यथा भवति तथा । ११ प्रजापरिवारान् । १२ आलोकनैः । १३ ससम्पदम् स० । १४ सरय्वां भवम् । सरयूनाम नद्यां भवम् । 'देविकायां सरय्वां च भवेद् दाविकसारवे ।' १५ आरवेन सहितम् । १६ तरुभिर्निर्वृत्तैः । १७ द्रोण्यादिभिः । १८ कृतस्वनैः । १९ मित्रैः । २० कम्पयन्ति स्म । २१ जलक्रीडादिकाः । २२ गजबर्हिहंसान् । २३ अनुभवन् । २४ आस्ते स्म ।

मालिनी

इति [1]भुवनपतीनाम् अर्चनीयोऽभिगम्यः[2] सकलगुणमणीनामाकरः पुण्यमूर्तिः ।
सममरकुमारैर्निर्विशन्दिव्यभोगान् अरमत चिरमस्मिन् पुण्यगेहे[3] स देवः ॥२१०॥
प्रतिदिनममरेन्द्रोपाहृतान्[4] भोगसारान् सुरभिकुसुममालाचित्रभूषाम्बरादीन् ।
ललितसुरकुमारैरिङ्गितज्ञैर्वयस्यैः सममुपहितरागः[5] सोऽन्वभूत् पुण्यपाकात्[6] ।२११।

शार्दूलविक्रीडितम्

स श्रीमान्नृसुरासुरार्चितपदो बालेऽप्यबालक्रियः[7] लीलाहास[8]विलासवेषचतुरामाबिभ्रदुच्चैस्तनुम् ।
तन्वानः प्रमदं[9] जगज्जनमनःप्रह्लादिभिर्वाक्करैः बालेन्दुर्ववृधे शनैरमलिनः [10]कीर्त्युज्ज्वलच्चन्द्रिकः ॥२१२॥
तारालीतरलां[11] दधत्समुचितां वक्षस्थलासङ्गिनीं लक्ष्म्यान्दोलनवल्लरीमिव[12] ततां तां हारयष्टिं पृथुम् ।
[13]ज्योत्स्नामन्यमथांशुकं [14]परिदधत्काञ्चीकलापाञ्चितं[15] रेजेऽसौ सुरदारकैरुडुसमैः[16] क्रीडञ्जिनेन्दुर्भृशम् ॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणश्रीमहापुराणसंग्रहे
भगवज्जातकर्मोत्सववर्णनं नाम चतुर्दशं पर्व ॥१४॥

समयके योग्य क्रीड़ा और विनोद करते हुए भगवान् वृषभदेव सुखपूर्वक रहते थे ॥२०९॥ इस प्रकार जो तीन लोकके अधिपति–इन्द्रादि देवोंके द्वारा पूज्य हैं, आश्रय लेने योग्य हैं, सम्पूर्ण गुणरूपी मणियोंकी खान हैं और पवित्र शरीरके धारक हैं ऐसे भगवान् वृषभदेव महाराज नाभिराज के पवित्र घरमें दिव्य भोग भोगते हुए देवकुमारोंके साथ साथ चिरकाल तक क्रीड़ा करते रहे ॥२१०॥ वे भगवान् पुण्यकर्मके उदयसे प्रतिदिन इन्द्रके द्वारा भेजे हुए सुगन्धित पुष्पोंकी माला, अनेक प्रकारके वस्त्र तथा आभूषण आदि श्रेष्ठ भोगोंका अपना अभिप्राय जानने वाले सुन्दर देवकुमारोंके साथ प्रसन्न होकर अनुभव करते थे ॥२११॥ जिनके चरण-कमल मनुष्य, सुर और असुरोंके द्वारा पूजित हैं, जो बाल्य अवस्थामें भी वृद्धोंके समान कार्य करनेवाले हैं, जो लीला, आहार, विलास और वेषसे चतुर, उत्कृष्ट तथा ऊँचा शरीर धारण करते हैं, जो जगत्के जीवोंके मनको प्रसन्न करनेवाले अपने वचनरूपी किरणोंके द्वारा उत्तम आनन्दको विस्तृत करते हैं, निर्मल हैं, और कीर्तिरूपी फैलती हुई चाँदनीसे शोभायमान हैं ऐसे भगवान् वृषभदेव बालचन्द्रमाके समान धीरे धीरे वृद्धिको प्राप्त हो रहे थे ॥२१२॥ ताराओंकी पंक्तिके समान चंचल लक्ष्मीके झूलेकी लताके समान, समुचित, विस्तृत और वक्षःस्थलपर पड़े हुए बड़े भारी हारको धारण किये हुए तथा करधनीसे सुशोभित चाँदनी तुल्य वस्त्रोंको पहिने हुए वे जिनेंद्ररूपी चन्द्रमा नक्षत्रोंके समान देवकुमारोंके साथ क्रीड़ा करते हुए अतिशय सुशोभित होते थे ॥२१३॥

इस प्रकार आर्ष नामसे प्रसिद्ध, भगवज्जिनसेनाचार्यप्रणीत त्रिषष्टिलक्षण महापुराण संग्रहमें 'भगवज्जातकर्मोत्सववर्णन' नामका चौदहवाँ पर्व समाप्त हुआ ॥१४॥

१ जगत्पतिपूजनीयः । २ आश्रयणीयः । ३ पवित्रगेहे । ४ उपानीतान् । ५ प्रासप्रागः । ६ –भकान् स० । ७ वृद्धव्यापारः । ८ –हार– ल० । ९ मुदं ल० । १० कीर्त्युच्चलच्च– ल० । ११ तारानिकरवत् कान्त्या चञ्चलाम् । १२ प्रेङ्खोलिकारज्जुम् । १३ आत्मानं ज्योत्स्नां मन्यमानम् । १४ परिधानं कुर्वन् । १५ कलापान्वितम् अ०, द०, स० । १६ नक्षत्रसदृशैः ।

पञ्चदशं पर्व

अथास्य यौवने पूर्णे वपुरासीन्मनोहरम् । प्रकृत्यैव शशी कान्तः किं पुनश्शरदागमे ॥१॥
निष्टप्तकनकच्छायं निःस्वेदं नीरजोऽमलम् । क्षीराच्छक्षतजं दिव्यसंस्थानं वज्रसंहतम्[1] ॥२॥
सौरूप्यस्य परां कोटिं दधानं सौरभस्य च । अष्टोत्तरसहस्रेण लक्षणानामलङ्कृतम् ॥३॥
अप्रमेयमहावीर्यं[2] दधत् प्रियहितं वचः । कान्तमाविरभूदस्य रूपमप्राकृतं[3] प्रभोः[4] ॥४॥
[5]मकुटालङ्कृतं तस्य शिरो नीलशिरोरुहम् । [6]सुरेन्द्रमणिभिः कान्तं मेरोः शृङ्गमिवाबभौ ॥५॥
रुरुचे मूर्ध्नि मालास्य कल्पानोकहसंम्भवा । हिमाद्रेः कूटमावेष्ट्यापतन्तीवामरापगा ॥६॥
ललाटपट्टे विस्तीर्णे रुचिरस्य महत्यभूत् । वाग्देवीललिता क्रीड[7]स्थललीलां वितन्वती ॥७॥
भ्रूलते रेजतुर्भर्तु[8]: ललाटाद्रितटाश्रिते । [9]वागुरे मदनैणस्य[10] संरोधायैव[11] कल्पिते ॥८॥
नयनोत्पलयोरस्य कान्तिरानीलतारयोः[11] । आसीद् द्विरेफसंसक्तमहोत्पलदलश्रियोः ।९॥
मणिकुण्डलभूषाभ्यां कर्णावस्य रराजतुः । पर्यन्तौ गगनस्येव चन्द्रार्काभ्यामलङ्कृतौ ॥१०॥
मुखेन्दौ या द्युतिस्तस्य न सान्यत्र त्रिविष्टपे । अमृते या धृतिः[12] सा किं क्वचिदन्यत्र लक्ष्यते ॥११॥
स्मितांशुरुचिरं तस्य मुखमापाटलाधरम् । लसद्दलस्य पद्मस्य सफेनस्य श्रियं दधौ ॥१२॥

अनन्तर-यौवन अवस्था पूर्ण होने पर भगवान्‌का शरीर बहुत ही मनोहर हो गया था सो ठीक ही है क्योंकि चन्द्रमा स्वभावसे ही सुन्दर होता है यदि शरदृऋतुका आगमन हो जावे तो फिर कहना ही क्या है ? ॥ १ ॥ उनका रूप बहुत ही सुन्दर और असाधारण हो गया था, वह तपाये हुए सुवर्णके समान कान्तिवाला था, पसीनासे रहित था, धूलि और मलसे रहित था, दूधके समान सफेद रुधिर, समचतुरस्र नामक सुन्दर संस्थान और वज्रवृषभनाराच संहननसे सहित था, सुन्दरता और सुगन्धिकी परम सीमा धारण कर रहा था, एक हजार आठ लक्षणोंसे अलंकृत था, अप्रमेय था, महाशक्तिशाली था, और प्रिय तथा हितकारी वचन धारण करता था ॥ २-४ ॥ काले काले केशोंसे युक्त तथा मुकुटसे अलंकृत उनका शिर ऐसा सुशोभित होता था मानो नील मणियोंसे मनोहर मेरु पर्वतका शिखर ही हो ॥ ५ ॥ उनके मस्तक पर पड़ी हुई कल्प वृक्षके पुष्पोंकी माला ऐसी अच्छी मालूम होती थी मानो हिमगिरिकी शिखरको घेरकर ऊपरसे पड़ती हुई आकाशगंगा ही हो ॥ ६ ॥ उनके चौड़े ललालपट्ट परकी भारी शोभा ऐसी मालूम होती थी मानो सरस्वती देवीके सुन्दर उपवन अथवा क्रीड़ा करनेके स्थलकी शोभा ही बढ़ा रही हो ॥ ७ ॥ ललाटरूपी पर्वतके तटपर आश्रय लेनेवाली भगवान्‌की दोनों भौंहरूपी लताएं ऐसी शोभायमान हो रही थीं मानो कामदेवरूपी मृगको रोकनेके लिये दो पाश ही बनाये हों ॥ ८ ॥ काली पुतलियोंसे सुशोभित भगवान्‌के नेत्ररूपी कमलोंकी कान्ति, जिनपर भ्रमर बैठे हुए हैं ऐसे कमलोंकी पाँखुरीके समान थी ॥ ९ ॥ मणियोंके बने हुए कुण्डल-रूपी आभूषणोंसे उनके दोनों कान ऐसे शोभायमान हो रहे थे मानो चन्द्रमा और सूर्यसे अलंकृत आकाशके दो किनारे ही हों ॥ १० ॥ भगवान्‌के मुखरूपी चन्द्रमामें जो कान्ति थी वह तीन लोकमें किसी भी दूसरी जगह नहीं थी सो ठीक ही है अमृतमें जो संतोष होता है वह क्या किसी दूसरी जगह दिखाई देता है ? ॥ ११ ॥ उनका मुख मन्दहाससे मनोहर था, और

१ संहननम् । २ अप्रमेयं महावीर्यं प०, द०, म०, ल० । ३ असाधारणम् । ४ विभोः स० । ५ मुकुटाल-अ०, प०, द०, ल० । ६ इन्द्रनीलमाणिक्यैः । ७ उद्यान- । ८ मृगबन्धन्यौ । ९ स्मर-हरिणस्य । १० सन्धारणाय । ११ आ समन्तान्नीलकनीनिकयोः । १२ सन्तोषः ।

दधेऽस्य नासिकोत्तुङ्गा श्रियमायति[1]शालिनीम् । [2]सरस्वत्यवताराय कल्पितेव प्रणालिका[3] ॥१३॥
धत्ते स्म रुचिरा रेखाः [4]कन्धरोऽस्यास्य सद्मनः[5] । [6]उल्लिख्य घटितो धात्रा [7]रौक्मस्तम्भ इवैककः ॥१४॥
महानायकसंसक्तां[8] हारयष्टिमसौ दधे । वक्षसा गुणराजन्य[9]पृतनामिव संहताम्[10] ॥१५॥
[11]इन्द्रच्छन्दं महाहारमधत्तासौ स्फुरद्द्युतिः । वक्षसा सानुनाद्रीन्द्रो यथा [12]निर्झरसङ्करम् ॥१६॥
हारेण हारिणा तेन तद्वक्षो रुचिमानशे । गङ्गाप्रवाहसंसक्तहिमाद्रितटसम्भवाम् ॥१७॥
वक्षस्सरसि रम्येऽस्य हाररोचिश्छटाम्भसा । संभृते सुचिरं रेमे दिव्यश्रीकलहंसिका ॥१८॥
वक्षःश्रीगेहपर्यन्ते तस्यांसौ[13] श्रियमापतुः । जयलक्ष्मीकृतावासौ तुङ्गौ अट्टालकाविव ॥१९॥
बाहू केयूरसंघट्ट[14]मसृणांसौ दधे विभुः । कल्पाङ्घ्रिपाविवाभीष्टफलदौ श्रीलताश्रितौ ॥२०॥
नखानूहे[15] सुखालोकान्[16] [17]सकराङ्गुलिसंश्रितान् । [18]दशावतारसंभुक्तलक्ष्मीविभ्रमदर्पणान् ॥२१॥
[19]मध्येकायमसौ नाभिम् अदधन्नाभिनन्दनः । सरसीमिव सावर्त्तां लक्ष्मीहंसीनिषेविताम् ॥२२॥
[20]समेखलमधात् कान्तिं जघनं तस्य सांशुकम् । नितम्बमिव भूभर्तुः[21] सतडिच्छरदम्बुदम् ॥२३॥

लाल लाल अधरसे सहित था इसलिये फेन सहित पाँखुरीसे युक्त कमलकी शोभा धारण कर रहा था ॥ १२ ॥ भगवान्‌की लम्बी और ऊँची नाक सरस्वती देवीके अवतरणके लिये बनाई गई प्रणालीके समान शोभायमान हो रही थी ॥ १३ ॥ उनका कण्ठ मनोहर रेखाएं धारण कर रहा था वह उनसे ऐसा मालूम होता था मानो विधाताने मुखरूपी घरके लिये उकेर कर एक सुवर्णका स्तम्भ ही बनाया हो ॥ १४ ॥ वे भगवान् अपने वक्षःस्थल पर महानायक अर्थात् बीचमें लगे हुए श्रेष्ठ मणिसे युक्त जिस हारयष्टिको धारण कर रहे थे वह महानायक अर्थात् श्रेष्ठ सेनापतिसे युक्त, गुणरूपी क्षत्रियोंकी सुसंगठित सेनाके समान शोभायमान हो रही थी ॥ १५ ॥ जिस प्रकार सुमेरु पर्वत अपनी शिखर पर पड़ते हुए झरने धारण करता है उसी प्रकार भगवान् वृषभदेव अपने वक्षःस्थलपर अतिशय देदीप्यमान इन्द्रच्छद नामक हारको धारण कर रहे थे ॥ १६ ॥ उस मनोहर हारसे भगवान्‌का वक्षःस्थल गंगा नदीके प्रवाहसे युक्त हिमालय पर्वतके तटके समान शोभाको प्राप्त हो रहा था ॥ १७ ॥ भगवान्‌का वक्षःस्थल सरोवरके समान सुन्दर था वह हारकी किरणरूपी जलसे भरा हुआ था और उसपर दिव्य लक्ष्मी-रूपी कलहंसी चिरकाल तक क्रीड़ा करती थी ॥ १८ ॥ भगवान्‌का वक्षःस्थल लक्ष्मीके रहनेका घर था उसके दोनों ओर ऊंचे उठे हुए उनके दोनों कन्धे ऐसे शोभायमान हो रहे थे मानो जयलक्ष्मीके रहनेकी दो ऊंची अटारी ही हों ॥ १९ ॥ बाजूबंदके संघट्टनसे जिनके कंधे स्निग्ध हो रहे हैं और जो शोभारूपी लतासे सहित हैं ऐसी जिन भुजाओंको भगवान् धारण कर रहे थे वे अभीष्टफल देनेवाले कल्पवृक्षोंके समान सुशोभित हो रही थीं ॥ २० ॥ सुख देने वाले प्रकाशसे युक्त तथा सीधी अंगुलियोंके आश्रित भगवान्‌के हाथोंके नखोंको मैं समझता हूँ कि वे उनके महाबल आदि दश अवतारोंमें भोगी हुई लक्ष्मीके विलास दर्पण ही थे ॥ २१ ॥ महाराज नाभिराजके पुत्र भगवान् वृषभदेव अपने शरीरके मध्य भागमें जिस नाभिको धारण किये हुए थे वह लक्ष्मीरूपी हंसीसे सेवित तथा आवर्तसे सहित सरसीके समान सुशोभित हो रही थी ॥ २२ ॥ करधनी और वस्त्रसे सहित भगवान्‌का जघनभाग ऐसी शोभा धारण

१– मायाति– अ०, स० । २ श्रुतदेव्यवतरणाय । ३ प्रवेशद्वारम् । ४ ग्रीवा । ५ वक्त्रमन्दिरः । ६ उत्कीर्त्य संघटितः । ७ सुवर्णमय । ८ महामध्यमणियुताम् । ९ गुणवद्राजपुत्रसेनाम् । गुणराजस्य ट० । १० संयुक्ताम् । ११ एतन्नामकं हारविशेषम् । १२ निर्झरप्रवाहम् । १३ भुजशिखरौ । १४ केयूरसम्मर्दन-कृतनयभुजशिखरौ । १५ धृतवान् । १६ सुखप्रकाशान् । १७ सरलाङ्गुलि–अ०, स०, म० । १८ महाबला-दिदशावतारे स्वनुभुक्तलक्ष्मीविलासमुकुरान् । १९ शरीरस्य मध्ये । २० काञ्चीदामसहितम् । २१ पर्वतस्य ।

बभारोरुद्वयं धीरः कार्तस्वरविभास्वरम् । लक्ष्मीदेव्या इवान्दोलस्तम्भयुग्मकमुच्चकैः ॥२४॥
जङ्घे मदनमातङ्गदुर्लङ्घ्यार्गलविभ्रमे । लक्ष्म्येवोद्वर्तिते[1] भर्तुः परां कान्तिमवापताम् ॥२५॥
पादारविन्दयोः कान्तिः अस्य केनोपमीयते । त्रिजगच्छ्रीसमाश्लेषसौभाग्यमदशालिनोः ॥२६॥
इत्यस्याविरभूत् कान्तिरा[2]लकाग्रं[3] नखाग्रतः[4] । नूनमन्यत्र नालब्ध सा [5]प्रतिष्ठां स्ववाञ्छिताम् ॥२७॥
निसर्गसुन्दरं तस्य वपुर्वज्रास्थिबन्धनम् । विषशस्त्राद्यभेद्यत्वं भेजे रुक्मादिसच्छवि[6] ॥२८॥
यत्र वज्रमयास्थीनि व[7]ज्रैर्वलयितानि च । [8]वज्रनाराचभिन्नानि तत्संहननमीशितुः ॥२९॥
[9]त्रिदोषजा महातङ्का नास्य देहे न्यधुः[10] पदम् । मरुतां [11]चलितागानां ननु मेरुरगोचरः ॥३०॥
न जरास्य न खेदो वा नोपघातोऽपि जातुचित् । केवलं सुखसाद्भूतो [12]महीतल्पेऽमहीयत[13] ॥३१॥
तदस्य रुरुचे गात्रं परमौदारिकाह्वयम् । महाभ्युदयनिःश्रेयसार्थानां मूलकारणम् ॥३२॥
[14]मानोन्मानप्रमाणानामन्यूनाधिकतां श्रितम् । संस्थानमाद्यमस्यासीत् चतुरस्रं[15] समन्ततः ॥३३॥

कर रहा था मानो बिजली और शरद् ऋतुके बादलोंसे सहित किसी पर्वतका नितम्ब (मध्यभाग) ही हो ॥ २३ ॥ धीर वीर भगवान् सुवर्णके समान देदीप्यमान जिन दो ऊरुओं (घुटनोंसे ऊपरका भाग) को धारण कर रहे थे वे ऐसे जान पड़ते थे मानो लक्ष्मी देवीके झूलाके दो ऊंचे स्तम्भ ही हों ॥ २४ ॥ कामदेवरूपी हाथीके उल्लंघन न करने योग्य अर्गलोंके समान शोभायमान भगवान्की दोनों जंघाएं इस प्रकार उत्कृष्ट कान्तिको प्राप्त हो रही थी मानो लक्ष्मीदेवीने स्वयं उबटन कर उन्हें उज्ज्वल किया हो ॥ २५ ॥ भगवान्के दोनों ही चरणकमल तीनों लोकोंकी लक्ष्मीके आलिंगनसे उत्पन्न हुए सौभाग्यके गर्वसे बहुत ही शोभायमान हो रहे थे, संसारमें ऐसा कोई पदार्थ नहीं जिसके कि साथ उनकी उपमा दी जा सके ॥ २६ ॥ इस प्रकार पैरोंके नखके अग्रभागसे लेकर शिरके बालोंके अग्रभाग तक भगवान्के शरीरकी कान्ति प्रकट हो रही थी और ऐसी मालूम होती थी मानो उसे किसी दूसरी जगह अपनी इच्छानुसार स्थान प्राप्त नहीं हुआ था इसलिये वह अनन्य गति होकर भगवान्के शरीरमें आ प्रकट हुई हो ॥ २७ ॥ भगवान्का शरीर स्वभावसे ही सुन्दर था, वज्रमय हड्डियोंके बन्धनसे सहित था, विष शस्त्र आदिसे अभेद्य था और इसीलिये वह मेरु पर्वतकी कान्तिको प्राप्त हो रहा था ॥ २८ ॥ जिस संहननमें वज्रमयी हड्डियां वज्रोंसे वेष्टित होती हैं और वज्रमयी कीलोंसे कीलित होती हैं, भगवान् वृषभदेवका वही वज्रवृषभनाराचसंहनन था ॥२९॥ वात, पित्त और कफ इन तीन दोषोंसे उत्पन्न हुई व्याधियाँ भगवान्के शरीरमें स्थान नहीं कर सकी थीं सो ठीक ही है वृक्ष अथवा अन्य पर्वतोंको हिलाने वाली वायु मेरु पर्वतपर अपना असर नहीं दिखा सकती ॥३०॥ उनके शरीरमें न कभी बुढ़ापा आता था, न कभी उन्हें खेद होता था और न कभी उनका उपघात (असमयमें मृत्यु) ही हो सकता था। वे केवल सुखके अधीन होकर पृथिवीरूपी शय्यापर पूजित होते थे ॥३१॥ जो महाभ्युदयरूप मोक्षका मूल कारण था ऐसा भगवान्का परमौदारिक शरीर अत्यन्त शोभायमान हो रहा था ॥३२॥ भगवान्के शरीरका आकार, लम्बाई-चौड़ाई और ऊँचाई आदि सब ओर हीनाधिकतासे रहित था, उनका समचतुरस्रसंस्थान था ॥ ३३ ॥

१ उत्तेजिते सत्कृते च । २–रावालाग्र–अ०, प०, म०, स०, द०, ल० । ३ अलकाग्रादारभ्य । ४ नखाग्रपर्यन्तम् । ५ आश्रयम् । ६– सच्छविम् स० । ७ वज्रमयवेष्टनैर्वेष्टितानि । ८ वज्रनाराचकीलितानि । ९ वात्तपित्तश्लेष्मजा महाव्याधयः । १० व्यधुः प०, म० । ११ कम्पितवृक्षाणाम् । १२ भूशय्यायाम् । १३ पूज्योऽभूत् । 'महीङ वृद्धौ पूजायाम् । १४ उत्सेधवलयविस्ताराणाम् । १५ समचतुरस्रम् ।

यथास्य रूपसम्पत्तिः तथा भोगैश्च पप्रथे । न हि कल्पाङ्घ्रिपोद्भूतिः अनाभरणभासुरा ॥३४॥
लक्षणानि बभुर्भर्तुः देहमाश्रित्य निर्मलम् । ज्योतिषामिव बिम्बानि मेरोर्मणिमयं तटम् ॥३५॥
विभुः कल्पतरुच्छायां बभाराभरणोज्ज्वलः । शुभानि लक्षणान्यस्मिन् कुसुमानीव रेजिरे ॥३६॥
तानि श्रीवृक्षशङ्खाब्जस्वस्तिकाङ्कुशतोरणम्[1] । [2]प्रकीर्णकसितच्छत्रसिंहविष्टरकेतनम् ॥३७॥
झषौ कुम्भौ च कूर्मश्च चक्रमब्धिः सरोवरम् । विमानभवने[3] नागः[4] नरनार्यौ मृगाधिपः ॥३८॥
बाणबाणासने मेरुः सुरराट् सुरनिम्नगा । पुरं गोपुरमिन्द्वर्कौ जात्यश्वस्तालवृन्तकम् ॥३९॥
वेणुर्वीणा[5] मृदङ्गश्च स्रजौ पट्टांशुकापणौ[6] । स्फुरन्ति कुण्डलादीनि विचित्राभरणानि च ॥४०॥
उद्यानं फलित[7] क्षेत्रं सुपक्वकलमाञ्चितम् । रत्नद्वीपश्च वज्रं च मही लक्ष्मीः सरस्वती ॥४१॥
सुरभिः[8] सौरभेयश्च[9] चूडारत्नं महानिधिः । कल्पवल्ली हिरण्यञ्च जम्बूवृक्षश्च[10] [11]पक्षिराट् ॥४२॥
[12]उडूनि तारकाः[13] सौधं ग्रहाः सिद्धार्थपादपः[14] । प्रातिहार्याण्यहार्याणि[15] मङ्गलान्यपराणि[16] च ॥४३॥
लक्षणान्येवमादीनि विभोरष्टोत्तरं शतम् । व्यञ्जनान्यपराण्यासन् शतानि नवसंख्यया ॥४४॥
अभिरामं वपुर्भर्तुः लक्षणैरभिरूर्जितैः । ज्योतिर्भिरिव संछन्नं गगनप्राङ्गणं बभौ ॥४५॥
लक्ष्मणां च ध्रुवं किञ्चित् अस्त्यन्तर्लक्षणं शुभम् । [17]येन तैः[18] श्रीपतेरङ्गं स्प्रष्टुं लब्धमकल्मषम् ॥४६॥
लक्ष्मीर्निकामकठिने विरागस्य जगद्गुरोः । कथं कथमपि प्रापद् अवकाशं मनोगृहे ॥४७॥

भगवान् वृषभदेवकी जैसी रूप-सम्पत्ति प्रसिद्ध थी वैसी ही उनकी भोगोपभोगकी सामग्री भी प्रसिद्ध थी, सो ठीक ही है क्योंकि कल्पवृक्षोंकी उत्पत्ति आभरणोंसे देदीप्यमान हुए बिना नहीं रहती ॥३४॥ जिस प्रकार सुमेरु पर्वतके मणिमय तटको पाकर ज्योतिषी देवोंके मण्डल अतिशय शोभायमान होने लगते हैं उसी प्रकार भगवान्‌के निर्मल शरीरको पाकर सामुद्रिक शास्त्रमें कहे हुए लक्षण अतिशय शोभायमान होने लगे थे ॥३५॥ अथवा अनेक आभूषणोंसे उज्ज्वल भगवान् कल्पवृक्षकी शोभा धारण कर रहे थे और अनेक शुभ लक्षण उसपर लगे हुए फूलोंके समान सुशोभित हो रहे थे ॥३६॥ श्रीवृक्ष, शङ्ख, कमल, स्वस्तिक, अंकुश, तोरण, चमर, सफेद छत्र, सिंहासन, पताका, दो मीन, दो कुम्भ, कच्छप, चक्र, समुद्र, सरोवर, विमान, भवन, हाथी, मनुष्य, स्त्रियाँ, सिंह, बाण, धनुष, मेरु, इन्द्र, देवगंगा, पुर, गोपुर, चन्द्रमा, सूर्य, उत्तम घोड़ा, तालवृन्त-पंखा, बाँसुरी, वीणा, मृदंग, मालाएँ, रेशमी वस्त्र, दुकान, कुण्डलको आदि लेकर चमकते हुए चित्र-विचित्र आभूषण, फल सहित उपवन, पके हुए वृक्षोंसे सुशोभित खेत, रत्नद्वीप, वज्र, पृथिवी, लक्ष्मी, सरस्वती, कामधेनु, वृषभ, चूड़ामणि, महानिधियां, कल्पलता, सुवर्ण, जम्बूद्वीप, गरुड़, नक्षत्र, तारे, राजमहल, सूर्यादिक ग्रह, सिद्धार्थ वृक्ष, आठ प्रातिहार्य, और आठ मंगल द्रव्य, इन्हें आदि लेकर एक सौ आठ लक्षण और मसूरिका आदि नौ सौ व्यञ्जन भगवान्‌के शरीरमें विद्यमान थे ॥३७—४४॥ इन मनोहर और श्रेष्ठ लक्षणोंसे व्याप्त हुआ भगवान्‌का शरीर ज्योतिषी देवोंसे भरे हुए आकाश-रूपी आंगनकी तरह शोभायमान हो रहा था ॥४५॥ चूँकि उन लक्षणोंको भगवान्‌का निर्मल शरीर स्पर्श करनेके लिये प्राप्त हुआ था इसलिये जान पड़ता है कि उन लक्षणोंके अन्तर्लक्षण कुछ शुभ अवश्य थे ॥४६॥ रागद्वेषरहित जगद् गुरु भगवान् वृषभदेवके अतिशय कठिन मनरूपी घरमें लक्ष्मी जिस प्रकार—बड़ी कठिनाईसे अवकाश पा सकी थी ॥ भावार्थ—

---

१ –तोरणाः द०, स० । २ प्रकीर्णकं चामरम् । ३ सुरविमाननागालयौ । ४ गजः । ५ वंशः । ६ आपणः पण्यवीथी । ७ फलिनं द०, ल० । ८ कामधेनुः । ९ वृषभः । १० जम्बूद्वीपः । ११ गरुडः । १२ नक्षत्राणि । १३ प्रकीर्णकतारकाः । १४– दिपाः म० । १५ स्वाभाविकानि । १६ –पराण्यपि द०, स० । १७ अन्तर्लक्षणेन । १८ लक्षणैः ।

सरस्वती प्रियास्यासीत् कीर्तिश्चाकल्पवर्त्तिनी । लक्ष्मीं तडिल्लतालोलां मन्दप्रेम्णैव सोऽवहत् ॥४८॥
तदीयरूपलावण्ययौवनादिगुणोद्गमैः[1] । आकृष्टा जनतानेत्र[2]भृङ्गा नान्यत्र रेमिरे ॥४९॥
नाभिराजोऽन्यदा दृष्ट्वा यौवनारम्भमीशितुः । [3]परिणाययितुं देवमिति चिन्तां मनस्यधात् ॥५०॥
देवोऽयमतिकान्ताङ्गः कास्य स्याच्चित्तहारिणी । सुन्दरी मन्दरागेऽस्मिन् प्रारम्भो दुर्घटो ह्ययम् ॥५१॥
अपि चास्य महानस्ति [4]प्रारम्भस्तीर्थवर्त्तने । सोऽतिवर्त्तीव[5] गन्धेभः नियमात्प्रविशेद्वनम्[6] ॥५२॥
तथापि काललब्धिः स्याद् यावदस्य तपस्यितुम्[7] । तावत्कलत्रमुचितं चिन्त्यं [8]लोकानुरोधतः ॥५३॥
ततः पुण्यवती काचिद् उचिताभिजना[9] वधूः । कलहंसीव निष्पङ्कम् अस्यावसतु मानसम् ॥५४॥
इति निश्चित्य लक्ष्मीवान् नाभिराजोऽतिसंभ्रमी । [10]ससान्त्वमुपसृत्येदम् अवोचद्वदतां वरम् ॥५५॥
देव किञ्चिद्विवक्षामि[11] सावधानमितः शृणु । त्वयोपकारो लोकस्य करणीयो जगत्पते ॥५६॥
हिरण्यगर्भस्त्वं धाता जगतां त्वं स्वभूरसि[12] । [13]निभमात्रं त्वदुत्पत्तौ पितृम्मन्या[14] यतो वयम् ॥५७॥

भगवान् स्वभावसे ही वीतराग थे राज्यलक्ष्मीको प्राप्त करना अच्छा नहीं समझते थे ॥४७॥ भगवान्को दो स्त्रियाँ ही अत्यन्त प्रिय थीं एक तो सरस्वती और दूसरी कल्पान्तकाल तक स्थिर रहनेवाली कीर्ति। लक्ष्मी विद्युत् लताके समान चंचल होती है इसलिये भगवान् उसपर बहुत थोड़ा प्रेम रखते थे ॥४८॥ भगवान्के रूप-लावण्य, यौवन आदि गुणरूपी पुष्पोंसे आकृष्ट हुए मनुष्योंके नेत्ररूपी भौंरे दूसरी जगह कहीं भी रमण नहीं करते थे— आनन्द नहीं पाते थे ॥४९॥ किसी एक दिन महाराज नाभिराज भगवान्की यौवन अवस्थाका प्रारम्भ देखकर अपने मनमें उनके विवाह करनेकी चिन्ता इस प्रकार करने लगे ॥५०॥ कि यह देव अतिशय सुन्दर शरीरके धारक हैं, इनके चित्तको हरण करनेवाली कौन सी सुन्दर स्त्री हो सकती है? कदाचित् इनका चित्त हरण करनेवाली सुन्दर स्त्री मिल भी सकती है, परन्तु इनका विषयराग अत्यन्त मन्द है इसलिये इनके विवाहका प्रारंभ करना ही कठिन कार्य है ॥५१॥ और दूसरी बात यह है कि इनका धर्मतीर्थकी प्रवृत्ति करनेमें भारी उद्योग है इसलिये ये नियमसे सब परिग्रह छोड़कर मत्त हस्तीकी नाईं वनमें प्रवेश करेंगे अर्थात् वनमें जाकर दीक्षा धारण करेंगे ॥५२॥ तथापि तपस्या करनेके लिये जब तक इनकी काललब्धि आती है तब तक इनके लिये लोकव्यवहारके अनुरोधसे योग्य स्त्रीका विचार करना चाहिये ॥५३॥ इसलिये जिस प्रकार हंसी निष्पंक अर्थात् कीचड़-रहित मानस (मानसरोवर)में निवास करती है उसी प्रकार कोई योग्य और कुलीन स्त्री इनके निष्पंक अर्थात् निर्मल मानस (मन)में निवास करे ॥५४॥ यह निश्चय कर लक्ष्मीमान् महाराज नाभिराज बड़े ही आदर और हर्षके साथ भगवान्के पास जाकर वक्ताओंमें श्रेष्ठ भगवान्से शान्तिपूर्वक इस प्रकार कहने लगे कि ॥५५॥ हे देव, मैं आपसे कुछ कहना चाहता हूँ इसलिये आप सावधान होकर सुनिये। आप जगत्के अधिपति हैं इसलिये आपको जगत्का उपकार करना चाहिये ॥५६॥ हे देव, आप जगत्की सृष्टि करनेवाले ब्रह्मा हैं तथा स्वभू हैं अर्थात् अपने आप ही उत्पन्न हुए हैं। आपकी उत्पत्तिमें हम लोग माता-पिता हैं यह केवल एक छल

१ पुष्पैः। २ जगतां नेत्र– प०, द०। ३ विवाहयितुम्। ४ विवाहोपक्रमः। ५ अतिक्रमणशीलः। विशृङ्खलतया वर्तमान इत्यर्थः। ६ तपोवनम्। ७ तपस्यन्तुं प०, ल०। तपःसिन्तुं स०, अ०। तपस्कर्तुम्। ८ जनानुवर्तनात्। ९ योग्यकुलाः। १० सामसहितम्। 'सामसान्त्वमथो समौ' इत्यभिधानात्। अथवा सान्त्वम् अतिमधुरम् 'अत्यर्थमधुरं सान्त्वं सङ्गतं हृदयङ्गमम्' इत्यभिधानात्। ११ वक्तुमिच्छामि। १२ स्वयम्भूः। १३ व्याजमात्रम्। १४ पितृमन्या अ०, प०, म०, ल०।

यथार्कस्य समुद्भूतौ निमित्तमुदयाचलः । स्वतस्तु भास्वानुद्याति तथैवास्मद्[1] भवानपि ॥५८॥
गर्भगेहे शुचौ मातुः त्वं दिव्ये पद्मविष्टरे । निधाय स्वां[2] परां शक्तिम् उद्भूतो [3]निष्कलोऽस्यतः ॥५९॥
गुरुब्रुवोऽहं [4]तद्देव त्वामित्यभ्यर्थये[5] विभुम् । मतिं विधेहि लोकस्य [6]सर्जनं प्रति सम्प्रति ॥६०॥
त्वामादिपुरुषं दृष्ट्वा लोकोऽप्येवं प्रवर्तताम् । महतां मार्गवर्तिन्यः प्रजाः सुप्रजसो[7] ह्यमूः ॥६१॥
ततः कलत्रमत्रेष्टं परिणेतुं मनः कुरु । प्रजासन्ततिरेवं[8] हि [9]नोच्छेत्स्यति विदांवर ॥६२॥
प्रजासन्तत्यविच्छेदे तनुते धर्मसन्ततिः । [10]मनुष्व मानवं[11] धर्मं ततो देवेममच्युत[12] ॥६३॥
देवेमं गृहिणां धर्मं विद्धि दारपरिग्रहम् । सन्तानरक्षणे यत्नः कार्यो हि गृहमेधिनाम्[13] ॥६४॥
त्वया गुरुर्मतोऽयं[14] चेत् जनः[15] केनापि हेतुना । वचो नोल्लङ्घ्यमेवास्य नेष्टं हि गुरुलङ्घनम् ॥६५॥
इत्युदीर्य गिरं धीरो [16]व्यरंसीन्नाभिपार्थिवः । देवस्तु सस्मितं तस्य वचः प्रत्यैच्छदोमिति[17] ॥६६॥
किमेतत्पितृदाक्षिण्यं किं प्रजानुग्रहैषिता । [18]नियोगः कोऽपि वा तादृग् येनैच्छत्तादृशं वशी ॥६७॥
ततोऽस्यानुमतिं ज्ञात्वा[19] विशङ्को नाभिभूपतिः । महद्विवाहकल्याणम् अकरोत्परया मुदा ॥६८॥
सुरेन्द्रानुमतात्कन्ये सुशीले चारुलक्षणे । [20]सत्यौ सुरुचिराकारे [21]वरयामास नाभिराट् ॥६९॥

ही है ॥५७॥ जिस प्रकार सूर्यके उदय होनेमें उदयाचल निमित्त मात्र है क्योंकि सूर्य स्वयं ही उदित होता है उसी प्रकार आपकी उत्पत्ति होनेमें हम निमित्त मात्र हैं क्योंकि आप स्वयं ही उत्पन्न हुए हैं ॥५८॥ आप माताके पवित्र गर्भगृहमें कमलरूपी दिव्य आसन पर अपनी उत्कृष्ट शक्ति स्थापन कर उत्पन्न हुए हैं इसलिये आप वास्तवमें शरीररहित हैं ॥५९॥ हे देव, यद्यपि मैं आपका यथार्थमें पिता नहीं हूँ, निमित्त मात्रसे ही पिता कहलाता हूँ तथापि मैं आपसे एक अभ्यर्थना करता हूँ कि आप इस समय संसारकी सृष्टिकी ओर भी अपनी बुद्धि लगाइये ॥६०॥ आप आदिपुरुष हैं इसलिये आपको देखकर अन्य लोग भी ऐसी ही प्रवृत्ति करेंगे क्योंकि जिनके उत्तम संतान होनेवाली है ऐसी यह प्रजा महापुरुषोंकेही मार्गका अनुगमन करती है ॥६१॥ इसलिये हे ज्ञानियोंमें श्रेष्ठ, आप इस संसारमें किसी इष्ट कन्याके साथ विवाह करनेके लिये मन कीजिये क्योंकि ऐसा करनेसे प्रजाकी सन्ततिका उच्छेद नहीं होगा ॥६२॥ प्रजाकी सन्ततिका उच्छेद नहीं होने पर धर्मकी सन्तति बढ़ती रहेगी इसलिये हे देव, मनुष्योंके इस अविनाशीक विवाहरूपी धर्मको अवश्य ही स्वीकार कीजिये ॥६३॥ हे देव, आप इस विवाह कार्यको गृहस्थोंका एक धर्म समझिये क्योंकि गृहस्थोंको सन्तानकी रक्षामें प्रयत्न अवश्य ही करना चाहिये ॥६४॥ यदि आप मुझे किसी भी तरह गुरु मानते हैं तो आपको मेरे वचनोंका किसी भी कारणसे उल्लंघन नहीं करना चाहिये क्योंकि गुरुओंके वचनोंका उल्लंघन करना इष्ट नहीं है ॥६५॥ इस प्रकार वचन कहकर धीर वीर महाराज नाभिराज चुप हो रहे और भगवान्‌ने हँसते हुए 'ओम्' कहकर उनके वचन स्वीकार कर लिये अर्थात् विवाह कराना स्वीकृत कर लिया ॥६६॥ इन्द्रियोंको वशमें करनेवाले भगवान्‌ने जो विवाह करानेकी स्वीकृति दी थी वह क्या उनके पिताकी चतुराई थी, अथवा प्रजाका उपकार करनेकी इच्छा थी अथवा वैसा कोई कर्मोंका नियोग ही था ॥६७॥ तदनन्तर भगवान्‌की अनुमति जानकर नाभिराजने निःशंक होकर बड़े हर्षके साथ विवाहका बड़ा भारी उत्सव किया ॥६८॥ महाराज नाभिराजने इन्द्रकी अनुमतिसे सुशील, सुन्दर लक्षणोंवाली, सती और मनोहर आकारवाली दो कन्याओंकी

---

१ अस्मत्तः । २ भवत्सम्बन्धिनीम् । ३ निःशरीरः, शरीररहितः इत्यर्थः । ४ कारणात् । ५ प्रार्थये । ६ सृष्टिः । ७ सुपुत्रवत्यः । ८ एवं सति । ९ विच्छिन्ना न भविष्यति । १० जानीहि । ११ मनुसम्बन्धिनम् । १२ देवैनमच्युतम् अ०, प०, द०, स० । देवेनमच्युतम् ल० । १३ गृहमेधिना द० । १४ पितेति मतः । १५ अहमित्यर्थः । १६ तूष्णीस्थितः । १७ तथास्तु । ओमेवं परमं मते । १८ नियमेन कर्तव्यः । १९ मत्वा प०, द०, म०, ल० । २० पतिव्रते । २१ ययाचे ।

तन्व्यौ[1] कच्छमहाकच्छजाम्यौ[2] सौम्ये पतिंवरे[3]। [4]यशस्वती सुनन्दाख्ये स एवं[5] पर्यणीनयत् ॥७०॥
पुरुः पुरुगुणो देवः [6]परिणेतेति संभ्रमात्। परं कल्याणमातेनुः सुराः प्रीतिपरायणाः ॥७१॥
पश्यन्पाणिगृहीत्यौ[7] ते नाभिराजः सनाभिभिः[8]। समं समतुषत्प्रायः [9]लोकधर्मप्रियो जनः ॥७२॥
पुरुदेवस्य कल्याणे मरुदेवी तुतोष सा। दारकर्मणि पुत्राणां प्रीत्युत्कर्षो हि योषिताम् ॥७३॥
[10]दिष्ट्या स्म वर्द्धते देवी पुत्रकल्याणसम्पदा। कलयेन्दोरिवाम्भोधिवेला कल्लोलमालिनी ॥७४॥
पुरोर्विवाहकल्याणे प्रीतिं भेजे जनोऽखिलः। [11]स्वभोगीनतया भोक्तुः[12] भोगांल्लोको[13]ऽनुरुध्यते[14] ॥७५॥
प्रमोदाय नृलोकस्य न परं स महोत्सवः। स्वर्लोकस्यापि सम्प्रीतिम् अतनोत्तनीयसीम्[15] ॥७६॥
वरोरू चारुजङ्घे ते[16] मृदुपादपयोरुहे। [17]सुश्रोणिनाधरेणापि[18] कायेनाजयतां जगत् ॥७७॥
[19]वरारोहे तनूदर्यौ रोमराजिं[20] तनीयसीम्। अधत्तां कामगन्धेभमदस्रुति[21]मिवाग्रिमाम्[22] ॥७८॥
नाभिं कामरसस्यैककूपिकां बिभृतः स्म ते। रोमराजीलतामूलबद्धां [23]पालीमिवाभितः ॥७९॥

याचना की ॥६९॥ वे दोनों कन्याएँ कच्छ महाकच्छकी बहिनें थीं, बड़ी ही शान्त और यौवनवती थीं; यशस्वी और सुनन्दा उनका नाम था। उन्हीं दोनों कन्याओंके साथ नाभिराजने भगवान्‌का विवाह कर दिया ॥७०॥ श्रेष्ठ गुणोंको धारण करनेवाले भगवान् वृषभदेव विवाह कर रहे हैं इस हर्षसे देवोंने प्रसन्न होकर अनेक उत्तम उत्तम उत्सव किये थे ॥७१॥ महाराज नाभिराज अपने परिवारके लोगोंके साथ, दोनों पुत्रवधुओंको देखकर भारी संतुष्ट हुए सो ठीक ही है क्योंकि संसारी जनोंको विवाह आदि लौकिक धर्म ही प्रिय होता है ॥७२॥ भगवान् वृषभदेवके विवाहोत्सवमें मरुदेवी बहुत ही संतुष्ट हुई थी सो ठीक ही है, पुत्रके विवाहोत्सवमें स्त्रियोंको अधिक प्रेम होता ही है ॥७३॥ जिस प्रकार चन्द्रमाकी कलासे लहरोंकी मालासे भरी हुई समुद्रकी बेला बढ़ने लगती है उसी प्रकार भाग्योदयसे प्राप्त होनेवाली पुत्रकी विवाहोत्सवरूप सम्पदासे मरुदेवी बढ़ने लगी थीं ॥७४॥ भगवान्‌के विवाहोत्सवमें सभी लोग आनन्दको प्राप्त हुए थे सो ठीक ही है। मनुष्य स्वयं ही भोगोंकी तृष्णा रखते हैं इसलिये वे स्वामीको भोग स्वीकार करते देखकर उन्हींका अनुसरण करने लगते हैं ॥७५॥ भगवान्‌का वह विवाहोत्सव केवल मनुष्य-लोककी प्रीतिके लिये ही नहीं हुआ था, किन्तु उसने स्वर्गलोकमें भी भारी प्रीतिको विस्तृत किया था ॥७६॥ भगवान् वृषभदेवकी दोनों महादेवियाँ उत्कृष्ट ऊरुओं, सुन्दर जंघाओं और कोमल चरण-कमलोंसे सहित थीं। यद्यपि उनका सुन्दर कटिभाग अधर अर्थात् नीचा था (पक्षमें नाभिसे नीचे रहनेवाला था) तथापि उससे संयुक्त शरीरके द्वारा उन्होंने समस्त संसारको जीत लिया था ॥७७॥ वे दोनों ही देवियाँ अत्यन्त सुन्दर थीं उनका उदर कृश था और उस कृश उदर पर वे जिस पतली रोम राजिको धारण कर रही थीं वह ऐसी जान पड़ती थी मानो कामदेवरूपी मदोन्मत्त हाथीके मदकी अग्रधारा ही हो ॥७८॥ वे देवियाँ जिस नाभिको धारण कर रही थीं वह ऐसी जान पड़ती थीं मानो कामरूपी रसकी कूपिका ही हो अथवा

१ कृशाङ्ग्यौ। २ भगिन्यौ। ३ स्वयंवरे। ४ सरस्वती अ०, स०। ५ एते अ०, प०, म०, द०, ल०। ६ दारपरिग्रही भविष्यति। ७ विवाहिते। ८ बन्धुभिः। ९ लौकिकधर्म। १० आनन्देन। ११ स्वभोगहितत्वेन। १२ भर्तुः। १३ लोकेऽनु– प०। १४ अनुवर्तते। अनोरुध कामे दिवादिः। १५ भूयसीम्। १६ कन्ये। १७ शोभनजघनेन। १८ नाभेरधःकायोऽधर-कायस्तेन। ध्वनौ नीचेनापि कायेन। १९ उत्तमे, उत्तमस्त्रियौ। 'वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी।' इत्यभिधानात्। २० –राजीं द०, स०। २१ मदप्रवाहम्। २२ श्रेष्ठाम्। २३ आलबालम्।

स्तनाब्जकुड्मले दीर्घरोमराज्येकनालके । ते पद्मिन्याविवाधत्तां नीलचूचुकषट्पदे ॥८०॥
[1]मुक्ताहारेण तन्नूनं[2] तपस्तेपे स्वनामजम्[3] । यतोऽवाप स तत्कण्ठकुचस्पर्शसुखामृतम् ॥८१॥
एकावल्या स्तनोपान्तस्पर्शिन्या ते विरेजतुः । सख्येव कण्ठसङ्गिन्या स्वच्छया [4]स्निग्धमुक्तया ॥८२॥
हारं नक्षत्रमालाख्यं ते स्तनान्तरलम्बिनम् । दधतुः कुचसंस्पर्शाद् हसन्तमिव रोचिषा ॥८३॥
मृदू भुजलते चार्व्यां[5]वधिषातां सुसंहते । नखांशुकुसुमोद्भेदैः[6]दधाने हसितश्रियम् ॥८४॥
मुखेन्दुरेनयोः कान्तिम् अधान्मुग्धस्मितांशुभिः । ज्योत्स्नालक्ष्मीं समातन्वन् जगतां कान्तदर्शनः ॥८५॥
सुपक्ष्मणी तयोर्नेत्रे रेजाते स्निग्धतारके[7] । यथोत्पले समुत्फुल्ले केसरालग्नषट्पदे ॥८६॥
[8]नामकर्मविनिर्माणरुचिरे सुभ्रुवोर्भ्रुवौ । चापयष्टिरनङ्गस्य [9]नानुयातुमलं तराम् ॥८७॥

रोमराजीरूपी लताके चारों ओर बंधी हुई पाल ही हो ॥७९॥ जिस प्रकार कमलिनी कमल-पुष्पकी बोंड़ियोंको धारण करती है उसी प्रकार वे देवियाँ स्तनरूपी कमलकी बोंड़ियोंको धारण कर रही थीं, कमलिनियोंके कमल जिस प्रकार एक नालसे सहित होते हैं उसी प्रकार उनके स्तनरूपी कमल भी रोमराजिरूपी एक नालसे सहित थे और कमलों पर जिस प्रकार भौंरे बैठते हैं उसी प्रकार उनके स्तनरूपी कमलोंपर भी चूचुकरूपी भौंरे बैठे हुए थे। इस प्रकार वे दोनों ही देवियाँ ठीक कमलिनियोंके समान सुशोभित हो रही थीं ॥८०॥ उनके गलेमें जो मुक्ताहार अर्थात् मोतियोंके हार पड़े हुए थे, मालूम होता है कि उन्होंने अवश्य ही अपने नामके अनुसार (मुक्त + आहार) आहार त्याग अर्थात् उपवासरूप तप तपा था और इसीलिये उन मुक्ताहारोंने अपने उक्त तपके फल स्वरूप उन देवियोंके कंठ और कुचके स्पर्शसे उत्पन्न हुए सुखरूपी अमृतको प्राप्त किया था ॥८१॥

गलेमें पड़े हुए एकावली अर्थात् एक लड़के हारसे वे दोनों ऐसी शोभायमान हो रहीं थीं मानो किसी सखीके सम्बन्धसे ही शोभायमान हो रही हों; क्योंकि जिस प्रकार सखी स्तनोंके समीपवर्ती भागका स्पर्श करती है उसी प्रकार वह एकावली भी उनके स्तनोंके समीपवर्ती भागका स्पर्श कर रही थी, सखी जिस प्रकार कंठसे संसर्ग रखती है अर्थात् कंठालिंगन करती है उसी प्रकार वह एकावली भी उनके कंठसे संसर्ग रखती थी अर्थात् कंठमें पड़ी हुई थी, सखी जिस प्रकार स्वच्छ अर्थात् कपटरहित-निर्मलहृदय होती है उसी प्रकार वह एकावली भी स्वच्छ—निर्मल थी और सखी जिस प्रकार स्निग्धमुक्ता होती है अर्थात् स्नेही पतिके द्वारा छोड़ी— भेजी जाती हैं उसी प्रकार वह एकावली भी स्निग्धमुक्ता थी अर्थात् चिकने मोतियोंसे सहित थी ॥८२॥ वे देवियाँ अपने स्तनोंके बीचमें लटकते हुए जिस नक्षत्रमाला अर्थात् सत्ताईस मोतियोंके हारको धारण किये हुई थीं वह अपनी किरणोंसे ऐसा मालूम होता था मानो स्तनोंका स्पर्श कर आनन्दसे हँस ही रहा हो ॥ ८३ ॥ वे देवियाँ नखोंकी किरणोंरूपी पुष्पोंके विकाससे हास्यकी शोभाको धारण करनेवाली कोमल, सुन्दर और सुसंगठित भुजलताओंको धारण कर ही थीं ॥ ८४ ॥ उन दोनोंके मुखरूपी चन्द्रमा भारी कान्तिको धारण कर रहे थे, वे अपने सुन्दर मन्द हास्यकी किरणोंके द्वारा चाँदनीकी शोभा बढ़ा रहे थे, और देखनेमें संसारको बहुत ही सुन्दर जान पड़ते थे ॥ ८५ ॥ उत्तम बरौनी और चिकनी अथवा स्नेहयुक्त तारोंसे सहित उनके नेत्र ऐसे सुशोभित हो रहे थे मानो जिनके केशर पर भ्रमर आ लगे हैं ऐसे फूले हुए कमल ही हों ॥ ८६ ॥ सुन्दर भौंहोंवाली उन देवियोंकी दोनों भौंहें नामकर्मके द्वारा इतनी सुन्दर बनी थीं कि कामदेवकी धनुषलता भी उनकी बराबरी

१ मौक्तिकहारेण । २ इव । ३ मुक्ताहारनामभवम् । ४ मसृणमुक्तया । पक्षे प्रियतमप्रेषितया । ५ अधत्तामित्यर्थः । ६ विकासैः । ७ कनीनिके । ८ नामकर्मकरण । नामकर्मणा विनिर्माणं तेन रुचिरे इत्यर्थः । ९ अनुकर्तुम् ।

नीलोत्पलवतंसेन[1] तत्कर्णौ दधतुः श्रियम् । मिथः प्रमित्सुने[2]वोच्चैः आयतिं नयनाब्जयोः ॥८८॥
ते ललाटतटालम्बान् अलकान्[3] हतुर्भृशम् । सुवर्णपट्टपर्यन्तखचितेन्द्रोपलत्विषः ॥८९॥
[4]स्रस्तस्रक्कबरीबन्धः तयोरुत्प्रेक्षितो जनैः । कृष्णाहिरिव शुक्लाहिं निगीर्य पुनरुद्गिरन्[5] ॥९०॥
इति स्वभावमधुराम् आकृतिं भूषणोज्ज्वलाम् । दधाने दधतुर्लीलां कल्पवल्ल्योः स्फुरत्त्विषोः ॥९१॥
दृष्ट्वैनयोरदो रूपं जनानामतिरित्यभूत् । एताभ्यां निर्जिताः सत्यं स्त्रियम्मन्याः सुरस्त्रियः ॥९२॥
स ताभ्यां कीर्तिलक्ष्मीभ्यामिव रेजे [6]वरोत्तमः । ते च तेन महानद्यौ वार्धिनेव [7]समीयतुः ॥९३॥
सरूपे[8] सद्युती कान्ते ते मनो जहतुर्विभोः । मनोभुव इवाशेषं जिगीषोर्वैजयन्तिके ॥९४॥
तयोरपि मनस्तेन रञ्जितं भुवनेशिना । हारयष्ट्योरिवारक्त[9]मणिना मध्यमुद्रुचा ॥९५॥
बहुशो भग्नमानोऽपि [10]यत्पुरोऽस्य मनोभवः । चचार[11] गूढसञ्चार[12] कारणं तत्र चिन्त्यताम् ॥९६॥
नूनमेनं प्रकाशात्मा[13] व्यद्धुं हृदिशयोऽक्षमः । अनङ्गतां तदा भेजे सोपाया हि जिगीषवः[14] ॥९७॥

नहीं कर सकती थीं ॥८७॥ उन महादेवियोंके कान नीलकमलरूपी कर्ण-भूषणोंसे ऐसी शोभा धारण कर रहे थे मानो नेत्ररूपी कमलोंकी अतिशय लम्बाईको परस्परमें नापना ही चाहते हों ॥८८॥ वे देवियाँ अपने ललाट-तट पर लटकते हुए जिन अलकोंको धारण कर रही थीं वे सुवर्णपट्टकके किनारे पर जड़े हुए इन्द्रनील मणियोंके समान अत्यन्त सुशोभित हो रहे थे ॥८९॥ जिनपरकी पुष्पमालाएँ ढीली होकर नीचेकी ओर लटक रही थीं ऐसे उन देवियोंके केशपाशोंके विषयमें लोग ऐसी उत्प्रेक्षा करते थे कि मानो कोई काले साँप सफेद साँपको निगलकर फिरसे उगल रहे हों ॥९०॥ इस प्रकार स्वभावसे मधुर और आभूषणोंसे उज्ज्वल आकृतिको धारण करनेवाली वे देवियाँ कान्तिमती कल्पलताओंकी शोभा धारण कर रही थीं ॥९१॥ इन दोनोंके उस सुन्दर रूपको देखकर लोगोंकी यही बुद्धि होती थी कि वास्तवमें इन्होंने अपने आपको स्त्री माननेवाली देवाङ्गनाओंको जीत लिया है ॥९२॥ वरोंमें उत्तम भगवान् वृषभदेव उन देवियोंसे ऐसे शोभायमान हो रहे थे मानो कीर्ति और लक्ष्मीसे ही शोभायमान हो रहे हों और वे दोनों भगवान्से इस प्रकार मिली थीं जिस प्रकारकी महानदियाँ समुद्रसे मिलती हैं ॥९३॥ वे देवियां बड़ी ही रूपवती थीं, कान्तिमती थीं, सुन्दर थीं और समस्त जगत्को जीतनेकी इच्छा करनेवाले कामदेवकी पताकाके समान थीं और इसीलिये ही उन्होंने भगवान् वृषभदेवका मन हरण कर लिया था ॥९४॥ जिस प्रकार बीचमें लगा हुआ कान्तिमान् पद्मराग मणि हारयष्टियोंके मध्यभागको अनुरंजित अर्थात् लाल वर्ण कर देता है उसी प्रकार उत्कट कान्ति या इच्छासे युक्त भगवान् वृषभदेवने भी उन देवियोंके मनको अनुरंजित—प्रसन्न कर दिया था ॥९५॥ यद्यपि कामदेव भगवान् वृषभदेवके सामने अनेक बार अपमानित हो चुका था तथापि वह गुप्त रूपसे अपना संचार करता ही रहता था। विद्वानोंको इसका कारण स्वयं विचार लेना चाहिये ॥९६॥ मालूम होता है कि कामदेव स्पष्ट रूपसे भगवान्को बाधा देनेके लिये समर्थ नहीं था इसलिये वह उस समय शरीररहित अवस्थाको प्राप्त हो गया था सो ठीक ही है क्योंकि विजयकी इच्छा करनेवाले पुरुष अनेक उपायोंसे सहित होते हैं—कोई न कोई

---

१ नीलोत्पलावतंसेन प०, ल०। २ प्रमातुमिच्छुना। ३ दधतुः। ४ गलितः। ५ उद्गिलन् अ०, प०, द०, स०। ६ नरोत्तमः अ०, स०। ७ सङ्गमीयतुः। ८ समानरूपे। ९ पद्मरागमाणिक्येन। १० यस्मात् कारणात्। ११ चरति स्म। एतेन प्रभोर्माहात्म्यं व्यज्यते। तत्र तयोः सौभाग्यं व्यङ्ग्यम्। १२ –सञ्चारकारणं– अ०, प०। १३ व्यक्तस्वरूपः। १४ जेतुमिच्छवः।

अनङ्गत्वेन [1]तन्नूनम् एनयोः प्रविशन् वपुः । दुर्गाश्रित इवानङ्गो विव्याधैनं स्वसायकैः ॥९८॥
ताभ्यामिति समं भोगान् भुञ्जानस्य जगद्गुरोः । कालो महानगादेकक्षणवत् सततक्षणैः[2] ॥९९॥
अथान्यदा महादेवी सौधे सुप्ता यशस्वति । स्वप्नेऽपश्यन् महीं ग्रस्तां मेरुं सूर्यञ्च सोडुपम् ॥१००॥
सरः सहंसमब्धिञ्च [3]चलद्वीचिकमैक्षत । स्वप्नान्ते च व्यबुद्धासौ पठन् मागधनिःस्वनैः ॥१०१॥
त्वं विबुध्यस्व कल्याणि कल्याणशतभागिनि । प्रबोधसमयोऽयं ते सहाब्जिन्या धृतश्रियः ॥१०२॥
मुदे तवाम्ब भूयासुः इमे स्वप्नाः शुभावहाः । महीमेरूदधीन्द्वर्कसरोवरपुरस्सराः[4] ॥१०३॥
नभस्सरोवरेऽन्विष्य[5] चिरं तिमिरशैवलम् । खेदादिवाधुनाभ्येति[6] शशिहंसोऽस्त[7]पादपम् ॥१०४॥
ज्योत्स्नांभसि चिरं तीर्त्वा[8] ताराहंस्यो नभो ह्रदे । नूनं [9]निलेतुमस्ताद्रेः शिखराण्याश्रयन्त्यमूः ॥१०५॥
निद्राकषायितैर्नेत्रैः कोकीनां [10]सेर्ष्यमीक्षितः । तद्दृष्टिदूषितात्मेव विधुर्विच्छायतां गतः ॥१०६॥
प्रयाति यामिनी[11] यामा[12]निवान्वेतुं पुरोगतान् । ज्योत्स्नांशुकेन संवेष्टय तारासर्वस्वमात्मनः ॥१०७॥
इतोऽस्तमेति शीतांशुः इतो भास्वानुदीयते[13] । संसाररस्येव वैचित्र्यम् उपदेष्टुं समुद्यतौ ॥१०८॥

उपाय अवश्य करते हैं ॥ ९७ ॥ अथवा कामदेव शरीररहित होनेके कारण इन देवियोंके शरीरमें प्रविष्ट हो गया था और वहाँ किलेके समान स्थित होकर अपने बाणोंके द्वारा भगवान्‌को घायल करता था ॥ ९८ ॥ इस प्रकार उन देवियोंके साथ भोगोंको भोगते हुए जगद्गुरु भगवान् वृषभदेवका बड़ा भारी समय निरन्तर होनेवाले उत्सवोंसे क्षण भरके समान बीत गया था ॥ ९९ ॥

अथानन्तर किसी समय यशस्वती महादेवी राजमहलमें सो रही थीं। सोते समय उसने स्वप्नमें ग्रसी हुई पृथिवी, सुमेरु पर्वत, चन्द्रमा सहित सूर्य, हंस सहित सरोवर तथा चञ्चल लहरोंवाला समुद्र देखा, स्वप्न देखनेके बाद मंगल-पाठ पढ़ते हुए बन्दीजनोंके शब्द सुनकर वह जाग पड़ी ॥ १००–१०१ ॥ उस समय वन्दीजन इस प्रकार मंगल-पाठ पढ़ रहे थे कि हे दूसरोंका कल्याण करनेवाली और स्वयं सैकड़ों कल्याणोंको प्राप्त होनेवाली देवि, अब तू जाग; क्योंकि तू कमलिनीके समान शोभा धारण करनेवाली है—इसलिये यह तेरा जागनेका समय है। भावार्थ—जिस प्रकार यह समय कमलिनीके जागृत-विकसित होनेका है, उसी प्रकार तुम्हारे जागृत होनेका भी है ॥ १०२ ॥ हे मातः, पृथिवी, मेरु, समुद्र, सूर्य, चन्द्रमा और सरोवर आदि जो अनेक मंगल करनेवाले शुभ स्वप्न देखे हैं वे तुम्हारे आनन्दके लिये हों ॥ १०३ ॥ हे देवि, यह चन्द्रमारूपी हंस चिरकाल तक आकाशरूपी सरोवरमें अन्धकाररूपी शैवालको खोजकर अब खेदखिन्न होनेसे ही मानो अस्ताचलरूपी वृक्षका आश्रय ले रहा है। अर्थात् अस्त हो रहा है ॥ १०४ ॥ ये तारारूपी हंसियाँ आकाशरूपी सरोवरमें चिरकाल तक तैरकर अब मानो निवास करनेके लिये ही अस्ताचलकी शिखरोंका आश्रय ले रही हैं—अस्त हो रही हैं ॥ १०५ ॥ हे देवि, यह चन्द्रमा कान्तिरहित हो गया है, ऐसा मालूम होता है कि रात्रिके समय चकवियोंने निद्राके कारण लाल वर्ण हुए नेत्रोंसे इसे ईर्ष्याके साथ देखा है इसलिये मानो उनकी दृष्टिके दोष से ही दूषित होकर यह कान्तिरहित हो गया है ॥ १०६ ॥ हे देवि, अब यह रात्रि भी अपने नक्षत्ररूपी धनको चाँदनीरूपी वस्त्रमें लपेटकर भागी जा रही है, ऐसा मालूम होता है मानो वह आगे गये हुए (बीते हुए) प्रहरोंके पीछे ही जाना चाहती हो ॥ १०७ ॥ इस ओर यह चन्द्रमा अस्त हो रहा है और इस ओर सूर्यका उदय हो रहा है, ऐसा जान पड़ता है मानो

---

१ वा नून– अ०, प०, स०, द०, म०, ल० । २ नित्योत्सवैः । ३ चलवीचिक– अ०, प०, द०, म०, स०, ल० । ४ –पुरोगमाः प० । ५ रेऽवीष्य ट० । अनुप्राप्य । ६ अभिगच्छति । ७ अस्तगिरिवृक्षम् । ८ तरणं कृत्वा । ९ वस्तुम् । १० ईर्ष्यया सहितम् । ११ रजनी । १२ प्रहरान् । १३ 'ई गतौ' उदयतीत्यर्थः ।

तारका गगनाम्भोधौ मुक्ताफलनिभश्रियः । [१]अरुणौर्वानलेनेमा विलीयन्ते गतत्विषः ॥१०९॥
सरितां सैकतादेव चक्रवाको [२]रुवन् रुवन् । अन्विच्छति निजां कान्तां निशाविरहविक्लवः[३] ॥११०॥
अयं हंसयुवा हंस्या सुषुप्सति[४] समं सति[५] । मृणालशकलेनाङ्गं कण्डूयँश्चञ्चुलम्बिना ॥१११॥
अब्जिनीयमितो धत्ते विकसत्पङ्कजाननम् । इतश्च म्लानिमासाद्य नम्रास्येयं कुमुद्वती ॥११२॥
सरसां पुलिनेष्वेताः [६]कुरर्यः कुर्वते रुतम्[७] । युष्मन्नूपुरसंवादि[८] तारं मधुरमेव च ॥११३॥
स्वनीडादुत्पतन्त्यद्य कृतकोलाहलस्वनाः । प्रभातमङ्गलानीव पठन्तोऽमी शकुन्तयः ॥११४॥
अप्राप्तस्त्रैणसंस्कारा[९] [१०]परिक्षीणदशा इमे । काञ्चुकीयैस्समं दीपा यान्ति कालेन मन्दताम् ॥११५॥
इतो निजगृहे देवि त्वन्मङ्गलविधित्सया[११] । कुब्जवामनिकाप्रायः परिवारः प्रतीच्छति[१२] ॥११६॥
विमुञ्च शयनं तस्मात् नदीपुलिनसन्निभम् । हंसीव राजहंसस्य[१३] वल्लभा मानसाश्रया ॥११७॥
इत्युच्चैर्वन्दिवृन्देषु पठत्सु समयोचितम् । प्राबोधिकानकध्वानैः सा विनिद्राभवच्छनैः ॥११८॥
विमुक्तशयना चैषा कृतमङ्गलमज्जना । प्रष्टुकामा स्वदृष्टानां स्वप्नानां तत्त्वतः फलम् ॥११९॥

ये संसारकी विचित्रताका उपदेश देनेके लिये ही उद्यत हुए हों ॥ १०८ ॥ हे देवि, आकाशरूपी समुद्रमें मोतियोंके समान शोभायमान रहनेवाले ये तारे सूर्यरूपी वड़वानलके द्वारा कान्ति-रहित होकर विलीन होते जा रहे हैं ॥ १०९ ॥ रातभर विरहसे व्याकुल हुआ यह चकवा नदीके बालूके टीले पर स्थित होकर रोता रोता ही अपनी प्यारी स्त्री चकवीको ढूँढ़ रहा है ॥ ११० ॥ हे सति, इधर यह जवान हंस चोंचमें दबाये हुए मृणाल-खण्डसे शरीरको खुजलाता हुआ हंसीके साथ शयन करना चाहता है ॥ १११ ॥ हे देवि, इधर यह कमलिनी अपने विकसित कमल रूपी मुखको धारण कर रही है और इधर यह कुमुदिनी मुरझाकर नम्रमुख हो रही है, अर्थात् मुरझाये हुए कुमुदको नीचा कर रही है ॥ ११२ ॥ इधर तालाबके किनारों पर ये कुरर पक्षियोंकी स्त्रियां तुम्हारे नूपुरके समान उच्च और मधुर शब्द कर रही हैं ॥ ११३ ॥ इस समय ये पक्षी कोलाहल करते हुए अपने अपने घोंसलोंसे उड़ रहे हैं और ऐसे जान पड़ते हैं मानो प्रातःकालका मंगल-पाठ ही पढ़ रहे हों ॥ ११४ ॥ इधर प्रातःकालका समय पाकर ये दीपक कंचुकियों (राजाओंके अन्तःपुरमें रहनेवाले वृद्ध या नपुंसक पहरेदारों) के साथ साथ ही मन्दताको प्राप्त हो रहे हैं क्योंकि जिस प्रकार कंचुकी स्त्रियोंके संस्कारसे रहित होते हैं उसी प्रकार दीपक भी प्रातःकाल होने पर स्त्रियोंके द्वाराकी हुई सजावटसे रहित हो रहे हैं और कंचुकी जिस प्रकार परिक्षीण दशा अर्थात् वृद्ध अवस्थाको प्राप्त होते हैं उसी प्रकार दीपक भी परिक्षीण दशा अर्थात् क्षीण बत्तीवाले हो रहे हैं ॥ ११५ ॥ हे देवि, इधर तुम्हारे घरमें तुम्हारा मंगल करनेकी इच्छासे यह कुब्जक तथा वामन आदिका परिवार तुम्हारी प्रतीक्षा कर रहा है ॥ ११६ ॥ इसलिये जिस प्रकार मानसरोवर पर रहनेवाली, राजहंस पक्षीकी प्रिय वल्लभा-हंसी नदीका किनारा छोड़ देती है उसी प्रकार भगवान् वृषभदेवके मनमें रहनेवाली और उनकी प्रिय वल्लभा तू भी शय्या छोड़ ॥ ११७ ॥ इस प्रकार जब वंदीजनोंके समूह जोर जोरसे मंगल-पाठ पढ़ रहे थे तब वह यशस्वती महादेवी जगानेवाले दुन्दुभियोंके शब्दोंसे धीरे धीरे निद्रारहित हुई—जाग उठी ॥ ११८ ॥ और शय्या छोड़कर प्रातःकालका मंगलस्नान कर प्रीतिसे रोमांचितशरीर हो अपने देखे हुए स्वप्नोंका यथार्थ फल पूछनेके लिये संसारके प्राणियोंके हृदयवर्ती अंधकारको

---

१ सूर्यसारथिः । २ कूजन् कूजन् । ३ विह्वलः । ४ शयितुमिच्छति । ५ भो पतिव्रते । ६ उत्क्रोशाः । 'उत्क्रोशकुररौ समौ' इत्यभिधानात् । ७ रुतिम् प० । ८ सदृशम् । ९ स्त्रीसम्बन्धि । १० परिक्षीण-वर्तिकाः । परिनष्टवयस्काः । ११ विधातुमिच्छया । १२ पश्यति । आगच्छति वा तिष्ठति वा । १३ राजश्रेष्ठस्य राजहंसस्य च [राजहंसास्तु ते चञ्चूचरणैः लोहितैः सिताः ।' इत्यमरः]

प्रीतिकण्टकिता भेजे पद्मिनीवार्क्कमुद्गुचम् । प्राणनाथं जगत्प्राणिस्वान्तध्वान्तनुदं विभुम् ॥१२०॥
तमुपेत्य सुखासीना स्वोचिते भद्रविष्टरे । लक्ष्मीरिव रुचिं भेजे भर्त्तुरभ्यर्णवर्त्तिनी ॥१२१॥
सा पत्यै[1] स्वप्नमालां तां यथादृष्टं न्यवेदयत् । दिव्यचक्षुरसौ[2] देवः स्तत्फलानीत्यभाषत ॥१२२॥
त्वं देवि पुत्रमाप्तासि[3] गिरीन्द्रात् चक्रवर्त्तिनम् । तस्य प्रतापितामर्क्कः शास्तीन्दुः कान्तिसम्पदम् ॥१२३॥
सरोजाक्षि सरोदृष्टेः असौ पङ्कजवासिनीम् । वोढा [4]व्यूढोरसा पुण्यलक्षणाङ्कितविग्रहः ॥१२४॥
महीग्रसनतः कृत्स्नां महीं सागरवाससम्[5] । प्रतिपालयिता देवि विश्वराट् तव पुत्रकः ॥१२५॥
सागराच्चरमाङ्गोऽसौ तरिता जन्मसागरम् । ज्यायान्पुत्रशतस्यायम् इक्ष्वाकुकुलनन्दनः ॥१२६॥
इति श्रुत्वा वचो भर्त्तुः सा तदा प्रमदोदयात् । ववृधे जलधेर्वेला यथेन्दौ समुदेष्यति ॥१२७॥
ततः सर्वार्थसिद्धिस्थो योऽसौ व्याघ्रचरः सुरः । सुबाहुरहमिन्द्रोऽतः च्युत्वा तद्गर्भमावसत् ॥१२८॥
सा गर्भमवहद् देवी देवाद् दिव्यानुभावजम् । येन नासहतार्क्कञ्च समाक्रामन्तमम्बरे ॥१२९॥
सापश्यत्स्वमुखच्छायां वीरसूरसिदर्पणे । तत्र [6]प्रातीपिकीं स्वां च छायां नासोढ मानिनी ॥१३०॥
अन्तर्वत्नीमपश्यत् तां पतिरुत्सुकया दृशा । जलगर्भामिवाम्भोदमालां काले शिखावलः[7] ॥१३१॥

दूर करनेवाले अतिशय प्रकाशमान और सबके स्वामी भगवान् वृषभदेवके समीप उस प्रकार पहुँची जिस प्रकार कमलिनी संसारके मध्यवर्ती अन्धकारको नष्ट करनेवाले और अतिशय प्रकाशमान् सूर्यके सन्मुख पहुँचती है ॥११९-१२०॥ भगवान्‌के समीप जाकर वह महादेवी अपने योग्य सिंहासन पर सुखपूर्वक बैठ गई उस समय महादेवी साक्षात् लक्ष्मीके समान सुशोभित हो रही थी ॥ १२१ ॥ तदनन्तर, उसने रात्रिके समय देखे हुए समस्त स्वप्न भगवान्‌से निवेदन किये और अवधि-ज्ञान-रूपी दिव्य नेत्र धारण करनेवाले भगवान्‌ने भी नीचे लिखे अनुसार उन स्वप्नोंका फल कहा कि ॥ १२२ ॥ हे देवि, स्वप्नोंमें जो तूने सुमेरु पर्वत देखा है उससे मालूम होता है कि तेरे चक्रवर्ती पुत्र होगा। सूर्य उसके प्रतापको और चन्द्रमा उसकी कान्ति रूपी सम्पदाको सूचित कर रहा है ॥ १२३ ॥ हे कमलनयने, सरोवरके देखनेसे तेरा पुत्र अनेक पवित्र लक्षणोंसे चिह्नितशरीर होकर अपने विस्तृत वक्षःस्थल पर कमलवासिनी—लक्ष्मीको धारण करनेवाला होगा ॥ १२४ ॥ हे देवि, पृथिवीका ग्रसा जाना देखनेसे मालूम होता है कि तुम्हारा वह पुत्र चक्रवर्ती होकर समुद्ररूपी वस्त्रको धारण करनेवाली समस्त पृथिवीका पालन करेगा ॥ १२५ ॥ और समुद्र देखनेसे प्रकट होता है कि वह चरमशरीरी होकर संसार-रूपी समुद्रको पार करनेवाला होगा। इसके सिवाय इक्ष्वाकु वंशको आनन्द देनेवाला वह पुत्र तेरे सौ पुत्रोंमें सबसे ज्येष्ठ पुत्र होगा ॥ १२६ ॥ इस प्रकार पतिके वचन सुनकर उस समय वह देवी हर्षके उदयसे ऐसी वृद्धिको प्राप्त हुई थी जैसी कि चन्द्रमाका उदय होने पर समुद्रकी वेला वृद्धिको प्राप्त होती है ॥ १२७ ॥

तदनन्तर राजा अतिगृद्धका जीव जो पहले व्याघ्र था, फिर देव हुआ, फिर सुबाहु हुआ और फिर सर्वार्थसिद्धिमें अहमिन्द्र हुआ था वहांसे च्युत होकर यशस्वती महादेवीके गर्भमें आकर निवास करने लगा ॥१२८॥ वह देवी भगवान् वृषभदेवके दिव्य प्रभावसे उत्पन्न हुए गर्भको धारण कर रही थी। यही कारण था कि वह अपने ऊपर आकाशमें चलते हुए सूर्यको भी सहन नहीं करती थी ॥१२९॥ वीर पुत्रको पैदा करनेवाली वह देवी अपने मुखकी कान्ति तलवाररूपी दर्पणमें देखती थी और अतिशय मान करनेवाली वह उस तलवारमें पड़ती हुई अपनी प्रतिकूल छायाको भी नहीं सहन कर सकती थी ॥१३०॥ जिस प्रकार वर्षाका समय आनेपर मयूर जलसे भरी हुई मेघमालाको बड़ी ही उत्सुक दृष्टिसे देखते हैं उसी प्रकार भगवान्

---

१ पुरुषाय। २ अवधिज्ञानदृष्टिः। ३ 'लुटि'। लब्धा भविष्यसि। ४ विशालम्। ५ सागरवासनाम् ब०। ६ प्रतिकूलाम्। ७ मयूरः।

रत्नगर्भेव सा भूमिः फलगर्भेव वल्लरी । तेजोगर्भेव दिक्प्राची नितरां रुचिमानशे[1] ॥१३२॥
सा मन्दं गमनं भेजे मणिकुट्टिमभूमिषु । हंसीव नूपुरोदारशिञ्जानैर्मञ्जुभाषिणी ॥१३३॥
सावष्टम्भपदन्यासैः मुद्रयन्तीव सा धराम् । स्वभुक्त्यै मन्थरं[2]यातम् अभजन् मणिभूमिषु ॥१३४॥
उदरेऽस्या वलीभङ्गो नादृश्यत यथा पुरा । अभङ्गं तत्सुतस्येव दिग्जयं सूचयन्नसौ ॥१३५॥
नीलिमा तत्कुचापाग्रम् आस्पृशद् गर्भसंभवे । गर्भस्थोऽस्याः सुतोऽन्येषां निर्दहेन्नूनमुन्नतिम्[3] ॥१३६॥
दोहदं परमोदात्तम् आहारे मन्दिमा रुचेः । सालसं गतमायासात्[4] स्रस्ताङ्गं शयनं भुवि ॥१३७॥
मुखमापाण्डु गण्डान्तं वीक्षणं[5] सालसेक्षितम् । आपाटलाधरं वक्त्रं मृत्स्नासुरभि गन्धि च ॥१३८॥
इत्यस्या गर्भचिह्नानि मनः पत्युररञ्जयन् । ववृधे च शनैर्गर्भो द्विषच्छक्तीररञ्जयन् ॥१३९॥
नवमासेष्वतीतेषु तदा सा सुषुवे सुतम् । प्राचीवार्कं स्फुरत्तेजःपरिवेषं[6] महोदयम् ॥१४०॥
शुभे दिने शुभे लग्ने योगे[7] दुरुदुराह्वये । सा प्रासोष्ट[8] सुताग्रण्यं स्फुरत्साम्राज्यलक्षणम् ॥१४१॥

वृषभदेव भी उस गर्भिणी यशस्वती देवीको बड़ी ही उत्सुक दृष्टिसे देखते थे ॥१३१॥ वह यशस्वती देवी; जिसके गर्भमें रत्न भरे हुए हैं ऐसी भूमिके समान, जिसके मध्यमें फल लगे हुए हैं ऐसी बेलके समान, अथवा जिसके मध्यमें सूर्यरूपी तेज छिपा हुआ है ऐसी पूर्व दिशाके समान अत्यन्त शोभाको प्राप्त हो रही थी ॥१३२॥ वह रत्नखचित पृथिवीपर हंसीकी तरह नूपुरोंके उदार शब्दोंसे मनोहर शब्द करती हुई मन्द मन्द गमन करती थी ॥१३३॥ मणियोंसे जड़ी हुई जमीनपर स्थिरतापूर्वक पैर रखकर मन्दगतिसे चलती हुई वह यशस्वती ऐसी जान पड़ती थी मानो पृथिवी हमारे ही भोगके लिये है ऐसा मानकर उसपर मुहर ही लगाती जाती थी ॥१३४॥ उसके उदरपर गर्भावस्थासे पहलेकी तरह ही गर्भावस्थामें भी वलीभंग अर्थात् नाभिसे नीचे पड़नेवाली रेखाओंका भंग नहीं दिखाई देता था और उससे मानो यही सूचित होता था कि उसका पुत्र अभंग नाशरहित दिग्विजय प्राप्त करेगा (यद्यपि स्त्रियोंके गर्भावस्थामें उदरकी वृद्धि होनेसे वलीभंग हो जाता है परन्तु विशिष्ट स्त्री होनेके कारण यशस्वतीके वह चिह्न प्रकट नहीं हुआ था) ॥१३५॥ गर्भधारण करनेपर उसके स्तनोंका अग्रभाग काला हो गया था और उससे यही सूचित होता था कि उसके गर्भमें स्थित रहनेवाला बालक अन्य-शत्रुओंकी उन्नतिको अवश्य ही जला देगा—नष्ट कर देगा ॥१३६॥ परम उत्कृष्ट दोहला उत्पन्न होना, आहारमें रुचिका मन्द पड़ जाना, आलस्य सहित गमन करना, शरीरको शिथिल कर जमीनपर सोना, मुखका गालों तक कुछ कुछ सफेद हो जाना, आलस भरे नेत्रोंसे देखना, अधरोष्ठका कुछ सफेद और लाल होना, और मुखसे मिट्टी-जैसी सुगंध आना। इस प्रकार यशस्वतीके गर्भके सब चिह्न भगवान् वृषभदेवके मनको अत्यन्त प्रसन्न करते थे और शत्रुओंकी शक्तियोंको शीघ्र ही विजय करता हुआ वह गर्भ धीरे धीरे बढ़ता जाता था ॥१३७–१३९॥ जिसका मण्डल देदीप्यमान तेजसे परिपूर्ण है और जिसका उदय बहुत ही बड़ा है ऐसे सूर्यको जिस प्रकार पूर्व दिशा उत्पन्न करती है उसी प्रकार नौ महीने व्यतीत होनेपर उस यशस्वती महादेवीने देदीप्यमान तेजसे परिपूर्ण और महापुण्यशाली पुत्रको उत्पन्न किया ॥१४०॥ भगवान् वृषभदेवके जन्म समयमें जो शुभ दिन, शुभ लग्न, शुभ योग, शुभ चन्द्रमा और शुभ नक्षत्र आदि पड़े थे वे ही शुभ दिन आदि उस समय भी पड़े थे, अर्थात् उस समय, चैत्र कृष्ण नवमीका दिन, मीन लग्न, ब्रह्मयोग, धन राशिका चन्द्रमा और उत्तराषाढ़नक्षत्र था। उसी दिन यशस्वती महादेवीने सम्राट्के शुभ लक्षणोंसे

१ –मानसे प०, अ०, ल०। २ गमनम्। –यातं मणिकुट्टिमभूमिषु म०, ल०। ३ अहमेवं-मन्ये। ४ गतमायासीत् प०, द०, ल०। ५ वीक्षितं सालसेक्षणम् प०, अ०, द०, स०, ल। ६ परिवेष-महोदयम् अ०, प०, स०। ७ योगेन्दुभपुराह्वये प०, म०, द०। योगे धुरुधुराह्वये अ०, स०। ८ प्रासौष्ट म०, प०, ल०।

आश्लिष्य पृथिवीं दोर्भ्यां यदसावुदपद्यत । ततोऽस्य सार्वभौमत्वं जगुर्नैमित्तिकास्तदा ॥१४२॥
सुतेन्दुनातिसौम्येन व्यद्युतच्छर्वरीव सा । बालार्केण पितुश्चासीद् दिवसस्येव दीप्तता ॥१४३॥
पितामहौ च तस्यामू प्रमोदं परमीयतुः । यया सवेलो जलधिः उदये शशिनश्शिशोः ॥१४४॥
तां तदा वर्धयामासुः पुण्याशीभिः पुरन्ध्रिकाः । सुखं प्रसूष्व पुत्राणां शतमित्यधिकोत्सवः ॥१४५॥
तदानन्दमहाभेर्यः प्रहताः कोणकोटिभिः । दध्वनुर्ध्वनदम्भोदगर्भीरं नृपमन्दिरे ॥१४६॥
तुटीपटहझल्लर्य्यः पणवास्तुणवास्तदा । सशङ्खकाहलास्तालाः प्रमदादिव सस्वनुः ॥१४७॥
तदा सुरभिरम्लानिः अपतत् कुसुमोत्करः । दिवो देवकरोन्मुक्तो भ्रमद्भ्रमरसेवितः ॥१४८॥
मृदुर्मन्दममन्देन मन्दाररजसा ततः । ववौ अवाता[1] रजसाम् अच्छटाशिशिरो मरुत् ॥१४९॥
जयेत्यमानुषी वाक्च जजृम्भे पथि वार्मुचाम् । जीवेति दिक्षु दिव्यानां[2] वाचः पप्रथिरे भृशम् ॥१५०॥
वर्द्धमानलयैर्नृत्तम् आरप्सत जिताप्सरः[3] । नर्त्तक्यः सुरनर्त्तक्यो [4]यकाभिर्हेलया जिताः ॥१५१॥
पुरवीथ्यस्तदा रेजुः चन्दनाम्भश्छटोक्षिताः । कृताभिरूपशोभाभिः प्रहसन्त्यो दिवः श्रियम् ॥१५२॥
रत्नतोरणविन्यासाः पुरे रेजुर्गृहे गृहे । इन्द्रचापतडिद्वल्ली [5]ललितं दधतोऽम्बरे ॥१५३॥

शोभायमान ज्येष्ठ पुत्र उत्पन्न किया था ॥१४१॥ वह पुत्र अपनी दोनों भुजाओंसे पृथिवीका आलिंगन कर उत्पन्न हुआ था इसलिये निमित्तज्ञानियोंने कहा था कि वह समस्त पृथिवीका अधिपति—अर्थात् चक्रवर्ती होगा ॥१४२॥ वह पुत्र चन्द्रमाके समान सौम्य था इसलिये माता–यशस्वती उस पुत्ररूपी चन्द्रमासे रात्रिके समान सुशोभित हुई थी, इसके सिवाय वह पुत्र प्रातःकालके सूर्यके समान तेजस्वी था इसलिये पिता–भगवान् वृषभदेव उस बालकरूपी सूर्यसे दिनके समान देदीप्यमान हुए थे ॥१४३॥ जिस प्रकार चन्द्रमाका उदय होनेपर अपनी बेला सहित समुद्र हर्षको प्राप्त होता है उसी प्रकार पुत्रका जन्म होनेपर उसके दादा और दादी अर्थात् महारानी मरुदेवी और महाराज नाभिराज दोनों ही परम हर्षको प्राप्त हुए थे ॥१४४॥ उस समय अधिक हर्षित हुई पतिपुत्रवती स्त्रियाँ 'तूं इसी प्रकार सैकड़ों पुत्र उत्पन्न कर' इस प्रकारके पवित्र आशीर्वादोंसे उस यशस्वती देवीको बढ़ा रही थीं ॥१४५॥ उस समय राजमन्दिरमें करोड़ों दण्डोंसे ताड़ित हुए आनन्दके बड़े बड़े नगाड़े गरजते हुए मेघोंके समान गम्भीर शब्द कर रहे थे ॥१४६॥ तुरही, दुन्दुभि, झल्लरी, सहनाई, सितार, शंख, काहल और ताल आदि अनेक बाजे उस समय मानो हर्षसे ही शब्द कर रहे थे—बज रहे थे ॥१४७॥ उस समय सुगन्धित, विकसित, भ्रमण करते हुए भौंरोंसे सेवित और देवोंके हाथसे छोड़ा हुआ फूलोंका समूह आकाशसे पड़ रहा था— बरस रहा था ॥१४८॥ कल्पवृक्षके पुष्पोंकी भारी परागसे भरा हुआ, धूलिको दूर करनेवाला और जलके छींटोंसे शीतल हुआ सुकोमल वायु मन्द मन्द बह रहा था ॥१४९॥ उस समय आकाशमें जय जय इस प्रकारकी देवोंकी वाणी बढ़ रही थी और देवियोंके 'चिरंजीव रहो' इस प्रकारके शब्द समस्त दिशाओंमें अतिशय रूपसे विस्तारको प्राप्त हो रहे थे ॥१५०॥ जिन्होंने अपने सौन्दर्यसे अप्सराओंको जीत लिया है और जिन्होंने अपनी नृत्यकलासे देवोंकी नर्तकियोंको अनायास ही पराजित कर दिया है ऐसी नृत्य करनेवाली स्त्रियाँ बढ़ते हुए तालके साथ नृत्य तथा संगीत प्रारम्भ कर रही थीं ॥१५१॥ उस समय चन्दनके जलसे सींची गई नगरकी गलियाँ ऐसी सुशोभित हो रही थीं मानो अपनी सजावटके द्वारा स्वर्गकी शोभाकी हँसी ही कर रही हों ॥१५२॥ उस समय आकाशमें इन्द्रधनुष और बिजलीरूपी लताकी सुन्दरताको धारण करते हुए रत्ननिर्मित तोरणोंकी

१ रजसामपनेता । २ देवानाम् । ३ क्रियाविशेषणम् । ४ याभिः नर्तकीभिः । ५ शोभाम् ।

कृ[1]तरङ्गवल्लौ रत्नचूर्णैर्भूमौ महोदराः । कुम्भा हिरण्मया रेजुः रौ[2]क्माब्जपिहिताननाः ॥१५४॥
तस्मिन्नृपोत्सवे सासीत् पुरी सर्वैव सोत्सवा । यथाब्धिवृद्धौ संवृद्धिं याति वेलाश्रिता नदी ॥१५५॥
न [3]दीनोऽभूत्तदा कश्चित् [4]नदीनोदकभूयसीम् । दानधारां नृपेन्द्रेभे मुक्तधारं प्रवर्षति ॥१५६॥
इति प्रमोदमुत्पाद्य पुरे सान्तःपुरे परम् । वृषभाद्रेरसौ बालः प्रालेयद्युतिरुद्ययौ ॥१५७॥
प्रमोद[5]भरतः प्रेमनिर्भरा बन्धुता[6] तदा । तमाह्वद्भरतं भावि समस्तभरताधिपम् ॥१५८॥
तन्नाम्ना भारतं वर्षमिति [7]हासीज्जनास्पदम् । हिमाद्रेरासमुद्राच्च क्षेत्रं चक्रभृतामिदम् ॥१५९॥
स तन्वन्परमानन्दं बन्धुता कुमुदाकरे । धुन्वन् वैरिकुलध्वान्तम् अवृधद् बालचन्द्रमाः ॥१६०॥
स्त[8]नन्धयन्नसौ मातुः [9]स्तन्यं गण्डूषितं मुहुः । समुद्गिरन् यशो दिक्षु विभजन्निव दिद्युते ॥१६१॥
स्मितैश्च हसितैर्मुग्धैः सर्पणैर्मणिभूमिषु । [10]मन्मनालपितैः पित्रोः स सम्प्रीतिमजीजनत् ॥१६२॥
तस्य वृद्धावभूद् वृद्धिः गुणानां सहजन्मनाम् । [11]नूनं ते तस्य सोदर्याः[12]तद्वृद्ध्यनुविधायिनः ॥१६३॥
अन्नप्राशनचौलोपनयनादीननुक्रमात् । क्रियाविधीन्विधानज्ञः स्रष्टैवास्य निसृष्टवान् ॥१६४॥
ततः क्रमभुवो बाल्यकौमारान्तर्भुवो भिदाः । सोऽतीत्य यौवनावस्थां प्रापदानन्दिनीं दशाम् ॥१६५॥

सुन्दर रचनाएँ घर घर शोभायमान हो रही थीं ॥१५३॥ जहाँ रत्नोंके चूर्णसे अनेक प्रकारके रंगावलियोंकी रचना की गई है ऐसी भूमिपर बड़े बड़े उदरवाले अनेक सुवर्णकलश रक्खे हुए थे। उन कलशोंके मुख सुवर्णकमलोंसे ढके हुए थे इसलिये वे बहुत ही शोभायमान हो रहे थे ॥१५४॥ जिस प्रकार समुद्रकी वृद्धि होनेसे उसके किनारेकी नदी भी वृद्धिको प्राप्त हो जाती है उसी प्रकार राजाके घर उत्सव होनेसे वह समस्त अयोध्या नगरी उत्सवसे सहित हो रही थी ॥१५५॥ उस समय भगवान् वृषभदेवरूपी हाथी समुद्रके जलके समान भारी दानकी धारा (सुवर्ण आदि वस्तुओंके दानकी परम्परा, पक्षमें- मद जलकी धारा) बरसा रहे थे इसलिये वहाँ कोई भी दरिद्र नहीं रहा था ॥१५६॥ इस प्रकार अन्तःपुर सहित समस्त नगरमें परम आनन्दको उत्पन्न करता हुआ वह बालकरूपी चन्द्रमा भगवान् वृषभदेवरूपी उदयाचलसे उदय हुआ था ॥१५७॥ उस समय प्रेमसे भरे हुए बन्धुओंके समूहने बड़े भारी हर्ष से, समस्त भरत क्षेत्रके अधिपति होनेवाले उस पुत्रको 'भरत' इस नामसे पुकारा था ॥१५८॥ इतिहासके जाननेवालोंका कहना है कि जहाँ अनेक आर्य पुरुष रहते हैं ऐसा यह हिमवत् पर्वतसे लेकर समुद्र पर्यन्तका चक्रवर्तियोंका क्षेत्र उसी 'भरत' पुत्रके नामके कारण भारतवर्ष रूपसे प्रसिद्ध हुआ है ॥१५९॥ वह बालकरूपी चन्द्रमा भाई-बन्धुरूपी कुमुदोंके समूहमें आनन्दको बढ़ाता हुआ और शत्रुओंके कुलरूपी अन्धकारको नष्ट करता हुआ बढ़ रहा था ॥१६०॥ माता यशस्वतीके स्तनका पान करता हुआ वह भरत जब कभी दूधके कुरलेको बार बार उगलता था तब वह ऐसा देदीप्यमान होता था मानो अपना यश ही दिशाओंमें बाँट रहा हो ॥१६१॥ वह बालक मन्द मुसकान, मनोहर हास, मणिमयी भूमिपर चलना और अव्यक्त मधुर भाषण आदि लीलाओंसे माता पिताके परम हर्षको उत्पन्न करता था ॥१६२॥ जैसे जैसे वह बालक बढ़ता जाता था वैसे वैसे ही उसके साथ साथ उत्पन्न हुए- स्वाभाविक गुण भी बढ़ते जाते थे, ऐसा मालूम होता था मानो वे गुण उसकी सुन्दरता पर मोहित होनेके कारण ही उसके साथ साथ बढ़ रहे थे ॥१६३॥ विधिको जाननेवाले भगवान् वृषभदेवने अनुक्रमसे अपने उस पुत्रके अन्नप्राशन (पहिली बार अन्न खिलाना), चौल (मुंडन) और उपनयन (यज्ञोपवीत) आदि संस्कार स्वयं किये थे ॥ १६४ ॥ तदनन्तर उस भरतने क्रम क्रमसे होनेवाली बालक और कुमार अवस्थाके बीचके अनेक भेद व्यतीत कर

---

१ कृतरङ्गावलौ अ०, प०, स०, द०, म०, ल० । २ हेमकमल । ३ दरिद्रः । ४ समुद्रोदकम् । ५ प्रमोदातिशयात् । ६ बन्धुसमूहः । ७ इहकाले । ८ पिबन् । ९ क्षीरम् । १० अव्यक्तवचनैः । ११ इव । १२ सहोदराः । सौन्दर्यात् म०, ल० ।

तदेव[1] पैतृकं[2] यातं सदाक्रान्तत्रिविष्टपम् । तदेवास्य वपुर्दीप्तं तदेव हसितं स्मितम् ॥१६६॥
सैव वाणी कला सैव सा विद्या सैव च द्युतिः । तदेव शीलं विज्ञानं सर्वमस्य तदेव तत् ॥१६७॥
इति तन्मयतां[3] प्राप्तं पुत्रं दृष्ट्वा तदा प्रजाः । आत्मा वै पुत्रनामासीद् अध्यगीषत सूनृतम् ॥१६८॥
पित्रा[4] व्याख्यातरूपादिगुणः प्रत्यक्षमन्मथः । स सम्मतः सतामासीत् स्वैर्गुणैराभि[5]गामिकैः ॥१६९॥
[6]मनोर्मनोऽर्पयन् प्रीतौ मनुरेवोद्गतः सुतः । मनो मनोभवाकारः प्रजानामध्युवास सः ॥१७०॥
जयलक्ष्म्यानपायिन्या वपुस्तस्यातिभास्वरम् । पुञ्जीकृतमिवैकत्र क्षात्रं तेजो विदिद्युते ॥१७१॥
दिव्यमानुषतामस्य व्यापयद्वपुरूर्जितम् । तेजोमयैरिवारब्धम् अणुभिर्व्यद्युतत्तराम् ॥१७२॥
तस्योत्तमाङ्गमुत्तुङ्गमौलिरत्नांशुपेशलम् । सचूलिकमिवाद्रीन्द्रशिखरं भृशमद्युतत् ॥१७३॥
क्रमोन्नतं सुवृत्तञ्च शिरोऽस्य रुरुचेतराम् । धात्रा निवेशितं दिव्यम् आतपत्रमिव श्रियः ॥१७४॥
शिरोऽस्याकुञ्चित[7]स्निग्धविनीलैक[8]जमूर्द्धजम् । विनीलरत्नविन्यस्त[9]शिरस्त्राणमिवारुचत् ॥१७५॥
ऋज्वीं मनोवचःकायवृत्तिमुद्वहतः प्रभोः । केशान्तानलिसङ्काशान् भेजे कुटिलता परम् ॥१७६॥
स्मेरं वक्त्राम्बुजं तस्य दशनाभीषुकेसरम् । बभौ सुरभिनिःश्वासपवनाहूतषट्पदम् ॥१७७॥

नेत्रोंको आनन्द देनेवाली युवावस्था प्राप्त की ॥ १६५ ॥ इस भरतका अपने पिता भगवान् वृषभदेवके समान ही गमन था, उन्हींके समान तीनों लोकोंका उल्लंघन करनेवाला देदीप्यमान शरीर था और उन्हींके समान मन्द हास्य था ॥ १६६ ॥ इस भरतकी वाणी, कला, विद्या, द्युति, शील और विज्ञान आदि सब कुछ वही थे जो कि उसके पिता भगवान् वृषभदेवके थे ॥१६७॥ इस प्रकार पिताके साथ तन्मयताको प्राप्त हुए भरत-पुत्रको देखकर उस समय प्रजा कहा करती थी कि 'पिताका आत्मा ही पुत्र नामसे कहा जाता है' [आत्मा वै पुत्रनामासीद्] यह बात बिलकुल सच है ॥ १६८ ॥ स्वयं पिताके द्वारा जिसके रूपादि गुणोंकी प्रशंसा की गई है जो साक्षात् कामदेवके समान है ऐसा वह भरत अपने मनोहर गुणोंके द्वारा सज्जन पुरुषोंको बहुत ही मान्य हुआ था ॥ १६९ ॥ वह भरत पन्द्रहवें मनु भगवान् वृषभनाथके मनको भी अपने प्रेमके आधीन कर लेता था इसलिये लोग कहा करते थे कि यह सोलहवाँ मनु ही उत्पन्न हुआ है और वह कामदेवके समान सुन्दर आकारवाला था इसलिये समस्त प्रजाके मनमें निवास किया करता था ॥ १७० ॥ उसका शरीर कभी नष्ट नहीं होनेवाली विजयलक्ष्मीसे सदा देदीप्यमान रहता था इसलिये ऐसा सुशोभित होता था मानो किसी एक जगह इकट्ठा किया हुआ क्षत्रियोंका तेज ही हो ॥ १७१ ॥ 'यह कोई अलौकिक पुरुष है' ['मनुष्य रूपधारी देव है'] इस बातको प्रकट करता हुआ भरतका बलिष्ठ शरीर ऐसा शोभायमान होता था मानो वह तेज रूप परमाणुओंसे ही बना हुआ हो ॥ १७२ ॥ अत्यन्त ऊँचे मुकुटमें लगे हुए रत्नोंकी किरणोंसे शोभायमान उसका मस्तक चूलिका सहित मेरुपर्वतकी शिखरके समान अतिशय शोभायमान होता था ॥ १७३ ॥ क्रम क्रमसे ऊँचा होता हुआ उसका गोल शिर ऐसा अच्छा शोभायमान होता था मानो विधाताने [वक्षःस्थल पर रहनेवाली] लक्ष्मीके लिये छत्र ही बनाया हो ॥ १७४ ॥ कुछ कुछ टेढ़े, स्निग्ध, काले और एक साथ उत्पन्न हुए केशोंसे शोभायमान उसका मस्तक ऐसा जान पड़ता था मानो उसपर इन्द्रनील मणिकी बनी हुई टोपी ही रखी हो ॥ १७५ ॥ भरत अपने मन वचन कायकी प्रवृत्तिको बहुत ही सरल रखता था इसलिये जान पड़ता था कि उनकी कुटिलता उसके भ्रमरके समान काले केशोंके अन्त भागमें ही जाकर रहने-लगी ॥ १७६ ॥ दाँतोंकी किरणें रूपी केशरसे सहित और सुगन्धित श्वासोच्छ्वासकी पवनके द्वारा भ्रमरोंका आह्वान करनेवाला उसका प्रफुल्लित मुखकमल बहुत ही शोभायमान होता था ॥१७७॥

१ पितृसम्बन्धि। २ गमनम्। ३ पितृस्वरूपताम्। ४ पित्रा सह। ५ –राभिरामकैः अ०, प०, स०, द०। ६ पुरोः। ७ ईषद्वक्रः। ८ युगपज्जातम्। ह्रस्वोन्नतरहिता इत्यर्थः। ९ रचितम्।

मुखमस्य सुखालोकम् अखण्डपरिमण्डलम् । शशाङ्कमण्डलस्याधात् लक्ष्मी[1]मक्षूणकान्तिकम् ॥१७८॥
कर्णाभरणदी[2]प्रांशु परिवेषेण दिद्युते । मुखेन्दुरस्य दन्तोस्र[3]चन्द्रिकामभितः किरन् ॥१७९॥
रवौ दीप्तिर्विधौ कान्तिः विकासश्च महोत्पले । इति व्यस्ता[4] गुणाः प्रापुः तदास्ये [5]सहयोगिताम् ॥१८०॥
शशी परिक्षयी पद्मः सङ्कोचं यात्यनुक्षपम्[6] । [7]सदाविकासि पूर्णञ्च तन्मुखं क्वोपमीयते ॥१८१॥
जितं सदा विकासिन्या तन्मुखाब्जस्य शोभया । प्रस्थितं वनवासाय[8] मन्ये वनजमुज्ज्वलम्[9] ॥१८२॥
[10]पट्टबन्धोचितस्यास्य ललाटस्या[11]हतद्युतेः । तिग्मांशोरंशवो नूनं [12]विनिर्माणाङ्गतां गताः ॥१८३॥
विलोक्य विलसत्कान्ती तत्कपोलौ हिमद्युतिः । स्वपराजयनिर्वेदाद् गतः शङ्के कलङ्किताम् ॥१८४॥
भ्रूलते ललिते अस्य लीलां दधतुरूर्जिताम् । वैजयन्त्याविवोत्क्षिप्ते मदनेन जगज्जये ॥१८५॥
मुखप्राङ्गणपुष्पोपहारः शारित[13]दिङ्मुखः । नेत्रोत्पलविकासोऽस्य पप्रथे प्रथयन् मुदम् ॥१८६॥
तरलापाङ्गभासास्य सश्रुतावपि लङ्घितौ । कर्णौ लोलात्मनां प्रायो नानुल्लङ्घ्योऽस्ति कश्चन ॥१८७॥

अथवा उसका मुख पूर्ण चन्द्रमण्डलकी शोभा धारण कर रहा था क्योंकि जिस प्रकार पूर्ण चन्द्रमण्डलके देखनेसे सुख होता है उसी प्रकार उसका मुख देखनेसे भी सबको सुख होता था जिस प्रकार पूर्ण चन्द्रमण्डल अखण्ड गोलाईसे सहित होता है उसी प्रकार उसका मुख भी अखण्ड गोलाईसे सहित था और जिस प्रकार पूर्ण चन्द्रमण्डल अखण्ड कान्तिसे युक्त होता है उसी प्रकार उसका मुख भी अखण्डकान्तिसे युक्त था ॥ १७८ ॥ चारों ओर दाँतोंकी किरणेंरूपी चाँदनीको फैलाता हुआ उसका मुखरूपी चन्द्रमा कर्णभूषणकी देदीप्यमान किरणोंके गोल परिमण्डलसे बहुत ही शोभायमान होता था ॥ १७९ ॥ सूर्यमें दीप्ति, चन्द्रमामें कान्ति और कमलमें विकास इस प्रकार ये सब गुण अलग अलग रहते हैं परन्तु भरतके मुखपर वे सब गुण सहयोगिताको प्राप्त हुए थे अर्थात् साथ साथ विद्यमान रहते थे ॥ १८० ॥ चन्द्रमा क्षयसे सहित है और कमल प्रत्येक रात्रिमें संकोचको प्राप्त होता रहता है परन्तु उसका मुख सदा विकसित रहता था और कभी संकोचको प्राप्त नहीं होता था—पूर्ण रहता था इसलिये उसकी उपमा किसके साथ दी जावे ? उसका मुख सर्वथा अनुपम था ॥ १८१ ॥ ऐसा मालूम होता है कि उसका मुखकमल सदा विकसित रहनेवाली लक्ष्मीसे मानो हार ही गया था अतएव वह वन अथवा जलमें निवास करनेके लिये प्रस्थान कर रहा था ॥ १८२ ॥ पट्टबन्धके उचित और अतिशय कान्तियुक्त उसके ललाटके बननेमें अवश्य ही सूरजकी किरणें सहायक सिद्ध हुई थीं ॥ १८३ ॥ शोभायमान कान्तिसे युक्त उसके दोनों कपोल देखकर चन्द्रमा अवश्य ही पराजित हो गया था और इसलिये ही मानो विरक्त होकर वह सकलंक अवस्थाको प्राप्त हुआ था ॥ १८४ ॥ उसकी दोनों भौंहरूपी सुंदर लताएँ ऐसी अच्छी शोभा धारण कर रही थीं मानो जगत्को जीतनेके समय कामदेवके द्वारा फहराई हुई दो पताकाएँ ही हों ॥ १८५ ॥ उसके नेत्ररूपी कमलोंका विकास मुखरूपी आँगनमें पड़े हुए फूलोंके उपहारके समान शोभायमान हो रहा था तथा समस्त दिशाओंको चित्र विचित्र कर रहा था और इसीलिये वह आनन्दको विस्तृत कर अतिशय प्रसिद्ध हो रहा था ॥ १८६ ॥ उसके चञ्चल कटाक्षोंकी आभाने श्रवण क्रियासे युक्त (पक्षमें उत्तम उत्तम शास्त्रोंके ज्ञानसे युक्त) उसके दोनों कानोंका उल्लंघन कर दिया था सो ठीक ही है चञ्चल अथवा सतृष्ण हृदयवाले

१ –मक्षुण्ण– म०, ल० । २ –दीप्तांशु– अ०, म०, द०, स० । ३ दन्तांशु– द०, म० । उस्रः किरणः । ४ पृथग्भूताः । ५ सहवासिताम् । ६ रात्रिं प्रति । ७ नित्यविकासि । ८ जलवासाय । ९ –मुद्विजत् स०– मुद्वीजम् प०, अ०, म०, ल० । १० 'पट्टबन्धाञ्चितस्यास्य' मु० पुस्तके पाठान्तरम् । ११ हटद्द्युतेः द०, म०, स० । १२ उपादानकारणताम् । १३ सारितदिङ्मुखः ल० । पूरितदिङ्मुखः अ०, स०, द० । शारित कर्बुरित ।

दृगर्धवीक्षितैस्तस्य शरैरिव मनोभुवः । कामिन्यो हृदये विद्धा दधुः सद्योऽति[1]रक्तताम् ॥१८८॥
रत्नकुण्डलयुग्मेन गण्डपर्यन्तचुम्बिना । [2]प्रतिमानं [3]श्रुतार्थस्य विधित्सन्निव सोऽद्युतत् ॥१८९॥
मदनाग्नेरिवोद्बोध[4]नालिका ललिताकृतिः । नासिकास्य बभौ किञ्चिद् अवाग्रा[5] शुकतुण्डरुक् ॥१९०॥
बभौ पयःकणाकीर्णविद्रुमाङ्कुरसच्छविः । सिक्तस्तस्यामृतेनेव स्मितांशुच्छु[6]रितो[7]ऽधरः ॥१९१॥
कण्ठे हारलतारम्ये काप्यस्य श्रीरभूद् विभोः । प्रत्यग्रोद्भिन्नमुक्तौघ[8]कम्बुग्रीवोपमोचिता ॥१९२॥
कण्ठाभरणरत्नांशु [9]संभृतं तदुरःस्थलम् । रत्नद्वीपश्रियं बभ्रे[10] हारवल्लीपरिष्कृतम् ॥१९३॥
स बभार भुजस्तम्भपर्यन्तपरिलम्बिनीम् । लक्ष्मीदेव्या इवान्दोलवल्लरीं हारवल्लरीम् ॥१९४॥
जयश्रीर्भुजयोरस्य बबन्ध प्रेमनिघ्नताम् । केयूरकोटिसंघट्टकिणीभूतांसपीठयोः ॥१९५॥
बाहुदण्डेऽस्य भूलोकमानदण्ड इवायते । कुलशैलास्थया नूनं तेने लक्ष्मीः परां [11]धृतिम् ॥१९६॥
शङ्खचक्रगदाकूर्मझषादिशुभलक्षणैः । रेजे हस्ततलं तस्य नभस्स्थलमिवोडुभिः ॥१९७॥
अंसावलम्बिना ब्रह्मसूत्रेणासौ दधे श्रियम् । हिमाद्रिरिव गाङ्गेन स्रोतसोत्सङ्गसङ्गिना ॥१९८॥

प्रायः किसका उल्लंघन नहीं करते? अर्थात् सभीका उल्लंघन करते हैं ॥ १८७ ॥ कामदेवके बाणोंके समान उसके अर्धनेत्रों (कटाक्षों) के अवलोकनसे हृदयमें घायल हुई स्त्रियाँ शीघ्र ही अतिशय रक्त हो जाती थीं। भावार्थ—जिस प्रकार बाणसे घायल हुई स्त्रियाँ अतिशय रक्त अर्थात् अत्यंत खूनसे लाल लाल हो जाती हैं उसी प्रकार उसके आधे खुले हुए नेत्रोंके अवलोकनसे घायल हुई स्त्रियाँ अतिशय रक्त अर्थात् अत्यन्त आसक्त हो जाती थीं॥ १८८। वह गालोंके समीप भागतक लटकनेवाले रत्नमयी कुण्डलोंके जोड़ेसे ऐसा शोभायमान होता था मानो शास्त्र और अर्थकी तुलनाका प्रमाण ही करना चाहता हो ॥ १८९ ॥ कुछ नीचेकी ओर झुकी हुई और तोतेकी चोंचके समान लालवर्ण उसकी सुन्दर नाक ऐसी शोभायमान हो रही थी मानो कामदेवरूपी अग्निको प्रज्वलित करनेके लिये फूँकनेकी नाली ही हो ॥ १९० ॥ जिस प्रकार जलके कणोंसे व्याप्त हुआ मूँगाका अंकुर शोभायमान होता है उसी प्रकार मन्द हास्य की किरणोंसे व्याप्त हुआ उसका अधरोष्ठ ऐसा शोभायमान होता था मानो अमृतसे ही सींचा गया हो ॥ १९१ ॥ राजकुमार भरतके हाररूपी लतासे सुन्दर कंठमें कोई अनोखी ही शोभा थी वह नवीन फूले हुए पुष्पोंके समूहसे सुशोभित शंखके कंठकी उपमा देने योग्य हो रही थी ॥ १९२ ॥ कंठाभरणमें लगे हुए रत्नोंकी किरणोंसे भरा हुआ उसका वक्षःस्थल हाररूपी बेलसे घिरे हुए रत्नद्वीपकी शोभा धारण कर रहा था ॥ १९३ ॥ वह अपनी भुजारूप खंभोंके पर्यन्त भागमें लटकती हुई जिस हाररूपी लताको धारण कर रहा था वह ऐसी मालूम होती थी मानो लक्ष्मीदेवीके झूलाकी लता (रस्सी) ही हो ॥ १९४ ॥ उसकी दोनों भुजाओंके कन्धों पर बाजूबंदके संघट्टनसे भट्टें पड़ी हुई थीं और इसलिये ही विजयलक्ष्मीने प्रेमपूर्वक उसकी भुजाओंकी आधीनता स्वीकृत की थी ॥ १९५ ॥ उसके बाहुदण्ड पृथिवीको नापनेके दण्डके समान बहुत ही लम्बे थे और उन्हें कुलाचल समझकर उन पर रहनेवाली लक्ष्मी परम धैर्यको विस्तृत करती थी ॥१९६॥ जिस प्रकार अनेक नक्षत्रोंसे आकाश शोभायमान होता है उसी प्रकार शंख, चक्र, गदा, कूर्म और मीन आदि शुभ लक्षणोंसे उसका हस्त-तल शोभायमान था ॥ १९७ ॥ कन्धेपर लटकते हुए यज्ञोपवीतसे वह भरत ऐसा सुशोभित हो रहा था जैसा कि ऊपर

१ अनुरागितां रुधिरतां च । २ तुलाप्रमितिम् । ३ श्रुतं च अर्थं च श्रुतार्थं तस्य । ४ प्रकटीकरणनालिका । ५ नता । ६ व्याप्तः । ७ -च्छुरिताधरः स० । -स्फुरितोऽधरः प०, द० । ८ -पुष्पौघ- प०, अ०, म०, स० । ९ सहितम् । १० दध्रे । ११ स्थितिम् ।

हसन्निवाधरं कायम् ऊर्ध्वकायोऽस्य दिद्युते । कटकाङ्गदकेयूरहाराद्यैः स्वैर्विभूषणैः ॥१९९॥
वर्णिते पूर्वकायेऽस्य कायो ध्यार्वर्णितोऽधरः । यथोपरि तथाधश्च ननु श्रीः कल्पपादपे ॥२००॥
पुनरुक्तं तथाप्यस्य क्रियते वर्णनादरः । पङ्क्तिभेदे महान् दोषः स्यादित्युद्देशमात्रतः ॥२०१॥
लावण्यरसनिष्यन्द[1]वाहिनीं [2]नाभिकूपिकाम् । स बभारापतत्कायगन्धेभस्येव [3]पद्धतिम् ॥२०२॥
स [4]शाररसनोल्लासिदुकूलं जघनं दधौ । सेन्द्रचापशरन्मेघनितम्बमिव मन्दरः ॥२०३॥
पीवरौ स बभारोरू युक्तायामौ कनद्युतो । मनोभुवेव विन्यस्तौ स्तम्भौ स्वे वासवेश्मनि ॥२०४॥
जङ्घे सुरुचिराकारे चारुकान्ती दधेऽधिराट् । [5]उद्वर्त्त्य [6]कणयेनेव घटिते चित्तजन्मना ॥२०५॥
तत्पदाम्बुजयोर्युग्मम् अध्युवासानपायिनी । लक्ष्मीभृङ्गाङ्गनेवाविर्भवदङ्गुलिपत्रकम् ॥२०६॥
तत्क्रमौ रेजतुः कान्त्या [7]लक्ष्मीं जित्वाम्बुजन्मनः[8] । प्रहासमिव तन्वानौ नखोद्योतैर्विसारिभिः ॥२०७॥
चक्रच्छत्रासिदण्डादिरत्नान्यस्य पदाब्जयोः । लग्नानि लक्षणव्याजात् पूर्वसेवामिव व्यधुः ॥२०८॥
समाक्रान्तधराचक्रः क्रमयोरेव विक्रमः[9] । [10]सर्वाङ्गीणस्तु केनास्य [11]सोढपूर्वः स मानिनः[12] ॥२०९॥

बहते हुए गंगा नदीके प्रवाहसे हिमालय सुशोभित रहता है ॥१९८॥ उसके शरीरका ऊपरी भाग कड़े, अनन्त, बाजूबन्द और हार आदि अपने अपने आभूषणोंसे ऐसा देदीप्यमान हो रहा था मानो अपने अधोभागकी ओर हँस ही रहा हो ॥१९९॥ राजकुमार भरतके शरीरके ऊपरी भागका जैसा कुछ वर्णन किया गया है वैसा ही उसके नीचेके भागका वर्णन समझ लेना चाहिए क्योंकि कल्पवृक्षकी शोभा जैसी ऊपर होती है वैसी ही उसके नीचे भी होती है ॥२००॥ यद्यपि ऊपर लिखे अनुसार उसके अधोभागका वर्णन हो चुका है तथापि उद्देशके अनुसार पुनरुक्त रूपसे उसका वर्णन फिर भी किया जाता है क्योंकि वर्णन करते करते समूहमेंसे किसी एक भागका छोड़ देना भी बड़ा भारी दोष है ॥२०१॥ लावण्यरूपी रसके प्रवाहको धारण करनेवाली उसकी नाभिरूपी कूपिका ऐसी सुशोभित होती थी मानो आनेवाले कामदेवरूपी मदोन्मत्त हाथीका मार्ग ही हो ॥ २०२ ॥ वह भरतश्रेष्ठ करधनीसे सुशोभित सफेद धोतीसे युक्त जघन भागको धारण कर रहा था जिससे ऐसा मालूम होता था मानो इन्द्रधनुषसे सहित शरद् ऋतुके बादलोंसे युक्त नितम्बभाग (मध्यभाग) को धारण करनेवाला मेरु पर्वत ही हो ॥२०३॥ उसके दोनों ऊरू अत्यन्त स्थूल और सुदृढ़ थे, उनकी लम्बाई भी यथायोग्य थी, और उनका वर्ण भी सुवर्णके समान पीला था इसलिये वे ऐसे मालूम होते थे मानो कामदेवने अपने मन्दिरमें दो खंभे ही लगाये हों ॥ २०४ ॥ उस भरतकी दोनों जंघाएँ भी अतिशय मनोहर आकारवाली और सुन्दर कान्तिकी धारक थीं तथा ऐसी मालूम होती थीं मानो कामदेवने उन्हें हथियारसे छीलकर गोल ही कर ली हों ॥ २०५ ॥ उसके दोनों चरण प्रकट होते हुए अंगुलिरूपी पत्तोंसे सहित कमलके समान सुशोभित होते थे और उनमें कभी नष्ट नहीं होनेवाली लक्ष्मी भ्रमरीके समान सदा निवास करती थी ॥ २०६ ॥ उसके दोनों ही पैर ऐसे शोभायमान हो रहे थे मानो अपनी कान्तिसे कमलकी शोभा जीतकर अपने फैलते हुए नखोंके प्रकाशसे उसकी हँसी ही कर रहे हों ॥ २०७ ॥ उसके चरण कमलोंमें चक्र, छत्र, तलवार, दण्ड आदि चौदह रत्नोंके चिह्न बने हुए थे और वे ऐसे जान पड़ते थे मानो ये चौदह रत्न, लक्षणोंके छलसे भावी चक्रवर्तीकी पहिलेसे ही सेवा कर रहे हों ॥ २०८ ॥ केवल उसके चरणोंका पराक्रम समस्त पृथिवीमण्डल पर आक्रमण करनेवाला था, फिर भला उस अभिमानी भरतके सम्पूर्ण शरीरका पराक्रम

१ प्रवाहः । २ रसकूपिकाम् म०, ल० । ३ मार्गम् । ४ शार नानावर्ण । साररसनो प०, अ०, ल० । ५ उत्तेजितं कृत्वा । ६ आयुधविशेषेण । कनयेनेव अ० । ७ शोभाम् । ८ –कमलस्य । ९ गमनं पराक्रमश्च । १० सर्वावयवसमुत्पन्नः विक्रमः । ११ सोढुं क्षमः । १२ मानिनः द०, प०, म० ।

चरमाङ्गतयैवास्य वर्णितं बलमाङ्गिकम् । [1]सात्त्विकं तु बलं बाह्यैः लिङ्गैर्दिग्विजयादिभिः ॥२१०॥
यद्बलं चक्रभृत्क्षेत्रवर्तिनां नृसुधाशिनाम् । ततोऽधिकगुणं तस्य बभूव भुजयोर्बलम् ॥२११॥
रूपानुरूपमेवास्य [2]बभूवे गुणसम्पदा । गुणैर्विमुच्यते जातु नहि तादृग्विधं वपुः ॥२१२॥
यत्रा[3]कृतिर्गुणास्तत्र वसन्तीति न संशयः । यतोऽस्यानीदृगाकारो गुणैरेत्य स्वयं वृतः ॥२१३॥
सत्यं शौचं क्षमा त्यागः प्रज्ञोत्साहो दया[4] दमः । प्रशमो विनयश्चेति गुणाः [5]सत्त्वानुषङ्गिणः ॥२१४॥
[6]वपुः कान्तिश्च दीप्तिश्च लावण्यं प्रियवाक्यता । कलाकुशलता चेति शरीरान्वयिनो गुणाः ॥२१५॥
निसर्गरुचिराकारो गुणैरेभिर्विभूषितः । स रेजे नितरां यद्वत् मणिः संस्कारयोगतः ॥२१६॥
[7]अप्राकृताकृतिर्दिव्यमनुष्यो महसां निधिः । लक्ष्म्याः पुञ्जोऽयमित्युच्चैः बभूवाद्भुतचेष्टितः ॥२१७॥
रूपसम्पदमित्युच्चैः दृष्ट्वा नान्यत्रभाविनीम् । जनाः पुरातनीमस्य शशंसुः पुण्यसम्पदम् ॥२१८॥
वपुरारोग्यमैश्वर्यं धनर्द्धिः कामनीयकम् । बलमायुर्यशो मेधा वाक्सौभाग्यं विदग्धता ॥२१९॥
इति यावान् जगत्यस्मिन् पुरुषार्थः[8] सुखोचितः । स सर्वोऽभ्युदयः पुण्यपरिपाकादिहाङ्गिनाम् ॥२२०॥
न विनाभ्युदयः पुण्याद् अस्ति कश्चन पुष्कलः । तस्मादभ्युदयं प्रेप्सुः पुण्यं सञ्चिनुयाद् बुधः ॥२२१॥

कौन सहन कर सकता था ॥ २०९ ॥ उसके शरीर-सम्बन्धी बलका वर्णन केवल इतने ही से हो जाता है कि वह चरम शरीरी था अर्थात् उसी शरीरसे मोक्ष जानेवाला था और उसके आत्मा सम्बन्धी बलका वर्णन दिग्विजय आदि बाह्य चिह्नोंसे हो जाता है ॥ २१० ॥ चक्रवर्तीके क्षेत्रमें रहनेवाले समस्त मनुष्य और देवोंमें जितना बल होता है उससे कईगुना अधिक बल चक्रवर्तीकी भुजाओंमें था ॥ २११ ॥ उस भरतके रूपके अनुरूप ही उसमें गुणरूपी सम्पदा विद्यमान थी सो ठीक ही है क्योंकि गुणोंसे वैसा सुन्दर शरीर कभी नहीं छोड़ा जा सकता ॥ २१२ ॥ 'जहाँ सुन्दर आकार है वहीं गुण निवास करते हैं' इस लोकोक्तिमें कुछ भी संशय नहीं है क्योंकि गुणोंने भरतके उपमारहित—सुन्दर शरीरको स्वयं आकर स्वीकृत किया था ॥ २१३ ॥ सत्य, शौच, क्षमा, त्याग, प्रज्ञा, उत्साह, दया, दम, प्रशम और विनय ये गुण सदा उसकी आत्माके साथ साथ रहते थे ॥ २१४ ॥ शरीरकी कान्ति, दीप्ति, लावण्य, प्रिय वचन बोलना, और कलाओंमें कुशलता ये उसके शरीरसे सम्बन्ध रखनेवाले गुण थे ॥ २१५ ॥ जिस प्रकार स्वभावसे ही सुन्दर मणि संस्कारके योगसे अत्यन्त सुशोभित हो जाता है उसी प्रकार स्वभावसे ही सुन्दर आकार वाला भरत ऊपर लिखे हुए गुणोंसे और भी अधिक सुशोभित हो गया था ॥ २१६ ॥ वह भरत एक दिव्य मनुष्य था उसकी आकृति भी असाधारण थी वह तेजका खजाना था, और उसकी सब चेष्टायें आश्चर्य करनेवाली थीं इसलिये वह लक्ष्मीके अतिशय ऊंचे पुंजके समान शोभायमान होता था ॥ २१७ ॥ दूसरी जगह नहीं पाई जानेवाली उसकी उत्कृष्ट रूपसम्पदा देखकर लोग उसके पूर्वभव-सम्बन्धी पुण्यसंपदाकी प्रशंसा करते थे ॥ २१८ ॥ सुन्दर शरीर, नीरोगता, ऐश्वर्य, धन-सम्पत्ति, सुन्दरता, बल, आयु, यश, बुद्धि, सर्व-प्रिय वचन और चतुरता आदि इस संसारमें जितना कुछ सुखका कारण पुरुषार्थ है वह सब अभ्युदय कहलाता है और वह सब संसारी जीवोंको पुण्यके उदयसे प्राप्त होता है ॥२१९-२२०॥ पुण्यके बिना किसी भी बड़े अभ्युदयकी प्राप्ति नहीं होती, इसलिये जो विद्वान् पुरुष अभ्युदय

१ आत्मनि भवम् मनोजनितमित्यर्थः । २ गुणसम्पद् बभूव । ३ स्वरूपत्वम् । ४ दयादमौ प० । ५ सत्त्वाविनाभाविनः । ६ वपुः पुष्टिः । ७ असाधारणाकृतिः । ८ पुरुषार्थसुखोचितः अ०, ब०, स० ।

शार्दूलविक्रीडितम्

इत्यानन्दपरम्परां प्रतिदिनं संवर्द्धयन् स्वैर्गुणैः पित्रोर्बन्धुजनस्य च प्रशमयँल्लोकस्य दुःखासिकाम् ।
नाभेयोदयभूधरादधरित[1]क्षोणीभरा[धरा]दुद्गतः[2] प्रालेयांशुरिवाबभौ भरतराड् भूलोकमुद्भासयन् ॥२२२॥
श्रीमान् हेमशिलाघनैरपघनैः[3] प्रांशुः[4] प्रकृत्या गुरुः [5]पादाक्रान्तधरातलो गुरुभरं वोढुं क्षमायाः क्षमः ।
हारं निर्झरचारुकान्तिमुरसा बिभ्रत्तटस्पर्द्धिना चक्रार्कोदयभूधरः स रुरुचे मौलीद्धकूटोद्धुरः[6] ॥२२३॥
संपश्यन्नयनोत्सवं सुरुचिरं तद्वक्त्रमप्राकृतं संशृण्वन् कलनिक्कणं श्रुतिसुखं सप्रश्रयं तद्वचः ।
आश्लिष्यन् प्रणतोत्थितं मुहुरमुं स्वोत्सङ्गमारोपयन् श्रीमान्नाभिसुतः परां धृतिमगाद् वर्त्स्यत् जनश्रीर्विभुः[7] २२४

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवत्कुमारकालयशस्वतीसुनन्दाविवाह-भरतोत्पत्तिवर्णनं नाम पञ्चदशं पर्व ॥१५॥

प्राप्त करना चाहते हैं उन्हें पहले पुण्यका संचय करना चाहिये ॥ २२१ ॥ इस प्रकार वह भरत चन्द्रमाके समान शोभायमान हो रहा था क्योंकि जिस प्रकार चन्द्रमा अपने शीतलता, सुभगता आदि गुणोंसे सबके आनन्दको परम्पराको बढ़ाता है उसी प्रकार वह भरत भी अपने दया, उदारता, नम्रता आदि गुणोंसे माता पिता तथा भाईजनोंके आनन्दकी परम्पराको प्रतिदिन बढ़ाता रहता था, चन्द्रमा जिस प्रकार लोगोंकी दुःखमय परिस्थितिको शान्त करता है उसी प्रकार वह भरत भी लोगोंकी दुःखमय परिस्थितिको शान्त करता था, चन्द्रमा जिस प्रकार समस्त पर्वतोंको नीचा करनेवाले पूर्वाचलसे उदित होता है उसी प्रकार वह भरत भी समस्त राजाओंको नीचा दिखानेवाले भगवान् ऋषभदेवरूपी पूर्वाचलसे उदित हुआ था और चन्द्रमा जिस प्रकार समस्त भूलोकको प्रकाशित करता है उसी प्रकार भरत भी समस्त भूलोकको प्रकाशित करता था ॥ २२२ ॥ अथवा वह भरत, चक्ररूपी सूर्यको उदय करनेवाले उदयाचलके समान सुशोभित होता था क्योंकि जिस प्रकार उदयाचल पर्वत सुवर्णमय शिलाओंसे सान्द्र अवयवोंसे शोभायमान होता है उसी प्रकार वह भरत भी सुवर्णके समान सुन्दर मजबूत शरीरसे शोभायमान था, जिस प्रकार उदयाचल ऊँचा होता है उसी प्रकार वह भरत भी ऊँचा (उदार) था, उदयाचल जिस प्रकार स्वभावसे ही गुरु-भारी होता है उसी प्रकार वह भरत भी स्वभावसे ही गुरु (श्रेष्ठ) था, उदयाचल पर्वतने जिस प्रकार अपने समीपवर्ती छोटे छोटे पर्वतोंसे पृथ्वीतल पर आक्रमण कर लिया है उसी प्रकार भरतने भी अपने पाद अर्थात् चरणोंसे दिग्विजयके समय समस्त पृथिवीतल पर आक्रमण किया था, उदयाचल जिस प्रकार पृथिवीके विशाल भारको धारण करनेके लिये समर्थ है उसी प्रकार भरत भी पृथिवीका विशाल भार धारण करनेके लिये (व्यवस्था करनेके लिये) समर्थ था, उदयाचल जिस प्रकार अपने तट भागपर निर्झरनोंकी सुन्दर कान्ति धारण करता है उसी प्रकार भरत भी तटके साथ स्पर्धा करनेवाले अपने वक्षःस्थल पर हारोंकी सुन्दर कान्ति धारण करता था, और उदयाचल पर्वत जिस प्रकार देदीप्यमान शिखरों से सुशोभित रहता है उसी प्रकार वह भरत भी अपने प्रकाशमान मुकुटसे सुशोभित रहता था ॥ २२३ ॥ जिन्हें अरहन्त पदकी लक्ष्मी प्राप्त होनेवाली है ऐसे भगवान् वृषभदेव, नेत्रोंको आनन्द देनेवाले, अत्यन्त सुन्दर और असाधारण भरतके मुखको देखते हुए, कानोंको सुख देनेवाले तथा विनय सहित कहे हुए उसके मधुर वचनोंको सुनते हुए, प्रणाम करनेके बाद उठे हुए भरतका बार बार आलिंगन कर उसे अपनी गोदमें बैठालते हुए परम संतोषको प्राप्त होते थे ॥ २२४ ॥

इस प्रकार आर्ष नामसे प्रसिद्ध भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टिलक्षण महापुराण संग्रहमें भगवान्का कुमारकाल, यशस्वती और सुनन्दाका विवाह तथा भरतकी उत्पत्तिका वर्णन करनेवाला पन्द्रहवां पर्व समाप्त हुआ ॥ १५ ॥

---

१ अधःकृतभूपतेः अधःकृतभूधराच्च । २ –क्षोणीधराद्दुद्गतः प०, म०, ल० । ३ अवयवैः । ४ उन्नतः । ५ चरणाक्रान्तं प्रत्यन्तपर्वताक्रान्तं च । ६ अधिकः । ७ प्रभुः स० ।

षोडशं पर्व

अथ क्रमाद्यशस्वत्यां[1] जाताः स्रष्टुरिमे सुताः । अवतीर्य दिवो मूर्ध्नः तेऽहमिन्द्राः पुरोहिताः ॥१॥
पीठो वृषभसेनोऽभूत् [2]कनीयान् भरतेश्वरात् । महापीठोऽभवत्तस्य सोऽनन्तविजयोऽनुजः ॥२॥
विजयोऽनन्तवीर्योऽभूद् वैजयन्तोऽच्युतोऽभवत् । जयन्तो वीर इत्यासीद् वरवीरोपराजितः ॥३॥
इत्येकान्नशतं[3] पुत्रा बभूवुर्वृषभेशिनः । भरतस्यानुजन्मानश्चरमाङ्गा महौजसः ॥४॥
ततो ब्राह्मीं यशस्वत्यां ब्रह्मा समुदपादयत् । कलामिवापराशायां [4]ज्योत्स्नपक्षो[5]ऽमलां विधोः ॥५॥
सुनन्दायां महाबाहुः अहमिन्द्रो [6]दिवोऽग्रतः । च्युत्वा बाहुबलीत्यासीत् कुमारोऽमरसन्निभः ॥६॥
वज्रजङ्घभवे यास्य[7] भगिन्यासीदनुन्दरी[8] । सा सुन्दरीत्यभूत् पुत्री वृषभस्यातिसुन्दरी ॥७॥
सुनन्दा सुन्दरीं पुत्रीं पुत्रं बाहुबलीशिनम् । लब्ध्वा रुचिं परां भेजे[9] प्राचीवार्कं सह त्विषा ॥८॥
तत्काल[10]कामदेवोऽभूद् युवा बाहुबली बली । रूपसम्पदमुत्तुङ्गां दधानोऽसुमतां मताम् ॥९॥
तस्य तद्रूपमन्यत्र समदृश्यत न क्वचित् । कल्पद्रुमात् किमन्यत्र दृश्यते हारिभूषणम् ॥१०॥

अथानन्तर पहले जिनका वर्णन किया जा चुका है ऐसे वे सर्वार्थसिद्धिके अहमिन्द्र स्वर्गसे अवतीर्ण होकर क्रमसे भगवान् वृषभदेवकी यशस्वती देवीमें नीचे लिखे हुए पुत्र उत्पन्न हुए ॥१॥ भगवान् वृषभदेवकी वज्रनाभि पर्यायमें जो पीठ नामका भाई था वह अब वृषभसेन नामका भरतका छोटा भाई हुआ जो राजश्रेष्ठीका जीव महापीठ था वह अनन्तविजय नामका वृषभसेनका छोटा भाई हुआ ॥२॥ जो विजय नामका व्याघ्रका जीव था वह अनन्त-विजयसे छोटा अनन्तवीर्य नामका पुत्र हुआ, जो वैजयन्त नामका शूकरका जीव था वह अनन्तवीर्यका छोटा भाई अच्युत हुआ, जो वानरका जीव जयन्त था वह अच्युतसे छोटा वीर नामका भाई हुआ और जो नेवलाका जीव अपराजित था, वह वीर से छोटा वरवीर हुआ ॥३॥ इस प्रकार भगवान् वृषभदेवके यशस्वती महादेवीसे भरतके पीछे जन्म लेनेवाले निन्यानवे पुत्र हुए, वे सभी पुत्र चरमशरीरी तथा बड़े प्रतापी थे ॥४॥ तदनन्तर जिस प्रकार शुक्लपक्ष-पश्चिम दिशामें चन्द्रमाकी निर्मल कलाको उत्पन्न (प्रकट) करता है उसी प्रकार ब्रह्मा—भगवान् आदिनाथने यशस्वती नामक महादेवीमें ब्राह्मी नामकी पुत्री उत्पन्न की ॥५॥ आनन्द पुरोहितका जीव जो पहले महाबाहु था और फिर सर्वार्थसिद्धिमें अहमिन्द्र हुआ था, वह वहाँसे च्युत होकर भगवान् वृषभदेवकी द्वितीय पत्नी सुनन्दाके देवके समान बाहुबली नामका पुत्र हुआ ॥६॥ वज्रजंघ पर्यायमें भगवान् वृषभदेवकी जो अनुंधरी नामकी बहिन थी वह अब इन्हीं वृषभदेवकी सुनन्दा नामक देवीसे अत्यन्त सुन्दरी सुन्दरी नामकी पुत्री हुई ॥७॥ सुन्दरी पुत्री और बाहुबली पुत्रको पाकर सुनन्दा महारानी ऐसी सुशोभित हुई थी जिस प्रकार कि पूर्वदिशा प्रभाके साथ साथ सूर्यको पाकर सुशोभित होती है ॥८॥ समस्त जीवोंको मान्य तथा सर्वश्रेष्ठ रूपसम्पदाको धारण करनेवाला बलवान् युवा बाहुबली उस कालके चौबीस कामदेवोंमेंसे पहला कामदेव हुआ था ॥९॥ उस बाहुबलीका जैसा रूप था वैसा अन्य कहीं नहीं दिखाई देता था, सो ठीक ही है उत्तम आभूषण

१ क्रमाद्यशस्तया द० । २ भरतस्यानुजः । ३ इत्येकोनशतं– अ०, प०, द०, स०, म०, ल० । ४ शुक्लः । ५ –पक्षोऽमलां म०, ल० । ६ सर्वार्थसिद्धितः । ७ वृषभस्य । ८ –दनुन्धरी प०, अ०, द०, स०, ल० । ९ लेभे ब०, अ०, द०, स० । १० तत्काले काम– प०, द०, म०, ल० ।

[1]कुञ्चितास्तस्य केशान्ता[2] विबभुर्भ्रमरत्विपः । मनोभुवः शिरस्त्राण[3]सूक्ष्मायो[4]वलयैः समाः ॥११॥
ललाटमष्टमीचन्द्रचारु तस्य दधे रुचिम् । धात्रेव राज्यपट्टस्य निवेशाय पृथूकृतम् ॥१२॥
कुण्डलद्वयसंशोभि तस्य वक्त्रमदीप्यत । सरोरुहमिवोपान्तवर्तिचक्राह्वयुग्मकम् ॥१३॥
नेत्रोत्पलद्वयेनास्य बभौ वक्त्रसरोरुहम् । स्मितांशु[5]सलिलोत्पीडं लक्ष्म्यावासपवित्रितम् ॥१४॥
विजयच्छन्दहारेण वक्षस्थलविलम्बिना । सोऽधान्मरकतागस्य[6] श्रियं निर्झरशोभिनः ॥१५॥
तस्यांसौ वक्षसः प्रान्ते श्रियमातेनतुः पराम् । द्वीपस्थलस्य पर्यन्ते स्थितौ क्षुद्रनगाविव ॥१६॥
बाहू तस्य महाबाहोः अधातां बलमूर्जितम् । यतो बाहुबलीत्यासीत् नामास्य [7]महसां निधेः ॥१७॥
मध्येगात्रमसौ दध्रे [8]गम्भीरं नाभिमण्डलम् । कुलाद्रिरिव पद्मायाः[9] सेवनीयं महत्सरः ॥१८॥
कटीतटं बभावस्य कटिसूत्रेण वेष्टितम् । महाहिनेव विस्तीर्णं तटं मेरोर्महोन्नतेः ॥१९॥
कदलीस्तम्भनिर्भासौ[10]ऊरू तस्य विरेजतुः । लक्ष्मीकरतलाजस्र[11]स्पर्शादिव समुज्ज्वलौ ॥२०॥
शुशुभाते शुभे जङ्घे तस्य विक्रमशालिनः । भविष्यत्प्रतिमायोगतपःसिद्धयङ्गतां[12] गते ॥२१॥
क्रमौ मृदुतलौ तस्य लसदङ्गुलिसद्दलौ । रुचिं दधतुरारक्तौ रक्ताम्भोजस्य सश्रियः ॥२२॥

कल्पवृक्षको छोड़कर क्या कहीं अन्यत्र भी पाये जाते हैं ? ॥१०॥ उसके भ्रमरके समान काले तथा कुटिल केशोंके अग्रभाग कामदेवके शिरके कवचके सूक्ष्म लोहेके गोल तारोंके समान शोभायमान होते थे ॥११॥ अष्टमीके चन्द्रमाके समान सुन्दर उसका विस्तृत ललाट ऐसी शोभा धारण कर रहा था मानो ब्रह्माने राज्यपट्टको बाँधनेके लिये ही उसे विस्तृत बनाया हो ॥१२॥ दोनों कुण्डलोंसे शोभायमान उसका मुख ऐसा देदीप्यमान जान पड़ता था मानो जिसके दोनों ओर समीप ही चकवा-चकवी बैठे हों—ऐसा कमल ही हो ॥१३॥ मन्द हास्य की किरणरूपी जलके पूरसे भरा हुआ तथा लक्ष्मीके निवास करनेसे अत्यन्त पवित्र उसका मुखरूपी सरोवर नेत्ररूपी दोनों कमलोंसे भारी सुशोभित होता था ॥१४॥ वह बाहुबली अपने वक्षःस्थलपर लटकते हुए विजयछन्द नामके हारसे निर्झरनों द्वारा शोभायमान मरकतमणिमय पर्वतकी शोभा धारण करता था ॥१५॥ उसके वक्षःस्थलके प्रान्तभागमें विद्यमान दोनों कन्धे ऐसी शोभा बढ़ा रहे थे मानो किसी द्वीपके पर्यन्त भागमें विद्यमान दो छोटे छोटे पर्वत ही हों ॥१६॥ लम्बी भुजाओंको धारण करनेवाले और तेजके भाण्डारस्वरूप उस राजकुमारकी दोनों ही भुजाएँ उत्कृष्ट बलको धारण करती थीं और इसीलिये उसका बाहुबली नाम सार्थक हुआ था ॥१७॥ जिस प्रकार कुलाचल पर्वत अपने मध्यभागमें लक्ष्मीके निवास करने योग्य बड़ा भारी सरोवर धारण करता है उसी प्रकार वह बाहुबली अपने शरीरके मध्यभागमें गंभीर नाभिमण्डल धारण करता था ॥१८॥ करधनीसे घिरा हुआ उसका कटिप्रदेश ऐसा सुशोभित होता था मानो किसी बड़े सर्पसे घिरा हुआ अत्यन्त ऊँचे सुमेरु पर्वतका विस्तृत तट ही हो ॥१९॥ केलेके खम्भेके समान शोभायमान उसके दोनों ऊरु ऐसे सुशोभित हो रहे थे मानो लक्ष्मीकी हथेलीके निरन्तर स्पर्शसे ही अत्यन्त उज्वल हो गये हों ॥२०॥ पराक्रमसे सुशोभित रहनेवाले उस बाहुबलीकी दोनों ही जंघाएँ शुभ थीं—शुभ लक्षणोंसे सहित थीं और ऐसी जान पड़ती थीं मानो वह बाहुबली भविष्यत् कालमें जो प्रतिमायोग तपश्चरण धारण करेगा उसके सिद्ध करनेके लिये कारण ही हों ॥२१॥ उसके दोनों ही चरण लालकमलकी शोभा धारण कर रहे थे क्योंकि जिस प्रकार कमल कोमल होता है उसी प्रकार उसके चरणोंके तलुवे भी कोमल थे, कमलोंमें जिस प्रकार दल (पँखुरियाँ) सुशोभित होते हैं उसी प्रकार उसके चरणोंमें अँगुलियाँरूपी दल

---

१ कुटिलीकृताः । २ केशाग्रा– म०, ल० । ३ शिरःकवच । ४ लोहवलयः । ५ जलकण-प्रचयम् । ६ पर्वतस्य । ७ तेजसाम् । ८ गभीरं म०, ल० । ९ लक्ष्म्याः । १० समानौ । ११ अनवरत । १२ कारणताम् ।

इत्यसौ परमोदारं दधानश्चरमं वपुः । संमाति स्म कथं नाम मानिनीहृत्कुटीरके ॥२३॥
स्वप्नेऽपि तस्य तद्रूपम् अनन्यमनसोऽङ्गनाः । पश्यन्ति स्म मनोहारि निखातमिव[1] चेतसि ॥२४॥
मनोभवो मनोजश्च मनोभूर्मन्मथो[2]ऽङ्गजः । मदनोऽनन्यजश्चेति[3] [4]व्याजह्रुस्तं तदाङ्गनाः ॥२५॥
सुमनोमञ्जरीबाणैरिक्षुधन्वा किलाङ्गजः । [5]जगत्संमोहकारीति कः श्रद्दध्या[6]दयुक्तिकम् ॥२६॥
समा भरतराजेन राजन्याः[7] सर्व एव ते । विद्यया[8] कलया[9] दीप्त्या[10] कान्त्या सौन्दर्यलीलया[11]॥२७॥
शतमेकोत्तरं पुत्रा भर्त्तुस्ते भरतादयः । क्रमात् प्रापुर्युवावस्थां मदावस्थामिव द्विपाः ॥२८॥
तद्यौवनमभूत्तेषु रमणीयतरं तदा । उद्यानपादपौघेषु वसन्तस्येव जृम्भितम्[12] ॥२९॥
स्मितांशुमञ्जरीः शुभ्राः [13]सताम्रान् पाणिपल्लवान् । भुजशाखाः फलोदग्रा[14]स्ते दधुर्युव[15]पार्थिवाः ॥३०॥
ततामोदेन धूपेन वासितास्तच्छिरोरुहाः । गन्धान्धैरलिभिर्लीनैः कृताः[16] सोपचया इव ॥३१॥

सुशोभित थे, कमल जिस प्रकार लाल होते हैं उसी प्रकार उसके चरण भी लाल थे और कमलोंपर जिस प्रकार लक्ष्मी निवास करती है उसी प्रकार उसके चरणोंमें भी लक्ष्मी (शोभा) निवास करती थी ॥२२॥ इस प्रकार परम उदार और चरमशरीरको धारण करनेवाला वह बाहुबली मानिनी स्त्रियोंके हृदयरूपी छोटीसी कुटीमें कैसे प्रवेश कर गया था ? भावार्थ—स्त्रियोंका हृदय बहुत ही छोटा होता है और बाहुबलीका शरीर बहुत ही ऊंचा (सवा पाँच सौ धनुष) था इसके सिवाय वह चरमशरीरी वृद्ध, (पक्षमें उसी भवसे मोक्ष जानेवाला) था, मानिनी स्त्रियाँ चरमशरीरी अर्थात् वृद्ध पुरुषको पसंद नहीं करती हैं, इन सब कारणोंके रहते हुए भी उसका वह शरीर स्त्रियोंका मान दूर कर उनके हृदयमें प्रवेश कर गया यह भारी आश्चर्यकी बात थी ॥२३॥ जिनका मन दूसरी जगह नहीं जाकर केवल बाहुबलीमें ही लगा हुआ है ऐसी स्त्रियाँ स्वप्नमें भी उस बाहुबलीके मनोहर रूपको इस प्रकार देखती थीं मानो वह रूप उनके चित्तमें उकेर ही दिया गया हो ॥२४॥ उस समय स्त्रियाँ उसे मनोभव, मनोज, मनोभू, मन्मथ, अंगज, मदन और अनन्यज आदि नामोंसे पुकारती थीं ॥२५॥ ईख ही जिसका धनुष है ऐसा कामदेव अपने पुष्पोंकी मंजरीरूपी बाणोंसे समस्त जगत्का संहार कर देता है इस युक्तिरहित बातपर भला कौन विश्वास करेगा ? भावार्थ—कामदेवके विषयमें ऊपर लिखे अनुसार जो किंवदन्ती प्रसिद्ध है वह सर्वथा युक्तिरहित है, हाँ, बाहुबली जैसे कामदेव ही अपने अलौकिक बल और पौरुषके द्वारा जगत्का संहार कर सकते थे ॥२६॥ इस प्रकार वे सभी राजकुमार विद्या, कला, दीप्ति, कान्ति और सुन्दरताकी लीलासे राजकुमार भरतके समान थे ॥२७॥ जिस प्रकार हाथी क्रम-क्रमसे मदावस्थाको प्राप्त होते हैं उसी प्रकार भगवान् वृषभदेवके वे भरत आदि एक सौ एक पुत्र क्रम-क्रमसे युवावस्थाको प्राप्त हुए ॥२८॥ जिस प्रकार बगीचेके वृक्षसमूहोंपर वसन्तऋतुका विस्तार अतिशय मनोहर जान पड़ता है उसी प्रकार उस समय उन राजकुमारोंमें भी वह यौवन अतिशय मनोहर जान पड़ता था ॥२९॥ युवावस्थाको प्राप्त हुए वे सभी पार्थिव अर्थात् राजकुमार पार्थिव अर्थात् पृथिवीसे उत्पन्न होनेवाले वृक्षोंके समान थे क्योंकि वे सभी, वृक्षोंके समान ही मन्दहास्यरूपी सफेद मञ्जरी, लाल वर्णके हाथरूपी पल्लव और फल देनेवाली ऊंची ऊंची भुजारूपी शाखाओंको धारण करते थे ॥३०॥ जिसकी सुगन्धि सब ओर फैल रही है ऐसी धूपसे उन राजकुमारोंके शिरके बाल सुगन्धित किये जाते थे, उस सुगन्धिसे अन्ध

१ टङ्कोत्कीर्णमिव । २ मत् मानसं तन्मथ्नातीति मन्मथः । ३ –नन्यजश्चैव प० । ४ ब्रुवन्ति स्म । ५ जगत्संहार— म०, ल० । ६ विश्वासं कुर्यात् । ७ सर्वे राजकुमाराः । ८ आन्वीक्षिकीत्रयीवार्ता दण्डनीतिरूपया । ९ अक्षरगणितादिकया । १० तेजसा । ११ शोभया । १२ जृम्भणम् । १३ सारुणान् । १४ उन्नताः । १५ पार्थिवभूमिपाः । पक्षे युवपादपाः । १६ केशान्तरैः पृथूकृताः ।

तन्मुखामोदमाघ्रातुम् आयान्ती भ्रमरावली । [१]सर्वाङ्गीणं तदामोदम् अन्वभूत् क्षणमाकुला ॥३२॥
रत्नकुण्डलयुग्मेन मकराङ्केण भूषितम् । कर्णद्वयं बभौ तेषां मदनेनेव चिह्नितम् ॥३३॥
नेत्रोत्पलद्वयं तेषाम् इषूकृत्य मनोभवः । भ्रूलताचापयष्टिभ्यां स्त्रीसृष्टिं वशमानयत् ॥३४॥
वपुर्दीप्तं मुखं कान्तं मधुरो नेत्रविभ्रमः । कर्णाव[२]भ्यर्णविश्रान्तनेत्रोत्पलवतंसितौ ॥३५॥
भ्रुवौ सविभ्रमे शस्तं ललाटं नासिकाञ्चिता । कपोलावुपमातीतौ [३]अपोदितशशिश्रियौ ॥३६॥
[४]रक्तो रागरसेनेव पाटलो दशनच्छदः । स्वरो मृदङ्गनिर्घोषगम्भीरः श्रुतिपेशलः ॥३७॥
[५]सूत्रमार्गमनु[६]प्रोतैः जगच्चेतोऽभिनन्दिभिः । [७]कण्ठ्यैरिवाक्षरैः शुद्धैः[८] कण्ठो मुक्ताफलैर्वृतः ॥३८॥
वक्षो लक्ष्म्या परिष्वक्तम्[९] अंसौ च विजयश्रिया । [१०]व्यायामकर्कशौ बाहू पीनावाजानुलम्बिनौ ॥३९॥
नाभिः शोभानिधानोर्वी चार्वी [११]निर्वापणी दृशाम् । तनुमध्यं जगन्मध्य[१२]निर्विशेषमशेषतः ॥४०॥

होकर भ्रमर आकर उन बालोंमें विलीन होते थे जिससे वे बाल ऐसे मालूम होते थे जिससे मानो वृद्धिसे सहित ही हो रहे हों ॥३१॥ उन राजकुमारोंके मुखकी सुगन्ध सूंघनेके लिये जो भ्रमरोंकी पंक्ति आती थी वह क्षण भरके लिये व्याकुल होकर उनके समस्त शरीरमें व्याप्त हुई सुगन्धिका अनुभव करने लगती थी। भावार्थ—उनके समस्त शरीरसे सुगन्धि आ रही थी इसलिये 'मैं पहले किस जगहकी सुगन्धि ग्रहण करूं' इस विचारसे भ्रमर क्षण भरके लिये व्याकुल हो जाते थे ॥३२॥ उन राजकुमारोंके दोनों कान मकरके चिह्नसे चिह्नित रत्नमयी कुण्डलोंसे अलंकृत थे इसलिये ऐसे जान पड़ते थे मानो कामदेवने उनपर अपना चिह्न ही लगा दिया हो ॥३३॥ कामदेवने उनके नेत्ररूपी कमलोंको बाण बनाकर और उनकी भौंह-रूपी लताओंको धनुषकी लकड़ी बनाकर समस्त स्त्रियोंको अपने वश कर लिया था ॥ ३४ ॥ उनका शरीर देदीप्यमान था, मुख सुन्दर था, नेत्रोंका विलास मधुर था और कान समीपमें विश्राम करनेवाले नेत्ररूपी कमलोंसे सुशोभित थे ॥ ३५ ॥ उनकी भौंहें विलाससे सहित थीं, ललाट प्रशंसनीय था, नासिका सुशोभित थी और उपमारहित कपोल चन्द्रमाकी शोभाको भी तिरस्कृत करनेवाले थे ॥ ३६ ॥ उनके ओठ कुछ कुछ लाल वर्णके थे मानो अनुरागके रससे ही लाल वर्णके हो गये हों और स्वर मृदङ्गके शब्दके समान गम्भीर तथा कानोंको प्रिय था ॥३७॥ उनके कण्ठ जिन मोतियोंसे घिरे हुए थे वे ठीक कण्ठसे उच्चारण होने योग्य अक्षरोंके समान जान पड़ते थे क्योंकि जिस प्रकार अक्षर सूत्र मार्ग अर्थात् मूल ग्रन्थके अनुसार गुम्फित होते हैं उसी प्रकार वे मोती भी सूत्रमार्ग अर्थात् धागामें पिरोये हुए थे, अक्षर जिस प्रकार जगत्के जीवोंके चित्तको आनन्द देनेवाले होते हैं उसी प्रकार वे मोती भी उनके चित्तको आनन्द देनेवाले थे, अक्षर जिस प्रकार कण्ठस्थानसे उत्पन्न होते हैं उसी प्रकार मोती भी कण्ठस्थानमें पड़े हुए थे, और अक्षर जिस प्रकार शुद्ध अर्थात् निर्दोष होते हैं उसी प्रकार वे मोती भी शुद्ध अर्थात् निर्दोष थे ॥ ३८ ॥ उनका वक्षःस्थल लक्ष्मीसे आलिङ्गित था, कन्धे विजयलक्ष्मीसे आलिंगित थे और घुटनों तक लम्बी भुजाएं व्यायामसे कठोर थीं ॥ ३९ ॥ उनकी नाभि शोभाके खजानेकी भूमि थी, सुन्दर थी और नेत्रोंको सन्तोष देनेवाली थी इसी प्रकार उनका मध्यभाग अर्थात् कटिप्रदेश भी ठीक जगत्के मध्यभागके समान था ॥ ४० ॥ जिन पर वस्त्र शोभायमान हो रहा

---

१ सर्वावयवेषु भवम्। २ समीपः। ३ दूषिता। —व्पोहित– अ०, स०, ल०। ४ रञ्जितः। ५ सूत्रम्, पक्षे तन्तुम्। 'अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रकृतो विदुः॥" ६ यष्टीकृतैः, पक्षे अनुग्रथितैः। ७ कण्ठयोग्यैः, पक्षे कण्ठभवैः। ८ कलङ्कादिदोषरहितैः, शब्दार्थादिदोष-रहितैः। ९ आलिङ्गितम्। १० शस्त्राद्यभ्यासः। ११ सुखकारिणी। १२ समानम्।

लसद्वसनमामुक्त[1]रशनं जघनं घनम् । [2]कायमानमिवानङ्गनृपतेः [3]कृतनिर्वृति ॥४१॥
पीनौ चारुरुचावूरू नारीजनमनोरमौ । जङ्घे विनिर्जितानङ्गनिषङ्ग[4]रुचिराकृती ॥४२॥
सर्वाङ्गसङ्गतां कान्तिमिवोच्चित्य[5] [6]स्रुतामधः । [7]क्रमौ विनिर्मितौ लक्ष्म्या [8]न्यक्कृतारुणपङ्कजौ ॥४३॥
तेषां प्रत्यङ्गमत्युद्धा[9] शोभा स्वात्मगतैव या । तत्समुत्कीर्त्तनैवालं[10] [11]खलूक्त्वा वर्णनान्तरम् ॥४४॥
निसर्गरुचिराण्येषां वपूंषि मणिभूषणैः । भृशं रुरुचिरे पुष्पैः वनानीव विकासिभिः ॥४५॥
तेषां विभूषणान्यासन् मुक्तारत्नमयानि वै । यष्टयो हारभेदाश्च रत्नावल्यश्च नैकधा ॥४६॥
यष्टयः शीर्षकं चोपशीर्षकं चावघाटकम् । प्रकाण्डकञ्च तरलप्रबन्धश्चेति पञ्चधा ॥४७॥
केषाञ्चिच्छीर्षकं यष्टिः केषाञ्चिदुपशीर्षकम् । अवघाटकमन्येषाम् अपरेषां प्रकाण्डकम् ॥४८॥
तरलप्रतिबन्धश्च केषाञ्चित् कण्ठ[12]भूषणम् । मणिमध्याश्च शुद्धाश्च तास्तेषां[13] यष्टयो[14]ऽभवन् ॥४९॥
[15]सूत्रमेकावली सैव यष्टिः स्यान्मणिमध्यमा । [16]रत्नावली भवेत् सैव सुवर्णमणिचित्रिता ॥५०॥
[17]युक्तप्रमाणसौवर्णमणिमाणिक्यमौक्तिकैः । सान्तरं ग्रथिता भूषा भवेयु[18]रपवर्तिका ॥५१॥

है और करधनी लटक रही है ऐसे उनके स्थूल नितम्ब ऐसे जान पड़ते थे मानो कामदेवरूपी राजाके सुख देनेवाले कपड़ेके बने हुए तम्बू ही हों ॥ ४१ ॥ उनके ऊरु स्थूल थे, सुन्दर कान्तिके धारक थे और स्त्रीजनोंका मन हरण करनेवाले थे। उनकी जंघाएं कामदेवके तरकशकी सुन्दर आकृतिको भी जीतनेवाली थीं ॥ ४२ ॥ अपनी शोभासे लाल कमलोंका भी तिरस्कार करनेवाले उनके दोनों पैर ऐसे जान पड़ते थे मानो समस्त शरीरमें रहनेवाली जो कान्ति नीचेकी ओर बह कर गई थी उसे इकट्ठा करके ही बनाये गये हों ॥ ४३ ॥ इस प्रकार उन राजकुमारोंके प्रत्येक अंगमें जो प्रशंसनीय शोभा थी वह उन्हींके शरीरमें थी—वैसी शोभा किसी दूसरी जगह नहीं थी इसलिये अन्य पदार्थोंका वर्णन कर उनके शरीरकी शोभाका वर्णन करना व्यर्थ है ॥ ४४ ॥ उन राजकुमारोंके स्वभावसे ही सुन्दर शरीर मणिमयी आभूषणोंसे ऐसे सुशोभित हो रहे थे जैसे कि खिले हुए फूलोंसे वन सुशोभित रहते हैं ॥ ४५ ॥ उन राजकुमारोंके यष्टि, हार और रत्नावली आदि, मोती तथा रत्नोंके बने हुए अनेक प्रकारके आभूषण थे ॥ ४६ ॥ उनमेंसे यष्टि नामक आभूषण शीर्षक, उपशीर्षक, अवघाटक, प्रकाण्डक और तरल प्रबन्धके भेदसे पाँच प्रकारका होता है ॥ ४७ ॥ उन राजकुमारोंमें किन्हींके शीर्षक, किन्हींके उपशीर्षक, किन्हींके अवघाटक, किन्हींके प्रकाण्डक और किन्हींके तरल प्रतिबन्ध नामकी यष्टि कण्ठका आभूषण हुई थी। उनकी वे पाँचों प्रकारकी यष्टियाँ मणिमध्या और शुद्धाके भेदसे दो दो प्रकारकी थीं। [जिसके बीचमें एक मणि लगा हो उसे मणिमध्या, और जिसके बीचमें मणि नहीं लगा हो उसे शुद्धा यष्टि कहते हैं।] ॥ ४८–४९ ॥ मणिमध्यमा यष्टिको सूत्र तथा एकावली भी कहते हैं और यदि वही मणिमध्यमा यष्टि सुवर्ण तथा मणियोंसे चित्र-विचित्र हो तो उसे रत्नावली भी कहते हैं ॥ ५० ॥ जो यष्टि किसी निश्चित प्रमाणवाले सुवर्ण मणि, माणिक्य और मोतियोंके द्वारा

---

१ प्रतिबद्ध । २ पटकुटी । ३ विहितसुखम् । ४ इषुधिः । ५ संगृह्य, संहृत्य । ६ स्यन्दमानाम् । ७ पादौ । ८ अधःकृत । ९ प्रशस्ता । १० पर्याप्तम् । ११ [वचनेनालम्] अस्य पदस्योपरि सूत्रम् [अलंखल्वोः प्रतिषेधयोः] पाणिनीयम् । १२ कण्ठाभरण– भूततरलप्रतिबन्धश्चेति यष्टिः इदानीं यष्टिविशेषमुक्त्वा सामान्या द्विप्रकारा एवेति सूचयति । १३ कुमाराणाम् । १४ ता यष्टयः मणिमध्याः शुद्धाश्चेति सामान्यतः द्विधाभवन् । १५ या यष्टिः मणिमध्यमा स्यात् सैव सूत्रमिति । एकावलीति च नामद्वयी स्यात् । १६ सैव सुवर्णेन मणिभिश्च चित्रिता चेत् रत्नावलीति नामा स्यात् । १७ योग्यप्रमाण । १८ द्वाभ्यां त्रिभिश्चतुर्भिः पञ्चभिर्वा सुवर्णमणिमाणिक्यमौक्तिकैः सान्तरं यथा भवति तथा रचिता भूषा अपवर्तिका भवेयुः ।

यष्टिः शीर्षकसंज्ञा स्यात् मध्यैकस्थूलमौक्तिका। मध्यैस्त्रिभिः क्रमस्थूलैः मौक्तिकैरुपशीर्षकम् ॥५२॥
प्रकाण्डकं क्रमस्थूलैः पञ्चभिर्मध्यमौक्तिकैः। मध्यादनुक्रमाद्धीनैः मौक्तिकैरवघाटकम् ॥५३॥
तरलप्रतिबन्धः स्यात् सर्वत्र सममौक्तिकैः[1]। [2]तथैव मणियुक्तानाम् ऊह्या भेदा[3]स्त्रिधात्मनाम् ॥५४॥
हारो यष्टिकलापः[4] स्यात् स चैकादशधा मतः। इन्द्रच्छन्दादिभेदेन यष्टिसंख्याविशेषतः ॥५५॥
यष्टयोऽष्ट[5]सहस्रं तु यत्रेन्द्रच्छन्दसंज्ञकः। स हारः परमोदारः शक्रचक्रिजिनेशिनाम् ॥५६॥
तदर्द्धप्रमितो यस्तु विजयच्छन्दसंज्ञकः। सोऽर्द्धचक्रधरस्योक्तो[6] हारोऽन्येषु च केषुचित् ॥५७॥
शतमष्टोत्तरं यत्र यष्टीनां हार एव सः। एकाशीत्या भवेद् देवच्छन्दो मौक्तिकयष्टिभिः ॥५८॥
चतुःषष्ट्यार्धहारः स्याच्चतुःपञ्चाशता पुनः। भवेद् रश्मिकलापाख्यो गुच्छो द्वात्रिंशता मतः ॥५९॥
यष्टीनां सप्तविंशत्या भवेन्नक्षत्रमालिका। शोभां नक्षत्रमालाया या हसन्ती स्वमौक्तिकैः ॥६०॥
चतुर्विंशत्यार्द्धगुच्छोविंशत्या माणवाह्वयः। भवेन्मौक्तिकयष्टीनां तदर्द्धेनार्द्धमाणवः ॥६१॥
इन्द्रच्छन्दादिहारास्ते यदा स्युर्मणिमध्यमाः। माणवाख्या विभूषाः स्युः [7]तत्पदोपपदास्तदा ॥६२॥

बीचमें अन्तर दे देकर गूंथी जाती है उसे अपवर्तिका कहते हैं ॥ ५१ ॥ जिसके बीचमें एक बड़ा स्थूल मोती हो उसे शीर्षक यष्टि कहते हैं और जिसके बीचमें क्रम-क्रमसे बढ़ते हुए तीन मोती हों उसे उपशीर्षक कहते हैं ॥ ५२ ॥ जिसके बीचमें क्रम-क्रमसे बढ़ते हुए पाँच मोती लगे हों उसे प्रकाण्डक कहते हैं, जिसके बीचमें एक बड़ा मणि हो और उसके दोनों ओर क्रम-क्रमसे घटते हुए छोटे छोटे मोती लगे हों उसे अवघाटक कहते हैं ॥ ५३ ॥ और जिसमें सब जगह एक समान मोती लगे हों उसे तरल प्रतिबन्ध कहते हैं। ऊपर जो एकावली, रत्नावली और अपवर्तिका ये मणि युक्त यष्टियोंके तीन भेद कहते हैं उनके भी ऊपर लिखे अनुसार प्रत्येकके शीर्षक, उपशीर्षक आदि पाँच पाँच भेद समझ लेना चाहिये ॥ ५४ ॥ यष्टि अर्थात् लड़ियोंके समूहको हार कहते हैं वह हार लड़ियोंकी संख्याके न्यूनाधिक होनेसे इन्द्रच्छन्द आदिके भेदसे ग्यारह प्रकारका होता है ॥ ५५ ॥ जिसमें एक हजार आठ लड़ियों हों उसे इन्द्रच्छन्द हार कहते हैं वह हार सबसे उत्कृष्ट होता है और इन्द्र चक्रवर्ती तथा जिनेन्द्रदेवके पहिननेके योग्य होता है ॥ ५६ ॥ जिसमें इन्द्रछन्द हारसे आधी अर्थात् पांचसौ चार लड़ियां हों उसे विजयच्छन्द हार कहते हैं। यह हार अर्धचक्रवर्ती तथा बलभद्र आदि अन्य पुरुषोंके पहिननेके योग्य कहा गया है ॥ ५७ ॥ जिसमें एक सौ आठ लड़ियाँ हों उसे हार कहते हैं और जिसमें मोतियोंकी इक्यासी लड़ियाँ हों उसे देवच्छन्द कहते हैं ॥ ५८ ॥ जिसमें चौंसठ लड़ियां हों उसे अर्धहार, जिसमें चौवन लड़ियां हो उसे रश्मिकलाप और जिसमें बत्तीस लड़ियाँ हों उसे गुच्छ कहते हैं ॥५९॥ जिसमें सत्ताईस लड़ियाँ हों उसे नक्षत्रमाला कहते हैं यह हार अपने मोतियोंसे अश्विनी भरणी आदि नक्षत्रोंकी मालाकी शोभाकी हँसी करता हुआ सा जान पड़ता है ॥६०॥ मोतियोंकी चौबीस लड़ियोंके हारको अर्धगुच्छ, बीस लड़ियोंके हारको माणव और दश लड़ियोंके हारको अर्धमाणव कहते हैं ॥६१॥ ऊपर कहे हुए इन्द्रच्छंद आदि हारोंके मध्यमें जब मणि लगा दिया जाता है तब उन नामोंके साथ माणव शब्द और भी सुशोभित होने लगता है अर्थात् इन्द्रच्छन्दमाणव, विजयछन्दमाणव आदि कहलाने लगते

१ सममौक्तिकः प०। २ उक्तपञ्चप्रकारेण भेदाः। ३ मणियुक्तानामेकावलीरत्नावली अपवर्तिकानामपि शीर्षकादिपञ्चभेदा योज्याः। ४ समूहः। ५ अष्टोत्तरसहस्रमिति। ६ -स्योक्त्या ब०। ७ माणवाख्यपदोपपदाः।

य [1]एकशीर्षकः शुद्धहारः स्याच्छीर्षकात्परः । [2]इन्द्रच्छन्दाद्युपपदः स चैकादशभेदभाक् ॥६३॥
तथोपशीर्षकादीनामपि शुद्धात्मनां भिदा । तर्क्याः शुद्धास्ततो[3] हाराः पञ्चपञ्चाशदेव हि ॥६४॥
भवेत् फलकहाराख्यो मणिमध्योऽर्द्धमाणवे[4] । त्रिहेमफलकः पञ्चफलको वा यदा तदा ॥६५॥
सोपानमणिसोपानद्वैविध्यात् स मतो द्विधा । सोपानाख्यस्तु फलकै रौक्मैरन्यः[5] सरत्नकैः ॥६६॥
इत्यमूनि युगारम्भे [6]कण्ठोरोभूषणानि वै । स्रष्टासृजत् स्वपुत्रेभ्यो यथास्वं ते च तान्यधुः ॥६७॥
इत्याद्याभरणैः कण्ठ्यैः अन्यैश्चान्यत्रभाविभिः । ते राजन्या व्यराजन्त ज्योतिर्गणमया इव ॥६८॥
तेषु तेजस्विनां धुर्यो भरतोऽर्क इवाद्युतत् । शशीव जगतः कान्तो युवा बाहुबली बभौ ॥६९॥
शेषाश्च ग्रहनक्षत्रतारागणनिभा बभुः । ब्राह्मी दीप्तिरिवैतेषाम् अभूज्ज्योत्स्नेव सुन्दरी ॥७०॥
स तैः परिवृतः पुत्रैः भगवान् वृषभो बभौ । ज्योतिर्गणैः परिक्षिप्तो यथा मेरुर्महोदयः ॥७१॥
अथैकदा सुखासीनो भगवान् हरिविष्टरे । मनो व्यापारयामास कलाविद्योपदेशने ॥७२॥
तावच्च पुत्रिके भर्तुः ब्राह्मीसुन्दर्यभिष्टवे[7] । धृतमङ्गलनैपथ्ये[8] संप्राप्ते निकटं गुरोः ॥७३॥

हैं ॥६२॥ जो एक शीर्षक हार है वह शुद्ध हार कहलाता है । यदि शीर्षकके आगे इन्द्रच्छन्द आदि उपपद भी लगा दिये जावें तो वह भी ग्यारह भेदोंसे युक्त हो जाता है ॥६३॥ इसी प्रकार उपशीर्षक आदि शुद्ध हारोंके भी ग्यारह ग्यारह भेद होते हैं । इस प्रकार सब हार पचपन प्रकारके होते हैं ॥६४॥ अर्धमाणव हारके बीचमें यदि मणि लगाया गया हो तो उसे फलकहार कहते हैं । उसी फलकहारमें जब सोनेके तीन अथवा पाँच फलक लगे हों तो उसके सोपान और मणि-सोपानके भेदसे दो भेद हो जाते हैं । अर्थात् जिसमें सोनेके तीन फलक लगे हों उसे सोपान कहते हैं और जिसमें सोनेके पाँच फलक लगे हों उसे मणिसोपान कहते हैं । इन दोनों हारोंमें इतनी विशेषता है कि सोपान नामक हारमें सिर्फ सुवर्णके ही फलक रहते हैं और मणिसोपान नामके हारमें रत्नोंसे जड़े हुए सुवर्णके फलक रहते हैं ॥ (सुवर्णके गोल दाने [गुरिया]को फलक कहते हैं) ॥६५-६६॥ इस प्रकार कर्मयुगके प्रारम्भमें भगवान् वृषभदेवने अपने पुत्रोंके लिये कण्ठ और वक्षःस्थलके अनेक आभूषण बनाये, और उन पुत्रोंने भी यथायोग्य रूपसे वे आभूषण धारण किये ॥६७॥ इस तरह कण्ठ तथा शरीरके अन्य अवयवोंमें धारण किये हुए आभूषणोंसे वे राजकुमार ऐसे सुशोभित होते थे मानो ज्योतिषी देवोंका समूह हो ॥६८। उन सब राजकुमारोंमें तेजस्वियोंमें भी तेजस्वी भरत सूर्यके समान सुशोभित होता था और समस्त संसारसे अत्यन्त सुन्दर युवा बाहुबली चन्द्रमाके समान शोभायमान होता था ॥६९॥ शेष राजपुत्र ग्रह, नक्षत्र तथा तारागणके समान शोभायमान होते थे । उन सब राजपुत्रोंमें ब्राह्मी दीप्तिके समान और सुन्दरी चाँदनीके समान सुशोभित होती थी ॥७०॥ उन सब पुत्र-पुत्रियोंसे घिरे हुए सौभाग्यशाली भगवान् वृषभदेव ज्योतिषी देवोंके समूहसे घिरे हुए ऊँचे मेरु पर्वतकी तरह सुशोभित होते थे ॥७१॥

अथानन्तर किसी एक समय भगवान् वृषभदेव सिंहासनपर सुखसे बैठे हुए थे, कि उन्होंने अपना चित्त कला और विद्याओंके उपदेश देनेमें व्यापृत किया ॥७२॥ उसी समय उनकी ब्राह्मी और सुन्दरी नामकी पुत्रियाँ माङ्गलिक वेष-भूषा धारण कर उनके निकट पहुँची ॥ ७३ ॥

१ एकः शीर्षको यस्मिन् सः शुद्धहारः । २ इन्द्रच्छन्दाद्युपपदः शीर्षकात् परः स हारः इन्द्रच्छन्द-शीर्षकहार इति यावत् । एवं शुद्धात्मनामुपशीर्षकादीनामेव इन्द्रच्छन्दोपशीर्षकहार इति क्रमात् । शीर्षकादिषु पञ्चसु इन्द्रच्छन्दादिकं प्रत्येकम् । एकादशधा ताडिते सति पञ्चपञ्चाशत् । ३ वेदेभ्यः । ४ केवलं मणिमध्यश्चेति । ५ अन्यः मणिसोपानः सरत्नैः रौक्मफलकैः स्यादिति । ६ कण्ठः उरश्च । ७ अभिस्तवे । अभिख्ये इत्यर्थः । ८ मङ्गलालङ्कारे । -नेपथ्ये अ०, प०, द०, स०, म० ।

ते च [1]किञ्चिदिवोद्भिन्नः तनकुट्मलशोभिनि । वयस्यनन्तरे बाल्याद् वर्त्तमाने मनोहरे ॥७४॥
मेधाविन्यौ [2]विनीते च सुशीले चारुलक्षणे । रूपवत्यौ यशस्विन्यौ श्लाघ्ये मानवती[3]जनैः ॥७५॥
[4]अधिक्षोणिपदन्यासैः हंसीगतिविडम्बिभिः । रक्ताम्बुजोपहारस्य तन्वाने परितः श्रियम् ॥७६॥
नखदर्पणसङ्क्रान्तस्वाङ्गच्छाया[5]पदेशतः । कान्त्या न्यक्कृत्य[6]दिक्कन्या. पद्भ्यां [7]क्रष्टुमिवोद्यते ॥७७॥
सलीलपदविन्यासरणन्नूपुरनिक्वणैः । शिक्षयन्त्याविवाहूय हंसीः स्वं गतिविभ्रमम् ॥७८॥
चारूरू रुचिमज्जङ्घे [8]तत्कान्तिमति[9]रेकिणीम् । जनानां दृक्पथे स्वैरं विक्षिपन्त्याविवाभितः ॥७९॥
दधाने जघना[10]भोगं काञ्चीतूर्यरवाञ्चितम् । सौभाग्यदेवतावासमिवांशुकवितानकम् ॥८०॥
लावण्यदेवतां यष्टु[11]मनङ्गाध्व[12]र्युणा कृतम् । हेमकुण्डमिवानिम्नं दधत्यौ नाभिमण्डलम् ॥८१॥
वहन्त्यौ किञ्चिदुद्भूत[13]श्यामिकां रोमराजिकाम् । मनोभवगृहावेशधूपधूमशिखामिव ॥८२॥
तनुमध्ये कृशोदर्यावारक्तकरपल्लवे । मदुबाहुलते किञ्चिदुद्भिन्नकुच[14]कुट्मले ॥८३॥
दधाने रुचिरं हारम् आक्रान्तस्तनमण्डलम् । तदा[15]श्लेपसुखासङ्गात् [16]स्मयमानमिवांशुभिः ॥८४॥

वे दोनों ही पुत्रियाँ कुछ कुछ उठे हुए स्तनरूपी कुड्मलोंसे शोभायमान और बाल्य अवस्थाके अनन्तर प्राप्त होनेवाली किशोर अवस्थामें वर्तमान थीं अतएव अतिशय सुन्दर जान पड़ती थीं ॥७४॥ वे दोनों ही कन्याएँ बुद्धिमती थीं, विनीत थीं, सुशील थीं, सुन्दर लक्षणोंसे सहित थीं, रूपवती थीं और मानिनी स्त्रियोंके द्वारा भी प्रशंसनीय थीं ॥७५॥ हंसीकी चालको भी तिरस्कृत करनेवाली अपनी सुन्दर चालसे जब वे पृथिवीपर पैर रखती हुई चलती थीं, तब वे चारों ओर लालकमलोंके उपहारकी शोभाको विस्तृत करती थीं ॥७६॥ उनके चरणोंके नखरूपी दर्पणोंमें जो उन्हींके शरीरका प्रतिबिम्ब पड़ता था उसके छलसे वे ऐसी जान पड़ती थीं मानो अपनी कान्तिसे तिरस्कृत हुई दिक्कन्याओंको अपने चरणोंसे रौंदनेके लिये ही तैयार हुई हों ॥७७॥ लीला सहित पैर रखकर चलते समय रुनझुन शब्द करते हुए उनके नूपुरोंसे जो सुन्दर शब्द होते थे उनसे वे ऐसी मालूम होती थीं मानो नूपुरोंके शब्दोंके बहाने हंसियोंको बुलाकर उन्हें अपनी गतिका सुन्दर विलास ही सिखला रही हों ॥७८॥ जिनके ऊरु अतिशय सुन्दर और जंघाएँ अतिशय कान्तियुक्त हैं ऐसी वे दोनों पुत्रियाँ ऐसी जान पड़ती थीं मानो उनकी बढ़ती हुई कान्तिको वे लोगोंके नेत्रोंके मार्गमें चारों ओर स्वयं ही फेंक रही हों ॥७९॥ वे पुत्रियाँ जिस स्थूल जघन भागको धारण कर रही थीं वह करधनी तथा अधोवस्त्रसे सुशोभित था और ऐसा मालूम होता था मानो करधनीरूपी तुरही बाजोंसे सुशोभित और कपड़ेके चँदोवासे युक्त सौभाग्य देवताके रहनेका घर ही हो ॥८०॥ वे कन्याएँ जिस गंभीर नाभिमण्डलको धारण किये हुई थीं. वह ऐसा जान पड़ता था मानो कामदेवरूपी यजमानने लावण्यरूपी देवताकी पूजाके लिये होमकुण्ड ही बनाया हो ॥८१॥ जिसमें कुछ कुछ कालापन प्रकट हो चुका है ऐसी जिस रोमराजीको वे पुत्रियाँ धारण कर रही थीं वह ऐसी मालूम होती थीं मानो कामदेवके गृहप्रवेशके समय खेई हुई धूपके धूमकी शिखा ही हो ॥८२॥ उन दोनों कन्याओंका मध्यभाग कृश था, उदर भी कृश था, हस्तरूपी पल्लव कुछ कुछ लाल थे, भुजलताएँ कोमल थीं और स्तनरूपी कुड्मल कुछ कुछ ऊँचे उठे हुए थे ॥८३॥ वे पुत्रियाँ स्तनमण्डलपर पड़े हुए जिस मनोहर हारको धारण किये हुई थीं वह अपनी किरणोंसे ऐसी शोभायमान हो रहा था मानो

१ किञ्चिदित्यर्थः । २ विनयपरे । ३ मान्यस्त्रीजनैः । ४ पृथिव्याम् । ५ व्याजतः । ६ अधः कृत्वा । न्यक्कृत- ल० । ७ कर्षणाय । ८ ऊरुजङ्घाकान्तिम् । ९ अत्युत्कटाम् । १० विस्तीर्णम् । ११ पूजयितुम् । १२ याजकेन । १३ कृष्णवर्णाम् । १४ -कुड्मले द०, स०, म०, ल० । १५ तत्कुचमण्डलालिङ्गनसुखासक्तेः । १६ हसन्तम् ।

सुकण्ठ्यौ कोकिलालापनिर्हारिमधुरस्वरे । [1]ताम्राधरे [2]दरोद्भिन्नस्मितांशुरुचिरानने ॥८५॥
सुदत्यौ[3] ललितापाङ्गवीक्षिते सान्द्रपक्ष्मणी । मदनस्येव जैत्रास्त्रे दधाने नयनोत्पले ॥८६॥
लसत्कपोलसंक्रान्तैः अलकप्रतिबिम्बकैः । ह्रेपयन्त्यावभिव्यक्तलक्ष्मणः शशिनः श्रियम् ॥८७॥
समाल्यं कबरीभारं धारयन्त्यौ तरङ्गितम् । स्वान्तः सङ्क्रान्तगाङ्गौघं प्रवाहमिव यामुनम् ॥८८॥
इति प्रत्यङ्गसङ्गिन्या कान्त्या कान्ततमाकृती । सौन्दर्यस्येव सन्दोहम् एकीकृत्य विनिर्मिते ॥८९॥
किमेते दिव्यकन्ये [4]स्तां किन्नु कन्ये फणीशिनाम् । दिक्कन्ये किमुत स्यातां किं वा सौभाग्यदेवते ॥९०॥
किमिमे श्रीसरस्वत्यौ किं वा [5]तदधिदेवते । किं स्या[6]त्तदवतारोऽयम् एवंरूपः प्रतीयते ॥९१॥
लक्ष्म्याविमे जगन्नाथमहाब्धेः किमुद्गते । कल्याणभागिनी च स्याद् अनयोरियमाकृतिः ॥९२॥
इति संश्लाघ्यमाने ते जनैरुत्पन्नविस्मयैः । सप्रश्रयमुपाश्रित्य जगन्नाथं प्रणेमतुः ॥९३॥
प्रणते ते समुत्थाप्य दूरान्नमितमस्तके । प्रीत्या स्वमङ्कमारोप्य स्पृष्ट्वाघ्राय च मस्तके ॥९४॥
सप्रहासमुवाचैवम् एतं[7] मन्ये सुरैः समम् । [8]यास्यथोऽद्यामरोद्यानं नैवमेते गताः सुराः ॥९५॥
इत्याक्रीड्य क्षणं भूयोऽप्येवमाख्यद्गिरां पतिः । युवां युवजरत्यौ स्थः[9] शीलेन विनयेन च ॥९६॥

स्तनोंके आलिंगनसे उत्पन्न हुए सुखकी आसक्तिसे हँस ही रहा हो ॥८४॥ उनके कंठ बहुत ही सुन्दर थे, उनका स्वर कोयलकी वाणीके समान मनोहर और मधुर था, ओठ ताम्रवर्ण अर्थात् कुछ कुछ लाल थे, और मुख कुछ कुछ प्रकट हुए मन्दहास्यकी किरणोंसे मनोहर थे ॥८५॥ उनके दाँत सुन्दर थे, कटाक्षों द्वारा देखना मनोहर था, नेत्रोंकी बिरौनी सघन थीं और नेत्ररूपी कमल कामदेवके विजयी अस्त्रके समान थे ॥८६॥ शोभायमान कपोलोंपर पड़े हुए केशों के प्रतिबिम्बसे वे कन्याएँ, जिसमें कलंक प्रकट दिखाई दे रहा है ऐसे चन्द्रमाकी शोभाको भी लज्जित कर रही थीं ॥८७॥ वे माला सहित जिस केशपाशको धारण कर रही थीं वह ऐसा मालूम होता था मानो जिसके भीतर गंगा नदीका प्रवाह मिला हुआ है ऐसा यमुना नदीका लहराता हुआ प्रवाह ही हो ॥८८॥ इस प्रकार प्रत्येक अंगमें रहनेवाली कान्तिसे उन दोनोंकी आकृति अत्यन्त सुन्दर थी और उससे वे ऐसी मालूम होती थीं मानो सौन्दर्यके समूहको एक जगह इकट्ठा करके ही बनाई गई हों ॥८९॥ क्या ये दोनों दिव्य कन्याएँ हैं ? अथवा नागकन्याएँ हैं ? अथवा दिक्कन्याएँ हैं ? अथवा सौभाग्य देवियाँ हैं, अथवा लक्ष्मी और सरस्वती देवी हैं अथवा उनकी अधिष्ठात्री देवी हैं ? अथवा उनका अवतार हैं ? अथवा क्या जगन्नाथ (वृषभदेव) रूपी महासमुद्रसे उत्पन्न हुई लक्ष्मी हैं ? क्योंकि इनकी यह आकृति अनेक कल्याणोंका अनुभव करनेवाली है इस प्रकार लोग बड़े आश्चर्यके साथ जिनकी प्रशंसा करते हैं ऐसी उन दोनों कन्याओंने विनयके साथ भगवान्के समीप जाकर उन्हें प्रणाम किया ॥९०—९३॥ दूरसे ही जिनका मस्तक नम्र हो रहा है ऐसी नमस्कार करती हुई उन दोनों पुत्रियोंको उठाकर भगवान्ने प्रेमसे अपनी गोदमें बैठाया, उनपर हाथ फेरा, उनका मस्तक सूँघा और हँसते हुए उनसे बोले कि आओ, तुम समझती होगी कि हम आज देवोंके साथ अमरवनको जावेंगी परन्तु अब ऐसा नहीं हो सकता क्योंकि देव लोग पहले ही चले गये हैं ॥ ९४–९५ ॥ इस प्रकार भगवान् वृषभदेव क्षणभर उन दोनों पुत्रियोंके साथ क्रीड़ा कर फिर कहने लगे कि तुम अपने शील और विनयगुणके कारण युवावस्थामें भी वृद्धाके समान हो

१ ताम्र अरुण । २ दर ईषत् । ३ शोभनदन्तवत्यौ । सुदन्त्यौ अ०, स० । ४ भवताम् । ५ श्रीसरस्वत्योरधिदेवते । ६ अधिदेवतयोरवतारः । ७ आगच्छन्तम् । लोटि मध्यमपुरुषः । ८ गमिष्यथः । ९ भवथः ।

इदं वपुर्वयश्चेदम् इदं शीलमनीदृशम् । विद्यया चेद्विभूष्येत सफलं जन्म [1]वामिदम् ॥९७॥
विद्यावान् पुरुषो लोके [2]सम्मतिं याति कोविदैः । नारी च [3]तद्वती धत्ते स्त्रीसृष्टेरग्रिमं पदम् ॥९८॥
विद्या यशस्करी पुंसां विद्या श्रेयस्करी मता । सम्यगाराधिता विद्यादेवता कामदायिनी ॥९९॥
विद्या कामदुघा धेनुः विद्या चिन्तामणिर्नृणाम् । [4]त्रिवर्गफलितां सूते विद्यां सम्पत्परम्पराम् ॥१००॥
विद्या बन्धुश्च मित्रञ्च विद्या कल्याणकारकम् । सहयायि धनं विद्या विद्या सर्वार्थसाधनी ॥१०१॥
[5]तद्विद्याग्रहणे यत्नं पुत्रिके कुरुतं[6] युवाम् । तत्संग्रहणकालोऽयं युवयोर्वर्त्ततेऽधुना ॥१०२॥
इत्युक्त्वा मुहुराशास्य विस्तीर्णे हेम[7]पट्टके । अधिवास्य स्वचित्तस्थां श्रुतदेवीं [8]सपर्यया ॥१०३॥
विभुः करद्वयेनाभ्यां लिखन्नक्षरमालिकाम् । उपादिशल्लिपिं[9] संख्यास्थानं[10] चाङ्कैरनुक्रमात् ॥१०४॥
ततो भगवतो वक्त्रान्निःसृतामक्षरावलीम् । सिद्धं नम इति व्यक्तमङ्गलां सिद्धमातृकाम् ॥१०५॥
अकारादिहकारान्तां शुद्धां मुक्तावलीमिव । स्वरव्यञ्जनभेदेन द्विधा भेदमुपेयुषीम् ॥१०६॥
[11]अयोगवाहपर्यन्तां सर्वविद्यासु सन्तताम्[12] । संयोगाक्षरसम्भूतिं [13]नैकबीजाक्षरैश्चिताम् ॥१०७॥

॥ ९६ ॥ तुम दोनोंका यह शरीर, यह अवस्था और यह अनुपम शील यदि विद्यासे विभूषित किया जावे तो तुम दोनोंका यह जन्म सफल हो सकता है ॥ ९७ ॥ इस लोकमें विद्यावान् पुरुष पण्डितोंके द्वारा भी सन्मानको प्राप्त होता है और विद्यावती स्त्री भी सर्वश्रेष्ठ पदको प्राप्त होती है ॥ ९८ ॥ विद्या ही मनुष्योंका यश करनेवाली है, विद्या ही पुरुषोंका कल्याण करनेवाली है, अच्छी तरहसे आराधना की गई विद्या देवता ही सब मनोरथोंको पूर्ण करनेवाली है ॥ ९९ ॥ विद्या मनुष्योंके मनोरथोंको पूर्ण करनेवाली कामधेनु है, विद्या ही चिन्तामणि है, विद्या ही धर्म, अर्थ तथा काम रूप फलसे सहित संपदाओंकी परम्परा उत्पन्न करती है ॥ १०० ॥ विद्या ही मनुष्योंका बन्धु है, विद्या ही मित्र है, विद्या ही कल्याण करनेवाली है, विद्या ही साथ साथ जानेवाला धन है और विद्या ही सब प्रयोजनोंको सिद्ध करनेवाली है ॥ १०१ ॥ इसलिये हे पुत्रियो, तुम दोनों विद्या ग्रहण करनेमें प्रयत्न करो क्योंकि तुम दोनोंके विद्या ग्रहण करनेका यही काल है ॥ १०२ ॥ भगवान वृषभदेवने ऐसा कहकर तथा बार बार उन्हें आशीर्वाद देकर सुवर्णके विस्तृत पट्टे पर अपने चित्तमें स्थित श्रुत देवताका पूजनकर स्थापन किया, फिर दोनों हाथोंसे अ आ आदि वर्णमाला लिखकर उन्हें लिपि (लिखनेका) उपदेश दिया और अनुक्रमसे इकाई दहाई आदि अंकोंके द्वारा उन्हें संख्याके ज्ञानका भी उपदेश दिया। भावार्थ—ऐसी प्रसिद्धि है कि भगवान्ने दाहिने हाथसे वर्णमाला और बायें हाथसे संख्या लिखी थी ॥ १०३–१०४ ॥ तदनन्तर जो भगवान्के मुखसे निकली हुई है, जिसमें 'सिद्धं नमः' इस प्रकारका मङ्गलाचरण अत्यन्त स्पष्ट है, जिसका नाम सिद्धमातृका है जो स्वर और व्यञ्जनके भेदसे दो भेदोंको प्राप्त है, जो समस्त विद्याओंमें पाई जाती है, जिसमें अनेक संयुक्त अक्षरोंकी उत्पत्ति है, जो अनेक बीजाक्षरोंसे व्याप्त है और जो शुद्ध मोतियोंकी मालाके समान है ऐसी अकारको आदि लेकर हकार पर्यन्त तथा विसर्ग अनुस्वार जिह्वामूलीय और उपध्मानीय इन अयोगवाह पर्यन्त समस्त शुद्ध अक्षरावलीको बुद्धिमती ब्राह्मी

१ युवयोः । २ सम्मानम् । ३ विद्यावती । ४ त्रिवर्गरूपेण फलिताम् । ५ तत्कारणात् । ६ कुर्वाथाम् । ७ सुवर्णफलके । ८ पूजया । ९ लिपिं ट० । लिपिम् । "लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।" इत्यमरः । १० संख्याज्ञानं अ०, प०, द०, स०, ल० । ११ हकारविसर्जनीयाः [अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमाः] । १२ अविच्छिन्नाम् । संगताम् अ०, प०, स०, म०, । १३ हल्व्यूं [इत्यादिभिः] ।

[1]समवार्दीधरद् ब्राह्मी मेधाविन्यतिसुन्दरी। सुन्दरी गणितं स्थानक्रमैः सम्यगधारयत् ॥१०८॥
न विना वाङ्मयात् किञ्चिदस्ति शास्त्रं कलापि वा। ततो वाङ्मयमेवादौ वेधास्ताभ्यामुपादिशत् ॥१०९॥
सुमेधसावसम्मोहाद् अध्येषातां गुरोर्मुखात्। वाग्देव्याविव निश्शेषं वाङ्मयं [2]ग्रन्थतोऽर्थतः ॥११०॥
[3]पदविद्यामधिच्छन्दोविचितिं [4]वागलङ्कृतिम्। त्रयीं समुदितामेतां तद्विदो वाङ्मयं विदुः ॥१११॥
तदा [5]स्वायम्भुवं नाम पदशास्त्रमभूत् महत्। [6]यत्तत्परशताध्यायैः अतिगम्भीरमब्धिवत् ॥११२॥
छन्दोविचितिमप्येवं नानाध्यायैरुपादिशत्। उक्तात्युक्तादिभेदांश्च षड्विंशतिमदीदृशत् ॥११३॥
प्रस्तारं नष्टमुद्दिष्टमेकद्वित्रिलघुक्रियाम्। संख्यामथाध्वयोगञ्च[7] व्याजहार गिरां पतिः ॥११४॥
उपमादीनलङ्कारास्तन्मार्ग[8]द्वयविस्तरम्। दश[9] प्राणानलङ्कारसंग्रहे विभुरभ्यधात् ॥११५॥
अथैनयोः[10] पदज्ञान[11]दीपिकाभिः प्रकाशिताः। कलाविद्याश्च निश्शेषाः स्वयं परिणतिं ययुः ॥११६॥
इति[12]हाधीतनिश्शेषविद्ये ते गुर्वनुग्रहात्। वाग्देवतावताराय कन्ये पात्रत्वमीयतुः ॥११७॥

पुत्रीने धारण किया और अतिशय सुन्दरी सुन्दरीदेवीने इकाई दहाई आदि स्थानोंके क्रमसे गणित शास्त्रको अच्छी तरह धारण किया ॥ १०५-१०८ ॥ वाङ्मयके बिना न तो कोई शास्त्र है और न कोई कला है इसलिये भगवान् वृषभदेवने सबसे पहले उन पुत्रियोंके लिये वाङ्मयका उपदेश दिया था ॥ १०९ ॥ अत्यन्त बुद्धिमती उन कन्याओंने सरस्वती देवीके समान अपने पिताके मुखसे संशय विपर्यय आदि दोषोंसे रहित शब्द तथा अर्थ रूप समस्त वाङ्मयका अध्ययन किया था ॥ ११० ॥ वाङ्मयके जाननेवाले गणधरादि देव व्याकरण शास्त्र, छन्दशास्त्र और अलंकार शास्त्र इन तीनोंके समूहको वाङ्मय कहते हैं ॥ १११ ॥ उस समय स्वयंभू अर्थात् भगवान् वृषभदेवका बनाया हुआ एक बड़ा भारी व्याकरण शास्त्र प्रसिद्ध हुआ था उसमें सौसे भी अधिक अध्याय थे और वह समुद्रके समान अत्यन्त गम्भीर था ॥ ११२ ॥ इसी प्रकार उन्होंने अनेक अध्यायोंमें छन्दशास्त्रका भी उपदेश दिया था और उसके उक्ता अत्युक्ता आदि छब्बीस भेद भी दिखलाये थे ॥ ११३ ॥ अनेक विद्याओंके अधिपति भगवान्ने प्रस्तार, नष्ट, उद्दिष्ट, एक द्वि त्रि लघु क्रिया, संख्या और अध्वयोग छन्दशास्त्रके इन छह प्रत्ययोंका भी निरूपण किया था ॥ ११४ ॥ भगवान्ने अलंकारोंका संग्रह करते समय अथवा अलंकार-संग्रह ग्रन्थमें उपमा रूपक यमक आदि अलंकारोंका कथन किया था, उनके शब्दालंकार और अर्थालंकार रूप दो मार्गोंका विस्तारके साथ वर्णन किया था और माधुर्य ओज आदि दश प्राण अर्थात् गुणोंका भी निरूपण किया था ॥ ११५ ॥

अथानन्तर ब्राह्मी और सुन्दरी दोनों पुत्रियोंकी पदज्ञान (व्याकरण-ज्ञान) रूपी दीपिकासे प्रकाशित हुई समस्त विद्याएँ और कलाएँ अपने आप ही परिपक्व अवस्थाको प्राप्त हो गई थीं ॥११६॥ इस प्रकार गुरु अथवा पिताके अनुग्रहसे जिनने समस्त विद्याएँ पढ़ ली हैं ऐसी वे दोनों पुत्रियाँ सरस्वती देवीके अवतार लेनेके लिये पात्रताको प्राप्त हुई थीं। भावार्थ—वे इतनी अधिक ज्ञानवती हो गई थीं कि साक्षात् सरस्वती भी उनमें अवतार ले

---

१ सम्यगवधारयति स्म। २ शब्दतः। ३ व्याकरणशास्त्रम्। ४ शब्दालङ्कारम्। ५ स्वायम्भुवं नाम व्याकरणशास्त्रम्। ६ शतात् परे परश्शताः [शतात् पराणि अधिकानि परश्शतानि, परशब्देन समानार्थः। 'परशब्दोऽसन्तः इत्येके। राजदन्तादित्वात्पूर्वनिपातः'। इत्यमोघावृत्तावुक्तम्। वर्चस्कादिषु नमस्कारादय इत्यत्र। इति टिप्पणपुस्तके 'परश्शताः' इति शब्दोपरि टिप्पणी]। ७ मेरुप्रस्तारम्। ८ गौडविदर्भ-मार्गद्वयम्। ९ "श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः॥ इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः। तेषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि॥" १० ब्राह्मी सुन्दर्योः। ११ व्याकरणशास्त्रपरिज्ञानप्रदीपिका। १२ इति ह्यधीत प०, अ०, द०, ल०।

पुत्राणां च यथाम्नायं विनया[1]दानपूर्वकम् । शास्त्राणि व्याजहारैवम् आ[2]नुपूर्व्या जगद्गुरुः ॥११८॥
भरतायार्थ[3]शास्त्रञ्च भरतञ्च ससङ्ग्रहम् । अध्यायैरतिविस्तीर्णैः स्फुटीकृत्य जगौ गुरुः ॥११९॥
विभुर्वृषभसेनाय गीतवाद्यर्थसंग्रहम् । गन्धर्वशास्त्रमाचख्यौ यत्राध्यायाः परश्शतम् ॥१२०॥
अनन्तविजयायाख्यद् विद्यां चित्रकलाश्रिताम् । नानाध्यायशताकीर्णां [4]साकलाः सकलाः कलाः ॥१२१॥
विश्वकर्ममतं चास्मै वास्तुविद्यामुपादिशत् । अध्यायविस्तरस्तत्र बहुभेदोऽवधारितः ॥१२२॥
कामनीतिमथ स्त्रीणां पुरुषाणाञ्च लक्षणम् । [5]आयुर्वेदं धनुर्वेदं तन्त्रं चाश्वेभगोचरम् ॥१२३॥
तथा रत्नपरीक्षां च बाहुबल्याख्यसूनवे । व्याचख्यौ बहुधाम्नातैः[6] अध्यायैरतिविस्तृतैः ॥१२४॥
किमत्र बहुनोक्तेन शास्त्रं लोकोपकारि यत् । तत्सर्वमादिकर्त्तासौ [7]स्वाः समन्वशिषत् [8]प्रजाः ॥१२५॥
समुद्दीपितविद्यस्य काप्यासीद्दीप्तिता विभोः । स्वभावभास्वरस्येव भास्वतः शरदागमे ॥१२६॥
सुतैरधीतनिश्शेषविद्यैरद्युतदीशिता । किरणैरिव तिग्मांशुः [9]आसादितशरद्युतिः ॥१२७॥
पुत्रैरिष्टैः कलत्रैश्च वृतस्य भुवनेशिनः । महान् कालो व्यतीयाय[10] दिव्यैर्भोगैरनारतैः ॥१२८॥
ततः कुमारकालोऽस्य [11]कलितो मुनिसत्तमैः । विंशतिः पूर्वलक्षाणां पूर्यते स्म महाधियः ॥१२९॥

सकती थी ॥११७॥ जगद्गुरु भगवान् वृषभदेवने इसी प्रकार अपने भरत आदि पुत्रोंको भी विनयी बनाकर क्रमसे आम्नायके अनुसार अनेक शास्त्र पढ़ाये ॥११८॥ भगवान्ने भरत पुत्रके लिये अत्यन्त विस्तृत—बड़े बड़े अध्यायोंसे स्पष्ट कर अर्थशास्त्र और संग्रह (प्रकरण) सहित नृत्यशास्त्र पढ़ाया था ॥११९॥ स्वामी वृषभदेवने अपने पुत्र वृषभसेनके लिये जिसमें गाना बजाना आदि अनेक पदार्थोंका संग्रह है और जिसमें सौसे भी अधिक अध्याय हैं ऐसे गन्धर्व शास्त्रका व्याख्यान किया था ॥१२०॥ अनन्तविजय पुत्रके लिये नाना प्रकारके सैकड़ों अध्यायोंसे भरी हुई चित्रकला-सम्बन्धी विद्याका उपदेश दिया और लक्ष्मी या शोभा सहित समस्त कलाओंका निरूपण किया ॥१२१॥ इसी अनन्तविजय पुत्रके लिये उन्होंने सूत्रधारकी विद्या तथा मकान बनाने की विद्याका उपदेश दिया उस विद्याके प्रतिपादक शास्त्रोंमें अनेक अध्यायोंका विस्तार था तथा उसके अनेक भेद थे ॥१२२॥ बाहुबली पुत्रके लिये उन्होंने कामनीति, स्त्री-पुरुषोंके लक्षण, आयुर्वेद, धनुर्वेद, घोड़ा-हाथी आदिके लक्षण जाननेके तन्त्र और रत्नपरीक्षा आदिके शास्त्र अनेक प्रकारके बड़े बड़े अध्यायोंके द्वारा सिखलाये ॥१२३–१२४ ॥ इस विषयमें अधिक कहनेसे क्या प्रयोजन है ? संक्षेपमें इतना ही बस है कि लोकका उपकार करनेवाले जो जो शास्त्र थे भगवान् आदिनाथने वे सब अपने पुत्रोंको सिखलाये थे ॥१२५॥ जिस प्रकार स्वभावसे देदीप्यमान रहनेवाले सूर्यका तेज शरदृऋतुके आनेपर और भी अधिक हो जाता है उसी प्रकार जिन्होंने अपनी समस्त विद्याएँ प्रकाशित कर दी हैं ऐसे भगवान् वृषभदेवका तेज उस समय भारी अद्भुत हो रहा था ॥१२६॥ जिन्होंने समस्त विद्याएँ पढ़ ली हैं ऐसे पुत्रोंसे भगवान वृषभदेव उस समय उस प्रकार सुशोभित हो रहे थे जिस प्रकार कि शरदृऋतुमें अधिक कान्तिको प्राप्त होनेवाला सूर्य अपनी किरणोंसे सुशोभित होता है ॥१२७॥ अपने इष्ट पुत्र और इष्ट स्त्रियोंसे घिरे हुए भगवान् वृषभदेवका बहुत भारी समय निरन्तर अनेक प्रकारके दिव्य भोग भोगते हुए व्यतीत हो गया ॥१२८॥ इस प्रकार अनेक प्रकारके भोगोंका अनुभव करते हुए भगवान्का बीस लाख पूर्व वर्षोंका कुमारकाल पूर्ण हुआ था ऐसी उत्तम मुनि-गणधरदेवने गणना

१ विनयोपदेशपुरस्सरम् । २ परिपाट्या । ३ नीतिशास्त्रम् । ४ सकलाः द० । ५ वैद्यशास्त्रम् । ६ कथितैः । ७ आत्मीयाः । ८ पुत्रान् । ९ शरद्युभिः ट० । –व्याप्तशरन्नभोभिः । १० अतीतमभूत् । ११ कथितः ।

अत्रान्तरे महौषध्यो[1] दीप्तौषध्यश्च पादपाः । सर्वौषधयः कालाज्जाताः प्रक्षीणशक्तिकाः ॥१३०॥
सस्यान्यकृष्टपच्यानि यान्यासन् [2]स्थितये नृणाम् । प्रायस्तान्यपि कालेन ययुर्विरलतां भुवि ॥१३१॥
[3]रसवीर्य[4]विपाकैस्तैः प्रहीणाः पादपा यदा । तदातङ्का[5]दिबाधाभिः प्रजा व्याकुलतां गताः ॥१३२॥
[6]तत्प्रहाणान्मनोवृत्तिं दधाना व्याकुलीकृताम् । नाभिराजमुपासेदुः प्रजा जीवितकाम्यया[7] ॥१३३॥
नाभिराजाज्ञया स्रष्टुस्ततोऽन्तिकमुपाययुः । प्रजाः प्रणतमूर्द्धानो जीवितोपायलिप्सया ॥१३४॥
अथ विज्ञापयामासुरित्युपेत्य सनातनम् । प्रजाः प्रजातसंत्रासाः शरण्यं शरणाश्रिताः ॥१३५॥
वाञ्छन्त्यो जीविकां[8] देव त्वां वयं शरणं श्रिताः । [9]तन्नस्त्रायस्व[10] लोकेश तदुपाय[11]प्रदर्शनात् ॥१३६॥
विभो समूल[12]मुत्सन्नाः [13]पितृकल्पा महाङ्घ्रिपाः । फलन्त्यकृष्टपच्यानि सस्यान्यपि च नाधुना ॥१३७॥
क्षुत्पिपासादिबाधाश्च दुन्वन्त्यस्मान्समुत्थिताः । न क्षमाः क्षणमप्येकं [14]प्राणितुं प्रोज्झिताशनाः ॥१३८॥
शीतातपमहावातप्रवर्षोपप्लवश्च नः । निराश्रयान्दुनोत्यद्य ब्रूहि नस्तत्प्रतिक्रियाम् ॥१३९॥
त्वां देवमादिकर्त्तारं कल्पाङ्घ्रिपमिवोन्नतम् । समाश्रिताः कथं भीतेः पदं [15]स्याम वयं विभोः ॥१४०॥
[16]ततोऽस्माकं यथाद्य स्याज्जीविका निरुपद्रवा । तथोपदेष्टुमुद्योगं कुरु देव प्रसीद नः ॥१४१॥

की है ॥१२९॥ इसी बीचमें कालके प्रभावसे महौषधि, दीप्तौषधि, कल्पवृक्ष तथा सब प्रकारकी औषधियाँ शक्तिहीन हो गई थीं ॥१३०॥ मनुष्योंके निर्वाहके लिये जो बिना बोये हुए उत्पन्न होनेवाले धान्य थे वे भी कालके प्रभावसे पृथिवीमें प्रायः करके विरलताको प्राप्त हो गये थे—जहाँ कहीं कुछ कुछ मात्रामें ही रह गये थे ॥१३१॥ जब कल्पवृक्ष रस, वीर्य और विपाक आदिसे रहित हो गये तब वहाँकी प्रजा रोग आदि अनेक बाधाओंसे व्याकुलताको प्राप्त होने लगी ॥१३२॥ कल्पवृक्षोंके रस, वीर्य आदिके नष्ट होनेसे व्याकुल मनोवृत्तिको धारण करती हुई प्रजा जीवित रहनेकी इच्छासे महाराज नाभिराजके समीप गई ॥१३३॥ तदनन्तर नाभिराजकी आज्ञासे प्रजा भगवान् वृषभनाथके समीप गई और अपने जीवित रहनेके उपाय प्राप्त करनेकी इच्छासे उन्हें मस्तक झुकाकर नमस्कार करने लगी ॥१३४॥ अथानन्तर अन्नादिके नष्ट होनेसे जिसे अनेक प्रकारके भय उत्पन्न हो रहे हैं और जो सबको शरण देनेवाले भगवान्की शरणको प्राप्त हुई है ऐसी प्रजा सनातन—भगवान्के समीप जाकर इस प्रकार निवेदन करने लगी कि ॥१३५॥ हे देव, हम लोग जीविका प्राप्त करनेकी इच्छासे आपकी शरणमें आये हुए हैं इसलिये हे तीन लोकके स्वामी, आप उसके उपाय दिखलाकर हम लोगोंकी रक्षा कीजिये ॥ १३६ ॥ हे विभो, जो कल्पवृक्ष हमारे पिताके समान थे—पिताके समान ही हम लोगोंकी रक्षा करते थे वे सब मूल सहित नष्ट हो गये हैं और जो धान्य बिना बोये ही उत्पन्न होते थे वे भी अब नहीं फलते हैं ॥ १३७ ॥ हे देव, बढ़ती हुई भूख प्यास आदिकी बाधाएँ हम लोगोंको दुखी कर रही हैं । अन्न-पानीसे रहित हुए हम लोग अब एक क्षण भी जीवित रहनेके लिये समर्थ नहीं हैं ॥ १३८ ॥ हे देव, शीत, आतप, महावायु और वर्षा आदिका उपद्रव आश्रयरहित हम लोगोंको दुखी कर रहा है इसलिये आज इन सबके दूर करनेके उपाय कहिये ॥ १३९ ॥ हे विभो, आप इस युगके आदि कर्ता हैं और कल्पवृक्षके समान उन्नत हैं, आपके आश्रित हुए हम लोग भयके स्थान कैसे हो सकते हैं ? ॥ १४० ॥ इसलिये हे देव, जिस प्रकार हमलोगोंकी आजीविका निरुपद्रव हो जावे, आज उसी प्रकार उपदेश देनेका

१ दीप्तौषध्यः । [एतद्रूपाः वृक्षाः] । २ जीवनाय । ३ स्वादुः । ४ परिणमन । ५ सन्तापादि । ६ हानेः । ७ जीवितवाञ्छया । ८ जीवितम् । ९ तत् कारणात् । १० रक्ष । ११ जीवितोपाय । १२ नष्टाः । —मुच्छिन्नाः प०, द० । —मुच्छन्नाः ल० । १३ पितृसदृशाः । १४ जीवितुम् । १५ भवेम । १६ ततः कारणात् ।

श्रुत्वेति तद्वचो दीनं करुणाप्रेरिताशयः । मनः [1]प्रणिदधावेवं भगवानादिपूरुषः ॥१४२॥
पूर्वापरविदेहेषु या स्थितिः समवस्थिता । साद्य प्रवर्त्तनीयात्र ततो जीवन्त्यमूः प्रजाः ॥१४३॥
षट्कर्माणि यथा तत्र यथा वर्णाश्रमस्थितिः । यथा ग्रामगृहादीनां [2]संस्त्यायाश्च [3]पृथग्विधाः ॥१४४॥
तथात्राप्युचिता वृत्तिः उपायैरेभिरङ्गिनाम् । नोपायान्तरमस्त्येषां प्राणिनां जीविकां प्रति ॥१४५॥
कर्मभूरद्य जातेयं व्यतीतौ कल्पभूरुहाम् । ततोऽत्र कर्मभिः षड्भिः प्रजानां जीविकोचिता ॥१४६॥
इत्याकलय्य तत्क्षेमवृत्त्युपायं क्षणं विभुः[4] । मुहुराश्वासयामास मा भैष्टेति तदा प्रजाः ॥१४७॥
अथानु[5]ध्यानमात्रेण विभो शक्रः सहामरैः । प्राप्तस्तज्जीवनोपायानित्यकार्षी[6]द्विभागतः ॥१४८॥
शुभे दिने सुनक्षत्रे सुमुहूर्त्ते शुभोदये । स्वोच्चस्थेषु ग्रहेषूच्चैः आनुकूल्ये जगद्गुरोः ॥१४९॥
कृतप्रथममाङ्गल्ये सुरेन्द्रो जिनमन्दिरम् । न्यवेशयत् पुरस्यास्य मध्ये दिक्ष्वप्यनुक्रमात् ॥१५०॥
कोसलादीन् महादेशान् साकेतादिपुराणि च । सारामसीमनिगमान् खेटादींश्च न्यवेशयत् ॥१५१॥
देशाः सुकोसलावन्तीपुण्ड्रो[7]ड्राश्मकरम्यकाः । कुरुकाशीकलिङ्गाङ्गवङ्गसुह्माः समुद्रकाः ॥१५२॥
काश्मीरोशीनरानर्त्त[8]वत्सपञ्चालमालवाः । दशार्णाः कच्छमगधा विदर्भाः कुरुजाङ्गलम्[9] ॥१५३॥

प्रयत्न कीजिये और हम लोगों पर प्रसन्न हूजिये ॥ १४१ ॥ इस प्रकार प्रजाजनोंके दीन वचन सुनकर जिनका हृदय दयासे प्रेरित हो रहा है ऐसे भगवान् आदिनाथ अपने मनमें ऐसा विचार करने लगे ॥ १४२ ॥ कि पूर्व और पश्चिम विदेह क्षेत्रमें जो स्थिति वर्तमान है वही स्थिति आज यहाँ प्रवृत्त करने योग्य है उसीसे यह प्रजा जीवित रह सकती है ॥ १४३ ॥ वहाँ जिस प्रकार असि मषी आदि छह कर्म हैं, जैसी क्षत्रिय आदि वर्णोंकी स्थिति है और जैसी ग्राम-घर आदिकी पृथक् पृथक् रचना है उसी प्रकार यहाँ पर भी होनी चाहिये । इन्हीं उपायोंसे प्राणियोंकी आजीविका चल सकती है । इनकी आजीविकाके लिये और कोई उपाय नहीं है ॥ १४४–१४५ ॥ कल्पवृक्षोंके नष्ट हो जाने पर अब यह कर्मभूमि प्रकट हुई है, इसलिये यहाँ प्रजाको असि मषी आदि छह कर्मोंके द्वारा ही आजीविका करना उचित है ॥ १४६ ॥ इस प्रकार स्वामी वृषभदेवने क्षणभर प्रजाके कल्याण करनेवाली आजीविकाका उपाय सोचकर उसे बार बार आश्वासन दिया कि तुम भयभीत मत होओ ॥१४७॥ अथानन्तर भगवान्के स्मरण करने मात्रसे देवोंके साथ इन्द्र आया और उसने नीचे लिखे अनुसार विभाग कर प्रजाकी जीविकाके उपाय किये ॥ १४८ ॥ शुभ दिन, शुभ नक्षत्र, शुभ मुहूर्त और शुभ लग्नके समय तथा सूर्य आदि ग्रहोंके अपने अपने उच्च स्थानोंमें स्थित रहने और जगद्गुरु भगवान्के हर एक प्रकारकी अनुकूलता होने पर इन्द्रने प्रथम ही माङ्गलिक कार्य किया और फिर उसी अयोध्या पुरीके बीचमें जिनमन्दिरकी रचना की । इसके बाद पूर्व दक्षिण पश्चिम तथा उत्तर इस प्रकार चारों दिशाओंमें भी यथाक्रमसे जिनमन्दिरोंकी रचना की ॥ १४९–१५० ॥ तदनन्तर कौशल आदि महादेश, अयोध्या आदि नगर, वन और सीमा सहित गाँव तथा खेड़ों आदिकी रचना की थी ॥ १५१ ॥ सुकोशल, अवन्ती, पुण्ड्र, उंड्र, अश्मक, रम्यक, कुरु, काशी, कलिङ्ग, अङ्ग, वङ्ग, सुह्म, समुद्रक, काश्मीर, उशीनर, आनर्त, वत्स, पंचाल, मालव, दशार्ण, कच्छ, मगध, विदर्भ, कुरुजांगल, करहाट, महाराष्ट्र, सुराष्ट्र, आभीर, कोंकण, वनवास, आंध्र, कर्णाट, कोशल, चोल, केरल, दारु,

---

१ एकाग्रं चकार । २ सन्निवेशाः । रचनाविशेष इत्यर्थः । ३ नानाविधाः । ४ प्रभुः । ५ स्मरण । ६ विभागशः अ०, प०, द०, स०, ट० । निभागात् । ७ पुण्ड्रोड्रा । ८ –वर्त्त– अ०, प०, द० । ९ कुरुजाङ्गलाः स० ।

करहाटमहाराष्ट्रसुराष्ट्राभीरकोङ्कणाः[1] । वनवासान्ध्रकर्णाटकोसलाश्चोलकेरलाः ॥१५४॥
दार्वाभिसारसौवीरशूरसेनापरान्तकाः । विदेहसिन्धुगान्धारयवनाश्चेदिपल्लवाः ॥१५५॥
काम्बोजा[2]रट्टबाह्लीकतुरुष्कशककेकयाः । निवेशितास्तथान्येऽपि विभक्ता विषयास्तदा ॥१५६॥
[3]अदेवमातृकाः केचिद् विषया देवमातृकाः । परे [4]साधारणाः केचिद् यथास्वं ते निवेशिताः ॥१५७॥
अभूतपूर्वैरुद्भूतैः भूरभात्तैर्जनास्पदैः[5] । दिवः खण्डैरिवायातैः कौतुकाद्धरणीतलम् ॥१५८॥
देशैः [6]साधारणानूपजाङ्गलैस्तैस्तता मही । रेजे [7]रजतभूभर्तु[8]: [8]आरादा [9]च पयोनिधेः ॥१५९॥
तदन्तेष्वन्तपालानां दुर्गाणि परितोऽभवन् । स्थानानि लोकपालानामिव स्वर्धामसीमसु ॥१६०॥
तदन्तरालदेशाश्च बभूवुरनुरक्षिताः । लुब्धकारण्यचरक[10]पुलिन्दशबरादिभिः ॥१६१॥
मध्ये जनपदं रेजू राजधान्यः परिष्कृताः । वप्रप्राकारपरिखागोपुराट्टालकादिभिः ॥१६२॥
तानि [11]स्थानीयसंज्ञानि [12]दुर्गाण्यावृत्य सर्वतः । ग्रामादीनां निवेशोऽभूद् [13]यथाभिहितलक्ष्मणाम् ॥१६३॥
ग्रामावृतिपरिक्षेपमात्राः[14] स्युरुचिता[15]श्रयाः । शूद्रकर्षकभूयिष्ठाः [16]सारामाः सजलाशयाः ॥१६४॥
[17]ग्रामाः [ग्रामः] [18]कुलशतेनेष्टो [19]निकृष्टः समधिष्ठितः । [20]परस्तत्पञ्च[21]शत्या स्यात् सुसमृद्धकृषीबलः १६५

अभिसार, सौवीर, शूरसेन, अपरान्तक, विदेह, सिन्धु, गान्धार, यवन, चेदि, पल्लव, काम्बोज, आरट्ट, वाल्हीक, तुरुष्क, शक और केकय इन देशोंकी रचना की तथा इनके सिवाय उस समय और भी अनेक देशोंका विभाग किया ॥ १५२-१५६ ॥ इन्द्रने उन देशोंमेंसे कितने ही देश यथा सम्भव रूपसे अदेवमातृक अर्थात् नदी-नहरों आदिसे सींचे जानेवाले, कितने ही देश देवमातृक अर्थात् वर्षाके जलसे सींचे जानेवाले और कितने ही देश साधारण अर्थात् दोनोंसे सींचे जानेवाले निर्माण किये थे ॥ १५७ ॥ जो पहले नहीं थे नवीन ही प्रकट हुए थे ऐसे देशोंसे वह पृथिवीतल ऐसा सुशोभित होता था मानो कौतुकवश स्वर्गके टुकड़े ही आये हों ॥ १५८ ॥ विजयार्ध पर्वतके समीपसे लेकर समुद्रपर्यन्त कितने ही देश साधारण थे, कितने ही बहुत जलवाले थे और कितने ही जलकी दुर्लभतासे सहित थे, उन देशोंसे व्याप्त हुई पृथिवी भारी सुशोभित होती थी ॥ १५९ ॥ जिस प्रकार स्वर्गके धामों-स्थानोंकी सीमाओं पर लोकपाल देवोंके स्थान होते हैं उसी प्रकार उन देशोंकी अन्त सीमाओं पर भी सब ओर अन्तपाल अर्थात् सीमारक्षक पुरुषोंके किले बने हुए थे ॥ १६० ॥ उन देशोंके मध्यमें और भी अनेक देश थे जो लुब्धक, आरण्य, चरट, पुलिन्द तथा शबर आदि म्लेच्छ जातिके लोगोंके द्वारा रक्षित रहते थे ॥ १६१ ॥ उन देशोंके मध्यभागमें कोट, प्राकार, परिखा, गोपुर और अटारी आदिसे शोभायमान राजधानी सुशोभित हो रही थीं ॥ १६२ ॥ जिनका दूसरा नाम स्थानीय है ऐसे राजधानीरूपी किलेको घेरकर सब ओर शास्त्रोक्त लक्षणवाले गाँवों आदिकी रचना हुई थी ॥ १६३ ॥ जिनमें बाड़से घिरे हुए घर हों, जिनमें अधिकतर शूद्र और किसान लोग रहते हों तथा जो बगीचा और तालाबोंसे सहित हों, उन्हें ग्राम कहते हैं ॥ १६४ ॥ जिसमें सौ घर हों उसे निकृष्ट अर्थात् छोटा गाँव कहते हैं तथा जिसमें पाँच सौ घर हों और

१ -कोङ्कणाः ब० । २ कम्बोजारङ्क- स० । ३ नदीमातृकाः । ४ नदीमातृकदेवमातृक-मिश्राः । ५ देशैः । ६ जलप्रायकर्दमप्रायैः । ७ विजयार्द्धस्य । ८ समीपात् । ९ समुद्रपर्यन्तम् । १० -चरट प०, द०, म०, ल० । ११ प्राक्तनश्लोकोक्तराजधानीनामेव स्थानीयसञ्ज्ञानि । १२ स्थानीय-सञ्ज्ञान्यावृत्य सर्वतस्तिष्ठन्तीति सम्बन्धः । १३ यथोक्तलक्षणानाम् । १४ मात्राभिरुचिता- अ०, स०, ल०, म० । १५ योग्यगृहाः । १६ आरामसहिताः । १७ ग्रामः द०, स०, म०, ल०, अ०, प०, ब० । १८ गृहशतेन । १९ जघन्यः । २० उत्कृष्टः । २१ गृहपञ्चशतेन ।

क्रोशद्विक्रोशसीमानो ग्रामाः स्युरधमोत्तमाः । [1]सम्पन्नसस्यसुक्षेत्राः [2]प्रभूततयवसोदकाः ॥१६६॥
सरिद्‌गिरिदरी[3]गृष्टिक्षीरकण्टकशाखिनः । वनानि सेतवश्चेति तेषां सीमोपलक्षणम् ॥१६७॥
तत्कर्तृभोक्तृनियमो [4]योगक्षेमानुचिन्तनम् । विष्टिदण्डकराणाञ्च निबन्धो [5]राजसाद्भवेत् ॥१६८॥
परिखागोपुराट्टालवप्राकारमण्डितम् । नानाभवनविन्यासं सोद्यानं सजलाशयम् ॥१६९॥
पुरमेवंविधं शस्तम् उचितोद्देशसुस्थितम् । [6]पूर्वोत्तरप्लवाम्भस्कं [7]प्रधानपुरुषोचितम् ॥१७०॥
सरिद्गिरिभ्यां संरुद्धं [8]खेटमाहुर्मनीषिणः । केवलं गिरिसंरुद्धं खर्वटं तत्प्रचक्षते ॥१७१॥
मडम्बमामनन्ति ज्ञाः [9]पञ्चग्रामशतीवृतम् । पत्तनं तत्समुद्रान्ते यन्नौभिरवतीर्यते ॥१७२॥
भवेद् द्रोणमुखं नाम्ना निम्नगातटमाश्रितम् । संवाहस्तु शिरोव्यूढधान्यसञ्चय इष्यते ॥१७३॥
[10]पुटभेदनभेदानाम् अमीषाञ्च क्वचित्क्वचित् । सन्निवेशो[11]ऽभवत् पृथ्व्यां यथोद्देशमितोऽमुतः ॥१७४॥
शतान्यष्टौ च चत्वारि द्वे च स्युर्ग्रामसंख्यया । राजधान्यास्तथा द्रोणमुखखर्वटयोः क्रमात् ॥१७५॥

जिसके किसान धनसम्पन्न हों उसे बड़ा गाँव कहते हैं ॥ १६५ ॥ छोटे गाँवोंकी सीमा एक कोसकी और बड़े गाँवोंकी सीमा दो कोसकी होती है। इन गाँवोंके धानके खेत सदा सम्पन्न रहते हैं और इनमें घास तथा जल भी अधिक रहता है ॥ १६६ ॥ नदी, पहाड़, गुफा, श्मशान क्षीरवृक्ष अर्थात् थूवर आदिके वृक्ष, बबूल आदि कटीले वृक्ष, वन और पुल ये सब उन गाँवोंकी सीमाके चिह्न कहलाते हैं अर्थात् नदी आदिसे गाँवोंकी सीमाका विभाग किया जाता है ॥ १६७॥ गाँवके बसाने और उपभोग करनेवालोंके योग्य नियम बनाना, नवीन वस्तुके बनाने और पुरानी वस्तुकी रक्षा करनेके उपाय, वहाँके लोगोंसे बेगार कराना, अपराधियोंका दण्ड करना तथा जनता से कर वसूल करना आदि कार्य राजाओंके आधीन रहते थे ॥ १६८ ॥ जो परिखा, गोपुर, अटारी, कोट और प्राकारसे सुशोभित हो, जिसमें अनेक भवन बने हुए हों, जो बगीचे और तालाबोंसे सहित हो, जो उत्तम रीतिसे अच्छे स्थान पर बसा हुआ हो, जिसमें पानीका प्रवाह पूर्व और उत्तरके बीचवाली ईशान दिशाकी ओर हो और जो प्रधान पुरुषोंके रहनेके योग्य हो वह प्रशंसनीय पुर अथवा नगर कहलाता है ॥ १६९-१७० ॥ जो नगर नदी और पर्वतसे घिरा हुआ हो उसे बुद्धिमान् पुरुष खेट कहते हैं और जो केवल पर्वतसे घिरा हुआ हो उसे खर्वट कहते हैं ॥ १७१ ॥ जो पाँच सौ गाँवोंसे घिरा हो उसे पण्डितजन मडम्ब मानते हैं और जो समुद्रके किनारे हो तथा जहाँ पर लोग नावोंके द्वारा उतरते हैं—(आते जाते हैं) उसे पत्तन कहते हैं ॥ १७२ ॥ जो किसी नदीके किनारे पर हो उसे द्रोणमुख कहते हैं और जहाँ मस्तक पर्यन्त ऊँचे ऊँचे धान्यके ढेर लगे हों वह संवाह कहलाता है ॥ १७३ ॥ इस प्रकार पृथिवी पर जहाँ तहाँ अपने अपने योग्य स्थानोंके अनुसार कहीं कहीं पर ऊपर कहे हुए गाँव नगर आदिकी रचना हुई थी ॥ १७४ ॥ एक राजधानीमें आठ सौ गाँव होते हैं, एक द्रोणमुखमें चार सौ गाँव होते हैं और एक खर्वटमें दो सौ गाँव होते हैं। दश गाँवोंके बीच जो एक बड़ा भारी गाँव होता है उसे संग्रह (जहाँ पर हर एक वस्तुओंका संग्रह रखा जाता हो) कहते हैं। इसी प्रकार घोष तथा आकर आदिके लक्षणोंकी भी कल्पना कर लेनी चाहिये अर्थात् जहाँ पर बहुत

१ फलित। २ प्रचुरतृणजलाः। ३ स्मशानम्। -भृष्टि- प०, द०, म०, ल०। -सृष्टि- अ०, स०। ४ अलब्धलाभो योगः, लब्धपरिरक्षणं क्षेमस्तयोः चिन्तनम्। ५ नृपाधीनं भवेत्। ६ पूर्वोत्तरप्रवाहजलम्। 'नगरके मार्गका जल पूर्व और उत्तरमें बहे तो नगरनिवासियोंको लाभ हैं अथवा पूर्वोत्तरशब्दवाच्य ईशान दिशामें बहे तो नगरनिवासियोंको अत्यन्त लाभ है।' इति हिन्दीभाषायां स्पष्टोऽर्थः। ७ नृपादियोग्यम्। ८ खेड- म०, ल०। ९ पञ्चग्रामशतीपरिवेष्टितम्। १० पत्तनम्। ११ -भवेत् व०, द०।

[1]दशग्राम्यास्तु मध्ये यो महान् ग्रामः स संग्रहः । तथा [2]घोषकरादीनामपि लक्ष्म विकल्प्यताम् ॥१७६॥
[3]पुरां विभागमित्युच्चैः कुर्वन् गीर्वाणनायकः । तदा पुरन्दरख्यातिम् अगादन्वर्थतां गताम् ॥१७७॥
ततः प्रजा निवेश्यैषु स्थानेषु स्त्रष्टुराज्ञया । जगाम कृतकार्यो गां[4] मघवानुज्ञया प्रभोः ॥१७८॥
असिर्मषिः कृषिर्विद्या वाणिज्यं शिल्पमेव च । कर्माणीमानि षोढा स्युः प्रजाजीवनहेतवः[5] ॥१७९॥
तत्र वृत्तिं प्रजानां स भगवान् मतिकौशलात् । [6]उपादिक्षत् सरागो हि स तदासीज्जगद्गुरुः ॥१८०॥
तत्रासिकर्म सेवायां मषिर्लिपिविधौ स्मृता । कृषिर्भूकर्षणे प्रोक्ता विद्या शास्त्रोपजीवने ॥१८१॥
वाणिज्यं वणिजां कर्म शिल्पं स्यात् करकौशलम् । तच्च चित्रकलापत्रच्छेदादि[7] बहुधा स्मृतम् ॥१८२॥
उत्पादितास्त्रयो वर्णाःतदा तेनादिवेधसा । क्षत्रिया वणिजः शूद्राः क्षतत्राणादिभिर्गुणैः ॥१८३॥
क्षत्रियाः शस्त्रजीवित्वम् अनुभूय तदाभवन् । वैश्याश्च कृषिवाणिज्यपाशुपाल्योपजीविताः[8] ॥१८४॥
तेषां शुश्रूषणाच्छूद्रास्ते द्विधा कार्वकारवः । कारवो रजकाद्याः स्युः ततोऽन्ये स्युरकारवः ॥१८५॥
कारवोऽपि मता द्वेधा स्पृश्यास्पृश्यविकल्पतः । तत्रास्पृश्याः प्रजाबाह्याः स्पृश्याः स्युः [9]कर्त्तकादयः ॥१८६॥

घोष (अहीर) रहते हैं उसे घोष कहते हैं और जहाँपर सोने चाँदी आदिकी खान हुआ करती है उसे आकर कहते हैं ॥ १७५-१७६ ॥ इस प्रकार इन्द्रने बड़े अच्छे ढंगसे नगर, गाँवों आदिका विभाग किया था इसलिये वह उसी समयसे पुरंदर इस सार्थक नामको प्राप्त हुआ था ॥१७७॥ तदनन्तर इन्द्र भगवान्‌की आज्ञासे इन नगर, गाँव आदि स्थानोंमें प्रजाको बसाकर कृतकृत्य होता हुआ प्रभुकी आज्ञा लेकर स्वर्गको चला गया ॥१७८॥ असि, मषि, कृषि, विद्या, वाणिज्य और शिल्प ये छह कार्य प्रजाकी आजीविकाके कारण हैं । भगवान् वृषभदेवने अपनी बुद्धिकी कुशलतासे प्रजाके लिये इन्हीं छह कर्मोंद्वारा वृत्ति (आजीविका) करनेका उपदेश दिया था सो ठीक ही है क्योंकि उस समय जगद्गुरु भगवान् सरागी ही थे वीतराग नहीं थे । भावार्थ– सांसारिक कार्योंका उपदेश सराग अवस्थामें दिया जा सकता है ॥ १७९-१८० ॥ उन छह कर्मोंमेंसे तलवार आदि शस्त्र धारणकर सेवा करना असिकर्म कहलाता है, लिखकर आजीविका करना मषिकर्म कहलाता है, जमीनको जोतना-बोना कृषिकर्म कहलाता है, शास्त्र अर्थात् पढ़ाकर या नृत्य-गायन आदिके द्वारा आजीविका करना विद्याकर्म है, व्यापार करना वाणिज्य है और हस्तकी कुशलतासे जीविका करना शिल्पकर्म है वह शिल्पकर्म चित्र खींचना, फूल-पत्ते काटना आदिकी अपेक्षा अनेक प्रकारका माना गया है ॥ १८१-१८२ ॥ उसी समय आदि ब्रह्मा भगवान् वृषभदेवने तीन वर्णोंकी स्थापना की थी जो कि क्षतत्राण अर्थात् विपत्तिसे रक्षा करना आदि गुणोंके द्वारा क्रमसे क्षत्रिय, वैश्य तथा शूद्र कहलाते थे ॥१८३॥ उस समय जो शस्त्र धारणकर आजीविका करते थे वे क्षत्रिय हुए, जो खेती व्यापार तथा पशुपालन आदिके द्वारा जीविका करते थे वे वैश्य कहलाते थे और जो उनकी सेवा शुश्रूषा करते थे वे शूद्र कहलाते थे । वे शूद्र दो प्रकारके थे—एक कारु और दूसरा अकारु । धोबी आदि शूद्र कारु कहलाते थे और उनसे भिन्न अकारु कहलाते थे । कारु शूद्र भी स्पृश्य तथा अस्पृश्यके भेदसे दो प्रकारके माने गये हैं उनमें जो प्रजासे बाहर रहते हैं उन्हें अस्पृश्य अर्थात् स्पर्श करनेके अयोग्य कहते हैं और नाई

१ दशग्रामसमाहारस्य । २ "घोष आभीरपल्ली स्यात्" इत्यमरः । ३ नगराणाम् । ४ स्वर्गम् । ५ हेतवे अ०, म०, ल० । ६ उपादिशत् म०, ल० । ७ पत्रच्छेद्यादि अ०, प०, स०, म०, द०, ल० । ८ –जीविनः अ०, प०, म०, ब०, ल० । ९ 'शालिको मालिकश्चैव कुम्भकारस्तिलंतुदः । नापितश्चेति पञ्चामी भवन्ति स्पृश्यकारुकाः ॥ रजकस्तक्षकश्चैवायस्कारो लोहकारकः । स्वर्णकारश्च पञ्चैते भवन्त्यस्पृश्यकारुकाः ॥" [एतौ श्लोकौ 'द' पुस्तकेऽप्युल्लिखितौ] ।

यथास्वं स्वोचितं कर्म प्रजा [1]दधुरसङ्करम् । विवाहजातिसम्बन्धव्यवहारश्च [2]तन्मतम् ॥१८७॥
यावती जगती[3]वृत्तिः अपापोपहता च या । सा सर्वास्य मतेनासीत् स हि धाता [4]सनातनः ॥१८८॥
युगादिब्रह्मणा तेन यदित्थं स कृतो युगः । ततः कृतयुगं नाम्ना तं पुराणविदो विदुः ॥१८९॥
आषाढमासबहुलप्रतिपद्दिवसे कृती । कृत्वा कृतयुगारम्भं प्राजापत्यमुपेयिवान् ॥१९०॥
कियत्यपि गते काले षट्कर्मविनियोगतः । यदा सौस्थित्यमायाताः प्रजाः क्षेमेण योजिताः ॥१९१॥
तदास्याविरभूद् द्यावापृथिव्योः प्राभवं महत् । आधिराज्येऽभिषिक्तस्य सुरैरागत्य सत्वरम् ॥१९२॥
सुरैः कृतादरैर्दिव्यैः सलिलैरादिवेधसः । कृतोऽभिषेक इत्येव वर्णनास्तु किमन्यया ॥१९३॥
तथाप्यनूद्यते[5] किञ्चित् [6]तद्गतं वर्णनान्तरम् । सुप्रतीतमपि प्रायो यन्नावैति [7]पृथग्जनः ॥१९४॥
तदा किल जगद्विश्वं बभूवानन्दनिर्भरम् । दिवोऽवा[8]तारिषुर्देवाः पुरोधाय[9] पुरन्दरम् १९५॥
कृतोपशोभमभवत् पुरं साकेतसाह्वयम् । हर्म्याग्रभूमिकाबद्धकेतुमालाकुलाम्बरम् ॥१९६॥
तदानन्दमहाभेर्यः प्रणेदुर्नृपमन्दिरे । मङ्गलानि जगुर्वारनार्यो नेटुः सुराङ्गनाः ॥१९७॥
सुरवैतालिकाः[10] पेठुः [11]उत्साहान् सह मङ्गलैः । प्रचक्रुरमरास्तोषाज्जय जीवेति घोषणाम् ॥१९८॥

वगैरहको स्पृश्य अर्थात् स्पर्श करनेके योग्य कहते हैं ॥१८४-१८६॥ उस समय प्रजा अपने अपने योग्य कर्मोंको यथा योग्यरूपसे करती थी। अपने वर्णकी निश्चित आजीविकाको छोड़कर कोई दूसरी आजीविका नहीं करता था इसलिये उनके कार्योंमें कभी संकर (मिलावट) नहीं होता था। उनके विवाह, जाति सम्बन्ध तथा व्यवहार आदि सभी कार्य भगवान् आदिनाथकी आज्ञानुसार ही होते थे ॥१८७॥ उस समय संसारमें जितने पापरहित आजीविकाके उपाय थे वे सब भगवान् वृषभदेवकी संमतिसे प्रवृत्त हुए थे सो ठीक है क्योंकि सनातन ब्रह्मा भगवान् वृषभदेव ही हैं ॥१८८॥ चूँकि युगके आदि ब्रह्मा भगवान् वृषभदेवने इस प्रकार कर्मयुगका प्रारम्भ किया था इसलिये पुराणके जाननेवाले उन्हें कृतयुग नामसे जानते हैं ॥१८९॥ कृतकृत्य भगवान् वृषभदेव आषाढ़मासके कृष्णपक्षकी प्रतिपदाके दिन कृतयुगका प्रारम्भ करके प्राजापत्य (प्रजापतिपने)को प्राप्त हुए थे अर्थात् प्रजापति कहलाने लगे थे ॥१९०॥ इस प्रकार जब कितना ही समय व्यतीत हो गया और छह कर्मोंकी व्यवस्थासे जब प्रजा कुशलतापूर्वक सुखसे रहने लगी तब देवोंने आकर शीघ्र ही उनका सम्राट् पदपर अभिषेक किया उस समय उनका प्रभाव स्वर्गलोक और पृथिवीलोकमें खूब ही प्रकट हो रहा था ॥१९१-१९२॥ यद्यपि भगवान्के राज्याभिषेकका अन्य-विशेष वर्णन करनेसे कोई लाभ नहीं है इतना वर्णन कर देना ही बहुत है कि आदरसे भरे हुए देवोंने दिव्यजलसे उन आदि ब्रह्मा भगवान् वृषभदेवका अभिषेक किया था तथापि उसका कुछ अन्य वर्णन कर दिया जाता है क्योंकि प्रायः साधारण मनुष्य अत्यन्त प्रसिद्ध बातको भी नहीं जानते हैं ॥१९३-१९४॥ उस समय समस्त संसार आनन्दसे भर गया था, देवलोग इन्द्रको आगे कर स्वर्गसे अवतीर्ण हुए थे—उतरकर अयोध्या पुरी आये थे ॥ १९५ ॥ उस समय अयोध्यापुरी खूब ही सजाई गई थी। उसके मकानोंके अग्रभाग भर बाँधी गई पताकाओंसे समस्त आकाश भर गया था ॥ १९६ ॥ उस समय राजमन्दिरमें बड़ी बड़ी आनन्द-भेरियाँ बज रही थीं, वारस्त्रियाँ मंगलगान गा रही थीं और देवांगनाएँ नृत्य कर रही थीं ॥ १९७ ॥ देवोंके बन्दीजन मंगलोंके साथ साथ भगवान्के पराक्रम पढ़ रहे थे और देवलोग संतोषसे

१ दध्यु- म०, ल०। २ तत्पुरुनाथमतं यथा भवति तथा। ३ जगतो वृत्ति- अ०, प०, स०, म०, द०। ४ नित्यः। ५ उच्यते। ६ अभिषेकप्राप्तम्। ७ साधारणजनः। ८ अवतरन्ति स्म। ९ अग्रे कृत्वा। १० बोधकराः। ११ वीर्याणि।

प्रथमं पृथिवीमध्ये मृत्स्नारचितवेदिके । सुरशिल्पिसमारब्धपरार्ध्यानन्दमण्डपे ॥१९९॥
रत्नचूर्णचयन्यस्त[1]रङ्गबल्युपचित्रिते । [2]प्रत्यग्रोद्भिन्नविक्षिप्तसुमनःप्रकराञ्चिते ॥२००॥
मणिकुट्टिमसङ्क्रान्तबिम्बमौक्तिकलम्बने । लसद्वितानकक्षौम[3]च्छायाचित्रितरङ्गके ॥२०१॥
धृतमङ्गलनाकस्त्रीरुद्धसञ्चारवर्तिनि [वर्त्मनि] । पर्यन्तनिहितानल्पमङ्गलद्रव्यसम्पदि ॥२०२॥
सुरवारवधूहस्तविधूतचलचामरे । अन्योन्यहस्तसङ्क्रान्तनानास्नानपरिच्छदे[4] ॥२०३॥
सलीलपदविन्याससञ्चरन्नाककामिनी । रणन्नूपुरझङ्कारमुखरीकृतदिङ्मुखे ॥२०४॥
नृपाङ्गणमहीरङ्गे वृतमङ्गलसंग्रहे । निवेश्य प्राङ्मुखं देवम् उचिते हरिविष्टरे ॥२०५॥
गन्धर्वारब्धसङ्गीतमृदङ्गामन्द्रनिःस्वने । त्रिविष्टपकुटीक्रोडम्[5] आक्रामति सदिक्तटम् ॥२०६॥
नृत्यन्नाकाङ्गनापाठ्य[6]निस्स्वनानुगतस्वरम् । गायन्तीषु यशो जिष्णोः[7] किन्नरीषु [8]श्रवस्सुखम् ॥२०७॥
ततोऽभिषेचनं भर्तुः[9] कर्तुमारेभिरे[9]ऽमराः । शातकुम्भविनिर्माणैः कुम्भैस्तीर्थाम्बुसंभृतैः ॥२०८॥
गङ्गासिन्ध्वोर्महानद्योः अप्राप्य धरणीतलम् । प्रपाते हिमवत्कूटाद् यदम्बु समुपाहृतम् ॥२०९॥
यच्च गाङ्गं पयः स्वच्छं गङ्गाकुण्डात् समाहृतम् । सिन्धुकुण्डादुपानीतं सिन्धोर्यत्[10]कमपङ्ककम् ॥२१०॥
[11]शेषव्योमापगानाञ्च सलिलं यदनाविलम्[12] । [13]तत्तत्कुण्डतदापात[14]समासादितजन्मकम् ॥२११॥

'जय जीव', इस प्रकारकी घोषणा कर रहे थे ॥ १९८ ॥ राज्याभिषेकके प्रथम ही पृथिवीके मध्यभागमें जहाँ मिट्टीकी वेदी बनाई गई थी और उस वेदी पर जहाँ देव-कारीगरोंने बहुमूल्य—श्रेष्ठ आनन्दमण्डप बनाया था, जो रत्नोंके चूर्णसमूहसे बनी हुई रंगावलीसे चित्रित हो रहा था, जो नवीन खिले हुए बिखेरे गये पुष्पोंके समूहसे सुशोभित था, जहाँ मणियोंसे जड़ी हुई ज़मीनमें ऊपर लटकते हुए मोतियोंका प्रतिबिम्ब पड़ रहा था, जहाँ रेशमी वस्त्रके शोभायमान चँदोवाकी छायासे रंगभूमि चित्रित हो रही थी, जहाँ मङ्गलद्रव्योंको धारण करनेवाली देवांगनाओंसे आने-जानेका मार्ग रुक गया था, जहाँ समीपमें बड़े बड़े मंगलद्रव्य रखे हुए थे, जहाँ देवोंकी अप्सराएँ अपने हाथोंसे चंचल चमर ढोल रही थीं, जहाँ स्नानकी सामग्रीको लोग परस्पर एक दूसरेके हाथमें दे रहे थे, जहाँ लीलापूर्वक पैर रखकर इधर-उधर चलती हुई देवांगनाओंके रुनझुन शब्द करते हुए नुपुरोंकी झनकारसे दशों दिशाएँ शब्दायमान हो रही थीं, और जहाँ अनेक मंगलद्रव्योंका संग्रह हो रहा था ऐसे राजमहलके आँगनरूपी रंगभूमिमें योग्य सिंहासन पर पूर्व दिशाकी ओर मुख करके भगवान् वृषभदेवको बैठाया और जब गन्धर्व देवोंके द्वारा प्रारम्भ किये हुए संगीतके समय होनेवाला मृदंगका गम्भीर शब्द समस्त दिक्तटोंके साथ साथ तीन लोकरूपी कुटीके मध्यमें व्याप्त हो रहा था तथा नृत्य करती हुई देवांगनाओंके पढ़े जानेवाले संगीतके स्वरमें स्वर मिलाकर किन्नर जातिकी देवियाँ कानोंको सुख देनेवाला भगवान्का यश गा रही थीं उस समय देवोंने तीर्थोदकसे भरे हुए सुवर्णके कलशोंसे भगवान् वृषभदेवका अभिषेक करना प्रारम्भ किया ॥ १९९–२०८ ॥ भगवान्के राज्याभिषेकके लिये गङ्गा और सिन्धु इन दोनों महानदियोंका वह जल लाया गया था जो हिमवत्पर्वतकी शिखरसे धारा रूपमें नीचे गिर रहा था तथा जिसने पृथिवीतलको छुआ तक भी नहीं था। भावार्थ—नीचे गिरनेसे पहले ही जो बर्तनोंमें भर लिया गया था ॥ २०९ ॥ इसके सिवाय गंगाकुण्डसे गङ्गा नदीका स्वच्छ जल लाया गया था और सिन्धुकुण्डसे सिन्धु नदीका निर्मल जल लाया गया था ॥ २१० ॥ इसी प्रकार ऊपरसे पड़ती हुई अन्य नदियोंका स्वच्छ जल भी उनके गिरनेके

---

१ रचित । २ नवविकसित । ३ दुकूल । ४ परिकरे । ५ मध्यम् । ६ गद्यपद्यादि । ७ जिनेन्द्रस्य । ८ श्रवणरमणीयम् यथा भवति तथा । ९ उपक्रमं चक्रिरे । १० जलम् । ११ रोहिद्रोहितास्यादीनाम् । १२ अकलुषम् । १३ तानि च तानि कुण्डानि । १४ सम्प्राप्तजननम् ।

श्रीदेवीभिर्यदानीतं पद्मादिसरसां पयः । हेमारविन्दकिञ्जल्कपुञ्जसञ्जातरञ्जनम् ॥२१२॥
यद्वारि [1]सारसं हारिकह्लारस्वादु[2] सोत्पलम् । यच्च [3]तन्मौक्तिकोद्गार[4]शारं [5]लावणसैन्धवम् ॥२१३॥
यास्ता नन्दीश्वरद्वीपे[6] वाप्यो नन्दोत्तरादयः । सुप्रसन्नोदकास्तासाम् आपो याश्च विकल्मषाः ॥२१४॥
यच्चाम्भः सम्भृतं क्षीरसिन्धोर्नन्दीश्वरार्णवात् । स्वयम्भूरमणाब्धेश्च दिव्यैः कुम्भैर्हिरण्मयैः ॥२१५॥
इत्याम्ना[7]तैर्जलैरेभिः अभिषिक्तो जगद्गुरुः । स्वयंपूततमैरङ्गैः [8]अपुनात्तानि केवलम् ॥२१६॥
सुरैरावर्जिता वारां धारा मूर्ध्नि विभोरभात् । राजलक्ष्म्या [9]निवेशोऽयमिति धारेव पातिता ॥२१७॥
चराचरगुरोर्मूर्ध्नि पतन्त्यो रेजुरप्छटाः । जगत्तापच्छिदः स्वच्छा गुणानामिव सम्पदः ॥२१८॥
सुरेन्द्रैरभिषिक्तस्य सलिलैः [10]सौरसैन्धवैः । निसर्गशुचिगात्रस्य पराशुद्धिरभूद् विभोः ॥२१९॥
नाकीन्द्राः क्षालयाञ्चक्रुः विभोर्नाङ्गानि केवलम् । प्रेक्षकाणां मनोवृत्तिं नेत्राण्यप[11]घनान्यपि ॥२२०॥
नृत्यत्सुराङ्गनापाङ्गशरास्तस्मिन् प्लवेऽम्भसाम् । [12]पायिता [13]नु जलं तीव्रं यच्चेतांस्यभिदन्[14] नृणाम् ॥२२१॥

कुण्डोंसे लाया गया था ॥ २११ ॥ श्री ह्री आदि देवियाँ भी पद्म आदि सरोवरोंका जल लाई थीं जो कि सुवर्णमय कमलोंकी केशरके समूहसे पीतवर्ण हो रहा था ॥ २१२ ॥ सायंकालके समय खिलनेवाले सुगन्धित कमलोंकी सुगन्धसे मधुर, अतिशय मनोहर और नील कमलों सहित तालाबोंका जल लाया गया था। जो बाहर प्रकट हुए मोतियोंके समूहसे अत्यन्त श्रेष्ठ है ऐसा लवणसमुद्रका जल भी लाया गया था ॥ २१३ ॥ नन्दीश्वर द्वीपमें जो अत्यन्त स्वच्छ जलसे भरी हुई नन्दोत्तरा आदि वापिकाएँ हैं उनका भी स्वच्छ जल लाया गया था ॥ २१४ ॥ इसके सिवाय क्षीरसमुद्र, नन्दीश्वर समुद्र तथा स्वयंभूरमण समुद्रका भी जल सुवर्णके बने हुए दिव्य कलशोंमें भरकर लाया गया था ॥ २१५ ॥ इस प्रकार ऊपर कहे हुए प्रसिद्ध जलसे जगद्गुरु भगवान् वृषभदेवका अभिषेक किया गया था। चूंकि भगवान्का शरीर स्वयं ही पवित्र था अतः अभिषेकसे वह क्या पवित्र होता ? केवल भगवान्ने ही अपने स्वयं पवित्र अंगोंसे उस जलको पवित्र कर दिया था ॥२१६॥ उस समय भगवान्के मस्तक पर देवोंके द्वारा छोड़ी हुई जलकी धारा ऐसी शोभायमान हो रही थी मानो उस मस्तकको राज्यलक्ष्मीका आश्रय समझकर ही छोड़ी गई हो ॥२१७॥ चर और अचर पदार्थोंके गुरु भगवान् वृषभदेवके मस्तकपर पड़ती हुई जलकी छटाएं ऐसी शोभायमान होती थीं मानो संसारका संताप नष्ट करनेवाली और निर्मल गुणोंकी संपदाएं ही हों ॥२१८॥ यद्यपि भगवान्का शरीर स्वभावसे ही पवित्र था तथापि इन्द्रने गङ्गा नदीके जलसे उसका अभिषेक किया था इसलिये उसकी पवित्रता और अधिक हो गई थी ॥२१९॥ उस समय इन्द्रोंने केवल भगवान्के अंगोंका ही प्रक्षालन नहीं किया था किन्तु देखनेवाले पुरुषोंकी मनोवृत्ति, नेत्र और शरीरका भी प्रक्षालन किया था। भावार्थ-भगवान्का राज्याभिषेक देखनेसे मनुष्योंके मन, नेत्र तथा समस्त शरीर पवित्र हो गये थे ॥२२०॥ उस समय नृत्य करती हुई देवाङ्गनाओंके कटाक्षरूपी बाण उस जलके प्रवाहमें प्रतिबिम्बित हो रहे थे इसलिये ऐसे मालूम होते थे मानो उनपर तेज पानी रक्खा गया हो और इसीलिये वे मनुष्योंके चित्तको भेदन कर रहे थे। भावार्थ—देवांगनाओंके कटाक्षोंसे देखनेवाले मनुष्योंके चित्त भिद जाते थे ॥२२१॥

१ सरःसम्बन्धि । २ मनोहरम् । ३ तत्समुद्र–मुक्ताफलशबलम् । ४ –तारं म०, प०, ल०, ट० । –सारं अ० । ५ लवणसिन्धोः सम्बन्धि । ६ –द्वीपवाप्यो– प०, अ०, स०, द०, म०, ल० । ७ आख्यातैः । ८ पवित्राण्यकरोत् । ९ आश्रयः । १० सुरसिन्धुसम्बन्धिभिः । ११ शरीराणि । १२ पानं कारिताः । ["पानी चढ़ाकर तीक्ष्णधार किये गये हैं।" इति हिन्दी] । १३ इव । १४ विदारयन्ति स्म ।

जलैरनाविलैर्भर्तु[1]ः अङ्गसङ्गात् पवित्रितैः । धराकान्ता भुवं दिष्ट्या[1] वर्द्धिता स्वामिसम्पदा ॥२२२॥
कृताभिषेको रुरुचे भगवान् सुरनायकैः । हैमैः कुम्भैर्घनैः सान्ध्यैः यथा मन्दरभूधरः ॥ २२३॥
नृपा मूर्द्धाभिषिक्ता ये नाभिराजपुरस्सराः । [2]राजवद्राजसिंहोऽयम् अभ्यषिच्यत तैस्समम्[3] ॥२२४॥
पौराश्च नलिनीपत्रपुटैः कुम्भैश्च [4]मार्त्तिकैः । [5]सारवेणाम्बुना चक्रुः भर्तुः पादाभिषेचनम् ॥२२५॥
[6]मागधाद्याश्च वन्येन्द्राः[7]त्रिज्ञानधरमार्चिचन् । नाथोऽस्मद्विषयस्येति [8]प्रीताः पुण्याभिषेचनैः ॥२२६॥
पूतस्तीर्थाम्बुभिः स्नातः कषायसलिलैः पुनः । धौतो गन्धाम्बुभिर्दिव्यैः[9] [10]अस्नापि [11]चरमं विभुः ॥२२७॥
कृताऽवगाहनो भूयो हैमस्नानोदकुण्डके । सुखोष्णैः सलिलैर्धौता सुखमज्जनमन्वभूत् ॥२२८॥
[12]स्नानान्तोज्झितविक्षिप्तमाल्यांशुकविभूषणैः । [13]भर्तुः प्राप्ताङ्गसंस्पृष्टि[14]दायेवासीद्धराङ्गना ॥२२९॥
[15]सुस्नातमङ्गलान्युच्चैः पठत्सु सुरवन्दिषु । राज्यलक्ष्मीसमुद्वाह[16]स्नानं निर[17]विशद् विभुः ॥२३०॥
अथ निर्वर्तितस्नानं कृतनीराजनं विभुम् । [18]स्वर्भुवो भूषयामासुः दिव्यैः स्रग्भूषणाम्बरैः ॥२३१॥

भगवान्‌के शरीरके संसर्गसे पवित्र हुए निर्मल जलसे समस्त पृथिवी व्याप्त हो गई थी इसलिये वह ऐसी जान पड़ती थी मानो स्वामी वृषभदेवकी राज्य-संपदासे सन्तुष्ट होकर अपने शुभ भाग्यसे बढ़ ही रही हो ॥२२२॥ इन्द्र जब सुवर्णके बने हुए कलशोंसे भगवान्‌का अभिषेक करते थे तब भगवान् ऐसे सुशोभित होते थे जैसे कि सायंकालमें होनेवाले बादलोंसे मेरु पर्वत सुशोभित होता है ॥२२३॥ नाभिराजको आदि लेकर जो बड़े बड़े राजा थे उन सभीने 'सब राजाओंमें श्रेष्ठ यह वृषभदेव वास्तवमें राजाके योग्य हैं' ऐसा मानकर उनका एक साथ अभिषेक किया था ॥२२४॥ नगरनिवासी लोगोंने भी किसीने कमलपत्रके बने हुए दोनेसे और किसीने मिट्टीके घड़ेसे सरयू नदीका जल लेकर भगवान्‌के चरणोंका अभिषेक किया था ॥२२५॥ मागध आदि व्यन्तरदेवोंके इन्द्रोंने भी तीन ज्ञानको धारण करनेवाले भगवान् वृषभदेवकी 'यह हमारे देशके स्वामी हैं' ऐसा मानकर प्रीतिपूर्वक पवित्र अभिषेकके द्वारा पूजा की थी ॥ २२६ ॥ भगवान् वृषभदेवका सबसे पहले तीर्थजलसे अभिषेक किया था फिर कषाय जलसे अभिषेक किया गया और फिर सुगन्धित द्रव्योंसे मिले हुए सुगन्धित जलसे अन्तिम अभिषेक किया गया था ॥ २२७ ॥ तदनन्तर जिनका अभिषेक किया जा चुका है ऐसे भगवान्‌ने कुछ कुछ गरम जलसे भरे हुए स्नान करने योग्य सुवर्णके कुण्डमें प्रवेश कर सुखकारी स्नानका अनुभव किया था ॥ २२८ ॥ भगवान्‌ने स्नान करनेके अन्तमें जो माला, वस्त्र और आभूषण उतारकर पृथिवीपर छोड़ दिये थे—डाल दिये थे उनसे वह पृथिवीरूपी स्त्री ऐसी मालूम होती थी मानो उसे स्वामीके शरीरका स्पर्श करनेवाली वस्तुएँ ही प्रदान की गई हों। भावार्थ—लोकमें स्त्री पुरुष प्रेमवश एक दूसरेके शरीरसे छुए गये वस्त्राभूषण धारण करते हैं यहाँ पर आचार्यने भी उसी लोक प्रसिद्ध बातको उत्प्रेक्षालंकारमें गुम्फित किया है ॥ २२९ ॥ इस प्रकार जब देवोंके वन्दीजन उच्च स्वरसे शुभस्नानसूचक मंगल-पाठ पढ़ रहे थे तब भगवान् वृषभदेवने राज्यलक्ष्मीको धारण करने अथवा उसके साथ विवाह करने योग्य स्नानको प्राप्त किया था ॥ २३० ॥ तदनन्तर जिनका अभिषेक पूर्ण हो चुका है और जिनकी आरती की जा चुकी है ऐसे भगवान्‌को देवोंने स्वर्गसे लाये हुए माला, आभूषण और वस्त्र आदिसे अलंकृत किया ॥ २३१ ॥

---

१ सन्तोषेण । २ राजार्हम् यथा भवति तथा । ३ युगपत् । ४ मृत्तिकामयैः । ५ सरयूसम्बन्धिना । ६ मागधवरतनुप्रमुखाः । ७ व्यन्तरेन्द्राः । ८ प्रीतया प०, म०, द०, ल० । ९ –द्रव्यैः– म०, ल० । १० अभ्यषेचि । ११ पश्चात् । १२ सुस्नातोज्झित– स० । १३ भर्तुः सकाशात् । १४ विवाहाद्युत्साहे देये द्रव्यं दायः । दानेवासी– प०, म०, ल० । १५ सुस्नान । सुस्नात– प०, म०, द०, ल० । १६ विवाह । १७ अन्वभवत् । १८ देवाः ।

नाभिराजः स्वहस्तेन मौलिमारोपयत् प्रभोः । महाम[1]कुटबद्धानामधिराड् भगवानिति ॥२३२॥
पट्टबन्धोजगद्बन्धोः ललाटे विनिवेशितः । बन्धनं राजलक्ष्म्याः [2]स्विद्गत्वर्याः[3] [4]स्थैर्यसाधनम् ॥२३३॥
स्रग्वी सदंशुकः कर्णद्वयोल्लसितकुण्डलः । दधानो [5]मकुटं मूर्ध्ना लक्ष्म्याः क्रीडाचलायितम् ॥२३४॥
कण्ठे हारलतां बिभ्रत् कटिसूत्रं कटीतटे । ब्रह्मसूत्रो[6]पवीताङ्गः स गाङ्गौघमिवाद्रिराट् ॥२३५॥
कटकाङ्गदकेयूरभूपितायतदोर्युगः । पर्युल्लसन्महाशाखः कल्पशाखीव जङ्गमः ॥२३६॥
सनीलरत्ननिर्माणनूपुरावुद्वहत्क्रमौ । निलीनभृङ्गसम्फुल्लरक्ततामरसश्रियौ ॥२३७॥
इति प्रत्यङ्गसङ्गिन्या बभौ भूपणसम्पदा । भगवानादिमो ब्रह्मा भूषणाङ्ग [7]इवाङ्घ्रिपः ॥२३८॥
ततः सानन्दमानन्दनाटकं नाट्यवेदवित् । प्रयुज्यास्थायिका[8]रङ्गे प्रत्यगाद्दां[9] सहस्रगुः[10] ॥२३९॥
व्रजन्तमनुजग्मुस्तं कृतकार्या सुरासुराः । भगवत्पादसंसेवानियुक्तस्वान्तवृत्तयः ॥२४०॥
अथाधिराज्यमासाद्य नाभिराजस्य सन्निधौ । प्रजानां पालने यत्नम् अकरोदिति विश्वसृट् ॥२४१॥
कृत्वादितः प्रजासर्गं[11] तद् [12]वृत्तिनियमं पुनः । स्वधर्मानतिवृत्त्यैव [13]नियच्छन्नन्वशात् प्रजाः ॥२४२॥

'महामुकुटबद्ध राजाओंके अधिपति भगवान् वृषभदेव ही हैं' यह कहते हुए महाराज नाभिराजने अपने मस्तकका मुकुट अपने हाथसे उतार कर भगवान्के मस्तक पर धारण किया था ॥२३२॥ जगत् मात्रके बन्धु भगवान् वृषभदेवके ललाट पर पट्टबन्ध भी धारण किया था जो कि ऐसा मालूम होता था मानो यहाँ वहाँ भागनेवाली–चंचल राज्यलक्ष्मी को स्थिर करने-वाला एक बन्धन ही हो ॥२३३॥ उस समय भगवान् मालाएं पहिने हुए थे, उत्तम वस्त्र धारण किये हुए थे, उनके दोनों कानों में कुण्डल सुशोभित हो रहे थे । वे मस्तक पर लक्ष्मी के क्रीड़ा-चलके समान मुकुट धारण किये हुए थे, कण्ठमें हारलता और कमरमें करधनी पहने हुए थे । जिस प्रकार हिमवान् पर्वत गङ्गाका प्रवाह धारण करता है उसी प्रकार वे भी अपने कन्धे पर यज्ञोपवीत धारण किये थे । उनकी दोनों लम्बी भुजाएँ कड़े, बाजूबन्द और अनन्त आदि आभू-षणोंसे विभूषित थीं । उन भुजाओंसे भगवान् ऐसे मालूम होते थे मानो शोभायमान बड़ी बड़ी शाखाओंसे सहित चलता-फिरता कल्पवृक्ष ही हों । उनके चरण नीलमणिके बने हुए नूपुरोंसे सहित थे इसलिये ऐसे जान पड़ते थे मानो जिनपर भ्रमर बैठे हुए हैं ऐसे खिले हुए दो लाल कमल ही हों । इस प्रकार प्रत्येक अङ्गमें पहने हुए आभूषणरूपी सम्पदासे आदि ब्रह्मा भगवान् वृषभदेव ऐसे सुशोभित हो रहे थे मानो भूषणाङ्ग जातिके कल्पवृक्ष ही हों ॥ २३४–२३८ ॥ तदनन्तर नाट्यशास्त्रको जाननेवाले इन्द्र उस सभारूपी रंगभूमिमें आनन्दके साथ आनन्द नामका नाटक कर स्वर्गको चला गया ॥ २३९ ॥ जो अपना कार्य समाप्त कर चुके हैं और जिनके चित्तकी वृत्ति भगवान्के चरणोंकी सेवामें लगी हुई है ऐसे देव और असुर उस इन्द्रके साथ ही अपने अपने स्थानों पर चले गये ॥ २४० ॥

अथानन्तर कर्मभूमिकी रचना करनेवाले भगवान् वृषभदेवने राज्य पाकर महाराज नाभिराजके समीप ही प्रजाका पालन करनेके लिये नीचे लिखे अनुसार प्रयत्न किया ॥ २४१ ॥ भगवान्ने सबसे पहले प्रजाकी सृष्टि (विभाग आदि) की फिर उसकी आजीविकाके नियम बनाये और फिर वह अपनी अपनी मर्यादाका उल्लंघन न कर सके इस प्रकारके नियम बनाये।

१ –मुकुट– अ०, प०, स०, म०, ल० । २ इव । ३ गमनशीलायाः । ४ स्थिरत्वस्य कारणम् । ५ मुकुट-अ०, प०, स०, म०, ल० । ६ वेष्टितशरीरः । ७ इवांह्रिपः प० । ८ सभारङ्गे । ९ स्वर्गम् । १० सहस्राक्षः । ११ सृष्टिम् । १२ वर्तनम् । १३ नियमयन् ।

स्वदोर्भ्यां धारयन् शस्त्रं क्षत्रियानसृजद् विभुः । क्षतत्राणे नियुक्ता हि क्षत्रियाः शस्त्रपाणयः ॥२४३॥
ऊरुभ्यां दर्शयन् यात्राम् अस्राक्षीद् वणिजः प्रभुः । जलस्थलादियात्राभिः तद्[1] वृत्तिर्वार्त्तया[2] [3]यतः ।२४४।
[4]न्यग्वृत्तिनियतान् शूद्रान् [5]पद्भ्यामेवासृजत् सुधीः । वर्णोत्तमेषु शुश्रूषा[6] तद्वृत्तिर्नैकधा स्मृता ॥२४५॥
मुखतोऽध्यापयन् शास्त्रं भरतः [7]स्रक्ष्यति द्विजात् । [8]अधीत्यध्यापने दानं [9]प्रतीच्छेज्येति तत्क्रियाः ॥२४६॥
[10]शूद्रा शूद्रेण वोढव्या[11] नान्या तां[12] स्वां[13] च नैगमः[14] ।
[15]वहेत् [16]स्वां ते च[17] राजन्यः[18] स्वां[19] द्विजन्मा क्वचिच्च [20]ताः ॥२४७॥
स्वामिमां वृत्तिमुत्क्रम्य यस्त्वन्यां वृत्तिमाचरेत् । स पार्थिवैर्नियन्तव्यो[21] [22]वर्णसङ्कीर्णिरन्यथा ॥२४८॥
कृष्यादिकर्मषट्कञ्च स्रष्टा प्रागेव सृष्टवान् । कर्मभूमिरियं [23]तस्मात् तदासीत्तद्व्यवस्थया[24] ॥२४९॥

इस तरह वे प्रजाका शासन करने लगे ॥ २४२ ॥ उस समय भगवानने अपनी दोनों भुजाओंमें शस्त्र धारण कर क्षत्रियोंकी सृष्टि की थी, अर्थात् उन्हें शस्त्रविद्याका उपदेश दिया था, सो ठीक ही है, क्योंकि जो हाथोंमें हथियार लेकर सबल शत्रुओंके प्रहारसे निर्बलोंकी रक्षा करते हैं वे ही क्षत्रिय कहलाते हैं ॥ २४३ ॥ तदनन्तर भगवान्ने अपने ऊरुओंसे यात्रा दिखलाकर अर्थात् परदेश जाना सिखलाकर वैश्योंकी रचना की सो ठीक ही है, क्योंकि जल स्थल आदि प्रदेशोंमें यात्रा कर व्यापार करना ही उनकी मुख्य आजीविका है ॥ २४४ ॥ हमेशा नीच (दैन्य) वृत्तिमें तत्पर रहनेवाले शूद्रोंकी रचना बुद्धिमान् वृषभदेवने पैरोंसे ही की थी क्योंकि ब्राह्मण, क्षत्रिय और वैश्य इन उत्तम वर्णोंकी सेवा-शुश्रूषा आदि करना ही उनकी अनेक प्रकारकी आजीविका है ॥ २४५ ॥ इस प्रकार तीन वर्णोंकी सृष्टि तो स्वयं भगवान् वृषभदेवने की थी, उनके बाद भगवान् वृषभदेवके बड़े पुत्र महाराज भरत मुखसे शास्त्रोंका अध्ययन कराते हुए ब्राह्मणोंकी रचना करेंगे, स्वयं पढ़ना, दूसरोंको पढ़ाना, दान लेना तथा पूजा यज्ञ आदि करना उनके कार्य होंगे ॥ २४६ ॥ [विशेष वर्ण सृष्टिकी ऊपर कही हुई सत्य व्यवस्थाको न मानकर अन्य मतावलम्बियोंने जो यह मान रखा है कि ब्रह्माके मुखसे ब्राह्मण, भुजाओंसे क्षत्रिय, ऊरुओंसे वैश्य और पैरोंसे शूद्र उत्पन्न हुए थे सो वह मिथ्या कल्पना ही है।] वर्णोंकी व्यवस्था तब तक सुरक्षित नहीं रह सकती जब तक कि विवाहसम्बन्धी व्यवस्था न की जाए, इसलिये भगवान् वृषभदेवने विवाह व्यवस्था इस प्रकार बनाई थी कि शूद्र शूद्र कन्याके साथ ही विवाह करे, वह ब्राह्मण, क्षत्रिय और वैश्यकी कन्याके साथ विवाह नहीं कर सकता। वैश्य, वैश्य कन्या तथा शूद्र कन्याके साथ विवाह करे, क्षत्रिय, क्षत्रिय कन्या, वैश्य कन्या और शूद्र कन्याके साथ विवाह करे, तथा ब्राह्मण ब्राह्मण कन्याके साथ ही विवाह करे, परन्तु कभी किसी देशमें वह क्षत्रिय वैश्य और शूद्र कन्याओंके साथ भी विवाह कर सकता है ॥ २४७ ॥ उस समय भगवान्ने यह भी नियम प्रचलित किया था कि जो कोई अपने वर्णकी निश्चित आजीविका छोड़कर दूसरे वर्णकी आजीविका करेगा वह राजाके द्वारा दण्डित किया जाएगा क्योंकि ऐसा न करनेसे वर्णसंकीर्णता हो जाएगी अर्थात् सब वर्ण एक हो जाएँगे-उनका विभाग नहीं हो सकेगा ॥ २४८ ॥ भगवान् आदिनाथने विवाह आदिकी व्यवस्था करनेके पहले ही असि, मषि, कृषि, सेवा, शिल्प और वाणिज्य इन छह कर्मोंकी व्यवस्था कर दी थी। इसलिये उक्त छह कर्मोंकी

---

१ जीवनम् । २ कृषिपशुपालनवाणिज्यरूपया । ३ यतः कारणात् । ४ नीचवृत्तितत्परान् । ५ पादसंवाहनादौ । ६ सेवारूपा । ७ सर्जनं करिष्यति । ८ अध्ययन । ९ प्रत्यादान । १० शूद्रस्त्री । ११ परिणेतव्या । १२ शूद्राम् । स्वां तां च अ०, प०, स०, ल० । १३ वैश्याम् । १४ वैश्यः । १५ परिणयेत् । १६ क्षत्रियाम् । १७ शूद्रां वैश्यां च । १८ क्षत्रियः । १९ ब्राह्मणीम् । २० शूद्रादितिस्त्रः । २१ दण्ड्यः । २२ सङ्करः । २३ यस्मात् । २४ षट्कर्मव्यवस्थया ।

स्रष्टेति ताः प्रजाः सृष्ट्वा तद्योगक्षेमसाधनम् । प्रायुङ्क्त युक्तितो दण्डं हामाधिक्कारलक्षणम् ॥२५०॥
दुष्टानां निग्रहः शिष्टप्रतिपालनमित्ययम् । न पुरासीत्क्रमो यस्मात् प्रजाः सर्वा [1]निरागसः ॥२५१॥
प्रजा दण्डधराभावे मात्स्यं न्यायं श्रयन्त्यमूः । ग्रस्यतेऽन्तःप्रदुष्टेन निर्बलो हि बलीयसा ॥२५२॥
दण्डभीत्या हि लोकोऽयम् अपथं नानुधावति । युक्तदण्ड[2]धरस्तस्मात् पार्थिवः पृथिवीं जयेत् ॥२५३॥
पयस्विन्या[3] यथा क्षीरम् [4]अद्रोहेणोपजीव्यते[5] । प्रजाप्येवं धनं दोह्या नातिपीडाकरैः करैः ॥२५४॥
ततो दण्डधरानेता[6]न् अनुमेने नृपान् प्रभुः । तदायत्तं हि लोकस्य योगक्षेमानुचिन्तनम् ॥२५५॥
समाहूय महाभागान् हर्यकम्पनकाश्यपान् । सोमप्रभं च सम्मान्य सत्कृत्य च यथोचितम् ॥२५६॥
कृताभिषेचनानेतान् महामण्डलिकान्नृपान् । [7]चतुःसहस्रभूनाथपरिवारान् व्यधाद् विभुः ॥२५७॥
सोमप्रभः प्रभोराप्तकुरुराजसमाह्वयः । कुरूणामधिराजोऽभूत् कुरुवंशशिखामणिः ॥२५८॥
हरिश्च हरिकान्ताख्यां दधानस्तदनुज्ञया । हरिवंशमलञ्चक्रे श्रीमान् हरिपराक्रमः ॥२५९॥
अकम्पनोऽपि सृष्टीशात् प्राप्तश्रीधरनामकः । नाथवंशस्य नेताभूत् प्रसन्ने भुवनेशिनि ॥२६०॥

व्यवस्था होनेसे यह कर्मभूमि कहलाने लगी थी ॥ २४९ ॥ इस प्रकार ब्रह्मा-आदिनाथने प्रजाका विभागकर उनके योग (नवीन वस्तुकी प्राप्ति) और क्षेम (प्राप्त हुई वस्तुकी रक्षा) की व्यवस्थाके लिये युक्तिपूर्वक हा, मा और धिक्कार इन तीन दण्डोंकी व्यवस्था की थी ॥ २५० ॥ दुष्ट पुरुषोंका निग्रह करना अर्थात् उन्हें दण्ड देना और सज्जन पुरुषोंका पालन करना यह क्रम कर्मभूमिसे पहले अर्थात् भोगभूमिमें नहीं था क्योंकि उस समय पुरुष निरपराध होते थे—किसी प्रकारका अपराध नहीं करते थे ॥ २५१ ॥ कर्मभूमिमें दण्ड देनेवाले राजाका अभाव होने पर प्रजा मात्स्यन्यायका आश्रय करने लगेगी अर्थात् जिस प्रकार बलवान् मच्छ छोटे मच्छोंको खा जाते हैं उसी प्रकार अन्तरंगका दुष्ट बलवान् पुरुष, निर्बल पुरुषको निगल जाएगा ॥ २५२ ॥ यह लोग दण्डके भयसे कुमार्गकी ओर नहीं दौड़ेंगे इसलिये दण्ड देनेवाले राजाका होना उचित ही है और ऐसा राजा ही पृथिवीको जीत सकता है ॥ २५३ ॥ जिस प्रकार दूध देनेवाली गायसे उसे बिना किसी प्रकारकी पीड़ा पहुँचाये दूध दुहा जाता है और ऐसा करनेसे वह गाय भी सुखी रहती है तथा दूध दुहनेवालेकी आजीविका भी चलती रहती है उसी प्रकार राजाको भी प्रजासे धन वसूल करना चाहिये। वह धन अधिक पीड़ा न देनेवाले करों (टैक्सों) से वसूल किया जा सकता है। ऐसा करनेसे प्रजा भी दुखी नहीं होती और राज्यव्यवस्थाके लिये योग्य धन भी सरलतासे मिल जाता है ॥ २५४ ॥ इसलिये भगवान् वृषभदेवने नीचे लिखे हुए पुरुषोंको दण्डधर (प्रजाको दण्ड देनेवाला) राजा बनाया है सो ठीक ही है क्योंकि प्रजाके योग और क्षेमका विचार करना उन राजाओंके ही आधीन होता है ॥ २५५ ॥ भगवान्ने हरि, अकम्पन, काश्यप और सोमप्रभ इन चार महा भाग्यशाली क्षत्रियोंको बुलाकर उनका यथोचित सन्मान और सत्कार किया। तदनन्तर राज्याभिषेककर उन्हें महामाण्डलिक राजा बनाया। ये राजा चार हजार अन्य छोटे छोटे राजाओंके अधिपति थे ॥ २५६–२५७ ॥ सोमप्रभ, भगवान्से कुरुराज नाम पाकर कुरुदेशका राजा हुआ और कुरुवंशका शिखामणि कहलाया ॥२५८॥ हरि, भगवान्की आज्ञासे हरिकान्त नामको धारण करता हुआ हरिवंशको अलंकृत करने लगा क्योंकि वह श्रीमान् हरिपराक्रम अर्थात् इन्द्र अथवा सिंहके समान पराक्रमी था ॥ २५९ ॥ अकम्पन भी,

१ निर्दोषाः । २ –दण्डकरः अ०, प०, स०, म०, द०, ल० । ३ क्षीरवद्धेनोः । ४ अनुपद्रवेण । ५ वर्धते । ६ वक्ष्यमाणान् । ७ चतुःसहस्रराजपरिवारान् ।

काश्यपोऽपि गुरोः प्राप्तमाघवाख्यः पतिर्विशाम्[1] । उग्रवंशस्य[2] वंश्योऽभूत् किन्नाप्यं[3] स्वामिसम्पदा ॥२६१॥
तदा[4] कच्छमहाकच्छप्रमुखानपि भूभुजः । सोऽधिराजपदे देवः स्थापयामास सत्कृतान् ॥२६२॥
पुत्रानपि तथा योग्यं वस्तुवाहनसम्पदा । भगवान् संविधत्ते[5] स्म तद्धि राज्योर्जने[6] फलम् ॥२६३॥
[7]आकानाच्च तदेक्षूणां रससंग्रहणे नृणाम् । [8]इक्ष्वाकुरित्यभूद् देवो जगतामभिसम्मतः ॥२६४॥
गौः स्वर्गः स प्रकृष्टात्मा गौतमोऽभिमतः सताम् । स तस्मादागतो देवो गौतमश्रुतिमन्वभूत् ॥२६५॥
काश्यमित्युच्यते तेजः काश्यपस्तस्य पालनात् । जीवनोपायमननान् मनुः कुलधरोऽप्यसौ ॥२६६॥
विधाता विश्वकर्मा च स्रष्टा चेत्यादिनामभिः । प्रजास्तं [9]व्याहरन्ति स्म जगतां पतिमच्युतम् ॥२६७॥
त्रिषष्टिलक्षाः पूर्वाणां राज्यकालोऽस्य सम्मितः । [10]स तस्य पुत्रपौत्रादि-वृतस्याविदितोऽगमत् ॥२६८॥
स सिंहासनमायोध्यम् अध्यासीनो महाद्युतिः । सुखादुप[11]नतां पुण्यैः साम्राज्यश्रियमन्वभूत् ॥२६९॥

वसन्ततिलका

इत्थं सुरासुरगुरुर्गुरु[12]पुण्ययोगाद्
भोगान् वितन्वति तदा सुरलोकनाथे ।

भगवान्‌से श्रीधर नाम पाकर उनकी प्रसन्नतासे नाथवंशका नायक हुआ ॥ २६० ॥ और काश्यप भी जगद्‌गुरु भगवान्‌से मघवा नाम प्राप्त कर उग्रवंशका मुख्य राजा हुआ सो ठीक ही है। स्वामीकी सम्पदासे क्या नहीं मिलता है ? अर्थात् सब कुछ मिलता है॥ २६१ ॥ तदनन्तर भगवान् आदि-नाथने कच्छ महाकच्छ आदि प्रमुख प्रमुख राजाओंका सत्कार कर उन्हें अधिराजके पद पर स्थापित किया ॥२६२॥ इसी प्रकार भगवान्‌ने अपने पुत्रोंके लिये भी यथायोग्य रूपसे महल, सवारी तथा अन्य अनेक प्रकारकी संपत्तिका विभाग कर दिया था सो ठीक ही है क्योंकि राज्यप्राप्तिका यही तो फल है ॥२६३॥ उस समय भगवान्‌ने मनुष्योंको इक्षुका रस संग्रह करनेका उपदेश दिया था इसलिये जगत्‌के लोग उन्हें इक्ष्वाकु कहने लगे ॥२६४॥ 'गो' शब्दका अर्थ स्वर्ग है जो उत्तम स्वर्ग हो उसे सज्जन पुरुष 'गोतम' कहते हैं। भगवान् वृषभदेव स्वर्गोंमें सबसे उत्तम सर्वार्थसिद्धिसे आये थे इसलिये वे 'गौतम' इस नामको भी प्राप्त हुए थे ॥२६५॥ 'काश्य' तेजको कहते हैं भगवान् वृषभदेव उस तेजके रक्षक थे इसलिये 'काश्यप' कहलाते थे उन्होंने प्रजाकी आजीविकाके उपायोंका भी मनन किया था इसलिये वे मनु और कुलधर भी कहलाते थे ॥२६६॥ इनके सिवाय तीनों जगत्‌के स्वामी और विनाशरहित भगवान्‌को प्रजा 'विधाता' 'विश्वकर्मा' और 'स्रष्टा' आदि अनेक नामोंसे पुकारती थी ॥२६७॥ भगवान्‌का राज्यकाल तिरसठ लाख पूर्व नियमित था सो उनका वह भारी काल, पुत्र-पौत्र आदिसे घिरे रहनेके कारण बिना जाने ही व्यतीत हो गया अर्थात् पुत्र-पौत्र आदिके सुखका अनुभव करते हुए उन्हें इस बातका पता भी नहीं चला कि मुझे राज्य करते समय कितना समय हो गया है ॥२६८॥ महादेदीप्यमान भगवान् वृषभदेवने अयोध्याके राज्यसिंहासनपर आसीन होकर पुण्योदयसे प्राप्त हुई साम्राज्यलक्ष्मीका सुखसे अनुभव किया था ॥२६९॥ इस प्रकार सुर और

१ नृणाम् । २ वंशश्रेष्ठः । ३ प्राप्यम् । ४ तथा अ०, प०, स०, म०, द०, ल० । ५ संविभागं करोति स्म । समृद्धानकरोदित्यर्थः । ६ राज्यार्जने ब०, द०, स०, म०, अ०, प०, ल० । ७ 'कै, गै, रै शब्दे' इति धातोर्निष्पन्नोयं शब्दः । वचनादित्यर्थः चीत्काररवात् । आकनात् द०, म०, ल० । ८ इक्षूनाकाययतीति इक्ष्वाकुः । ९ ब्रुवन्ति स्म । १० सः कालः । ११ सम्प्राप्ताम् । १२ भूरिपुण्य ।

सौख्यैरगाद् धृति[1]मचिन्त्य[2]धृतिः स धीरः[3]
पुण्यार्जने कुरुत यत्नमतो बुधेन्द्राः ॥२७०॥
पुण्यात् सुखं न सुखमस्ति विनेह पुण्याद्
बीजाद्विना न हि भवेयुरिह प्ररोहाः[4] ।
पुण्यञ्च दानदम[5]संयम[6]सत्य[7]शौच-[8]
[9]त्यागक्षमा[10]दिशुभचेष्टितमूल[11]मिष्टम् ॥२७१॥
पुण्यात् सुरासुरनरोरगभोगसाराः
श्रीरायुरप्रमितरूपसमृद्धयो धीः[12] ।
साम्राज्य[13]मैन्द्र[14]मपुन[15]र्भवभावनिष्ठम्
आर्हन्त्यमन्त्यरहिता[16]खिलसौख्यमग्र्यम् ॥२७२॥
तस्माद्बुधाः कुरुत धर्ममवाप्तुकामाः
स्वर्गापवर्गसुखमग्र्यमचिन्त्य[17]सारम् ।
प्रापय्य[18] [19]सोऽभ्युदयभोगमनन्तसौख्यम्
आनन्त्यमापयति धर्मफलं हि शर्म ॥२७३॥
दानं प्रदत्त[20] मुदिता मुनिपुङ्गवेभ्यः
पूजां कुरुध्वमुपनम्य च तीर्थकृद्भ्यः ।
शीलानि पालयत पर्वदिनोपवासात्
[21]विस्मार्ष्ट मा स्म सुधियः सुखमीप्सवश्चेत् ॥२७४॥

असुरोंके गुरु तथा अचिन्त्य धैर्यके धारण करनेवाले भगवान् वृषभदेवको इन्द्र उनके विशाल पुण्यके संयोगसे भोगोपभोगकी सामग्री भेजता रहता था जिससे वे सुखपूर्वक संतोषको प्राप्त होते रहते थे। इसलिये हे पण्डितजन, पुण्योपार्जन करनेमें प्रयत्न करो ॥२७०॥ इस संसारमें पुण्यसे ही सुख प्राप्त होता है। जिस प्रकार बीजके बिना अंकुर उत्पन्न नहीं होता उसी प्रकार पुण्यके बिना सुख नहीं होता। दान देना, इन्द्रियोंको वश करना, संयम धारण करना, सत्यभाषण करना, लोभका त्याग करना, दान देना और क्षमाभाव धारण करना आदि शुभ चेष्टाओंसे अभिलषित पुण्यकी प्राप्ति होती है ॥२७१॥ सुर, असुर, मनुष्य और नागेन्द्र आदिके उत्तम उत्तम भोग, लक्ष्मी, दीर्घ आयु, अनुपमरूप, समृद्धि, उत्तम वाणी, चक्रवर्तीका साम्राज्य, इन्द्रपद, जिसे पाकर फिर संसारमें जन्म नहीं लेना पड़ता ऐसा अरहन्त पद और अन्तरहित समस्त सुख देनेवाला श्रेष्ठ निर्वाण पद इन सभीकी प्राप्ति एक पुण्यसे ही होती है इसलिये हे पण्डितजन, यदि स्वर्ग और मोक्षके अचिन्त्य महिमावाले श्रेष्ठ सुख प्राप्त करना चाहते हो तो धर्म करो क्योंकि वह धर्म ही स्वर्गोंके भोग और मोक्षके अविनाशी अनन्त सुखकी प्राप्ति कराता है। वास्तवमें सुख प्राप्ति होना धर्मका ही फल है ॥२७२-२७३॥ हे सुधीजन, यदि तुम सुख प्राप्त करना चाहते हो तो हर्षित

---

१ सन्तोषम्। २ अचिन्त्यधैर्यः। ३ धियं रातीति धीरः। प्रकृष्टज्ञानीत्यर्थः। ४ अङ्कुराणि। ५ इन्द्रियनिग्रहः। ६ 'व्रतसमितिकषायदण्डेन्द्रियाणां क्रमेण धारणपालननिग्रहत्यागजयाः संयमः। [वदसमिदिकसायाणं दंडाणं तहिंदियाण पंचण्हं। धारणपालणनिग्गहचागजओ संजमो भणिओ] —जीवकाण्ड। ७ प्रशस्तजने साधुवचनम्। ८ प्रकर्षलोभनिवृत्तिः। ९ बाह्याभ्यन्तरपरिग्रहत्यजनम्। १० दुष्टजनकृताक्रोशप्रहसनावज्ञाताडनादिप्राप्तौ कालुष्याभावः क्षमा। ११ कारणम्। १२ गीः स०। १३ चक्रित्वम्। १४ इन्द्रपदम्। १५ पुनर्न भवतीत्यपुनर्भवः अपुनर्भवभावस्य निष्ठा निष्पत्तिर्यस्य तत्। १६ मोक्षसुखम्। १७ अचिन्त्यमाहात्म्यम्। १८ नीत्वा। १९ सः धर्मः। २० प्रदद्ध्वम्। 'दाण् दाने लोट्'। २१ मा विस्मरत।

शार्दूलविक्रीडितम्

स श्रीमानिति नित्यभोगनिरतः पुत्रैश्च पौत्रैर्निजैः
[1]आरूढप्रणयैरुपा[2]हितधृतिः सिंहासनाध्यासितः ।
शक्रार्केन्दुपुरस्सरैः सुरवरैर्व्यू[3]ढोल्लसच्छासनः
शास्ति स्माप्रतिशासनो भुवमिमामासिन्धुसीमां[4] जिनः ॥२७५॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणश्रीमहापुराणसंग्रहे भगवत्साम्राज्यवर्णनं नाम षोडशं पर्व ॥१६॥

होकर श्रेष्ठ मुनियोंके लिये दान दो, तीर्थंकरोंको नमस्कार कर उनकी पूजा करो, शीलव्रतोंका पालन करो और पर्वके दिनोंमें उपवास करना नहीं भूलो ॥२७४॥ इस प्रकार जो प्रशस्त लक्ष्मीके स्वामी थे, स्थिर रहनेवाले भोगोंका अनुभव करते थे, स्नेह रखनेवाले अपने पुत्र पौत्रोंके साथ संतोष धारण करते थे। इन्द्र सूर्य और चन्द्रमा आदि उत्तम उत्तम देव जिनकी आज्ञा धारण करते थे, और जिनपर किसीकी आज्ञा नहीं चलती थी ऐसे भगवान् वृषभदेव सिंहासनपर आरूढ़ होकर इस समुद्रान्त पृथिवीका शासन करते थे ॥२७५॥

इस प्रकार आर्ष नामसे प्रसिद्ध, भगवज्जिनसेनाचार्य प्रणीत त्रिषष्टि लक्षण महापुराण संग्रहमें भगवान्के साम्राज्यका वर्णन करनेवाला सोलहवाँ पर्व पूर्ण हुआ।

---

१ धृतस्नेहैः । २ प्राप्तसन्तोषः । ३ व्यूढ धृत । ४ –मासिन्धुसीमं प०, द०, स०

सप्तदशं पर्व

अथान्येद्युर्महास्थानमध्ये नृपशतैर्वृतः । स सिंहासनमध्यास्त यथार्को नैषधं तटम् ॥१॥
तथासीनं च तं देवं [1]देवराट् पर्युपासि[2]तुम् । साप्सराः सहगन्धर्वैः सस[3]पर्यमुपासदत् ॥२॥
ततो यथोचितं स्थानमध्या[4]सिष्टाधिविष्टरम् । जयन्नुदयमूर्धस्थम् अर्कमात्मीयतेजसा ॥३॥
[5]आरिराधयिषुर्देवं सुरराड् भक्तिनिर्भरः[6] । [7]प्रायूयुजत् सगन्धर्वं[8] नृत्यमाप्सरसं[9] तदा ॥४॥
तन्नृत्यं सुरनारीणां मनोऽस्यारञ्जयत् प्रभोः । स्फाटिको हि मणिः शुद्धोऽप्यादत्ते रागमन्यतः[10] ॥५॥
राज्यभोगात् कथं नाम विरज्येद् भगवानिति । [11]प्रक्षीणायुर्दशं पात्रं तदा प्रायुंक्त देवराट् ॥६॥
ततो नीलाञ्जना नाम ललिता सुरनर्तकी । रसभावलयोपेतं नटन्ती सपरिक्रमम्[12] ॥७॥
क्षणाददृश्यतां प्राप किलायुर्दीपसंक्षये । प्रभातरलितां मूर्तिं दधाना तडिदुज्ज्वलाम् ॥८॥

अथानन्तर-किसी एक दिन सैकड़ों राजाओंसे घिरे हुए भगवान् वृषभदेव विशाल सभा-मण्डपके मध्यभागमें सिंहासनपर ऐसे विराजमान थे, जैसे निषध पर्वतके तटभागपर सूर्य विराजमान होता है ॥१॥ उस प्रकार सिंहासनपर विराजमान भगवान्‌की सेवा करनेके लिये इन्द्र, अप्सराओं और देवोंके साथ, पूजाकी सामग्री लेकर वहां आया ॥२॥ और अपने तेजसे उदयाचलके मस्तकपर स्थित सूर्यको जीतता हुआ अपने योग्य सिंहासनपर जा बैठा ॥३॥ भक्तिविभोर इन्द्रने भगवान्‌की आराधना करनेकी इच्छासे उस समय अप्सराओं और गन्धर्वों का नृत्य कराना प्रारम्भ किया ॥४॥ उस नृत्यने भगवान् वृषभदेवके मनको भी अनुरक्त बना दिया था सो ठीक ही है, अत्यन्त शुद्ध स्फटिकमणि भी अन्य पदार्थोंके संसर्गसे राग अर्थात् लालिमा धारण करता है ॥५॥ भगवान् राज्य और भोगोंसे किस प्रकार विरक्त होंगे यह विचार कर इन्द्रने उस समय नृत्य करनेके लिए एक ऐसे पात्रको नियुक्त किया जिसकी आयु अत्यन्त क्षीण हो गई थी ॥६॥ तदनन्तर वह अत्यन्त सुन्दरी नीलांजना नामकी देवनर्तकी रस भाव और लयसहित फिरकी लगाती हुई नृत्य कर रही थी कि इतनेमें ही आयुरूपी दीपकके क्षय होनेसे वह क्षणभरमें अदृश्य हो गई । जिस प्रकार बिजलीरूपी लता देखते-देखते क्षणभरमें नष्ट हो जाती है उसी प्रकार प्रभासे चंचल और बिजलीके समान उज्ज्वल मूर्तिको धारण करनेवाली वह देवी देखते-देखते ही क्षणभरमें नष्ट हो गई थी । उसके नष्ट होते ही इन्द्रने रसभङ्गके भय से उस स्थानपर उसीके समान शरीरवाली दूसरी देवी खड़ी कर दी जिससे नृत्य ज्योंका त्यों

१ इन्द्रः । २ आराधयितुम् । ३ पूजया सहितं यथा भवति तथा । ४ अध्यास्ते स्म । ५ आराधयितुमिच्छुः । ६ अतिशयः । ७ प्रयोजयति स्म । ८ सगन्धर्वो प०, स०, द०, इ० । ९ अप्सरसामिदम् । १० जपाकुसुमादेः । ११ प्रणष्टायुष्यावस्थम् । १२ पदचारिभिः सहितं यथा भवति तथा ।

सौदामिनी लतेवासौ दृष्टनष्टाभवत् क्षणात् । रसभङ्गभयादिन्द्रः [1]संदधेऽत्रापरं वपुः ॥९॥
तदेव स्थानकं रम्यं सा भूमिः[2] स परिक्रमः[3] । तथापि भगवान् वेद तत्स्वरूपान्तरं तदा ॥१०॥
ततोऽस्य चेतसीत्यासीच्चिन्ताभोगाद् विरज्यतः[4] । परां संवेगनिर्वेदभावनामुपजग्मुषः ॥११॥
अहो जगदिदं भङ्गि[5] श्रीस्तटि[6]द्वल्लरीचला । यौवनं वपुरारोग्यम् ऐश्वर्यं च चलाचलम् ॥१२॥
रूपयौवनसौभाग्यमदोन्मत्तः पृथग्जनः[7] । बध्नाति स्थायिनीं बुद्धिं किं न्वत्र[8] न [9]विनश्वरम् ॥१३॥
सन्ध्यारागनिभा रूपशोभा तारुण्यमुज्ज्वलम् । पल्लवच्छविवत् सद्यः परिम्लानिमुपाश्नुते ॥१४॥
यौवनं वनवल्लीनामिव पुष्पं परिक्षयि । विषवल्लीनिभा भोगसम्पदो भङ्गि जीवितम् ॥१५॥
घटिका[10]जलधारेव गलत्यायुःस्थितिद्रुतम् । शरीरमिदमत्यन्तपूतिगन्धि जुगुप्सितम् ॥१६॥
निःसारे खलु संसारे सुखलेशोऽपि दुर्लभः । दुःखमेव महत्तस्मिन् सुखं[11]काम्यति मन्दधीः ॥१७॥
नरकेषु यदेतेन दुःखमासेवितं महत् । तच्चेत्स्मर्येत कः कुर्याद् भोगेषु स्पृहयालुताम् ॥१८॥
नूनमार्तधियां भुक्ता भोगाः सर्वेऽपि देहिनाम् । दुःखरूपेण पच्यन्ते निरये निरयोदये[12] ॥१९॥
स्वप्नजं च सुखं नास्ति नरके दुःखभूयसि । दुःखं दुःखानुबन्ध्येव यतस्तत्र दिवानिशम् ॥२०॥
ततो विनिःसृतो जन्तुस्तैरश्चं दुःखमायतम्[13] । स्वसात्करोति[14] मन्दात्मा नानायोनिषु पर्यटन् ॥२१॥

चलता रहा । यद्यपि दूसरी देवी खड़ी कर देनेके बाद भी वही मनोहर स्थान था, वही मनोहर भूमि थी और वही नृत्यका परिक्रम था तथापि भगवान् वृषभदेवने उसी समय उसके स्वरूपका अन्तर जान लिया था ॥७–१०॥ तदनन्तर भोगोंसे विरक्त और अत्यन्त संवेग तथा वैराग्य भावनाको प्राप्त हुए भगवान्‌के चित्तमें इस प्रकार चिन्ता उत्पन्न हुई कि ॥११॥ बड़े आश्चर्य की बात है कि यह जगत् विनश्वर है, लक्ष्मी बिजलीरूपी लताके समान चंचल है, यौवन, शरीर, आरोग्य और ऐश्वर्य आदि सभी चलाचल हैं ॥१२॥ रूप, यौवन और सौभाग्यके मदसे उन्मत्त हुआ अज्ञ पुरुष इन सबमें स्थिर बुद्धि करता है परन्तु उनमें कौनसी वस्तु विनश्वर नहीं है ? अर्थात् सभी वस्तुएँ विनश्वर हैं ॥१३॥ यह रूपकी शोभा संध्या कालकी लालीके समान क्षण भरमें नष्ट हो जाती है और उज्ज्वल तारुण्य अवस्था पल्लवकी कान्तिके समान शीघ्र ही म्लान हो जाती है ॥१४॥ वनमें पैदा हुई लताओंके पुष्पोंके समान यह यौवन शीघ्र ही नष्ट हो जानेवाला है, भोग संपदाएँ विषवेलके समान हैं और जीवन विनश्वर है ॥१५॥ यह आयुकी स्थिति घटीयन्त्रके जलकी धाराके समान शीघ्रताके साथ गलती जा रही है–कम होती जा रही है और यह शरीर अत्यन्त दुर्गन्धित तथा घृणा उत्पन्न करनेवाला है ॥१६॥ यह निश्चय है कि इस असार संसारमें सुखका लेश मात्र भी दुर्लभ है और दुःख बड़ा भारी है फिर भी आश्चर्य है कि मन्द बुद्धि पुरुष उसमें सुख की इच्छा करते हैं ॥१७॥ इस जीवने नरकोंमें जो महान् दुःख भोगे हैं यदि उनका स्मरण भी हो जावे तो फिर ऐसा कौन है, जो उन भोगोंकी इच्छा करे ॥१८॥ निरन्तर आर्तध्यान करनेवाले जीव जितने कुछ भोगोंका अनुभव करते हैं वे सब उन्हें अत्यन्त असाताके उदयसे भरे हुए नरकोंमें दुःखरूप होकर उदय आते हैं ॥१९॥ दुःखोंसे भरे हुए नरकोंमें कभी स्वप्नमें भी सुख प्राप्त नहीं होता क्योंकि वहाँ रात-दिन दुःख ही दुःख रहता है और ऐसा दुःख जो कि दुःखके कारणभूत असाता कर्मका बन्ध करनेवाला होता है ॥२०॥ उन नरकोंसे किसी तरह निकलकर यह मूर्ख जीव अनेक योनियोंमें परिभ्रमण

१ संयोजयति स्म । २ बहुरूपम् । ३ पदचारिः । ४ विरक्ति गतस्य । ५ विनाशि । ६–तडिद्वल्लरी- अ०, प०, द०, इ०, म०, स० । ७ पामरः । ८ त्वत्र द०, प० । तत्र ल० । ९ विनश्वरीम् द०, प० । १० प्रतिमोपरि सुगन्धजलस्रवणार्थं धृतजलधारावत् । ११ सुखमिच्छत्यात्मनः । सुखकाम्यति ब० । १२ अयोदयान्निष्क्रान्ते शुभकर्मोदयरहिते इत्यर्थः । १३ दीर्घं भूयिष्ठमित्यर्थः । १४ स्वाधीनं करोति ।

पृथिव्यामप्सु वह्नौ च पवने सवनस्पतौ। बम्भ्रम्यते महादुःखमश्नुवानो बताज्ञकः ॥ २२ ॥
खननोत्तापनज्वालिज्वालाविध्यापनै[1]रपि। [2]घनाभिघातैश्छेदैश्च दुःखं तत्रैति दुस्तरम् ॥ २३ ॥
सूक्ष्मबादरपर्याप्त[3]तद्विपक्षात्मयोनिषु। पर्यटत्यसकृज्जीवो घटीयन्त्रस्थितिं दधत् ॥ २४ ॥
त्रसकायेष्वपि प्राणी बधबन्धोपरोधनैः। [4]दुःखासिकामवाप्नोति [5]सर्वावस्थानुयायिनीम् ॥ २५ ॥
जन्मदुःखं ततो दुःखं जरामृत्युस्ततोऽधिकम्। इति दुःखशतावर्ते जन्माब्धौ स निमग्नवान् ॥ २६ ॥
क्षणान्नश्यन् क्षणाज्जीर्यन् क्षणाज्जन्म समाप्नुवन्। जन्ममृत्युजरातङ्क-पङ्के मज्जति गौरिव ॥ २७ ॥
अनन्तं कालमित्यज्ञस्तिर्यक्त्वे दुःखमश्नुते। दुःखस्य हि परं धाम[6] तिर्यक्त्वं मन्वते जिनाः ॥ २८ ॥
ततः कृच्छ्राद् विनिःसृत्य शिथिले दुष्कृते मनाक्। मनुष्यभावमाप्नोति कर्मसारथिचोदितः ॥ २९ ॥
तत्रापि विविधं दुःखं शारीरं चैव मानसम्। प्राप्नोत्यनिच्छुरेवात्मा निरुद्धः कर्मशत्रुभिः ॥ ३० ॥
पराराधनदारिद्र्य-चिन्ता शोकादिसम्भवम्। दुःखं महन्मनुष्याणां प्रत्यक्षं[6]नरकायते ॥ ३१ ॥
शरीरशकटं दुःखदुर्भाण्डैः [7]परिपूरितम्। दिनैस्त्रिचतुरैरेव पर्यस्य[8]ति न संशयः ॥ ३२ ॥
[9]दिव्यभावे किलैतेषां सुखभाक्त्वं शरीरिणाम्। तत्रापि त्रिदिवात् पातः परं दुःखं दुरुत्तरम् ॥ ३३ ॥

करता हुआ तिर्यञ्च गतिके बड़े भारी दुःख भोगता है ॥२१॥ बड़े दुःखकी बात है कि यह अज्ञानी जीव पृथिवीकायिक, जलकायिक, अग्निकायिक, वायुकायिक और वनस्पतिकायिक जीवोंमें भारी दुःख भोगता हुआ निरन्तर भ्रमण करता रहता है ॥२२॥ यह जीव उन पृथिवी-कायिक आदि पर्यायोंमें खोदा जाना, जलती हुई अग्निमें तपाया जाना, बुझाया जाना, अनेक कठोर वस्तुओंसे टकरा जाना, तथा छेदा भेदा जाना आदिके कारण भारी दुःख पाता है ॥२३॥ यह जीव घटीयन्त्रकी स्थितिको धारण करता हुआ सूक्ष्म बादर पर्याप्तक तथा अपर्याप्तक अवस्थामें अनेक बार परिभ्रमण करता रहता है ॥२४॥ त्रस पर्यायमें भी यह प्राणी मारा जाना, बांधा जाना और रोका जाना आदिके द्वारा जीवनपर्यन्त अनेक दुःख प्राप्त करता रहता है ॥२५॥ सबसे प्रथम इसे जन्म अर्थात् पैदा होनेका दुःख उठाना पड़ता है, उसके अनन्तर बुढ़ापाका दुःख और फिर उससे भी अधिक मृत्युका दुःख भोगना पड़ता है, इस प्रकार सैकड़ों दुःख रूपी भँवरसे भरे हुए संसाररूपी समुद्रमें यह जीव सदा डूबा रहता है ॥२६॥ यह जीव क्षणभरमें नष्ट हो जाता है, क्षण भरमें जीर्ण (वृद्ध) हो जाता है और क्षण भरमें फिर जन्म धारण कर लेता है इस प्रकार जन्म-मरण, बुढ़ापा और रोगरूपी कीचड़में गायकी तरह सदा फँसा रहता है ॥२७॥ इस प्रकार यह अज्ञानी जीव तिर्यञ्च योनिमें अनन्त कालतक दुःख भोगता रहता है सो ठीक ही है क्योंकि जिनेन्द्रदेव भी यही मानते हैं कि तिर्यञ्च योनि दुःखोंका सबसे बड़ा स्थान है ॥२८॥ तदनन्तर अशुभ कर्मोंके कुछ कुछ मन्द होनेपर यह जीव उस तिर्यञ्च योनिसे बड़ी कठिनतासे बाहर निकलता है और कर्मरूपी सारथिसे प्रेरित होकर मनुष्य पर्यायको प्राप्त होता है ॥२९॥ वहाँपर भी यह जीव यद्यपि दुःखोंकी इच्छा नहीं करता है तथापि इसे कर्मरूपी शत्रुओंसे निरुद्ध होकर अनेक प्रकारके शारीरिक और मानसिक दुःख भोगने पड़ते हैं ॥३०॥ दूसरोंकी सेवा करना, दरिद्रता, चिन्ता और शोक आदिसे मनुष्योंको जो बड़े भारी दुःख प्राप्त होते हैं वे प्रत्यक्ष नरकके समान जान पड़ते हैं ॥३१॥ यथार्थमें मनुष्योंका यह शरीर एक गाड़ीके समान है जो कि दुःखरूपी खोटे बर्तनोंसे भरी है इसमें कुछ भी संशय नहीं है कि यह शरीररूपी गाड़ी तीन चार दिनमें ही उलट जावेगी—नष्ट हो जावेगी ॥३२॥ यद्यपि देवपर्यायमें जीवोंको

यदस्मै रुचितं भर्त्रे तदस्मभ्यं विशेषतः । इति प्रसन्नदीक्षास्ते केवलं द्रव्यलिङ्गिनः ॥ २१३ ॥
[9]छन्दानुवर्तनं भर्तुः भृत्याचारः किलेत्यमी । भेजुः समौढ्यं नैर्ग्रन्थ्यं द्रव्यतो न तु भावतः ॥ २१४ ॥
गरीयसीं गुरौ भक्तिम् उच्चैराविश्चिकीर्षवः[10] । [11] तद्वृत्तिं बिभरामासुः पार्थिवास्ते समन्वयाः[12]॥ २१५ ॥

मासके कृष्ण पक्षकी नवमीके दिन सायंकालके समय दीक्षा धारण की थी । उस दिन शुभ मुहूर्त था, शुभ लग्न थी और उत्तराषाढ़ नक्षत्र था ॥२०३॥ भगवान्के मस्तकपर चिरकाल तक निवास करनेसे पवित्र हुए केशोंको इन्द्रने प्रसन्नचित्त होकर रत्नोंके पिटारेमें रख लिया था ॥२०४॥ सफेद वस्त्रसे परिवृत उस बड़े भारी रत्नोंके पिटारेमें रखे हुए भगवान्के काले केश ऐसे सुशोभित हो रहे थे मानो चन्द्रमाके काले चिह्नके अंश ही हों ॥२०५॥ 'ये केश भगवान्के मस्तकके स्पर्शसे अत्यन्त श्रेष्ठ अवस्थाको प्राप्त हुए हैं इसलिये इन्हें उपद्रवरहित किसी योग्य स्थानमें स्थापित करना चाहिये । पाँचवाँ क्षीरसमुद्र स्वभावसे ही पवित्र है इसलिये उसकी भेंट कर उसीके पवित्र जलमें इन्हें स्थापित करना चाहिये । ये केश धन्य हैं जो कि जगत्के स्वामी भगवान् वृषभदेवके मस्तकपर अधिष्ठित हुए थे तथा यह क्षीरसमुद्र भी धन्य है जो इन केशोंको भेंटस्वरूप प्राप्त करेगा ।' ऐसा विचार कर इन्द्रोंने उन केशोंको आदरसहित उठाया और बड़ी विभूतिके साथ ले जाकर उन्हें क्षीरसमुद्रमें डाल दिया ॥२०६–२०९॥ महापुरुषोंका आश्रय करनेसे मलिन (नीच) पुरुष भी पूज्यताको प्राप्त हो जाते हैं यह बात बिलकुल ठीक है क्योंकि भगवान्का आश्रय करनेसे मलिन (काले) केश भी पूजाको प्राप्त हुए थे ॥२१०॥ भगवान्ने जिन वस्त्र आभूषण तथा माला वगैरहका त्याग किया था देवोंने उन सबकी भी असाधारण पूजा की थी ॥२११॥ उसी समय चार हजार अन्य राजाओंने भी दीक्षा धारण की थी । वे राजा भगवान्का मत (अभिप्राय) नहीं जानते थे, केवल स्वामिभक्तिसे प्रेरित होकर ही दीक्षित हुए थे ॥२१२॥ 'जो हमारे स्वामीके लिये अच्छा लगता है वही हमलोगोंको भी विशेष रूपसे अच्छा लगना चाहिये' बस, यही सोचकर वे राजा दीक्षित होकर द्रव्यलिङ्गी साधु हो गये थे ॥२१३॥ स्वामीके अभिप्रायानुसार चलना ही सेवकोंका काम है यह सोचकर ही वे मूढ़ताके साथ मात्र द्रव्यकी अपेक्षा निर्ग्रन्थ अवस्थाको प्राप्त हुए थे–नग्न हुए थे, भावोंकी अपेक्षा नहीं ॥२१४॥

बड़े बड़े वंशोंमें उत्पन्न हुए वे राजा, भगवान्में अपनी उत्कृष्टभक्ति प्रकट करना

१ आददे । २ छादिते । ३ संघटके । ४ मान्यताम् । ५ अनुपद्रवे । ६ प्राप्स्यति । ७ पूजावाप्याश्रितै–अ०, प०, इ०, द०, म०, ल० । ८ –व चोदिताः द०, इ०, म०, ल० । –व नोदिताः अ०, प०, स० । ९ इच्छानुवर्तनम् । १० प्रकटीकर्तुमिच्छवः । ११ परमेश्वरवर्तनम् । १२ महान्वयाः प०, अ०, द०, म०, ल०, स० । समन्वयाः समाकुलचित्ताः ।

गुरुः प्रमाणमस्माकमात्रिकामुत्रिकार्थयोः । इति कच्छादयो दीक्षां भेजिरे नृपसत्तमाः[1] ॥ २१६ ॥
स्नेहात् केचित् परे मोहा[2]द् भयात् केचन पार्थिवाः । [3]तपस्यां संगिरन्ते[4]स्म पुरोधायादिवेधसम् ॥ २१७ ॥
स तैः परिवृतो रेजे विभुरव्यक्तसंयतैः । कल्पाघ्रिप[5] इवोदग्रः परितो बालपादपैः ॥ २१८ ॥
स्वभावभास्वरं तेजस्तपोदीप्त्योपबृंहितम् । दधानः [6]शारदो [7]वार्को दिदीपेतितरां विभुः ॥ २१९ ॥
जातरूपमिवोदारकान्तिकान्ततरं बभौ । जातरूपं प्रभोर्दीप्तं यथार्चिर्जातवेदसः[8] ॥ २२० ॥
ततः स भगवानादिदेवो देवैः कृतार्चनः । दीक्षावल्लया परिष्वक्तः[9] कल्पाङ्घ्रिप इवाबभौ ॥ २२१ ॥
तदा भगवतो रूपम् असरूपं[10] विभास्वरम् । पश्यन्नेत्रसहस्रेण नापत्तृप्तिं सहस्रदृक् ॥ २२२ ॥
ततस्त्रिजगदीशानं परं ज्योतिर्गिरां पतिम् । [11]तुष्टास्तुष्टुवुरित्युच्चैः स्वःश्रेष्ठाः[12] परमेष्ठिनम् ॥ २२३ ॥
जगत्स्रष्टारमीशानम् अभीष्टफलदायिनम् । त्वामनिष्टविघाताय समभिष्टुमहे[13] वयम् ॥ २२४ ॥
गुणास्ते गणनातीताः स्तूयन्तेऽस्मद्विधैः कथम् । भक्त्या तथापि तद्व्याजात्[14]तन्मः[15] प्रोन्नतिमात्मनः॥ २२५ ॥
[16]बहिरन्तर्मलापायात् स्फुरन्तीश गुणास्तव । घनोपरोधनिर्मुक्तमूर्तेरिव रवेः कराः ॥ २२६ ॥

चाहते थे इसीलिये उन्होंने भगवान् जैसी निर्गन्थ वृत्तिको धारण किया था ॥२१५॥ इस लोक और परलोक सम्बन्धी सभी कार्योंमें हमें हमारे गुरु-भगवान् वृषभदेव ही प्रमाणभूत हैं यही विचार कर कच्छ आदि उत्तम उत्तम राजाओंने दीक्षा धारण की थी ॥२१६॥ उन राजाओंमेंसे कितने ही स्नेहसे, कितने ही मोहसे और कितने ही भयसे भगवान् वृषभदेवको आगे कर अर्थात् उन्हें दीक्षित हुआ देखकर दीक्षित हुए थे ॥२१७॥ जिनका संयम प्रकट नहीं हुआ है ऐसे उन द्रव्यलिङ्गी मुनियोंसे घिरे हुए भगवान् वृषभदेव ऐसे सुशोभित होते थे मानो छोटे छोटे कल्प वृक्षोंसे घिरा हुआ कोई उन्नत विशाल कल्पवृक्ष ही हो ॥२१८॥ यद्यपि भगवान्‌का तेज स्वभावसे ही देदीप्यमान था तथापि उस समय तपकी दीप्तिसे वह और भी अधिक देदीप्यमान हो गया था ऐसे तेजको धारण करनेवाले भगवान् उस सूर्यके समान अतिशय ददीप्यमान होने लगे थे जिसका कि स्वभावभास्वर तेज शरद् ऋतुके कारण अतिशय प्रदीप्त हो उठा है ॥२१९॥ जिस प्रकार अग्निकी ज्वालासे तपा हुआ सुवर्ण अतिशय शोभायमान होता है उसी प्रकार उत्कृष्ट कान्तिसे अत्यन्त सुन्दर भगवान्‌का नग्न रूप अतिशय शोभायमान हो रहा था ॥२२०॥ तदनन्तर देवोंने जिनकी पूजा की है ऐसे भगवान् आदिनाथ दीक्षारूपी लतासे आलिङ्गित होकर कल्पवृक्षके समान सुशोभित हो रहे थे ॥२२१॥ उस समय भगवान्‌का अनुपम रूप अतिशय देदीप्यमान हो रहा था। उस रूपको इन्द्र हजार नेत्रोंसे देखता हुआ भी तृप्त नहीं होता था ॥२२२॥ तत्पश्चात् स्वर्गके इन्द्रोंने अतिशय संतुष्ट होकर तीनों लोकोंके स्वामी-उत्कृष्ट ज्योति स्वरूप और वाचस्पति अर्थात् समस्त विद्याओंके अधिपति भगवान् वृषभदेवकी इस प्रकार जोर जोरसे स्तुति की ॥२२३॥ हे स्वामिन्, आप जगत्के स्रष्टा हैं (कर्मभूमिरूप जगत्की व्यवस्था करनेवाले हैं), स्वामी हैं और अभीष्ट फलके देनेवाले हैं इसलिये हमलोग अपने अनिष्टोंको नष्ट करनेके लिये आपकी अच्छी तरहसे स्तुति करते हैं॥२२४॥ हे भगवन्, हम-जैसे जीव आपके असंख्यात गुणोंकी स्तुति किस प्रकार कर सकते हैं तथापि हम लोग भक्तिके वश स्तुतिके छलसे मात्र अपनी आत्माकी उन्नतिको विस्तृत कर रहे हैं ॥२२५॥ हे ईश, जिस प्रकार मेघोंका आवरण हट जानेसे सूर्यकी किरणें स्फुरित हो जाती हैं, उसी प्रकार

---

१ श्रेष्ठाः । २ अज्ञानात् । ३ तपसि । ४ प्रतिज्ञां कुर्वन्ति स्म । ५ कल्पाङ्घ्रिप प०, अ० । ६ शरदीवार्कः अ० । शरदेवार्को इ०, प०, द०, स०, ल० । ७ इव । ८ अग्नेः । ९ आलिङ्गितः । १० असदृशम् । ११ मुदिताः । १२ स्वर्गश्रेष्ठाः इन्द्रा इत्यर्थः । १३ स्तोत्रं कुर्महे । १४ स्तुतिव्याजात् । १५ विस्तारयामः । १६ द्रव्यभावकर्ममलम् ।

त्रिलोकपावनीं पुण्यां[1] जैनीं [2]श्रुतिमिवामलाम् । प्रव्रज्यां दधते[3] तुभ्यं नमः सार्वाय[4] शम्भवे ॥ २२७ ॥
[5]विध्यापितजगत्तापा जगतामेकपावनी । स्वर्धुनीव पुनीयान्नो दीक्षेयं पारमेश्वरी[6] ॥ २२८ ॥
[7]सुवर्णा रुचिरा[8] हृद्या[9] [10]रत्नैर्दीप्तैरलंकृता । [12]रैधारेवाभिनि[13]ष्क्रान्तिः यौष्माकीयं[14] धिनोति[15] नः ॥ २२९ ॥
[16]मुक्तावुत्तिष्ठ[17]मानस्त्वं तत्कालोपनतैः[18] सितैः[19] । प्रबुद्धः परिणामैः प्राक् पश्चाल्लौकान्तिकामरैः ॥ २३० ॥
परिनिष्क्रमणे योऽयम् अभिप्रायो जगत्सृजः । स ते यतः स्वतो जातः[20] स्वयं बुद्धोऽस्यतो मुनेः ॥ २३१ ॥
राज्यलक्ष्मीमसम्भोग्याम् आकलय्य चलामिमाम् । क्लेशहानाय[21] निर्वाणदीक्षां त्वं प्रत्यपद्यथाः ॥ २३२ ॥
स्नेहाला[22]नकमुन्मूल्य विशतोऽद्य वनं तव । न कश्चित् प्रतिरोधो[23]ऽभून्मदान्धस्येव दन्तिनः ॥ २३३ ॥
स्वप्नसम्भोगनिर्भासा[24] भोगाः सम्पत्प्रणश्वरी[25] । जीवितं चलमित्याधाः[26] त्वं मनः शाश्वते पथि ॥ २३४ ॥

द्रव्यकर्म और भावकर्मरूपी बहिरङ्ग तथा अन्तरङ्ग मलके हट जानेसे आपके गुण स्फुरित हो रहे हैं ॥२२६॥ हे भगवन्, आप जिनवाणीके समान मनुष्यलोकको पवित्र करनेवाली पुण्यरूप निर्मल जिनदीक्षाको धारण कर रहे हैं इसके सिवाय आप सबका हित करनेवाले हैं और सुख देनेवाले हैं इसलिये आपको नमस्कार हो ॥२२७॥ हे भगवन्, आपकी यह पार-मेश्वरी दीक्षा गङ्गा नदीके समान जगत्त्रयका संताप दूर करनेवाली है और तीनों जगत्को मुख्य रूपसे पवित्र करनेवाली है, ऐसी यह आपकी दीक्षा हमलोगोंको सदा पवित्र करे ॥२२८॥ हे भगवन्, आपकी यह दीक्षा धनकी धाराके समान हम लोगोंको सन्तुष्ट कर रही है क्योंकि जिस प्रकार धनकी धारा सुवर्णा अर्थात् सुवर्णमय होती है उसी प्रकार यह दीक्षा भी सुवर्णा अर्थात् उत्तम यशसे सहित है । धनकी धारा जिस प्रकार रुचिरा अर्थात् कान्तियुक्त-मनोहर होती है उसी प्रकार यह दीक्षा भी रुचिरा अर्थात् सम्यक्त्वभावको देनेवाली है (रुचिं श्रद्धां राति ददातीति रुचिरा) धनकी धारा जिस प्रकार हृद्या अर्थात् हृदयको प्रिय लगती है, उसी प्रकार यह दीक्षा भी हृद्या अर्थात् संयमीजनोंके हृदयको प्रिय लगती है और धनकी धारा जिस प्रकार देदीप्यमान रत्नोंसे अलंकृत होती है उसी प्रकार यह दीक्षा भी सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी देदीप्यमान रत्नोंसे अलंकृत है ॥२२९॥ हे भगवन्, मुक्तिके लिये उद्योग करनेवाले आप तत्कालीन अपने निर्मल परिणामोंके द्वारा पहले ही प्रबुद्ध हो चुके थे, लौकान्तिक देवोंने तो नियोगवश पीछे आकर प्रतिबोधित किया था ॥२३०॥ हे मुनिनाथ, जगत्की सृष्टि करनेवाले आपका, दीक्षा धारण करनेके विषयमें जो यह अभिप्राय हुआ है वह आपको स्वयं ही प्राप्त हुआ है इसलिये आप स्वयंबुद्ध हैं ॥२३१॥ हे नाथ, आप इस राज्य-लक्ष्मीको भोगके अयोग्य तथा चञ्चल समझकर ही क्लेश नष्ट करनेके लिये निर्वाणदीक्षाको प्राप्त हुए हैं ॥२३२॥ हे भगवन्, मत्त हस्तीकी तरह स्नेहरूपी खूंटा उखाड़कर वनमें प्रवेश करते हुए आपको आज कोई भी नहीं रोक सकता है ॥२३३॥ हे देव, ये भोग स्वप्नमें भोगे हुए भोगोंके समान हैं, यह संपदा नष्ट हो जानेवाली है और यह जीवन भी चञ्चल है यही

१ पवित्राम् । २ आगमम् । ३ दधानाय । ४ सर्वप्राणिहितोपदेशकाय । ५ निर्वापित । ६ परमेश्वरस्येयम् । ७ क्षत्रियादिवर्णा, पक्षे शोभनकान्तिमती च । सुवर्णरुचिता द०, म०, इ०, स०, ल० । ८ नेत्रहारिणी । ९ मनोहारिणी । १० रत्नत्रयैः । ११ दीप्तै–अ०, म०, स०, ल० । १२ रत्नवृष्टिः । १३ परिनिष्क्रमणम् । १४ युष्मत्सम्बन्धिनी । १५ प्रीणाति । १६ मोक्षार्थम् । १७ उद्योगं कुर्वाणः । १८ उपागतैः । १९ शुद्धैः । २० यातः अ०, प०, द०, स०, म०, ल० । २१ नाशाय । २२ बन्धस्तम्भम् । २३ प्रतिबन्धकः । २४ समानाः । २५ विनाशशीला । २६ करोषि ।

अवधूय चलां लक्ष्मीं निर्धूय स्नेहबन्धनम् । धनं रज इवोद्धूय मुक्त्या संगंस्यते[1] भवान् ॥२३५॥
राज्यलक्ष्म्याः[2] परिम्लानिं मुक्तिलक्ष्म्याः परां मुदम् । प्रव्यंजयं[3] स्तपोलक्ष्म्याम् आसजस्त्वं[4] विना रतेः ॥२३६॥
राज्यश्रियां विरक्तोऽसि संरक्तोऽसि तपःश्रियाम् । [5]मुक्तिश्रियां च सोत्कण्ठो [6]गतैवं ते विरागता ॥२३७॥
ज्ञात्वा हेयमुपेयं[7] च हित्वा हेयमिवाखिलम् । उपादेयमुपादित्सोः[8] कथं ते समदर्शिता ॥ २३८ ॥
पराधीनं सुखं हित्वा सुखं स्वाधीनमीप्सतः[9] । त्यक्त्वाल्पां विपुलां चर्द्धि वाञ्छतो विरतिः क्व ते ॥ २३९॥
[10] आमनन्त्यात्मविज्ञानं योगिनां हृदयं[11] परम् । कीदृक् तवात्मविज्ञानमात्मवत्पश्यतः परान् ॥२४०॥
तथा परिचरन्त्येते यथा[12] पूर्वं सुरासुराः । त्वामुपास्ते[13] च गूढं श्रीः [14]कुतस्त्यस्ते तपःस्मयः[15] ॥ २४१ ॥
नैस्सङ्गीमास्थि[16]तश्चर्यां सुखानुश[17]यमप्यहन्[18] । सुखीति कृतिभिर्देव त्वं तथाप्यभिलप्यसे ॥ २४२ ॥
[19]ज्ञानशक्तित्रयीमूढ्वा [20]बिभित्सोः कर्मसाधनम्[21] । जिगीषुवृत्त[22] मद्यापि तपोराज्ये तवास्त्यदः ॥ २४३ ॥
[23]मोहान्धतमसध्वंसे बोधितां[24] ज्ञानदीपिकाम् । त्वमादायचरो[25] नैव[26] क्लेशापाते[27]ऽवसीदसि ॥२४४॥

विचार कर आपने अविनाशी मोक्षमार्गमें अपना मन लगाया है ॥२३४॥ हे भगवन्, आप चंचल लक्ष्मीको दूर कर स्नेहरूपी बन्धनको तोडकर और धनको धूलिकी तरह उडाकर मुक्ति के साथ जा मिलेंगे ॥२३५॥ हे भगवन्, आप रतिके बिना ही अर्थात् वीतराग होनेपर भी राजलक्ष्मीमें उदासीनताको और मुक्तिलक्ष्मीमें परम हर्षको प्रकट करते हुए तपरूपी लक्ष्मी में आसक्त हो गये हैं यह एक आश्चर्यकी बात है ॥२३६॥ हे स्वामिन्, आप राजलक्ष्मीमें विरक्त हैं, तपरूपी लक्ष्मीमें अनुरक्त हैं और मुक्तिरूपी लक्ष्मीमें उत्कंठासे सहित हैं इससे मालूम होता है कि आपकी विरागता नष्ट हो गई है । भावार्थ–यह व्याजोक्ति अलंकार है–इसमें ऊपर से निन्दा मालूम होती है परन्तु यथार्थमें भगवान्की स्तुति प्रकट की गई है ॥२३७॥ हे भगवन्, आपने हेय और उपादेय वस्तुओंको जानकर छोडने योग्य समस्त वस्तुओंको छोड दिया है और उपादेयको आप ग्रहण करना चाहते हैं ऐसी दशामें आप समदर्शी कैसे हो सकते हैं ? (यह भी व्याजस्तुति अलंकार है) ॥२३८॥ आप पराधीन सुखको छोडकर स्वाधीन सुख प्राप्त करना चाहते हैं तथा अल्प विभूतिको छोडकर बड़ी भारी विभूतिको प्राप्त करना चाहते हैं ऐसी हालतमें आपका विरति–पूर्ण त्याग कहाँ रहा ? (यह भी व्याजस्तुति है) ॥२३९॥ हे नाथ ! योगियोंका आत्मज्ञान मात्र उनके हृदयको जानता है परन्तु आप अपने समान पर-पदार्थोंको भी जानते हैं इसलिये आपका आत्मज्ञान कैसा है ? ॥२४०॥ हे नाथ, समस्त सुर और असुर पहलेके समान अब भी आपकी परिचर्या कर रहे हैं और यह लक्ष्मी भी गुप्त रीति से आपकी सेवा कर रही है तब आपके तपका भाव कहाँसे आया ? अर्थात् आप तपस्वी कैसे कहलाये ? ॥२४१॥ हे भगवन्, यद्यपि आपने निर्ग्रन्थ वृत्ति धारणकर सुख प्राप्त करने-का अभिप्राय भी नष्ट कर दिया है तथापि कुशल पुरुष आपको ही सुखी कहते हैं॥२४२॥ हे प्रभो, आप मतिज्ञान श्रुतज्ञान और अवधिज्ञानरूपी तीनों शक्तियोंको धारण कर कर्मरूपी शत्रुओंकी सेनाको खण्डित करना चाहते हैं इसलिये इस तपश्चरणरूपी राज्यमें आज भी आपका विजिगीषुभाव अर्थात् शत्रुओंको जीतनेकी इच्छा विद्यमान है ॥२४३॥ हे ईश,

१ घटिष्यते । २ राजलक्ष्म्याम् । ३ प्रव्यक्तीकुर्वन् । ४ आसक्तोऽभूः । ५ मुक्तिलक्ष्म्याम् म०, ल० । ६ ज्ञाता नष्टा वा । ७ उपादेयम् । ८ उपादातुमिच्छोः । ९ वाञ्छतः । १० कथयन्ति । ११ स्वरूपं रहस्यं च । १२ राज्यकाले । १३ आराधयति । १४ कुत आगतः । १५ तपोऽहंकारः । १६ आश्रितः । १७ सुखानुबन्धम् । १८ हंसि स्म । १९ मतिश्रुतावधिज्ञान-शक्तित्रयम्, पक्षे प्रभुमन्त्रोत्साहशक्तित्रयम् । २० भेत्तुमिच्छोः । २१ ज्ञानावरणादिकर्मसेनाम्, पक्षे योद्धुमारब्धादिसेनाम् । २२ वृत्तिः । २३ मोहनीयनीडान्धकारनाशार्थम् । २४ ज्वलिताम् । २५ गच्छन् । २६ नेश अ०, प०, इ०, द०, म०, स०, ल० । चरन्नेश ल० । २७ कुटावपाते ।

[1]भट्टारकबरीभृष्टिः[2] कर्मणोऽष्टतयस्य या । तां प्रति प्रज्वलत्येषा त्वद्ध्यानाग्निशिखोच्छिखा ॥ २४५ ॥
दृष्टतत्त्व[3]वरीवृष्टिः कर्माष्टकवनस्य या । तत्रोक्षिप्ता कुठारीयं रत्नत्रयमयी त्वया ॥ २४६ ॥
ज्ञानवैराग्यसम्पत्तिस्तवैषानन्यगोचरा । विमुक्तिसाधनायालं भक्तानां च [4]भवोच्छिदे ॥ २४७ ॥
इति [5]स्वार्थां परार्थां च बोधसम्पदमूर्जिताम् । दधतेऽपि नमस्तुभ्यं विरागाय गरीयसे ॥ २४८ ॥
इत्यभिष्टुत्य नाकीन्द्राः प्रतिजग्मुः स्वमास्पदम् । तद्गुणानुस्मृतिं पूताम् आदाय स्वेन चेतसा ॥ २४९ ॥
ततो भरतराजोऽपि गुरुं भक्तिभरानतः । पूजयामास लक्ष्मीवान् [6]उच्चावचवचःस्रजा ॥ २५० ॥

मालिनीच्छन्दः

अथ भरतनरेन्द्रो रुन्द्रभक्त्या मुनीन्द्रं [7]समधिगतसमाधिं सावधानं स्वसाध्ये ।
सुरभिसलिलधारागन्धपुष्पाक्षताद्यैः[8] अयजत[9] जितमोहं सप्रदीपैश्च धूपैः ॥ २५१ ॥
[10]परिणतफलभेदैरामजम्बूकपित्थैः पनसलकुचमोचैः[11]र्दाडिमैर्मातुलुङ्गैः[12] ।
क्रमुकरुचिरगुच्छैर्नालिकेरैश्च रम्यैः गुरुचरणसपर्यामातनोदाततश्रीः ॥ २५२ ॥
कृतचरणसपर्यो भक्तिनम्रेण मूर्ध्ना धरणिनिहित[13]जानुः प्रोद्गतानन्दबाष्पः ।
प्रणतिमतनुतोच्चैर्मौलिमाणिक्यरश्मिप्रविमलसलिलौघैः क्षालयन्भर्तुरङ्घ्री ॥ २५३ ॥

आप मोहरूपी गाढ़ अन्धकारको नष्ट करनेके लिये प्रकाशमान ज्ञानरूपी दीपकको लेकर चलते हैं इसलिये आप क्लेशरूपी गढ़ेमें पड़कर कभी भी दुःखी नहीं होते ॥२४४॥ हे भट्टारक, ज्ञानावरणादि आठ कर्मोंकी जो यह बड़ी भारी भट्ठी बनी हुई है उसमें यह आपकी ध्यानरूपी अग्नि की ऊंची शिखा खूब जल रही है ॥२४५॥ हे समस्त पदार्थोंको जाननेवाले सर्वज्ञ देव, जो यह हरा भरा आठों कर्मोंका वन है उसे नष्ट करनेके लिये आपने यह रत्नत्रयरूपी कुल्हाड़ी उठाई है ॥२४६॥ हे भगवन्, किसी दूसरी जगह नहीं पाई जानेवाली आपकी यह ज्ञान और वैराग्य रूपी सम्पत्ति ही आपको मोक्ष प्राप्त करानेके लिये तथा शरणमें आये हुए भक्त पुरुषोंका संसार नष्ट करनेके लिये समर्थ साधन है ॥२४७॥ हे प्रभो, इस प्रकार आप निज परका हित करनेवाली उत्कृष्ट ज्ञानरूपी सम्पत्तिको धारण करनेवाले हैं तो भी परम वीतराग हैं इसलिये आपको नमस्कार हो ॥२४८॥ इस प्रकार स्तुति कर इन्द्र लोग भगवान्के गुणोंकी पवित्र स्मृति अपने हृदयमें धारण कर अपने अपने स्थानोंको चले गये ॥२४९॥ तदनन्तर लक्ष्मीमान् महाराज भरतने भी भक्तिके भारसे अतिशय नम्र होकर अनेक प्रकारके वचनरूपी मालाओं-के द्वारा अपने पिताकी पूजा की अर्थात् सुन्दर शब्दों द्वारा उनकी स्तुति की ॥२५०॥ तत्पश्चात् उन्हीं भरत महाराजने बड़ी भारी भक्तिसे सुगन्धित जलकी धारा, गन्ध, पुष्प, अक्षत, दीप, धूप और अर्घ्यसे समाधिको प्राप्त हुए (आत्मध्यान में लीन) और मोक्षप्राप्ति रूप अपने कार्य में सदा सावधान रहनेवाले, मोहनीय कर्मके विजेता मुनिराज भगवान् वृषभदेवकी पूजा की ॥२५१॥ तथा जिनकी लक्ष्मी बहुत ही विस्तृत है ऐसे राजा भरतने पके हुए मनोहर आम, जामुन, कैंथा, कटहल, बड़हल, केला, अनार, बिजौरा, सुपारियोंके सुन्दर गुच्छे और नारियलों से भगवान्के चरणोंकी पूजा की थी ॥२५२॥ इस प्रकार जो भगवान्के चरणोंकी पूजा कर चुके हैं, जिनके दोनों घुटने पृथिवीपर लगे हुए हैं और जिनके नेत्रोंसे हर्षके आँसू निकल रहे हैं ऐसे राजा भरतने अपने उत्कृष्ट मुकुटमें लगे हुए मणियोंकी किरणेंरूप स्वच्छ जलके

---

१ पूज्यः । २ भ्रस्ज पाके, अतिपाकः । ३ 'ओव्रश्चू छेदने' । अतिशयेन छेदनम् । ४ भवच्छिदे म०, ल० । ५ स्वप्रयोजनाम् । ६ नानाप्रकार । ७ सम्प्राप्तध्यानम् । ८ पूजाद्रव्यैः । ९ अपूजयत् । १० पक्व । ११ कदली । १२ मातुलिंगैः अ०, प०, द०, म०, स०, इ०, ल० । १३ निःक्षिप्त ।

स्तुतिभिरनुगतार्थालङ्क्रियाश्लाघिनीभिः प्रकटितगुरुभक्तिः कल्मषध्वंसिनीभिः ।
सममवनिपपुत्रैः स्वानुजन्मानुयातो[1] भरतपतिरुदारश्रीरयोध्योन्मुखोऽभूत् ॥ २५४ ॥

अथ सरसिजबन्धौ मन्दमन्दायमानैः परिमृशति कराग्रैः पश्चिमाशाङ्गनास्यम् ।
[2]धुवति मरुति मन्दं प्रोल्लसत्केतुमालां प्रभुरविशदलङ्घ्यां स्वामिवाज्ञामयोध्याम् ॥ २५५ ॥

शार्दूलविक्रीडितम्

तत्रस्थो [3]गुरुमादरात् परिचरन् [4]दूरादुदारोदयः कुर्वन् सर्वजनोपकारकरणीं वृत्तिं स्वराज्यस्थितौ[5] ।
तन्वानः प्रमदं सनाभिषु [6]गुरून् सम्भावयन् सादरं भावी चक्रधरो धरां चिरमपा[7]देकातपत्राङ्किताम् ॥ २५६ ॥

इत्थं निष्क्रमणे गुरोः समुचितं कृत्वा सपर्याविधिं प्रत्यावृत्य[8] पुरीं निजामनुगतो राजाधिराजोऽनुजैः ।
प्रातः प्रातरनूत्थितो नृपगणैर्भक्त्या गुरोः[9] संस्मरन्, दिक्चक्रं विधुतारिचक्रमभुनक् [10]पूर्वं यथासौ जिनः ॥ २५७

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवत्परिनिष्क्रमणं नाम सप्तदशं पर्व ।

समूहसे भगवान्‌के चरण कमलोंका प्रक्षालन करते हुए भक्तिसे नम्र हुए अपने मस्तकसे उन्हीं भगवान्‌के चरणोंको नमस्कार किया ॥२५३॥ जिन्होंने उत्तम उत्तम अर्थ तथा अलंकारोंसे प्रशंसा करने योग्य और पापोंको नष्ट करनेवाली अनेक स्तुतियोंसे गुरुभक्ति प्रकट की है और जो बड़ी भारी विभूतिसे सहित हैं ऐसे राजा भरत अनेक राजपुत्रों और अपने छोटे भाइयोंके साथ साथ अयोध्याके सम्मुख हुए ॥२५४॥

अथानन्तर जब सूर्य अपनी मन्द मन्द किरणोंके अग्रभागसे पश्चिम दिशारूपी स्त्रीके मुखका स्पर्श कर रहा था और वायु शोभायमान पताकाओंके समूहको धीरे धीरे हिला रहा था तब अपनी आज्ञाके समान उल्लंघन करनेके अयोग्य अयोध्यापुरीमें महाराज भरतने प्रवेश किया ॥२५५॥ जो बड़े भारी अभ्युदयके धारक हैं और जो भावी चक्रवर्ती हैं ऐसे राजा भरत उसी अयोध्यापुरीमें रहकर दूरसे ही आदरपूर्वक भगवान् वृषभदेवकी परिचर्या करते थे, उन्होंने अपने राज्यमें सब मनुष्योंका उपकार करनेवाली वृत्ति (आजीविका) का विस्तार किया था, वे अपने भाइयोंको सदा हर्षित रखते थे और गुरुजनोंका आदर सहित सम्मान करते थे। इस प्रकार वे केवल एक छत्रसे चिह्नित पृथिवीका चिर कालतक पालन करते रहे ॥२५६॥ इस प्रकार राजाधिराज भरत तपकल्याणकके समय भगवान् वृषभदेवकी यथोचित पूजा कर छोटे भाइयोंके साथ-साथ अपनी अयोध्यापुरीमें लौटे और वहाँ जिस प्रकार पहले जिनेन्द्रदेव-भगवान् वृषभनाथ दिशाओंका पालन करते थे उसी प्रकार वे भी प्रतिदिन प्रातःकाल राजाओंके समूहके साथ उठकर भक्तिपूर्वक गुरुदेवका स्मरण करते हुए शत्रुमण्डलको नष्ट कर समस्त दिशाओंका पालन करने लगे ॥२५७॥

इस प्रकार आर्ष, भगवज्जिनसेनाचार्य प्रणीत, त्रिषष्टिलक्षणमहापुराणके हिन्दीभाषानुवादमें भगवान्‌के तप-कल्याणकका वर्णन करनेवाला सत्रहवां पर्व समाप्त हुआ।

१ अनुगतः । २ वाति सति । ३ परमेश्वरम् । ४ अतिशयात् । ५ स्थिताम् प०, म० । स्थितिम् द० । ६ नाभिराजादीन् । ७ 'पा रक्षणे' अपालयत् । ८ प्रत्यागत्य । ९ गुरुं ध्यायन् । १० पालयति स्म ।

अथाष्टादशं पर्व

अथ कायं समुत्सृज्य तपोयोगे समाहितः । [1]वाचंयमत्वमास्थाय[2] तस्थौ विश्वेड् विमुक्तये ॥ १ ॥
[3]षण्मासानशनं धीरः प्रतिज्ञाय महाधृतिः[4] । [5]योगैकाग्र्यनिरुद्धान्तर्बहिष्करण[6]विक्रियः ॥२॥
[7]वितस्त्यन्तरपादाग्रं [8]तत्र्यंशान्तरपार्ष्णिकम् । सममृज्वागतं स्थानम् आस्थाय[9] रचितस्थितिः ॥ ३ ॥
कठिनेऽपि शिलापट्टे न्यस्तपादपयोरुहः । लक्ष्म्योपढौकितं[10] गूढम् आस्थितः पद्मविष्टरम् ॥ ४ ॥
किमप्यन्तर्गतं जल्पन्नव्यक्ताक्षरमक्षरः[11] । निगूढनिर्झरारावगुञ्जद्‌गुह इवाचलः ॥ ५ ॥
सुप्रसन्नोज्ज्वलां मूर्तिं प्रलम्बितभुजद्वयाम् । शमस्येव परां मूर्ति दधानो ध्यानसिद्धये ॥ ६ ॥
शिरः शिरोरुहापायात् सुव्यक्तपरिमण्डलम् । रोचि[12]ष्णूष्णीष[13]मुष्णांशुमण्डलस्पर्द्धि धारयन् ॥ ७ ॥
अभ्रूभंगमपापांग[14]वीक्षणं स्तिमितेक्षणम्[15] । बिभ्राणो मुखमक्लिष्टं सुश्लिष्टदशनच्छदम् ॥ ८ ॥
सुगन्धिमुखनिःश्वासगन्धाहूतैरलिव्रजैः । बहिर्निष्काशिताशुद्ध[16]लेश्यांशैरिव लक्षितः ॥ ९ ॥

अथानन्तर समस्त लोकके अधिपति भगवान् वृषभदेव शरीरसे ममत्व छोड़कर तथा तपोयोगमें सावधान हो मौन धारणकर मोक्षप्राप्तिके लिये स्थित हुए ॥१॥ योगोंकी एकाग्रता से जिन्होंने मन तथा बाह्य इन्द्रियोंके समस्त विकार रोक दिये हैं ऐसे धीर वीर महासंतोषी भगवान् छह महीनेके उपवासकी प्रतिज्ञा कर स्थित हुए थे ॥२॥ वे भगवान् सम, सीधी और लम्बी जगहमें कायोत्सर्ग धारण कर खड़े हुए थे । उस समय उनके दोनों पैरोंके अग्र भागमें एक वितस्ति अर्थात् बारह अंगुलका और एड़ियोंमें चार अंगुलका अन्तर था ॥३॥ वे भगवान् कठिन शिलापर भी अपने चरणकमल रखकर इस प्रकार खड़े हुए थे मानो लक्ष्मीके द्वारा लाकर रक्खे हुए गुप्त पद्मासनपर ही खड़े हों ॥४॥ वे अक्षर अर्थात् अविनाशी भगवान् भीतर ही भीतर अस्पष्ट अक्षरोंसे कुछ पाठ पढ़ रहे थे जिससे ऐसे मालूम होते थे मानो जिसकी गुफाएँ भीतर छिपे हुए निर्झरनोंके शब्दसे गूंज रही हैं ऐसा कोई पर्वत ही हो ॥५॥ जिसमें दोनों भुजाएँ नीचेकी ओर लटक रही हैं ऐसी अत्यन्त प्रसन्न और उज्ज्वल मूर्तिको धारण करते हुए वे भगवान् ऐसे मालूम होते थे मानो ध्यानकी सिद्धिके लिये प्रशमगुणकी उत्कृष्ट मूर्ति ही धारण कर रहे हों ॥६॥ केशोंका लोंच हो जानेसे जिसका गोल परिमण्डल अत्यन्त स्पष्ट दिखाई पड़ रहा था, जिसका ब्रह्मद्वार अतिशय देदीप्यमान था और जो सूर्यके मण्डलके साथ स्पर्द्धा कर रहा था ऐसे शिरको वे भगवान् धारण किये हुए थे ॥७॥ जो भौंहोंके भंग और कटाक्ष अवलोकनसे रहित था, जिसके नेत्र अत्यन्त निश्चल थे और ओंठ खेदरहित तथा मिले हुए थे ऐसे सुन्दर मुखको भगवान् धारण किये हुए थे ॥८॥ उनके मुखपर सुगन्धित निश्वास की सुगन्धसे जो भ्रमरोंके समूह उड़ रहे थे वे ऐसे मालूम होते थे मानो अशुद्ध (कृष्ण नील

१ मौनित्वम् । २ आश्रित्य । ३ षड्मासा—ब० । ४ सन्तोषः । ५ ध्यानान्यवृत्तिप्रतिबंधितमनश्चक्षुरादीन्द्रियव्यापारः । ६ बहिःकरण—ब०, अ०, प० । ७ द्वादशाङ्गुलान्तर । 'वितस्तिर्द्वादशाङ्गुलम्' इत्यभिधानात् । ८ चतुरङ्गुलान्तर । ९ आश्रित्य । १० उपनीतम् । ११ नित्यः । १२ प्रकाशनशीलम् । १३ उष्णीषो नाम ब्रह्मद्वारस्थो ग्रन्थिविशेषः । "भाग्यातिशयसम्भूतिज्ञापनं मस्तकाग्रजम् । तेजोमण्डलमुष्णीषमामनन्ति मनीषिणः ।" १४ अपगतकटाक्षेक्षणम् । १५ स्थिरदृष्टिम् । १६ कृष्णाद्यशुभलेश्या ।

प्रलम्बितमहाबाहुर्दीप्र[1]प्रोत्तुङ्गविग्रहः । कल्पाङ्घ्रिप[2] इवावाग्र[3]शाखाद्वयपरिष्कृतः ॥ १० ॥
अलक्ष्येणातपत्रेण तपोमाहात्म्यजन्मना । कृतच्छायोप्य[4]नर्थित्वादकृतेच्छः[5] परिच्छदे ॥ ११ ॥
पर्यन्ततरुशाखाग्रैः मन्दानिलविधूनितैः । प्रकीर्णकैरिवायत्न[6]विधूतैर्विधुतक्लमः[7] ॥ १२ ॥
दीक्षानन्तरमुद्भूतमनःपर्ययबोधनः । चक्षुर्ज्ञानधरः श्रीमान् सान्तर्दीप इवालयः ॥१३॥
चतुर्भिरूर्जितैर्बोधैः अमात्यैरिव चर्चितम्[8] । विलोकयन् विभुः कृत्स्नं परलोकगतागतम्[9] ॥ १४ ॥
यदैवं स्थितवान् देवः पुरुः परमनिःस्पृहः । तदामीषां[10] नृपर्षीणां धृतेः[11] क्षोभो महानभूत् ॥ १५ ॥
मासा द्वि[12]त्राश्च नो[13] यावत्तावत्ते मुनिमानिनः । परीषहमहावातैः भग्नाः सद्यो धृतिं[14] जहुः ॥ १६ ॥
अशक्ताः पदवीं गन्तुं गुरोरतिगरीयसीम् । त्यक्त्वाभिमानमित्युच्चैः जजल्पुरिते परस्परम् ॥ १७ ॥
अहो [15]धैर्यमहो स्थैर्यम् अहो जङ्घाबलं प्रभोः । को नामैवमिनं मुक्त्वा कुर्यात् साहसमीदृशम् ॥ १८ ॥
कियन्तमथवा कालं तिष्ठेदेवमतन्द्रितः । सोढ्वा बाधाः क्षुधाद्युत्था गिरीन्द्र इव निश्चलः ॥ १९ ॥

आदि) लेश्याओंके अंश ही बाहिरको निकल रहे हों । ॥९॥ उनकी दोनों बड़ी-बड़ी भुजाएं नीचेकी ओर लटक रही थीं और उनका शरीर अत्यन्त देदीप्यमान तथा ऊँचा था इसलिये वे ऐसे जान पड़ते थे मानो अग्रभागमें स्थित दो ऊँची शाखाओंसे सुशोभित एक कल्पवृक्ष ही हो ॥१०॥ तपश्चरणके माहात्म्यसे उत्पन्न हुए अलक्षित (किसीको नहीं दिखनेवाले) छत्र ने यद्यपि उनपर छाया कर रक्खी थी तो भी उसकी अभिलाषा न होनेसे वे उससे निर्लिप्त ही थे–अपरिग्रही ही थे । ॥११॥ मन्द मन्द वायुसे जो समीपवर्ती वृक्षोंकी शाखाओंके अग्र-भाग हिल रहे थे उनसे वे ऐसे जान पड़ते थे मानो बिना यत्नके डुलाये हुए चमरोंसे उनका क्लेश ही दूर हो रहा हो ॥१२॥ दीक्षाके अनन्तर ही उन्हें मनःपर्यय ज्ञान प्राप्त हो गया था इसलिये मति श्रुत अवधि और मनःपर्यय इन चार ज्ञानोंको धारण करनेवाले श्रीमान् भगवान् ऐसे जान पड़ते थे मानो जिसके भीतर दीपक जल रहे हैं ऐसा कोई महल ही हो ॥१३॥ जिस प्रकार कोई राजा मन्त्रियोंके द्वारा चर्चा किये जानेपर परलोक अर्थात् शत्रुओंके सब प्रकार के आना जाना आदिको देख लेता है–जान लेता है उसी प्रकार भगवान् वृषभदेव भी अपने सुदृढ़ चार ज्ञानोंके द्वारा सब जीवोंके परलोक अर्थात् पूर्वपरपर्यायसम्बन्धी आना जाना आदि को देख रहे थे–जान रहे थे ॥१४॥ इस प्रकार भगवान् वृषभदेव जब परम निःस्पृह होकर विराजमान थे तब कच्छ महाकच्छ आदि राजाओंके धैर्यमें बड़ा भारी क्षोभ उत्पन्न होने लगा–उनका धैर्य छूटने लगा ॥१५॥ दीक्षा धारण किये हुए दो तीन माह भी नहीं हुए थे कि इतनेमें ही अपनेको मुनि माननेवाले उन राजाओंने परीषहरूपी वायुसे भग्न होकर शीघ्र ही धैर्य छोड़ दिया था ॥१६॥ गुरुदेव–भगवान् वृषभदेवके अत्यन्त कठिन मार्गपर चलनेमें असमर्थ हुए वे कल्पित मुनि अपना अपना अभिमान छोड़कर परस्परमें जोर जोरसे इस प्रकार कहने लगे ॥१७॥ कि, अहा आश्चर्य है भगवान्‌का कितना धैर्य है, कितनी स्थिरता है और इनकी जंघाओंमें कितना बल है ? इन्हें छोड़कर और दूसरा कौन है जो ऐसा साहस कर सके ? ॥१८॥ अब यह भगवान् इस तरह आलसरहित होकर क्षुधा आदिसे उत्पन्न हुई बाधाओंको सहते हुए निश्चल पर्वतकी तरह और कितने समय तक खड़े रहेंगे ॥१९॥

---

१ दीप्त–म०, ल० । २ कल्पांह्रिप इवा– । ३ इवोच्चाग्र–अ०, म०, ल० । अवनत-शाखाद्वयालंकृत । ४ वाञ्छारहितत्वात् । ५ दक्षतेच्छः म०, ल० । ६ विद्युतैः म०, ल० । ७ विनाशितश्रमः । ८ निरूपितम् । ९ उत्तरगतिगमनागमनम्, पक्षे शत्रुजनगमनागमनम् । १० कच्छादीनाम् । ११ धैर्यस्य । १२ द्वौ वा त्रयो वा द्वित्राः । १३ न भवन्ति । १४ धैर्यम । १५ मनोबलम ।

तिष्ठेदेकं दिनं द्वे वा कामं त्रिचतुराणि वा । परं[1]मासावधेस्तिष्ठन्नस्मान् क्लेशयतीशिता ॥ २० ॥
कामं तिष्ठतु वा भुक्त्वा पीत्वा निर्वाप्य[2] नः पुनः । [3]अनाश्वान्नि[4]ष्प्रतीकारः तिष्ठन्निष्ठां[5] करोति नः ॥ २१ ॥
साध्यं किमथवोद्दिश्य तिष्ठे[6]दूर्ध्वज्ञुरीशिता । षाड्[7]गुण्ये पठितो नैष गुणः कोपि महीक्षिताम्[8] ॥ २२ ॥
अनेकोपद्रवाकीर्णे वनेऽस्मिन् रक्षया विना । तिष्ठन्न नीतिविद् भर्ता रक्ष्यो ह्यात्मा प्रयत्नतः ॥ २३ ॥
प्रायः प्राणेषु निर्विण्णो[9] देहमुत्स्रष्टु[10]मीहते । निर्विण्णा[11] वयमेतेन तपसा प्राणहारिणा ॥ २४ ॥
वन्यैः[12] [13]कशिपुभिस्तावत् कन्दमूलफलादिभिः । प्राणयात्रां[14] करिष्यामो यावद्योगावधिर्गुरोः ॥ २५ ॥
इति दीनतरं केचिन्निर्व्यपेक्षास्तपोविधौ । ब्रुवाणाः कातरा दीनां वृत्तिं प्रत्युन्मुखाः स्थिताः ॥ २६ ॥
परे परापरज्ञं[15] तं परितोऽभ्यर्णवर्तिनः । इति कर्तव्यतामूढाः तस्थुरन्तश्चलाचलाः[16] ॥ २७ ॥
शयाने शयितं भुक्तं भुञ्जाने तिष्ठति स्थितम् । गतं गच्छति राज्यस्थे तपःस्थेऽप्या स्थितं[17] तपः ॥ २८ ॥

हम समझते थे कि भगवान् एक दिन, दो दिन अथवा ज्यादासे ज्यादा तीन चार दिनतक खड़े रहेंगे परन्तु यह भगवान् तो महीनों पर्यन्त खड़े रहकर हम लोगोंको क्लेशित (दुःखी) कर रहे हैं ॥२०॥ अथवा यदि स्वयं भोजन पान कर और हम लोगोंको भी भोजन पान आदिसे सन्तुष्ट कर फिर खड़े रहते तो अच्छी तरह खड़े रहते, कोई हानि नहीं थी परन्तु यह तो बिलकुल ही उपवास धारणकर भूख प्यास आदिका कुछ भी प्रतीकार नहीं करते और इस प्रकार खड़े रहकर हम लोगोंका नाश कर रहे हैं ॥२१॥ अथवा न जाने किस कार्यके उद्देश्यसे भगवान् इस प्रकार खड़े हुए हैं । राजाओंके जो सन्धि विग्रह आदि छः गुण होते हैं उनमें इस प्रकार खड़े रहना ऐसा कोई भी गुण नहीं पढ़ा है ॥२२॥ अनेक उपद्रवोंसे भरे हुए इस वनमें अपनी रक्षाके बिना ही जो भगवान् खड़े हुए हैं उससे ऐसा मालूम होता है कि यह नीतिके जानकार नहीं हैं क्योंकि अपनी रक्षा प्रयत्नपूर्वक करनी चाहिये ॥२३॥ भगवान् प्रायः प्राणोंसे विरक्त होकर शरीर छोड़नेकी चेष्टा करते हैं परन्तु हम लोग प्राणहरण करनेवाले इस तपसे ही खिन्न हो गये हैं ॥२४॥ इसलिये जबतक भगवान्‌के योगकी अवधि है अर्थात् जबतक इनका ध्यान समाप्त नहीं होता तबतक हम लोग वनमें उत्पन्न हुए कन्द मूल फल आदिके द्वारा ही अपनी प्राणयात्रा (जीवन निर्वाह) करेंगे ॥२५॥ इस प्रकार कितने ही कातर पुरुष तपस्यासे उदासीन होकर अत्यन्त दीन वचन कहते हुए दीनवृत्ति धारण करनेके लिये तैयार हो गये ॥२६॥ हमें क्या करना चाहिये इस विषयमें मूर्ख रहनेवाले कितने ही मुनि पूर्वापर (आगा-पीछा) जाननेवाले भगवान्‌के चारों ओर समीप ही खड़े हो गये और अपने अन्तःकरणको कभी निश्चल तथा कभी चञ्चल करने लगे । भावार्थ–कितने ही मुनि समझते थे कि भगवान् पूर्वापरके जाननेवाले हैं इसलिये हम लोगोंके पूर्वापरका भी विचार कर हम लोगोंसे कुछ न कुछ अवश्य कहेंगे ऐसा विचार कर उनके समीप ही उन्हें चारों ओरसे घेरकर खड़े हो गये । उस समय जब वे भगवान्‌के गुणों-की ओर दृष्टि डालते थे तब उन्हें कुछ धैर्य प्राप्त होता था और जब अपनी दीन अवस्थापर दृष्टि डालते थे तब उनकी बुद्धि चंचल हो जाती थी–उनका धैर्य छूट जाता था ॥२७॥ वे मुनि परस्परमें कह रहे थे कि जब भगवान् राज्यमें स्थित थे अर्थात् राज्य करते थे तब हम उनके सो जानेपर सोते थे, भोजन कर चुकनेपर भोजन करते थे, खड़े होनेपर खड़े रहते थे और गमन करनेपर गमन करते थे तथा अब जब भगवान् तपमें स्थित हुए अर्थात् जब इन्होंने तपश्चरण

---

१ बहुमासम् (?) । २ सन्तर्प्य । ३ अनशनवान् । ४ –न्निःप्रतीकारः अ०, प० । ५ नाशम् । ६ ऊर्ध्वजानुः । –दूर्ध्वज्ञं यीशिता अ० । ७ सन्धिविग्रहयानासनद्वैधाश्रयलक्षणे । ८ क्षत्रियाणाम् । ९ विरक्तः । १० त्यक्तुम् । ११ विरक्ताः । १२ वनभवैः । १३ अशनाच्छादनैः । "कशिपुर्भोजनाच्छादौ" । १४ प्राणप्रवृत्तिम् । १५ पूर्वापरविदम् । १६ अन्तरंगे चंचलाः ।१७ आश्रितम् ।

भृत्याचारोऽयमस्माभिः पूर्वं सर्वोऽप्यनुष्ठितः । कालः कुलाभिमानस्य [1]गतोऽद्य प्राणसंकटे ॥ २९ ॥
वने [2]प्रवसतोऽस्माभिर्न भुक्तं [3]जीवनं प्रभोः[4] । यावच्छक्ताःस्थिताः तावदशक्ताः किं नु कुर्महे ॥ ३० ॥
मिथ्या[5] कारयते योगं गुरु[6]रस्मासु निर्दयः । स्पर्धां कृत्वा सहैतेन मर्तव्यं किमशक्तकैः[7] ॥ ३१ ॥
अनिवर्ती गुरुः सोऽयं कोऽस्यान्वेतुं पदं[8] क्षमः । देवः स्वच्छन्दचार्येष न देवचरितं चरेत् ॥ ३२ ॥
[9]कच्चिज्जीवति मे माता कच्चिज्जीवति मे पिता । कच्चित्[10]स्मरन्ति नः कान्ताः कच्चिन्नः सुस्थिताः प्रजाः[11] ॥
इति स्वान्तर्गतं केचिद् अच्छोद्य[12] [13]स्थातुमक्षमाः । अच्छ[14]व्रज्य गुरोः पादौ प्रणता[15] गमनोत्सुकाः ॥ ३४ ॥
अहो गुरुरयं धीरः किमप्युद्दिश्य कारणम् । जितात्मा[16] त्यक्तराज्यश्रीः पुनः संयोक्ष्यते तया ॥ ३५ ॥
यदायमद्य वा श्वो वा योगं संहृत्य धीरधीः । निजराज्यश्रिया भूयो योक्ष्यते वदतां वरः ॥ ३६ ॥
तदास्मान्स्वामिकार्येऽस्मिन् भग्नोत्साहान् कृतच्छलान् । [17]निर्वासयेदसत्कृत्य कुर्याद्वा [18]वीतसम्पदः॥३७॥
भरतो वा गुरुं त्यक्त्वा गतानस्मान् विकर्शयेत् । [19]तद्यावद्योगनिष्पत्तिः विभोस्तावत्सहामहे ॥ ३८ ॥

करना प्रारम्भ किया तब हम लोगोंने तप भी धारण किया । इस प्रकार सेवकका जो कुछ कार्य है वह सब हम पहले कर चुके हैं परन्तु हमारे कुलाभिमानका वह समय आज हमारे प्राणोंको संकट देनेवाला बन गया है अथवा इस प्राणसंकटके समय हमारे कुलाभिमानका वह काल नष्ट हो गया है ॥२८–२९॥ जबसे भगवान्ने वनमें प्रवेश किया है तबसे हमने जल भी ग्रहण नहीं किया है । भोजन पानके विना ही जबतक हम लोग समर्थ रहे तबतक खड़े रहे परन्तु अब सामर्थ्यहीन हो गये हैं इसलिये क्या करें ॥३०॥ मालूम होता है कि भगवान् हमपर निर्दय हैं–कुछ भी दया नहीं करते, वे हमसे झूठमूठ ही तपस्या कराते हैं, इनके साथ बराबरीकी स्पर्धा कर क्या हम असमर्थ लोगोंको मर जाना चाहिये ? ॥३१॥ ये भगवान् अब घरको नहीं लौटेंगे, इनके पदका अनुसरण करनेके लिये कौन समर्थ है ? ये स्वच्छन्दचारी हैं इसलिये इनका किया हुआ काम किसीको नहीं करना चाहिये ॥३२॥ क्या मेरी माता जीवित हैं, क्या मेरे पिता जीवित हैं, क्या मेरी स्त्री मेरा स्मरण करती है और क्या मेरी प्रजा अच्छी तरह स्थित है ? ॥३३॥ इस प्रकार वहाँ ठहरनेके लिये असमर्थ हुए कितने ही लोग अपने मनकी बात स्पष्ट रूपसे कह कर घर जानेकी इच्छासे बार-बार भगवान्के सम्मुख जाकर उनके चरणोंको नमस्कार करते थे ॥३४॥ कोई कहते थे कि अहा, ये भगवान् बड़े ही धीर वीर हैं इन्होंने अपनी आत्माको भी वश कर लिया है और इन्होंने किसी न किसी कारणको उद्देश्य कर राज्यलक्ष्मीका परित्याग किया है इसलिये फिर भी उससे युक्त होंगे अर्थात् राज्यलक्ष्मी स्वीकृत करेंगे ॥३५॥ स्थिर बुद्धिको धारण करनेवाले और बोलनेवालोंमें श्रेष्ठ भगवान् वृषभदेव जब आज या कल अपना योग समाप्त कर अपनी राज्यलक्ष्मीसे पुनः युक्त होंगे तब भगवान्के इस कार्यमें जिन्होंने अपना उत्साह भग्न कर दिया है अथवा छल किया है ऐसे हम लोगोंको अपमानित कर अवश्य ही निकाल देंगे और सम्पत्तिरहित कर देंगे अर्थात् हम लोगोंकी सम्पत्तियाँ हरण कर लेंगे ॥३६–३७॥ अथवा यदि हम लोग भगवान्को छोड़कर जाते हैं तो भरत महाराज हम लोगोंको कष्ट देंगे इसलिये जबतक भगवान्का योग समाप्त होता है तबतक हम लोग

---

१ गतोऽथ म०, ल० । २ प्रविशतो–म०, ल० । ३ अशनपानादि । ४ प्रभोः सकाशात् । ५ ईर्ष्ययेत्यर्थः । ६ प्रभुर–म०, ल० । ७ असमर्थैरस्माभिः । ८ पदवीम् । ९ 'कच्चित् किंचन संशये' इति धनंजयः । कच्चित् इष्टप्रश्ने । 'कच्चित् कामप्रवेदने' इत्यमरः । १० स्मरति नः कान्ता प० । किंचित् स्मरति मे कान्ता अ० । कच्चित् स्मरति मे कान्ता म०, ल० । ११ पुत्राः । १२ दृढमभिधाय । अच्छेत्यव्ययेन समासे ल्यब् भवति । १३ वस्तुम् । १४ अभिमुखं गत्वा । अनुव्रज्य प०, म०, ल० । १५ प्रणताः सन्तः । १६ जितेन्द्रियः । १७ निष्कासयेत् । १८ विगतः । १९ तत्कारणात् ।

भगवानयमद्य श्वः सिद्धयोगो भवेद् ध्रुवम् । सिद्धेयोगे कृतक्लेशान् अस्मानभ्यव[1]पत्स्यते ॥ ३९ ॥
गुरोर्वा गुरुपुत्राद्वा पीडैवं नैव जातु नः । पूजासत्कारलाभैश्च प्रीतः सम्प्रीणयेत् स नः ॥ ४० ॥
इति धीरतया केचिदन्तःक्षोभेऽप्य[2]नातुराः । धीरयन्तोपि नात्मानं शेकुः स्थापयितुं स्थितौ ॥ ४१ ॥
अभिमानधनाः केचिद्भूयोऽपि स्थातुमुद्यताः । पतित्वाप्यवशं भूमौ संस्मरुर्गुरुपादयोः ॥ ४२ ॥
इत्युच्चावच[3]सञ्जल्पैः संकल्पैश्च पृथग्विधैः[4] । विरम्यते तपःक्लेशाज्जीविकायां[5] मतिं व्यधुः ॥ ४३ ॥
[6]मुखोन्मुखं विभोर्दत्तदृष्टयः पृष्ठतोमुखाः । अशक्त्या लज्जया [7]चान्ये भेजिरे स्खलितां गतिम् ॥ ४४ ॥
[8]अनापृच्छ्य गुरुं केचित् केचिदापृच्छ्य योगिनम् । परीत्य प्रणताः [9]प्राणयात्रायां मतिमादधुः ॥ ४५ ॥
केचित्त्वमेव शरणं नान्या गतिरिहास्ति नः । इति ब्रुवाणा विद्राणाः[10] प्राणत्राणे[11] मतिं व्यधुः ॥ ४६ ॥
[12]अपत्रपिष्णवः केचिद् वेपमानप्रतीककाः[13] । गुरोः पराङ्मुखीभूय जाता व्रतपराङ्मुखाः ॥ ४७ ॥
पादयोः पतिताः केचित् परित्रायस्व नः प्रभोः । [14]क्षुत्क्षामाङ्गान् क्षमस्वेति ब्रुवन्तोऽन्तर्हिता गुरोः ॥ ४८ ॥

यहीं सब कुछ सहन करें ॥३८॥ यह भगवान् अवश्य ही आज या कलमें सिद्धयोग हो जावेंगे अर्थात् इनका योग सिद्ध हो जावेगा और योगके सिद्ध हो चुकनेपर अनेक क्लेश सहन करनेवाले हम लोगोंको अवश्य ही अंगीकृत करेंगे–किसी न किसी तरह हमारी रक्षा करेंगे ॥३९॥ ऐसा करनेसे हम लोगोंको न तो कभी भगवान्से कोई पीड़ा होगी और न उनके पुत्र भरतसे ही । किन्तु प्रसन्न होकर वे दोनों ही पूजा सत्कार और धनादिके लाभसे हम लोगोंको सतुष्ट करेंगे ॥४०॥ इस प्रकार कितने ही मुनि अन्तरङ्गमें क्षोभ रहते हुए भी धीरताके कारण दुखी नहीं हुए थे और कितने ही पुरुष आत्माको धैर्य देते हुए भी उसे उचित स्थितिमें रखनेके लिये समर्थ नहीं हो सके थे ॥४१॥ अभिमान ही है धन जिनका ऐसे कितने ही पुरुष फिर भी वहाँ रहनेके लिये तैयार हुए थे और निर्बल होनेके कारण परवश जमीनपर पड़कर भी भगवान्के चरणोंका स्मरण कर रहे थे ॥४२॥ इस प्रकार राजा अनेक प्रकारके ऊँचे नीचे भाषण और संकल्प विकल्प कर तपश्चरण सम्बन्धी क्लेशसे विरक्त हो गये और जीविकामें बुद्धि लगाने लगे अर्थात् उसके उपाय सोचने लगे ॥४३॥ कितने ही लोग अशक्त होकर भगवान्के मुखके सन्मुख देखने लगे और कितने ही लोगोंने लज्जाके कारण अपना मुख पीछेकी ओर फेर लिया । इस प्रकार धीरे-धीरे स्खलित गतिको प्राप्त हुए अर्थात् क्रम क्रमसे जानेके लिये तत्पर हुए ॥४४॥ कितने ही लोग योगिराज भगवान् वृषभदेवसे पूछकर और कितने ही विना पूछे ही उनकी प्रदक्षिणा देकर और उन्हें नमस्कारकर प्राणयात्रा (आजीविका) के उपाय सोचने लगे ॥४५॥ हे देव, आप ही हमें शरणरूप हैं इस संसारमें हम लोगोंकी और कोई गति नहीं है ऐसा कहकर भागते हुए कितने ही पुरुष अपने प्राणोंकी रक्षामें बुद्धि लगा रहे थे–प्राणरक्षाके उपाय विचार रहे थे ॥४६॥ जिनके प्रत्येक अङ्ग थरथर कांप रहे हैं ऐसे कितने ही लज्जावान् पुरुष भगवान्से पराङ्मुख होकर व्रतोंसे पराङ्मुख हो गये थे अर्थात् लज्जाके कारण भगवान्के पाससे दूसरी जगह जाकर उन्होंने व्रत छोड़ दिये थे ॥४७॥ कितने ही लोग भगवान्के चरणोंपर पड़कर कह रहे थे कि "हे प्रभो ! हमारी रक्षा कीजिये, हम लोगोंका शरीर भूखसे बहुत ही कृश हो गया है अतः अब हमें क्षमा कीजिये" इस प्रकार कहते हुए वहाँसे अन्तर्हित

---

१ पालयिष्यति ।–नभ्युपपत्स्यते प० । २ अनाकुलाः । क्षोभेऽपि नातुराः । ३ नानाप्रकार । ४ नानाविधैः । ५ जीविते । ६ मुखस्याभिमुखम् । ७ वान्ये ल०, म० । ८ अभिज्ञाप्य । ९ प्राणप्रवृत्तौ । १० पलायमानाः । ११ रक्षणे । १२ लज्जाशीलाः । 'लज्जा शीलोऽपत्रपिष्णुः' इत्यभिधानात् । १३ कम्पमानशरीराः । १४ कृशा ।

अहो किमृषयो[1] भग्नाः महर्षेर्गन्तुमक्षमाः । पदवीं तामनालीढाम् अन्यैः सामान्यमर्त्यकैः ॥ ४९ ॥
किं महादन्तिनो भारं निर्वोढुं कलभाः क्षमाः । पुंगवैर्वा भरं [2]कृष्टं कर्षेयु[3]: किमु दम्यकाः[4] ॥ ५० ॥
ततः परीषहैर्भग्नाः फलान्याहर्तुमिच्छवः । [5]प्रसस्रुर्वनषण्डेषु[6] सरस्सु च पिपासिताः ॥ ५१ ॥
[7]फलेग्रहीनिमान् दृष्ट्वा पिपासूंश्च[8] स्वयं [9]ग्रहैः । [10]न्यषधन्[11]वमीहध्वमिति तान्वनदेवताः ॥ ५२ ॥
इदं रूपमदीनानाम् अर्हतां चक्रिणामपि । निषेव्यं कातरत्वस्य पदं माकार्ष्ट बालिशाः ॥ ५३ ॥
इति तद्वचनाद्भीताः तद्रूपेण तथेहितुम् । नानाविधानिमान्वेषान् जगृहुर्दीनचेष्टिताः ॥५४॥
केचिद् वल्कलिनो भूत्वा फलान्या[12]दन् पपुः पयः । परिधाय परे जीर्णं कौपीनं चक्रुरीप्सितम् ॥ ५५ ॥
अपरे भस्मनोद्गुण्ठ्य स्वान् देहान् जटिनोऽभवन् । एकदण्डधराः केचित्केचिच्चासंस्त्रिदण्डिनः ॥ ५६ ॥
प्राणैरार्त्तास्तदेत्यादिवेषैर्वृत्तिरे चिरम् । वन्यैः काशिपुभिः स्वच्छैः जलैः कन्दादिभिश्च ते ॥ ५७ ॥
भरताद्बिभ्यतां तेषां देशत्यागः स्वतोऽभवत् । ततस्ते वनमाश्रित्य तस्थुस्तत्र कृतोटजाः[13] ॥ ५८ ॥
तदासंस्तापसाः पूर्वं परिव्राजश्च केचन । पाषण्डिनां ते[14] प्रथमे[15] बभूवुर्मोहदूषिताः ॥ ५९ ॥
पुष्पोपहारैः सजलैः भर्तुः पादावयक्षत[16] । न देवतान्तरं तेषाम् आसीन्मुक्त्वा स्वयम्भुवम् ॥ ६० ॥

हो गये थे—अन्यत्र चले गये थे ॥४८॥ खेद है कि जिसे अन्य साधारण मनुष्य स्पर्श भी नहीं कर सकते ऐसे भगवान्के उस मार्गपर चलनेके लिये असमर्थ होकर वे सब खोटे ऋषि तपस्या से भ्रष्ट हो गये सो ठीक ही है क्योंकि बड़े हाथीके बोझको क्या उसके बच्चे भी धारण कर सकते हैं ? अथवा बड़े बैलों द्वारा खींचे जाने योग्य बोझको क्या छोटे बछड़े भी खींच सकते हैं ? ॥४९–५०॥ तदनन्तर परीषहोंसे पीड़ित हुए वे लोग फल लानेकी इच्छा से वनखण्डोंमें फैलने लगे और प्याससे पीड़ित होकर तालाबोंपर जाने लगे ॥५१॥ उन लोगोंको अपने ही हाथसे फल ग्रहण करते और पानी पीते हुए देखकर वन-देवताओंने उन्हें मना किया और कहा कि ऐसा मत करो। हे मूर्खो, यह दिगम्बर रूप सर्वश्रेष्ठ अरहन्त तथा चक्रवर्ती आदिके द्वारा भी धारण करने योग्य है इसे तुम लोग कातरताका स्थान मत बनाओ । अर्थात् इस उत्कृष्ट वेषको धारण कर दीनोंकी तरह अपने हाथसे फल मत तोड़ो और न तालाब आदिका अप्रासुक पानी पीओ ॥५२–५३॥ वनदेवताओंके ऐसे वचन सुनकर वे लोग दिगम्बर वेषमें वैसा करने से डर गये इसलिये उन दीन चेष्टावाले भ्रष्ट तपस्वियोंने नीचे लिखे हुए अनेक वेष धारण कर लिये ॥५४॥ उनमेंसे कितने ही लोग वृक्षोंके वल्कल धारण कर फल खाने लगे और पानी पीने लगे और कितने ही लोग जीर्ण-शीर्ण लंगोटी पहिनकर अपनी इच्छानुसार कार्य करने लगे ॥५५॥ कितने ही लोग शरीरको भस्मसे लपेटकर जटाधारी हो गये, कितने ही एकदण्डको धारण करनेवाले और कितने ही तीन दण्डको धारण करनेवाले साधु बन गये थे ॥५६॥ इस प्रकार प्राणोंसे पीड़ित हुए वे लोग उस समय ऊपर लिखे अनुसार अनेक वेष धारणकर वन में होनेवाले वृक्षोंकी छालरूप वस्त्र, स्वच्छ जल और कन्द मूल आदिके द्वारा बहुत समय तक अपनी वृत्ति (जीवननिर्वाह) करते रहे ॥५७॥ वे लोग भरत महाराजसे डरते थे इसलिये उनका देशत्याग अपने आप ही हो गया था अर्थात् वे भरतके डरसे अपने अपने नगरोंमें नहीं गये थे किन्तु झोंपड़े बनाकर उसी वनमें रहने लगे थे ॥५८॥ वे लोग पाखण्डी तपस्वी तो पहलेसे ही थे परन्तु उस समय कितने ही परिव्राजक हो गये थे और मोहोदयसे दूषित होकर पाखण्डियोंमें मुख्य हो गये थे ॥५९॥ वे लोग जल और फूलोंके उपहारसे भगवान्के चरणों-

---

१ कुत्सिता ऋषयः । २ धृतम् । ३ वहेयुरिति यावत् । ४ वत्सतराः । ५ प्रसरन्ति स्म । ६ वनखण्डेषु अ० । ७ फलानि स्वीकुर्वाणान् । ८ पातुमिच्छून् । ९ निजस्वीकारैः । १० निवारयन्ति स्म । ११ –धन्मैव –प०, अ० । १२ भक्षयन्ति स्म । १३ कृतपर्णशालाः । 'पर्णशालोटजोऽस्त्रियाम्' इत्यभिधानात् । १४ तु प्रथमे अ० । १५ मुख्याः । १६ पूजयन्ति स्म ।

मरीचिश्च गुरोर्नप्ता [1]परिव्राड्भूयमास्थित[2]। मिथ्यात्ववृद्धिमकरोद् अपसिद्धान्तभाषितैः ॥ ६१ ॥
[3]तदुपज्ञमभूद् योगशास्त्रं[4] तन्त्रं च कापिलम्[5]। [3]येनायं मोहितो लोकः सम्यग्ज्ञानपराङ्मुखः ॥ ६२ ॥
इति तेषु तथाभूतां वृत्तिमासेदिवत्सु सः। तपस्यन् धीबलोपेतः तथैवास्थान् महामुनिः ॥ ६३ ॥
स मेरुरिव निष्कम्पः सोऽक्षोभ्यो जलराशिवत्। स वायुरिव निःसङ्गो निर्लेपोऽम्बरवत् प्रभुः ॥ ६४ ॥
तपस्तापेन तीव्रेण देहोऽस्य व्यद्युतत्तराम्। निष्टप्तस्य सुवर्णस्य ननु छायान्तरं भवेत् ॥ ६५ ॥
गुप्तयो [7]गुप्तिरस्यासन्नङ्गत्राणं[8] च संयमः। गुणाश्च सैनिका जाताः कर्मशत्रून्[9] जिगीषतः ॥ ६६ ॥
तपोऽनशनमाद्यं स्याद् द्वितीयमवमोदरम्। तृतीयं वृत्तिसंख्यानं रसत्यागश्चतुर्थकम् ॥ ६७ ॥
पञ्चमं [10]तनुसन्तापो विविक्तशयनासनम्। षष्ठमित्यस्य बाह्यानि तपांस्यासन् महाधृतेः ॥ ६८ ॥
प्रायश्चित्तादिभेदेन षोढैवाभ्यन्तरं तपः। तत्रास्य ध्यान एवासीत् परं तात्पर्यमीशितुः ॥ ६९ ॥
व्रतानि पञ्च पञ्चैव समित्याख्याः प्रयत्नकाः। [11]पञ्च चेन्द्रियसंरोधाः षोढावश्यकमिष्यते ॥ ७० ॥
केशलोचश्च भूशय्या दन्तधावनमेव च। अचेलत्वमथास्नानं स्थितिभोजनमप्यदः ॥ ७१ ॥
एकभुक्तं च तस्यासन् गुणा मौलाः पदातयः। तेष्वस्य महती शुद्धिरभूत् ध्यानविशुद्धितः[12] ॥ ७२ ॥

की पूजा करते थे। स्वयंभू भगवान् वृषभदेवको छोड़कर उनके अन्य कोई देवता नहीं था ॥६०॥ भगवान् वृषभदेवका नाती मरीचिकुमार भी परिव्राजक हो गया था और उसने मिथ्या शास्त्रोंके उपदेशसे मिथ्यात्वकी वृद्धि की थी ॥६१॥ योगशास्त्र और सांख्यशास्त्र प्रारम्भमें उसीके द्वारा कहे गये थे, जिनसे मोहित हुआ यह जीव सम्यग्ज्ञानसे पराङ्मुख हो जाता है ॥६२॥ इस प्रकार जब कि वे द्रव्यलिङ्गी मुनि ऊपर कही हुई अनेक प्रकारकी प्रवृत्तिको प्राप्त हो गये तब बुद्धि बलसे सहित महामुनि भगवान् वृषभदेव उसी प्रकार तपस्या करते हुए विद्यमान रहे थे ॥६३॥ वे प्रभु मेरुपर्वतके समान निष्कम्प थे, समुद्रके समान क्षोभरहित थे, वायुके समान परिग्रहरहित थे और आकाशके समान निर्लेप थे ॥६४॥ तपश्चरणके तीव्र तापसे भगवान्‌का शरीर बहुत ही देदीप्यमान हो गया था सो ठीक ही है, तपाये हुए सुवर्णकी कान्ति निश्चयसे अन्य हो ही जाती है ॥६५॥ कर्मरूपी शत्रुको जीतनेकी इच्छा करनेवाले भगवान्‌की मनोगुप्ति, वचनगुप्ति और कायगुप्ति ये तीन गुप्तियाँ ही किले आदिके समान रक्षा करनेवाली थीं, संयम ही शरीरकी रक्षा करनेवाला कवच था और सम्यग्दर्शन आदि गुण ही उनके सैनिक हुए थे ॥६६॥

पहला उपवास, दूसरा अवमौदर्य, तीसरा वृत्तिपरिसंख्यान, चौथा रसपरित्याग, पांचवां कायक्लेश और छठवां विविक्तशय्यासन यह छह प्रकारके बाह्य तप महाधीर वीर भगवान् वृषभदेवके थे ॥६७–६८॥ अन्तरङ्ग तप भी प्रायश्चित्त, विनय, वैयावृत्य, स्वाध्याय, व्युत्सर्ग और ध्यानके भेदसे छह प्रकारका ही है उनमेंसे भगवान् वृषभदेवके ध्यानमें ही अधिक तत्परता रहती थी अर्थात् वे अधिकतर ध्यान ही करते रहते थे ॥६९॥ पाँच महाव्रत, समिति नामक पाँच सुप्रयत्न, पाँच इन्द्रियनिरोध, छह आवश्यक, केशलोंच, पृथिवीपर सोना, दांतौन नहीं करना, नग्न रहना, स्नान नहीं करना, खड़े होकर भोजन करना और दिनमें एक बार ही भोजन करना इस प्रकार ये अट्ठाईस मूल गुण भगवान् वृषभदेवके विद्यमान थे जो कि उनके पदातियों अर्थात् पैदल चलनेवाले सैनिकोंके समान थे। ध्यानकी विशुद्धताके कारण भगवान्‌के इन

१ परिव्राजकत्वम्। २ आश्रितः। ३ तेन मरीचिना प्रथमोपदिष्टम्। ४ ध्यानशास्त्रम्। ५ सांख्यम्। ६ शास्त्रेण ७ संरक्षणम्। ८ कवचम्। ९ कर्मशत्रु अ०, म०, ल०। १० कायक्लेशः। ११ पञ्चैवेन्द्रिय-अ०, प०, म०, ल०। १२ ध्यानविशुद्धयतः ब०, प०, अ०, स०, द०।

महानशनमस्यासीत् तपः षण्मासगोचरम् । शरीरोपचयस्त्विद्धः[1] तथैवास्थाद्बहो धृतिः[2] ॥ ७३ ॥
नानाशुषो[4]ऽप्यभूद् भर्तुः स्वल्पोऽप्यङ्गे परिश्रमः । निर्माणातिशयः[5] कोऽपि दिव्यः स [6]हि महात्मनः ॥ ७४॥
संस्कारविरहात् केशा जटीभूतास्तदा विभोः । [7]नूनं तेऽपि तपःक्लेशम् अनुसोढुं तथा स्थिताः ॥ ७५ ॥
मुनेर्मूर्ध्नि जटा दूरं प्रसस्रुः[8] पवनोद्धताः । ध्यानाग्निनेव तप्तस्य जीवस्वर्णस्य कालिकाः ॥ ७६ ॥
तत्तपोऽतिशयात्तस्मिन् काननेऽभूत् परा द्युतिः । नक्तं दिवा च बालार्कतेजसेवाततान्तिके ॥ ७७ ॥
शाखाः पुष्पफला नम्राः शाखिनां तत्र कानने । बभुर्भगवतः पादौ नमन्त्य इव भक्तितः ॥ ७८ ॥
तस्मिन् वने वनलता भृङ्गसङ्गीतनिःस्वनैः । [9]उपवीणितमातेनुरिव भक्त्या जगद्गुरोः ॥ ७९ ॥
पर्यन्तवर्तिनः क्ष्माजा गलद्भिः कुसुमैः स्वयम् । पुष्पोपहारमातन्वन्निव भक्त्यास्य पादयोः ॥ ८० ॥
मृगशावाः पदोपान्तं स्वैरमध्यासिता मुनेः । तदाश्रमस्य शान्तत्वम् आचख्युः सामिनिद्रिताः[10] ॥ ८१ ॥
मृगारित्वं समुत्सृज्य सिंहाः संहतवृत्तयः[11] । बभूवुर्गजयूथेन माहात्म्यं तद्धि योगजम् ॥ ८२ ॥
कण्टकालग्नवालाग्राश्चमरीश्च मरीमृजाः[12] । नखरैः स्वैरहो व्याघ्राः सानुकम्पं व्यमोचयन् ॥ ८३ ॥
[13]प्रस्नुवाना महाव्याघ्रीरुपेत्य मृगशावकाः । [14]स्वजनन्यास्थया स्वैरं पीत्वा स्म सुखमासते ॥ ८४ ॥

गुणोंमें बहुत ही विशुद्धता रहती थी ॥७०-७२॥ यद्यपि भगवान्ने छह महीनेका महोपवास तप किया था तथापि उनके शरीरका उपचय पहलेकी तरह ही देदीप्यमान बना रहा था । इससे कहना पड़ता है कि उनकी धीरता बड़ी ही आश्चर्यजनक थी । ॥७३॥ यद्यपि भगवान् बिलकुल ही आहार नहीं लेते थे तथापि उनके शरीरमें रंचमात्र भी परिश्रम नहीं होता था । वास्तवमें भगवान् वृषभदेवकी शरीररचना अथवा उनके निर्माण नामकर्मका ही वह कोई दिव्य अतिशय था ॥७४॥ उस समय भगवान्के केश संस्काररहित होनेके कारण जटाओंके समान हो गये थे और वे ऐसे मालूम होते थे मानो तपस्याका क्लेश सहन करनेके लिये ही वैसे कठोर हो गये हों ॥७५॥ वे जटाएँ वायुसे उड़कर महामुनि भगवान् वृषभदेवके मस्तकपर दूरतक फैल गई थीं, सो ऐसी जान पड़ती थीं मानो ध्यानरूपी अग्निसे तपाये हुए जीवरूपी स्वर्णसे निकली हुई कालिमा ही हो ॥७६॥ भगवान्के तपश्चरणके अतिशयसे उस विस्तृत वनमें रात दिन ऐसी उत्तम कान्ति रहती थी जैसी कि प्रातःकालके सूर्यके तेजसे होती है ॥७७॥ उस वनमें पुष्प और फलके भारसे नम्र हुई वृक्षोंकी लताएँ ऐसी सुशोभित हो रही थीं मानो भक्तिसे भगवान्के चरणोंको नमस्कार ही कर रही हों ॥७८॥ उस वनमें लताओंपर बैठे हुए भ्रमर संगीतके समान मधुर शब्द कर रहे थे जिससे वे वनलताएँ ऐसी मालूम होती थीं मानो भक्तिपूर्वक वीणा बजाकर जगद्गुरु भगवान् वृषभदेवका यशोगान ही कर रही हों ॥७९॥ भगवान्के समीपवर्ती वृक्षोंसे जो अपने आप ही फूल गिर रहे थे उनसे वे वृक्ष ऐसे जान पड़ते थे मानो भक्तिपूर्वक भगवान्के चरणोंमें फूलोंका उपहार ही विस्तृत कर रहे हों अर्थात् फूलों की भेंट ही चढ़ा रहे हों ॥८०॥ भगवान्के चरणोंके समीप ही अपनी इच्छानुसार कुछ कुछ निद्रा लेते हुए जो हरिणोंके बच्चे बैठे हुए थे वे उनके आश्रमकी शान्तता बतला रहे थे ॥८१॥ सिंह हरिण आदि जन्तुओंके साथ वैरभाव छोड़कर हाथियोंके झुण्डके साथ मिलकर रहने लगे थे सो यह सब भगवान्के ध्यानसे उत्पन्न हुई महिमा ही थी ॥८२॥ अहा-कैसा आश्चर्य था कि जिनके बालोंके अग्रभाग कांटोंमें उलझ गये थे और जो उन्हें बार-बार सुलझानेका प्रयत्न करती थीं ऐसी चमरी गायोंको बाघ बड़ी दयाके साथ अपने नखोंसे छुड़ा रहे थे अर्थात् उनके बाल सुलझा कर उन्हें जहाँ तहाँ जानेके लिये स्वतन्त्र कर रहे थे ॥८३॥ हरिणोंके बच्चे दूध देती हुई बाघनियोंके पास जाकर और उन्हें अपनी माता समझ इच्छानुसार दूध पीकर सुखी

१ पुष्टिः । २ दीप्तः । ३ सन्तोषः । ४ अनशनवृत्तिनः । ५ शरीरवर्गणातिशयः । ६ अपरिश्रमः । ७ इव । ८ 'सृ गतौ' लिट् । ९ वीणया उपगीयते स्म । १० ईषन्निद्रिताः । ११ युक्तप्रवृत्तयः । १२ पुनः पुनर्मार्जनं कुर्वन्तः । १३ क्षीरं क्षरन्तीः । १४ निजमातृबुद्ध्या ।

पदयोरस्य वन्येभाः समुत्फुल्लं सरोरुहम् । ढौकयामासुरानीय तपःशक्तिरहो परा ॥ ८५ ॥
बभौ राजीवमारक्तं करिणां पुष्कराश्रितम्[1] । पुष्करश्रियमाम्रेडी[2]कुर्वद्भर्तुरुपासने[3] ॥ ८६ ॥
प्रशमस्य विभोरङ्गाद् विसर्पन्त इवांशकाः[4] । [5]प्रसह्य वशमानिन्युः अवशानपि तान् मृगान् ॥ ८७ ॥
अनाशुषोऽपि नास्यासीत् क्षुद्बाधा भुवनेशिनः । सन्तोषभावनोत्कर्षाज्जयेद्गृद्धिं[6]मगृध्नुता[7] ॥ ८८ ॥
चलन्ति स्म तदेन्द्राणामासनान्यस्य योगतः[8] । चित्रं हि महतां धैर्यं जगदाकम्पकारणम् ॥ ८९ ॥
इति षण्मासनि[9]र्वर्त्स्यत्प्रतिमायोगमापुषः[10] । स कालः क्षणवद्भर्तुः अगमद्धैर्यशालिनः ॥ ९० ॥
अत्रान्तरे किलायातां[11] कुमारौ सुकुमारकौ । सूनू कच्छमहाकच्छनृपयोर्निकटं गुरोः ॥ ९१ ॥
नमिश्च विनमिश्चेति प्रतीतौ भक्तिनिर्भरौ । भगवत्पादसंसेवां कर्तुकामौ युवेशिनौ ॥ ९२ ॥
भोगेषु सतृषावेतौ प्रसीदेति कृतानती । पदद्वयेऽस्य संलग्नौ भेजतुर्ध्यानविघ्नताम् ॥ ९३ ॥
त्वयेश पुत्रनप्तृभ्यः संविभक्तमभूदिदम् । साम्राज्यं विस्मृतावावाम् अतो[12] भोगान् प्रयच्छ नौ[13] ॥ ९४ ॥
इत्येवमनुबध्नन्तौ युक्तायुक्तानभिज्ञकौ । तौ तदा जलपुष्पार्घैः [14]उपासामासतुर्विभुम् ॥ ९५ ॥
ततः स्वासनकम्पेन [15]तदज्ञासीत्[16] फणीश्वरः । धरणेन्द्र इति ख्यातिम् उद्वहन् भावनामरः ॥ ९६ ॥

होते थे ॥८४॥ अहा, भगवान्के तपश्चरणकी शक्ति बड़ी ही आश्चर्यकारक थी कि वनके हाथी भी फूले हुए कमल लाकर उनके चरणोंमें चढ़ाते थे ॥८५॥ जिस समय वे हाथी फूले हुए कमलों द्वारा भगवान्की उपासना करते थे उस समय उनके सूंड़के अग्रभागमें स्थित लाल कमल ऐसे सुशोभित होते थे मानो उनके पुष्कर अर्थात् सूंडके अग्रभागकी शोभाको दूनी कर रहे हों ॥८६॥ भगवान्के शरीरसे फैलती हुई शान्तिकी किरणोंने कभी किसीके वश न होनेवाले सिंह आदि पशुओंको भी हठात् वशमें कर लिया था ॥८७॥ यद्यपि त्रिलोकीनाथ भगवान् उपवास कर रहे थे—कुछ भी आहार नहीं लेते थे तथापि उन्हें भूखकी बाधा नहीं होती थी, सो ठीक ही है, क्योंकि सन्तोषरूप भावनाके उत्कर्षसे जो अनिच्छा उत्पन्न होती है वह हरएक प्रकारकी इच्छाओं (लम्पटता) को जीत लेती है ॥८८॥ उस समय भगवान्के ध्यानके प्रतापसे इन्द्रोंके आसन भी कम्पायमान हो गये थे । वास्तवमें यह भी एक बड़ा आश्चर्य है कि महापुरुषोंका धैर्य भी जगत्के कम्पनका कारण हो जाता है ॥८९॥ इस तरह छह महीनेमें समाप्त होनेवाले प्रतिमा योगको प्राप्त हुए और धैर्यसे शोभायमान रहनेवाले भगवान्का वह लम्बा समय भी क्षणभरके समान व्यतीत हो गया ॥९०॥ इसीके बीचमें महाराज कच्छ महाकच्छके लड़के भगवान्के समीप आये थे । वे दोनों लड़के बहुत ही सुकुमार थे, दोनों ही तरुण थे, नमि तथा विनमि उनका नाम था और दोनों ही भक्तिसे निर्भर होकर भगवान्के चरणोंकी सेवा करना चाहते थे ॥९१–९२॥ वे दोनों ही भोगोपभोगविषयक तृष्णासे सहित थे इसलिये हे भगवन्, 'प्रसन्न होइये' इस प्रकार कहते हुए वे भगवान्को नमस्कार कर उनके चरणोंमें लिपट गये और उनके ध्यानमें विघ्न करने लगे ॥९३॥ हे स्वामिन्, आपने अपना यह साम्राज्य पुत्र तथा पौत्रोंके लिये बाँट दिया है । बाँटते समय हम दोनोंको भुला ही दिया इसलिये अब हमें भी कुछ भोग सामग्री दीजिये ॥९४॥ इस प्रकार वे भगवान्से बार बार आग्रह कर रहे थे, उन्हें उचित अनुचितका कुछ भी ज्ञान नहीं था और वे दोनों उस समय जल, पुष्प तथा अर्घ्यसे भगवान्की उपासना कर रहे थे ॥९५॥ तदनन्तर धरणेन्द्र नामको धारण करनेवाले, भवनवासियोंके अन्तर्गत नागकुमार देवोंके इन्द्रने अपना आसन कम्पायमान होनेसे नमि विनमिके

१ हस्ताग्राश्रितम् । २ द्विगुणीकुर्वत् । ३ आराधने । ४ अंशाः । ५ बलात्कारेण । ६ कांक्षाम् । ७ अनभिलाषिता । ८ ध्यानतः । ९ भविष्यत् । १० गतस्य । –मीयुषः प० । ११ आगतौ । १२ अस्मात् कारणात् । १३ आवयोः । १४ आराधनां चक्रतुः । १५ ध्यानविघ्नत्वम । १६ बुबुधे ।

ज्ञात्वा चावधिबोधेन तत्सर्वं संविधानकम् । ससम्भ्रममथोत्थाय सोऽन्तिकं भर्तुरागमत् ॥ ९७ ॥
ससपर्यः समुद्भिद्य भुवः प्राप्तः स तत्क्षणात् । समैक्षिष्ट मुनिं दूरान्महामेरुमिवोन्नतम् ॥ ९८ ॥
समिद्धया तपोदीप्त्या ज्वलद्भासुरविग्रहम् । निवातनिश्चलं दीपमिव योगे समाहितम् ॥ ९९ ॥
कर्माहुतीर्महाध्यानहुताशे[1] दग्धुमुद्यतम् । सुयज्वानमिवा[2]हेयदयापत्नीपरिग्रहम् ॥ १०० ॥
महोदयमुदग्राङ्गं सुवंशं मुनिकुञ्जरम् । रुद्धं तपोमहालानस्तम्भे सद्व्रतरज्जुभिः ॥ १०१ ॥
अकम्प्रस्थितिमुत्तुंगं महासत्त्वैरुपासितम् । महाद्रिमिव बिभ्राणं क्षमाभरसहं वपुः ॥ १०२ ॥
योगान्त[3]र्निभृतात्मानमतिगम्भीरचेष्टितम् । [4]निवातस्तिमितस्याब्धेर्न्यक्कुर्वाणं गभीरताम् ॥ १०३ ॥

वज्रार्गलं च वज्राढ्यं विभातीतः पुरद्वयम् । वज्राकरैः समीपस्थैः समुन्मीषदिवान्वहम् ॥४२॥
इदं पुरं विमोचाख्यं पुरमेतत् पुरं जयम्[1] । एताभ्यां निर्जितं[2] नूनम् अधोऽगात् फणिनां जगत् ॥४३॥
शकटादिमुखं चैव पुरी भाति चतुर्मुखी । चतुर्भिर्गोपुरैस्तुङ्गैः लङ्घयन्तीव खाङ्गणम् ॥४४॥
बहुमुख्यरजस्का च विरजस्का च नामतः । नगर्यो भुवनस्येव त्रयस्य मिलिताः श्रियः ॥४५॥
रथनूपुरपूर्वं च चक्रवालाह्वयं पुरम् । उक्तानां वक्ष्यमाणानां पुरां[3] च तिलकायते ॥४६॥
राजधानीयमेतस्यां विद्याभृच्चक्रवर्तिनः । निवसन्ति परां लक्ष्मीं भुञ्जानाः [4]सुकृतोदयात् ॥४७॥
मेखलाग्रपुरं रम्यम् इतः क्षेमपुरी पुरी । अपराजितमेतत् स्यात् कामपुष्पमितः पुरम् ॥४८॥
गगनादिचरीयं सा विनेयादिचरी पुरी । परं शुक्र[5]पुरं चै[6]तत् त्रिंशत्संख्यानपूरणम् ॥४९॥
सञ्जयन्ती जयन्ती च विजया वैजयन्त्यपि । क्षेमङ्करञ्च चन्द्राभं सूर्याभं चातिभास्वरम् ॥५०॥
[7]रतिचित्रमहद्धेमत्रिमेघोपपदानि वै । कूटानि स्युर्विचित्रादि[8]कूटं वैश्रवणादि[9] च ॥५१॥
सूर्यचन्द्रपुरे चामू नित्योद्योतिन्यनुक्रमात् । विमुखी नित्यवाहिन्यो सुमुखी चैव पश्चिमा ॥५२॥
नगर्यो दक्षिणश्रेण्यां पञ्चाशत्सङ्ख्या मिताः । प्राकारगोपुरोत्तुङ्गाः खाता[10]भिस्तिसृभिर्वृताः ॥५३॥

॥४१॥ इस ओर ये १३ वज्रार्गल और १४ वज्राढ्य नामके दो नगर सुशोभित हो रहे हैं जो कि अपने समीपवर्ती हीरेकी खानोंसे ऐसे मालूम होते हैं मानो प्रतिदिन बढ़ ही रहे हों ॥४२॥ इधर यह १५ विमोच नामका नगर है और इधर यह १६ पुरंजय नामका नगर है । ये दोनों ही नगर ऐसे सुशोभित हो रहे हैं मानो भवनवासी देवोंका लोक इनसे पराजित होकर ही नीचे चला गया हो ॥४३॥ इधर यह १७ शकटमुखी नगरी है और इधर यह १८ चतुर्मुखी नगरी सुशोभित हो रही है । यह चतुर्मुखी नगरी अपने ऊंचे-ऊंचे चारों गोपुरोंसे ऐसी मालूम होती है मानो आकाशरूपी आंगनका उल्लंघन ही कर रही हो ॥४४॥ यह १९ बहुमुखी, यह २० अरजस्का और यह २१ विरजस्का नामकी नगरी है । ये तीनों ही नगरियाँ ऐसी ही मालूम होती हैं मानो तीनों लोकोंकी लक्ष्मी ही एक जगह आ मिली हों ॥४५॥ जो ऊपर कहे हुए और आगे कहे जानेवाले नगरोंमें तिलकके समान आचरण करता है ऐसा यह २२ रथनूपुर चक्रवाल नामका नगर है ॥४६॥ यह नगर इस श्रेणीकी राजधानी है, विद्याधरोंके चक्रवर्ती (राजा) अपने पुण्योदयसे प्राप्त हुई उत्कृष्ट लक्ष्मीका उपभोग करते हुए इसमें निवास करते हैं ॥४७॥ इधर यह मनोहर २३ मेखलाग्र नगर है, यह २४ क्षेमपुरी नगरी है, यह २५ अपराजित नगर है और इधर यह २६ कामपुष्प नामका नगर है ॥४८॥ यह २७ गगनचरी नगरी है, यह २८ विनयचरी नगरी है और यह २९ चक्रपुर नामका नगर है । यह तीस संख्याको पूर्ण करनेवाली ३० संजयन्ती नगरी है, यह ३१ जयंती, यह ३२ विजया और यह ३३ वैजयन्तीपुरी है। यह ३४ क्षेमंकर, यह ३५ चन्द्राभ और यह अतिशय देदीप्यमान ३६ सूर्याभ नामका नगर है ॥४९–५०॥ यह ३७ रतिकूट, यह ३८ चित्रकूट, यह ३९ महाकूट, यह ४० हेमकूट, यह ४१ मेघकूट' यह ४२ विचित्रकूट और यह ४३ वैश्रवणकूट नामका नगर है ॥५१॥ ये अनुक्रमसे ४४ सूर्य-पुर ४५ चन्द्रपुर और ४६ नित्योद्योतिनी नामके नगर हैं । यह ४७ विमुखी,यह ४८ नित्यवाहिनी यह ४९ सुमुखी और यह ५० पश्चिमा नामकी नगरी है ॥५२॥ इस प्रकार दक्षिण-श्रेणीमें पचास नगरियां हैं, इन नगरियोंके कोट और गोपुर (मुख्य दरवाजे) बहुत ऊंचे हैं तथा प्रत्येक,

१ जयपुरम् । २ निर्जितं सत् । ३ पुराणाम् । ४ स्वकृतोदयात् ल०, म० । ५ चक्रपुरं म०, ल० । शक्रपुरं अ० । ६ चैव प० । चेतस् अ० । ७ इतश्चित्र– त०, ब० । ८ चित्रकूटमहत्कूट-हेमकूटमेघकूटानीत्यर्थः । ९ वैश्रवणकूटम् । वैश्रवणादिकम् । १० खातिकाभिः ।

तिसृणामपि खातानाम् अन्तरं [1]दण्डसम्मितम् । दण्डाश्चतुर्दशैकस्या व्यासो [2]द्व्यूनोऽन्ययोर्द्वयोः ॥५४॥
[3]विष्कम्भादवगा[4]ढास्ताः[5] पादोनं[6] वार्द्धमेव वा[7] । त्रिभाग[8]मूलास्ता ज्ञेया मूलाद्वा[9] चतुरस्त्रिकाः ॥५५॥
रत्नोपलैरुपहिताः[10] स्वर्णेष्टकचिताश्च ताः । [11]तौयान्तिक्यः परीवाहयुक्ता[12] वा निर्मलोदकाः ॥५६॥
पद्मोत्पल[13]वतंसिन्यो [14]यादोदोर्घट्टनक्षमाः । महाब्धिभिरिव स्पर्धां कुर्वाणास्तुङ्गवीचिभिः ॥५७॥
चतुर्दण्डान्तरश्चातो[15] वप्रः[16] षड्धनुरुच्छ्रितः । स्वर्णपांसूपलैश्छन्नः [17]स्वोत्सेधाद्द्विश्च विस्तृतः ॥५८॥
तमू[18]र्ध्वचयमिच्छन्ति[19] तथा मञ्चक[20]पृष्ठकम् । [21]कुम्भकुक्षिसमाकारं [22]गोक्षुरक्षोदनिस्तलम् ॥५९॥
वप्रस्योपरि सालोऽभूद् विष्कम्भाद[23] द्विगुणोच्छ्रितः । [24]चतुर्विंशतिमुद्विद्धो धनुषां तलमूलतः[25] ॥६०॥
[26]मुरजैः कपि[27]शीर्षैश्च रचिताग्रः समन्ततः । चित्रहैमेष्टकचितः क्वचिद् रत्नशिलामयः ॥६१॥

नगरी तीन तीन परिखाओंसे घिरी हुई हैं ॥५३॥ इन तीनों परिखाओंका अन्तर एक-एक दण्ड अर्थात् धनुष प्रमाण है तथा पहिली परिखा चौदह दण्ड चौड़ी है दूसरी बारह और तीसरी दश दण्ड चौड़ी है ॥५४॥ ये परिखाएं अपनी अपनी चौड़ाईसे क्रमपूर्वक पौनी आधी और एकतिहाई गहरी हैं अर्थात् पहली परिखा साढ़े दश धनुष, दूसरी छह धनुष और तीसरी सवा तीन धनुषसे कुछ अधिक गहरी हैं । ये सभी परिखाएं नीचेसे लेकर ऊपर तक एक-सी चौड़ी हैं ॥५५॥ वे परिखाएं सुवर्णमयी ईंटोंसे बनी हुई हैं, रत्नमय पाषाणोंसे जड़ी हुई हैं, उनमें ऊपरतक पानी भरा रहता है और वह पानी भी बहुत स्वच्छ रहता है। वे परिखाएं जलके आने जानेके परीवाहोंसे भी युक्त हैं ॥५६॥ उन परिखाओंमें जो लाल और नीले कमल हैं वे उनके कर्णाभरणसे जान पड़ते हैं, वे जलचर जीवोंकी भुजाओंके आघात सहनेमें समर्थ हैं और अपनी ऊंची लहरोंसे ऐसी मालूम होती हैं मानो बड़े-बड़े समुद्रोंके साथ स्पर्द्धा ही कर रही हों ॥५७॥ इन परिखाओंसे चार दण्डके अन्तर (फासला) पर एक कोट है जो कि सुवर्णकी धूलके बने हुए पत्थरोंसे व्याप्त है, छह धनुष ऊंचा है और बारह धनुष चौड़ा है ॥५८॥ इस कोटका ऊपरी भाग अनेक कंगूरों से युक्त है वे कंगूरे गायके खुरके समान गोल हैं और घड़ेके उदरके समान बाहरकी ओर उठे हुए आकारवाले हैं ॥५९॥ इस धूलि कोटिके आगे एक परकोटा है जो कि चौड़ाईसे दूना ऊंचा है । इसकी ऊंचाई मूल भागसे ऊपर तक चौबीस धनुष है अर्थात् यह बारह धनुष चौड़ा और चौबीस धनुष ऊंचा है ॥६०॥ इस परकोटेका अग्रभाग मृदङ्ग तथा बन्दर के शिरके आकारका बना हुआ है, यह परकोटा चारों ओरसे अनेक प्रकारकी सुवर्णमयी ईंटोंसे

१ त्रिखातिकानामन्तरं प्रत्येकमेकैकदण्डप्रमाणं भवति । २ अपरयोर्द्वयोः खातिकयोः क्रमेण दण्डद्वयो न्यूनः कर्त्तव्यः । ३ व्यासमाश्रित्य त्रिखातिकाः । बाह्यादारभ्य चतुर्दश । द्वादशदशप्रमाण-व्यासा भवन्तीत्यर्थः । ४ अगाधाः । ५ खातिकाः । ६ निजनिजव्यासचतुर्थांशरहितावगाढाः । ७ अथवा । निजनिजव्यासार्द्धावगाढाः भवन्तीति भावः । ८ निजनिजव्यासस्य तृतीयो भागो मूले यासां ताः । ९ मूले अग्रे च समानव्यासा इत्यर्थः । १० घटिताः । ११ तोयस्यान्तः तोयान्तः । तोयान्तमर्हन्तीति तौयान्तिक्यः । अथवा तोयान्तेन दीव्यन्तीति तौयान्तिक्यः । आकण्ठपरिपूर्णजला इत्यर्थः । १२ जलोच्छ्वाससहिताः । 'जलोच्छ्वासः परीवाहः' इत्यभिधानात् । १३ पद्मोत्पला-वतंसिन्यो– प० । १४ जलजन्तुभुजास्फालनसहाः । १५ खातिकाभ्यन्तरे । १६ प्राकारस्याधिष्ठान-मित्यर्थः । १७ निजोत्सेधाद् द्विगुणव्यास इत्यर्थः । १८ वप्रस्योपरिमभागम् । १९ आमनन्ति । २० पृष्ठनामानं तदग्रभागसंज्ञेत्यर्थः । २१ कुम्भपार्श्वसदृश । २२ ईषत्शुष्ककर्दमप्रदेशनिक्षिप्त-गोक्षुरस्याग्रो यथा वर्तुलं भवति तथा वर्तुलमित्यर्थः । २३ निजव्यासद्विगुणोन्नतः । २४ धनुषां चतु-र्विंशतिदण्डोत्सेध इति यावत् । एते विष्कम्भा द्वादशदण्डा इत्युक्तम् । २५ अधिष्ठानमूलात् आरभ्य । २६ मर्दलाकारशिखरैः । २७ 'कपिशीर्षं तु सालाग्रम्' ।

विष्कम्भ[1]चतुरस्राश्च तत्राट्टालकपङ्क्तयः। त्रिंशदर्धञ्च दण्डानां रुन्द्राश्च द्विगुणोछ्रिताः[2] ॥६२॥
त्रिंश[3]द्दण्डान्तराश्चैता मणिहेमविचित्रताः। उत्सेधसदशारोह[4]सोपाना गगनस्पृशः ॥६३॥
द्वयोरट्टालयोर्मध्ये गोपुरं रत्नतोरणम्। पञ्चाशद्धनुरुत्सेधं तदर्धमपि विस्तृतम् ॥६४॥
गोपुराट्टालयोर्मध्ये त्रिधा[5]नुष्कावगाहनम्। इन्द्रकोशमभूत् सापि[6]धानैर्युक्तं गवाक्षकैः ॥६५॥
तदन्तरेषु राजन्ते सुस्था देवपथा[7]स्तथा। त्रिहस्तविस्तृताः पार्श्वे तच्चतुर्गुणमायताः ॥६६॥
इत्युक्तखातिकावप्रप्राकारैः परितो वृताः। विभासन्ते नगर्योऽमूः परिधा[8]नैरिवाङ्गनाः ॥६७॥
चतुष्का[9]णां सहस्रं स्याद् वीथ्यस्त[10]द्द्वादशाहतम्। द्वाराण्येक[11]सहस्रं तु महान्ति क्षुद्रकाणि वै ॥६८॥
तदर्धं [12]तद्द्विशत्यग्रिमाणि द्वाराणि तानि च। सकवाटानि राजन्ते नेत्राणीव [13]पुरश्रिया ॥६९॥
पूर्वापरेण रुन्द्राः स्युः योजनानि नवैव ताः। दक्षिणोत्तरतो दीर्घा द्वादश प्राङ्मुखं स्थिताः ॥७०॥
राजगेहादिविस्तारम् आसां को नाम वर्णयेत्। ममापि नागराजस्य यत्र मोमुह्यते मतिः ॥७१॥
ग्रामाणां कोटिरेका स्यात् परिवारः पुरं प्रति। तथा खेटमडम्बादिनिवेशश्च[14] पृथग्विधः[15] ॥७२॥

व्याप्त है और कहीं कहींपर रत्नमयी शिलाओंसे भी युक्त है ॥६१॥ उस परकोटापर अट्टालिकाओंकी पंक्तियां बनी हुई हैं जो कि परकोटाकी चौड़ाईके समान चौड़ी हैं, पन्द्रह धनुष लम्बी हैं और उससे दूनी अर्थात् तीस धनुष ऊंची हैं ॥६२॥ ये अट्टालिकाएं तीस-तीस धनुषके अन्तरसे बनी हुई हैं, सुवर्ण और मणियोंसे चित्र-विचित्र हो रही हैं, इनकी ऊंचाईके अनुसार चढ़नेके लिये सीढ़ियां बनी हुई हैं और ये सभी अपनी ऊंचाईसे आकाशको छू रही हैं ॥६३॥ दो दो अट्टालिकाओंके बीचमें एक एक गोपुर बना हुआ है उसपर रत्नोंके तोरण लगे हुए हैं। ये गोपुर पचास धनुष ऊंचे और पच्चीस धनुष चौड़े हैं ॥६४॥ गोपुर और अट्टालिकाओंके बीचमें तीन तीन धनुष विस्तारवाले इन्द्रकोश अर्थात् बुरज बने हुए हैं। वे बुरज किवाड़ सहित झरोखोंसे युक्त हैं ॥६५॥ उन बुरजोंके बीचमें अतिशय स्वच्छ देवपथ बने हुए हैं जो कि तीन हाथ चौड़े और बारह हाथ लम्बे हैं ॥६६॥ इस प्रकार ऊपर कही हुई परिखा, कोट और परकोटा इनसे घिरी हुई वे नगरियां ऐसी सुशोभित होती हैं मानो वस्त्र पहने हुई स्त्रियां ही हों ॥६७॥ इन नगरियोंमेंसे प्रत्येक नगरीमें एक हजार चौक हैं, बारह हजार गलियां हैं और छोटे बड़े सब मिलाकर एक हजार दरवाजे हैं ॥६८॥ इनमेंसे आधे अर्थात् पांच सौ दरवाजे किवाड सहित हैं और वे नगरीकी शोभाके नेत्रोंके समान सुशोभित होते हैं। इन पांच सौ दरवाजोंमें भी दो सौ दरवाजे अत्यन्त श्रेष्ठ हैं ॥६९॥ ये नगरियां पूर्वसे पश्चिम तक नौ योजन चौड़ी हैं और दक्षिणसे उत्तर तक बारह योजन लम्बी हैं। इन सभी नगरियोंका मुख पूर्व दिशाकी ओर है ॥७०॥ इन नगरियोंके राजभवन आदिके विस्तार वगैरहका वर्णन कौन कर सकता है क्योंकि जिस विषयमें मुझ धरणेन्द्रकी बुद्धि भी अतिशय मोहको प्राप्त होती है तब और की बात ही क्या है ? ॥७१॥ इन नगरियोंमेंसे प्रत्येक नगरीके प्रति एक-एक करोड़ गांवों

१ व्याससमानचतुरस्राः। त्रिंशदर्द्धम् पञ्चदशदण्डप्रमाणव्यासा इत्यर्थः। २ तद्व्यासद्विगुणोत्सेधाः। ३ द्वयोरट्टालकयोर्मध्ये त्रिंशद्दण्डा अन्तरा यासां ताः। ४ आरोहणनिमित्त। ५ चापत्रय। त्रिधनुष्का म०, ल०। ६ कवाटसहितैः। ७ भेर्याकाररचनाविशेषाः। ८ अधोशुकैः। ९ चतुःपथमध्यस्थितजनाश्रयणयोग्यमण्डपविशेषाणाम्। १० तत्सहस्रं द्वादशगुणितं चेत्, द्वादशसहस्रवीथयो भवन्तीति भावः। ११ द्वाराण्येकं सहस्रं तु प०। १२ तेषु द्वारेषु शतद्वयश्रेष्ठाणि राजगमनागमनयोग्यानि द्वाराणि भवन्ति। १३ पुरश्रियाः इति क्वचित् पाठः। १४ रचना। १५ नानाप्रकारः।

अकृष्टपच्यैः कलमैः धान्यैरन्यैश्च सम्भृताः[1] । पुण्ड्रेक्षुवनसंछन्नसीमानो निगमाः सदा ॥७३॥
पुराणमन्तरं चात्र स्यात् पञ्चनवतं[2] शतम् । प्रमाणयोजनोद्दिष्टं मानमाप्तैर्निदर्शितम्[3] ॥७४॥
पुराणि दक्षिणश्रेण्यां यथैतानि तथैव वै । भवेयुरुत्तरश्रेण्यामपि तानि समृद्धिभिः ॥७५॥
किन्त्वन्तरं पुराणां स्यात् तत्रैकैकं प्रमाणतः । योजनानां [4]शतं चाष्ट सप्ततिश्चैव साधिका ॥७६॥
तेषाञ्च नामनिर्देशो भवेदयमनुक्रमात् । पश्चिमां दिशमारभ्य यावत् षष्टितमं[5] पुरम् ॥७७॥
अर्जुनी चारुणी चैव सकैलासा च वारुणी । विद्युत्प्रभं किलिकिलं चूडामणि[6]शशिप्रभे ॥७८॥
वंशालं [7]पुष्पचूलञ्च हंसगर्भबलाहकौ । शिवङ्करञ्च श्रीहर्म्यं चमरं शिवमन्दिरम् ॥७९॥
[8]वसुमत्कं वसुमती नाम्ना सिद्धार्थकं परम् । शत्रुञ्जयं ततः केतुमालाख्यञ्च भवेत् पुरम् ॥८०॥
सुरेन्द्रकान्तमन्यत् स्यात्ततो गगननन्दनम् । अशोकान्या विशोका च वीतशोका च सत्पुरी ॥८१॥
अलका तिलकाख्या च [9]तिलकान्तं तथाम्बरम् । मन्दिरं कुमुदं कुन्दम् अतो गगनवल्लभम् ॥८२॥
द्युभूमितिलके पुर्यौ पुरं गन्धर्वसाह्वयम् । मुक्ताहारः [10]सनिमिषं चाग्निज्वालमतः परम् ॥८३॥
महाज्वालञ्च विज्ञेयं श्रीनिकेतो जयाह्वयम् । श्रीवासो मणिवज्राख्यं भद्राश्वं सधनञ्जयम्[11] ॥८४॥
गोक्षीरफेनमक्षोभ्यं [12]गिर्यादिशिखराह्वयम् । धरणी धारणी[13] दुर्गं दुर्धराख्यं सुदर्शनम् ॥८५॥
[14]महेन्द्राख्यपुरञ्चैव पुरं विजयसाह्वयम् । सुगन्धिनी च [15]वज्रार्धतरं रत्नाकराह्वयम् ॥८६॥
भवेद् [16]रत्नपुरञ्चान्त्यम् उत्तरस्यां पुराणि वै । श्रेण्यां स्वर्गपुरश्रीणि भान्त्येतानि महान्त्यलम् ॥८७॥

का परिवार है तथा खेट मडंब आदिकी रचना जुदी जुदी है ॥७२॥ वे गांव बिना बोये पैदा होनेवाले शाली चांवलोंसे तथा और भी अनेक प्रकारके धानोंसे सदा हरे-भरे रहते हैं तथा उनकी सीमाएं पौंडा और ईखोंके वनोंसे सदा ढकी रहती हैं ॥७३॥ इस विजयार्ध पर्वतपर बसे हुए नगरोंका अन्तर भी सर्वज्ञ देवने प्रमाण योजनाके नापसे १९५ योजन बतलाया है ॥७४॥ जिस प्रकार दक्षिण श्रेणीपर इन नगरोंकी रचना बतलाई है ठीक उसी प्रकार उत्तर श्रेणीपर भी अनेक विभूतियोंसे युक्त नगरोंकी रचना है ॥७५॥ किन्तु वहांपर नगरोंका अन्तर प्रमाणयोजनसे कुछ अधिक एक सौ अठहत्तर योजन है ॥७६॥ पश्चिम दिशासे लेकर साठवें नगरतक उन नगरोंके नाम अनुक्रमसे इस प्रकार हैं—॥७७॥ १ अर्जुनी, २ वारुणी, ३ कैलास-वारुणी, ४ विद्युत्प्रभ, ५ किलकिल, ६ चूडामणि, ७ शशिप्रभा, ८ वंशाल, ९ पुष्पचूड, १० हंसगर्भ, ११ बलाहक, १२ शिवंकर, १३ श्रीहर्म्य, १४ चमर, १५ शिवमन्दिर, १६ वसुमत्क, १७ वसुमती, १८ सिद्धार्थक, १९ शत्रुञ्जय, २० केतुमाला, २१ सुरेन्द्रकान्त, २२ गगननन्दन, २३ अशोका, २४ विशोका, २५ वीतशोका, २६ अलका, २७ तिलका, २८ अम्बरतिलक, २९ मन्दिर, ३० कुमुद, ३१ कुन्द, ३२ गगनवल्लभ, ३३ द्युतिलक, ३४ भूमितिलक, ३५ गन्धर्वपुर, ३६ मुक्ताहार, ३७ निमिष, ३८ अग्निज्वाल, ३९ महाज्वाल, ४० श्रीनिकेत, ४१ जय, ४२ श्रीनिवास, ४३ मणिवज्र, ४४ भद्राश्व, ४५ भवनंजय, ४६ गोक्षीर, ४७ फेन, ४८ अक्षोभ्य, ४९ गिरिशिखर, ५० धरणी, ५१ धारण, ५२ दुर्ग, ५३ दुर्धर, ५४ सुदर्शन, ५५ महेन्द्रपुर, ५६ विजयपुर, ५७ सुगन्धिनी, ५८ वज्रपुर, ५९ रत्नाकर और ६० चन्द्रपुर। इस प्रकार उत्तर श्रेणी में ये बड़े बड़े साठ नगर सुशोभित हैं इनकी शोभा स्वर्गके नगरोंके समान है ॥७८–८७॥

---

१ भरिताः । २ पञ्चनवत्यधिकशतम् । ३ निर्देशितम् । ४ साधिकाष्टसप्ततिसहितम् । ५ षष्टिम् । षष्टेः पूरणं षष्टितमम् । ६ शिखिप्रभे इति क्वचित् पाठः । ७ पुष्पचूडञ्च अ० । ८ वसुमुत्कं प० । ९ अम्बरतिलकम् । १० नैमिषम् । ११ भवनञ्जयम् अ० । १२ गिरिशिखरम् । १३ धारणं ल०, म० । १४ माहेन्द्राख्य ल०, म०, द० । १५ वज्राख्यं परं ल०, म०, द० । १६ चन्द्रपुरं म०, ल० ।

पुराणीन्द्रपुराणीव सौधानि [1]स्वर्विमानतः । प्रति प्रतिपुरं व्यस्त[2]विभवं प्रतिवैभवम् ॥८८॥
नराः सुरकुमाराभा नार्यश्चाप्सरसां समाः । सर्वर्तुविषयान् भोगान् भुञ्जतेऽमी यथोचितम् ॥८९॥

द्रुतविलम्बितच्छन्दः

इति पुराणि पुराणकवीशिनामपि वचोभिरशक्यनुतीन्ययम् ।
दधदधित्यकया[3] गिरिरुच्चकैः द्युवसतेः[4] श्रियमाह्वयते ध्रुवम् ॥९०॥
गिरिरयं गुरुभिः शिखरैर्दिवं प्रविपुलेन तलेन च भूतलम् ।
दधदुपान्तचरैः खचरोरगैः प्रथयति त्रिजगच्छ्रियमेकतः ॥९१॥
निधुवनानि[5] वनान्तलतालयैः [6]मृदितपल्लवसंस्तरणाततैः ।
पिशुनयत्युप[7]भोगसुगन्धिभिः गिरिरयं गगनेचरयोषिताम् ॥९२॥
इह सुरासुरकिन्नरपन्नगा नियतमस्य तटेषु महीभृतः ।
प्रतिवसन्ति समं प्रमदाजनैः [8]स्वरुचितैः रुचितैश्च रतोत्सवैः ॥९३॥
[9]सुरसिषेविषितेषु निषेदुषीः[10] सरिदुपान्तलताभवनेष्वमूः ।
प्रणयकोपविजिह्म[11]मुखीर्वधूः अनुनयन्ति सदात्र नभश्चराः ॥९४॥

ये नगर इन्द्रपुरीके समान हैं और बड़े बड़े भवन स्वर्गके विमानोंके समान हैं । यहांका प्रत्येक नगर शोभाकी अपेक्षा दूसरे नगरसे पृथक् ही मालूम होता है तथा हरएक नगरका वैभव भी दूसरे नगरके वैभवकी अपेक्षा पृथक् मालूम होता है अर्थात् यहांके नगर एकसे एक बढ़कर हैं ॥८८॥ यहांके मनुष्य देवकुमारोंके समान हैं और स्त्रियां अप्सराओंके तुल्य हैं । ये सभी स्त्री-पुरुष अपने-अपने योग्य छहों ऋतुओंके भोग भोगते हैं ॥८९॥ इस प्रकार यह विजयार्ध पर्वत ऐसे ऐसे श्रेष्ठ नगरोंको धारण कर रहा है कि बड़े बड़े प्राचीन कवि भी अपने वचनों द्वारा जिनकी स्तुति नहीं कर सकते । इसके सिवाय यह पर्वत अपने ऊपरकी उत्कृष्ट भूमिसे ऐसा मालूम होता है मानो स्वर्गकी लक्ष्मीको ही बुला रहा हो ॥९०॥

यह पर्वत अपनी बड़ी बड़ी शिखरोंसे स्वर्गको धारण कर रहा है, अपने विस्तृत तलभागसे अधोलोकको धारण कर रहा है और समीपमें ही घूमनेवाले विद्याधर तथा धरणेन्द्रोंसे मध्यलोकको शोभा धारण कर रहा है इस प्रकार यह एक ही जगह तीनों लोकोंकी शोभा प्रकट कर रहा है ॥९१॥ जिनमें कोमल पल्लवोंके बिछौने बिछे हुए हैं और जिनमें सम्भोगकी गन्ध फैल रही है ऐसे वनके मध्यमें बने हुए लता-गृहोंसे यह पर्वत विद्याधरियोंकी रतिक्रीडाको प्रकट कर रहा है ॥९२॥ इस पर्वतके किनारोंपर देव, असुरकुमार, किन्नर और नागकुमार आदि देव अपनी अपनी स्त्रियोंके साथ अपनेको अच्छे लगनेवाले तथा अपने अपने योग्य संभोग आदिका उत्सव करते हुए नियमसे निवास करते रहते हैं ॥९३॥ इस पर्वतपर देवोंके सेवन करने योग्य नदियोंके किनारे बने हुए लता-गृहोंमें बैठी हुई तथा प्रणय कोपसे जिनके मुख कुछ मलिन अथवा कुटिल हो रहे हैं ऐसी अपनी स्त्रियोंको विद्याधर लोग सदा मनाते रहते हैं—

---

१ स्वर्गविमानानां प्रतिनिधयः । २ व्यत्यासितविभवप्रतिवैभवम् । एकस्मिन्नगरे यो विभवो भवत्यन्यस्मिन्नगरे तद्विभवाधिकं प्रतिवैभवमस्तीत्यर्थः । ३ श्रेण्या । ४ स्पर्गावासलक्ष्मीम् । ५ व्यवायानि रतानीत्यर्थः । ६ मर्दितकिसलयशय्याविस्तृतैः । ७ उपभोगयोग्यश्रीखण्डकर्पूरादिसुरभिभिः । ८ आत्मनामभीष्टैः । ९ अमरैर्निषेवितुमिष्टेषु । १० स्थितवतीः । ११ वक्रः ।

इह मृणालनियोजितबन्धनैरिह [1]वतंससरोरुहताडनैः ।
इह [2]मुखासवसेचनकैः प्रियान् विमुखयन्ति रते कुपिताः स्त्रियः ॥९५॥
क्वचिदनङ्गनिवेश[3]इवामरीललितनर्तनगीतमनोहरः ।
मदकलध्वनिकोकिलडिण्डिमैः क्वचिदनङ्गजयोत्सवविभ्रमः[4] ॥९६॥
क्वचिदुपो[5]ढपयःकणशीतलैः धूतसरोजवनैः पवनैः सुखः[6] ।
मदकलालिकुलाकुलपादपैः उपवनैरतिरम्यतरः क्वचित् ॥९७॥
क्वचिदनेक[7]पयूथनिषेवितः क्वचिदनेक[8]पतत्पतगाततः ।
क्वचिदनेक[9]पराध्यर्मणिद्युतिच्छुरितराजतसानुविराजितः ॥९८॥
क्वचिदकाण्ड[10]विनर्तितकेकिभिः घननिभैर्हरिनीलतटैर्युतः ।
क्वचिदकालकृतौ[11]षसविप्लवैः परिगतोऽरुणरत्नशिलातटैः[12] ॥९९॥
क्वचन काञ्चनभित्तिपराहतै[13] रविकरैरभिदीपितकाननः ।
नभसि सञ्चरतां जनयत्ययं गिरिरुदीर्ण[14]दवानलसंशयम् ॥१००॥
इति विशेषपरम्परयान्वहं परिगतो[15] गिरिरेष सुरेशिनाम् ।
अपि मनः[16] परिवर्धितकौतुकं वितनुते किमुताम्बरचारिणाम् ॥१०१॥

प्रसन्न करते रहते हैं ॥९४॥ इधर ये कुपित हुई स्त्रियां अपने पतियोंको मृणालके बन्धनोंसे बांधकर रति-क्रीडासे विमुख कर रही हैं, इधर कानोंके आभूषण-स्वरूप कमलोंसे ताडना कर के ही विमुख कर रही हैं और इधर मुखकी मदिरा ही थूककर उन्हें रति-क्रीडासे पराङ्मुख कर रही हैं ॥९५॥ यह पर्वत कहींपर देवांगनाओंके सुन्दर नृत्य और गीतोंसे मनोहर हो रहा है जिससे ऐसा जान पड़ता है मानो कामदेवका निवासस्थान ही हो और कहींपर मदोन्मत्त कोयलोंके मधुर शब्दरूपी नगाड़ोंसे युक्त हो रहा है जिससे ऐसा मालूम होता है मानो काम-देवके विजयोत्सवका विलास ही हो ॥९६॥ कहीं तो यह पर्वत जलके कणोंको धारण करने से शीतल और कमलवनोंको कम्पित करनेवाली वायुसे अतिशय सुखदायी मालूम होता है और कहीं मनोहर शब्द करते हुए भ्रमरोंसे व्याप्त वृक्षोंवाले बगीचोंसे अतिशय सुन्दर जान पड़ता है॥९७॥ यह पर्वत कहीं तो हाथियोंके झुण्डसे सेवित हो रहा है, कहीं उड़ते हुए अनेक पक्षियोंसे व्याप्त हो रहा है और कहीं अनेक प्रकारके श्रेष्ठ मणियोंकी कान्तिसे व्याप्त चांदी के शिखरोंसे सुशोभित हो रहा है ॥९८॥ यह पर्वत कहींपर नील मणियोंके बने हुए किनारों से सहित है इसके वे किनारे मेघके समान मालूम होते हैं जिससे उन्हें देखकर मयूर असमय में ही (वर्षा ऋतुके बिना ही) नृत्य करने लगते हैं । और कहीं लाल-लाल रत्नोंकी शिला-ओंसे युक्त है, इसकी वे रत्नशिलाएं अकालमें ही प्रातःकालकी लालिमा फैला रही हैं ॥९९॥ कहींपर सुवर्णमय दीवालोंपर पड़कर लौटती हुई सूर्यकी किरणोंसे इस पर्वतपरका वन अतिशय देदीप्यमान हो रहा है जिससे यह पर्वत आकाशमें चलनेवाले विद्याधरोंको दावानल लगने का सन्देह उत्पन्न कर रहा है ॥१००॥ इस प्रकार अनेक विशेषताओंसे सहित यह पर्वत रात-दिन इन्द्रोंके मनको भी बढ़ते हुए कौतुकसे युक्त करता रहता है अर्थात् क्रीडा करनेके लिये इन्द्रों

---

१ कर्णपूर । २ मधुगण्डूषसेचनैः । ३ आश्रयः । ४ विलासः । ५ धृतः । ६ सुखकरः । ७ गजः । ८ विविधोद्गच्छत्पक्षिविस्तृतः । ९ विविधोत्कृष्टरत्नकान्तिमिश्रितरजतमयनितम्बशोभितः । १० अकाल । ११ उषःसम्बन्धिबालातपपूरैः । 'प्रातः, प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि, इत्यभिधानात् । १२ शिलातलैः अ०, प०, म०, ल०, द० । १३ प्रत्युद्गतैरित्यर्थः । १४ उद्गत । १५ युतः । १६ अपि पुनः ल०, म० ।

सुरसरिज्जलसिक्त[1]तटद्रुमो जलदचुम्बितसानुवनोदयः ।
मणिमयैः शिखरैः [2]खचरोषितैः विजयते गिरिरेष [3]सुराचलान् ॥१०२॥
सुरनदीसलिलप्लुतपादपैः तटवनैः [4]कुसुमाञ्चितमूर्द्धभिः ।
मुखरितालिभिरेष महाचलो विहसतीव सुरोपवनश्रियम् ॥१०३॥
इयमितः सु[5]रसिन्धुरपां छटाः प्रकिरतीह विभाति पुरो दिशि ।
वहति सिन्धुरितश्च महानदी मुखरिता कलहंसकलस्वनैः ॥१०४॥
हिमवतः शिरसः किल निःसृते [6]सकमलालयतः सरिताविमे ।
शुचितयास्य तु पादमुपाश्रिते शुचिरलङ्घ्यतरो हि [7]वृथोन्नतेः ॥१०५॥
इह [8]सदैव [9]सदैवविचेष्टितैः [10]सुकृतिनः [11]कृतिनः खचराधिपाः ।
कृतनयास्तनयाः इव सत्पितुः समुपयान्ति फलान्यमुतो गिरेः ॥१०६॥
क्षितिरकृष्टपचेलिमसस्यसूः खनिरयत्नजरत्नविशेषसूः ।
इह वनस्पतयश्च सदोन्नता दधति पुष्पफलर्द्धिमकालजाम् ॥१०७॥
सरसि सारसहंसविकूजितैः कुसुमितासु लतास्वलिनिःस्वनैः ।
उपवनेषु च कोकिलनिक्वणैः हृदि[12]शयोऽत्र सदैव विनिद्रितः[13] ॥१०८॥

का भी मन ललचाता रहता है तब विद्याधरोंकी तो बात ही क्या है ? ॥१०१॥ जिसके किनारे पर उगे हुए वृक्ष गङ्गा नदीके जलसे सींचे जा रहे हैं और जिसके शिखरोंपरके वन मेघोंसे चुम्बित हो रहे हैं ऐसा यह विजयार्ध पर्वत विद्याधरोंसे सेवित अपने मणिमय शिखरों द्वारा मेरु पर्वतों को भी जीत रहा है ॥१०२॥ जिनके वृक्ष गंगा नदीके जलसे सींचे हुए हैं, जिनके अग्रभाग फूलोंसे सुशोभित हो रहे हैं और जिनमें अनेक भ्रमर शब्द कर रहे हैं ऐसे किनारेके उपवनोंसे यह पर्वत ऐसा मालूम होता है मानो देवोंके उपवनोंकी शोभाकी हंसी ही कर रहा हो ॥१०३॥ इधर यह पूर्व दिशाकी ओर जलके छींटोंकी वर्षा करती हुई गंगा नदी सुशोभित हो रही है और इधर यह पश्चिमकी ओर कलहंस पक्षियोंके मधुर शब्दोंसे शब्दायमान सिन्धु नदी बह रही है ॥१०४॥ यद्यपि यह दोनों ही गंगा और सिन्धु नदियाँ हिमवत् पर्वतके मस्तकपरके पद्म नामक सरोवरसे निकली हैं तथापि शुचिता अर्थात् पवित्रताके कारण (पक्षमें शुक्लताके कारण) इस विजयार्धके पाद अर्थात् चरणों (पक्षमें प्रत्यन्तपर्वत) की सेवा करती हैं सो ठीक है क्योंकि जो पवित्र होता है उसका कोई उल्लंघन नहीं कर सकता। पवित्रताके सामने ऊंचाई व्यर्थ है। भावार्थ–गंगा और सिन्धु नदी हिमवत् पर्वतके पद्म नामक सरोवरसे निकल कर गुहाद्वारसे विजयार्ध पर्वतके नीचे होकर बहती हैं। इसी बातका कविने आलंकारिक ढंग से वर्णन किया है। यहां शुचि और शुक्ल शब्द श्लिष्ट हैं ॥१०५॥ जिस प्रकार नीतिमान् पुत्र श्रेष्ठ पितासे मनवाञ्छित फल प्राप्त करते हैं उसी प्रकार पुण्यात्मा, कार्यकुशल और नीतिमान् विद्याधर अपने भाग्य और पुरुषार्थके द्वारा इस पर्वतसे सदा मनवाञ्छित फल प्राप्त किया करते हैं ॥१०६॥ यहांकी पृथिवी बिना बोये ही धान्य उत्पन्न करती रहती है, यहां की खानें बिना प्रयत्न किये ही उत्तम उत्तम रत्न पैदा करती हैं और यहांके ऊंचे ऊंचे वृक्ष भी असमयमें उत्पन्न हुए पुष्प और फलरूप सम्पत्तिको सदा धारण करते रहते हैं ॥१०७॥ यहांके सरोवरों पर सारस और हंस पक्षी सदा शब्द करते रहते हैं, फूली हुई लताओंपर भ्रमर गुंजार करते रहते हैं और उपवनोंमें कोयलें शब्द करती रहती हैं जिससे ऐसा जान पड़ता है मानो यहां कामदेव

१ 'तटीद्रुमो' इति क्वचित् पाठः। २ विद्याधराश्रितैः। ३ कुलाचलान् द०। ४ कुसमाचित ब०। ५ गङ्गा। ६ पद्मसरोवरसहितात्। ७ वृथा उन्नतिर्यस्य तत्सकाशात्। वृथोन्नतिः ल०। ८ अनारतमेव। ९ पुण्यसहित। १० पुण्यवन्तः। ११ कुशलाः। १२ मदनः। १३ विगतनिद्रः।

कमलिनीवनरेणुविकर्षिभिः[1] कुसुमितोपवनद्रुमधूननैः[2] ।
[3]धृतिमुपैति सदा खचरीजनो रतिपरि[4]श्रमनुद्भिरिहानिलैः ॥१०९॥
हरिरितः प्रतिगर्जति कानने करिकुलं वनमुज्झति तद्भयात् ।
परिगलत्कवलञ्च मृगीकुलं गिरिनिकुञ्जतला[5]दवसर्पति ॥११०॥
सरसि हंसवधूरियमुत्सुका कमलरेणुविपिञ्जरमञ्जसा ।
समनुयाति न कोकविशङ्किनी [6]सहचरं गलदश्रु विरौति च ॥१११॥
इयमितो बत कोककुटुम्बिनी[7] कमलिनीनवपत्रतिरोहितम् ।
अनवलोक्य मुहुः सहचारिणं[8] भ्रमति दीनरुतैः परितः सरः ॥११२॥
इह शरद्घनमल्पकमाश्रितं मणितटं सुरखेचरकन्यकाः ।
लघुतया [9]सुखहार्यमितस्ततः प्रचलयन्ति नयन्ति च कर्षणैः[10] ॥११३॥
[11]असुमतां [12]सुमताम्भसमाततां धृत[13]घनान्तघनामिव वीचिभिः ।
[14]ततवनान्तवनाममरापगां वहति सानुभिरेष महाचलः ॥११४॥
[15]असुतरां सुतरां[16] पृथुमम्भसां[17] पतिमितान्तिमितान्त[18]लतावनाम् ।
[19]अनुगतां [20]नु गतां स्वतटोपमां वहति सिन्धुमयं धरणीधरः ॥११५॥

सदा ही जागृत रहा करता हो ॥१०८॥ जो कमलवनके परागको खींच रहा है, जो उपवनोंके फूले हुए वृक्षोंको हिला रहा है और जो संभोगजन्य परिश्रमको दूर कर देनेवाला है ऐसे वायुसे यहांकी विद्याधरियां सदा संतोषको प्राप्त होती रहती हैं ॥१०९॥ इधर इस वनमें यह सिंह गरज रहा है उसके भयसे यह हाथियोंका समूह वनको छोड़ रहा है और जिनके मुखसे ग्रास भी गिर रहा है ऐसा यह हरिणियोंका समूह भी पर्वतके लतागृहोंसे निकलकर भागा जा रहा है ॥११०॥ इधर तालाबके किनारे यह उत्कण्ठित हुई हंसिनी, जो कमलके परागसे बहुत शीघ्र पीला पड़ गया है ऐसे अपने साथी-प्रिय हंसको चकवा समझकर उसके समीप नहीं जाती है और अश्रु डालती हुई रो रही है ॥१११॥ इधर यह चकवी कमलिनीके नवीन पत्रोंसे छिपे हुए अपने साथी—चकवाको न देखकर बार-बार दीन शब्द करती हुई तालाबके चारों ओर घूम रही है ॥११२॥ इधर इस पर्वतके मणिमय किनारेपर यह शरद् ऋतुका छोटा-सा बादल आ गया है, हलका होनेके कारण इसे सब कोई सुखपूर्वक ले जा सकता है और इसीलिये ये देव तथा विद्याधरोंकी कन्याएं इसे इधर उधर चलाती हैं और खींचकर अपनी अपनी ओर ले जाती हैं ॥११३॥ जो सब जीवोंको अतिशय इष्ट है, जो बहुत बड़ी है, जो अपनी लहरोंसे ऐसी जान पड़ती है मानो उसने शरद्ऋतुके बादल ही धारण किये हों और जिसका जल वनोंके अन्तभाग तक फैल गया है ऐसी गंगा नदीको भी यह महापर्वत अपनी निचली शिखरोंपर धारण कर रहा है ॥११४॥ और, जो अतिशय विस्तृत है जो कठिनतासे पार होने योग्य है, जो लगातार समुद्र तक चली गई है जिसने लताओंके वनको जलसे आर्द्र कर दिया है तथा जो अपने किनारेकी उपमाको प्राप्त है ऐसी सिन्धु नदीको भी यह पर्वत धारण कर रहा

१ स्वीकुर्वाणैः । २ धूनकैः इत्यपि पाठः । ३ सन्तोषम् । ४ खेदविनाशकैः । ५ –कुञ्जकुला–इत्यपि पाठः । ६ प्रियतमं हंसम् । ७ चक्रवाकस्त्री । ८ प्रियकोकम् । ९ सुखेन प्रापणीयम् । १० आकर्षणैः । ११ प्राणिनाम् । १२ सुष्ठुसम्मतजलाम् । १३ शरत्कालमेघाम् । १४ विस्तृतवनमध्यजलाम् । १५ दुस्तराम् । १६ नितराम् । १७ समुद्रगताम् । १८ आर्द्रितसमीपवल्लीवनाम् । १९ अनुगस्य भावः अनुगता ताम् । २० नु स्वतां ल०, म० । नु इव ।

इति यदेव यदेव निरूप्यते बहुविशेषगुणेऽत्र नगाधिपे ।
किमु[1] तदेव तदेव सुखावहं हृदयहारि दृशां च विलोभनम्[2] ॥११६॥

इन्द्रवज्रा

धत्तेऽस्य सानौ कुसुमाचितेयं नीलावनालीपरिधानलक्ष्मीम्[3] ।
शृङ्गाग्रलग्ना च सिताभ्रपङ्क्तिः [4]संव्यानलीलामियमातनोति ॥११७॥

उपेन्द्रवज्रा

[5]तिरस्करिण्येव सिताभ्रपङ्क्त्या [6]परिष्कृतान्तेऽस्य निकुञ्जदेशे ।
मणिप्रभोत्सर्पहतान्धकारे समं रमन्ते खचरैः खचर्यः ॥११८॥

वंशस्थवृत्तम्

शरद्[7]घनस्योपरि सुस्थिते घने वितानतां तन्वति खेचराङ्गनाः ।
कृतालयास्तत्र[8] चिरं रिरंसया घनातपेऽप्यह्नि न जानते क्लमम् ॥११९॥
समुल्लसन्नीलमणिप्रभाप्लुतान् शरद्घनान् कालघनाघनायितान्[9] ।
विलोक्य हृष्टोऽत्र रुवन्[10] शिखाबलः[11] प्रनृत्यति व्याततबर्हमुन्मदः[12] ॥१२०॥

रुचिरावृत्तम्

सितान् घनानिह तटसंश्रितानिमान् स्थलास्थया समुपागताः खगाङ्गनाः ।
दुकूलसंस्तरण[13] इवातिविस्तृते विशायिका[14]मुपरचयन्ति तत्तले ॥१२१॥

है ॥११५॥ इस प्रकार अनेक विशेष गुणोंसे सहित इस पर्वतपर जिसे देखो वही सुख देनेवाला, हृदयको हरण करनेवाला और आंखोंको लुभानेवाला जान पड़ता है ॥११६॥

इस पर्वतकी नीचली शिखरोंपर जो फूलोंसे व्याप्त हरी हरी वनकी पंक्ति दिखाई दे रही है वह इस पर्वतकी धोतीकी शोभा धारण कर रही है और शिखरके अग्रभागपर जो सफेद-सफेद बादलोंकी पंक्ति लग रही है वह इसकी पगड़ीकी शोभा बढ़ा रही है ॥११७॥ जिनका अन्तभाग परदाके समान सफेद बादलोंकी पंक्तिसे ढका हुआ है और मणियोंकी प्रभाके प्रसार से जिनका सब अन्धकार नष्ट हो गया है ऐसे इस पर्वतके लतागृहोंमें विद्याधरियां विद्याधरों के साथ क्रीड़ा कर रही हैं ॥११८॥ इस पर्वतके ऊपर शरद् ऋतुका मोटा बादल चंदोवाकी शोभा बढ़ाता हुआ हमेशा स्थिर रहता है इसलिये विद्याधरियां चिरकाल तक रमण करनेकी इच्छासे वहींपर अपना घर-सा बना लेती हैं और गरमीके दिनोंमें भी गरमीका दुःख नहीं जानतीं ॥११९॥ ये शरद् ऋतुके बादल भी चमकते हुए इन्द्र नीलमणियोंकी प्रभामें डूबकर काले बादलोंके समान हो रहे हैं इन्हें देखकर ये मयूर हर्षित हो रहे हैं और उन्मत्त होकर शब्द करते हुए पूंछ फैलाकर सुन्दर नृत्य कर रहे हैं ॥१२०॥ इधर ये विद्याधरोंकी स्त्रियां पर्वत के किनारेमें मिले हुए सफेद बादलोंको स्थल समझकर उनके पास पहुंची हैं और उनपर इस प्रकार शय्या बना रही हैं मानो बिछे हुए किसी लम्बे-चौड़े रेशमकी जाजमपर ही बना रही

१ किमुत । २ लोभकरम् । ३ अधोंऽशुकशोभाम् । ४ उत्तरीयविलासम् । ५ यवनिकया । "प्रतिसीरा यवनिका स्यात्तिरस्करिणी च सा" इत्यभिधानात् । ६ वेष्टित । ७ शरद्घनेऽस्योपरि ल०, म० । ८ मेघद्वयमध्ये । ९ कृष्णमेघ इवाचरितान् । १० ध्वनन् । ११ केकी । १२ विस्तृत-पिच्छं यथा भवति तथा । १३ शय्यायाम् । १४ शयनम् ।

सरस्तटं कलरुतसारसाकुलं वनद्विपे विशति सितच्छदावली[1] ।
नभोभिया समुपगतात्र लक्ष्यते नभः श्रियः पृथुतरहारयष्टिवत् ॥१२२॥
क्वचिद्धरिन्म[2]णितटरोचिषां चयैः परिष्कृतं[3] वपुरिह तिग्मदीधितेः ।
सरोजिनी हरितपलाश[4]शङ्कया नभश्चरैरुपतटमीक्ष्यते मुहुः ॥१२३॥
क्वचिद्वनद्विरदकपोलघट्टनैः क्षतत्वचो वनतरवः सरस्तटे ।
रुदन्ति [5]नु च्युतकुसुमाश्रुबिन्दवो निलीनषट्पदकरुणस्वरान्विताम्[6] ॥१२४॥
इतः कलं कमलवनेषु रूयते मदोद्धुरध्वनिकलहंससारसैः ।
इतश्च कोकिलकलनादमूर्च्छितं[7] मनोहरं शिखिविरुतं प्रतायते[8] ॥१२५॥
इतः शरद्घनघनकालमेघयोः यदृच्छया वन इव सन्निधिर्भवन् ।
[9]मुखोन्मुखप्रहितकरः प्रवर्तते सितासितद्विरदनयोरयं रणः ॥१२६॥
वनस्थलीमनिलविलोलितद्रुमाम् इमामितः कुसुमरजोऽवगुण्ठिताम्[10] ।
अलक्षिता[11]मधिगम[12]यत्यलिव्रजः समाव्रजन् परिमललोलुपोऽभितः ॥१२७॥
इतो वनं वनगजयूथसेवितं [13]विभाव्यते मदजलसिक्तपादपम् ।
समापतन्मदकलभृङ्गमालिकासमाकुलद्रुम[14]लतमन्तरा[15]न्तरा ॥१२८॥

हों ॥१२१॥ इधर, मनोहर शब्द करते हुए सारस पक्षियोंसे व्याप्त तालाबोंके किनारोंपर ये जंगली हाथी प्रवेश कर रहे हैं जिससे ये हंसोंकी पंक्तियां श्रावण मासके डरसे आकाशमें उड़ी जा रही हैं और ऐसी दिखाई देती हैं मानो आकाशरूपी लक्ष्मीके हारकी लड़ियां ही हों ॥१२२॥ इधर यह सूर्यका बिम्ब हरे-हरे मणियोंके बने हुए किनारोंकी कान्तिके समूहसे आच्छादित हो गया है इसलिये ये विद्याधर इसे कमलिनीका हरा पत्ता समझकर पर्वतके इसी किनारेकी ओर बार-बार देखते हैं ॥१२३॥ कहींपर सरोवरके किनारे जंगली हाथियोंके कपोलोंकी रगड़ से जिनकी छाल गिर गई है ऐसे वनके वृक्ष ऐसे जान पड़ते हैं मानो फूलरूपी आंसुओंकी बूंदें डालते हुए और उनके भीतर बैठे हुए भ्रमरोंकी गुंजारके बहाने करुणाजनक शब्द करते हुए रो ही रहे हों ॥१२४॥ इधर कमलवनोंमें मदके कारण जिनके शब्द उत्कट हो गये हैं ऐसे कलहंस और सारस पक्षी मधुर शब्द कर रहे हैं और इधर कोयलों के मनोहर शब्दों से बढ़ा हुआ मयूरों का मनोहर शब्द विस्तृत हो रहा है ॥१२५॥ इधर इस वनमें शरद्ऋतुके से सफेद बादल और वर्षाऋतुके से काले बादल स्वेच्छासे मिल रहे हैं और ऐसे जान पड़ते हैं मानो सफेद और काले दो हाथी एक दूसरेके मुंहके सामने सूंड चलाते हुए युद्ध ही कर रहे हों ।१२६॥ इधर वायु से जिसके वृक्ष हिल रहे हैं और जो फूलोंकी परागसे बिलकुल ढकी हुई है ऐसी यह वनकी भूमि यद्यपि दिखाई नहीं दे रही है तथापि सुगन्धिका लोलुपी और चारों ओरसे आता हुआ यह भ्रमरोंका समूह इसे दिखला रहा है ॥१२७॥ इधर, जो अनेक जंगली हाथियों के झुण्डोंसे सेवित है जिसके वृक्ष उन हाथियोंके मदरूपी जलसे सींचे गये हैं और जिसके वृक्ष तथा लताएं बीच बीचमें पड़ते हुए और मदसे मनोहर शब्द करते हुए भ्रमरोंके समूहसे व्याप्त

१ हंसावली । २ मरकतरत्नम् । "गारुत्मतं मरकतमश्मगर्भं हरिन्मणिः" इत्यभिधानात् । ३ वेष्टितम् । विम्बितम् । ४ पत्र । 'पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्' इत्यभिधानात् । ५ इव । ६ करुणस्वरान्विताः, करुणस्वनान्विता इति च पाठः । ७ मिश्रितम् ८ प्रतन्यते ल०, म० । ९ मुखाभिमुखस्थापितदण्डः । १० आच्छादिताम् । ११ –मपि गम–द० । १२ ज्ञापयति । १३ अनुमीयते । १४ द्रुमकुलमन्तरान्तरे द०, प० । द्रुमलतमनारान्तरे म०, ल० । १५ मध्ये मध्ये ।

पुष्पिताग्रावृत्तम्

इह खगवनिता नितान्तरम्याः सुरभिसरोजवना वनान्तवीथीः ।
परिहितरसनैः[1] शनैः श्रयन्ते जितपुलिनैर्जघनैर्घनैः सुदत्यः[2] ॥१२६॥
सरसकिसलयप्रसूनक्लृप्तिं[3] विततरिषूणि[4] वनानि [5]नूनमस्मिन् ।
[6]द्रुतमित इत इत्यमूः खगस्त्रीः अलिविरुतैरवि[7]राममाह्वयन्ति ॥१३०॥
कुसुमितवनषण्डमध्यमेताः तरुगहनेन[8] घनीकृतान्धकारम् ।
[9]स्वतनुरुचिविधूतदृष्टिरोधाः खगवनिता बहुदीपिका[10] विशन्ति ॥१३१॥
कुसुमरसपिपासया निलीनैः अलिभिरनारतमारुवद्भि[11]रासाम् ।
युवतिकरजलून[12]पल्लवानाम् अनुरुदितं[13] नु[14] वितन्यते लतानाम् ॥१३२॥
कुसुमरचितभूषणावतंसाः कुसुमरजःपरिपिञ्जरस्तनान्ताः ।
कुसुमशरशरायितायताक्ष्यः तदपचितावि[15]भान्त्यमूः खचर्यः ॥१३३॥

वसन्ततिलकम्

ताः सञ्चरन्ति कुसुमापचये तरुण्यः सक्ता[16] वनेषु ललितभ्रुविलोलनेत्राः ।
तन्व्यो नखोरुकिरणोद्[17]गममञ्जरीका व्यालोलषट्पदकुला इव हेमवल्ल्यः ॥१३४॥

हो रही हैं ऐसा यह वन कितना सुन्दर सुशोभित हो रहा है ॥१२८॥ इधर, जो सुगन्धित कमलों के वनोंसे सहित हैं और जो अतिशय मनोहर जान पड़ती हैं ऐसी इस वनकी गलियोंमें ये सुन्दर दांतोंवाली विद्याधरोंकी स्त्रियां करधनी पहिने हुए और नदियोंके किनारेके बालूके टीलों को जीतनेवाले अपने बड़े बड़े जघनों (नितम्बों) से धीरे-धीरे जा रही हैं ॥१२९॥ इधर, इस पर्वतपरके वन सरस पल्लव और पुष्पोंकी रचना मानों बांट देना चाहते हैं इसीलिये वे भ्रमरों के मनोहर शब्दों के बहाने 'इधर इस वृक्षपर आओ, इधर इस वृक्षपर आओ' इस प्रकार निरन्तर इन विद्याधारियोंको बुलाते रहते हैं ॥१३०॥ इधर वृक्षोंकी सघनतासे जिसमें खूब अन्धकार हो रहा है, ऐसे फूले हुए वनके मध्यभागमें अपने शरीरकी कान्तिसे दृष्टिको रोकनेवाले अन्धकारको दूर करती हुई ये विद्याधरियां साथमें अनेक दीपक लेकर प्रवेश कर रही हैं ॥१३१॥ इधर, इन तरुण स्त्रियोंने अपने नाखूनोंसे इन लताओंके नवीन-कोमल पत्ते छेद दिये हैं इसलिये फूलोंका रस पीनेकी इच्छासे इन लताओंपर बैठे और निरन्तर गुंजार करते हुए इन भ्रमरोंके द्वारा ऐसा जान पड़ता है मानो इन लताओंके रोनेका शब्द ही फैल रहा हो ॥१३२॥ इधर, जिन्होंने फूलोंके कर्णभूषण बनाकर पहिने हैं, फूलोंकी परागसे जिनके स्तनमण्डल पीले पड़ गये हैं और जिनकी बड़ी बड़ी आंखें कामदेवके धनुषके समान जान पड़ती हैं ऐसी ये विद्याधरियां फूल तोड़नेके लिये इस पर्वतपर इधर उधर जा रही हैं ॥१३३॥ जिनकी भौंहें सुन्दर हैं, नेत्र अतिशय चंचल हैं, नखों की किरणें निकली हुई मंजरियोंके समान हैं और जो फूल तोड़नेके लिये वनोंमें तल्लीन हो रही हैं ऐसी ये तरुण स्त्रियां जहां-तहां ऐसी घूम रही हैं मानो निकली हुई

१ परिक्षिप्तकाञ्चीदामैः । २ शोभना दन्ता यासां ताः । ३ रचनाम् । ४ विस्तारयितुमिच्छूनि । ५ इव । ६ द्रुममित ल०, म०, द० । द्रुवमित इत्यपि क्वचित् । ७ अनवरतमित्यर्थः । ८ दुर्गमेन । ९ निजदेहकान्तिनिर्धूतान्धकाराः । १० दीपिकासदृशाः । ११ आ समन्तात् ध्वनद्भिः । १२ नखच्छेदित । १३ अनुगतरोदनम् । १४ इव । तु प०, अ०, ल०, म० । १५ पुष्पादाने पुष्पापचये इत्यर्थः । १६ आसक्ताः । १७ पुष्प ।

पुष्पिताग्रावृत्तम्

मृदुतरपवने वने प्रफुल्ल कुसुमितमालति[1]कातिकान्तपार्श्वे ।
मरुदयमधुना [2]धुनोति वीथीः अवनिरुहां मलिनालिनाममुष्मिन् ॥१३५॥

वसन्ततिलकम्

आधूतकल्पतरुवीथिरतो नभस्वान् मन्दारसान्द्ररजसा सुरभीकृताशः ।
मत्तालिकोकिलरुतानि हरन्समन्ताद् आवाति पल्लवपुटानि शनैर्विभिन्दन् ॥१३६॥

पुष्पिताग्रावृत्तम्

धृतकमलवने वने[3] तरङ्गान् उपरचयन्मकरन्दगन्धबन्धुः[4] ।
अयमतिशिशिरः शिरस्तरूणां सकुसुममास्पृशतीह गन्धवाहः ॥१३७॥

अपरवक्त्रम्

मृदित[5]मृदुलताग्रपल्लवैः वलयितनिर्झरशीकरोत्करैः ।
अनुवनमिह[6] नीयतेऽनिलैः कुसुमरजो विधुतं वितानताम् ॥१३८॥
चलवलयरवैर[7]वाततैः अनुगतनूपुरहारिझङ्कृतैः ।
[8]सुपरिगममिहाम्बरेचरीरत[9]मतिवर्ति[10] वनेषु किन्नरैः ॥१३९॥

चम्पकमालावृत्तम्

अत्र वनान्ते पत्रिगणोऽयं[11] श्रोत्रहरं नः कूजति चित्रम् ।
[12]सत्रिपताकं नृत्यति नूनं [13]तत्ततनादैर्मत्तशिखण्डी[14] ॥१४०॥

मंजरियोंसे सुशोभित और चंचल भ्रमरोंके समूहसे युक्त सोनेकी लताएं ही हों ॥१३४॥ जिसमें मन्द मन्द वायु चल रहा है, फूल खिले हुए हैं और फूली हुई मालती से जिसके किनारे अतिशय सुन्दर हो रहे हैं ऐसे इस वनमें इस समय यह वायु काले-काले भ्रमरोंसे युक्त वृक्षोंकी पंक्तिको हिला रहा है ॥१३५॥ इधर, जिसने कल्पवृक्षोंकी पंक्तियां हिलाई हैं, जिसने मन्दार जाति के पुष्पोंकी सान्द्र परागसे दिशाएं सुगन्धित कर दी हैं, जो मदोन्मत्त भ्रमरों और कोयलोंके शब्द हरण कर रहा है और जो नवीन कोमल पत्तोंको भेद रहा है ऐसा वायु धीरे-धीरे सब ओर बह रहा है ॥१३६॥

इधर, जो कमलवनोंको धारण करनेवाले जलमें लहरें उत्पन्न कर रहा है, फूलोंके रस की सुगन्धिसे सहित है और अतिशय शीतल है ऐसा यह वायु फूले हुए वृक्षोंके शिखरका सब ओरसे स्पर्श कर रहा है ॥१३७॥ जिसने कोमल लताओंके ऊपरके नवीन पत्तोंको मसल डाला है और जिसमें निर्झरनोंके जलकी बूंदोंका समूह मण्डलाकार होकर मिल रहा है ऐसा यह वायु अपने द्वारा उड़ाये हुए फूलोंके परागको चँदोवाकी शोभा प्राप्त करा रहा है। भावार्थ— इस वनमें वायुके द्वारा उड़ाया हुआ फूलोंका पराग चंदोवाके समान जान पडता है॥१३८॥ इस वनमें होनेवाली विद्याधरियोंकी अतिशय रतिक्रीड़ाको किन्नर लोग चारों ओर फैले हुए चंचल कंकणोंके शब्दोंसे और उनके साथ होनेवाले नूपुरोंकी मनोहर झंकारोंसे सहज ही जान लेते हैं ॥१३९॥ इधर यह पक्षियोंका समूह इस वनके मध्यमें हम लोगोंके कानोंको आनन्द देने वाला तरह तरहका शब्द कर रहा है और इधर यह उन्मत्त हुआ मयूर विस्तृत शब्द करता

१ जातिः । 'सुमना मालती जातिः ।' २ कम्पयति । धुनाति इति क्वचित् । ३ जले । ४ पुष्परजः परिमलयुक्तमित्यर्थः । ५ मर्दित । ६ वने । ७ अव समन्तात् विस्तृतैः । ८ सुज्ञानम् । ९ कामक्रीडाम् । १० अतिमात्रवर्तनं यस्य । ११ पक्षी । १२ करणविशेषयुक्तम् । सपिच्छभारम् । १३ तत्कूजनवीणादिवाद्यरवैः । १४ मयूरः ।

अस्य महाद्रेरनुतटमेषा राजति नानाद्रुमवनराजी ।
[1]पश्यतमेनामनिलविधूतैः र्नतितुकामामिव विटपैः स्वैः ।।१४१।।

उपजातिः

कूजद्द्विरेफा वनराजिरेषा प्रोद्गातुकामेव महीध्रमेनम् ।
पुष्पाञ्जलिं विक्षिपतीव विश्वग्विकीर्यमाणैः सुमनः प्रतानैः ।।१४२।।
वनद्रुमाः षट्पदचौरवृन्दैः विलुप्यमानप्रसवार्थसाराः ।
चोकू[2]यमाना इव भान्त्यमुष्मिन् समुच्चरत्कोकिलकूजितेन ।।१४३।।

शालिनी

महाद्रेरमुष्य स्थलीः [3]कालधौतीः उपेत्य स्फुटं नृत्यतां बर्हिणानाम् ।
प्रतिच्छायया[4] तन्यते व्यक्तमस्मिन् समुत्फुल्लनीलाब्जषण्डस्य लक्ष्मीः ।।१४४।।

पुष्पिताग्रा

अतुलितमहिमा हिमावदातद्युतिरनतिक्रमणीयपुण्यमूर्तिः ।
रजतगिरिरयं विलङ्घिताब्धिः [5]सुरसरिदोघ इवावभाति पृथ्व्याम् ।।१४५।।

मौक्तिकमाला

अस्य महाद्रेरनुतटमुच्चैः प्रेक्ष्य[6] विनीलामुपवनराजीम् ।
नृत्यति हृष्टो जलदविशङ्की बर्हिगणोयं विरचितबर्हः ।।१४६।।

हुआ एक प्रकारका विशेष नृत्य कर रहा है।।१४०।।इस महापर्वतके किनारे किनारे नाना प्रकारके वृक्षोंसे सुशोभित वनकी पंक्ति सुशोभित हो रही है । देखो, वह वायुके द्वारा हिलते हुए अपने वृक्षोंसे ऐसी जान पड़ती है मानो नृत्य ही करना चाहती हो ।।१४१।। जिसमें अनेक भ्रमर गुंजार कर रहे हैं ऐसी यह वनोंकी पंक्ति ऐसी मालूम होती है मानो इस पर्वतका यश ही गाना चाहती हो और जो इसके चारों ओर फूलोंके समूह बिखरे हुए हैं उनसे यह ऐसी जान पड़ती है मानो इस पर्वतको पुष्पाञ्जलि ही दे रही हो ।।१४२।। इस वनके वृक्षोंपर बैठे हुए भ्रमर पुष्परसका पान कर रहे हैं और कोयलें मनोहर शब्द कर रही हैं जिससे ऐसा मालूम होता है कि मानो भ्रमररूपी चोरोंके समूहने इन वन-वृक्षोंका सब पुष्प-रसरूपी धन लूट लिया है और इसीलिये वे बोलती हुई कोयलों के शब्दोंके द्वारा मानो हल्ला ही मचा रहे हों ।।१४३।। इस पर्वतके चांदीके बने हुए प्रदेशोंपर आकर जो मयूर खूब नृत्य कर रहे हैं उनके पड़ते हुए प्रतिबिम्ब इस पर्वत पर खिले हुए नीलकमलोंके समूहकी शोभा फैला रहे हैं भावार्थ– चांदीकी सफेद जमीनपर पड़े हुए मयूरोंके प्रतिबिम्ब ऐसे जान पड़ते हैं मानो पानीमें नील कमलों का समूह ही फूल रहा हो ।।१४४।। इसका माहात्म्य अनुपम है, इसकी कान्ति बर्फके समान अतिशय स्वच्छ है, इसकी पवित्र मूर्तिका कोई भी उल्लंघन नहीं कर सकता अथवा यह किसी के भी द्वारा उल्लंघन न करने योग्य पुण्यकी मूर्ति है और इसने स्वयं समुद्र तक पहुंचकर उसे तिरस्कृत कर दिया है इन सभी कारणोंसे यह चांदीका विजयार्ध पर्वत पृथिवीपर गंगा नदी के प्रवाहके समान सुशोभित हो रहा है ।।१४५।। इस महापर्वतके प्रत्येक ऊंचे तटपर लगी हुई हरी-हरी वनपंक्तिको देखकर इन मयूरोंको मेघोंकी शंका हो रही है जिससे वे हर्षित हो

१ विलोकयतम् । २ भृशं ध्वनन्तः । ३ रजतमयीः । 'कलधौतं रूप्यहेम्नोः' इत्यभिधानात् । ४ प्रतिबिम्बेन । ५ 'त' पुस्तके चतुर्थपादो नास्ति । ६ दृष्ट्वा ।

वसन्ततिलकम्

अस्यानुसानु सुरपन्नगखेचराणाम् आ[1]क्रीडनान्युपवनानि विभान्त्यमूनि ।
नानालतालयसरःसिकतोच्च[2]यानि नित्यप्रवालकुसुमोज्ज्वलपादपानि ॥१४७॥

मौक्तिकमाला

अस्य महाद्रेरुपतटम्[3]च्छन् मूर्च्छति[4] नानामणिकिरणौघैः ।
चित्रितमूर्तिर्वियति[5] [6]पतङ्गः चित्र[7]पतङ्गच्छविमिह धत्ते ॥१४८॥

पृथ्वीवृत्तम्

मणिद्युतिततान्तरैः[8] प्रमुदितोरगव्यन्तरैः निरुद्धरविमण्डलैः [9]स्थगितविश्वदिङ्मण्डलैः ।
[10]मरुद्गतिनिवारिभिः सुरवधूमनोहारिभिः विभाति शिखरैर्घनैर्गिरिरयं नभोलङ्घनैः ॥१४९॥

चामरवृत्तम्

एष भीषणो[11] महाहिरस्य कन्दराद्गिरेः ईषदुन्मि[12]षन्पयोनिधेरिवायत[13]स्तिमिः ।
[14]काषपेषितान्तिकस्थलस्थगुल्मपादपोरोषशू[15]त्कृतोष्मणा दहत्युपान्तकाननम् ॥१५०॥

छन्दः (?)

रत्नालोकैः[16] कृतपर[17]भागे तटभागे सन्ध्यारागे प्रसरति सान्द्रारुणरागे ।
रौप्योद्दीप्रां[18] [19]प्रकृतिविरुद्धामपि धत्ते प्रेक्ष्यां[20] लक्ष्मीं कनकमयाद्रेरयमद्रिः ॥१५१॥

पूंछ फैलाकर नृत्य कर रहे हैं ॥१४६॥ जिनमें देव नागेन्द्र और धरणेन्द्र सदा क्रीडा किया करते हैं, जिनमें नाना प्रकारके लतागृह तालाब और बालूके टीले (क्रीड़ाचल) बने हुए हैं और जिनके वृक्ष कोमल पत्ते तथा फूलोंसे निरन्तर उज्ज्वल रहते हैं ऐसे ये उपवन इस पर्वतके प्रत्येक शिखर पर सुशोभित हो रहे हैं ॥१४७॥ इधर, यह सूर्य चलता-चलता इस महापर्वतके किनारे आ गया है और वहां अनेक प्रकारके मणियोंके किरणसमहसे चित्रविचित्र होनेके कारण आकाशमें किसी अनेक रङ्गवाले पक्षीकी शोभा धारण कर रहा है ॥१४८॥ जिनके मध्यभाग रत्नोंकी कान्तिसे व्याप्त हो रहे हैं, जिनमें नागकुमार और व्यन्तर जातिके देव प्रसन्न होकर क्रीड़ा करते हैं, जिन्होंने सूर्यमण्डलको भी रोक लिया है, जिन्होंने सब दिशाएं आच्छादित कर ली हैं, जो वायुकी गतिको भी रोकनेवाले हैं, देवांगनाओं के मनको हरण करते हैं और आकाश को उल्लंघन करनेवाले हैं ऐसे बड़े बड़े सघन शिखरोंसे यह पर्वत कैसा सुशोभित हो रहा है ॥ ॥१४९॥ इधर देखो, जिस प्रकार कोई महामत्स्य समुद्रमेंसे धीरे-धीरे निकलता है उसी प्रकार इस पर्वतकी गुफामेंसे यह भयंकर अजगर धीरे-धीरे निकल रहा है। इसने अपने शरीरसे समीपवर्ती लता, छोटे-छोटे पौधे और वृक्षोंको पीस डाला है तथा यह क्रोधपूर्वक की गई फूत्कार की गर्मीसे समीपवर्ती वनको जला रहा है ॥१५०॥ इधर इस पर्वतके किनारेपर अनेक प्रकार के रत्नोंके प्रकाशसे मिली हुई संध्याकालकी गहरी ललाई फैल रही है जिससे यह रूपामय होनेपर भी अपनी प्रकृतिसे विरुद्ध सुवर्णमय मेरु पर्वतकी दर्शनीय शोभा धारण कर रहा है

---

१ आ समन्तात् क्रीडनं येषां तानि। २ पुलिनानि। ३ गच्छन्। ४ व्याप्ते सति। ५ आकाशे। ६ सूर्यः, पक्षी। ७ सूर्यः, चित्रपक्षी (मकर इति यावत्)। ८ विस्तृतान्तरालैः। ९ आच्छादित। १० मेघ। ११ भयङ्करः। १२ उद्गच्छन्। १३ दीर्घमत्स्यः। १४ कषणचूर्णित। काय म०, ल०, द०, अ०, प०। १५ रोषफूत्कृतोष्मणा ल०, म०। रोषमुक्तशूत्कृतो– प०, अ०,। १६ उद्योतैः। १७ विहितशोभे.। १८ –दीप्तां म०, ल०। १९ स्वरूप। २० दर्शनीयाम्।

प्रहर्षिणी

उद्धूतः[1] पर[2]षरयेण वायुनोच्चैः [3]आबभ्रुर्नभसि परिस्फुरन्ननल्पः ।
अस्याद्रेरुपतटमासनः[4] परागः सन्धत्ते कनककृतातपत्रलीलाम् ॥१५२॥

वसन्ततिलकम्

एताः क्षरन्मदजला[5]विलगण्डभित्तिकण्डूयनव्यति[6]कराद्रितगण्डशैलाः ।
[7]भग्नद्रुमास्तटभुवो धरणी[8]भृतोऽस्य संसूचयन्ति पदवीर्वनवारणानाम् ॥१५३॥

भुजङ्गप्रयातम्

इहामी मृगौघा वनान्तस्थलान्ते स्फुर[9]द्घोणमाघ्राय [10]तृण्यामगण्याम् ।
यदेवात्र तृण्यं[11] तृणं यच्च रुच्यं तदेवात्र कुञ्जे जिघ[12]त्सन्त्यमुष्मिन् ॥१५४॥

उपजातिः

यद्यत्तटं यद्विधरत्नजात्या सम्प्राप्तनिर्माणमिहाचलेन्द्रे ।
तत्तत्समासाद्य मृगास्तदाभां भजन्ति जात्यन्तरतामिवेताः[13] ॥१५५॥

उपेन्द्रवज्रा

हरि[14]न्मणीनां विततान्मयूखान् तृणा[15]स्थयास्वाद्य मृगीगणोऽयम् ।
अलब्धकामस्तदुपा[16]न्तभाञ्जि तृणानि [17]सत्यान्यपि नोपयुङ्क्ते ॥१५६॥

॥१५१॥ इधर देखो, इस पर्वतके किनारेके समीप लगे हुए असन जातिके वृक्षोंका बहुत सा पीले रंगका पराग तीव्र वेगवाले वायुके द्वारा ऊंचा उड़-उड़कर आकाश में छाया हुआ है और सुवर्णके बने हुए छत्रकी शोभा धारण कर रहा है ॥१५२॥ इधर, झरते हुए मदजलसे भरे हुए हाथियोंके गण्ड-स्थल खुजलानेसे जिनकी छोटी-छोटी चट्टानें अस्त-व्यस्त हो गई हैं और वृक्ष टूट गये हैं ऐसी इस पर्वतके किनारेकी भूमियां मदोन्मत्त हाथियोंका मार्ग सूचित कर रही हैं । भावार्थ—चट्टानों और वृक्षोंको टूटा-फूटा हुआ देखनेसे मालूम होता है कि यहांसे अच्छे-अच्छे मदोन्मत्त हाथी अवश्य ही आते जाते होंगे ॥१५३॥ इधर देखो, इस पर्वतके लतागृहों में और वनके भीतरी प्रदेशोंमें ये हरिणोंके समूह नाक फुला-फुलाकर बहुतसे घासके समूह को सूंघते हैं और उसमें जो घास अच्छी जान पड़ती है उसे ही खाना चाहते हैं ॥१५४॥ इधर देखो, इस पर्वतका जो जो किनारा जिस जिस प्रकारके रत्नोंका बना हुआ है ये हरिण आदि पशु उन-उन किनारेपर जाकर उसी उसी प्रकार की कान्तिको प्राप्त हो जाते हैं और ऐसे मालूम होने लगते हैं मानो इन्होंने किसी दूसरी ही जातिका रूप धारण कर लिया हो ॥१५५॥ इधर, यह हरिणियोंका समूह हरे रंगके मणियोंकी फैली हुई किरणोंको घास समझकर खा रहा है परन्तु उससे उसका मनोरथ पूर्ण नहीं होता इसलिये धोखा खाकर पास हीमें लगी हुई सच-

१ कम्पितः । २ निष्ठुरवेगेण । ३ आपिङ्गलः । 'बभ्रुः स्यात् पिङ्गलेऽपि च' इत्यभिधानात् । ४ असनस्य सम्बन्धी । ५ आर्द्रित । ६ कपोलस्थलनिघर्षणव्याज । ७ रुग्ण इति क्वचित् । ८ गिरेः । ९ स्फुरन्नासिकं यथा भवति तथा । १० तृणसंहतिम् । ११ भक्षणीयम् । १२ अत्तुमिच्छन्ति । १३ प्राप्ताः । –मिवैते प०, म०, ल० । १४ मरकतरत्नाम् । १५ तृणबुध्या । १६ तन्मरकतशिलासमीपं भजन्तीति तदुपान्तभाञ्जि । १७ सत्यस्वरूपाणि ।

शालिनी

गायन्तीनां किन्नरीणां वनान्ते शृण्वद्गीतं हारिणं[1] हारि[2]यूथम् ।
अर्द्धग्रस्तोत्सृष्टनिर्यत्तृणाग्र[3]ग्रासं किञ्चिन्मीलिताक्षं तदास्ते ॥१५७॥
[4]यात्यन्तर्द्धिं[5] ब्रध्न[6]बिम्बे महीध्रस्यास्योत्सङ्गे किं गतोऽस्तं पतङ्गः[7] ।
इत्याशङ्काव्याकुलाभ्येति भीतिं [8]प्राक्सायाह्नात् कोककान्तो[9]पकान्तम् ॥१५८॥

उपेन्द्रवज्रा

सदा प्रफुल्ला वितता नलिन्यः सदात्र तन्वन्ति रवानलिन्यः ।
क्षरन्मदाः सन्ततमेव नागाः[10] सदा च रम्याः फलिनो वनागाः[11] ॥१५९॥

वसन्ततिलकम्

अस्यानुसानु[12] वनराजिरियं विनीला धत्ते श्रियं नगपतेः शरदभ्रभासः[13] ।
[14]शाटी विनीलरुचिर[15]प्रति[16]पाण्डुकान्तेः नीलाम्बरस्य[17] रचितेव नितम्बदेशे ॥१६०॥

छन्दः (?)

बिभ्रच्छ्रेणीद्वितयविभागे वनषण्डं भाति श्रीमानयमवनीध्रो विधुविध्रः[18] ।
वेगाविद्धं[19] रुचिरसिताभ्रोज्ज्वलमूर्तिः पर्यन्तस्थं घनमिवनीलं सुरदन्ती ॥१६१॥

मालिनी

सुरभिकुसुमरेणूनाकिरन्विश्वदिक्कं परिमलमिलितालिव्यक्तझङ्काररम्यः ।
प्रतिवनमिह शैले वाति मन्दं नभस्वान् [20]प्रतिविहितनभोगस्त्रै[21]णसम्भोगखेदः ॥१६२॥

मुचकी घासको भी नहीं खा रहा है ॥१५६॥ इधर वनके मध्यमें गाती हुई किन्नर जातिकी देवियोंका सुन्दर संगीत सुनकर यह हरिणोंका समूह आधा चबाये हुए तृणोंका ग्रास मुंहसे बाहर निकालता हुआ और नेत्रोंको कुछ कुछ बन्द करता हुआ चुपचाप खड़ा है ॥१५७॥ इधर यह सूर्यका बिम्ब इस पर्वतके मध्य शिखरकी ओटमें छिप गया है इसलिये सूर्य क्या अस्त हो गया, ऐसी आशंकासे व्याकुल हुई चकवी सायंकालके पहले ही अपने पतिके पास खड़ी-खड़ी भयको प्राप्त हो रही है ॥१५८॥ इस पर्वतपर कमलिनियां खूब विस्तृत हैं और वे सदा ही फूली रहती हैं, इस पर्वतपर भ्रमरियां भी सदा गुंजार करती रहती हैं, हाथी सदा मद झराते रहते हैं और यहांके वनोंके वृक्ष भी सदा फूले-फले हुए मनोहर रहते हैं ॥१५९॥ यह पर्वत शरद् ऋतुके बादलके समान अतिशय स्वच्छ है इसके शिखरपर लगी हुई यह हरी-भरी वन की पंक्ति ऐसी शोभा धारण कर रही है मानो बलभद्रके अतिशय सफेद कान्तिको धारण करने-वाले नितम्ब भागपर नीले रंगकी धोती ही पहिनाई हो ॥१६०॥ यह सुन्दर पर्वत चन्द्रमा के समान स्वच्छ है और दोनों ही श्रेणियोंके बीचमें हरे-हरे वनोंके समूह धारण कर रहा है जिससे ऐसा जान पड़ता है मानो मनोहर और सफेद मेघके समान उज्ज्वल मूर्तिसे सहित तथा वायुके वेगसे आकर दोनों ओर समीपमें ठहरे हुए काले-काले मेघोंको धारण करनेवाला ऐरावत हाथी ही हो ॥१६१॥ जो सुगन्धित फूलोंकी परागको सब दिशाओंमें फैला रहा है, जो सुगन्धि के कारण इकट्ठे हुए भ्रमरोंकी स्पष्ट झंकारसे मनोहर जान पड़ता है और जो विद्याधरियों के संभोगजनित खेदको दूर कर देता है ऐसा वायु इस पर्वतके प्रत्येक वनमें धीरे-धीरे बहता

---

१ हरिणामिदम् । २ मनोज्ञम् । ३ प्रथमकवलम् । ४ याति सति । ५ पिधानम् । ६ रवि । ७ तरणिः । ८ अपराह्णात् प्रागेव । ९ प्रियतमसमीपे । १० करिणः । ११ वनवृक्षाः । १२ सानौ । १३ मेघरुचः । १४ वस्त्र । १५ रुचिरा –अ० । १६ असमानधवलशरीरदीधितेः । १७ बल-भद्रस्य । १८ चन्द्रवद्धवलः । 'वीध्रं तु विमलार्थकम्' इत्यभिधानात् । १९ वेगेन सम्बद्धम् । २० चिकित्सित वा निराकृत । २१ स्त्रीसमूह ।

सुरयुवतिसमाजस्यास्य[1] च स्त्रीजनस्य प्रकृति[2]कृतमियत् स्यादन्तरं[3] व्यक्तरूपम् ।
[4]स्तिमितनयनमैन्द्रं[5] स्त्रैणमेतत्तु[6] लीलावलितललितलोलापाङ्गवीक्षाविलासम् ।।१६३।।

वसन्ततिलकम्

अत्रायमुन्मदमधुव्रतसेव्यमान-गण्डस्थलो गजपतिर्वनमाजिहानः[7] ।
दृष्ट्वा हिरण्मयतटीर्गिरिभर्तुरस्य-दावानलप्रतिभयाद्[8] वनमुज्जहाति[9] ।।१६४।।

जलधरमाला

अत्रानीलं मणितटमुच्चैः पश्यन् मेघाशङ्की नटति कलापी[10] हृष्टः ।
[11]केकाः कुर्वन्विरचितबर्हाटोपो लोकस्तत्त्वं[12] गणयति नार्थी मूढः ।।१६५।।

पुष्पिताग्रा

सरसि कलममी रुवन्ति हंसास्तरुषु च कोकिलषट्पदाः स्वनन्ति ।
फलनमितशिखाश्च पादपौघाः चल[13]विटपैर्ध्रुवमाह्वयन्त्यनङ्गम् ।।१६६।।

स्वागता

मन्थरं[14] व्रजति काननमध्याद् एष वाजिवदनः[15] सहकान्तः[16] ।
सम्पृशन् स्तनतटं दयितायाः तत्सु[17]खानुभवमीलितनेत्रः ।।१६७।।
एष सिंहचमरीमृगकोटीः सानुभिर्वहति निर्मलमूर्तिः ।
सन्ततीरिव यशोविसरस्य स्वस्य [18]लोध्रधवला रजताद्रिः ।।१६८।।

रहता है ।।१६२।। देवांगनाओं तथा इस पर्वतपर रहनेवाली स्त्रियोंके बीच प्रकृतिके द्वारा किया हुआ स्पष्ट दीखनेवाला केवल इतना ही अन्तर है कि देवांगनाओंके नेत्र टिमकारसे रहित होते हैं और यहांकी स्त्रियोंके नेत्र लीलासे कुछ-कुछ टेढ़े सुन्दर और चंचल कटाक्षोंके विलास से सहित होते हैं ।।१६३।। इधर देखो, जिसके गण्डस्थलपर अनेक उन्मत्त भ्रमर मंडरा रहे हैं ऐसा यह वनमें प्रवेश करता हुआ हाथी इस गिरिराजके सुवर्णमय तटोंको देखकर दावानल के डरसे वनको छोड़ रहा है ।।१६४।। इधर, नील मणिके बने हुए ऊंचे किनारेको देखता हुआ यह मयूर मेघकी आशंकासे हर्षित हो मधुर शब्द करता हुआ पूंछ उठाकर नृत्य कर रहा है सो ठीक ही है क्योंकि मूर्ख स्वार्थी जन-सचाई का विचार नहीं करते हैं ।।१६५।। इधर तालाबों में ये हंस मधुर शब्द कर रहे हैं और वृक्षोंपर कोयल तथा भ्रमर शब्द कर रहे हैं इधर फलोंके बोझसे जिनकी शाखाएं नीचेकी ओर झुक गई हैं ऐसे ये वृक्ष अपनी हिलती हुई शाखाओंसे ऐसे मालूम होते हैं मानो कामदेवको ही बुला रहे हों ।।१६६।। इधर अपनी स्त्रीके स्तन-तटका स्पर्श करता हुआ और उस सुखके अनुभवसे कुछ-कुछ नेत्रोंको बन्द करता हुआ यह किन्नर अपनी स्त्रीके साथ-साथ वनके मध्यभागसे धीरे-धीरे जा रहा है ।।१६७।। यह विजयार्ध पर्वत अपनी शिखरोंपर निर्मल शरीरवाले करोड़ों सिंह, करोड़ों चमरी गाएं और करोड़ों मृगोंको धारण कर रहा है और उन सबसे ऐसा मालूम होता है मानो लोध्रवृक्षके समान सफेद अपने यशसमूह

१ विजयार्धसम्बन्धिनः । २ स्वभावविहितम् । ३ भेदः । ४ स्थिरदृष्टि । ५ इन्द्रसम्बन्धि-स्त्रीसमूहः । ६ एतत्स्त्रैणम् विद्याधरसम्बन्धी स्त्रीसमूहः । ७ आगच्छन् । 'ओहाङ् गतौ' इति धातुः । ८ भीतेः । ९ त्यजति । १० मयूरः । ११ ध्वनीः । केकां अ० । १२ स्वरूपम् । १३ चलविटपा इत्यपि क्वचित् । चलशाखाः । १४ मन्दम् । १५ किन्नरः । 'स्यात् किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः' इत्यभिधानात् । १६ स्त्रीसहितः । १७ स्तनस्पर्शनसुख । १८ (पुष्पविशेष) परागः ।

यास्य सानुषु धतिर्विबुधानां राजतेषु[1] वनितानुगतानाम् ।
सा न नाकवसतौ[2] न हिमाद्रौ नापि मन्दरगिरेस्तटभागे ॥१६९॥

वसन्ततिलकम्

गण्डोपलं[3] वनकरीन्द्रकपोलकाष[4]सङ्क्रान्तदानसलि[5]लप्लुतमत्र शैले ।
पश्यन्नयं द्विपविशङ्किमना मृगेन्द्रोभूयोऽभिहन्ति[6] नखर्विलिखत्युपान्तम् ॥१७०॥
सिंहोऽयमत्र गहने [7]शनकैर्विबुद्धो व्याजृम्भते शिखरमुत्पतितुं कृतेच्छः ।
तन्वन् गिरेरधिगुहा[8]मुखमट्टहासलक्ष्मीं शरच्छशिधरामलदेहकान्तिः ॥१७१॥

मन्दाक्रान्ता

रन्धादद्रेरयमजगरः [9]सामिकर्षन् स्वमङ्गं
पुञ्जीभूतो गुरुरिव गिरेरान्त्रभारो[10] निकुञ्जे ।
रुद्धश्वासं वदनकुहरं [11]व्याददात्यापत[12]द्भिः
वन्यैः सत्त्वैः किल बिलधिया क्षुत्प्रतीकारमिच्छुः ॥१७२॥

पृथ्वी

अयं जलनिधेर्जलं स्पृशति सानुभिर्वारिधिः
तटानि शिशिरीकरोति गिरिभर्तुरस्यान्वहम् ।
मरुद्विधुतवीचिशीकरशतैरजस्रोत्थितैः
महानुपगतं[13] जनं शिशिरयत्य[14]नुष्णाशयः ॥१७३॥

की सन्ततिको ही धारण कर रहा हो ॥१६८॥अपनी-अपनी देवांगनाओंके साथ विहार करते हुए देवोंको इस पर्वतकी रजतमयी शिखरोंपर जो संतोष होता है वह उन्हें न तो स्वर्गमें मिलता है न हिमवान् पर्वतपर मिलता है और न सुमेरु पर्वतके किसी तटपर ही मिलता है ॥१६९॥

इधर देखो, जो जंगली हाथियोंके गण्डस्थलोंकी रगड़से लगे हुए मद-जलसे तर-बतर हो रहा है, ऐसे इस पहाड़परकी गोल चट्टानको यह सिंह हाथी समझ रहा है इसीलिये यह उसे देखकर बार-बार उसपर प्रहार करता है और नाखूनोंसे समीपकी भूमिको खोदता है ॥१७०॥ इधर इस वनमें शरद्ऋतुके चन्द्रमाके समान निर्मल शरीरकी कान्तिको धारण करता हुआ तथा इस पर्वतके गुफा-रूपी मुखपर अट्टहास की शोभा बढ़ाता हुआ यह सिंह धीरे-धीरे जागकर जमुहाई ले रहा है और पर्वतकी शिखरपर छलांग मारनेकी इच्छा कर रहा है ॥१७१॥ इधर यह लतागृहमें अजगर पड़ा हुआ है, यह पर्वतके बिलमेंसे अपना आधा शरीर बाहर निकाल रहा है और ऐसा जान पड़ता है मानो एक जगह इकट्ठा हुआ पहाड़की अँतड़ियोंका बड़ा भारी समूह ही हो । इसने श्वास रोककर अपना मुंहरूपी बिल खोल रखा है और उसे बिल समझ कर उसमें पड़ते हुए जंगली जीवोंके द्वारा यह अपनी क्षुधाका प्रतिकार करना चाहता है ॥१७२॥ यह पर्वत अपनी लम्बी फैली हुई शिखरोंसे समुद्रके जलका स्पर्श करता है और यह समुद्र वायुसे कम्पित होकर निरन्तर उठती हुई लहरोंकी अनेक छोटी-छोटी बूंदोंसे प्रतिदिन इस गिरिराजके तटोंको शीतल करता रहता है सो ठीक ही है क्योंकि जिनका अन्तःकरण शीतल अर्थात् शान्त होता है ऐसे महापुरुष समीपमें आये हुए पुरुषको शीतल अर्थात् शान्त करते ही हैं ॥१७३॥

---

१ रजतमयेषु । २ स्वर्गालये । ३ स्थूलपाषाणम् । ४ कर्षणघर्षण । ५ आर्द्रित । ६ अभिताडयति । ७ शनैः । ८ गुहामुखे । ९ अर्द्धं निर्गमयन् । १० पुरीतत्समूहः । ११ विवृणोति । १२ आगच्छद्भिः । १३ आश्रितम् । १४ शैत्ययुक्तहृदयः ।

छन्दः (?)

गङ्गासिंधू हृदयमिवास्य स्फुटमद्रेः भित्त्वा यातां[1] रसिकतयाम्[2] तटभागम् ।
स्पृष्ट्वा स्पृष्ट्वा पवनविधूतोर्मिकरैः स्वैः भेद्यं स्त्रीणां ननु महतामप्युरु चेतः ॥१७४॥
सानूनस्य द्रुतमुपयान्ती घनसारात्[3] सारासारा[4] जलदघटेयं समसारान्[5] ।
तारातारा[6] धरणिधरस्य स्वरसारा साराद्व्यक्ति मुहुरुपयाति स्तनितेन ॥१७५॥

मत्तमयूरम्

सारासारा[7] सारसमाला सरसीयं सारं कूजत्यत्र वनान्ते सुरकान्ते[8] ।
सारासारा[9] नीरदमाला नभसीयं तारं[10] मन्द्रं[11] निस्वनतीतः स्वनसारा[12] ॥१७६॥
श्रित्वास्याद्रेः सारमणीद्धं[13] तटभागं सारं[14] तारं[15] चारुतरागं[16] रमणीयम् ।
सम्भोगान्ते गायति कान्तं[17] रमयन्ती सा रंतारं[18] चारुतरागं[19] [20]रमणीयम् ॥१७७॥

पुष्पिताग्रा

इह खचरवधूनितम्बदेशे ललितलतालयसंश्रिताः सहेशाः[21] ।
प्रणयपरवशाः समिद्धदीप्तीः ह्रियमुपयान्ति विलोक्य सिद्धनार्यः[22] ॥१७८॥

सुशोभित तालाबको देखकर प्रसन्न होता है उसी प्रकार भगवान्के उत्कृष्ट रूपको देखकर मैं अतिशय प्रसन्न हुआ था और इसी कारण मुझे जातिस्मरण हो गया था जिससे मैंने भगवान् का अभिप्राय जान लिया था ॥१३०-१३१॥ पूर्वभवमें जब भगवान् वज्रजंघकी पर्यायमें थे तब विदेह-क्षेत्रकी पुण्डरीकिणी नगरीमें मैं इनकी श्रीमती नामकी प्रिय स्त्री हुआ था ॥१३२॥ उस समय वज्रजंघकी पर्यायको धारण करनेवाले इन भगवान्के साथ-साथ मैंने दो चारणमुनियों के लिये दान दिया था ॥१३३॥ अतिशय विशुद्ध, दोषरहित और प्रसिद्धिका कारण ऐसा महादान देना और काव्य करना ये दोनों ही वस्तुएं बड़े पुण्यसे प्राप्त होती हैं ॥१३४॥ हे भरत क्षेत्रके स्वामी भरत महाराज, दानकी विशुद्धिका कुछ थोड़ा-सा वर्णन आप भी सुनिये— स्व और परके उपकारके लिये मन-वचन-कायकी विशुद्धता पूर्वक जो अपना धन दिया जाता है उसे दान कहते हैं ॥१३५॥ दान देनेवाले (दाता) की विशुद्धता दानमें दी जानेवाली वस्तु तथा दान लेनेवाले पात्रको पवित्र करती है । दी जानेवाली वस्तुकी पवित्रता देनेवाले और लेनेवालेको पवित्र करती है और इसी प्रकार लेनेवालेकी विशुद्धि देनेवाले पुरुषको तथा दी जानेवाली वस्तुको पवित्र करती है इसलिये जो दान नौ प्रकारकी विशुद्धतापूर्वक दिया जाता है वही अनेक फल देनेवाला होता है । भावार्थ—दान देनेमें दाता, देय और पात्रकी शुद्धिका होना आवश्यक है ॥१३६-१३७॥ पुण्य प्राप्तिके कारण स्वरूप श्रद्धा आदि गुणों से सहित पुरुष दाता कहलाता है और आहार औषधि शास्त्र तथा अभय ये चार प्रकारकी वस्तुएं देय कहलाती हैं ॥१३८॥ जो रागादि दोषोंसे छुआ भी नहीं गया हो और जो अनेक गुणों से सहित हो ऐसा पुरुष पात्र कहलाता है, वह पात्र जघन्य मध्यम और उत्तमके भेदसे तीन प्रकार का होता है । हे राजन्, यह सब मैंने पूर्वभवके स्मरणसे जाना है ॥१३९॥ जो पुरुष मिथ्या-दृष्टि है परन्तु मन्दकषाय होनेसे व्रत शील आदिका पालन करता है वह जघन्य पात्र कहलाता है और जो व्रत शील आदिकी भावनासे रहित सम्यग्दृष्टि है वह मध्यम पात्र कहा जाता है ॥१४०॥ जो व्रत शील आदिसे सहित सम्यग्दृष्टि है वह उत्तम पात्र कहलाता है और जो व्रत शील आदि

१ भगवतः सम्बन्धि । २ अनन्तरम् । ३ जातिस्मरणेन । ४ जानामि स्म । ५ काचिद् दानस्य संशुद्धिः अ० । काचिद् दानस्य संशुद्धिम् ल० । ६ स्वपरोपकाराय । ७ धनस्य । ८ त्यागः । ९ मनोवाक्कायशुद्धिमत् । १० नवसंख्या । ११ भेदैरिदमुपेयिवान् ल०, अ०, म० । १२ प्राप्तम् । १३ अपात्रमित्यर्थः ।

कुमानु[1]षत्वमाप्नोति जन्तुर्ददपात्रके । अशोधितमिवालाबु तद्धि दानं [2]प्रदूषयेत् ॥१४२॥
आमपात्रे यथाक्षिप्तं [3]मङ्क्षु क्षीरादि नश्यति । अपात्रेपि तथा दत्तं तद्धि [4]स्वं तच्च[5] नाशयेत् ॥१४३॥
पात्रं तत्पात्र[6]वज्ज्ञेयं विशुद्धगुणधारणात् । यानपात्रमिवाभीष्टदेशे[7] सम्प्रापकञ्च यत् ॥१४४॥
न हि लोहमयं यानपात्रमुत्तारयेत् परम् । तथा कर्मभराक्रान्तो दोषवान्नैव तारकः ॥१४५॥
ततः परमनिर्वाणसाधनं रूपमुद्वहन् । कायस्थित्यर्थमाहारमिच्छन् ज्ञानादिसिद्धये ॥१४६॥
न वाञ्छन् बलमायुर्वा स्वादं[8] वा देहपोषणम् । केवलं प्राणधृत्यर्थं सन्तुष्टो ग्रासमात्रया ॥१४७॥
पात्रं भवेद् गुणैरेभिः मुनिः स्वपरतारकः । तस्मै दत्तं पुना[9]त्यन्नम् अपुनर्जन्मकारणम् ॥१४८॥
[10]तदुदाहरणं पुष्ट[11]मिदमेव महोदयम् । महत्त्वे दानपुण्यस्य पञ्चा[12]श्चर्यमिहापि यत् ॥१४९॥
[13]ततो भरत[14]राजर्षे दानं देयमनुत्तरम् । प्रसरि[15]ष्यन्ति पात्राणि भगवत्तीर्थसन्निधौ ॥१५०॥
तेभ्यः श्रेयान् [16]यथाचख्यौ स्व[17]भर्तृभवविस्तरम् । ततः सदस्या[18]स्ते सर्वे सद्दानरुचयोऽभवन् ॥१५१॥

से रहित मिथ्यादृष्टि है वह पात्र नहीं माना गया है अर्थात् अपात्र है ॥१४१॥ जो मनुष्य अपात्र के लिये दान देता है वह कुमनुष्य योनि (कुभोगभूमि) में उत्पन्न होता है क्योंकि जिस प्रकार बिना शुद्धि की हुई तूंबी अपनेमें रक्खे हुए दूध आदिको दूषित कर देती है उसी प्रकार अपात्र अपने लिये दिये हुए दानको दूषित कर देता है ॥१४२॥ जिस प्रकार कच्चे बर्तनमें रक्खा हुआ ईखका रस अथवा दूध स्वयं नष्ट हो जाता है और उस बर्तनको भी नष्ट कर देता है उसी प्रकार अपात्रके लिये दिया हुआ दान स्वयं नष्ट हो जाता है—व्यर्थ जाता है और लेनेवाले पात्रको भी नष्ट कर देता है—अहंकारादिसे युक्त बनाकर विषय वासनाओंमें फंसा देता है ॥१४३॥ जो अनेक विशुद्ध गुणोंको धारण करनेसे पात्रके समान हो वही पात्र कहलाता है, इसी प्रकार जो जहाजके समान इष्ट स्थानमें पहुंचानेवाला हो वही पात्र कहलाता है ॥१४४॥ जिस प्रकार लोहेकी बनी हुई नाव समुद्रसे दूसरेको पार नहीं कर सकती (और न स्वयं ही पार हो सकती है) इसी प्रकार कर्मोंके भारसे दबा हुआ दोषवान् पात्र किसीको संसार-समुद्रसे पार नहीं कर सकता (और न स्वयं ही पार हो सकता है) ॥१४५॥ इसलिये, जो मोक्षके साधन स्वरूप दिगम्बर वेषको धारण करते हैं, जो शरीरकी स्थिति और ज्ञानादि गुणोंकी सिद्धिके लिये आहारकी इच्छा करते हैं, जो बल, आयु, स्वाद अथवा शरीरको पुष्ट करनेकी इच्छा नहीं करते जो केवल प्राणधारण करनेके लिये थोड़ेसे ग्रासोंसे ही संतुष्ट हो जाते हैं, और जो निज तथा परको तारनेवाले हैं ऐसे ऊपर लिखे हुए गुणोंसे सहित मुनिराज ही पात्र हो सकते हैं उनके लिये दिया हुआ आहार अपुनर्भव अर्थात् मोक्षका कारण है ॥१४६–१४८॥ दानरूपी पुण्य के माहात्म्यको प्रकट करनेके लिये सबसे बड़ा और पुष्ट उदाहरण यही है कि मैंने दानके माहात्म्यसे ही पंचाश्चर्य प्राप्त किये हैं ॥१४९॥ इसलिये हे राजर्षि भरत, हम सबको उत्तम दान देना चाहिये। अब भगवान् वृषभदेवके तीर्थके समय सब जगह पात्र फैल जावेंगे। भावार्थ—भगवान्के सदुपदेशसे अनेक मनुष्य मुनिव्रत धारण करेंगे उन सभीके लिये हमें आहार आदि दान देना चाहिये ॥१५०॥ राजकुमार श्रेयान्सने उन सब सदस्योंके लिये अपने स्वामी भगवान् वृषभदेवके पूर्वभव विस्तारके साथ कहे जिससे उन सबके उत्तम दान देनेमें रुचि उत्पन्न

१ कुभोगभूमिमनुष्यत्वम् । २ दुष्टो भवति । ३ सपदि । ४ दत्तद्रव्यम् । ५ पात्रमपि । ६ भाजनवत् । ७ –देशस– ब०, प० । ८ रुचिम् । ९ पवित्रयति । १० ननूदाहरणं अ०, प०, द०, ल० । ११ परिपूर्णम् । १२ पञ्चाश्चर्यं मयापि यत् अ०, प०, ल०, द० । १३ ततः कारणात् । १४ भो भरतराज । १५ प्रसृतानि भविष्यन्ति । १६ –यानथाचख्यौ ल० । १७ स्वश्च भर्ता च स्वभर्तारौ तयोर्भवविस्तरस्तम् । १८ सभ्याः ।

इति प्रह्लादिनीं वाचं तस्य पुण्यानुबन्धिनीम् । शुश्रुवान् भरताधीशः परां प्रीतिमवाप सः ॥१५२॥
प्रीतः सम्पूज्य तं भूयः[1] परं सौहार्द[2]मुद्वहन् । गुरोर्गुणाननुध्यायन् प्रत्यगात् स स्वमालयम् ॥१५३॥
भगवानथ सञ्जात[3]बलवीर्यो महाधृतिः । भेजे परं तपोयोगं योगविज्जैन[4]कल्पितम् ॥१५४॥
मोहान्धतमसध्वंसकल्पा[5] सन्मार्गदर्शिनी । दिदीपेऽस्य मनोगारे समिद्धा बोधदीपिका ॥१५५॥
गुणान् गुणास्थया[6] पश्येद्दोषान् दोषधियापि यः । हेयोपादेयवित् स स्यात् क्वाज्ञस्य गतिरीदृशी ॥१५६॥
ततस्तत्त्वपरिज्ञानात् गुणागुणविभागवित् । गुणेष्वासज[7]ति स्मासौ हित्वा दोषानशेषतः ॥१५७॥
सावद्यविर[8]तिं कृत्स्नाम् ऊरी[9]कृत्य प्रबुद्धधीः । [10]तद्भेदान् पालयामास व्रतसंज्ञाविशेषितान् ॥१५८॥
दयाङ्गनापरिष्वङ्गः[11] सत्ये नित्यानुरक्तता । अस्तेयव्रततात्पर्यं ब्रह्मचर्यैकतानता[12] ॥१५९॥
परिग्रहेष्वना[13]सङ्गो विकाला[14]शनवर्जनम् । व्रतान्यमूनि तत्सिद्ध्यै[15] भावयामास भावनाः ॥१६०॥
मनोगुप्तिर्वचोगुप्तिरीर्या[16]कायनियन्त्रणे । [17]विष्वाणसमितिश्चेति प्रथमव्रतभावनाः ॥१६१॥

हुई थी ॥१५१॥ इस प्रकार आनन्द उत्पन्न करनेवाले और पुण्य बढ़ानेवाले श्रेयान्सके वचन सुनकर भरत महाराज परमप्रीतिको प्राप्त हुए ॥१५२॥ अतिशय प्रसन्न हुए महाराज भरतने राजा सोमप्रभ और श्रेयांसकुमारका खूब सन्मान किया, उनपर बड़ा स्नेह प्रकट किया और फिर गुरुदेव—वृषभनाथके गुणोंका चिन्तवन करते हुए अपने घरके लिये वापिस गये ॥१५३॥

अथानन्तर आहार ग्रहण करनेसे जिनके बल और वीर्यकी उत्पत्ति हुई है जो महाधीर वीर और योगविद्याके जाननेवाले हैं ऐसे भगवान् वृषभदेव जिनेन्द्रदेवके द्वारा कहे हुए उत्कृष्ट तपोयोगको धारण करने लगे ॥१५४॥ इनके मनरूपी मन्दिरमें मोहरूपी सघन अन्धकार को नष्ट करनेवाला, समीचीन मार्ग दिखलानेवाला और अतिशय देदीप्यमान ज्ञान-रूपी दीपक प्रकाशमान हो रहा था ॥१५५॥ जो पुरुष गुणोंको गुण-बुद्धिसे और दोषोंको दोष-बुद्धिसे देखता है अर्थात् गुणोंको गुण और दोषोंको दोष समझता है वही हेय (छोड़ने योग्य) और उपादेय (ग्रहण करने योग्य) वस्तुओंका जानकार हो सकता है । अज्ञानी पुरुषकी ऐसी अवस्था कहां हो सकती है ? ॥१५६॥ वे भगवान् तत्त्वोंका ठीक ठीक परिज्ञान होनेसे गुण और दोषोंके विभागको अच्छी तरह जानते थे इसलिये वे दोषोंको पूर्ण रूपसे छोड़कर केवल गुणोंमें ही आसक्त रहते थे ॥१५७॥

अतिशय बुद्धिमान भगवान् वृषभदेवने पापरूपी योगोंसे पूर्ण विरक्ति धारण की थी तथा उसके भेद जो कि व्रत कहलाते हैं उनका भी वे पालन करते थे ॥१५८॥ दयारूपी स्त्रीका आलिंगन करना, सत्यव्रतमें सदा अनुरक्त रहना, अचौर्यव्रतमें तत्पर रहना, ब्रह्मचर्य को ही अपना सर्वस्व समझना, परिग्रहमें आसक्त नहीं होना और असमयमें भोजनका परित्याग करना; भगवान् इन व्रतोंको धारण करते थे और उनकी सिद्धिके लिये निरन्तर नीचे लिखी हुई भावनाओंका चिन्तवन करते थे ॥१५९–१६०॥ मनोगुप्ति, वचनगुप्ति, ईर्यासमिति, कायनियन्त्रण अर्थात् देखभाल कर किसी वस्तुका रखना उठाना और विष्वाणसमिति अर्थात् आलोकित पान भोजन ये पांच प्रथम-अहिंसा व्रतकी भावनाएं हैं ॥१६१॥

१ भूपः ल० । २ सुहृदयत्वम् । ३ आहारजनिता शक्तिः । ४ जिनानां सम्बन्धि कल्पः जिनकल्पस्तत्र भवम् । ५ सन्नद्धा । 'कल्पा सज्जा निरामया' इत्यभिधानात् । ६ गुणबुद्ध्या । ७ आसक्तो भवति स्म । ८ निवृतिम् । ९ अंगीकृत्य । १० सावद्यविरतिभेदान् । ११ आलिङ्गनम् । १२ अनन्यवृत्तिता । 'एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि' इत्यभिधानात् । १३ अनासक्तिः । १४ रात्रिभोजनम् । १५ व्रतसिद्ध्यर्थम् । १६ ईर्यासमितिः कायगुप्तिरित्यर्थः । १७ एषणासमितिः ।

क्रोधलोभभयत्यागा हास्यासङ्ग[1]विवर्जनम् । सूत्रानु[2]गा च वाणीति द्वितीयव्रतभावनाः ॥१६२॥
[3]मितोचिता[4]भ्यनु[5]ज्ञातग्रहणान्य[6]ग्रहोऽन्यथा[7] । सन्तोषो भक्तपाने च तृतीयव्रतभावनाः ॥१६३॥
स्त्री[8]कथालोकसंसर्गप्राग्रतस्मृतयोजनाः । [9]वर्ज्या वृष्य[10]रसेनामा चतुर्थव्रतभावनाः ॥१६४॥
बाह्याभ्यन्तरभेदेषु सचित्ताचित्तवस्तुषु । इन्द्रियार्थेष्वना[11]सङ्गो नैस्स[12]ङ्ग्यव्रतभावनाः ॥१६५॥
धृतिमत्ता[13] क्षमावत्ता [14]ध्यानयोगैकताना । परीषहैरभंगश्च व्रतानां भावनोत्तरा ॥१६६॥
भावनासंस्कृतान्येवं व्रतान्ययमपालयत् । [15]क्षालने स्वा[16]गसां सर्वप्रजानामनुपालकः ॥१६७॥
समातृका[17]पदान्येवं सहोत्तर[18]पदानि च । व्रतानि भावनीयानि मनीषिभिरतन्द्रितम् ॥१६८॥
यानि कान्यपि शल्यानि गर्हितानि जिनागमे । व्युत्सृज्य तानि सर्वाणि निःशल्यो [19]विहरेन्मुनिः ॥१६९॥
इति स्थ[20]विरकल्पोऽयं जिनकल्पेऽपि योजितः । यथागममि[21]होच्चित्य[22] जैनः[23] कल्पोऽनुगम्य[24] तान् १७०

क्रोध, लोभ, भय और हास्यका परित्याग करना तथा शास्त्रके अनुसार वचन कहना ये पांच द्वितीय सत्यव्रत की भावनाएं हैं ॥१६२॥ परिमित–थोड़ा आहार लेना, तपश्चरणके योग्य आहार लेना, श्रावकके प्रार्थना करनेपर आहार लेना, योग्यविधिके विरुद्ध आहार नहीं लेना तथा प्राप्त हुए भोजनपानमें संतोष रखना ये पांच तृतीय अचौर्यव्रतकी भावनाएं हैं ॥१६३॥ स्त्रियोंकी कथाका त्याग, उनके सुन्दर अंगोपांगोंके देखनेका त्याग, उनके साथ रहनेका त्याग पहले भोगे हुए भोगोंके स्मरणका त्याग और गरिष्ठ रसका त्याग इस प्रकार ये पांच चतुर्थ ब्रह्मचर्य व्रतकी भावनाएं हैं ॥१६४॥ जिनके बाह्य आभ्यन्तर इस प्रकार दो भेद हैं ऐसे पांचों इन्द्रियोंके विषयभूत सचित्त अचित्त पदार्थोंमें आसक्तिका त्याग करना सो पांचवें परिग्रह त्याग व्रतकी पांच भावनाएं हैं ॥१६५॥ धैर्य धारण करना, क्षमा रखना, ध्यान धारण करनेमें निरन्तर तत्पर रहना और परीषहोंके आनेपर मार्गसे च्युत नहीं होना ये चार उक्त व्रतोंकी उत्तर भावनाएं हैं ॥१६६॥ समस्त जीवोंकी रक्षा करनेवाले भगवान् वृषभदेव अपने पापोंको नष्ट करनेके लिये ऊपर लिखी हुई भावनाओंसे सुसंस्कृत (शुद्ध) ऐसे व्रतोंका पालन करते थे ॥१६७॥ इसी प्रकार अन्य बुद्धिमान् मनुष्योंको भी आलस्य छोड़कर मातृकापद अर्थात् पांच समिति और तीन गुप्तियोंसे युक्त तथा चौरासी लाख उत्तरगुणोंसे सहित अहिंसा आदि पांचों महाव्रतोंका पालन करना चाहिये ॥१६८॥ इसी प्रकार जैनशास्त्रोंमें जो निन्दनीय माया मिथ्यात्व और निदान ऐसी तीन शल्य कही है उन सबको छोड़कर और निःशल्य होकर ही मुनियोंको विहार करना चाहिये ॥१६९॥ इस प्रकार ऊपर कहे हुए व्रतोंका पालन करना स्थविर कल्प है, इसे जिनकल्पमें भी लगा लेना चाहिये । आगमानुसार स्थविर कल्प धारण कर जिनकल्प धारण करना चाहिये । भावार्थ–ऊपर कहे हुए व्रतोंका पालन करते हुए मुनियों के साथ रहना, उपदेश देना, नवीन शिष्योंको दीक्षा देना आदि स्थविर कल्प कहलाता है और व्रतोंका पालन करते हुए अकेले रहना, हमेशा आत्मचिन्तवनमें ही लगे रहना जिनकल्प कहलाता

१ हास्यस्यासक्तेस्त्यागः । –विवर्जनम् अ०, प०, द०, ल० । २ परमागमानुगता वाक् । ३ परिमित । ४ स्वयोग्य । ५ दात्रनुमतिप्रार्थित । ६ अस्वीकारः । ७ उक्तप्रकारादितर-प्रकारेण । ८ स्त्रीकथालापतन्मनोहराङ्गनिरीक्षणतत्सङ्गपूर्वरतानुस्मरणयोजनाः । ९ त्याज्याः । १० वीर्यवर्द्धनकरक्षीरादिरसेन सह । ११ अनासक्तिः । १२ निःपरिग्रहव्रत । १३ धैर्यवत्त्वम् । १४ ध्यानयोजनानन्यवृत्तिता । १५ प्रक्षालननिमित्तम् । १६ निजकर्मणाम् । १७ अष्टप्रवचनमातृकापदसहितानि । पञ्चसमितित्रिगुप्तीनां प्रवचनमातृकेति संज्ञा । १८ उत्तरगुणसहितानि । षट्त्रिंशद्गुणयुक्तानीत्यर्थः । १९ आचरेत् । २० सकलज्ञानिरहितकालः । २१ स्थविरकल्पे । २२ संगृह्य । –मिहोपेत्य ल० । २३ जिनकल्पः । जिनकल्पो– ल०, अ०, म० । २४ अनुज्ञायताम् ।

[1]अप्रतिक्रमणे धर्मे जिनाः सामायिकाह्वये । चरन्त्येकयमे[2] प्रायश्चतुर्ज्ञानविलोचनाः ॥१७१॥
छेदोपस्थापनाभेदप्रपञ्चोऽन्योन्य[3]योगिनाम् । दर्शितस्तै[4]र्यथाकालं बलायुर्ज्ञानवीक्षया[5] ॥१७२॥
ज्ञानदर्शनचारित्रतपोवीर्यविशेषितम् । चारित्रं संयम[6]त्राणं पञ्चधोक्तं जिनाधिपैः ॥१७३॥
ततः संयमसिद्ध्यर्थं स तपो द्वादशात्मकम् । ज्ञानधै[7]र्यबलोपेतः चचार परमः पुमान् ॥१७४॥
ततोऽनशनमत्युग्रं तेपे दीप्ततया मुनिः । अवमोदर्यमप्येकसि[8]क्थादीत्याचरत्तपः॥१७५॥
कदाचिद्वृत्तिसङ्ख्यानं तपोऽतप्त स दुर्द्धरम् । वीथीचर्यादयो यस्य विशेषा बहुभेदकाः ॥१७६॥
रसत्यागं तपो घोरं तेपे नित्यमतन्द्रितः । क्षीरसर्पिर्गुडादीनि परित्यज्याग्रिमः पुमान् ॥१७७॥
त्रिषु [9]कालेषु योगी सन्नसौ कायमचिक्लि[10]शत् । कायस्य निग्रहं प्राहुः तपः परमदुश्चरम् ॥१७८॥
निगृहीतशरीरेण[11] निगृहीतान्यसंश्रयम् । चक्षुरादीनि रुद्धेषु तेषु रुद्धं मनो भवेत् ॥१७९॥
मनोरोधः परं ध्यानं तत्कर्म[12]क्षयसाधनम् । [13]ततोऽनन्तसुखावाप्तिः ततः[14] कायं प्रकर्श[15]येत् ॥१८०॥

है । तीर्थंकर भगवान् जिनकल्पी होते हैं और यही वास्तवमें उपादेय हैं । साधारण मुनियों को यद्यपि प्रारम्भ अवस्थामें स्थविरकल्पी होना पड़ता है परन्तु उन्हें भी अन्तमें जिनकल्पी होनेके लिये उद्योग करते रहना चाहिये ॥१७०॥ मति श्रुत अवधि और मनःपर्यय इस प्रकार चार ज्ञानरूपी नेत्रोंको धारण करनेवाले तीर्थंकर परमदेव प्रायः प्रतिक्रमण रहित एक सामायिक नामके चारित्रमें ही रत रहते हैं । भावार्थ–तीर्थंकर भगवान्के किसी प्रकारका दोष नहीं लगता इसलिये उन्हें प्रतिक्रमण-छेदोपस्थापना चारित्र धारण करनेकी आवश्यकता नहीं पड़ती, वे केवल सामायिक चारित्र ही धारण करते हैं ॥१७१॥ परन्तु उन्हीं तीर्थंकर देवने बल, आयु और ज्ञानकी हीनाधिकता देखकर अन्य साधारण मुनियोंके लिये यथाकाल छेदोपस्थापना चारित्रके अनेक भेद दिखलाये हैं–उनका निरूपण किया है ॥१७२॥ ज्ञान, दर्शन, चारित्र, तप और वीर्यकी विशेषतासे संयमकी रक्षा करनेवाला चारित्र भी जिनेन्द्रदेवने पांच प्रकारका कहा है । भावार्थ–चारित्रके पांच भेद हैं–१ ज्ञानाचार, २ दर्शनाचार, ३ चारित्राचार, ४ तपआचार और ५ वीर्याचार ॥१७३॥ तदनन्तर ज्ञान, धैर्य और बल से सहित परम पुरुष–भगवान् वृषभदेवने संयमकी सिद्धिके लिये बारह प्रकारका तपश्चरण किया था ॥१७४॥ अतिशय उग्र तपश्चरणको धारण करनेवाले वे वृषभदेव मुनिराज अनशन नामका अत्यन्त कठिन तप तपते थे और एक सीथ (कण) आदिका नियम लेकर अवमौदर्य (ऊनोदर) नामक तपश्चरण करते थे ॥१७५॥ वे भगवान् कभी अत्यन्त कठिन वृत्ति परिसंख्यान नामका तप तपते थे जिसके कि वीथी चर्या आदि अनेक भेद हैं ॥१७६॥ इसके सिवाय वे आदि पुरुष आलस्य रहित हो दूध, घी, गुड आदि रसोंका परित्याग कर नित्य ही रस परित्याग नामका घोर तपश्चरण करते थे ॥१७७॥ वे योगिराज वर्षा, शीत और ग्रीष्म इस प्रकार तीनों कालोंमें शरीरको क्लेश देते थे अर्थात् कायक्लेश नामका तप तपते थे । वास्तवमें गणधर देवने शरीरके निग्रह करने अर्थात् काय क्लेश करने को ही उत्कृष्ट और कठिन तप कहा है ॥१७१॥ क्योंकि इसमें कुछ भी सन्देह नहीं है कि शरीरका निग्रह होनेसे चक्षु आदि सभी इन्द्रियोंका निग्रह हो जाता है और इन्द्रियोंका निग्रह होनेसे मनका निरोध हो जाता है अर्थात् संकल्प विकल्प

१ नियमरहिते । २ एकव्रते । ३ चतुर्ज्ञानधरजिनादन्ययोगिनाम् । ४ चतुर्ज्ञानधरजैनैः । ५ आलोकनेन । ६ संयमरक्षणम् । ७ मनोबलम् । ८ सिक्थादीन्या– प०, अ०, द० । ९ हेमन्तग्रीष्मप्रावृट्कालेषु । १० 'क्लिशि क्लेशे' उत्तप्तमकरोत् । ११ निगृहीतशरीरेण पुरुषेण । १२ कर्मक्षयहेतुम् । १३ कर्मक्षयात् । १४ तस्मात् कारणात् । १५ प्रकर्षेण कृशीकुर्यात् ।

गर्भात् प्रभृत्यसौ देवो ज्ञानत्रितयमुद्वहन् । दीक्षानन्तरमेवाप्तमनःपर्ययबोधनः ॥१८१॥
तथाप्युग्रं तपोऽतप्त सेद्धव्ये[1] ध्रुवभाविनि[2] । [3]स ज्ञानलोचनो धीरः सहस्रं [4]वार्षिकं परम् ॥१८२॥
[5]तेनाभीष्टं मुनीन्द्राणां कायक्लेशाह्वयं तपः । तपोऽङ्गेषु प्रधानाङ्गम् उत्तमाङ्गमिवाङ्गिनाम् ॥१८३॥
[6]तत्तदातप्त योगीन्द्रः सोढाशेषपरीषहः । तपस्सुदुस्सहतरं परं निर्वाणसाधनम् ॥१८४॥
कर्मेन्धनानि निर्दग्धुम् उद्यतः स तपोऽग्निना । दिदीपे नितरां धीरः[7] प्रज्वलन्निव पावकः ॥१८५॥
असङ्ख्यातगुणश्रेण्या[8] धुन्वन् कर्मतमोघनम् । तपोदीप्त्यातिदीप्ताङ्गः सोंऽशुमानिव दिद्युते ॥१८६॥
शय्यास्य विजने देशे जागरूकस्य[9] योगिनः । कदाचिदासनञ्चासीच्छुचौ निर्जन्तुकान्तरे[10] ॥१८७॥
न शिश्ये जागरूकोऽसौ नासीनश्चाभवद्भृशम् । प्रयतो विजहारोर्वी [11]त्यक्तभुक्तिर्जितेन्द्रियः ॥१८८॥

दूर होकर चित्त स्थिर हो जाता है । मनका निरोध हो जाना ही उत्कृष्ट ध्यान कहलाता है तथा यह ध्यान ही समस्त कर्मोंके क्षय हो जानेका साधन है और समस्त कर्मोंका क्षय हो जाने से अनन्त सुखकी प्राप्ति होती है इसलिये शरीरको कृश करना चाहिये ॥१७९-१८०॥ यद्यपि वे भगवान् वृषभदेव मति, श्रुत-अवधि और मनःपर्यय इन तीन ज्ञानोंको गर्भसे ही धारण करते थे और मनःपर्यय ज्ञान उन्हें दीक्षाके बाद ही प्राप्त हो गया था इसके सिवाय सिद्धत्व पद उन्हें अवश्य ही प्राप्त होनेवाला था तथापि सम्यग्ज्ञानरूपी नेत्रोंको धारण करनेवाले धीरवीर भगवान् ने हजार वर्ष तक अतिशय उत्कृष्ट और उग्र तप तपा था इससे मालूम होता है कि महामुनियों को कायक्लेश नामका तप अतिशय अभीष्ट है–उसे वे अवश्य करते हैं । जिस प्रकार प्राणियों के शरीरमें मस्तक प्रधान होता है उसी प्रकार कायक्लेश नामका तप समस्त बाह्य तपश्चरणों में प्रधान होता है ॥१८१-१८३॥ इसीलिये उस समय समस्त परीषहोंको सहन करनेवाले योगिराज भगवान् वृषभदेव मोक्षका उत्तम साधन और अतिशय कठिन कायक्लेश नाम का तप तपते थे ॥१८४॥ तपरूपी अग्निसे कर्मरूपी ईन्धनको जलानेके लिये तैयार हुए वे धीर-वीर भगवान् प्रज्वलित हुई अग्निके समान अत्यन्त देदीप्यमान हो रहे थे ॥१८५॥ उस समय वे असंख्यात गुणश्रेणी निर्जराके द्वारा कर्मरूपी गाढ़ अन्धकारको नष्ट कर रहे थे और उनका शरीर तपश्चरणकी कान्तिसे अतिशय देदीप्यमान हो रहा था इसलिये वे ठीक सूर्य के समान सुशोभित हो रहे थे ॥१८६॥ सदा जागृत रहनेवाले इन योगिराजकी शय्या निर्जन एकान्त स्थानमें ही होती थी और जब कभी आसन भी पवित्र तथा निर्जीव स्थानमें ही होता था । सदा जागृत रहनेवाले और इन्द्रियोंको जीतनेवाले वे भगवान् न तो कभी सोते थे और न एक स्थानपर बहुत बैठते ही थे किन्तु भोगोपभोगका त्यागकर प्रयत्नपूर्वक अर्थात् ईर्या-समितिका पालन करते हुए समस्त पृथिवीमें विहार करते रहते थे। । भावार्थ–भगवान् सदा जागृत रहते थे इसलिये उन्हें शय्याकी नित्य आवश्यकता नहीं पड़ती थी परन्तु जब कभी विश्रामके लिये लेटते भी थे तो किसी पवित्र और एकान्त स्थानमें ही शय्या लगाते थे इसी प्रकार विहारके अतिरिक्त ध्यान आदिके समय एकान्त और पवित्र स्थानमें ही आसन लगाते थे । कहनेका तात्पर्य यह है कि भगवान् विविक्तशय्यासन नामका तपश्चरण करते थे

१ स्वयं साध्ये सति । साधितुं योग्ये । सिद्धत्वे प०, ल०, द०, म० । २ नित्ये । निमित्तसप्तमी । ३ सज्ज्ञान–ल०, म० । ४ वर्षसम्बन्धि । ५ तेन कारणेन । ६ कायक्लेशम् । ७ वीरः इ० । ८ प्रतिसमयसंख्यातगुणितक्रमेण कर्मणां निर्जरागुणश्रेणिस्तया । ९ जागरणशीलस्य । १० अवकाशे । ११ व्यक्तभुक्तजितेन्द्रियः इत्यपि क्वचित पाठः ।

इति बाह्यं तपः षोढा चरन् परमदुश्चरम् । आभ्यन्तरञ्च षड्भेदं तपो भेजे स योगिराट् ॥१८९॥
प्रायश्चित्तं तपस्तस्मिन् मुनौ निरतिचारके । [1]चरितार्थमभूत्किन्नु भानोरस्त्यान्तरं[2] तमः ॥१९०॥
प्रश्रयश्च[3] तदास्यासीत् प्रश्रितोऽन्तर्निलीनताम् । विनेता[4] विनयं कस्य स कुर्यादग्रिमः पुमान् ॥१९१॥
अथवा प्रश्रयी सिद्धान् असौ भेजे सिषित्सया[5] । नमः सिद्धेभ्य इत्येव यतो दीक्षामुपायत[6] ॥१९२॥
ज्ञानदर्शनचारित्रतपोवीर्यगुणेषु च । यथार्हं विनयोऽस्यासीद् यतमानस्य[7] तत्त्वतः ॥१९३॥
वैयावृत्यञ्च तस्यासी[8]न्मार्गव्यापृति[9]मात्रकम् । भगवान् परमेष्ठी[10] हि क्वान्यत्र व्यापृतो[11] भवेत् ॥१९४॥
इदमत्र तु तात्पर्यं प्रायश्चित्तादिके त्रये । तपस्यस्मिन्नियन्तृत्वं[12] न नियम्य[13]त्वमीशितुः ॥१९५॥

॥१८७–१८८॥ इस प्रकार वे योगिराज अतिशय कठिन छह प्रकारके बाह्य तपश्चरणका पालन करते हुए आगे कहे जानेवाले छह प्रकारके अन्तरङ्ग तपका भी पालन करते थे ॥१८९॥ निरतिचार प्रवृत्ति करनेवाले मुनिराज वृषभदेवमें प्रायश्चित्त नामका तप चरितार्थ अर्थात् कृतकार्य हो चुका था सो ठीक ही है क्योंकि सूर्यके बीचमें भी क्या कभी अन्धकार रहता है ? अर्थात् कभी नहीं । भावार्थ–अतिचार लग जानेपर उसकी शुद्धता करना प्रायश्चित्त कहलाता है भगवान्के कभी कोई अतिचार लगता ही नहीं था अर्थात् उनका चारित्र सदा निर्मल रहता था इसलिये यथार्थमें उनके निर्मल चारित्रमें ही प्रायश्चित्त तप कृतकृत्य हो चुका था । जिस प्रकार कि सूर्यका काम अन्धकारको नष्ट करना है जहां अन्धकार होता है वहां सूर्यको अपना प्रकाश-पुञ्ज फैलानेकी आवश्यकता होती है परन्तु सूर्यके बीचमें अन्धकार नहीं होता इसलिये सूर्य अपने विषयमें चरितार्थ अर्थात् कृतकृत्य होता है ॥१९०॥

इसी प्रकार इनका विनय नामका तप भी अन्तर्निलीनताको प्राप्त हुआ था अर्थात् उन्हींमें अन्तर्भूत हो गया था क्योंकि वे प्रधान पुरुष सबको नम्र करनेवाले थे फिर भला वे किसकी विनय करते ? अथवा उन्होंने सिद्ध होनेकी इच्छासे विनयी होकर सिद्ध भगवान्की आराधना की थी क्योंकि 'सिद्धोंके लिये नमस्कार हो' ऐसा कह कर ही उन्होंने दीक्षा धारण की थी। अथवा यथार्थ प्रवृत्ति करनेवाले भगवान्की ज्ञान दर्शन चारित्र तप और वीर्य आदि गुणोंमें यथायोग्य विनय थी इसलिये उनके विनय नामका तप सिद्ध हुआ था ॥१९१–१९३॥ रत्नत्रय रूप मार्गमें व्यापार करना ही उनका वैयावृत्त्य तप कहलाता था क्योंकि वे परमेष्ठी भगवान् रत्नत्रयको छोड़कर और किसमें व्यावृति (व्यापार) करते ? भावार्थ–दीन दुःखी जीवोंकी सेवामें व्यापृत रहनेको वैयावृत्य कहते हैं परन्तु यह शुभ कषायका तीव्र उदय होते ही हो सकता है । भगवान्की शुभकषाय भी अतिशय मन्द हो गई थी इसलिये उनकी प्रवृत्ति बाह्य व्यापारसे हटकर रत्नत्रय रूप मार्गमें ही रहती थी । अतः उसीकी अपेक्षा उनके वैयावृत्य तप सिद्ध हुआ था ॥१९४॥ यहां तात्पर्य यह है कि स्वामी वृषभदेवके इन प्रायश्चित्त विनय और वैयावृत्त्य नामक तीन तपोंके विषयमें केवल नियन्तापन ही था अर्थात् वे इनका दूसरोंके लिये उपदेश देते थे, स्वयं किसीके नियम्य नहीं थे अर्थात् दूसरोंसे उपदेश ग्रहण कर इनका पालन नहीं करते थे । भावार्थ–भगवान् इन तीनों तपोंके स्वामी थे न कि अन्य मुनियों

१ कृतार्थम् । २ –रस्यन्तरं इ० । ३ विनयः । ४ जनान् विनयवतः कुर्वन्नित्यर्थः । ५ सेद्धुमिच्छया । ६ 'अयि गतौ' इति धातुः, उपागमत् स्वीकृतवानित्यर्थः । ७ प्रयत्नं कुर्वाणस्य । ८ रत्नत्रयव्यापारमात्रकम् । ९ –व्यावृतिं इ०, स०, प०, ल० । –व्यावृत्ति-अ०, द० । १० परं पदे तिष्ठतीति । ११ वैयावृत्यकृतः । व्यावृतो इ०, अ०, प०, स०, ल० । १२ नायकत्वम् । १३ नेयत्वम् ।

यावान् धर्ममयः सर्गस्तं [1]कृत्स्नं स सनातनः । युगादौ प्रथयामास स्वानुष्ठानैर्निदर्शनैः ॥१९६॥
[3]स्वधीतिनोऽपि तस्यासीत् स्वाध्यायः शुद्धये धियः । [4]सौवाध्यायिकतां [5]प्रापन् यतोऽद्यत्वे[6]पि संयताः१९७॥
न बाह्याभ्यन्तरे चास्मिन् तपसि द्वादशात्मनि[7] । न भविष्यति नैवास्ति स्वाध्यायेन समं तपः ॥१९८॥
स्वाध्यायेऽभिरतो भिक्षुः निभृतः संवृतेन्द्रियः । भवेदेकाग्रधीर्धीमान् विनयेन समाहितः ॥१९९॥
विविक्तेषु वनाद्र्यद्रिकुञ्जप्रेतवनादिषु । मुहुर्व्युत्सृष्टकायस्य व्युत्सर्गाख्यमभूत्तपः॥२००॥
देहाद् विविक्त[8]मात्मानं पश्यन् गुप्तित्रयीं श्रितः । व्युत्सर्गं स तपो भेजे स्वस्मिन् गात्रेऽपि निस्पृहः२०१
ततो व्युत्सर्गपूर्वोऽस्य [9]ध्यानयोगोऽभवद्विभोः । मुनिर्व्युत्सृष्टकायो हि स्वामी सद्ध्यानसम्पदः ॥२०२॥
ध्यानाभ्यासं ततः[10] कुर्वन् योगी सुनिवृतो भवेत्[11] । शेषः[12] परिकरः सर्वो ध्यानमेवोत्तमं तपः ॥२०३॥

के समान पालन करते हुए इनके आधीन रहते थे ॥१९५॥ इस संसारमें जो कुछ धर्म-सृष्टि थी सनातन भगवान् वृषभदेवने वह सब उदाहरण स्वरूप स्वयं धारण कर इस युगके आदि में प्रसिद्ध की थी ॥ भावार्थ–भगवान् धार्मिक कार्योंका स्वयं पालन करके ही दूसरोंके लिये उपदेश देते थे ॥१९६॥ यद्यपि भगवान् स्वयं अनेक शास्त्रों (द्वादशाङ्ग) के जाननेवाले थे तथापि वे बुद्धिकी शुद्धिके लिये निरन्तर स्वाध्याय करते थे क्योंकि उन्हींका स्वाध्याय देख कर मुनि लोग आज भी स्वाध्याय करते हैं । भावार्थ–यद्यपि उनके लिये स्वाध्याय करना अत्यावश्यक नहीं था क्योंकि वे स्वाध्यायके बिना भी द्वादशाङ्गके जानकार थे तथापि वे अन्य साधारण मुनियोंके हितके लिये स्वाध्यायकी प्रवृत्ति चलाना चाहते थे इसलिये स्वयं भी स्वाध्याय करते थे । उन्हें स्वाध्याय करते देखकर ही अन्य मुनियोंमें स्वाध्याय की परिपाटी चली थी जो कि आजकल भी प्रचलित है ॥१९७॥ बाह्य और आभ्यन्तर भेद सहित बारह प्रकारके तपश्चरणमें स्वाध्यायके समान दूसरा तप न तो है और न आगे ही होगा ॥१९८॥ क्योंकि विनय सहित स्वाध्यायमें तल्लीन हुआ बुद्धिमान् मुनि मनके संकल्प-विकल्प दूर हो जानेसे निश्चल हो जाता है, उसकी सब इन्द्रियां वशीभूत हो जाती हैं और उसकी चित्त-वृत्ति किसी एक पदार्थके चिन्तवनमें ही स्थिर हो जाती है । भावार्थ–स्वाध्याय करनेवाले मुनिको ध्यानकी प्राप्ति अनायास ही हो जाती है ॥१९९॥ वनके प्रदेश पर्वत लतागृह और श्मशान भूमि आदि एकान्त प्रदेशोंमें शरीरसे ममत्व छोड़कर कायोत्सर्ग करनेवाले भगवान् के व्युत्सर्ग नामका पांचवां तपश्चरण भी हुआ था ॥२००॥ वे भगवान् आत्माको शरीरसे भिन्न देखते थे और मनोगुप्ति, वचनगुप्ति और कायगुप्ति इन तीनों गुप्तियोंका पालन करते थे इस प्रकार अपने शरीरमें भी निःस्पृह रहनेवाले भगवान् व्युत्सर्ग नामक तपका अच्छी तरह पालन करते थे ॥२०१॥ तदनन्तर स्वामी वृषभदेवके व्युत्सर्गतपश्चरणपूर्वक ध्यान नाम का तप भी हुआ था, सो ठीक ही है शरीरसे ममत्व छोड़ देनेवाला मुनि ही उत्तम ध्यानरूपी सम्पदाका स्वामी होता है ॥२०२॥ योगिराज वृषभदेव ध्यानाभ्यासरूप तपश्चरण करते हुए ही कृतकृत्य हुए थे क्योंकि ध्यान ही उत्तम तप कहलाता है उसके सिवाय बाकी सब उसीके साधन मात्र कहलाते हैं । भावार्थ–सबसे उत्तम तप ध्यान ही है क्योंकि कर्मोंकी साक्षात् निर्जरा ध्यानसे ही होती है शेष ग्यारह प्रकारके तप ध्यानके सहायक कारण हैं ॥२०३॥

---

१ कृच्छ्रं ल०, म० । २ –निदेशनैः अ०, इ०, स० । ३ सुष्ठु अधीतमनेनेति स्वधीती तस्य । ४ स्वाध्यायप्रवृत्तताम् । ५ प्राप्ताः । ६ इदानीन्तनकालेऽपि । ७ द्वादशात्मके ल०, इ०, म०, द०, द०, अ०, प० । ८ भिन्नम् । ९ ध्यानयोजनम् । १० तपः ल० । ११ सुनिवृत्तोऽभवत् ल०, म०, अ०, स० । सुनिभृतो भवेत् इ० । सुनिभृतोऽभवत् प०, द० । १२ ध्यानादन्यदेकादशविधं तपः ।

मनोऽक्षग्रामकायानां तपनात् सन्निरोधनात् । तपो निरुच्यते तज्ज्ञैस्तदिदं द्वादशात्मकम् ॥२०४॥
विपुलां निर्जरामिच्छन् महोदर्कञ्च[1] संवरम् । यतते स्म तपस्यस्मिन् द्विषड्भेदे विदांवरः ॥२०५॥
सगुप्तिसमिती धर्मं सानुप्रेक्षं क्षमादिकम् । परीषहाञ्जयन् सम्यक्चारित्रं चाचरच्चिरम् ॥२०६॥
ततो दिध्यासुनानेन[2] योग्या देशाः सिषेविरे । विविक्ता रमणीया ये विमुक्ता रागकारणैः ॥२०७॥
गुहापुलिनगिर्यग्रजीर्णोद्यानवनादयः । नात्युष्णशीतसम्पाता[3] देशाः [4]साधारणाश्च ये ॥२०८॥
कालश्च नातिशीतोष्ण[5]भूयिष्ठो जनतासुखः । भावश्च ज्ञानवैराग्यधृतिक्षान्त्यादिलक्षणः ॥२०९॥
[6]द्रव्याण्यप्यनुकूलानि यानि संक्लेशहानये[7] । प्रभविष्णूनि[8] तानीशः[9] सिषेवे ध्यानसिद्धये ॥२१०॥
कदाचिद् गिरिकुञ्जेषु[10] कदाचिद् गिरिकन्दरे[11] । कदाचिच्चाद्रिशृङ्गेषु दध्यावध्यात्मतत्त्ववित् ॥२११॥
[12]कर्हिचिद् बर्हिणारावरम्योपान्तेषु हारिषु । गिर्यग्रेषु शिलापट्टान्[13] [14]अध्यास्ताध्यात्मशुद्धये ॥२१२॥
अगो[15]ष्पदेष्वरण्येषु कदाचिदनुप[16]द्रुते । निर्जन्तुके वि[17]विक्ते च स्थ[18]ण्डिलेऽस्थात् समाधये ॥२१३॥

मन इन्द्रियोंका समूह और काय इनके तपन तथा निग्रह करनेसे ही तप होता है ऐसा तपके जाननेवाले गणधरादि देव कहते हैं और वह तप अनशन आदिके भेदसे बारह प्रकारका होता है ॥२०४॥ विद्वानोंमें अतिशय श्रेष्ठ वे भगवान् कर्मोंकी बड़ी भारी निर्जरा और उत्तम फल देनेवाले संवरकी इच्छा करते हुए इन बारह प्रकारके तपोंमें सदा प्रयत्नशील रहते थे ॥२०५॥ वे भगवान् परीषहोंको जीतते हुए गुप्ति, समिति, अनुप्रेक्षा, क्षमा आदि धर्म और सम्यक् चारित्र का चिरकाल तक पालन करते रहे थे । भावार्थ—गुप्ति, समिति, धर्म, अनुप्रेक्षा, परीषह जय और चारित्र इन पांच कारणोंसे नवीन आते हुए कर्मोंका आस्रव रुक कर संवर होता है । जिनेन्द्र देवने इन पांचों ही कारणोंको चिरकाल तक धारण किया था ॥२०६॥ तदनन्तर ध्यान धारण करनेकी इच्छा करनेवाले भगवान् ध्यानके योग्य उन उन प्रदेशोंमें निवास करते थे जो कि एकान्त थे मनोहर थे और राग-द्वेष उत्पन्न करनेवाली सामग्रीसे रहित थे ॥२०७॥ जहां न अधिक गर्मी पड़ती हो और न अधिक शीत ही होता हो जहां साधारण गर्मी-सरदी रहती हो अथवा जहां समान रूपसे सभी आ जा सकते हों ऐसे गुफा, नदियोंके किनारे, पर्वतकी शिखर, जीर्ण उद्यान और वन आदि प्रदेश ध्यानके योग्य क्षेत्र कहलाते हैं । इसी प्रकार जिसमें न बहुत गर्मी और न बहुत सर्दी पड़ती हो तथा जो प्राणियोंको दुःखदायी भी न हो ऐसा काल ध्यान के योग्य काल कहलाता है । ज्ञान वैराग्य धैर्य और क्षमा आदि भाव ध्यानके योग्य भाव कहलाते हैं और जो पदार्थ क्षुधा आदिसे उत्पन्न हुए संक्लेशको दूर करनेमें समर्थ हैं ऐसे पदार्थ ध्यानके योग्य द्रव्य कहलाते हैं । स्वामी वृषभदेव ध्यानकी सिद्धिके लिये अनुकूल द्रव्य क्षेत्र काल और भाव का ही सेवन करते थे । ॥२०८–२१०॥ अध्यात्म तत्त्वको जाननेवाले वे भगवान् कभी तो पर्वतपरके लतागृहोंमें, कभी पर्वतकी गुफाओंमें और कभी पर्वतकी शिखरोंपर ध्यान लगाते थे ॥२११॥ वे भगवान् अध्यात्मकी शुद्धिके लिये कभी तो ऐसे ऐसे सुन्दर पहाड़ोंकी शिखरों पर पड़े हुए शिलातलोंपर आरूढ़ होते थे कि जिनके समीप भाग मयूरोंके शब्दोंसे बड़े ही मनोहर हो रहे थे ॥२१२॥ कभी कभी समाधि (ध्यान) लगानेके लिये वे भगवान् जहां गायोंके खुरों तकके चिह्न नहीं थे ऐसे अगम्य वनोंमें उपद्रव शून्य जीव रहित और एकान्त

---

१ महोत्तरफलम् । २ ध्यातुमिच्छुना । ३ सम्प्राप्तिः । ४ न पराधीनाः । सर्वैः सेव्या इत्यर्थः । ५ अत्यर्थशीतोष्णबाहुल्यरहितः । ६ आहारादीनि । ७ सक्लेशविनाशाय । ८ समर्थानि । ९ प्रभुः । १० लतादिपिहितोदरे प्रदेशे । ११ दर्याम् । १२ कदाचित् । १३ शिलापट्टेषु । १४ अध्यासते स्म । १५ मानरहितेषु, अगोगम्येषु वा । 'गोष्पदं गोखुरश्वभ्रे मानगोगम्ययोरपि' इत्यभिधानात् । १६ उपद्रवरहिते । १७ पूते । १८ क्षुद्रपाषाणभूमौ ।

कदाचित् प्रान्तपर्यस्त[1]निर्झरैस्ततशीकरैः । कृतशैत्ये नगोत्सङ्गे सोऽगाद्योगैक[2]तानताम् ॥२१४॥
[3]नक्तं नक्त[4]ञ्चरैर्भीमैः स्वैरमारब्धताण्डवे । विभुः पितृवनोपान्ते ध्यायन् सोऽस्थात् कदाचन ॥२१५॥
कदाचिन्निम्नगातीरे शुचिसैकतचारुणि । कदाचिच्च सरस्तीरे वनोद्देशेषु हारिषु ॥२१६॥
मनोव्या[5]क्षेपहीनेषु देशेष्वन्येषु च क्षमी । ध्यानाभ्यासमसौ कुर्वन् विजहार महीमिमाम् ॥२१७॥
मौनी ध्यानी स निर्मानो देशान् प्रविहरन् शनैः । पुरं पुरिमतालाख्यं सुधीरन्येद्युरासदत् ॥२१८॥
नात्यासन्नविदूरेऽ[6]स्माद् उद्याने शकटाह्वये । [7]शुचौ निराकुले रम्ये विवि[8]क्तेऽस्थाद् विजन्तुके॥२१९॥
न्यग्रो[9]धपादपस्याधः शिलापट्टं शुचि पृथुम् । सोऽध्यासीनः समाधानम् अधाद्[10]ध्यानाय शुद्धधीः ॥२२०॥
[11]तत्र पूर्वमुखं स्थित्वा कृतप[12]ल्यङ्कबन्धनः । ध्याने प्रणिदधौ चित्तं लेश्याशुद्धिं परां दधत् ॥२२१॥
चेतसा सोभिस[13]न्धाय परं [14]पदमनुत्तरम् । दधौ सिद्धगुणानष्टौ प्रागेव सुविशुद्धधीः ॥२२२॥
सम्यक्त्वं दर्शनं ज्ञानमनन्तं वीर्यमद्भुतम् । सौक्ष्म्या[15]वगाह्या[16]व्याबाधाः सहागुरुलघुत्वकाः ॥२२३॥

विषम भूमिपर विराजमान होते थे ॥२१३॥ कभी कभी पानीके छींटे उड़ाते हुए समीप में बहनेवाले निर्झरनोंसे जहां बहुत ठंड पड़ रही थी ऐसे पर्वतके ऊपरी भागपर वे ध्यानमें तल्लीनता को प्राप्त होते थे ॥२१४॥ कभी कभी रातके समय जहां अनेक राक्षस अपनी इच्छानुसार नृत्य किया करते थे ऐसी श्मशान भूमिमें वे भगवान् ध्यान करते हुए विराजमान होते थे ॥२१५॥ कभी शुक्ल अथवा पवित्र बालूसे सुन्दर नदीके किनारेपर, कभी सरोवरके किनारे, कभी मनोहर वनके प्रदेशोंमें और कभी मनकी व्याकुलता न करनेवाले अन्य कितने ही देशोंमें ध्यानका अभ्यास करते हुए उन क्षमाधारी भगवान्ने इस समस्त पृथिवीमें विहार किया था ॥२१६–२१७॥ मौनी, ध्यानी और मानसे रहित वे अतिशय बुद्धिमान् भगवान् धीरे-धीरे अनेक देशोंमें विहार करते हुए किसी दिन पुरिमताल नामके नगर के समीप जा पहुँचे ॥२१८॥ उसी नगरके समीप एक शकट नामका उद्यान था जो कि उस नगरसे न तो अधिक समीप था और न अधिक दूर ही था। उसी पवित्र, आकुलतारहित, रमणीय, एकान्त और जीवरहित वनमें भगवान् ठहर गये ॥२१९॥ शुद्ध बुद्धिवाले भगवान् ने वहां ध्यानकी सिद्धिके लिये वट-वृक्षके नीचे एक पवित्र तथा लम्बी चौड़ी शिलापर विराजमान होकर चित्तकी एकाग्रता धारण की ॥२२०॥ वहां पूर्व दिशाकी ओर मुख कर पद्मासन से बैठे हुए तथा लेश्याओंकी उत्कृष्ट शुद्धिको धारण करते हुए भगवान्ने ध्यानमें अपना चित्त लगाया ॥२२१॥

अतिशय विशुद्ध बुद्धिको धारण करनेवाले भगवान् वृषभदेवने सबसे पहले सर्वश्रेष्ठ मोक्ष-पदमें अपना चित्त लगाया और सिद्ध परमेष्ठीके आठ गुणोंका चिन्तवन किया ॥२२२॥ अनन्त सम्यक्त्व, अनन्तदर्शन, अनन्तज्ञान, अनन्त और अद्भुत वीर्य, सूक्ष्मत्व, अवगाहनत्व, अव्यावाधत्व और अगुरुलघुत्व ये आठ सिद्धपरमेष्ठीके गुण कहे गये हैं, सिद्धि प्राप्त करनेकी इच्छा करनेवालोंको इन गुणोंका अवश्य ध्यान करना चाहिये। इसी प्रकार द्रव्य, क्षेत्र, काल

१ व्याप्त। २ ध्यानैकाग्रतानताम्। ३ रात्रौ। ४ राक्षसैः। ५ व्याकुल। ६ अस्मात् पुरात्। ७ 'पुमांश्चान्यतोऽम्यणिति सूत्रेण पुंवद्भावः। ८ विजने। 'विविक्तौ पूतविजनौ' इत्यभिधानात्। ९ वटः। १० आधात् इति पाठे अकरोत्। अधादिति पाठे धरति स्म। ११ शिलापट्टे। १२–पर्यङ्क–ल०, म०, द०, स०, अ०। १३ अभिप्रायगतं कृत्वा। १४ अक्षयस्थानम्। १५ सूक्ष्मत्व। १६ अवगाहित्व।

प्रोक्ताः सिद्धगुणा ह्यष्टौ ध्येयाः सिद्धिमभीप्सुना । [1]द्रव्यतः क्षेत्रतः[2] कालाद्[3] भावतश्[4]च तथा[5]परे ॥२२४॥
गुणैर्द्वादश[6]भिर्युक्तो मुक्तः सूक्ष्मो निरञ्जनः । स ध्येयो योगिभिर्व्यक्तो नित्यः शुद्धो मुमुक्षुभिः ॥२२५॥
ततो वध्यावनुप्रेक्षा दि[7]ध्यासुर्धर्म्यमुत्तमम्[8] । पारि[9]कर्ममितास्तस्य शुभा[10] द्वादशभावनाः ॥२२६॥
तासां नामस्वरूपञ्च पूर्वमेवानुवर्णितम् । ततो धर्म्यमसौ ध्यानं प्रपेदे धीद्ध[11]शुद्धिकः ॥२२७॥
आज्ञाविचयमाद्यं तद् अपाय[12]विचयं तथा । विपाक[13]विचयञ्चान्यत् संस्थानविचयं परम् ॥२२८॥
स्वनामव्यक्ततत्त्वा[14]नि धर्म्यध्यानानि सोऽध्यगात्[15] । यतो महत्तमं पुण्यं स्वर्गाग्रसुखसाधनम् ॥२२९॥
क्षालितागः परागस्य विरागस्यास्य योगिनः । प्रमादः क्वाप्यभून्नेत[16]स्तदा [17]ज्ञानादिशक्तिभिः ॥२३०॥
ज्ञानादिपरिणामेषु परां शुद्धिमुपेयुषः । लेशतोऽप्यस्य नाभूवन् दुर्लेश्याः क्लेशहेतवः ॥२३१॥
तदा ध्यानमयी शक्तिः स्फुरन्ती ददृशे विभोः । मोहारिनाशपिशुना महोल्केव[18] विजृम्भिता ॥२३२॥

तथा भावकी अपेक्षा उनके और भी चार साधारण गुणोंका चिन्तवन करना चाहिये । इस तरह जो ऊपर कहे हुए बारह गुणोंसे युक्त हैं, कर्मबन्धनसे रहित हैं, सूक्ष्म हैं, निरञ्जन हैं— रागादि भाव कर्मोंसे रहित हैं, व्यक्त हैं, नित्य हैं और शुद्ध हैं ऐसे सिद्ध भगवान्का मोक्षाभिलाषी मुनियोंको अवश्य ही ध्यान करना चाहिये ॥२२३–२२५॥ पश्चात् उत्तम धर्म ध्यानकी इच्छा करनेवाले भगवान्ने अनुप्रेक्षाओंका चिन्तवन किया क्योंकि शुभ बारह अनुप्रेक्षाएं ध्यानकी परिवार अवस्थाको ही प्राप्त हैं अर्थात् ध्यानका ही अंग कहलाती हैं ॥२२६॥ उन बारह अनुप्रेक्षाओंके नाम और स्वरूपका वर्णन पहले ही किया जा चुका है । तदनन्तर बुद्धि की अतिशय विशुद्धिको धारण करनेवाले भगवान् धर्मध्यानको प्राप्त हुए ॥२२७॥ आज्ञा विचय, अपायविचय, विपाकविचय और संस्थानविचय इस प्रकार धर्मध्यानके चार भेद हैं । जिनका स्वरूप अपने नामसे प्रकट हो रहा है ऐसे ऊपर कहे हुए चारों धर्मध्यान जिनेन्द्रदेवने धारण किये थे क्योंकि उनसे स्वर्ग लोकके श्रेष्ठ सुखोंके कारणस्वरूप बड़े भारी पुण्यकी प्राप्ति होती है ॥२२८–२२९॥ जिनका पाप-रूपी पराग (धूलि) धुल गया है और राग-द्वेष आदि विभाव नष्ट हो गये हैं ऐसे योगिराज वृषभदेवके अन्तःकरणमें उस समय ज्ञान, दर्शन आदि शक्तियोंके कारण किसी भी जगह प्रमाद नहीं रह सका था । भावार्थ— धर्मध्यानके समय जिनेन्द्रदेव प्रमादरहित हो 'अप्रमत्त संयत' नामके सातवें गुणस्थानमें विद्यमान थे ॥२३०॥ ज्ञान आदि परिणामोंमें परम विशुद्धताको प्राप्त हुए जिनेन्द्रदेवके क्लेश उत्पन्न करनेवाली अशुभ लेश्याएं अंशमात्र भी नहीं थीं । भावार्थ—उस समय भगवान् के शुक्ल लेश्या ही थी ॥२३१॥ उस समय देदीप्यमान हुई भगवान्की ध्यानरूपी शक्ति ऐसी दिखाई देती थी मानो मोहरूपी शत्रुके नाशको सूचित करनेवाली बड़ी हुई बढ़ी भारी उल्का

१ द्रव्यमाश्रित्य चेतनत्वादयः । २ क्षेत्रमाश्रित्य असंख्यातप्रदेशित्वादयः । ३ कालमाश्रित्य त्रिकालं व्यापित्वादयः । ४ भावमाश्रित्य परिणामिकादयः । ५ साधारणगुणाः । ६ सम्यक्त्वाद्यष्टौ, द्रव्याश्रयतश्चत्वार इति द्वादशगुणैः । ७ ध्यातुमिच्छुः । ८ –धर्ममुत्तमम् ल०, म० । धमादपेतम् । ९ परिकरत्वम् । १० शुद्धा इत्यपि क्वचित् । ११ धियः इद्धा प्रवृद्धा शुद्धिर्यस्य सः । १२ आज्ञा आगमस्तदुगदितवस्तुविचारो विचयः सोऽत्रास्तीति । अपायविचयं कर्मणाम् । १३ शुभाशुभकर्मोदयजनितसुखदुःखभेदप्रभेदचिन्ता । १४ स्वरूपाणि । १५ ध्यायति स्म । १६ इतः प्राप्तः । –प्यभून्नान्तस्तदा इ०, द०, ल०, म०, अ०, प०, स० । १७ ज्ञानसम्यक्त्वचारित्र । १८ नक्षत्रपातः ।

आरचय्य तदा कृत्स्नं [1]विशुद्धिबलमग्रतः[2] । निकृष्टमध्यमोत्कृष्टविभागेन त्रिधा कृतम् ॥२३३॥
कृतान्तः[3]शुद्धिरुद्धूत[4]कृतान्तकृतविक्रियः । [5]उत्तस्थे सर्वसामग्र्यो [6]मोहारिपृतनाजये ॥२३४॥
शिरस्त्राणं[7] तनुत्रञ्च[8] तस्यासीत् संयमद्वयम्[9] । जैत्रमस्त्रञ्च सद्ध्यानं मोहारातिं बिभित्सतः[10]॥२३५॥
बलव्यसनरक्षार्थं[11] ज्ञानामात्याः पुरस्कृताः । विशुद्धपरिणामश्च सैनापत्ये[12] नियोजितः ॥२३६॥
गुणाः सैनिकतां[13] नीता दुर्भेदा[14] ध्रुवयोधिनः[15] । तेषां[16] हन्तव्यपक्षे च रागाद्याः प्रतिचर्चिताः[17] २३७
इत्यायोजितसैन्यस्य जयोद्योगे जगद्गुरोः । गुणश्रेणिबलाद्दीर्णं[18] [19]कर्मसैन्यं[20]नु शल्कशः[21] ॥२३८॥
यथा यथोत्तराशुद्धिः आस्कन्दति[22] तथा तथा । कर्मसैन्यस्थितेर्भङ्गः सञ्जातश्च रसक्षयः[23] ॥२३९॥

ही हो ॥२३२॥ जिस प्रकार कोई राजा अपनी अन्तःप्रकृति अर्थात् मंत्री आदिको शुद्ध कर—उनकी जांचकर अपनी सेनाके जघन्य मध्यम और उत्तम ऐसे तीन भेद करता है और उनको आगे कर मरणभयसे रहित हो सब सामग्रीके साथ शत्रुकी सेनाको जीतनेके लिये उठ खड़ा होता है उसी प्रकार भगवान् वृषभदेवने भी अपनी अन्तःप्रकृति अर्थात् मनको शुद्धकर—संकल्प-विकल्प दूर कर अपनी विशुद्धिरूपी सेनाके जघन्य मध्यम और उत्कृष्ट ऐसे तीन भेद किये और फिर उस तीनों प्रकारकी विशुद्धिरूपी सेनाको आगे कर यमराज द्वारा की हुई विक्रिया (मृत्यु-भय) को दूर करते हुए सब सामग्रीके साथ मोह-रूपी शत्रुकी सेना अर्थात् मोहनीय कर्मके अठ्ठाईस अवान्तर भेदोंको जीतनेके लिये तत्पर हो गये ॥२३३–२३४॥ मोह रूपी शत्रुको भेदन करनेकी इच्छा करनेवाले भगवान्ने इन्द्रियसंयम और प्राणिसंयम रूप दो प्रकारके संयमको क्रमसे शिरकी रक्षा करनेवाला टोप और शरीरकी रक्षा करनेवाला कवच बनाया था तथा उत्तम ध्यानको जयशील अस्त्र बनाया था ॥२३५॥ विशुद्धि-रूपी सेनाकी आपत्तिसे रक्षा करनेके लिये उन्होंने ज्ञान-रूपी मंत्रियोंको नियुक्त किया था और विशुद्ध परिणामको सेनापतिके पदपर नियुक्त किया था ॥२३६॥ जिनका कोई भेदन नहीं कर सकता और जो निरन्तर युद्ध करनेवाले थे ऐसे गुणोंको उन्होंने सैनिक बनाया तथा राग आदि शत्रुओंको उनके हन्तव्य पक्षमें रक्खा ॥२३७॥ इस प्रकार समस्त सेनाकी व्यवस्था कर जगद्गुरु भगवान्ने ज्योंही कर्मोंके जीतनेका उद्योग किया त्यों ही भगवान्की गुण-श्रेणी निर्जरा के बलसे कर्मरूपी सेना खण्ड खण्ड होकर नष्ट होने लगी ॥२३८॥ ज्यों ज्यों भगवान्की विशुद्धि आगे आगे बढ़ती जाती थी त्यों त्यों कर्मरूपी सेनाका भंग और रस अर्थात् फल देनेकी शक्ति

१ परिणामशक्तिः । पक्षे विश्वासहेतुभूतसैन्यं च । २ प्रथमं पुराभागे च । ३ विहितान्तःकरणशुद्धिः । पक्षे कृतसेनान्तःशुद्धिः । ४ उद्धूता निरस्ता कृतान्तेन यमेन कृता विक्रिया विकारो येनासौ । ५ उद्दीप्तोऽभूत् । उत्तस्थौ द०, अ०, प०, इ०, स०, ल०, म० । ६ मोहनीयशत्रुसेनाविजयार्थम् । ७ शिरःकवचम् । ८ कवचम् । वर्म दंशनम । 'उरच्छदः कङ्कालोऽजगरः कवचोऽस्त्रियाम् ।' इत्यभिधानात् । ९ इन्द्रियसंयमप्राणिसंयमद्वयम् । उपेक्षासंयमापहृतसंयमद्वयं वा । १० भेत्तुमिच्छवः । ११ विशुद्धशक्तेर्भ्रंशपरिहारार्थम् । पक्षे सेनाभ्रंशपरिहारार्थम् । १२ सेनापतित्वे । १३ सेनाचरत्वम् । १४ दुःखेन भेद्याः । १५ नियमेन योद्धारः । १६ भटानाम् । १७ कथिताः । १८ विदारितं गलितं वा । १९ गुणसेनाभिः । २० इव । २१ खण्डशः । 'शल्के शकलवल्कले' इत्यभिधानात् । २२ गच्छति, वर्द्धते । २३ शक्तिक्षयः, पक्षे हर्षक्षयः ।

परप्रकृति[1]संक्रान्तिः स्थितेर्भेदो रसच्युतिः[2]। [3]निर्जीर्णिश्च गुणश्रेण्या तदासीत् कर्मवैरिणाम् ॥२४०॥
अन्तः[4]प्रकृतिसंक्षोभं मूलोद्वर्तञ्च[5] कर्मणाम्। योगशक्त्या स योगीन्द्रो विजिगीषुरिवातनोत् ॥२४१॥
भूयोऽप्रमत्ततां प्राप्य भावयन् शुद्धिमुद्धुराम्[6]। आरुक्षत् क्षपकश्रेणीं निश्रेणीं मोक्षसद्मनः ॥२४२॥
अधःप्रवृत्तकरणमप्रमादेन भावयन्। अपूर्वक[7]रणो भूत्वाऽनिवृत्तिकरणोऽभवत् ॥२४३॥
[8]तत्राद्यं शुक्लमापूर्य ध्यानोद्ध्या[9]नतिशुद्धिकः। मोहराजबलं कृत्स्नम् अपातयदसाध्वसः ॥२४४॥
[10]अङ्गरक्षानिवास्याष्टौ कषायान्निष्पिपेष[11] सः। वेद[12]शक्तीस्ततस्तिस्रो नो कषायाह्वयान्भटान् ॥२४५॥
ततः सञ्ज्वलनक्रोधं महानायकमग्रहम्[13]। मानमप्यस्य पाश्चात्यं[14] मायां लोभञ्च बादरम् ॥२४६॥
[15]प्रमृद्यैनान्[16] महाध्यानरङ्गे चारित्रसद्ध्वजः। निशातज्ञाननिस्त्रिंशो दयाकवचवर्मितः[17] ॥२४७॥

का विनाश होता जाता था ॥२३९॥ उस समय भगवान्के कर्म-रूपी शत्रुओंमें परप्रकृति रूप संक्रमण हो रहा था अर्थात् कर्मोंकी एक प्रकृति अन्य प्रकृति रूप बदल रही थी, उनकी स्थिति घट रही थी, रस अर्थात् फल देनेकी शक्ति क्षीण हो रही थी और गुण-श्रेणी निर्जरा हो रही थी ॥२४०॥ जिस प्रकार कोई विजयाभिलाषी राजा शत्रुओंकी मंत्री आदि अन्तरङ्ग प्रकृतिमें क्षोभ पैदा करता है और फिर शत्रुओंको जड़से उखाड़ देता है उसी प्रकार योगिराज भगवान् वृषभदेवने भी अपने योगबलसे पहले कर्मोंकी उत्तर प्रकृतिओंमें क्षोभ उत्पन्न किया था और फिर उन्हें जड़ सहित उखाड़ फेंकनेका उपक्रम किया था अथवा मूल प्रकृतियोंमें उद्वर्तन (उद्वेलन आदि संक्रमण विशेष) किया था ॥२४१॥ तदनन्तर उत्कृष्ट विशुद्धिकी भावना करते हुए भगवान् अप्रमत्त अवस्थाको प्राप्त होकर मोक्षरूपी महलकी सीढ़ीके समान क्षपक श्रेणीपर आरूढ़ हुए ॥२४२॥ प्रथम ही उन्होंने प्रमादरहित हो अप्रमत्तसंयत नामके सातवें गुणस्थानमें अधःकरणकी भावना की और फिर अपूर्वकरण नामक आठवें गुणस्थानमें प्राप्त होकर अनिवृत्तिकरण नामक नौवें गुणस्थानमें प्राप्त हुए ॥२४३॥ वहां उन्होंने पृथक्त्व-वितर्क नामका पहिला शुक्लध्यान धारण किया और उसके प्रभावसे विशुद्धि प्राप्त कर निर्भय हो मोह-रूपी राजाकी समस्त सेनाको पछाड़ दिया ॥२४४॥ प्रथम ही उन्होंने मोहरूपी राजा के अंगरक्षकके समान अप्रत्याख्यानावरण और प्रत्याख्यानावरण सम्बन्धी आठ कषायोंको चूर्ण किया फिर नपुंसकवेद स्त्रीवेद और पुरुषवेद ऐसे तीन प्रकारके वेदोंको तथा नौ कषाय नामके हास्यादि छह योद्धाओंको नष्ट किया था ॥२४५॥ तदनन्तर सबसे मुख्य और सबके आगे चलनेवाले संज्वलन क्रोधको, उसके बाद मानको, मायाको और बादर लोभ को भी नष्ट किया था। इस प्रकार इन कर्म-शत्रुओंको नष्ट कर महाध्यानरूपी रंगभूमिमें चारित्ररूपी ध्वजा फहराते हुए ज्ञान-रूपी तीक्ष्ण हथियार बांधे हुए और दया-रूपी कवच को धारण किये हुए महायोद्धा भगवान्ने अनिवृत्ति अर्थात् जिससे पीछे नहीं हटना पड़े ऐसी

१ अप्रशस्तानां बन्धोज्झितानां प्रकृतीनां द्रव्यस्य प्रतिसमयसंख्येयगुणं सजातीयप्रकृतिषु संक्रमणम् पक्षे शत्रुसेनासङ्क्रमणम्। २ अनुभागहानिः। पक्षे हर्षक्षयः। ३ निर्जरा। ४ भावकर्म। पक्षे आप्तबलम् ५ मूलप्रकृतिमर्दनम्। पक्षे मूलबलमर्दनम्। ६ –मुत्तराम् म०। ७ अपूर्वकरणगुणस्थानवर्ती भूत्वा ८ गुणस्थाने। ९ ज्ञानदीप्त्या। –ध्यानात्तशुद्धिकः द०, प०, अ०, इ०, स०, ल०, म०, १० मोहराजस्याङ्गरक्षकान्। ११ चूर्णीचकार। १२ पुंवेदादिशक्तीः। पक्षे प्रभुमन्त्रोत्साहशक्तीः १३ दुर्ग्राह्यम्। –मग्रगम् द०, इ०, अ०, प०, ल०, म०। १४ पश्चाद्भवम्। १५ चूर्णीकृत्य प्रमृद्यैतान् ल०, म०, इ०, अ०, स०। १६ संज्वलनक्रोधादिचतुरः। १७ सज्जः। "सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकण्टकः।" इत्यभिधानात्।

जग्राह जयभूमिं[1] ताम् अनिवृत्तिं[2] महाभटः । भटानां ह्यनिवृत्तीनां परकीयं[3] न चाग्रतः ॥२४८॥
करणत्रययाथात्म्यव्यक्तयेऽर्थपदानि[4] वै । ज्ञेयान्यमूनि[5] सूत्रार्थसद्भावज्ञैरनुक्रमात् ॥२४९॥
करणाः परिणामा ये विभक्ताः प्रथमक्षणे[6] । ते भवेयुर्द्वितीये[7]ऽस्मिन् क्षणेऽन्ये[8] च पृथग्विधाः ॥२५०॥
द्वितीयक्षणसम्बन्धिपरिणामकदम्बकम् । तच्चान्यच्च तृतीये स्याद् एवमाचरमक्षणात्[9] ॥२५१॥
ततश्चाधः प्रवृत्ताख्यं करणं तन्निरुच्यते[10] । अपूर्वकरणे नैवं[11] ते ह्यपूर्वाः प्रतिक्षणम् ॥२५२॥
करणे त्वनिवृत्ता[12]ख्ये न निवृत्ति[13]रिहाङ्गिनाम् । परिणामैर्मिथस्ते हि समभावाः प्रतिक्षणम् ॥२५३॥
[14]तत्राद्ये[15] करणे नास्ति स्थितिघाताद्युपक्रमः । [16]हापयेत् केवलं शुद्धयन् बन्धं स्थित्यनुभागयोः ॥२५४॥
अपूर्वकरणेऽप्येवं किन्तु स्थित्यनुभागयोः । हन्यादग्रं गुणश्रेण्यां[17] कुर्वन् सङ्क्रम[18]निर्जरे ॥२५५॥
तृतीये करणेऽप्येवं घटमानः पटिष्ठधीः[19] । अकृत्वा[20]न्तरमुच्छिन्द्यात् कर्मारीन् षोडशाष्ट च ॥२५६॥

नवम गुणस्थान रूप अनिवृत्ति नामकी जयभूमि प्राप्ति की सो ठीक ही है क्योंकि पीछे नहीं हटनेवाले शूरवीर योद्धाओंके आगे शत्रुकी सेना आदि नहीं ठहर सकती ॥२४६–२४८॥ अब अधःकरण, अपूर्वकरण और अनिवृत्तिकरण इन तीनों करणोंका यथार्थ स्वरूप प्रकट करने के लिये आगमके यथार्थ भावको जाननेवाले गणधरादि देवोंने जो ये अर्थ सहित पद कहे हैं वे अनुक्रमसे जानने योग्य हैं अर्थात् उनका ज्ञान प्राप्त करना चाहिये ॥२४९॥ अधःप्रवृत्ति करणके प्रथम क्षणमें जो परिणाम होते हैं वे ही परिणाम दूसरे क्षणमें होते हैं तथा इसी दूसरे क्षणमें पूर्व परिणामोंसे भिन्न और भी परिणाम होते हैं। इसी प्रकार द्वितीय क्षणसम्बन्धी परिणामोंका जो समूह है वही तृतीय क्षणमें होता है तथा उससे भिन्न जातिके और भी परिणाम होते हैं, यही क्रम चतुर्थ आदि अन्तिम समय तक होता है इसीलिये इस करणका अधः-प्रवृत्तकरण ऐसा सार्थक नाम कहा जाता है। परन्तु अपूर्वकरणमें यह बात नहीं है क्योंकि वहां प्रत्येक क्षणमें अपूर्व अपूर्व ही परिणाम होते रहते हैं इसलिये इस करणका भी अपूर्व करण यह सार्थक नाम है। अनिवृत्तिकरणमें जीवोंकी निवृत्ति अर्थात् विभिन्नता नहीं होती क्योंकि इसके प्रत्येक क्षणमें रहनेवाले सभी जीव परिणामोंकी अपेक्षा परस्परमें समान ही होते हैं इसलिये इस करणका भी अनिवृत्तिकरण यह सार्थक नाम है ॥२५०–२५३॥ इन तीनों करणोंमेंसे प्रथम करणमें स्थिति घात आदिका उपक्रम नहीं होता, किन्तु इसमें रहनेवाला जीव शुद्ध होता हुआ केवल स्थिति-बन्ध और अनुभाग-बन्धको कम करता रहता है ॥२५४॥ दूसरे अपूर्वकरणमें भी यही व्यवस्था है किन्तु विशेषता इतनी है कि इस करणमें रहनेवाला जीव गुण-श्रेणीके द्वारा स्थितिबन्ध और अनुभागबन्धका संक्रमण तथा निर्जरा करता हुआ उन दोनोंके अग्रभागको नष्ट कर देता है ॥२५५॥ इसी प्रकार तीसरे अनिवृत्तिकरणमें प्रवृत्ति करनेवाला अतिशय बुद्धिमान् जीव भी परिणामोंकी विशुद्धिमें अन्तर न डालकर सोलह और आठ कर्मरूपी शत्रुओंको उखाड़ फेंकता है ॥२५६॥

---

१ जयस्थानम्। २ अनिवृत्तिकरणस्थानम्। –मनिवर्ती महा अ०, प०, द०, इ०, स०। मनिवृत्तिर्महा ब०। ३ परबलम्। ४ अर्थमनुगतानि पदानि। ५ वक्ष्यमाणानि। ६ प्रथमे क्षणे प०, द०, म०, ल०। ७ द्वितीयोऽस्मिन् प०, इ०। ८ अपरमपि। ९ अधःप्रवृत्तकरणचरमसमयपर्यन्तम्। १० निरुक्तिरूपेण निगद्यते। ११ अधःप्रवृत्तकरणलक्षणवत् परिणामाः। १२ –वृत्त्याख्ये ल०, म०। १३ भेदः। १४ अधःप्रवृत्तादित्रये। १५ अधःप्रवृत्तकरणे। १६ हापनां हानिं कुर्यात्। १७ गुणश्रेण्योः द०, इ०। १८ प्रशस्तानां बन्धोज्झितानां प्रकृतीनां द्रव्यस्य प्रतिसमयमसंख्येयगुणैः बन्ध्यमानसजातीयप्रवृत्तिषु संक्रमणं गुणसंक्रमः। १९ अतिशयेन पटुधीः। २० अकृत्तान्तर– प०,।

गत्योरथाद्ययोर्नाम[1]प्रकृतीर्नियतोदयाः । स्त्यानगृद्धित्रिकं चा[2]स्येद् घातेनैकेन योगिराट् ॥२५७॥
ततोऽष्टौ च कषायांस्तान् हन्यादध्यात्मतत्त्ववित् । पुनः कृतान्तरः शेषाः प्रकृतीरप्यनुक्रमात् ॥२५८॥
अश्वकर्णक्रियाकृष्टिकरणादिश्च यो विधिः[3] । सोऽत्र वाच्यस्ततः सूक्ष्मसाम्परायत्वसंश्रयः ॥२५९॥
सूक्ष्मीकृतं ततो लोभं जयन्मोहं व्यजेष्ट सः । कर्षितो ह्यरिरुग्रोपि सुजयो विजिगीषुणा ॥२६०॥
तीव्रं ज्वलन्नसौ श्रेणीरङ्गे मोहारिनिर्जयात् । ज्येष्ठो मल्ल इवावल्गन् मुनिरप्रतिमल्लकः ॥२६१॥
ततः क्षीणकषायत्वम् अक्षीणगुणसङ्ग्रहः । प्राप्य तत्र रजोशेषम् अधुनात् स्नातको[4] भवन्[5] ॥२६२॥
ज्ञानदर्शन[6]वीर्यादिविघ्ना ये केचिदुद्धताः । तानशेषान् द्वितीयेन शुक्लध्यानेन चिच्छिदे ॥२६३॥
चतस्रः कटुकाः[7] कर्मप्रकृतीर्ध्यानवह्निना । निर्दहन् मुनिरुद्भूतकैवल्योऽभूत् स विश्वदृक् ॥२६४॥
अनन्तज्ञानदृग्वीर्यविरतिः[8] शुद्धदर्शनम् । दानलाभौ च भोगोपभोगावानन्त्यमाश्रिताः ॥२६५॥

अथानन्तर योगिराज भगवान् वृषभदेवने नरक और तिर्यञ्चगतिमें नियमसे उदय आनेवाली नामकर्मकी तेरह (१ नरकगति, २ नरकगति प्रायोग्यानुपूर्वी, ३ तिर्यग्गति ४ तिर्यग्गति प्रायोग्यानुपूर्वी, ५ एकेन्द्रिय जाति, ६ द्वीन्द्रियजाति ७ त्रीन्द्रियजाति, ८ चतुरिन्द्रिय जाति, ९ आतप, १० उद्योत, ११ स्थावर, १२ सूक्ष्म और १३ साधारण) और स्त्यानगृद्धि आदि तीन (१ स्त्यानगृद्धि, २ निद्रानिद्रा और ३ प्रचलाप्रचला) इस प्रकार सोलह प्रकृतियोंको एक ही प्रहारसे नष्ट किया ॥२५७॥ तदनन्तर अध्यात्मतत्त्वके जाननेवाले भगवान्ने आठ कषायों (अप्रत्याख्यानावरण और प्रत्याख्यानावरण सम्बन्धी क्रोध, मान, माया, लोभ) को नष्ट किया और फिर कुछ अन्तर लेकर शेष बची हुई (नपुंसक वेद, स्त्री वेद, पुरुष वेद, हास्य, रति, अरति, शोक, भय, जुगुप्सा, संज्वलन क्रोध, मान और माया) प्रकृतियोंको भी नष्ट किया ॥२५८॥ अश्वकर्ण क्रिया और कृष्टिकरण आदि जो कुछ विधि होती है वह सब भगवान्ने इसी अनिवृत्तिकरण गुणस्थानमें की और फिर वे सूक्ष्मसाम्पराय नामके दशवें गुणस्थानमें जा पहुंचे ॥२५९॥ वहां उन्होंने अतिशय सूक्ष्म लोभको भी जीत लिया और इस तरह समस्त मोहनीय कर्मपर विजय प्राप्त कर ली सो ठीक ही है क्योंकि बलवान् शत्रु भी दुर्बल हो जानेपर विजिगीषु पुरुष द्वारा अनायास ही जीत लिया जाता है ॥२६०॥ उस समय क्षपकश्रेणीरूपी रङ्गभूमिमें मोहरूपी शत्रुके नष्ट हो जानेसे अतिशय देदीप्यमान होते हुए मुनिराज वृषभदेव ऐसे सुशोभित हो रहे थे जैसे किसी कुश्तीके मैदानसे प्रतिमल्ल (विरोधी मल्ल) के भाग जानेपर विजयी मल्ल सुशोभित होता है ॥२६१॥ तदनन्तर अविनाशी गुणोंका संग्रह करनेवाले भगवान् क्षीणकषाय नामके बारहवें गुण-स्थानमें प्राप्त हुए। वहां उन्होंने सम्पूर्ण मोहनीय कर्मकी धूलि उड़ा दी अर्थात् उसे बिलकुल ही नष्ट कर दिया और स्वयं स्नातक अवस्थाको प्राप्त हो गये ॥२६२॥ तदनन्तर ज्ञानावरण, दर्शनावरण, और अन्तराय कर्मकी जो कुछ उद्धत प्रकृतियां थीं उन सबको उन्होंने एकत्ववितर्क नामके दूसरे शुक्लध्यानसे नष्ट कर डाला और इस प्रकार वे मुनिराज ध्यानरूपी अग्निके द्वारा अतिशय दुःखदायी चारों घातिया कर्मोंको जलाकर केवलज्ञानी हो लोकालोकके देखनेवाले सर्वज्ञ हो गये ॥२६३–२६४॥ इस प्रकार समस्त जगत्को प्रकाशित करते हुए और भव्य

१ नरकद्विकतिर्यक्द्विकविकलत्रयोद्योतातपैकेन्द्रियसाधारणसूक्ष्मस्थावराः । २ प्रतिक्षिपेत् । ३ विधेः ब०, अ० । ४ समाप्तवेदः, सम्पूर्णज्ञान इत्यर्थः । ५ स्नातकोऽभवत् द०, ल०, म०, इ० । ६ निद्रा, ज्ञानावरणादिपञ्चकम्, दर्शनावरणचतुष्कम्, निद्रा, प्रचला, अन्तरायपञ्चकञ्चेति षोडश । ७ घातिकर्माणीत्यर्थः । ८ चारित्राणि ।

नवकेवललब्धीस्ता जिनभास्वान् द्युतीरिव । स भेजे जगदुद्भासी भव्याम्भोजानि बोधयन् ॥२६६॥
इति ध्यानाग्निनिर्दग्धकर्मेन्धनचयो जिनः । बभावुद्भूतकैवल्यविभवो[1] विभवोद्भवः[2] ॥२६७॥
फाल्गुने मासि तामिस्रपक्षस्यैकादशीतिथौ । उत्तराषाढनक्षत्रे कैवल्यमुदभूद्विभोः ॥२६८॥

मालिनीच्छन्दः

भगवति जितमोहे केवलज्ञानलक्ष्म्या
स्फुरति सति सुरेन्द्राः प्राणमन्भक्तिभारात् ।
नभसि जयनिनादो विश्वदिक्कं जजृम्भे
सुरपटहरवैश्चारुद्धमासीत् खरन्ध्रम् ॥२६९॥
सुरकुजकुसुमानां वृष्टिरापप्तदुच्चैः
भ्रमरमुखरितद्यौः शारयन्ती[3] दिगन्तान् ।
[4]विरलमवतरद्भिर्नाकभाजां विमानैः
गगनजलधिरुद्यन्नौरिवाभूत् समन्तात् ॥२७०॥
मदकलरुतभृङ्गैरन्वितः स्वः स्रवन्त्याः[5]
शिशिरतरतरङ्गानास्पृशन्मातरिश्वा ।
धुतसुरभिवनान्तःपद्मकिञ्जल्कबन्धु-
र्मृदुतरमभितो [6]वान् व्यानशे दिङ्मुखानि ॥२७१॥

जीवरूपी कमलोंको प्रफुल्लित करते हुए वे वृषभ-जिनेन्द्ररूपी सूर्य किरणोंके समान अनन्त ज्ञान दर्शन, वीर्य, चारित्र, शुद्ध सम्यक्त्व, दान,लाभ,भोग और उपभोग इन अनन्त नौ लब्धियों-को प्राप्त हुए ॥२६५–२६६॥ इस प्रकार जिन्होंने ध्यान-रूपी अग्निके द्वारा कर्मरूपी ईंधनके समूहको जला दिया है, जिनके केवलज्ञानरूपी विभूति उत्पन्न हुई है और जिन्हें समवसरणका वैभव प्राप्त हुआ है ऐसे वे जिनेन्द्र भगवान् बहुत ही सुशोभित हो रहे थे ॥२६७॥ फाल्गुन मासके कृष्ण पक्षकी एकादशीके दिन उत्तराषाढ़ नक्षत्रमें भगवान्को केवलज्ञान उत्पन्न हुआ था ॥२६८॥ मोहनीय कर्मको जीतनेवाले भगवान् वृषभदेव ज्यों ही केवलज्ञान-रूपी लक्ष्मीसे देदीप्यमान हुए त्योंही समस्त देवोंके इन्द्र भक्तिके भारसे नम्रीभूत हो गये अर्थात् उन्होंने भगवान्को शिर झुकाकर नमस्कार किया, आकाशमें सभी ओर जयजय शब्द बढ़ने लगा और आकाशका विवर देवोंके नगाड़ोंके शब्दोंसे व्याप्त हो गया ॥२६९॥ उसी समय भ्रमरोंके शब्दोंसे आकाशको शब्दायमान करती हुई तथा दिशाओंके अन्तको संकुचित करती हुई कल्पवृक्षके पुष्पोंकी वर्षा बड़े ऊंचेसे होने लगी और विरल विरल रूपसे उतरते हुए देवोंके विमानोंसे आकाशरूपी समुद्र ऐसा हो गया मानो उसमें चारों ओर नौकाएं ही तैर रही हों ॥२७०॥ उसी समय मदसे मनोहर शब्द करनेवाले भ्रमरोंसे सहित, गंगा नदीकी अत्यन्त शीतल तरङ्गोंका स्पर्श करता हुआ और हिलते हुए सुगन्धित वनके मध्य भागमें स्थित कमलों की परागसे भरा हुआ वायु चारों ओर धीरे धीरे बहता हुआ दिशाओंमें व्याप्त हो रहा था

१ केवलज्ञानसम्पत्तिः । २ समवसरणबहिर्भूतीनाम् उद्भवो यस्य । ३ नानावर्णान् कुर्वन्ती । ४ तत्र तत्र व्याप्तं यथा भवति तथा । ५ सुरनिम्नगायाः । ६ वातीति वान् ।

युगपदथ [1]नभस्तोऽनभ्रि[2]ताद् वृष्टिपातो
[3]विरजयति तदा स्म प्राङ्गणं लोकनाड्याः ।
समवसरणभूमेः शोधना येन विष्वग्
विततसलिलबिन्दुर्विश्वभर्तुर्जिनेशः[4] ॥२७२॥

वसन्ततिलकम्

इत्थं तदा त्रिभुवने प्रमदं वितन्वन्
उद्भूतकेवलरवेर्वृषभोदयाद्रेः ।
आसीज्जगज्जनहिताय जिनाधिपत्य-
[5]प्रख्यापकः सपदि तीर्थकरानुभावः[6] ॥२७३॥

इत्यार्षे भगवज्जिनसेनाचार्यप्रणीते त्रिषष्टिलक्षणमहापुराणसङ्ग्रहे
भगवत्केवल्योत्पत्तिवर्णनं नाम
विंशतितमं पर्व ॥

॥२७१॥ जिस समय यह सब हो रहा था उसी समय आकाशसे बादलोंके बिना ही होनेवाली मन्द मन्द वृष्टि लोकनाड़ीके आंगनको धूलिरहित कर रही थी उस वृष्टिकी जलकी बूंदें चारों ओर फैल रही थीं जिससे ऐसी जान पड़ती थीं मानो जगत्के स्वामी वृषभ जिनेन्द्रके समवसरणकी भूमिको शुद्ध करनेके लिये ही फैल रही हों ॥२७२॥ इस प्रकार उस समय भगवान् वृषभदेवरूपी उदयाचलसे उत्पन्न हुआ केवलज्ञान-रूपी सूर्य जगत्के जीवोंके हितके लिये हुआ था । वह केवलज्ञानरूपी सूर्य तीनों लोकोंमें आनन्दको विस्तृत कर रहा था, जिनेन्द्र भगवान्के आधिपत्यको प्रसिद्ध कर रहा था और उनके तीर्थंकरोचित प्रभावको बतला रहा था ॥२७३॥

इस प्रकार भगवज्जिनसेनाचार्य प्रणीतत्रिषष्टिलक्षण महापुराण संग्रहके हिन्दी
भाषानुवादमें बीसवां पर्व समाप्त हुआ ।

---

१ गगनात् । २ मेघरहितात् । ३ मेघरहितं करोति स्म । ४ जिनेन्द्रस्य । ५ प्रत्यायकः प० । ६ तीर्थकरनामकर्मानुभावः ।

एकविंशं पर्व

अथातः [1]श्रेणिको नम्रो मुनिं पप्रच्छ गौतमम् । भगवन् बोद्धुमिच्छामि त्वत्तो ध्यानस्य विस्तरम् ॥१॥
किमस्य लक्षणं योगिन् के[2] भेदाः किञ्च निर्वचः । किं स्वा[3]मिकं कियत्कालं किं हेतु[4]फलमप्यदः[5] ॥२॥
कोऽस्य भावो भवेत् किं वा स्यादधिष्ठानमीशित[6] । भेदानां कानि नामानि कश्चै[7]षामर्थनिश्चयः ॥३॥
किमालम्बनमेतस्य बलाधा[8]नञ्च किं भवेत् । तदिदं सर्वमेवाहं बुभुत्से[9] वदतां वर ॥४॥
परं साधनमाम्नातं ध्यानं मोक्षस्य साधने । [10]ततोऽस्य[11] भगवन् ब्रूहि तत्त्वं गोप्यं[12] यती[13]शिनाम् ॥५॥
इति पृष्टवते तस्मै भगवान् गौतमोऽब्रवीत् । प्रसरद्दशनाभी[14]षु जलस्नपिततत्तनुः ॥६॥
यत्कर्मक्षपणे साध्ये साधनं परमं तपः । तत्ते[15] ध्यानाह्वयं सम्यग् अनुशास्मि यथाश्रुतम्[16] ॥७॥
ऐका[17]ग्र्येण निरोधो यः चित्तस्यैकत्र वस्तुनि । तद्ध्यानं वज्रकं[18]यस्य भवेदान्तमु[19]हूर्ततः ॥८॥
स्थिरमध्यव[20]सानं यत्तद्ध्यानं यच्चलाच[21]लम् । सानुप्रे[22]क्षाथवा चिन्ता भावना चित्तमेव वा ॥९॥
छद्मस्थेषु भवेदेतल्लक्षणं विश्वदृश्वनाम् । योगास्र[23]वस्य संरोधे ध्यानत्वमुपचर्यते ॥१०॥

अथानन्तर—श्रेणिक राजाने नम्र होकर महामुनि गौतम गणधरसे पूछा कि हे भगवन्, मैं आपसे ध्यानका विस्तार जानना चाहता हूँ ॥१॥ हे योगिराज, इस ध्यानका लक्षण क्या है ? इसके कितने भेद हैं ? इसकी निरुक्ति (शब्दार्थ) क्या है ? इसके स्वामी कौन हैं ? इसका समय कितना है ? इसका हेतु क्या है ? और इसका फल क्या है ? ॥२॥ हे स्वामिन्, इसका भाव क्या है ? इसका आधार क्या है ? इसके भेदोंके क्या क्या नाम हैं ? और उन सबका क्या क्या अभिप्राय है ? ॥३॥ इसका आलम्बन क्या है और इसमें बल पहुंचानेवाला क्या है ? हे वक्ताओंमें श्रेष्ठ, यह सब मैं जानना चाहता हूं ॥४॥ मोक्षके साधनोंमें ध्यान ही सबसे उत्तम साधन माना गया है इसलिये हे भगवन्, इसका यथार्थ स्वरूप कहिये जो कि बड़े बड़े मुनियोंके लिये भी गोप्य है ॥५॥ इस प्रकार पूछने वाले राजा-श्रेणिकसे भगवान् गौतमगणधर अपने दांतोंकी फैलती हुई किरणें-रूपी जलसे उसके शरीरका अभिषेक करते हुए कहने लगे ॥६॥ कि हे राजन्, जो कर्मोंके क्षय करने रूप कार्यका मुख्य साधन है ऐसे ध्यान नामके उत्कृष्ट तपका मैं तुम्हारे लिये आगमके अनुसार अच्छी तरह उपदेश देता हूँ ॥७॥

तन्मय होकर किसी एक ही वस्तुमें जो चित्तका निरोध कर लिया जाता है उसे ध्यान कहते हैं । वह ध्यान वज्रवृषभनाराचसंहनन वालोंके अधिकसे अधिक अन्तर्मुहूर्त तक ही रहता है ॥८॥ जो चित्तका परिणाम स्थिर होता है उसे ध्यान कहते हैं और जो चञ्चल रहता है उसे अनुप्रेक्षा, चिन्ता, भावना अथवा चित्त कहते हैं ॥९॥ यह ध्यान छद्मस्थ अर्थात् बारहवें गुणस्थानवर्ती जीवों तकके होता है और तेरहवें गुणस्थानवर्ती सर्वज्ञ देवके भी योगके बल

१ अथ । २ किम्भेदाः त०, ब० । ३ कीदृक् स्वामी यस्य तत् । ४ कीदृशे हेतुफले यस्य तत् । ५ ध्यानम् । ६ भो स्वामिन् । ७ नाम्नाम् । ८ बलजृम्भणम् । ९ बोद्धुमिच्छामि । १० कारणात् । ११ ध्यानस्य । १२ रक्षणीयम् । ज्ञेयं अ० । १३ यदीशिनाम् प० । १४ किरण । १५ तव । १६ आगमानुसारेण । १७ अनन्यमनोवृत्त्या । १८ वज्रवृषभनाराचसंहननस्य । १९ अन्तमुहूर्तपर्यन्तम् । २० परिणामः । २१ चञ्चलम् । २२ सविचारा । २३ कायवाङ्मनःकर्मरूपास्रवस्य ।

धीब[1]लायत्तवृत्तित्वाद् ध्यानं तज्ज्ञैनिरुच्यते । य[2]थार्थमभि[3]सन्धानाद् अपध्या[4]नमतो[5]ऽन्यथा[6] ॥११॥
योगो ध्यानं समाधिश्च धीरोधःस्वान्तनिग्रहः । अन्तःसंलीनता चेति तत्प[7]र्याया स्मृता बुधैः ॥१२॥
ध्यायत्यर्थाननेनेति ध्यानं करणसा[8]धनम् । ध्यायतीति च कर्तृत्वं वाच्यं स्वातन्त्र्यसम्भवात् ॥१३॥
भावमा[9]त्राभिधित्सायां ध्यातिर्वा ध्यानमिष्यते । शक्तिभेदाज्ज्ञतत्त्व[10]स्य युक्तमेकत्र[11] तत्[12]त्रयम् ॥१४॥
यद्यपि ज्ञानपर्यायो ध्यानाख्यो ध्येयगोचरः । तथाप्येकाग्रस[13]न्दष्टो धत्ते बोधादि[14]वान्यताम् ॥१५॥

से होनेवाले आस्रवका निरोध करनेके लिये उपचारसे माना जाता है ॥१०॥ ध्यानके स्वरूप को जाननेवाले बुद्धिमान् पुरुष ध्यान उसीको कहते हैं जिसकी वृत्ति अपने बुद्धि-बलके आधीन होती है क्योंकि ऐसा ध्यान ही यथार्थमें ध्यान कहा जा सकता है इससे विपरीत ध्यान अपध्यान कहलाता है ॥११॥ योग, ध्यान, समाधि, धीरोध अर्थात् बुद्धिकी चञ्चलता रोकना, स्वान्त निग्रह अर्थात् मनको वशमें करना, और अन्तःसंलीनता अर्थात् आत्माके स्वरूपमें लीन होना आदि सब ध्यानके ही पर्यायवाचक शब्द हैं—ऐसा विद्वान् लोग मानते हैं ॥१२॥ आत्मा जिस परिणामसे पदार्थका चिन्तवन करता है उस परिणामको ध्यान कहते हैं यह करणसाधनकी अपेक्षा ध्यान शब्दकी निरुक्ति है । आत्माका जो परिणाम पदार्थोंका चिन्तवन करता है उस परिणामको ध्यान कहते हैं यह कर्तृ-वाच्यकी अपेक्षा ध्यान शब्दकी निरुक्ति है क्योंकि जो परिणाम पहले आत्मा रूप कर्ताके परतन्त्र होनेसे करण कहलाता था वही अब स्वतन्त्र होने से कर्ता कहा जा सकता है । और भाव-वाच्यकी अपेक्षा करनेपर चिन्तवन करना ही ध्यान की निरुक्ति है । इस प्रकार शक्तिके भेदसे ज्ञान-स्वरूप आत्माके एक ही विषयमें तीन भेद होना उचित ही है ॥ भावार्थ-व्याकरणमें कितने ही शब्दोंकी निरुक्ति करण-साधन, कर्तृ-साधन और भावसाधनकी अपेक्षा तीन तीन प्रकारसे की जाती है । जहां करणकी मुख्यता होती है उसे करण-साधन कहते हैं, जहां कर्ताकी मुख्यता है उसे कर्तृ-साधन कहते हैं और जहां क्रियाकी मुख्यता होती है उसे भाव-साधन कहते हैं । यहां आचार्यने आत्मा, आत्माके परिणाम और चिन्तवन रूप क्रियामें नय विवक्षासे भेदाभेद रूपकी विवक्षा कर एक ही ध्यान शब्दकी तीनों साधनों द्वारा निरुक्ति की है, जिस समय आत्मा और परिणाम में भेद-विवक्षा की जाती है उस समय आत्मा जिस परिणामसे ध्यान करे वह परिणाम ध्यान कहलाता है ऐसी करणसाधनसे निरुक्ति होती है । जिस समय आत्मा और परिणाममें अभेद विवक्षा की जाती है उस समय जो परिणाम ध्यान करे वही ध्यान कहलाता है, ऐसी कर्तृ-साधनसे निरुक्ति होती है और जहां आत्मा तथा उसके प्रदेशोंमें होनेवाली ध्यान रूप क्रिया में अभेद माना जाता है उस समय ध्यान करना ही ध्यान कहलाता है ऐसी भावसाधनसे निरुक्ति सिद्ध होती है ॥१३–१४॥ यद्यपि ध्यान ज्ञानकी ही पर्याय है और ध्येय अर्थात् ध्यान करने योग्य पदार्थोंको ही विषय करनेवाला है तथापि एक जगह एकत्रित रूपसे देखा जानेके कारण ज्ञान, दर्शन, सुख और वीर्य रूप-व्यवहारको भी धारण कर लेता है । भावार्थ—स्थिर रूपसे पदार्थको जानना ध्यान कहलाता है इसलिये ध्यान ज्ञानकी एक पर्याय विशेष है । आत्माके जो प्रदेश ज्ञान रूप हैं वे ही प्रदेश दर्शन, सुख और वीर्य रूप भी हैं इसलिये एक ही जगह रहनेके कारण ध्यानमें दर्शन सुख आदिका भी व्यवहार किया जाता है ॥१५॥

---

१ कायबल । २ ध्यानलक्षणयुक्तम् । ३ अभिप्रायमाश्रित्य । ४ चिन्तादिरूपम् । ५ उक्तलक्षण-ध्यानात् । ६ धीबलायत्तवृत्तिभावाज्जातम् । ७ ध्यानपर्य्यायाः । ८ करणव्युत्पत्त्या निष्पन्नम् । ९ सत्ता-मात्रमभिधातुमिच्छायां सत्याम् । १० आत्मस्वरूपस्य । ११ ध्याने । १२ करणकर्तृभावसाधनानां त्रयम् । १३ सम्बद्धो भूत्वा । –संदृष्टो ल०, प० । संदिष्टो द० । १४ एव इत्यर्थः । –वाच्यताम् ल०, म०, द० ।

हर्षामर्षादिवत् सोऽयं चिद्धर्मोऽप्यवबोधितः । प्रकाशते [1]विभिन्नात्मा कथञ्चित् स्तिमितात्मकः ॥१६॥
ध्यानस्यालम्बनं कृत्स्नं जगत्तत्त्वं यथास्थितम् । विनात्मात्मीयसङ्कल्पाद् औदासीन्ये निवेशितम् ॥१७॥
अथवा ध्येयमध्यात्म[2]तत्त्वं मुक्ते[3]तरात्मकम् । तत्तत्त्वचिन्तनं ध्यातुः उपयोग[4]स्य शुद्धये ॥१८॥
उपयोगविशुद्धौ च बन्धहेतून् [5]व्युदस्यत । संवरो निर्जरा चैव ततो मुक्तिरसंशयम् ॥१९॥
मुमुक्षोर्ध्यातुकामस्य सर्वमालम्बनं जगत् । यद्यद्यथास्थितं वस्तु तथा तत्तद्व्यव[6]स्यतः ॥२०॥
किमत्र बहुना यो यः कश्चि[7]द्भावः सपर्ययः । स सर्वोऽपि यथान्यायं[8] ध्येयकोटिं विगाहते ॥२१॥
शुभाभिसन्धि[9]तो ध्याने स्यादेवं ध्येयकल्पना । प्रीत्यप्रीत्यभिसन्धानाद् असद्ध्याने विप[10]र्ययः ॥२२॥
अतत्तदित्यतत्त्वज्ञो वैपरीत्येन भावयन् । प्रीत्यप्रीती समा[11]धाय संक्लिष्टं ध्यानमृच्छति ॥२३॥

जिस प्रकार सुख तथा क्रोध आदि भाव चैतन्यके ही परिणाम कहे जाते हैं परन्तु वे उससे भिन्न रूप होकर प्रकाशमान होते हैं–अनुभवमें आते हैं इसी प्रकार अन्तःकरणका संकोच करने रूप ध्यान भी यद्यपि चैतन्य (ज्ञान) का परिणाम वतलाया गया है तथापि वह उससे भिन्न रूप होकर प्रकाशमान होता है । भावार्थ–पर्याय और पर्यायीमें कथंचिद् भेदकी विवक्षा कर यह कथन किया गया है ॥१६॥ जगत्के समस्त तत्त्व जो जिस रूपसे अवस्थित हैं और जिनमें यह मेरे हैं और मैं इनका स्वामी हूं ऐसा संकल्प न होनेसे जो उदासीन रूपसे विद्यमान हैं वे सब ध्यानके आलम्बन (विषय) हैं । भावार्थ–ध्यानमें उदासीन रूपसे समस्त पदार्थों का चिन्तवन किया जा सकता है ॥१७॥ अथवा संसारी और मुक्त इस प्रकार दो भेदवाले आत्म तत्त्वका चिन्तवन करना चाहिये क्योंकि आत्मतत्त्वका चिन्तवन ध्यान करनेवाले जीव के उपयोगकी विशुद्धिके लिये होता है ॥१८॥ उपयोगकी विशुद्धि होनेसे यह जीव बन्धके कारणोंको नष्ट कर देता है, बन्धके कारण नष्ट होनेसे उसके संवर और निर्जरा होने लगती है तथा संवर और निर्जराके होनेसे इस जीवको निःसन्देह मुक्तिकी प्राप्ति हो जाती है ॥१९॥ जो जो पदार्थ जिस जिस प्रकारसे अवस्थित हैं उसको उसी उसी प्रकारसे निश्चय करनेवाले तथा ध्यानकी इच्छा रखनेवाले मोक्षाभिलाषी पुरुषके यह समस्त संसार आलम्बन है । भावार्थ–राग-द्वेषसे रहित होकर किसी भी वस्तुका ध्यानकर मोक्ष प्राप्त किया जा सकता है ॥२०॥ अथवा इस विषयमें बहुत कहनेसे क्या लाभ है संक्षेपमें इतना ही समझ लेना चाहिये कि इस संसारमें अपनी अपनी पर्यायों सहित जो जो पदार्थ हैं वे सब आम्नायके अनुसार ध्येय कोटिमें प्रवेश करते हैं अर्थात् उन सभीका ध्यान किया जा सकता है ॥२१॥ इस प्रकार जो ऊपर ध्यान करने योग्य पदार्थोंका वर्णन किया गया है वह सब शुभ पदार्थका चिन्तवन करनेवाले ध्यानमें ही समझना चाहिये । यदि इष्ट अनिष्ट वस्तुओंका चिन्तवन किया जावेगा तो वह असद्ध्यान कहलावेगा और उसमें ध्येयकी कोई कल्पना नहीं की जाती अर्थात् असद्-ध्यानका कुछ भी विषय नहीं है–कभी असद्ध्यान नहीं करना चाहिये ॥२२॥ जो मनुष्य तत्त्वोंका यथार्थ स्वरूप नहीं समझता वह विपरीत भावसे अतद्रूप वस्तुको भी तद्रूप चिन्तवन करने लगता है और पदार्थोंमें इष्ट अनिष्ट बुद्धि कर केवल संक्लेश सहित ध्यान धारण

१ वैभिन्नात्मा इति क्वचित् । २ आत्मतत्त्वम् । ३ मुक्तजीवसंसारजीवस्वरूपम् । ४ ज्ञानस्य । ५ निरस्यतः पुंसः । –नुदस्यतः ल०, म० । ६ निश्चिन्वतः । ७ पदार्थः । ८ यथाप्रमाणम् । यथाम्नायं ल०, म०, द०, अ०, इ०, स० । ९ शुभाभिप्रायमाश्रित्य । शुभाभि-सन्धिनि ल०, म०, द० । १० ध्येयकल्पना भवतीत्यर्थः । ११ आश्रित्य ।

सङ्कल्पवशगो मूढो वस्त्विष्टानिष्टतां नयेत्[1]। रागद्वेषौ ततस्ताभ्यां बन्धं दुर्मोचमश्नुते ॥२४॥
सङ्कल्पो मानसी वृत्तिः विषयेष्वनुतर्षिणी[2]। सैव[3] दुष्प्रणिधानं स्याद् अपध्यानमतो विदुः ॥२५॥
तस्मादाशयशुद्धयर्थम् इष्टा तत्त्वार्थभावना। ज्ञानशुद्धिरतस्तस्यां ध्यानशुद्धिरुदाहृता ॥२६॥
प्रशस्तमप्रशस्तञ्च ध्यानं संस्मर्यते द्विधा। शुभाशुभाभिसन्धानात् प्रत्येकं तद्द्वयं द्विधा ॥२७॥
चतुर्धा तत्खलु ध्यानम् इत्याप्तैरनुवर्णितम्। आर्तं रौद्रञ्च धर्म्यञ्च शुक्लञ्चेति विकल्पतः ॥२८॥
हेयमाद्यं द्वयं विद्धि दुर्ध्यानं भववर्धनम्। उत्तरं द्वितयं ध्यानम् उपादेयन्तु योगिनाम् ॥२९॥
तेषामन्तर्भिदा[4] वक्ष्ये लक्ष्म निर्वचनं तथा। [5]बलाधानमधिष्ठानं कालभावफलान्यपि ॥३०॥
ऋते भवमथार्त्तं स्याद् ध्यानमाद्यं चतुर्विधम्। [6]इष्टानवाप्त्यनिष्टाप्तिनिदानासात[7]हेतुकम् ॥३१॥
विप्रयोगे मनोज्ञस्य तत्संयोगानु[8]तर्षणम्। अमनोज्ञार्थसंयोगे तद्वियोगानुचिन्तनम् ॥३२॥
निदानं भोगकाङ्क्षोत्थं संक्लिष्टस्यान्यभोगतः। स्मृत्यन्वाहरणञ्चैव[9] वेदनार्त्तस्य तत्क्षये ॥३३॥

करता है ॥२३॥ संकल्प विकल्पके वशीभूत हुआ मूर्ख प्राणी पदार्थोंको इष्ट अनिष्ट समझने लगता है उससे उसके राग द्वेष उत्पन्न होते हैं और राग द्वेषसे जो कठिनतासे छूट सके ऐसे कर्मबन्धको प्राप्त होता है ॥२४॥ विषयोंमें तृष्णा बढ़ानेवाली जो मनकी प्रवृत्ति है वह संकल्प कहलाती है उसी संकल्पको दुष्प्रणिधान कहते हैं और दुष्प्रणिधानसे अपध्यान होता है ॥२५॥ इसलिये चित्तकी शुद्धिके लिये तत्त्वार्थकी भावना करनी चाहिये क्योंकि तत्त्वार्थकी भावना करनेसे ज्ञानकी शुद्धि होती है और ज्ञानकी शुद्धि होनेसे ध्यानकी शुद्धि होती है ॥२६॥ शुभ और अशुभ चिन्तवन करनेसे वह ध्यान प्रशस्त तथा अप्रशस्तके भेदसे दो प्रकारका स्मरण किया जाता है उस प्रशस्त तथा अप्रशस्त ध्यानमेंसे भी प्रत्येक के दो दो भेद हैं। भावार्थ–जो ध्यान शुभ परिणामोंसे किया जाता है उसे प्रशस्त ध्यान कहते हैं और जो अशुभ परिणामोंसे किया जाता है उसे अप्रशस्त ध्यान कहते हैं। प्रशस्त ध्यानके धर्म्य और शुक्ल ऐसे दो भेद हैं तथा अप्रशस्त ध्यानके आर्त और रौद्र ऐसे दो भेद हैं ॥२७॥ इस प्रकार जिनेन्द्र भगवान्ने वह ध्यान आर्त रौद्र धर्म्य और शुक्लके भेदसे चार प्रकारका वर्णन किया है ॥२८॥ इन चारों ध्यानोंमेंसे पहलेके दो अर्थात् आर्त और रौद्र ध्यान छोड़नेके योग्य हैं क्योंकि वे खोटे ध्यान हैं और संसारको बढ़ानेवाले हैं तथा आगेके दो अर्थात् धर्म्य और शुक्ल ध्यान मुनियोंको भी ग्रहण करने योग्य हैं ॥२९॥ अब इन ध्यानोंके अन्तर्भेद, उनके लक्षण, उनकी निरुक्ति, उनके बलाधान, आधार, काल, भाव और फलका निरूपण करेंगे ॥३०॥

जो ऋत अर्थात् दुःखमें हो वह पहला आर्त्तध्यान है वह चार प्रकारका होता है पहला इष्ट वस्तुके न मिलनेसे, दूसरा अनिष्ट वस्तुके मिलनेसे, तीसरा निदानसे और चौथा रोग आदिके निमित्तसे उत्पन्न हुआ ॥३१॥ किसी इष्ट वस्तुके वियोग होनेपर उसके संयोगके लिये बार-बार चिन्तवन करना सो पहला आर्तध्यान है इसी प्रकार किसी अनिष्ट वस्तुके संयोग होनेपर उसके वियोगके लिये निरन्तर चिन्तवन करना सो दूसरा आर्तध्यान है ॥३२॥ भोगोंकी आकांक्षासे जो ध्यान होता है वह तीसरा निदान नामका आर्तध्यान कहलाता है। यह ध्यान दूसरे पुरुषोंकी भोगोपभोगकी सामग्री देखनेसे संक्लिष्ट चित्तवाले जीवके होता है और किसी वेदनासे पीडित मनुष्यका उस वेदनाको नष्ट करनेके लिये जो बार-बार चिन्तवन

१ इष्टानिष्टनयनात्। २ वाञ्छावती। ३ दुष्टचिन्ता। दुःप्रणिधानं अ०, प०। ४ अवान्तरभेदान्। –नर्न्तर्भिदां ल०, म०, इ०, अ०, प०, स०। ५ बलजृम्भणम्। ६ इष्टवियोग-हेतुकमनिष्टसंयोगहेतुकं निदानहेतुकम् असाताहेतुकमिति। ७ –नाशानहे– ल०, म०। ८ वाञ्छा। ९ स्मृत्यविच्छिन्नप्रवर्तनम्। चिन्ताप्रबन्धमित्यर्थः।

ऋते विना मनोज्ञार्थाद् भवमिष्टवियोगजम् । निदान[1]प्रत्ययञ्चैवम् अप्राप्तेष्टार्थचिन्तनात् ॥३४॥
ऋतेऽप्यु[2]पगतेऽनिष्टे भवमार्तं द्वितीयकम् । भवेच्चतुर्थमप्येवं[3] वेदनोपगमोद्भवम् ॥३५॥
प्राप्त्यप्राप्त्योर्मनोज्ञेतरार्थयोः स्मृतियोजने[4] । निदानवेदना[5]पायविषये चानुचिन्तने[6] ॥३६॥
इत्युक्तमार्तमार्तात्मचिन्त्यं ध्यानं चतुर्विधम् । प्रमादाधिष्ठितं तत्तु[7] षड्[8]गुणस्थानसंश्रितम् ॥३७॥
अप्रशस्ततमं लेश्या[9]त्रयमाश्रित्य जृम्भितम् । अन्तर्मुहूर्तकालं तद् अ[10]प्रशस्तावलम्बनम् ॥३८॥
क्षायोपशमिकोऽस्य स्याद् भावस्तिर्यग्गतिः फलम् । तस्माद् दुर्ध्यानमार्ताख्यं हेयं श्रेयोऽर्थिनामिदम् ॥३९॥
मूर्च्छा[11]कौशील्य[12]कैनाश्य[13]कौसीद्या[14]न्यतिगृध्नुता[15] । भयोद्वे[16]गानुशोकाश्च लिङ्गा[17]न्यार्ते स्मृतानि वै ॥४०
बाह्यञ्च लिङ्गमार्तस्य गात्रग्ला[18]निर्विवर्णता । हस्तन्यस्तकपोलत्वं [19]साश्रुतान्यच्च तादृशम् ॥४१॥
प्राणिनां रोदनाद्[20] रुद्रः क्रूरः सत्त्वेषु निर्घृणः । पुमांस्तत्र भवं रौद्रं विद्धि ध्यानं चतुर्विधम् ॥४२॥

होता है वह चौथा आर्त्तध्यान कहलाता है ॥३३॥ इष्ट वस्तुओंके बिना होनेवाले दुःखके समय जो ध्यान होता है वह इष्ट वियोगज नामका पहला आर्तध्यान कहलाता है, इसी प्रकार प्राप्त नहीं हुए इष्ट पदार्थके चिन्तवनसे जो आर्तध्यान होता है वह निदान प्रत्यय नामका तीसरा आर्तध्यान कहलाता है ॥३४॥ अनिष्ट वस्तुके संयोगके होनेपर जो ध्यान होता है वह अनिष्ट संयोगज नामका तीसरा आर्तध्यान कहलाता है और वेदना उत्पन्न होनेपर जो ध्यान होता है वह वेदनोपगमोद्भव नामका चौथा आर्तध्यान कहलाता है ॥३५॥ इष्ट वस्तुकी प्राप्तिके लिये, अनिष्ट वस्तुकी अप्राप्तिके लिये, भोगोपभोगकी इच्छाके लिये और वेदना दूर करनेके लिये जो बार-बार चिन्तवन किया जाता है उसी समय ऊपर कहा हुआ चार प्रकारका आर्तध्यान होता है ॥३६॥ इस प्रकार आर्त अर्थात् पीड़ित आत्मावाले जीवोंके द्वारा चिन्तवन करने योग्य चार प्रकारके आर्तध्यानका निरूपण किया। यह कषाय आदि प्रमादसे अधिष्ठित होता है और प्रमत्तसंयत नामक छठवें गुणस्थान तक होता है ॥३७॥ यह चारों प्रकारका आर्तध्यान अत्यन्त अशुभ, कृष्ण, नील और कापोत लेश्याका आश्रय कर उत्पन्न होता है,इसका काल अन्तर्मुहूर्त है और आलम्बन अशुभ है ॥३८॥ इस आर्तध्यानमें क्षायोपशमिक भाव होता है और तिर्यञ्च गति इसका फल है इसलिये यह आर्त नामका खोटा ध्यान कल्याण चाहनेवाले पुरुषों द्वारा छोड़ने योग्य है ॥३९॥ परिग्रहमें अत्यन्त आसक्त होना, कुशील रूप प्रवृत्ति करना, कृपणता करना, व्याज लेकर आजीविका करना, अत्यन्त लोभ करना, भय करना, उद्वेग करना और अतिशय शोक करना ये आर्तध्यानके चिह्न हैं ॥४०॥ इसी प्रकार शरीरका क्षीण हो जाना, शरीरकी कान्ति नष्ट हो जाना, हाथोंपर कपोल रखकर पश्चात्ताप करना, आंसू डालना तथा इसी प्रकार और और भी अनेक कार्य आर्तध्यानके बाह्य चिह्न कहलाते हैं ॥४१॥ इस प्रकार आर्तध्यानका वर्णन पूर्ण हुआ, अब रौद्र ध्यानका निरूपण करते हैं—जो पुरुष प्राणियोंको रुलाता है वह रुद्र क्रूर अथवा सब जीवोंमें निर्दय कहलाता

---

१ निदानहेतुकम् । २ अनिष्टे वस्तुनि समागते इति भावः । ह्युपगते ल०, म० । ३ द्वितीयार्त्तध्यानोक्तप्रकारेण । ४ मनोज्ञार्थप्राप्तौ । स्मृतियोजनम् । ५ निदानञ्च वेदनापायश्च निदानवेदनापायौ निदानवेदनापायौ विषयो ययोस्ते निदानवेदनापायविषये । ६ निदानानुचिन्तनं वेदनापायानुचिन्तनमित्यर्थः । ७ ध्यानम् । ८ षड्गुणस्थानसंश्रितमित्यनेन किंस्वामिकमिति पदं व्याख्यातम् । ९ लेश्यात्रयमाश्रित्य जृम्भितमित्यनेन बलाधानमुक्तम् । १० अप्रशस्तपरिणामावलम्बनम् । अनेन किमालम्बनमिति पदं प्रोक्तम् । ११ परिग्रहः । १२ कुशीलत्व । १३ लुब्धत्व अथवा कृतघ्नत्व । १४ आलस्य । १५ अत्यभिलाषिता । १६ इष्टवियोगेषु विक्लवभाव एवोद्वेगः । चित्तचलन । १७ चिह्नानि । १८ गात्रम्लानिः ट० । शरीरपोषणम् । १९ वाष्पवारिसहितम् । २० रोदनकारित्वात् ।

हिंसानन्दमृषानन्दस्तेयसंरक्षणात्मकम् । षष्ठात्तु तद्गुणस्थानात् प्राक् पञ्चगुणभूमिकम् ॥४३॥
प्रकृष्टतरदुर्लेश्यात्रयोपोद्‌बलबृंहितम् । अन्तर्मुहूर्तकालोत्थं पूर्ववद्भाव[2] इष्यते ॥४४॥
वधबन्धाभिसन्धानम् अङ्गच्छेदोपतापने । [3]दण्डपारुष्यमित्यादि हिंसानन्दः स्मृतो बुधैः ॥४५॥
हिंसानन्दं समाधाय[4] हिंस्रः प्राणिषु निर्घृणः । हिनस्त्यात्मानमेव प्राक् पश्चाद् हन्यान्न वा परान् ॥४६॥
सिक्थमत्स्यः किलैकोऽसौ स्वयम्भूरमणाम्बुधौ । महामत्स्यसमान्दोषान् अवाप स्मृतिदोषतः ॥४७॥
पुरा किलारविन्दाख्यः प्रख्यातः खचराधिपः । रुधिरस्नानरौद्राभिसन्धिः[6] श्वा[7]भ्रीं विवेश सः ॥४८॥
[8]अनानृशंस्यं हिंसोपकरणादानतत्कथाः । निसर्गहिंस्रता[9] चेति लिङ्गान्यस्य[10] स्मृतानि वै ॥४९॥
मृषानन्दो मृषावादैः अतिसन्धानचिन्तनम्[11] । वाक्पारुष्यादिलिङ्गं तद्[12] द्वितीयं रौद्रमिष्यते ॥५०॥

है ऐसे पुरुषमें जो ध्यान होता है उसे रौद्रध्यान कहते हैं यह रौद्र ध्यान भी चार प्रकारका होता है ॥४२॥ हिंसानन्द अर्थात् हिंसामें आनन्द मानना, मृषानन्द अर्थात् झूठ बोलनेमें आनन्द मानना, स्तेयानन्द अर्थात् चोरी करनेमें आनन्द मानना और संरक्षणानन्द अर्थात् परिग्रहकी रक्षामें ही रात-दिन लगा रहकर आनन्द मानना ये रौद्र ध्यानके चार भेद हैं। यह ध्यान छठवें गुणस्थानके पहले पहले पांच गुणस्थानोंमें होता है ॥४३॥ यह रौद्रध्यान अत्यन्त अशुभ, कृष्ण आदि तीन खोटी लेश्याओंके बलसे उत्पन्न होता है, अन्तर्मुहूर्त काल तक रहता है और पहले आर्तध्यानके समान इसका क्षायोपशमिक भाव होता है ॥४४॥ मारने और बांधने आदिकी इच्छा रखना, अंग उपांगोंको छेदना, संताप देना तथा कठोर दण्ड देना आदिको विद्वान् लोग हिंसानन्द नामका आर्तध्यान कहते हैं ॥४५॥ जीवोंपर दया न करनेवाला हिंसक पुरुष हिंसानन्द नामके रौद्रध्यानको धारण कर पहले अपने आपका घात करता है पीछे अन्य जीवोंका घात करे अथवा न करे। भावार्थ–अन्य जीवोंका मारा जाना उनके आयु कर्मके आधीन है परन्तु मारनेका संकल्प करनेवाला हिंसक पुरुष तीव्र कषाय उत्पन्न होनेसे अपने आत्माकी हिंसा अवश्य कर लेता है अर्थात् अपने क्षमा आदि गुणोंको नष्ट कर भाव हिंसाका अपराधी अवश्य हो जाता है ॥४६॥ स्वयंभूरमण समुद्रमें जो तंदुल नामका छोटा मत्स्य रहता है वह केवल स्मृतिदोषसे ही महामत्स्यके समान दोषोंको प्राप्त होता है। भावार्थ–राघव मत्स्यके कानमें जो तंदुल मत्स्य रहता है वह यद्यपि जीवोंकी हिंसा नहीं कर पाता है केवल बड़े मत्स्यके मुखविवरमें आये हुए जीवोंको देखकर उसके मनमें उन्हें मारनेका भाव उत्पन्न होता है तथापि वह उस भाव-हिंसाके कारण मरकर राघव मत्स्य के समान ही सातवें नरकमें जाता है ॥४७॥ इसी प्रकार पूर्वकालमें अरविन्द नामका प्रसिद्ध विद्याधर केवल रुधिरमें स्नान करने रूप-रौद्र ध्यानसे ही नरक गया था ॥४८॥ क्रूर होना, हिंसा के उपकरण तलवार आदिको धारण करना, हिंसाकी ही कथा करना और स्वभावसे ही हिंसक होना ये हिंसानन्द रौद्रध्यानके चिह्न माने गये हैं ॥४९॥ झूठ बोलकर लोगोंको धोखा देने का चिन्तवन करना सो मृषानन्द नामका दूसरा रौद्र ध्यान है तथा कठोर वचन बोलना आदि

१ सहाय। २ क्षायोपशमिकभावः। –भावमिष्यते ल०, म०, अ०, प०, स०, इ०, द०। ३ अभिप्रायः। ४ बाह्यलिङ्गोपलक्षितवधबन्धादिनैष्ठुर्यम्। ५ अवलम्ब्य। ६ अभिप्रायः। ७ नरकगतिम्। ८ अनृशंस्यं हि सो –ल०, म०, द०, प०। न नृशंसः अनृशंसः अनृशंसस्य भावः आनृशंस्यम् अनानृशंस्यम्, अक्रौर्यम्। 'नृशंसो घातुकः क्रूरः' इत्यर्थः। ९ स्वभावहिंसनशीलता। १० रौद्रस्य। ११ अतिवञ्चनम्। १२ ध्यानम्।

स्तेयानन्दः परद्रव्यहरणे स्मृतियोजनम् । भवेत् संरक्षणानन्दः स्मृतिरर्थार्जनादिषु ॥५१॥
प्रतीतलिङ्गमेवैतद् रौद्रध्यानद्वयं भुवि । नारकं दुःखमस्याहुः फलं रौद्रस्य दुस्तरम् ॥५२॥
बाह्यन्तु, लिङ्गमस्याहुः भ्रूभङ्गं मुखविक्रियाम्[1] । प्रस्वेदमङ्गकम्पञ्च नेत्रयोश्चातिताम्रताम् ॥५३॥
प्रयत्नेन विनैवैतद् असद्ध्या[2]नद्वयं भवेत् । अनादिवासनोद्भूतम् अतस्तद्विसृजेन्मुनिः ॥५४॥
ध्यानद्वयं विसृज्याद्यम् अस[3]त्संसारकारणम् । [4]यदोत्तरं द्वयं ध्यानं मुनिनाभ्यसिसिष्यते[5] ॥५५॥
[6]तदेदं परिकर्मेष्टं देशा[7]वस्थाद्युपाश्रयम् । बहिःसामग्र्यधीनं हि फलमत्र द्वयात्मकम्[8] ॥५६॥
शून्यालये श्मशाने वा जरदुद्यानकेऽपि[9] वा । सरित्पुलिनगिर्यग्रगह्वरे द्रुमकोटरे ॥५७॥
शुचावन्यतमे देशे चित्तहारिण्यपातके । नात्युष्णशिशिरे नापि प्रवृद्धतरमारुते ॥५८॥
विमुक्तवर्षसम्बाधे[10] सूक्ष्मजन्त्वनुपद्रुते । [11]जलसम्पातनिर्मुक्ते मन्दमन्दनभस्वति ॥५९॥
पल्यङ्कमासनं बद्ध्वा सुनिविष्टो महीतले । सममृज्वा[12]यतं बिभ्रद्गात्रमस्तब्ध[13]वृत्तिकम् ॥६०॥
स्वपर्यङ्के करं वामं न्यस्योत्तानतलं पुनः । तस्योपरीतरं[14] पाणिमपि विन्यस्य तत्समम् ॥६१॥

इसके बाह्य चिह्न हैं ॥५०॥ दूसरेके द्रव्यके हरण करने अर्थात् चोरी करनेमें अपना चित्त लगाना—उसीका चिन्तवन करना सो स्तेयानन्द नामका तीसरा रौद्र ध्यान है और धनके उपार्जन करने आदिका चिन्तवन करना सो संरक्षणानन्द नामका चौथा रौद्रध्यान है । (संरक्षणानन्दका दूसरा नाम परिग्रहानन्द भी है) ॥५१॥ स्तेयानन्द और संरक्षणानन्द इन दोनों रौद्रध्यानोंके बाह्य चिह्न संसारमें प्रसिद्ध हैं । गणधरदेवने इस रौद्र ध्यानका फल अतिशय कठिन नरकगतिके दुःख प्राप्त होना बतलाया है ॥५२॥ भौंह टेढ़ी हो जाना, मुखका विकृत हो जाना, पसीना आने लगना, शरीर कँपने लगना और नेत्रोंका अतिशय लाल हो जाना आदि रौद्र ध्यानके बाह्य चिह्न कहलाते हैं ॥५३॥ अनादि कालकी वासनासे उत्पन्न होनेवाले ये दोनों (आर्त और रौद्र) ध्यान बिना प्रयत्नके ही हो जाते हैं इसलिये मुनियोंको इन दोनोंका ही त्याग करना चाहिये ॥५४॥ संसारके कारणस्वरूप पहले कहे हुए दोनों खोटे ध्यानोंका परित्याग कर मुनि लोग अन्तके जिन दो ध्यानोंका अभ्यास करते हैं वे उत्तम हैं, देश तथा अवस्था आदिकी अपेक्षा रखते हैं, बाह्य सामग्रीके आधीन हैं और इन दोनोंका फल भी गौण तथा मुख्य की अपेक्षा दो प्रकारका है ॥५५-५६॥ अध्यात्मके स्वरूपको जाननेवाला मुनि, सूने घरमें, श्मशानमें, जीर्ण वनमें, नदीके किनारे, पर्वतकी शिखरपर, गुफामें, वृक्षकी कोटरमें अथवा और भी किसी ऐसे पवित्र तथा मनोहर प्रदेशमें, जहां आतप न हो, अतिशय गर्मी और सर्दी न हो, तेज वायु न चलता हो, वर्षा न हो रही हो, सूक्ष्म जीवोंका उपद्रव न हो, जलका प्रपात न हो और मन्द मन्द वायु बह रही हो, पर्यंक आसन बांधकर पृथिवी तलपर विराजमान हो, उस समय अपने शरीरको सम सरल और निश्चल रखे, अपने पर्यंकमें बांया हाथ इस प्रकार रक्खे कि जिससे उसकी हथेली ऊपरकी ओर हो, इसी प्रकार दाहिने हाथको भी बांया हाथ पर रक्खे, आंखोंको न तो अधिक खोले ही और न अधिक बन्द ही रक्खे, धीरे-धीरे उच्छ्वास

१ विकारम् । २ आर्तरौद्रद्वयम् । ३ असाधु । ४ यदुत्तरं ल०, म०, इ०, अ०, स०, । ५ अभ्यसितुमिच्छते । ६ तदिदं ल०, म०, इ०, अ०, स० । ७ देशासनभेदादिवक्ष्यमाणलक्षण । ८ निश्चयव्यवहारात्मकम् । अथवा मुख्यामुख्यात्मकम् । ९ पुराणोद्याने । १० सम्बन्धे ल०, म० । ११ जनसम्पात द०, इ० । १२ समसृज्वागति अ०, इ० । सममृज्वायति प०, ल०, म० । १३ प्रयत्नपरवृत्तिकम् । १४ दक्षिणहस्तम् ।

नात्युन्मिषन्न चात्यन्तं निमिषन्मन्दमुच्छ्वसन् । दन्तैर्दन्ताग्रसन्धानपरो धीरो [1]निरुद्धधीः ॥६२॥
हृदि मूर्ध्नि ललाटे वा नाभेरूर्ध्वं परत्र[2] वा । स्वाभ्यासवशतश्चित्तं निधायाध्यात्मविन्मुनिः ॥६३॥
ध्यायेद् द्रव्यादियाथात्म्यम् आगमार्थानुसारतः । परीषहोत्थिता बाधाः सहमानो निराकुलः ॥६४॥
[3]प्राणायामेऽतितीव्रे स्याद् अवश[4]स्याकुलं मनः । व्याकुलस्य समाधानभङ्गान्न ध्यानसम्भवः ॥६५॥
अपि व्युत्सृ[5]ष्टकायस्य समाधिप्रति[6]पत्तये । मन्दोच्छ्वासनिमेषादिवृत्तेर्नास्ति निषेधनम् ॥६६॥
समा[7]वस्थितकायस्य स्यात् समाधानमङ्गिनः । दुःस्थिताङ्गस्य तद्भङ्गाद् भवेदाकुलता धियः ॥६७॥
ततो यथोक्तपल्यङ्कलक्षणासनमास्थितः । ध्यानाभ्यासं प्रकुर्वीत योगी [8]व्याक्षेपमुत्सृजन् ॥६८॥
[9]पल्यङ्क इव दिध्यासोः कायोत्सर्गोऽपि सम्मतः । समप्रयुक्तसर्वाङ्गो द्वात्रिंशद्दोषवर्जितः ॥६९॥
[10]विसंस्थुलासनस्थस्य ध्रुवं गात्रस्य निग्रहः । तन्निग्रहान्मनःपीडा ततश्च विमनस्कता ॥७०॥
वैमनस्ये च किं ध्यायेत् तस्मादिष्टं सुखासनम् । कायोत्सर्गश्च पर्यङ्कः त[11]तोऽन्यद्विषमासनम् ॥७१॥
[12]तदवस्थाद्वयस्यैव प्राधान्यं ध्यायतो यतेः । प्रायस्तत्रापि पल्यङ्कम् आमनन्ति सुखासनम् ॥७२॥

ले, ऊपर और नीचेकी दोनों दांतोंकी पंक्तियोंको मिलाकर रक्खे, और धीर वीर हो मनकी स्वच्छन्द गतिको रोके फिर अपने अभ्यासके अनुसार मनको हृदयमें, मस्तकपर, ललाटमें नाभिके ऊपर अथवा और भी किसी जगह रखकर परीषहोंसे उत्पन्न हुई बाधाओंको सहता हुआ निराकुल हो आगमके अनुसार जीव अजीव आदि द्रव्योंके यथार्थ स्वरूपका चिन्तवन करे ॥५७–६४॥ अतिशय तीव्र प्राणायाम होनेसे अर्थात् बहुत देरतक श्वासोच्छ्वासके रोक रखनेसे इन्द्रियोंको पूर्ण रूपसे वशमें न करनेवाले पुरुषका मन व्याकुल हो जाता है। जिसका मन व्याकुल हो गया है उसके चित्तकी एकाग्रता नष्ट हो जाती है और ऐसा होनेसे उसका ध्यान भी टूट जाता है। इसलिये शरीरसे ममत्व छोड़नेवाले मुनिके ध्यानकी सिद्धिके लिये मन्द-मन्द उच्छ्वास लेना और पलकोंके लगने उघड़ने आदिका निषेध नहीं है ॥६५–६६॥ ध्यानके समय जिसका शरीर सम रूपसे स्थित होता है अर्थात् ऊंचा नीचा नहीं होता है उसके समाधान अर्थात् चित्तकी स्थिरता रहती है और जिसका शरीर विषम रूपसे स्थित है उसके समाधानका भंग हो जाता है और समाधानके भंग हो जानेसे बुद्धिमें आकुलता उत्पन्न हो जाती है इसलिये मुनियोंको ऊपर कहे हुए पर्यंक आसनसे बैठकर और चित्तकी चञ्चलता छोड़कर ध्यानका अभ्यास करना चाहिये ॥६७–६८॥ ध्यान करनेकी इच्छा करनेवाले मुनिको पर्यंक आसनके समान कायोत्सर्ग आसन करनेकी भी आज्ञा है। कायोत्सर्गके समय शरीरके समस्त अंगोंको सम रखना चाहिये और आचार शास्त्रमें कहे हुए बत्तीस दोषोंका बचाव करना चाहिये ॥६९॥ जो मनुष्य ध्यानके समय विषम (ऊंचे-नीचे) आसनसे बैठता है उसके शरीरमें अवश्य ही पीड़ा होने लगती है, शरीरमें पीड़ा होनेसे मनमें पीड़ा होती है और मनमें पीड़ा होनेसे आकुलता उत्पन्न हो जाती है। आकुलता उत्पन्न होनेपर कुछ भी ध्यान नहीं किया जा सकता इसलिये ध्यानके समय सुखासन लगाना ही अच्छा है। कायोत्सर्ग और पर्यंक ये दो सुखासन हैं इनके सिवाय बाकी सब विषम अर्थात् दुःख करनेवाले आसन हैं ॥७०–७१॥ ध्यान करनेवाले मुनिके प्रायः इन्हीं दो आसनोंकी प्रधानता रहती है और उन दोनोंमें

१ निरुद्धमनः। २ कण्ठादौ। ३ योगनिग्रहे, आनस्य प्राणस्य दैर्घ्ये। ४ असमर्थस्य। ५ त्यक्तशरीरममकारस्य। ६ निश्चयाय। ७ समानस्थितशरीरस्य। ८ कार्यान्तरपारवश्यम्। ९ पर्यङ्क ल०, म०, इ०। १० विषमोन्नतासनस्थस्य, अथवा वज्रवीरासनकुक्कुटासनादिविषमासनस्य। विसंष्ठुला–ल०, म०। ११ कायोत्सर्गपर्यङ्काभ्याम्। १२ कायोत्सर्गपर्यङ्कासनद्वयरूपस्यैव।

वज्रकाया महा[1]सत्त्वाः सर्वावस्थान्तरस्थिताः[2] । श्रूयन्ते ध्यानयोगेन[3] सम्प्राप्ताः पदमव्ययम् ॥७३॥
बाहुल्यापेक्षया तस्माद् अवस्था[4]द्वयसङ्गरः । सक्तानां तूपसर्गाद्यैः तद्वै[5]चित्र्यं न [6]दुष्यति ॥७४॥
देहावस्था पुनर्येव न स्याद् ध्यानोपरोधिनी । तदवस्थो मुनिर्ध्यायेत् स्थित्वा[7]सित्वाधिशय्य वा ॥७५॥
देशादिनियमोऽप्येवं प्रायो[8]वृत्तिव्यपाश्रयः । कृता[9]त्मनां तु सर्वोऽपि देशादिर्ध्यानसिद्धये ॥७६॥
स्त्रीपशुक्लीबसंस[10]क्तरहितं विजनं मुनेः । [11]सर्वदैवोचितं स्थानं ध्यानकाले विशेषतः ॥७७॥
वसतोऽस्य जनाकीर्णे विषयानभिपश्यतः । बाहुल्यादिन्द्रियार्थानां जातु[12] व्यग्रीभवेन्मनः ॥७८॥

भी पर्यंक आसन अधिक सुखकर माना जाता है ॥७२॥ आगममें ऐसा भी सुना जाता है कि जिनका शरीर वज्रमयी है और जो महा शक्तिशाली हैं ऐसे पुरुष सभी आसनोंसे विराजमान होकर ध्यानके बलसे अविनाशी पद (मोक्ष) को प्राप्त हुए हैं ॥७३॥ इसलिये कायोत्सर्ग और पर्यंक ऐसे दो आसनोंका निरूपण असमर्थ जीवोंकी अधिकतासे किया गया है। जो उपसर्ग आदिके सहन करनेमें अतिशय समर्थ हैं ऐसे मुनियोंके लिये अनेक प्रकारके आसनोंके लगानेमें दोष नहीं है। भावार्थ—वीरासन, वज्रासन, गोदोहासन, धनुरासन आदि अनेक आसन लगानेसे काय-क्लेश नामक तपकी सिद्धि होती अवश्य है पर हमेशा तप शक्तिके अनुसार ही किया जाता है। यदि शक्ति न रहते हुए भी ध्यानके समय दुखकर आसन लगाया जावे तो उससे चित्त चंचल हो जानेसे मूल तत्त्व-ध्यानकी सिद्धि नहीं हो सकेगी इसलिये आचार्यने यहांपर अशक्त पुरुषोंकी बहुलता देख कायोत्सर्ग और पर्यंक इन्हीं दो सुखासनोंका वर्णन किया है परन्तु जिनके शरीरमें शक्ति है, जो निषद्या आदि परीषहोंके सहन करनेमें समर्थ हैं उन्हें विचित्र विचित्र प्रकारके आसनोंके लगानेका निषेध भी नहीं किया है। आसन लगाते समय इस बातका स्मरण रखना आवश्यक है कि वह केवल बाह्य प्रदर्शनके लिये न हो किन्तु कायक्लेश तपश्चरणके साथ-साथ ध्यानकी सिद्धिका प्रयोजन होना चाहिये। क्योंकि जैन शास्त्रोंमें मात्र बाह्य प्रदर्शनके लिये कुछ भी स्थान नहीं है और न उस आसन लगानेवालेके लिये कुछ आत्मलाभ ही होता है ॥७४॥

अथवा शरीरकी जो जो अवस्था (आसन) ध्यानका विरोध करनेवाली न हो उसी उसी अवस्था में स्थित होकर मुनियोंको ध्यान करना चाहिये। चाहें तो वे बैठकर ध्यान कर सकते हैं, खड़े होकर ध्यान कर सकते हैं और लेटकर भी ध्यान कर सकते हैं ॥७५॥ इसी प्रकार देश आदिका जो नियम कहा गया है वह भी प्रायोवृत्तिको लिये हुए है अर्थात् हीन शक्तिके धारक ध्यान करनेवालोंके लिये ही देश आदिका नियम है पूर्ण शक्तिके धारण करनेवालोंके लिये तो सभी देश और सभी काल आदि ध्यानके साधन हैं ॥७६॥ जो स्थान स्त्री, पशु और नपुंसक जीवोंके संसर्गसे रहित हो तथा एकान्त हो वही स्थान मुनियोंके सदा निवास करनेके योग्य होता है और ध्यानके समय तो विशेष कर ऐसा ही स्थान योग्य समझा जाता है ॥७७॥ जो मुनि मनुष्योंसे भरे हुए शहर आदिमें निवास करते हैं और निरन्तर विषयोंको देखा करते हैं ऐसे मुनियोंका चित्त इन्द्रियोंके विषयोंकी अधिकता होनेसे कदाचित् व्याकुल हो सकता है

१ महामनोबलाः । २ –स्थिराः ट० । सर्वासनान्तरस्थिरा । ३ ध्यानयोजनेन । ४ कायोत्सर्गपर्यङ्कासनद्वयप्रतिज्ञा । ५ तत्कायोत्सर्गविरहासनादिविचित्रताः । ६ दुष्टो न भवति । ७ उपविश्य । ८ प्रचुरवृत्तिसमाश्रयः । ९ निश्चितात्मनाम् । १० संसर्गरहितं रागिजनरहितं वा । ११ ध्यानरहितसर्वकालेऽपि । १२ कदाचित् ।

ततो[1] [2]विविक्तशायित्वं वने वासश्च योगिनाम् । इति साधारणो मार्गो जिनस्थविरकल्पयोः ॥७९॥
इत्यमुष्यां व्यवस्थायां सत्यां धीरास्तु केचन । विहरन्ति जनाकीर्णे[3]शून्ये च समदर्शिनः ॥८०॥
न चाहोरात्रसन्ध्यादिलक्षणः कालपर्ययः । नियतोऽस्यास्ति [4]दिध्यासोः तद्ध्यानं[5] सार्वकालिकम् ॥८१॥
[6]यद्देशकालचेष्टासु सर्वास्वेव समाहिताः[7] । सिद्धाः[8] सिद्धयन्ति सेत्स्यन्ति[9]नात्र तन्नि[10]यमोऽस्यतः ॥८२॥
यदा यत्र यथावस्थो योगी ध्यानमवाप्नुयात् । स कालः स च देशः स्याद् ध्यानावस्था च सा मता ॥८३॥
प्रोक्ता ध्यातुरवस्थेयम्[11] इदानीं तस्य लक्षणम् । ध्येयं ध्यानं फलञ्चेति वाच्य[12]मेतच्चतुष्टयम् ॥८४॥
वज्रसंहननं कायम् उद्वहन् बलवत्तमम् । श्रोघ[13]शूरस्तपोयोगे स्वभ्यस्तश्रुतविस्तरः ॥८५॥
दूरोत्सारितदुर्ध्यानो दुर्लेश्याः परिवर्जयन् । लेश्याविशुद्धिमालम्ब्य भावयन्नप्रमत्तताम् ॥८६॥
प्रज्ञापारमितो योगी ध्याता स्याद्धीबलान्वितः । [14]सूत्रार्थालम्बनो धीरः सोढाशेषपरीषहः ॥८७॥
(त्रिभिर्विशेषकम्)

॥७८॥ इसलिये मुनियोंको एकान्त स्थानमें ही शयन करना चाहिये और वनमें ही रहना चाहिये यह जिनकल्पी और स्थविरकल्पी दोनों प्रकारके मुनियोंका साधारण मार्ग है ॥७९॥ यद्यपि मुनियोंके निवास करनेके लिये यह साधारण व्यवस्था कही गई है तथापि कितने ही समदर्शी धीर-वीर मुनिराज मनुष्योंसे भरे हुए शहर आदि तथा वन आदि शून्य (निर्जन) स्थानोंमें विहार करते हैं ॥८०॥ इसी प्रकार ध्यान करनेके इच्छुक धीरवीर मुनियोंके लिये दिन रात और संध्याकाल आदि काल भी निश्चित नहीं है अर्थात् उनके लिये समयका कुछ भी नियम नहीं है क्योंकि वह ध्यानरूपी धन सभी समयमें उपयोग करने योग्य है अर्थात् ध्यान इच्छानुसार सभी समयोंमें किया जा सकता है ॥८१॥ क्योंकि सभी देश, सभी काल और सभी चेष्टाओं (आसनों) में ध्यान धारण करनेवाले अनेक मुनिराज आजतक सिद्ध हो चुके हैं, अब हो रहे हैं और आगे भी होते रहेंगे इसलिये ध्यानके लिये देश काल और आसन वगैरह का कोई खास नियम नहीं है ॥८२॥ जो मुनि जिस समय, जिस देशमें और जिस आसनसे ध्यानको प्राप्त हो सकता है उस मुनिके ध्यानके लिये वही समय, वही देश और वही आसन उपयुक्त माना गया है ॥८३॥ इस प्रकार यह ध्यान करनेवालेकी अवस्थाका निरूपण किया। अब ध्यान करनेवालेका लक्षण, ध्येय अर्थात् ध्यान करने योग्य पदार्थ, ध्यान और ध्यानका फल ये चारों ही पदार्थ निरूपण करने योग्य हैं ॥८४॥

जो वज्रवृषभनाराचसंहनन वाले अतिशय बलवान् शरीरका धारक है, जो तपश्चरण करनेमें अत्यन्त शूरवीर है, जिसने अनेक शास्त्रोंका अच्छी तरहसे अभ्यास किया है, जिसने आर्त और रौद्र नामके खोटे ध्यानोंको दूर हटा दिया है, जो अशुभ लेश्याओंसे बचता रहता है, जो लेश्याओंकी विशुद्धताका अवलम्बन कर प्रमादरहित अवस्थाका चिन्तवन करता है, जो बुद्धिके पारको प्राप्त हुआ है अर्थात् जो अतिशय बुद्धिमान् है, योगी है, जो बुद्धिबलसे सहित है, जो शास्त्रोंके अर्थका आलम्बन करनेवाला है, जो धीरवीर है और जिसने समस्त परीषहों

१ कारणात्। २ एकान्तप्रदेश। ३ जनभरितप्रदेशे। ४ ध्यातुमिच्छोः। ५ तद्धनम् म०, ल०। ६ यस्मात् कारणात्। ७ समाधानयुक्ताः। ८ सिद्धपरमेष्ठिनो बभूवुरित्यर्थः। ९ सिद्धाः भविष्यन्ति। १० तद्देशकालादिनियमः। ११ आसनभेदः। १२ वक्तव्यम्। १३ समूहे शूरः। मुनिसमूहे शूरः। सम्पत्समृद्ध इत्यर्थः। उद्यत्सूरः ल०, म०, द०। उद्यसूरः इ०। १४ आगमार्थाश्रयः।

अपि चोद्भूतसंवेगः प्राप्तनिर्वेदभावनः । वैराग्यभावनोत्कर्षात् पश्यन् भोगानतर्पकान्[1] ॥८८॥
[2]सज्ज्ञानभावनापास्तमिथ्याज्ञानतमो[3]घनः । विशुद्धदर्शनापोढगाढमिथ्यात्वशल्यकः ॥८९॥
क्रियानिःश्रेयसोदर्काः प्रपद्योज्झितदुष्क्रियः । प्रोद्गतः करणीयेषु[4] व्युत्सृष्टाकरणीयकः ॥९०॥
व्रतानां प्रत्य[5]नीका ये दोषा हिंसानृतादयः । तानशेषान्निराकृत्य व्रतशुद्धिमुपेयिवान् ॥९१॥
स्वैरुदार[6]तरैः क्षान्तिमार्दवार्जवलाघवैः[7] । कषायवैरिणस्तीव्रान् क्रोधादीन् विनिवर्तयन् ॥९२॥
अनित्यानशुचीन् दुःखान् पश्यन् भावा[8]ननात्मकान्[9] । वपुरायुर्बलारोग्ययौवनादिविकल्पितान् ॥९३॥
समुत्सृज्य चिरा[10]भ्यस्तान् भावान्[11] रागादिलक्षणान् । भावयन् ज्ञानवैराग्यभावनाः प्रागभाविताः॥९४॥
भावनाभिरसंमूढो[12] मुनिर्ध्यानस्थिरीभवेत्[13] । ज्ञानदर्शनचारित्रवैराग्योपगताश्च ताः ॥९५॥
वा[14]चनापृच्छ[15]ने [16]सानुप्रेक्षणं परिव[17]र्तनम् । सद्धर्मदेशनञ्चेति ज्ञातव्या ज्ञानभावनाः ॥९६॥
संवेगः[18] [19]प्रशमस्थैर्यम् असंमूढत्वमस्मयः । आस्ति[20]क्यमनु[21]कम्पेति ज्ञेयाः सम्यक्त्वभावनाः ॥९७॥

को सह लिया है ऐसे उत्तम मुनिको ध्याता कहते हैं ॥८५–८७॥ इसके सिवाय जिसके संसारसे भय उत्पन्न हुआ है, जिसे वैराग्य की भावनाएँ प्राप्त हुई हैं, जो वैराग्य-भावनाओंके उत्कर्ष से भोगोपभोगकी सामग्रीको अतृप्ति करनेवाली देखता है, जिसने सम्यग्ज्ञानकी भावना से मिथ्याज्ञानरूपी गाढ़ अन्धकारको नष्ट कर दिया है, जिसने विशुद्ध सम्यग्दर्शनके द्वारा गाढ़ मिथ्यात्वरूपी शल्यको निकाल दिया है, जिसने मोक्षरूपी फल देनेवाली उत्तम क्रियाओं को प्राप्त कर समस्त अशुभ क्रियाएं छोड़ दी हैं, जो करने योग्य उत्तम कार्योंमें सदा तत्पर रहता है, जिसने नहीं करने योग्य कार्योंका परित्याग कर दिया है, हिंसा झूठ आदि जो व्रतोंके विरोधी दोष हैं उन सबको दूर कर जिसने व्रतोंकी परम शुद्धिको प्राप्त किया है, जो अत्यन्त उत्कृष्ट अपने क्षमा मार्दव आर्जव और लाघव रूप धर्मोंके द्वारा अतिशय प्रबल क्रोध मान माया और लोभ इन कषायरूपी शत्रुओंका परिहार करता रहता है। जो शरीर, आयु, बल, आरोग्य और यौवन आदि अनेक पदार्थोंको अनित्य, अपवित्र, दुःखदायी तथा आत्मस्वभाव-से अत्यन्त भिन्न देखा करता है, जिनका चिरकालसे अभ्यास हो रहा है ऐसे राग द्वेष आदि भावोंको छोड़कर जो पहले कभी चिन्तवनमें न आई हुई ज्ञान तथा वैराग्य रूप भावनाओं का चिन्तवन करता रहता है और जो आगे कही जानेवाली भावनाओंके द्वारा कभी मोह को प्राप्त नहीं होता ऐसा मुनि ही ध्यानमें स्थिर हो सकता है। जिन भावनाओंके द्वारा वह मुनि मोहको प्राप्त नहीं होता वे भावनाएँ ज्ञान दर्शन चारित्र और वैराग्यकी भावनाएँ कहलाती हैं ॥८८–९५॥

जैन शास्त्रोंका स्वयं पढ़ना, दूसरोंसे पूछना, पदार्थके स्वरूपका चिन्तवन करना, श्लोक आदि कण्ठ करना तथा समीचीन धर्मका उपदेश देना ये पांच ज्ञानकी भावनाएँ जाननी चाहिये ॥९६॥ संसारसे भय होना, शान्त परिणाम होना, धीरता रखना, मूढ़ताओंका त्याग करना, गर्व नहीं करना, श्रद्धा रखना और दया करना ये सात सम्यग्दर्शनकी भावनाएँ जानने-

---

१ अतृप्तिकरान् । २ संज्ञान–द०, इ० । सज्ञान– ल०, म० । ३ तमोबाहुल्यम् । ४ कर्तुं योग्येषु । ५ प्रतिकूलाः । ६ अत्युत्तमैः । ७ शौचैः । ८ पर्यायरूपानर्थान् । ९ आत्मस्वरूपा-दन्यान् । १० अनादिवासितान् । ११ पर्यायान् । १२ अक्षुभितः । १३ स्थिरो भवेत् ल०, म० । १४ पठनम् । १५ प्रश्नः । १६ विचारसहितम् । चानुप्रेक्षणम् ल०, म० । १७ परिचिन्तनम् । १८ संसारभीरुत्वम् । १९ रागादीनां विगमः । २० अखिलतत्त्वमतिः । २१ अखिलसत्त्वकृपा ।

ईर्यादि[1]विषया यत्ना मनोवाक्कायगुप्तयः । परीषहसहिष्णुत्वम् इति चारित्रभावनाः ॥९८॥
विषयेष्वनभिष्वङ्गः कायतत्त्वानुचिन्तनम् । जगत्स्वभावचिन्त्येति वैराग्यस्थैर्यभावनाः ॥९९॥
एवं भावयतो ह्यस्य ज्ञानचर्या[2]दिसम्पदि । तत्त्वज्ञस्य विरागस्य भवेदव्यग्रता धियः ॥१००॥
स चतुर्दशपूर्वज्ञो दशपूर्वधरोऽपि वा । नवपूर्वधरो वा स्याद् ध्याता सम्पूर्णलक्षणः ॥१०१॥
श्रुतेन[3] विकलेनापि स्याद् ध्याता मुनिसत्तमः । प्रबुद्धधीरधःश्रेण्या[4] धर्मध्यानस्य सुश्रुतः ॥१०२॥
स एवं लक्षणो ध्याता सामग्रीं प्राप्य पुष्कलाम्[5] । क्षपकोपशमश्रेण्योः उत्कृष्टं[6] ध्यानमृच्छति[7] ॥१०३॥
आद्यसंहननेनैव क्षपकश्रेण्यधिश्रितः । त्रिभिराद्यैर्भजेच्छ्रेणीम् इतरां श्रुततत्त्ववित् ॥१०४॥
[8]किञ्चिद्दृष्टिमुपावर्त्य[9] बहिरर्थकदम्बकात् । स्मृतिमात्मनि सन्धाय ध्यायेदध्यात्मविन्मुनिः ॥१०५॥
हृषीकाणि तदर्थेभ्यः[10] प्रत्याहृत्य ततो मनः । संहृत्य[11] धियमव्यग्रां धारयेद् ध्येयवस्तुनि ॥१०६॥
ध्येयमध्यात्मतत्त्वं[12] स्यात् पुरुषार्थोपयोगि[13] यत् । पुरुषार्थश्च निर्मोक्षो[14] भवेत्तत्साधनानि[15] च ॥१०७॥

के योग्य हैं ॥९७॥ चलने आदिके विषयमें यत्न रखना अर्थात् ईर्या, भाषा, एषणा, आदान, निक्षेपण और प्रतिष्ठापन इन पांच समितियोंका पालन करना, मनोगुप्ति वचनगुप्ति और कायगुप्तिका पालन करना तथा परीषहोंको सहन करना ये चारित्रकी भावनाएँ जानना चाहिये ॥९८॥ विषयों में आसक्त न होना, शरीर के स्वरूप का बार-बार चिन्तवन करना, और जगत् के स्वभाव का विचार करना ये वैराग्य को स्थिर रखनेवाली भावनाएं हैं ॥९९॥ इस प्रकार ऊपर कही हुई भावनाओंका चिन्तवन करनेवाले, तत्त्वोंको जाननेवाले और रागद्वेषसे रहित मुनिकी बुद्धि ज्ञान और चारित्र आदि संपदामें स्थिर हो जाती है ॥१००॥ यदि ध्यान करनेवाला मुनि चौदह पूर्वका जाननेवाला हो, दश पूर्वका जाननेवाला हो अथवा नौ पूर्वका जाननेवाला हो तो वह ध्याता संपूर्ण लक्षणोंसे युक्त कहलाता है ॥१०१॥ इसके सिवाय अल्प-श्रुत ज्ञानी अतिशय बुद्धिमान् और श्रेणीके पहले पहले धर्मध्यान धारण करनेवाला उत्कृष्ट मुनि भी उत्तम ध्याता कहलाता है ॥१०२॥ इस प्रकार ऊपर कहे हुए लक्षणोंसे सहित ध्यान करनेवाला मुनि ध्यानकी बहुत सी सामग्री प्राप्त कर उपशम अथवा क्षपक श्रेणीमें उत्कृष्ट ध्यानको प्राप्त होता है ॥ भावार्थ—उत्कृष्ट ध्यान शुक्ल ध्यान कहलाता है और वह उपशम अथवा क्षपक श्रेणीमें ही होता है ॥१०३॥ श्रुतज्ञानके द्वारा तत्त्वोंको जाननेवाला मुनि पहले वज्रवृषभनाराचसंहननसे सहित होनेपर ही क्षपक श्रेणीपर चढ़ सकता है तथा दूसरी उपशम श्रेणीको पहलेके तीन संहननों (वज्रवृषभ नाराच, वज्रनाराच और नाराच) वाला मुनि भी प्राप्त कर सकता है ॥१०४॥ अध्यात्मको जाननेवाला मुनि बाह्य पदार्थोंके समूहसे अपनी दृष्टिको कुछ हटाकर और अपनी स्मृतिको अपने आपमें ही लगाकर ध्यान करे ॥१०५॥ प्रथम तो स्पर्शन आदि इन्द्रियोंको उनके स्पर्श आदि विषयोंसे हटावे और फिर मनको मनके विषयसे हटाकर स्थिर बुद्धिको ध्यान करने योग्य पदार्थमें धारण करे—लगावे ॥१०६॥

जो पुरुषार्थका उपयोगी है ऐसा अध्यात्मतत्त्व ध्यान करने योग्य है । मोक्ष प्राप्त होना ही पुरुषार्थ कहलाता है और सम्यग्दर्शन, सम्यग्ज्ञान तथा सम्यक्चारित्र उसके साधन कहलाते

१ ईर्या आदयो विषयाः येषां ते यत्नाः । पञ्चसमितय इत्यर्थः । २ चारित्रम् । ३ असम्पूर्ण-श्रुतेनापि युत इत्यर्थः । ४ श्रेणिद्वयादधः । असंयतादिचतुर्गुणस्थानेषु धर्म्यध्यानस्य ध्याता भवतीत्यर्थः । ५ सम्पूर्णाम् । ६ शुक्लध्यानम् । ७ गच्छति । ८ अन्तर्दृष्टिम्, ज्ञानदृष्टिमित्यर्थः । ९ समीपे वर्तयित्वा । १० इन्द्रियविषयेभ्यः । ११ लयं नीत्वा । १२ आत्मस्वरूपम् । १३ उपकारि । १४ कर्मणां निरवशेषक्षयः । १५ तन्निर्मोक्षसाधनानि सम्यग्दर्शनादीनि च ।

अहं[1] ममास्रवो [2]बन्धः संवरो निर्जरा क्षयः । कर्मणामिति तत्त्वार्था ध्येयाः सप्त नवाथवा[3] ॥१०८॥
[4]षट्तयद्रव्यपर्याययाथात्म्यस्यानुचिन्तनम् । यतो[5] ध्यानं ततो ध्येयः[6] कृत्स्नः षड्द्रव्यविस्तरः ॥१०९॥
नयप्रमाणजीवादिपदार्था न्यायभासुराः[7] । जिनेन्द्रवक्त्रप्रसृता ध्येया सिद्धान्तपद्धतिः[8] ॥११०॥
श्रुतमर्थाभिधानञ्च[9] [10]प्रत्ययश्चेत्यदस्त्रिधा । तस्मिन् ध्येये जगत्तत्त्वं ध्येयतामेति कार्त्स्न्यतः ॥१११॥
अथवा पुरुषार्थस्य परां [11]काष्ठामधिष्ठितः । परमेष्ठी जिनो ध्येयो [12]निष्ठितार्थो निरञ्जनः ॥११२॥
स[13] हि कर्ममलापायात् शुद्धिमात्यन्तिकीं श्रितः । सिद्धो निरामयो ध्येयो ध्यातॄणां [14]भावसिद्धये ॥११३॥
क्षायिकानन्तदृग्बोधसुखवीर्यादिभिर्गुणैः । युक्तोऽसौ योगिनां गम्यः सूक्ष्मोपि व्यक्तलक्षणः ॥११४॥
अमूर्तो [15]निष्कलोऽप्येष योगिनां ध्यानगोचरः[16] । किञ्चिन्न्यूनान्त्यदेहानुकारी जीवघनाकृतिः ॥११५॥
निःश्रेयसार्थिभिर्भव्यैः प्राप्तनिःश्रेयसः स हि । ध्येयः श्रेयस्करः सार्वः[17] [18]सर्वदृक् सर्वभाव[19]वित् ॥११६॥

हैं । ये सब भी ध्यान करने योग्य हैं ॥१०७॥ मैं अर्थात् जीव और मेरे अजीव आस्रव बन्ध संवर निर्जरा तथा कर्मोंका क्षय होने रूप मोक्ष इस प्रकार ये सात तत्त्व ध्यान करने योग्य हैं अथवा इन्हीं सात तत्त्वोंमें पुण्य और पाप मिला देनेपर नौ पदार्थ ध्यान करने योग्य हैं ॥१०८॥ क्योंकि छह नयोंके द्वारा ग्रहण किये हुए जीव आदि छह द्रव्यों और उनकी पर्यायोंके यथार्थ स्वरूपका बार बार चिन्तवन करना ही ध्यान कहलाता है, इसलिये छह द्रव्योंका समस्त विस्तार भी ध्यान करने योग्य है ॥१०९॥ नय, प्रमाण, जीव, अजीव आदि पदार्थ और सप्तभंगी रूप न्यायसे देदीप्यमान होनेवाली तथा जिनेन्द्रदेवके मुखसे प्रकट हुई सिद्धान्तशास्त्रोंकी परिपाटी भी ध्यान करने योग्य है अर्थात् जैन शास्त्रोंमें कहे गये समस्त पदार्थ ध्यान करनेके योग्य हैं ॥११०॥ शब्द, अर्थ और ज्ञान इस प्रकार तीन प्रकारका ध्येय कहलाता है । इस तीन प्रकारके ध्येयमें ही जगत्के समस्तपदार्थ ध्येयकोटिको प्राप्त हो जाते हैं । भावार्थ–जगत्के समस्त पदार्थ शब्द अर्थ और ज्ञान इन तीनों भेदोंमें विभक्त हैं इसलिये शब्द, अर्थ और ज्ञानके ध्येय (ध्यान करने योग्य) होनेपर जगत्के समस्त पदार्थ ध्येय हो जाते हैं ॥१११॥ अथवा पुरुषार्थकी परम काष्ठाको प्राप्त हुए, कर्मरूपी शत्रुओंको जीतनेवाले, कृतकृत्य और रागादि कर्ममलसे रहित सिद्ध परमेष्ठी ध्यान करने योग्य हैं ॥११२॥ क्योंकि वे सिद्ध परमेष्ठी कर्मरूपी मलके दूर हो जानेसे अविनाशी विशुद्धिको प्राप्त हुए हैं और रोगादि क्लेशोंसे रहित हैं इसलिये ध्यान करनेवाले पुरुषोंको अपने भावोंकी शुद्धिके लिये उनका अवश्य ही ध्यान करना चाहिये । ॥११३॥ वे सिद्ध भगवान् कर्मोंके क्षयसे होनेवाले अनन्तदर्शन, अनन्तज्ञान, अनन्त सुख और अनन्त वीर्य आदि गुणोंसे सहित हैं और उनके यथार्थ स्वरूपको केवल योगी लोग ही जान सकते हैं । यद्यपि वे सूक्ष्म हैं तथापि उनके लक्षण प्रकट हैं ॥११४॥ यद्यपि वे भगवान् अमूर्त और अशरीर हैं तथापि योगी लोगोंके ध्यानके विषय हैं अर्थात् योगी लोग उनका ध्यान करते हैं । उनका आकार अन्तिम शरीरसे कुछ कम केवल जीव प्रदेशरूप है ॥११५॥ मोक्षकी इच्छा करनेवाले भव्य जीवोंको उन्हींसे मोक्षकी प्राप्ति होती है । वे स्वयं कल्याण रूप हैं, कल्याण करनेवाले हैं, सबका हित करनेवाले हैं, सर्वदर्शी हैं और सब पदार्थोंको जाननेवाले

१ आत्मा । २ मम सम्बन्धि ममकारः । जीवाजीवावित्यर्थः । अहं ममेत्येतद्द्वयमव्ययपदम् । ३ पुण्यपापसहिता एते नवपदार्थाः । ४ षड्नय अ०, प०, ल० । षड्रूप द० । षट्प्रकार । ५ यस्मात् कारणात् । ६ ध्येयं ल०, इ०, म० । ७ सप्तभङ्गिरूपविचारैर्भास्वराः । ८ वचनरचनाः । ९ शब्दः । १० ज्ञानम् । ११ अवस्थाम् । १२ कृतकृत्यः । १३ जिनः । १४ –शुद्धये अ०, प०, नि०, म०, द०, इ०, स० । १५ अशरीरः । १६ ध्येयगां-ल०, म०, द०, प० । १७ सर्वहितः । १८ सर्वदर्शी । १९ पदार्थ ।

स साकारोऽप्यनाकारो निराकारोऽपि साकृतिः । [1]स्ववसात्कृताखिलज्ञेयः सुज्ञानो[2] ज्ञानचक्षुषाम् ११७
मणिदर्पणसङ्क्रान्तच्छायात्मेव[3] स्फु[4]टाकृतिम् । दधज्जीवघनाकारम् अमूर्तो[5]ऽप्यचलस्थितिः ॥११८॥
वीतरागोऽप्यसौ ध्येयो[6] भव्यानां भवविच्छिदे । विच्छिन्नबन्धनस्यास्य तादृग्नैसर्गिको गुणः॥११९॥
अथवा स्नातकावस्थां[7] प्राप्तो घातिव्यपायतः । जिनोऽर्हन् केवली ध्येयो बिभ्रत्तेजोमयं वपुः ॥१२०॥
रागाद्यविद्या[8]जयनाज्जिनोऽर्हन् घातिनां हतेः । स्वात्मोपलब्धितः सिद्धो बुद्धस्त्रैलोक्यबोधनात् ॥१२१॥
त्रिकालगोचरानन्तपर्यायो[9]पचितार्थदृक् । विश्वज्ञो विश्वदर्शी च विश्वसाद्भूतचिद्गुणः ॥१२२॥
केवली केवलालोकविशालामललोचनः । घातिकर्मक्षयादाविर्भूतानन्तचतुष्टयः ॥१२३॥
द्विष[10]ड्भेदगणाकीर्णां सभावनिमधिष्ठितः । प्रातिहार्यैरभिव्यक्तत्रिजगत्प्राभवो विभुः ॥१२४॥

अर्थात् सर्वज्ञ हैं ॥११६॥ वे भगवान् साकार होकर भी निराकार हैं और निराकार होकर भी साकार हैं । यद्यपि उन्होंने जगत्के समस्त पदार्थोंको अपने आधीन कर लिया है अर्थात् वे जगत्के समस्त पदार्थोंको जानते हैं परन्तु उन्हें ज्ञानरूप नेत्रोंके धारण करनेवाले ही जान सकते हैं ॥ भावार्थ–वे सिद्ध भगवान् कुछ कम अन्तिम शरीरके आकार होते हैं इसलिये साकार कहलाते हैं परन्तु उनका वह आकार इन्द्रियज्ञानगम्य नहीं है इसलिये निराकार भी कहलाते हैं । शरीररहित होनेके कारण स्थूलदृष्टि पुरुष उन्हें यद्यपि देख नहीं पाते हैं इसलिये वे निराकार हैं, परन्तु प्रत्यक्ष ज्ञानी जीव कुछ कम अन्तिम शरीरके आकार परिणत हुए उनके असंख्य जीव प्रदेशोंको स्पष्ट जानते हैं इसलिये साकार भी कहलाते हैं । यद्यपि वे संसारके सब पदार्थोंको जानते हैं परन्तु उन्हें संसारके सभी लोग नहीं जान सकते, वे मात्र ज्ञानरूप नेत्रके द्वारा ही जाने जा सकते हैं ॥११७॥ रत्नमय दर्पणमें पड़े हुए प्रतिबिम्बके समान उनका आकार अतिशय स्पष्ट है । यद्यपि वे अमूर्तिक हैं तथापि चैतन्य रूप घनाकारको धारण करनेवाले हैं और सदा स्थिर हैं ॥११८॥ यद्यपि वे भगवान् स्वयं वीतराग हैं तथापि ध्यान किये जानेपर भव्य जीवोंके संसारको अवश्य नष्ट कर देते हैं । कर्मोंके बन्धनको छिन्न-भिन्न करनेवाले उन सिद्ध भगवान्का वह उस प्रकारका एक स्वाभाविक गुण ही समझना चाहिये ॥११९॥ अथवा घातिया कर्मोंके नष्ट हो जानेसे जो स्नातक अवस्थाको प्राप्त हुए हैं और जो तेजोमय परमौदारिक शरीरको धारण किये हुए हैं ऐसे केवलज्ञानी अर्हन्त जिनेन्द्र भी ध्यान करने योग्य हैं ॥१२०॥ राग आदि अविद्याओंको जीत लेनेसे जो जिन कहलाते हैं, घातिया कर्मोंके नष्ट होनेसे जो अर्हन्त (अरिहन्त) कहलाते हैं शुद्ध आत्मस्वरूपकी प्राप्ति होनेसे जो सिद्ध कहलाते हैं और त्रैलोक्यके समस्त पदार्थोंको जाननेसे जो बुद्ध कहलाते हैं, जो तीनों कालोंमें होनेवाली अनन्त पर्यायोंसे सहित समस्त पदार्थोंको देखते हैं इसलिये विश्वदर्शी (सबको देखनेवाले) कहलाते हैं और जो अपने ज्ञानरूप चैतन्य गुणसे संसारके सब पदार्थोंको जानते हैं इसलिये विश्वज्ञ (सर्वज्ञ) कहलाते हैं । जो केवलज्ञानी हैं, केवलज्ञान ही जिनका विशाल और निर्मल नेत्र है, तथा घातिया कर्मोंके क्षय होनेसे जिनके अनन्तचतुष्टय प्रकट हुआ है, जो बारह प्रकारके जीवोंके समूहसे भरी हुई सभाभूमि (समवसरण) में विराजमान हैं, अष्ट प्रातिहार्योंके द्वारा जिनकी तीनों जगत्की प्रभुता प्रकट हो

---

१ स्वाधीनीकृतनिखिलज्ञेयपदार्थः । २ सुज्ञातो ल०, म० । शोभनज्ञानः अथवा सुज्ञाता । ३ छायास्वरूपमिव । ४ स्फुटाकृतिः द०, ल०, म०, प० । ५ अमूर्तोऽपीत्यत्र परमतकथितवाटवादीनाममूर्तत्वचरणात्मकत्वनिरासार्थमचलस्थितिरित्युक्तम् । ६ –ध्यातो भव्या– द०, ल०, म०, अ०, प० । ७ परिपूर्णज्ञानपरिणतिम् । ८ अज्ञान । ९ गुणपर्यायवद्द्रव्यम् । १० द्वादशभेद ।

नियताकृतिरप्येष विश्वरूपः स्वचिद्गुणैः । सङ्क्रान्ता[1]शेष[2]विज्ञेयप्रतिबिम्बानुकारतः ॥१२५॥
विश्वव्यापी स विश्वार्थव्यापि विज्ञानयोगतः । विश्वास्यो[3] विश्वतश्चक्षुर्विश्वलोकशिखामणिः ॥१२६॥
संसारसागराद् दूरम् उत्तीर्णः [4]सुखसाद्भवः । विधूतसकलक्लेशो विच्छिन्नभवबन्धनः ॥१२७॥
निर्भयश्च निराकाङ्क्षो[5] निराबाधो निराकुलः । निर्व्यपेक्षो[6] निरातङ्को नित्यो निष्कर्मकल्मषः[7] ॥१२८॥
नवकेवललब्ध्यादिगुणारब्धवपुष्टरः[8] । अभेद्य[9]संहतिर्वज्रशिलोत्कीर्ण इवाचलः ॥१२९॥
स एवं लक्षणो ध्येयः परमात्मा परः पुमान् । परमेष्ठी परं तत्त्वं परमज्योतिरक्षरम् ॥१३०॥
साधारणमिदं ध्येयं ध्यानयोर्धर्म्यशुक्लयोः । विशुद्धि[10]स्वामिभेदात्तु [11]तद्विशेषोऽवधार्यताम् ॥१३१॥
प्रशस्तप्रणिधानं[12] यत् स्थिरमेकत्र वस्तुनि । तद्ध्यानमुक्तं मुक्त्यङ्गं धर्म्यं शुक्लमिति द्विधा ॥१३२॥

रही है, जो सर्वसामर्थ्यवान् हैं, जो यद्यपि निश्चित आकारवाले हैं तथापि अपने चैतन्यरूप गुणोंके द्वारा प्रतिबिम्बित हुए समस्त पदार्थोंके प्रतिबिम्ब रूप होनेसे विश्वरूप हैं अर्थात् संसार के सभी पदार्थोंके आकार धारण करनेवाले हैं, जो समस्त पदार्थोंमें व्याप्त होनेवाले केवल ज्ञानके सम्बन्धसे विश्वव्यापी कहलाते हैं, समवसरण-भूमिमें चारों ओर मुख दिखनेके कारण जो विश्वास्य (विश्वतोमुख) कहलाते हैं, संसारके सब पदार्थोंको देखनेके कारण जो विश्वतश्चक्षु (सब ओर हैं नेत्र जिनके ऐसे) कहलाते हैं, तथा सर्वश्रेष्ठ होनेके कारण जो समस्त लोकके शिखामणि कहलाते हैं, जो संसाररूपी समुद्रसे शीघ्र ही पार होनेवाले हैं, जो सुखमय हैं, जिनके समस्त क्लेश नष्ट हो गये हैं और जिनके संसाररूपी बन्धन कट चुके हैं, जो निर्भय हैं, निःस्पृह हैं, बाधारहित हैं, आकुलतारहित हैं, अपेक्षारहित हैं, नीरोग हैं, नित्य हैं और कर्मरूपी कालिमासे रहित हैं; क्षायिक, ज्ञान, दर्शन, लाभ, भोग, उपभोग, वीर्य, सम्यक्त्व और चारित्र इन नौ केवललब्धि आदि अनेक गुणोंसे जिनका शरीर अतिशय उत्कृष्ट है, जिनका कोई भेदन नहीं कर सकता और जो वज्रकी शिलामें उकेरे हुए अथवा वज्रकी शिलाओं से व्याप्त हुए पर्वतके समान निश्चल हैं—स्थिर हैं, इस प्रकार जो ऊपर कहे हुए लक्षणों से सहित हैं, परमात्मा हैं, परम पुरुष रूप हैं, परमेष्ठी हैं, परम तत्त्व स्वरूप हैं, परमज्योति (केवलज्ञान) रूप हैं और अविनाशी हैं ऐसे अर्हन्तदेव ध्यान करने योग्य हैं ॥१२१-१३०॥ अभी तक जिन ध्यान करने योग्य पदार्थोंका वर्णन किया गया है वे सब धर्म्यध्यान और शुक्ल ध्यान इन दोनों ही ध्यानोंके साधारण ध्येय हैं अर्थात् ऊपर कहे हुए पदार्थोंका दोनों ही ध्यानों में चिन्तवन किया जा सकता है। इन दोनों ध्यानोंमें विशुद्धि और स्वामीके भेदसे ही परस्पर-में विशेषता समझनी चाहिये। भावार्थ—धर्मध्यानकी अपेक्षा शुक्ल ध्यानमें विशुद्धिके अंश बहुत अधिक होते हैं, धर्म्य ध्यान चौथे गुणस्थानसे लेकर श्रेणी चढ़नेके पहले पहले तक ही रहता है और शुक्ल ध्यान श्रेणियोंमें ही होता है। इन्हीं सब बातोंसे उक्त दोनों ध्यानोंमें विशेषता रहती है ॥१३१॥ जो किसी एक ही वस्तुमें परिणामोंकी स्थिर और प्रशंसनीय एकाग्रता होती है उसे ही ध्यान कहते हैं, ऐसा ध्यान ही मुक्तिका कारण होता है। वह ध्यान धर्म्य ध्यान और

१ संलग्न। २ निःशेषज्ञेयवस्तु। ३ विश्वतोमुखः। ४ सुखाधीनभूतः। सुखसाद्भवन् ल०, म०, द०। ५ धनादिवाञ्छारहितः। ६ किमप्यनपेक्ष्य भक्तानां सुखकारीत्यर्थः। ७ कर्ममलरहितः। ८ अतिशयवपुः 'अतिशयार्थे तरप् भवति'। ९ अभेद्यशरीरः। १० सकषायस्वरूपा अकषायस्वरूपा च विशुद्धिः। अथवा परिणामः, स्वामी कर्ता विशुद्धिश्च स्वामी च तयोर्भेदात्। ११ ध्यानविशेषः। १२ परिणामः।

[1]तत्रानपेतं यद्धर्मात्तद्ध्यानं धर्म्यमिष्यते । धर्म्यो हि वस्तुयाथात्म्यम् उत्पादादि[2]त्रयात्मकम् ॥१३३॥
तदाज्ञापायसंस्थानविपाकविचयात्मकम् । चतुर्विकल्पमाम्नातं ध्यानमाम्नाय[3]वेदिभिः ॥१३४॥
तत्राज्ञेत्यागमः सूक्ष्मविषयः प्रणिगद्यते । [4]दृश्यानुमेयवर्ज्ये हि श्रद्धेयांशे [5]गतिः श्रुतेः[6] ॥१३५॥
श्रुतिः सूनृतमाज्ञाप्तवचो वेदाङ्गमागमः । आम्नायश्चेति पर्यायैः सोऽधिगम्यो मनीषिभिः ॥१३६॥
अनादिनिधनं सूक्ष्मं सद्भू[7]तार्थप्रकाशनम् । पुरुषार्थोपदेशित्वाद् यद्भूतहितमूर्जितम् ॥१३७॥
अजय्यममितं [8]तीर्थ्यैः अनालीढमहोदयम् । महानुभावमर्थावि[9]गाढं गम्भीरशास[10]नम् ॥१३८॥
परं प्रवचनं [11]सूक्तमाप्तोपज्ञमनन्यथा[12] । मन्यमानो मुनिर्ध्यायेद् भावानाज्ञावि[13]भावितान् ॥१३९॥
जैनीं प्रमाणयन्नाज्ञां योगी योगविदां वरः । ध्यायेद्धर्मास्तिकायादीन् भावान् सूक्ष्मान् यथागमम् ॥१४०॥
आज्ञाविचय एष स्याद् अपायविचयः पुनः । ताप[14]त्रयादिजन्माब्धिगतापायविचिन्तनम् ॥१४१॥

